2798

354

F.

#7 After 29

Double nos. 21, 38, 53, 107, 127, 158, 159,
176, 247, 25[illegible], [illegible] and 308

complete.

अर्जुन उवाच ॐ संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुं त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १ ॥

शांकरभाष्यं १

सर्वस्यैव गीताशास्त्रस्यार्थोऽस्मिन्नध्याये उपसंहृत्य सर्वश्च वेदार्थो वक्तव्य इत्येवमर्थोऽयमध्याय आरभ्यते सर्वेषु ह्यतीतेष्वध्यायेषु उक्तोऽर्थोऽस्मिन्नध्यायेऽवगम्यते अर्जुनस्तु संन्यासत्यागशब्दार्थयोरेव विशेषबुभुत्सुरुवाच संन्यासस्येति संन्यासस्य संन्यासशब्दार्थस्य इत्येतत् हे महाबाहो तत्त्वं तस्य भावस्तत्त्वं याथात्म्यमित्येतत् इच्छामि वेदितुं ज्ञातुं त्यागस्य च त्यागशब्दार्थस्येत्येतत् हृषीकेश पृथक् इतरेतरविभागतः केशिनिषूदन केशिनामा कश्चित् असुरस्तं निषूदितवान् भगवान् वासुदेवस्तेन तन्नाम्ना सम्बोध्यतेऽर्जुनेन ॥ १ ॥

आनन्दगिरिकृतटीका २

पूर्वैरध्यायैर्विस्तरेण यदुक्तं तत्त्वविविक्तमयोक्तमर्थं स्वरूपतोपपत्त्यं संक्षेपेणोपसंहृत्याभिधातुमध्यायान्तरमवतारयति सर्वस्यैवेति उपसंहृत्य वक्तव्य इति सम्बन्धः किञ्चोपनिषत्सु यत्तत्त्वतो विस्तरेणार्थस्य बहिरोक्तार्थमस्मिन्नध्याये संक्षिप्याभिधाने कर्तव्यमुपनिषदो गीतानां चैकार्थ्यात् तदित्याह सर्वश्चेति कथं सर्वोऽपि शास्त्रार्थोऽस्मिन्नध्याये संक्षिप्योपसंह्रियते तत्राह सर्वेषु हीति ननु वेदार्थैकदेशविषयत्वोक्तेः सञ्जिहीर्षितस्तर्हि किमिति त्यागेनैके संन्यासयोगादिति च वेदार्थैकदेशविषयं प्रश्नप्रतिवचनं तत्राह अर्जुनस्त्विति पृथगनयोस्तत्त्वं वेदितुमिच्छामीति विशेषणात् पृथग्गर्भितयोरन्योन्यतिरेकते बुभुत्सितस्य प्रष्टव्यत्वादेकदेशे तदभावाद्वक्तुमनुपपत्तिरिति भावः ॥ १ ॥

स्वामिकृतटीका ३

त्यागसंन्यासविभागेन सर्वगीतार्थसंग्रहं स्पष्टमष्टादशेऽप्याह परमार्थविनिर्णये अत्र सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी संन्यासयोगयुक्तात्मेत्यादिषु कर्मसंन्यास उपदिष्टः तथा त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः सर्वकर्मफलत्यागं ततः कुरु यतात्मवानित्यादिषु फलमात्रत्यागो

नकर्मानुष्ठानमुपदिष्टं नचपरस्परविरुद्धं सर्वज्ञः परमकारुणिको भग
वानुपदिशेत् अतः कर्मसंन्यासस्य तदनुष्ठानस्य चाविरोधप्रकारं बुभुत्सु
रर्जुन उवाच संन्यासस्येति भो हृषीकेश सर्वेन्द्रियनियामक हे केशिनिसू
दन केशिनाम्नो हि महतो हयाकृतेर्दैत्यस्य सुरैरप्यवध्यस्यापि तमा
गच्छतः अश्वेनेवास्येन मुखे वामबाहुं प्रवेश्य तत्क्षणमेव विवर्धितेनैव बा
हुना कर्कटिकाफलवत्तं विदार्य निसूदितवान् अतएव हे महाबाहो इति
संबोधने संन्यासस्य त्यागस्य च तत्त्वं पृथग्विवेकेन वेदितुमिच्छामि १॥

वैष्णवभाष्यटीका ॥ ४

सर्वेष्वध्यायेषु भगवता बहुशः संन्यासः त्यागो निर्दिष्टः अनयोर्विवेकेन त
योः स्वरूपबुभुत्सया अर्जुन उवाच संन्यासलक्षणस्यार्थस्य तत्त्वं याथात्म्यं वे
दितुमिच्छामि पृथक्त्यागस्य स्वरूपं चाहं त्यागस्यापि स्वरूपं वेदितुमिच्छा
मि केशिनामकस्य हयरूपधारिणोऽसुरस्य निसूदितवान् वासुदेवस्तस्य संबो
धने १॥

रामानुजभाष्यटीका ५

अतीतेनाध्यायद्वयेनाभ्युदयनिःश्रेयससाधनभूतं वैदिकमेव यज्ञतपोदाना
दिकर्मजातं वैदिकस्य कर्मणो सामान्यलक्षणं प्रणवान्वयः तत्र मोक्षा
भ्युदयसाधनयोर्भेदस्तत्स्वरूपं निर्देशपूर्वेन मोक्षसाधनं च कर्मफलाभि
संधिरहितं यज्ञादिकं तदारम्भे च सत्त्वोद्रेकाद्भवति सत्त्ववृद्धिश्च सात्त्विका
हारसेवया इत्युक्तं अनन्तरं मोक्षसाधनतया निर्दिष्टयोस्त्यागसंन्यासयोरै
क्यं त्यागस्य च स्वरूपं भगवति सर्वेश्वरे च सर्वकर्मणां कर्तृत्वानुसंधानं
सत्त्वरजस्तमसां कार्यवर्णनेन सत्त्वगुणवश्यतापादनं स्ववर्णोचितानां
कर्मणां परमपुरुषाराधनभूतानां परमपुरुषप्राप्तिनिर्वर्तनप्रकारं कृ
त्स्नस्य गीताशास्त्रस्य सारार्थो भक्तियोगः इत्येते प्रतिपाद्यन्ते तत्र तावत्त्या
गसंन्यासयोः पृथक्त्वैकत्वेन स्वरूपनिर्णयाय चार्जुनः पृच्छति अ
र्जुन उवाच संन्यासस्येति त्यागसंन्यासौ हि मोक्षसाधनतया विहितौ नक
र्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः वेदान्तविज्ञानसुनिश्चिता
र्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ते ब्रह्मलोके तु परान्तकाले परामृता
त्परिमुच्यन्ति सर्वे इत्यादिषु संन्यासस्य त्यागस्य च तत्त्वं पृथग्वे
दितुमिच्छामि अयमभिप्रायः किमेतौ संन्यासत्यागशब्दौ पृथगर्थौ उत

प्रकारैर्यद्यपृथगर्थौतथापृथक्त्वेनस्वरूपंवेदितुमिच्छामिपृथक्त्वेपित
स्यस्वरूपंवक्तव्यमिति १ ॥ अभिनवगुप्तकृतटीका ६
सर्वस्वकर्मसंन्यासःसचत्रद्विमानिति तथासंन्यासीचयोगीचननिरग्निर्नचा।
मादिष्वतत्त्यागिसंन्यासिनोर्द्वयोः श्रवणाद्विशेषजिज्ञासोरयंप्रश्नः १ ॥

परमार्थप्रपाटीका ७ ॥

देवेनर्थामिस्वरूपेणशरणागतेदर्शिते निजस्वरूपेनवेदेगोविंदमर्जुन
मन्वये [illegible] सर्वपंचमाध्यायेसर्वकर्माणिमनसासंन्यस्येतितथासं
न्यासयोगयुक्तात्माविमुक्तोमामुपैष्यसीत्यादिवाक्यैः कर्मसंन्यासः प्र
शंसितः अनंतरंसर्वकर्मफलत्यागंततःकुर्वित्यादिनाफलमात्रत्यागे
नकर्मानुष्ठानमुपदिष्टंतत्परस्परविरुद्धमितिसंदेहेतयोस्तत्वंजिज्ञा
सुरर्जुनःपुनःपृच्छतिसंन्यासस्येति भोहृषीकेशसर्वेंद्रियेशस्वा
मिन्संन्यासफलत्यागस्यचतत्त्वंरहस्यंपृथग्वेदितुंपृथकप्रकारेण
ज्ञातुंइच्छामिकेशिनाम्नोहयाकृतेर्दैत्यस्यमुखे [illegible] वर्द्धमानवामबाहु ऽमुखे
प्रसारप्रवेशेन [illegible] तेनिषूदितवान्नाशितवानतएवमहाबाहोइतिसं
बुद्धिः केश्यादिमहादैत्यदारणसमर्थस्त्वनवासमन्देहापकरण
क्रियानायासेनसमर्थः १ ॥

वनमाली टीका ८ ॥

सर्वाध्यायैःप्रकीर्णानिज्ञानादीन्यब्रवीद्धरिः कृपयाष्टादशेतानि
संग्रहादाहसंक्षये सर्वाध्यायेषुहार्दैर्वैविध्यात्कर्मणोवैविध्यस्व
ने इदानींतत्संन्यासत्रैविध्यकथनेनसंन्यासिनामपित्रैविध्यंवाच्य
तत्रतत्वबोधानपरंयःफलंभूतःसर्वकर्मसंन्यासःसचनदशेगुणा।
तीतत्वेनव्याख्यातत्वात् सात्त्विकराजसतामसभेदमर्हतियोपि
नतत्वबोधात्प्राक्दर्शीसर्वकर्मसंन्यासस्तत्वबुभुत्स्यावेदांतवाक्यविचा
रायभवतिसोपित्रैगुण्यविषयावेदा निस्त्रैगुण्योभवार्जुनेत्यादि
नागुणातीतत्वेनव्याख्यातः यस्तुसत्व [illegible] त्वबोधनामनसंतन्नत २४
त्वबुभुत्सुनोचकर्मसंन्यासः संन्यासीचयोगीचेत्यादिनागौणोव्या
ख्यातस्यत्रैविध्यसंभवाद्विशेषजिज्ञासुःपृच्छतिसंन्यासस्येति हृषि
केशमनउपज्ञानविविदिषायांचकर्माधिकृतानामेवकिंचित्कर्मप
रित्यागोयःसत्यागशब्देनयोगात्संन्यासशब्देनोच्यते यत्तादृशस्यानः

गी॰
टी॰
प्र॰

करणात्वार्थमविहत्कर्माधिकारिकर्तृकसंन्या[त्या]गसमकेवचिद्रूपेण
कर्मत्यागस्य तत्त्वस्वरूपं रजस्तमसात्विकराजसतामसभेदेन वेदितुमिच्छा
मि त्यागस्य च तत्त्वं वेदितुमिच्छामि किं त्यागसंन्यासशब्दौ घटपटशब्दा
विव भिन्नजातीयार्थौ किं वा ब्राह्मणपरिव्राजकशब्दाविवैकजातीयार्थौ।
यद्याद्यस्तर्हि त्यागस्य तत्त्वं संन्यासात्पृथग्वेदितुमिच्छामि यदि द्वि
तीयस्तर्हि त्वं तयोरवान्तरभेदमात्रं वक्तव्यं एकमात्राख्यानेनैवोभयमाख्या
तं भविष्यतीति महाबाहो केशिनिसूदनेति संबोधनाभ्यां बाह्याभ्यन्तरवैरि
वारणस्वरूपयोग्यतामात्रं फलोपधानं प्रदर्शितं हृषीकेशेत्यनेन तु स्वरूपेण वा
वारणसामर्थ्यमिति भेदः अत्र न रागाद्वेषो वानवद्यं अत्रार्जुनस्यायं हि
प्रश्नो धर्माधिकारिकर्तृकत्वेन पूर्वोक्तयज्ञादिसाधर्म्येण संन्यासशब्द
प्रतिपाद्यत्वेन वर्णितात्संन्यासरूपसाधर्म्याद्वैराग्यं संभवासंभवा
भ्यां संशयः अत्रास्य बीजं द्वितीयस्य तु संन्यासत्यागशब्दयोः पर्याय
त्वात्कर्मतत्फलत्यागरूपेणाविलक्षणापेक्षः संशयः १॥

अथमेवजयतीटीका १॥

अष्टादशेऽखिलानर्थान्गीतायास्संस्मरन्प्रभुः
स्यार्थसारथिः पठेतावज्ञेयादेशप्रकृतिपुरुषयोः प्रपेदे तनिगोप्यत्वमत्र वि
ननिरूपणं च नहदेशे जीवानां संसारादिप्रकृतिगुणायोगात्संसारश्चाभिस्व
हियोगात्त्रिवृत्तिश्च पंचदशे प्रकृतिपुरुषात्मकस्य संसारवृक्षस्य मूल
ज्ञानात्त्रिवृत्तिर्भगवत्पुरुषोत्तमज्ञानेवेदितं चतुर्थे द्वादशेशास्त्रीयकर्मक
र्तृणां देवत्वेन स्वर्गादिफलमशास्त्रीयकर्मकर्तृणामासुरत्वेन नरकादि
फलं सप्तदशे सात्त्विकश्रद्धावतां शास्त्रीयसात्त्विकयज्ञादिकर्मकर्तृणां
देवत्वं राजसतामसश्रद्धावतामशास्त्रीयराजसतामसयज्ञादिकर्म
कर्तृत्वेनासुरत्वं वेदितं इदानीमष्टादशेऽध्याये त्यागसंन्यास
योस्स्वरूपनिरूपणं सर्वेषां कर्मणां तत्फलस्य च भगवदर्पणेन त्वा
दिगुणाकार्यवर्णनेन सत्त्वगुणस्योपादेयत्वं सर्वस्य गीताशास्त्रस्य भक्तिप्र
तिनिरूपणं च सारार्थः इत्येतेनानाद्यभगवत्प्रतिपाद्येनेत्यत्र सर्वकर्म
णामनसा संन्यस्यात्ते सर्वाणि कर्माणि मयि संन्यस्याध्यात्मचेतसा (?) कर्म
गतिसंन्यासोनिराशीरनिर्ममो भूत्वा युध्यस्व इत्यनेनापि कर्मफलत्या
गवंतः कृतसंन्यासपरा स्तिहेमहाबाहो उत्कृष्टानमेदे हृषीकेशे इत्यनियतं

हे केशिनिसूदन केशिनामासुरहन्तः संन्यासस्य वेदान्तविज्ञानसुनिश्चि
तार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ते ब्रह्मलोकेषु परान्तकाले परामृ
तात्परिमुच्यन्ति सर्वे इत्यादिवाक्यप्रतिपाद्यस्य च श्रवणलक्षणस्य कर्मणां
न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरित्यादिप्रतिपाद्यस्य च
विवेकेन तत्त्वं याथात्म्यस्वरूपं वेदितुं ज्ञातुमिच्छामि यदि त्यागसंन्यासौ
द्वे रूपे स्वाविवक्षितानीयो तर्हि तयोरवान्तरोपाधिमात्रेणैव भिन्न
वास्तवं अभिन्नमेव रूपं तद्वेदितुमिच्छामि यदि च पृथक्पदं नाविवक्षिता
तीयो तर्हि तयोः स्वाभाविकं भिन्नमेव रूपं तच्चापि वेदितुमिच्छामीत्य
भिप्रायः महाबाहो इत्यनेन सामर्थ्यकलत्वप्रकाशनेनाज्ञानवाह्यता।
त्वदेकरूपत्वमन्वानस्त्वत्तोऽस्यतं पृतयोः स्वरूपं वदेति सूचितं हृषीके
शेत्यनेन तव सर्वेन्द्रियप्रेरकत्वान्मम बुद्धिं सात्त्विके एव कर्मणि त्वं प्रेर
य न तु राजसतामसकीर्णेषु इति द्योतितम् केशिनिसूदनेत्यनेन य
था त्वं केशिदैत्यं हत्वा देवमनुष्यादीनां सुखं महत्तथा संदेहरूपं मम
देहत्वा मम सुखं देहीति सूचितम् १ ॥

मधुसूदनी टीका १ ॥

ॐ पूर्वाध्याये श्रद्धात्रैविध्येनाहारयज्ञतपोदानत्रैविध्येन च कर्मणां
त्रैविध्यमुक्तं सात्त्विकानामादानाय राजसतामसानां च हानाय तदा
नीं तं संन्यासत्रैविध्यकथनेन संन्यासिनामपि त्रैविध्यं वक्तव्यं तत्र त
त्त्वबोधानन्तरं यः फलभूतः सर्वकर्मसंन्यासः चतुर्दशाध्याये गुणाती
तत्वेन व्याख्यातस्तस्य सात्त्विकराजसतामसभेदमर्हति यो पि तत्त्व
बोधात् प्राक्तनः सर्वकर्मसंन्यासस्तत्त्वबुभुत्सया वेदान्तवाक्यवि
चाराय भवति सोऽपि त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनेत्या
दिना निर्गुणत्वेन च व्याख्यातः यस्त्वन्यस्तत्त्वबोधानामनन्तरपतन
त्वबुभुत्सानां च कर्मसंन्यासः स संन्यासी च योगी चेत्यादिना गौणो
व्याख्यातः तत्त्रैविध्यसंभवान्नहि शेषत्वमन्तुः श्रविदुषामनन्य। अर्जुन उवाच
ज्ञानविविदिषाणां च कर्माधिकृतानामेव किंचित्कर्मपरिग्रहेण।
किंचित्कर्मपरिग्रहेण किंचित्कर्मपरित्यागोऽयः संन्यासांशस्त्यागो।
गासंन्यासशब्देनोच्यते एतादृशसंन्यासःकरणशुद्ध्यर्थमविहितकर्मा।

धिकारिकर्तृकस्य संन्यासस्य केनचिद्रूपेण कर्मत्यागस्य तत्त्वं स्वरू
पं पृथक्त्वाविकरणं संन्यासत्यागभेदेन वेदितुमिच्छामि त्यागस्य च तत्त्वं
वेदितुमिच्छामि किं संन्यासत्यागशब्दौ घटपटशब्दाविव भिन्नजाती
यार्थौ किं वा ब्राह्मणपरिव्राजकशब्दाविव एकजातीयार्थौ यद्या।
द्यस्तर्हि त्यागसंन्यासत्वेन संन्यासत्यागस्य पृथग्वेदितुमिच्छामि यदि द्वितीयस्त।
र्हि सर्वोपाधिभेदमात्रं वक्तव्यं एकव्याख्यानेनैवोभयव्याख्यानं
भविष्यति महाबाहो हे केशिनिसूदनेति संबोधनाभ्यां बाह्योपद्रव
निवारणस्वरूपयोग्यताफलोपदानेन प्रदर्शिते हृषीकेशेत्यनेन रूपद्र
वनिवारणसामर्थ्यमिति भेदः अत्र नरागात्संबोधनद्वयं अर्जु
नस्य हीदृक्कर्माधिकारिकर्तृत्वेन सर्वकयज्ञादिसाधर्म्येण संन्या
सशब्दप्रतिपाद्यत्वेन च गणनीतं संन्याससहयसाधर्म्यं णत्वेत्रणं सं
भवासंभवाभ्यां संशयः प्रथमस्य अस्य बीजं द्वितीयस्य तु संन्यास
त्यागशब्दयोः पर्यायत्वात्कर्मतत्फलत्यागरूपेणैव वैलक्षण्योक्तेः
संशयो बीजं १ ॥

सदानंदी टीका ॥ ॥

श्रीवेदान्तेद्यं स्वनिगमशिरसां भावविषयं मुनीन्द्राराध्यं परमपद।
मीशानमकलं विश्वव्यासं नत्वा सपदि सुजनैः प्राप्यममलम्
ऊँदं वन्देऽहं भ्रमतिमिरविध्वंसिचरणं १ शरण्यं सर्वस्याँ सनक
मरविसरिद्दृष्टं महायोगेशाने सुरनरजगद्धेतुममलं चिदा
नंदाकारं सकलरससारं हरिपदं सदास्मारं स्मारं भवजलधिपारं स्वक
लये २ प्राग्विद्विमनयाश्लोके विस्तरेणायतस्ततः शास्त्रार्थसंप्र
हस्याधुना संक्षेपतो लिखे ३ अनायासेन बोधार्थमभिधानस्वपक्ष
मः गीताशास्त्रस्य सर्वस्याध्याये स्मिन्नर्थसंग्रहः ४ वेदार्थस्य च स
र्वस्य वक्तव्योऽस्तीत्यतोऽर्जुनः पृच्छत्यैविध्यतः सर्वाध्याये यज्ञादि।
कर्मणा ५ त्रैविध्यनकर्माकर्णय संन्यासेष्यस्तिसंभवः त्रैविध्य
स्येति जिज्ञासुः स्तवाच श्रीहरिं प्रति ६ कर्माधिकारिणामेव किंचि
न्कर्मपरिग्रहात् किंचित्कर्मपरित्यागस्त्यागाशब्दाद्योगतः ७ सं
त्यासस्य पर्यायतः ८ पृथक्तत्त्वरूपमिच्छामि वेदितुं गुणभेदतः त्याग
स्य पर्यायतः ८ द्विविधकर्मकस्यापि संन्या।

स्यापि स्वरूपं च सम्यगिच्छामि वेदितुं ९ संन्यासत्यागशब्दौ किं भि
न्नार्थौ चैकवाचकौ आद्यश्चेत्तर्हि संन्यासात्त्यागस्य वैलक्षण्यक् १०
इच्छामि वेदितुमित्यनुषंगः केनोभयनिर्णयं ह्याभ्यां संबोधनाभ्यां च वाच्या
पद्ववारणं ११ सामर्थ्यादर्शयितुमागतदोषनिवारणे हृषीकेशेति
सामर्थ्यं भक्तानामिति दर्शितं १२ हरावत्यन्तरागाद्वा क्तेयं संबोधनत्रयं
१३ ॥ १ ॥

नीलकंठी टीका १२ ॥

अस्यामष्टादशाध्याय्यां प्रथमे तूपोद्घातितानां द्वितीये सूचितानां
शेषैर्वृत्त्यादिनानामध्यायानां कांडैर्विशेषेण संहारार्थोयमंतिमोध्यायः।
अत्र पूर्वे तत्र पूर्वाध्यायांते अश्रद्धयाकृतं सर्वं व्यर्थमित्युक्तं तत्र फ।
लावश्यंभावनिश्चयः श्रद्धासा च फलवतां कर्मणामेवांगतत्वेक
र्मविरहरूपस्य संन्यासस्याभावरूपफलवर्जितस्य अभावाद्भावोम
तेरयोगात् तस्माच्छ्रद्धासापेक्षकर्मायेत्यागश्रद्धानपेक्षः संन्यासः
श्रेयांश्च वा स्विदेकरूपस्य श्रद्धात्रैविध्यश्रुतेः सात्विकादिभेदेनत्रैविध्यं
संभवति येन फलतारतम्यं स्यात् न फलस्यादृष्टविशेषनिहितरू
पस्य सर्वत्र तुल्यत्वात् सर्वसंन्यासो यदि कर्मत्यागएव तर्हि सिद्धेनः
समीहितं यदि तु तौ भिन्नौ तर्हि तयोर्वैलक्षण्यं विचार्यमित्याश
येनार्जुन उवाच संन्यासस्येति हे महाबाहो हे हृषीकेश हे केशि
निषूदनेति बहुत्वात् संबोधनजिज्ञासितेर्थेऽत्यादरं दर्शयति
संन्यासस्य तत्त्वं याथात्म्यं त्यागात्पृथक् वेदितुमिच्छामि त्या
गस्य याथात्म्यं संन्यासात्पृथक् वेदितुमिच्छामीति चकारे
णानुवर्त्यते १ ॥

आनंदी टीका १२

अथैवं विदितवेद्यः स्वकर्मणामनुष्ठाने संशयविगमात्संजा
तोत्साहः प्राक् क्रियेयोरपि संन्यासत्यागशब्दार्थयोरस्मिन्
गीतासर्वार्थसिद्धांतेऽध्याये परीक्षया याथात्म्यं वेदितुमिच्छन्न
र्जुन उवाच किं सर्वेषां कर्मणां न्यासः ब्रह्मणि समर्पणं वा क
स्यचिदेव किमु फलमात्रस्येति तथा त्यागोपि किं सर्वेषां कर्म

श्री॰
गी॰ता
म॰टी॰

णांकिमेकस्यचित् किंवाफलमात्रस्येतिसंशयानः तन्नः पतन्म
त्वेयाथात्म्यंवेदितुमिच्छामि १॥

रामकंठीटीका १४

अथमामर्जुनः संपदंदैवीमभिजातोसिपांडवेतिभगवतस्तदनुग्रह
दर्शनासादितात्कृतपरस्वस्थस्य परमगुरोः परमप्रमाणभूताद्वचनादा
त्मनोयथोक्तदैवसर्गगुणसामग्रीसंपन्नत्वसंभावनयायथोपदिष्टा
र्थानुष्ठानपात्रतांप्रतिपाद्यावश्यकरणीयानांस्वकर्मणामनुष्ठानेस
मुपजातोत्साहस्तेषामपवर्गफलत्वेनकारणभूतयोः संन्यासत्याग
योः ज्ञेयः सनित्यसंन्यासीतथा यस्यसर्वेसमारम्भाः इत्यादिनाचसंक्षे
पतः पूर्वमवगतार्थयोरधुनाविस्तरतः परमार्थजिज्ञासमानोर्जु
नउवाच संन्यासस्तावत्संन्यसनंनस्यसस्वरूपपरिहाररूपवार्थः त्याग
स्यचहानमेवार्थइत्यनयोरेकार्थत्वात्किंपरस्परपर्यायत्वमुतभिन्ना
र्थता तत्कीदृशोर्थभेदोनयोरितिप्रश्नवीजंहृदिकृत्वासंन्यासस्यत्या
गस्यचतत्वंपरमार्थंपृथग्विवेकेनवेदितुंज्ञातुमिच्छामीत्यर्जुन
प्रश्नादनन्तरमनयोरेकार्थतांगभीकृत्योत्तरमाहभगवान् १॥

[illegible]टीका

अथसर्वगीतार्थस्यसंग्रहंकारयितुंसंन्याससत्यागयोः पूर्वंलक्षित
लक्षणयोरपिपार्थक्येनलक्षणबुभुत्सायस्तावनायार्जुनउवाच संन्यासेति
हेमहाबाहोहेकेशिनामासुरप्रध्वंसन संन्यासः स्वरूपपरिहारः
त्यागोहानमित्यनयोरेकार्थत्वात्किंपरस्परपर्यायत्वं उतभिन्ना
र्थत्वेपृथक्पृथग्विवेकेनसंन्यासत्यागयोस्तत्वंयाथात्म्यंज्ञातुमि
च्छामि [illegible] १

पयोलीटीका

सकलवेदार्थरूपगीतार्थः सप्तदशभिरध्यायैः निरूपितः ससर्वोपि
संक्षिप्यअस्मिन्नष्टादशाध्यायेनिरूप्यते तत्रसर्वेकर्माणिमनसासं
न्यस्यास्तेयोगयुक्तेत्यादिषुकर्मसंन्यासउपदिष्टः तथात्यक्त्वाकर्मफला
संगंसर्वकर्मफलत्यागंततःकुर्वित्यादिषुच फलत्यागेनकर्मानुष्ठान

मुपदिष्टं तत्र संन्याससमागशाह्लार्थयोः परस्परविरुद्धवदाभासमान
योः अविरुद्धतयाअवबोद्धुं तयोर्विशेषबुभुत्सुरर्जुन उवाच संन्या
सस्येति हेमहाबाहो हे हृषीकेशिनिसूदन संन्यासस्य संन्यासश।
ब्दार्थस्य तत्त्वं याथात्म्यं वयुक्तमत् मागस्य तत्त्वं याथात्म्यं पृथग्योगमवि
भागेन वेदितुमिच्छामि १॥

श्रीवीरसमिद्धोधिनी

श्रीकार्तवीर्यार्जुनाय नमः प्राग्विस्तरेण योग्यथितः समिद्धो योवि
कासयेत् अष्टादशेसोसंक्षिमार्थमावीरस्यमानं १ इत्थं पूर्वेण
ध्यायेन अह्लानुरूपैर्यज्ञैः सर्वकर्मणां सिद्धिस्तत्रापि दैवसर्गाभिजाता
नां सात्त्विकीअह्लानदग्नुरूपाण्येवयज्ञदानतपः प्रभृतीनि आशुफ
लत्वलक्षणं विविधं फलं फलंति आसुरस्वभावानां तु राजसीतामसी चे
ति द्विविधया श्रद्धयानुष्ठितानि तान्यथो लोकपापणेन दुःखाति
शयमेव जनयंतीति प्रतिपादितं तत्र च कस्मिन्सर्गे मम जन्म इति जि
ज्ञासायां दैवीसंपद्विमोक्षाय निबंधायासुरी मता मा शुचः संपदं
दैवीमभिजातोसि पांडवेत्येनेन भगवतः परमगुरोः प्रमाणभूतेन
वचनेन पूर्वमेव द्वयोरपि फलोद्भावनसहितं दैवसर्गगुणसामग्री
संपन्नत्वसंभावनोत्पादनाद्विषयीभूतायां तस्यां श्रवणोचितानां
मवमप कर्तव्यानां शुद्धयज्ञादिकर्मणामनुष्ठाने समुपजातोत्साहो
पि तेषां भगवत्साधुज्ञ्य प्राप्तौ संन्यासत्यागयोर्निमित्ततया श्रवणात्
सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी संन्यासयोगयुक्तात्मेत्या
दिषु कर्मसंन्यासस्य त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः स
र्वकर्मफलत्यागं ततः कुरु यतात्मवानित्यादिषु फलमात्रत्यागेन क
र्मानुष्ठानस्य प्राधान्यस्य स्मृतिपथारूढस्य परस्पर विरुद्धत्वमापात
समनंतरमेव संस्मृते पि ज्ञेयः स नित्यसंन्यासी तथा यस्य सर्वे समा
रंभा इत्यादिना च संन्यासत्यागयोः संक्षेपतो भगवताभिहितेस्वरू
पसमाधाने विस्तरतस्तयोः परमार्थं जिज्ञासमानोर्जुन उवाच
संन्यासस्येति सम्यग् न्यसनं सुष्ठुपरित्यागः संन्यासः स च ह्लानार्थत्यागा

दभिन्नएवेति किंपरस्परपर्यायत्वमुत सर्वथा कर्मणां परिहारः सं
न्यासः अवश्यमनुष्ठानपर्यवसितः फलमात्रपरिहारस्त्याग इति
भिन्नार्थत्वं आद्ये पृथगभिधानमनौचित्यान्नस्यादेव अन्त्ये प्रकाश
तमसोरिव कर्मानुष्ठानतत्यागयोरेकविषयतया युगपत्वासंभव
इत्यतः कीदृशोर्थभेदेन योरिति प्रश्नाभिप्रायः भो हृषीकेश सर्वे
न्द्रियनियामक तथा महाबाहो केशिनिसूदन नादृशो ते महंतो वा
हयोरेकतरेणमुखे व्यादायागतस्य हयाकृतेः केशिनाम्नो
दैत्यस्य मुखे प्रवेशिते न तत्क्षणमेव विवृद्धेन तं विदार्य निषूदित
वानसीति भावनेव सर्वेषामंतःकरणं नियम्य तत्तत्कर्मणि प्र
वृत्तिमुत्पादयति लोकरक्षार्थं च तानुक्तकर्मणो निवर्तयति अत्या
ग्रहश्चस्त्वादृशदिनस्तीति स्वाभाविकः श्यामो लासोयं तव क्रीडामात्रप्र
योजनस्ततो ममापि समुत्पादितः प्रवृत्तिप्रतिबंधकः संशयः स्व
यमेवाच्छेदितं संप्रति त्वमेवेति संबोधनत्रयाभिप्रायः १॥

मधुभाष्य

पूर्वोक्तं साधनं संक्षिप्योपसंहरत्यनेनाध्यायेन फलानि
च्छया करणेन वा काम्यकर्मन्यासः संन्यासः त्यागस्तु
फलत्याग एव तथाहि श्रीवीनपालस्मृतिः अनिच्छया
कर्मणा वापि काम्यन्यासो न्यासः फलत्यागस्तु त्याग इ
ति मनीषिण इति विशेषणात्पूर्वपक्षोपि शास्त्र एव फ
लत्यागो विवक्षितो यज्ञादेस्त्यक्ते यस्तु कर्मफलत्या
गीति च वक्ष्यति अतएवायं पक्षः तत्प्रकारं चाह १

भाषा अनुवाद

अब प्रथम समग्र अष्टादश अध्याय का तात्पर्य संक्षेप से श्रीधर
स्वामी कहते हैं कि भगवान श्रीकृष्ण ने समग्र गीताशास्त्र का जो
संग्रह अर्थ सोई परमार्थ है यह निर्णय करने के अर्थ अठारहें अ
ध्याय मे संन्यास औ त्याग भिन्न भिन्न करके स्पष्ट रूप से कहा है और स
र्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी यह ५ अध्याय का १३ श्लोक
औ शुभाशुभ फलैरेवं मोक्ष्यसे कर्मबंधनैः संन्यासयोगयुक्तात्मा वि
मुक्तो मामुपैष्यसि यह ९ अध्याय का २८ श्लोक औ त्यक्त्वा कर्मफ
लासंगं नित्यतृप्तो निराश्रयः यह ४ अध्याय का २० श्लोक औ सर्व
कर्मफलत्यागं ततः कुरु यतात्मवान् यह १२ अध्याय का ११ श्लोक
इन सब श्लोकों से और और अध्याय मे भी तीन तीन श्लोकों से फल
मात्र त्याग करके निष्काम समस्त कर्म करने का उपदेश दिया है प
रन्तु परम करुणामय सर्वज्ञ जो भगवान श्रीकृष्ण सो परस्पर वि
रुद्ध वचन कभी भी उपदेश न करैंगे इसी से कर्मों के त्याग औ क
र्मों के करने के विषय मे जिस प्रकार से विरोध न पड़े सोई जानने
की इच्छा करि अर्जुन कहते हैं कि हे हृषीकेश अर्थात् इंद्रियों के
नियामक प्रवर्तक और हे केशिनिसूदन केशी नाम दैत्य हुआ जो ली
ला के समय अश्व रूप धर के आया तो भगवान उसके मुख मे
अपना हाथ डाल ककरी के समान चीर डाल के डाल दिया।
या सोई कहा कि हे महाबाहो श्रीकृष्ण संन्यास औ त्याग शब्द
का तत्व अर्थ मे भिन्न भिन्न करके जाना चहत हौं सो कृपा कर
के कहिये १ ॥

दोहा

महाबाहु संन्यास कहत तत्व मे जान्यो चाहि त्यागहिको हृ
षीकेश भिन केशिसूदन याहि १ ॥

6

स्यात्कर्मणीयफलत्वात्कर्त्तव्यतयाख्याततिनित्यनैमित्तिककाम्यप्रति
षिद्धानिकर्म्माणि काम्यानिप्रत्युत कर्त्तव्यतयाशास्त्रोक्तानिकर्म्मणांकाम्यानां
स्वरूपेणत्यागः सर्वाणितानिकर्माणि नित्यनैमित्तिकसंज्ञितानितेषांफले
त्यागं इदंमेफलंस्यादितिसंकल्पत्यागंत्यागमाहुः विचक्षणाः पंडिताः
सर्वग्रहणेनकाम्यकर्मग्रहणंकस्मात्रत्याकाम्यकर्मत्यागेनतत्फलत्या
गस्यसिद्धत्वात्त्यागयोः संकीर्णसंगात्तस्मान्नित्यनैमित्तिकफलत्यागः २

रामानुजभाष्यटीका ५

श्रीभगवानुवाच प्रस्थानयोरेकमेवस्वरूपंतत्प्रदर्शयितुंनिर्णयंवादि
विप्रतिपत्तिंदर्शयन् केचनविद्वांसः काम्यानांकर्म्मणांन्यासंसंन्यासंकव
योविदुः सर्वकर्मफलत्यागएवमोक्षशास्त्रे त्यागशब्दार्थइतिप्राहुः न
त्वशास्त्रीयकाम्यकर्मस्वरूपविषयः संन्यासः सर्वकर्म्मफलविषयइति
विवादंप्रदर्शयन्नेकेनत्यागसंन्यासशब्दावितरत्रत्यागः त्यागशब्दप्रयुक्तवान्
अतस्त्यागसंन्यासशब्दयोरेकार्थत्वात्तन्नपृथक्त्वमितिज्ञायते तथा
निश्चयंशृणुमेतत्रत्यागेभरतसत्तमेति २ ॥

अभिनवगुप्तकृतटीका ६

काम्यानामग्निष्टोमादीनि सर्वकर्मेति सर्वेषांनित्यनैमित्तिककाम्यानांकर्म्मणांक्रियमाणानामपिफलत्यागस्त्यागः अत्रचाप्यायंयद
वशिष्टंवक्तव्यमस्तितत्प्राक्तनैरेवतत्रभवद्भट्टभास्करादिभिर्वितत्य
विस्तृतमिति किमस्माकंतद्रूपार्थप्रकाशनमात्रप्रतिज्ञानिर्वाह
णसाराणांग्रन्थकृत्प्रदर्शनप्रयासेन २ ॥

परमार्थप्रपाटीका ७

एतस्यप्रश्नस्योत्तरंभगवानाह काम्यानामिति काम्यानीष्टसाधनानिअग्नि
ष्टोमादीनितेषांसम्यक्फलैः सहन्यासः परित्यागस्तंकवयः पंडिताः
संन्यासंविदुर्जानंति तथाकाम्यातिरिक्तानांसर्वेषांकर्म्मणांनित्यनैमि
त्तिकानांअत्रैवांतरफलत्यागंविचक्षणाः कुशलास्त्यागंप्राहुः अत्रैतदु
क्तंभवति नित्यानित्यकर्मणांप्रत्यवायसाधनानि संध्यावंदनादीनिनै
मित्तिकानिपुत्रजन्माद्यनुबंधीनिजातेष्ट्यादीनि प्रायश्चित्तानिपापक्षय

श्री
गीटी
श्र

साधनानि चांद्रायणादीनि उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपा
णि शांडिल्यविद्यादीनि एतेषां नित्यादीनां शुद्धिद्वारेण परमप्रयोजनं
उपासनानां तु तदैकाग्र्यं विविदिषन्ति यज्ञेनेत्यादिश्रुतेः तपसा कल्मषं हं
तीत्यादिस्मृतेश्च नित्यनैमित्तिकयोरुपासनानां चावान्तरफलं पितृलोकस
त्यलोकप्राप्तिः कर्मणा पितृलोको विद्यया देवलोको देवलोको वै लो
कानां श्रेष्ठ इति श्रुतेः सर्वकर्मफलत्यागं प्राहुः २ ॥

वनमाली टीका २ ॥

तत्रोतिमतस्य स्वीकटाहम्यायेन निराकरणायोत्तरमाह काम्यानामिति
काम्यानां फलकामनया विहितानां चित्तशुद्धावनुपयुक्तानां कर्मणा
मिष्टिपशुसोमादीनां न्यासं त्यागं संन्यासं विदुर्जानन्ति कवयः सन्तस्तु
द्विविविदिषोत्पत्तिः सर्वकं वेदनार्थिनां नित्यानामेव कर्मणां भगवदर्पणबुद्ध्या
वेष्टयानि तेमेते वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा
नाशकेनेति श्रुतेः वेदानुवचनेनेत्यनेन ब्रह्मचारिधर्मा उक्ताः यज्ञे
नेत्यनेन गृहस्थधर्मा उक्ताः तपसेत्यनेन वानप्रस्थधर्मा उक्ताः अ
नाशकेनेत्यनेन संन्यासधर्माः उक्ताः यानि वैकल्पिककाम्यानि ज्योतिष्टोमा
दीनि यानि च केवलकाम्यानि पुत्रकामेष्ट्यादीनि परित्याज्यानीत्येकमतं
अपरे च सर्वेषां वैकल्पिककाम्यानां केवलकाम्यानां नित्यानां च प्रतिपदो
क्तफलत्यागं सत्त्वशुद्ध्यर्थितया विविदिषासंयोगेनानुष्ठानं विचक्षणा वि
चारकुशलास्त्यागं प्राहुः खादिरो यूपो भवति खादिरं वीर्यकामस्य यूपं कु
र्वीतेत्यत्र यथैकस्य खादिरत्वस्य क्रत्वङ्गप्रकरणपाठात् फलसंयोगाच्च क्रत्वर्थ
त्वं पुरुषार्थत्वं च प्रमाणभेदात् तथाग्निहोत्रेष्टिपशुसोमानां सर्वेषामपि
स्वोत्पत्तिविधिसिद्धानां तत्तत्फलसंयोगः प्रत्येकवाक्येन विविदिषासंयो
गश्च यज्ञादिवाक्येन क्रियते इत्यपपत्तेः एकस्य तूभयत्वे संयोगपृथक्त्वमि
ति न्यायात् तदेवं सर्वकाम्यकर्मत्यागः संन्यासशब्दार्थः सर्वेषामपि क
र्मणां फलाभिसन्धित्यागस्त्यागशब्दार्थः इति न च घटपटशब्दयोरिव संन्यास
त्यागशब्दयोर्भिन्नजातीयार्थत्वं किं तु चित्तशुद्ध्यर्थकर्मानुष्ठाने फलाभिसं
धित्याग इत्येकपदार्थ उभयोरिति निर्णीतं एकः प्रयोजनम् २ ॥

उ

जयरामदेवजयंती टीका ९

एवमर्जुनेन पृष्टो भगवान्विविभक्तिपक्षितं देशीयन्यायेन योरीदृशं स्वरू
पमिति निर्णेतुकाम श्रीभगवानुवाच काम्यानामिति केचित्कव
यः पण्डिताः काम्यानां कर्मणां पुत्रकामो यजेत स्वर्गकामो यजेते
त्येवं कामनिमित्तेन विहितानां पुत्रेष्टिज्योतिष्टोमादीनां कर्मणां न्या
सं स्वरूपेण त्यागं विदुर्जानन्ति नतु नित्यानामग्निहोत्रादीनां परित्या
गमिच्छन्ति केचित्पुनः श्रुकविश्रमध्ये विचक्षणाः शास्त्रार्थनिपुणा
स्ते सर्वकर्मफलत्यागं सर्वेषां नित्यानां नैमित्तिकानां काम्यानां च कर्म
णां फलत्यागमेव न तु शास्त्रेषु फलस्यैव परित्यागस्त्यागशब्दार्थो
न तु कर्मस्वरूपत्यागः इति त्यागं त्यागशब्दार्थं प्राहुः काम्यकर्मणां
स्वरूपतो नित्यनैमित्तिकानां तु फलतस्त्यागः संन्यासशब्दार्थः सर्वेषां
नित्यनैमित्तिककाम्यानां कर्मणां फलेच्छारहितानुष्ठानं त्यागश
ब्दार्थ इति भावः ननु काम्यानां फलमस्ति तत्त्यागस्संभवत्येव ना
नु सेदेहः परेतु नित्यनैमित्तिकानां फलमेव नास्ति तस्य त्यागो वन्ध्या
याः पुत्रत्यागवदसंभव इति चेन्न यद्यप्यहरहः संध्यामुपासी
त यावज्जीवमग्निहोत्रं जुहोतीत्यादि नित्यनैमित्तिककर्मप्रतिपादके
वाक्ये पुत्रकामो यजेत पशुकामो यजेत स्वर्गकामो यजेतेत्यादाविव
फलविशेषो न श्रूयते तथापि विश्वजिता यजेतेत्यादाविव विधिश्र
वणात्किंचिदनुस्मरणाच्छुद्धिरूपं ज्ञानोदयरूपं च फलमस्त्येव श्रय
यात् तत्र श्रुतप्रत्यवायपरिहारतामेत्य २ ॥

मधुसूदनी टीका १० ॥

तत्रोत्तरमस्य स्वीकृतपक्षस्य निराकरणाय योग्यं काम्यानां फल
कामनया चोदितानामन्तःकरणशुद्धावनुपयुक्तानां कर्मणामश्व
मेधादीनां न्यासं त्यागं संन्यासं विदुर्जानन्ति कवयः सूक्ष्मद
र्शिनः केचित् तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन
दानेन तपसानाशकेनेति वाक्ये न वेदानुवचनशब्दोपलक्षितस्य
ब्रह्मचारिधर्मस्य यज्ञदानशब्दाभ्यामुपलक्षितस्य गृहस्थधर्मस्य
तपोनाशकशब्दाभ्यामुपलक्षितस्य वानप्रस्थधर्मस्य नित्यस्यानि

श्रीभगवानुवाच

नपः

श्री॰
गी॰टी॰
अ

९

मेनहितेनपापक्षयेनह्योरणाज्ज्ञानार्थत्वंबोध्यते नचविनि।
योगवैयर्थ्यंज्ञानस्यसमयेतेसौतयाम्नायस्यकर्मणाइत्यनेनैवल
ब्धत्वादितिवाच्यं विनियोगाभावेहिसत्यपिनित्यकर्मानुष्ठाने
ज्ञानोत्पादनंस्यात् सतितुविनियोगेज्ञानमवश्यंभवेदितिनि
यमार्थत्वात् तस्मान्नित्यकर्मणामेवंवेदनेविविदिषायांवाविनि
योगात्तत्रशुद्धिविविदिषोत्पत्तिरेवकेवेदनार्थितानित्यानामेवक
र्माणिभगवदर्पणबुद्ध्यानुष्ठेयानि काम्यानितुसर्वाणिसफला
निपरित्याज्यानीत्येकंमतं अपरंमतंसर्वकर्मफलत्यागंप्राङ्क्त्या
गविवरणः सर्वेषांकाम्यानांनित्यानांचप्रतिपदोक्तफलत्यागंस
त्वशुद्ध्यर्थितयाविविदिषासंयोगेनानुष्ठानंविवरणाचार्यफ
लत्यागंप्राङ्कः खादिरोयूपोभवतिखादिरंवीर्यकामस्ययूपंकरो
तीत्यत्रयथैकस्यखादिरत्वस्यक्रत्वर्थप्रकरणपाठात्फलसंयोगाच्चक्र
त्वर्थत्वंपुरुषार्थत्वंचप्रमाणभेदात्तथाग्निहोत्रेष्टिपशुसोमानांसर्वे
षामपिशतपथपठितानांस्वास्वनिविधिसिद्धानांतत्तत्फलसंयोगः
प्रत्येकवाक्येनविविदिषासंयोगश्चयज्ञादिवाक्येनक्रियतइत्युपपद्यते
एकस्यतूभयत्वेसंयोगपृथक्त्वमितिन्यायात् तदुक्तंसंक्षेपशारीरके
यज्ञेनेत्यादिवाक्यंशतपथविहितेकर्मवृन्देगरीहीवास्योऽप्यमाम्नाय।
सिद्धंशुद्धंविविदिषामात्रसाध्येयुनक्तीति तस्मात्काम्यान्यपिफला
भिसंधिमकृत्वांतःकरणशुद्धयेकर्तव्यानि तत्राग्निहोत्रादिकर्मणांस्व
तःकाम्यत्वनित्यत्वरूपोविशेषोनास्तिपुरुषाभिप्रायकृतस्तुविशेषःफ
लाभिसंधितत्यागौ अतएवनित्यकर्मणामपिप्रातिस्विकफलसद्भावंअ
निष्टमिष्टंमिश्रंचत्रिविधंकर्मणःफलमित्यत्रवक्ष्यति नित्यानामेव
विविदिषासंयोगेनकाम्यानांकर्मणांफलेनसहस्वरूपतोऽपिपरित्या
गः सर्वार्धस्यार्थः काम्यानांनित्यानांचसंयोगपृथक्त्वेनविविदिषा।
संयोगात्तदर्थंस्वरूपतोऽनुष्ठानेऽपिप्रातिस्विकफलाभिसंधिमात्र।
परित्यागः इत्यन्तरार्धस्यार्थः तदेतदाहवार्तिककृतः वेदानुवच
नादीनामैकात्म्यज्ञानजन्मने तमेतमितिवाक्येननित्यानांवक्ष्यतेवि
धिः यदाविविदिषार्थत्वंसर्वेषामपिकर्मणां तमेतमितिवाक्येनसं
योगस्यपृथक्त्वतःइति तदेवसफलकाम्यकर्मत्यागःसंन्यासशब्दा

धिः सर्वेषामेव कर्मणां फलाभिसंधित्यागस्त्यागशब्दार्थ इति न च घट
पटशब्दयोरिव संन्यासत्यागशब्दयोर्भिन्नजातीयार्थत्वं किंत्वेकः कर्ता
णत्र्यर्थकर्मानुष्ठाने फलाभिसंधित्याग एक एवार्थ उभयोरिति
निर्णीतपक्षः अस्मोर्जुनस्य अथवा द्वितीयप्रश्नप्रतिवचनाय संन्यास
त्यागशब्दार्थयोस्त्रैविध्यं तावदेव पर्यायेन तत्त्वविषयत्वनियमादाह २ ॥

सदानंदी टीका ११ ॥

स्वीकरोहनीत्यादीनतेस्यस्योत्तरं हरिः उवाच शृणु काम्यानां चो
दितानां फलेशया १ सहावन्नप्रकानां पशुसोमादिरूपिणां त्यागे
ज्ञानं निसंन्यासं कवयः सूक्ष्मदर्शिनः २ अप्रेक्षीयमानानां सर्वे
षामेव कर्मणां धीस्थद्यर्थफलत्यागं त्यागं प्राहुर्विदांवराः ३ संयो
गस्यैक्यकेन सर्वेषामपि कर्मणाम् नमेतमितिवाक्येन बुभुत्सायो
नियोगतः ४ वेदानुवचनादीनामैकाम्यज्ञानजन्मने तमेतमिति
वाक्येन नित्यानां वक्ष्यते विधिः ५ यद्वाविविदिषार्थत्वं सर्वेषामपिक
र्मणां तमेतमितिवाक्येन संयोगस्य पृथक्त्वतः ६ इत्थं कवार्तिके
तस्मादेवं सिद्धविभागशः काम्यकर्मपरित्यागः संन्यास इति शब्दि
तः ७ फलाभिसंधेस्त्यागस्त्यागशब्दार्थको मतः धीस्थद्यर्थ
मनुष्ठाने कर्मणां फलवर्जनं ८ उभयोरेकपदार्थः संन्यासत्याग
शब्दयोः ९॥ २ ॥

नीलकंठी टीका १२ ॥

एवमन्वेषी भगवानुवाच काम्यानामिति काम्यानां रागतः प्राप्ता
नां पुत्रकामेष्ट्यादीनां न तु फलस्य कामनाविषयत्वात् सर्वस्य कर्मणः
फलवत्त्वनियमात् सर्वं कर्म काम्यमेवेति नित्यादीनामपि संन्यासो
त्यागः स्यादिति सिद्धं तः समीक्षित्वमिमाशंक्याह सर्वेति सर्वेषां
नित्यनैमित्तिककाम्यानां कर्मणां फलत्यागमेव त्यागं विचक्षणाः
प्राहुर्न स्वरूपतस्त्यागं प्राहुः अतो न त्वादिषु संन्यासः सिध्यतीत्यर्थः
अयमाशयः यद्यपि संन्यासत्यागशब्दौ निवृत्तिमेव ब्रूतः तथापि सा
वैराग्याद्वा कायक्लेशभयाद्वा मोहाद्वा भवतीति निमित्तकारणानां सात्वि
कादिभेदेन भिन्नत्वात्तस्याऽपि सात्विकराजसतामसभेदेन त्रैविध्यं

श्री.
गी. टी.
प्र.

त्रिविधश्रद्धासंस्थानत्वेवचतुर्वीरे नवाविरक्तोश्रद्धयानुष्ठस्यककर्मी
पिदृष्टविवेकहीनोदृश्यते यथोक्तंवार्त्तिकाचार्यैः प्रमादिनोबहिश्चि
त्ताःपिशुनाःकलहोत्सुकाः संन्यासिनोपिदृश्यन्तेदैवसंदूषिताशया
इति तस्मादविरक्तकृतसंन्यासापेक्षयानिष्कामकर्माचरणमेवश्रेय
इत्याशयेनभगवताकाम्यकर्मत्यागःसंन्यासत्वेननित्यादिकर्मणांफला
नभिसंधानेनचत्यागत्वेनसूच्यतइति तस्मादश्रद्धयाकृतःसंन्यासोप्य
सन्नेवेतिसंन्यासाद्ब्रह्मणःस्थानमितिस्मृतेस्तत्फलेदानेनसमर्थइति
शुक्तंचभगवताश्रद्धयाकृतंसर्वंव्यर्थमिति यत्तुनित्यानामेववि
विदिषायोगात्काम्यानांस्वरूपतोपित्यागःसर्वार्हस्यार्थः सर्वेषांकर्मणा
फलत्यागइत्यनन्तरोहोध्यइत्यादिव्याख्यानंतुपदद्वयदर्शनपरंतदग्रिमेणा
श्लोकेनपौनरुक्त्यमावहतीत्युपेक्षितं २ ॥

आनंदीटीका १३

अत्रोत्तरंभगवानुवाच काम्यानांकर्मणांसर्वथाननुष्ठानं सर्वेषां
कर्मणामनुष्ठेयानांनित्यनैमित्तिकानांफलस्यत्यागंविचक्ष
णाःज्ञानकर्मसमुच्चययुक्तिज्ञाःप्राहुः ॥२॥

रामकंठीटीका १४

कवयःपरावरद्रष्टारःसंन्यासंकाम्यानांकर्मणांत्यागंविदुःकाम्यन्तइ
तिकामाविषयभोगास्तेभ्योहितानितत्साधनभूतत्वात्तदनुकूलानि
यज्ञादिकर्माणिकाम्यान्युच्यन्तेतेषांत्यागंपरिहारंभोगरूपफलत्व
स्याभिसंधिनानुष्ठानस्यवर्जनंसंन्यासंकथयन्ति तेननित्यादीनिसर्वा
णिकर्माणिकामाभिसंधिनाऽनुष्ठीयमानानिकाम्यानिसंपद्यन्तेते
षांतथानुष्ठानवर्जनंमुमुक्षोःसंन्यासःएवंचव्याख्यानेपूर्वापरग्रं
थविरोधोनापद्यते यतःएवमर्जुनेनसंशयच्छेदायसंन्यासकर्मयोग
योःकैश्चित्प्रतिपन्नाभिन्नार्थता संन्यासात्कर्मयोगोविशिष्यतेइति
संन्यासःकर्मयोगश्चनिःश्रेयसकरावुभावित्युपक्रम्य तयोस्तुकर्म
योगस्यनीरागद्वेषतयाकर्मानुष्ठानलक्षणविशेषप्रतिपादनेनोप
क्रमेणसंन्यासस्यज्ञेयःसनित्यसंन्यासीयोनद्वेष्टिनकांक्षतीत्यादिना

लक्षणमुक्तं तेन विशिष्टरूपेण यथाविहितानां सर्वकर्मणामनुष्ठा-
नमेव संन्यास इति स्थितं श्रूयमाणं व्याचष्टे विचक्षणाः परमार्थविदः
सर्वेषां नित्यादिविभागेन व्यवस्थितानां यज्ञादीनां वर्णाश्रमविहित
कर्मणां फलस्य स्वर्गादिभोगलक्षणस्य त्यागं परिहारमाहुर्न तु य-
ज्ञादिस्वरूपस्य कर्मणः परिहारं न चैव वचश्च यस्य सर्वे समारंभा नि-
राशीर्बंधना... त्यागे यस्य हुतं सर्वं स त्यागी स च बुद्धिमानिति त्याग-
स्यापि लक्षणमुक्तं एवं च कर्मफलस्यानभिसंधानं त्यागो न कर्मणः
परिहार इत्युक्तं भवति न तत्र संन्यासत्यागयोरेकार्थत्वे सिद्धान्तः ॥ २ ॥

[illegible]

[illegible] नानंदो वदति केके कर्म प्राहुर्मनी-
षिणः [illegible] कर्म न त्याज्यमिति चापरे इहैके केचन मनी-
षिणो मतिमन्तः केवलज्ञानवादाभिनिविष्टाः सर्वनाम कर्मत्या-
ज्यं परिहार्यमिति कथयंति यतस्तत्सर्वं कर्म [illegible] दोषवद्दि-
दोषैर्युक्तं अपरे पुनर्मनीषिणो यथोक्तकर्मयोगवादिनो यज्ञदाने
तपःप्रभृतिविहितं कर्म न त्याज्यं न परिहार्यमित्याहुः यथा च यस्ता
देहविचनस्य कर्मणः परिहार्यानुपपत्तिस्तथा च [illegible] प्रतिपादितं
प्राक् उक्तं च संन्यासत्यागयोः परमार्थत एकार्थयोस्तत्त्वरूपाय
देहनिर्नेयत्यागविषयमेव वक्तव्यमाह ॥ ३ ॥

पं०

लासिकी [illegible] टीका १५

ग्रंथोत्तरं
श्रीभगवानुवाच

काम्यानां पुत्रकामो यजेतेत्यादिना फलकामनया चोदितानां
कर्मणां न्यासं परिहारं कवयः सर्वज्ञाः संन्यासशब्दार्थं जानन्ति
काम्येष्वपि कर्मणि फलाभिसंधिरेव वर्ज्यो न त्वनुष्ठानमित्याह स-
र्वेति सर्वेषां नित्यनैमित्तिककाम्यानां कर्मणां यज्ञादीनां क्रिय-
माणत्वेपि फलस्य स्वर्गादिलक्षणस्य त्यागं वर्जनं विचक्षणा विवे-
किनस्त्यागशब्दार्थमाहुः एतेन संन्यासत्यागयोरेकार्थता सि-
द्धा [illegible] २

पंचोलीटीका

गी॰
टी॰
अ

ते निर्णयाय भगवानुवाच काम्यानामिति केचित्कवयः पंडिताः
काम्यानामश्वमेधादीनां कर्मणां संन्यासं कर्तव्यत्वेन प्राप्तानामकर
णं संन्यासशब्दार्थं विदुर्विचक्षणाः केचिन्मेधाविनः सर्वकर्मफल
त्यागं सर्वकर्मणां नित्यनैमित्तिकानां क्रियमाणानामात्मसंबंधित
या प्राप्तस्य फलस्य त्यागं शब्दार्थमाहुः २॥

रणवीरसमिद्धोधिनी॥

अथोत्तरं भगवानुवाच काम्यानामिति कामेभ्यः स्त्र्यादिविषये
भ्यो हितानि यानि कर्माणि स्वधर्मयुद्धादित्यागपूर्वं परवर्णोचि
तानि कृषिवाणिज्यादीनि कामादागतानि वा कर्माणि स्वधर्मप्र
व्यावकप्रतिकूलमानसिकसंकल्पात्मकानि बहूनाः पूर्वमभि
हितानि तेषां काम्यानां कर्मणां न्यासं परिहारं स्वधर्मानुष्ठानपर्य
वसितं संन्यासपदाभिधेयं कवयः परावरद्रष्टारो विदुः तथा १
सर्वेषां कर्मणां स्ववर्णोचितानां युद्धादीनां यत्फलमैहिकादिकं दृष्टा
दृष्टरूपं तस्य त्यागेनाभिसंधानं स्वधर्मानुष्ठानपर्यवसायितं त्यागं
विचक्षणाः परमार्थविदः प्राहुः कथयंति इत्येवं विषयभेदाद्वि
त्वार्थतायेकानुष्ठेयविषयप्रवृत्तिपर्यवसायित्यनयोरविरुद्धैव
ति शागपिव्याख्यातं एकार्थतापि समीचीनैव सावयथा काम्यते
सो कामः प्रवृत्तिप्रयोजकं हि विधं फलं तदभिसंधिनानुष्ठितानि
सर्वाणि कर्माणि स्वधर्मभूतान्यपि काम्यानि भवंति तेषां न्यासं परि
हृयं तदितरेषामनुष्ठानव्यवस्थापनेन फलमात्रपरिहारपर्यवसि
तं संन्यासमाहुः तथैव कर्मफलत्यागं त्यागं कथयंतीति विशिष्ट
रूपतया यथाविहितानां सर्वकर्मणामनुष्ठानमेव संन्यासत्याग
शब्दाभिधेयं न पुनः कर्मणः परिहार इति भावः २॥

मधुभाष्य

इस अर्जुन की प्रश्न के उत्तर में भगवान कहतेहैं कि देखो पु त्रकी कामना करि पुत्रइष्टि यज्ञ करै और स्वर्ग की कामना करि अश्वमेध यज्ञ करै तथा और और कामना करिजोजो क र्म विहित है ऐसे जो काम्यकर्म तिन सबके परित्याग करनेको ही पण्डित लोग संन्यास जानतेहैं अर्थात् फल सहित सक ल कर्म केत्याग कोसंन्यास ज्ञान करतेहैं और जितने कर्म अकर्म कहे उन तिन कर्म औ नित्यनैमित्तिककर्मोंके फल मात्र त्याग को विचक्षण कहे निपुण लोग त्याग कहते हैं पर विचारसे तोकर्म त्याग करनेको तो त्याग नहीं कहतेहैं फल त्याग वल्क त्याग हो सकैहै क्यों कि बहुतेरे कर्म ऐसेहैं कि जिनका शरीर रहते त्याग नहीं हो सकताहै तो शास्त्रोक्तकर्म नित्यनैमित्तिक उपासना आदि जिन से बुद्धि की शुद्धि औज्ञा न की योग्यता होती उनका त्याग लोकविरुद्ध संसारअवस्थामे अनुचितहै परन्तु जिस को तत्वज्ञान नहींभया है उसकोकर्म फल के त्याग करने ही को त्याग जानो और जिसको तत्वज्ञान है उसीको समस्त कर्म का सन्यास होसके है और उचितहै य ह भगवानने कहा २ ॥

दोहा

सकामकर्मकेत्यागकोसंन्यासहुंकविजान सर्वकर्मफल- त्यागकों कहहित्यागसुजान २ ॥

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः । य
ज्ञदानतपःकर्म न त्याज्यमिति चापरे ३ ॥

शांकरभाष्यटीका १

यदि काम्यकर्मपरित्यागः फलपरित्यागो वार्थो वक्तव्यः सर्वथा
परित्यागमात्रे संन्यासत्यागशब्दयोरेकोऽर्थः स्यात् तदुदपदशवा
दिव जलानन्तरभ्रमार्थो ननु नित्यनैमित्तिकानां कर्मणां फलमेव
नास्तीत्याहुः कथमुच्यते तेषां फलत्यागः यथा वन्ध्यायाः पुत्रत्या
गो नैष दोषः नित्यानामपि कर्मणां भगवता फलवत्त्वस्येष्टत्वात् व
क्ष्यति भगवान् अनिष्टमिति ननु संन्यासिनामिति च नसंन्यासिनामे
व हि केवलं कर्मफलासंबंधं दर्शयन्नसंन्यासिनां नित्यकर्मफलप्रा
प्तिं भवत्यत्यागिनां प्रेत्येति दर्शयति त्याज्यं दोषेति त्याज्यं त्यक्तव्यं दो
षवत् दोषोऽस्यास्तीति दोषवत् किं तत् कर्म बंधहेतुत्वात् सर्वमेव
अथवा दोषो यथा रागादिस्त्यज्यते तथा त्याज्यमित्येके कर्म प्राहु
र्मनीषिणः पण्डिताः सांख्यादिदृष्टिमाश्रिता अधिकृतानामन्तु कर्मि
णामपीति तत्रैव यज्ञदानतपःकर्म न त्याज्यमिति चापरे कर्मिणाम
वाधिकृतास्तानपेक्ष्यैते विकल्पाः ननु ज्ञाननिष्ठान् व्युत्थायिनः स
न्यासिनोऽपेक्ष्य ज्ञानयोगेन सांख्यानां निष्ठा मया पुरा प्रोक्ता इति क
र्माधिकारादपाहृतास्ये न तान् प्रति विहिता चिन्ता ननु कर्मयोगेन
योगिनामिति अधिकृताः एवं विभक्तनिष्ठा अपीह सर्वशास्त्रोपसं
हारप्रकरणे यथा विचार्यन्ते तथा सांख्या अपि ज्ञाननिष्ठा विचार्यन्ता
मिति न तेषां मोहक्लेशदुःखनिमित्तत्यागानुपपत्तेः न कायक्लेशनि
मित्तानि दुःखानि सांख्या आत्मनि पश्यन्ति इच्छादीनां देहधर्मत्वेने
व दर्शितत्वात् अतस्ते न कायक्लेशदुःखभयात् कर्म परित्यजन्ति ना
पि ते कर्माण्यात्मनि पश्यन्ति येन नियतं कर्म मोहात् परित्यजेयुः गु
णानां कर्मैव किंचित्करोमीति हि ते संन्यसन्ति सर्वकर्माणि मन
सा संन्यस्येत्यादिभिर्हि तत्त्वविदः संन्यासप्रकारउक्तस्तस्माद्येऽन्ये अधिकृ
ताः कर्मण्यनात्मविदस्तेषामेव मोहात् त्यागः संभवति कायक्लेश
भयाच्च तत एव तामसास्त्यागिनो राजसाश्चेति निन्द्यन्ते कर्मिणामनात्म

ज्ञानो कर्मफलत्यागस्तुत्यर्थं सर्वारम्भपरित्यागी मौनी सन्तुष्टो येन
केनचिदनिकेतः स्थिरमतिरिति परमार्थसंन्यासिनो विशेषितत्वात्
वक्ष्यति च ज्ञानस्य या परा निष्ठेति तस्मात् ज्ञाननिष्ठः संन्यासी
नेह विवक्षितः कर्मफलत्याग एव सात्विकत्वेन गुणेन तामसत्वाद्यपे
क्षया संन्यास उच्यते न मुख्यः सर्वकर्मसंन्यासः सर्वकर्मसंन्यासासम्भ
वे च न हि देहभृतेति हेतुवचनान्मुख्य एवेति चेन्न हेतुवचनस्य स्तुत्य
र्थत्वात् यथा त्यागाच्छान्तिरनन्तरमिति कर्मफलत्यागस्तुतिरेव यथो
क्तानेकपक्षानुष्ठानाशक्तिमन्तमर्जुनं प्रति विधानात् तद्वदिदमपि न हि
देहभृता शक्यमिति कर्मफलत्यागस्तुत्यर्थं न सर्वाणि कर्माणि मनसा
संन्यस्यैव कुर्वन्न कारयन्नास्ते इत्यस्य पक्षस्यापवादः केनचिद्दर्शयि
तुं शक्यस्तस्मात् कर्मण्यधिकृतान् प्रत्येवैष संन्यासत्यागविकल्पः
येन परमार्थदर्शिनः सांख्यास्तेषां ज्ञाननिष्ठायामेव सर्वकर्मसंन्यास
लक्षणायामधिकारो नान्यत्रेति न ते विकल्पार्हास्तच्चोपपादितमस्माभि
र्वेदाविनाशिनमित्यस्मिन् प्रदेशे तृतीयादौ च ३ ॥

आनन्दगिरिकृतटीका २

ननु किमिदानीं संन्यासत्यागशब्दयोरात्यन्तिके भिन्नार्थत्वं तथा च प्र
सिद्धिविरोधः स्यादित्याशङ्क्यावान्तरभेदेऽपि नात्यन्तिकभेदोऽस्तीत्याह य
दीति प्रज्ञाभावादन्यायास्त्यागयोरविशिष्टत्वे नैमित्तिककर्मणामफ
लानां फलत्यागानुपपत्तेः कर्मत्यागशब्दार्थेन सिध्यतीति शङ्कते न
न्विति नित्यनैमित्तिककर्मफलस्य बन्धाप्रसादृश्याभावात्त्यागसंभ
वात्कर्मत्यागशब्दार्थः संभवतीति समाधत्ते नैषदोष इति भगवता तेषां
फलवत्त्वमिष्टमिष्टं च वाक्यशेषमनुकूलयति वक्ष्यतीति नहि संन्यासि
नामसंन्यासिनां च नित्याद्यनुष्ठायिनामविशेषेण न तु फलं स्यादिति चे
त्रैवमाह नत्विति वदतोऽनुकर्षणाच्चकारार्थः प्रसक्तं वचसोऽर्थं प्रकृ
तोपयोगित्वेन संग्रहमारचयति संन्यासिनामिति काम्यानि वर्जयित्वा नि
त्यनैमित्तिकानि फलाभिलाषादृते कर्तव्यानीत्युक्ते पक्षे प्रतिपन्ननिरासे
न इफणिते विप्रतिपत्तिमाह त्याज्यमिति कर्मणः सर्वस्य दोषवत्त्वे हेतु।
माह वध्येति दोषवदित्येतदृष्टान्तेन व्याचष्टे प्रवृत्तेति कर्माण्यपि
कृतानामकर्मणामेव कर्म त्याज्यं कर्मिणामनेनत्यागे प्रत्यवायादित्या।

शंकामाह अत्यागिनामिति नहि तेषामपि कर्मजन्यतो प्रत्यवायोहिं
साहित्यस्य कर्मणोनुष्ठाने परंप्रत्यवायादिनिभावः सांख्योदिपतस्मा
न्नादिविनिशल्: मीमांसकपक्षमाह नैवेति कर्माधिकृतेषु वैति यावत्
कर्म नित्यं नैमित्तिकञ्च काम्यानां कर्मणामित्यारभ्य श्लोकाभ्यां कर्म
णोधिकृतानन्धिकृतांश्चापेक्ष्य दर्शितविकल्पानां ब्रह्मनिरित्याशंकामाह
कर्मिणइति एवकारव्यवच्छेद्यमाह नत्विति तदेव स्फुटयति ज्ञानेति
कर्माधिकृतानां ज्ञाननिष्ठानां विभक्तनिष्ठावत्त्वेन सर्वोक्तानामपि पा
रमार्थिकसंन्यासिभ्यो न विचार्यत्ववज्ज्ञाननिष्ठानामपि विचार्यत्वमत्राविरु
द्धमिति शङ्कते नत्विति सांख्यानां परमार्थज्ञाननिष्ठानां नात्र विचार्य
तेत्युत्तरमाह न तेषामिति ननु तेषामपि स्वात्मनि क्लेशादुःखादिप
श्यतां नरदेहरोधेन राजसकर्मत्यागसिद्धेर्विचार्यत्वं तत्राह नकार्येति
तत्र तेषां प्राप्त्याभावं हेतुकरोति इत्यादीनामिति स्वात्मनि सांख्यादी
नां क्लेशाद्यप्रतिपत्तौ फलितमाह प्रतत्ति ननु तेषां क्लेशाद्यदर्शने
पि स्वात्मनि कर्माणि पश्यतां तत्त्यागोऽयुक्तस्तेषां कायक्लेशादिक
त्वात्तत्राह नापीति अज्ञानात्मोहमाहात्म्यात् नियतमपि कर्म तत्कु
शाकीनतत्त्वविदां स्वात्मनि कर्मादर्शने तत्त्यागे हेत्वभावादिति मत्वाह
मोहादिति कथं तर्हि तेषामात्मनि कर्माण्यपश्यतां शास्त्राभावे तत्त्या
गः सन्यासस्तत्राह ज्ञानानामिति अविवेकवतामेतां कर्मणां त्यागस्त
त्त्वविदामित्युक्ते स्मार्यत्वमनप्रतिषेधं प्रमाद्यति सर्वेति तत्त्ववि
मज्ञाविचार्यत्वे फलितमाह तस्मादिति येनात्मविदस्त्वप्रत्येत्तरत्र स
म्बन्धः कर्मण्यधिकृतानामनात्मविदां कर्मत्यागसम्भावनां दर्शयति
येषाञ्चेति तन्निन्दाकृत्योपक्रेत्याशंकामाह कर्मिणामिति किंच पर
मार्थसन्यासिनां प्रशस्यत्वोपलम्भात् निन्दाविषयत्वमित्याह सर्वेति
किंचात्रापि सिद्धिंप्राप्तो यथेत्यादिना ज्ञाननिष्ठायावक्ष्यमाणत्वात्सता
हे१ तदनन्तरं विचार्यतेत्याह विचार्यतेत्याह वक्ष्यतीति कर्माधिकृतानामे
वात्र विवक्षितत्वात् नज्ञाननिष्ठानामित्युपसंहरति तस्मादिति ननु स
न्यासशब्देन सर्वकर्मसन्यासस्य गृहीतत्वात्तथाविधसन्यासिनामिह विव
क्षितत्वे अतिमानि तत्राह कर्मीति सन्यासशब्देन सत्वेत्सैव सन्यासस

श्री
गी टी
अ

ग्रहस्थानां नामत्त्वयोगनिष्ठि सम्भवमपादयता तदसम्भवे हेतुः किंचेय
र्थादृष्टप्रमप्रतिषेधादितिशंकने सर्वेति भेदे हेतुवचने सर्वकर्मसंन्यासा
संभवसाधकं कर्मफलत्यागस्तु तत्परत्वादिति परिहरति नेत्यादिना प
नेदेव दृष्टान्तेन स्पष्टयति यथेति दृष्टान्तेऽपि यथा क्रत्वर्थत्वे किंच सा
दिसाशंक्याह यथोक्तेति नहि फलत्यागादेव ज्ञानं विना मुक्तिरिति शंका म
केर्ज्ञानैकाधीनत्वसाधकश्रुतिस्मृतिविरोधादहेहेत्यादिना ज्ञानत्वमेव
ज्ञानसाधनविधानानर्थक्यादत्यागस्तु निरेवाच ग्राह्योऽर्थः दृष्टान्तेन
मर्थं दार्ष्टान्तिके योजयति तथेति प्रागुक्तपक्षापवादविवक्षया हेतुके
मेवाधर्त्वमेव किं तस्मादित्याशंक्य तदपवादे हेत्वभावान्नैवमित्याह
नसर्वेति नचैवमेव हेतुः किंस्तदपवादिकान्यथा सिद्धेरुक्तत्वादिति भा
वः सत्त्वसंन्यासापवादासम्भवे संन्याससत्यागविकल्पस्य कथं सावः
काशेनाशंक्याह तस्मादिति ज्ञाननिष्ठानुप्रवेशक विकल्पानुपपन्नो
कथं तेषामधिकारस्तत्राह येष्विति संन्यासिना विकल्पानर्हत्वेन ज्ञान
निष्ठायामेवाधिकारस्य भूयः स प्रदेशश्च साधितत्वाच्च साधनीयत्वापे
नेत्याह तथेति ३ ॥ स्वामिकृतटीका २
ग्रविष्टः फलत्यागमात्रमेव त्यागशब्दार्थं न कर्मत्यागः स्वतन्त्रेदेवम
तोऽस्मिन्नासेनदृष्टीकर्तुमतभेदं दर्शयति त्याज्यमिति दोषवत्सहिंसा
दिदोषवत्त्वेन बन्धकत्वमिति हेतोः सर्वमपि कर्म त्याज्यमित्येके सांख्या
प्राहुर्मनीषिणाइत्यस्यायंभावः न हिंस्यात् सर्वाभूतानीति हिंसानिषे
यः श्रुतस्य पानर्थेनहिंसेत्याह अग्नीषोमीयपशुमालभेतेत्यादि
प्राकारणिकोविधिस्तु हिंसायाः क्रत्वपकारकत्वमाह अतोभिन्नवि
षयत्वेन सामान्यविशेषन्यायागोचरत्वात् इत्यसाध्येश्चनर्वैधापिक
मन्वहिंसादेः संभवात्सर्वमपिकर्मत्याज्यमिति तदुक्तं दृष्टवदानु
श्रविकः सह्यविशुद्धिक्षयातिशययुक्तः तद्विपरीतःश्रेयान्व्या
काव्यक्तज्ञविज्ञानात् इति अपरेतुमीमांसकाः यज्ञादिकंकर्मनत्या
ज्यमितिप्राहुः अयंभावः क्रत्वर्थापिसती हिंसापुरुषेणेवकर्तव्या
साव क्रत्वनोद्देशेनापिक्रत्वपुरुषमप्रत्यवायहेतुरेव अनेनविधि
निषेधयोः संसारफलत्वावायेनेसामान्यविशेषन्यायंसंपादयितुम

यथाहिविधिर्विधेयमस्तद्देशेनानुष्ठानेविधत्ते नादृष्टलक्षणमा
क्षेपतस्य नत्वेवंनिषेधोपिनिषेध्यस्याकरणतनादृष्टमपेक्षतेप्रामिमा
त्रापेक्षितत्वात् अन्यथाज्ञानप्रमादादिकृतेदोषाभावप्रसंगात् तदे
वंसमानविषयत्वेनसामान्यशास्त्रस्यविशेषेणबाधान्नास्तिदोषवत्वे
अतोनित्ययज्ञादिनत्याज्यमिति [illegible]
[illegible] ३ ॥

पैशाचभाष्यटीका ४ ॥

त्याज्यंत्यक्तव्यंदोषवत्कर्मतत्स्यादंधहेतुत्वात्याज्यमित्येकेमनीषिणः
प्राहुः अथवादोषशब्देनरागद्वेषादुच्यंतेदोषवत् रागद्वेषवताम्भात
त्तंकर्मत्याज्यंभेदवंधकत्वादित्येकेमनीषिणःप्राहुः नित्ययज्ञदानतपः
कर्मनत्याज्यमितिस्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानवइतिवचना
त् मोक्षार्थिनामपिनत्याज्यमित्यर्थः ३ ॥

रामानुजभाष्यटीका ५ ॥

त्यागशास्त्रैनैवनिर्णयवचनात् नियतस्यतुसंन्यासे कर्मणोनोपपद्य
ते मोहात्तस्यपरित्यागस्तामसःपरिकीर्तितः भवत्यत्यागिनांप्रेत्य
नतुसंन्यासिनांक्वचित् इतिचपरस्परपर्यायतादर्शनात्तत्पारेकमेषी।
यतइतिनिश्चीयतेत्याज्यंदोषवदित्येकेकर्मप्राहुर्मनीषिणः एकेमनीषि
णःकापिलकर्दयस्तन्मतानुसारिणोरागादिदोषानुबंधकत्वात् स
र्वयज्ञादिकंकर्मतुमुक्षुणात्याज्यमित्याहुः यज्ञेति अपरेपंडितायज्ञा
दिकंकर्मनत्याज्यमितिप्राहुः ३ ॥

अभिनवगुप्तकृतटीका ६ ॥

तदत्रैवविशेषनिर्णायमतान्तरमुपन्यस्यति त्याज्यंदोषवदित्येकेकर्म
प्राहुर्मनीषिणः यज्ञदानतपःकर्मनत्याज्यमितिचापरे ३ ॥

परमार्थप्रपाटी ७ ॥

अत्रास्मिन्नर्थेमतान्तरमुपन्यस्यति त्याज्यमिति यज्ञेहिंसादिदोष
वत्कर्मैवबंधकंभवतीतित्याज्यमित्येकेमनीषिणः सांख्यावदंति
तथाअपरेमीमांसकाः अग्नीषोमीयंपशुमालभे[illegible]तेत्यादिश्रु
तिबलात्यज्ञदानतपःकर्मनत्याज्यमितिवदंति ३ ॥

वनमालीटीका ८

इदानीं द्वितीयप्रश्नप्रतिवचनाय संन्यासत्यागशब्दार्थस्यैव विवेकेन नि-
रूपयितुं तत्र विप्रतिपत्तिमाह त्याज्यमिति एके मनीषिणः कपिला-
न्वयायिनः कर्म दोषवद्धिंसादिदुष्टत्वाद्बन्धकं च सर्वं कर्माधिकारि-
भिरपि त्याज्यमिति प्राहुः यद्वा दोषवत् दोष इव यथा दोषो रागादि-
स्त्यज्यते तेन तद्वत्कर्म त्याज्यमन्ये त्वत्र विविदिषैः कर्माधिकारिभिरपीम
धिः अपरे जैमिन्याद्यनुयायिनः कर्माधिकारिभिश्चित्तशुद्धिद्वारा वि-
विदिषोत्पत्त्यर्थं यज्ञदानतपः कर्म न त्याज्यमिति प्राहुः ३ ॥

असमवैजयन्तीटीका ८ ॥

त्यागविषयेऽसौ मतभेदोऽस्तीत्याह त्याज्यमिति यत् हिंसादिने-
कदोषदुष्टं कर्म तन्मम त्वगणात् तरुषे त्याज्यं हेयं स्वरूपतो हेयमित्ये-
वंप्रकारेणैके न हिंस्यात्सर्वाणि भूतानीत्यादिश्रुत्यर्थमेवाङ्गीकु-
र्वाणाः अग्नीषोमीयं पशुमालभेतेत्यादिश्रुतिं पशोरालभनेवद-
ति मतं हिंसात्मकमारणमिति एवं तन्मताः कपिलमतानुसारि-
णः प्राहुः यत्तस्ते मनीषिणः पारहंस्या यज्ञदानतपः कर्म मन्यद्गणात्
त्याज्यमित्येवमपरे अग्नीषोमीयं पशुमालभेतेत्यादिश्रुतिर्हिंसायाः
कं त्वेगवदति न च तस्माच्छ्रुतेर्हिंसा
न हिंसायाः संभवोऽसावन हिंस्यादिति निवारयति न सा ह्यसाध्यत्वे-
रन्धनस्थाः पापनामाहेति न किंचिदस्त्विति सामान्यतो निषेधस्य कृतो
मनसा मिणः प्राहुः यद्यपि कर्मणो हिंसानुग्राहकत्वं नास्ति नयापि
वेदेन यमनाभियानं दोषवत्त्वमतः कार्यमेवेत्यभिप्रायः ३ ॥

मधुसूदनीटीका १० ॥

अधुना द्वितीयप्रश्नप्रतिवचनाय संन्यासत्यागशब्दार्थस्यैव विधिं
निरूपयितुं तत्र विप्रतिपत्तिमाह सर्वं कर्मैव बन्धहेतुत्वाद्दोषवद्-
दुष्टं अतः कर्माधिकृतेनापि कर्म त्याज्यमेवेत्येके मनीषिणः प्राहुः
दोषवत् दोष इव यथा दोषो रागादिस्त्यज्यते तद्वत्कर्म त्याज्यं अन्य-
त्वत्रबोधे रतमत्र विविदिषैः कर्माधिकारिभिरपीत्येकः पक्षः अ-
द्वितीयः पक्षः कर्माधिकारिभिरेनःकारणशुद्धिद्वारा विविदिषोत्पा-

त्यंर्थं यज्ञदानतपःकर्मनत्याज्यमितिचापरेमनीषिणःप्राहुः ३॥

सदानंदी टीका ११ ॥

प्रश्नद्वितीयप्रश्नस्यपरिहारायकेशवः संन्याससत्यागयोस्तत्त्वंवक्तुं
द्वैविध्यमेवाह १ विप्रतिपत्तिमाहादौत्याज्यमित्यादिनास्फुटं तंयदे
तत्तयासर्वंकर्मदुःखमतोबुधैः २ त्याज्यमेकेबुधाःप्राहुःकर्मणांफलि
कांनैरपि इत्येकंमतमथोक्तंद्वितीयंप्राहकेशवः ३ कर्माधिकारि
भिःशुभिर्धीशुद्ध्यावाफलवांछये यज्ञदानतपःकर्मनत्याज्यमितिवाप
रे ४॥३॥

नीलकंठी टीका १२ ॥

इदमेवपक्षद्वयमाह त्याज्यमिति एकेसांख्याःमनीषिणोमनो
निग्रहसमर्थाःपरमात्मनिउत्पन्नविविदिषाणांमुमुक्षूणांदोष
वत्रागादिवद्यथात्याज्यास्तद्वत्कर्मत्याज्यमितिप्राहुः अपरे
तुविविदिषार्थिनायज्ञादिकंनत्याज्यमितिवाप्राहुर्विद्योत्पत्त्यर्थत्वात्
तथाचद्विविधाःश्रुतयउपलभ्यंते नकर्मणानप्रजयाधनेन।
त्यागेनैकेअमृतत्वमानशुः कुर्वन्नेवेहकर्माणिजिजीविषेच्छतं
समाइत्याद्याः अविरुद्धविषयमेवैतत्पक्षद्वयं विद्वांस्तुकर्मस्वप्रवृ
त्तिकाशास्त्राज्ञानस्यतद्विरुत्वात् सिद्धएवत्यागइतिनतात्पर्यनिक
र्मविधिर्वात्यागविधिर्वाप्रवर्तते यथोक्तं नकर्माणित्यजेद्योगी
कर्मभिस्त्यज्यतेह्यसाविति ३ ॥

आनंदी टीका १३

संन्यासत्यागशब्दयोरेकार्थतयाविप्रतिपत्तिंदर्शयति एकेकेवलज्ञाना
नुष्ठानवादिनःदोषवद्बन्धकमित्यतोहेतोःसर्वमेवकर्मत्याज्य
मित्याहुः अपरेकेवलकर्मिणःयज्ञादिकंहिनियतंकर्मनत्याज्य
मित्यर्थः ३ ॥

रामकंठी टीका १४ ॥

नचैतयाविधेसंन्यासादभिन्नार्थैत्यागेप्रोक्तलक्षणविषयेविप्रतिपत्ति
र्दर्शयन्ननवधारयत्याख्यानलक्षणस्यकरदानीतिस्त्रयोबुद्धि
याने यदर्थमेवमन्यानेन्यत्राह द्विप्रहोहेतो यस्मात्साम्येनो

श्री॰
गी॰टी॰
अ॰

तस्मात्तयोर्भिन्नार्थतावादिनां तस्योपन्यस्य तमेव संन्यासे अर्थे त्यागं सम्यक् प्रतिपादयितुमाह॥

फलस्य त्यागो विशेषितो वक्ष्यमाणो हेयोपादेयरूपेण विभागेन द्विप्र
कारः स्फुटमत्र प्रकटीकृतः इत्थं त्यागविषये निश्चये वक्तव्ये
सति कर्मणां त्यागस्यापवर्गाभिमतत्वापवर्गलक्षणफलहेतुत्वादस्य
मतभेदं प्रतिपादयितुं प्रदर्शितागमोपपत्तिगम्भीकारेण सर्व
दर्शनात्त्यागत्वमेव नास्तीत्याह + इहैके केचन मनीषिणो मति
मन्तः केवलज्ञानवादाभिनिविष्टाः सर्वं नाम कर्म त्याज्यं परिहा
र्यमिति कथयन्ति यतस्तत्सर्वं कर्माल्पदुःखातिशयत्वादिभिर्दो
षैर्युक्तम् अन्ये पुनर्मनीषिणो यथोक्तकर्मयोगवादिनो यज्ञतपो
रूपं शास्त्रविहितं कर्म न त्याज्यं न परिहार्यमित्याहुः यथा च य
ज्ञादेर्नियतस्य कर्मणः परिहार्यानुपपत्तिस्तथा वक्ष्यते प्रति
पादितं प्राक् उक्तं च [illegible] ...

तदेतद्विशेषनिर्णयाय मतान्युपन्यस्यति

त्यासिकी [illegible]टीका

एके मनीषिणः सांख्याः हिंसादोषवदविशुद्धित्वयातिशयादिदो
षयुक्तत्वात् कर्म सर्वं त्याज्यं परिहार्यमित्याहुः यद्वा दोषवत्
दोषवदेव मनीषिण इत्यस्यायमभिप्रायः न हिंस्यात्सर्वभूतानि इ
ति हिंसानिषेधः पुरुषस्यानर्थहेतुर्हिंसेत्याह अग्नीषोमीयं पशुमा
लभेतेत्यादिप्राकरणिकविधिस्तु हिंसायाः क्रत्वुपकारत्वमाह
अतो भिन्नविषयत्वेन सामान्यविशेषन्यायागोचरत्वादुभयसाध्ये
ष्वपि सर्वेष्वपि कर्मसु हिंसादेः संभवात् सर्वमपि कर्म त्याज्यमेवे
ति तदुक्तं दृष्टवदानुश्रविकः सह्यविशुद्धिक्षयातिशययुक्त इति
अपरे तु मीमांसका यज्ञादिकं कर्म न त्याज्यमित्येवमाहुः यथा च
यज्ञादेर्नियतस्य कर्मणः परिहारानुपपत्तिः तथा वक्ष्यामः प्रति
पादितं प्राक् [illegible] ...

पंडोलीटीका

अविद्वद्भिः फलत्यागमात्रमेव त्यागशब्दार्थः न कर्मत्यागः इत्येतदेव मतान्तर

इति रासेन स्फुटीकर्तुं मतांतरेणादर्शयति पूर्वार्द्धेन सांख्यमतमुत्तरा
र्द्धेन मीमांसकमतमाह त्याज्यमिति एके मनीषिणः सांख्याः सकल
मपि कर्म दोषवत् दोषयुक्तमिति कारणात् त्याज्यमाहुः अथवा दोषवदि
ति दृष्टांतः यथा दोषस्त्याज्यः तथा सकलं कर्म त्याज्यं सांख्या एवमाहुः अ
परे मीमांसका यज्ञदानतपःकर्म न त्याज्यमित्याहुः ३ ॥

रणवीरसमिद्बोधिनी

एतदेव स्फुटयितुं भिन्नार्थतावादिनां मतमुपन्यस्य तमेव संन्यासा
भिन्नार्थं त्यागं सम्यक्प्रतिपादयितुमाह त्याज्यमिति इहैके केव
लमनीषिणो बुद्ध्यभिमाननिरूपकाः प्राकृतिपादितासुरस्वभावा
स्तामसा जनाः कर्म यत्किंचित्त्याज्यं परिहार्यमित्येवमाहुः यतस्त
त् दोषवत् बंधवादि वियोगस्वपारीरक्लतादिजननेन सदोषमिति
अपरे तु नैर्दैवस्वभावाः कर्मयोगिनो यज्ञदानतपोरूपं त्रिविधं कर्म
न त्याज्यं किंतु कर्तव्यमेवेत्याहुः ३ ॥

मधुभाष्य

भाषा अर्थ

मतान्तर को निषय करते हुये उक्त विषय को दृढ़ करने की इच्छा से मतभेद देखाते है कि हिंसादि कर्म दोषयुक्त औ अनर्थहेतु से बन्धस्वरूप है इस लिये सब कर्म का त्याग करना उचित यह सांख्य मतवाले विवेकी माहिंस्यात्सर्वभूतानि इससे कहते है और अग्नीषोमीये पशुमालभेत इस श्रुतिसे अग्निष्टोमयज्ञसे पशुहिंसा को यज्ञक्रिया का अंगविधान किया है और सकल कर्मों के करते मे जीवहिंसा ज्ञान अज्ञान पूर्वक होती ही है इस मे कर्ममात्र का त्याग कहा है और कर्मकाण्डी मीमांसामतवाले अग्नीषोमीये पशुमालभेत इस विधि से कहते है कि यज्ञकर्म मे हिंसा हिंसा नहीं है करनी ही चाये और यज्ञ छोड कर हिंसा करने से पुरुष को पाप होता है इस अभिप्राय पर भगवान कहते है कि कोई बुद्धिमान तो कहते कि दोषवतकहे दोषयुक्त कर्म त्याग करना चाहिये और कोई यज्ञ दान तप कर्म का त्याग नही कहते हैं क्यों कि विधिकृत हिंसासे दोष नही होता है पर अहिंसापरम धर्म है ३ ॥

दोहा

कर्मत्याज्य है दोषयुत कहें मुनि इकपद यज्ञदान तप त्याज्य नहि ऐसे और कहेह ३

18

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः
४

शांकरभाष्यटीका १

तत्रैतेषु विकल्पभेदेषु निश्चयमिति निश्चयं शृणु अवधारय मे मम वचनात् तत्र त्यागे त्यागसंन्यासविकल्पे यथादर्शिते भरतसत्तम भरतानां साधुतम त्यागो हि त्यागसंन्यासशब्दवाच्यो हि योऽर्थः स एक एवेत्यभिप्रायमाह त्यागो हीति पुरुषव्याघ्र त्रिविधस्त्रिप्रकारस्तामसादिप्रकारैः संकीर्तितः शास्त्रेषु सम्यक् कथितः यस्मात्तामसादिभेदेन त्यागसंन्यासशब्दवाच्योऽर्थोऽधिकृतस्य कर्मिणोऽनात्मज्ञस्य त्रिविधः संभवति न परमार्थदर्शिनः इत्ययमर्थो दुर्ज्ञानस्तस्मात् अत्र तत्त्वं नान्यो वक्तुं समर्थस्तस्मान्निश्चयं परमार्थशास्त्रार्थविषयमध्यवसायमैश्वरं मे मत्तः शृणु ४

आनंदगिरिटीका २ ॥

कर्मादिकृतानां त्यागविकल्पानामपि कुतो निर्धारणसिद्धिरित्याह तत्रेति तमेव निश्चयं दर्शयितुमादौ त्यागगतमवान्तरविभागमाह त्यागो हीति तत्र त्यागसंन्यासयोरुभयोरपि प्रकृतत्वाविशेषे त्यागस्यैवावान्तरविभागाभिधाने संन्यासस्यापि तत्तुल्यत्वं द्योतयितुमाह त्यागो हीति सात्त्विकोऽन्ययोस्तामसराजसयोः कथं त्रैविध्यमिति स्वरूपमेव निश्चयमभावोक्तिमत्र भगवतैव निश्चयेनेत्याशंक्याह यस्मादिति भगवतोक्तेनोक्तविभागे तत्त्वानिश्चयाद्भगवत्निश्चयस्य श्रोतव्यत्वेनेतिनिगमयति तस्मादिति ४ ॥

\+ एवमतभेदमुपन्यस्य मतं कथयितुमाह॥

स्वामिकृतटीका ३

\+ निश्चयमिति तत्रैवं विप्रतिपत्तौ त्यागे निश्चयं मे वचनाच्छृणु त्यागः सर्वलोकप्रसिद्धत्वात् किमत्र श्रोतव्यमिति मावमंस्था इत्याह हे पुरुषव्याघ्र पुरुषश्रेष्ठ त्यागो यद्दुर्बोधः हि यस्मादयं कर्मत्यागस्तत्त्वविद्भिस्तामसादिभेदेन त्रिविधः सम्यक् विवेकेन प्रकीर्तितः ४ ॥

पैशाचभाष्यटीका ४ ॥ तत्र त्रैविध्यं त्यागमतभेदाश्च तत्र त्यागे मतं निश्चयं शृणु ॥ ४ ॥

तमानजटीका ५

निश्चयमिति तत्रैवं वादिविप्रतिपत्तौ त्यागे त्यागविषये निश्चयं मत्तः
शृणु त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः त्यागः क्रिय
माणेषु कर्मसु दैहिके फलविषयतया कर्तृत्वविषयतया च म
मताविषयतया च पूर्वमेव मया त्रिविधः संप्रकीर्तितः सर्वा
णि कर्माणि निक्षेप स्वर्गादिके फले मम तस्मादिति फलत्यागः फ
लविषयत्यागो मदीयफलसाधनतया मदीयमिदं कर्मेति कर्ममम
तया यस्त्यागः ममताविषयत्यागः सर्वेश्वरे कर्तृत्वानुसंधानेना
त्मनः कर्तृत्वत्यागः कर्तृत्वविषयस्त्यागः ४ ॥

अभिनवगुप्त [illegible] टीका ५ ॥

स्पष्टार्थे ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

एवं मतभेदमुपन्यस्य स्वमतं कथयितुमाह निश्चयमिति तत्रैवं
विप्रतिपन्नत्यागे मे वचनान्निश्चयं शृणु हि यस्मात्कारणान्नृणां पुरुष
व्याघ्र पुरुषार्थसाधनशीलत्वादीति निश्चयेन त्यागस्त्रिविधः संप्रकीर्ति
तः तामसादिभेदेन सम्यक्प्रकारेणाग्रे निरूपितोस्ति ४ ॥

वनमाली टीका ८ ॥

तत्रैवं यादृशे कर्माधिकारिकर्तृके संन्यासत्यागशब्दाभ्यां प्रतिपादि
तेत्यागे फलाभिसंधिपूर्वककर्मत्यागे मम वचनान्निश्चयं पूर्वाचार्यैः
कृतं शृणु किं तत्त्रैविध्यमत आह हे पुरुषव्याघ्र पुरुषश्रेष्ठ हि यत
स्त्यागः कर्माधिकारिकर्तृकः फलाभिसंधिपूर्वककर्मत्यागः त्रिवि
धस्त्रिप्रकारस्तामसादिभेदेन संप्रकीर्तितः यद्वा विशिष्टाभावरू
पत्यागो विशेषणाभावाद्विशेष्याभावादुभयाभावाच्च त्रिविधः सं।
प्रकीर्तितः तथाहि फलाभिसंधिपूर्वककर्मत्यागः सत्यपि कर्मणि फ
लाभिसंधित्यागादेकः सत्यपि फलाभिसंधौ कर्मत्यागाद्द्वितीयः फला
भिसंधेः कर्मणश्च त्यागात्तृतीयः तत्र प्रथमः सात्त्विक उपादेयः द्वितीय
स्तु हेयो हि द्विविधः दुःखबुद्ध्याकृतो राजसो विपर्यासेन कृतस्तामसः प
तावान्कर्माधिकारिकृतत्यागोऽज्ञानप्रमादविषयः तृतीयस्तु कर्मीन।

धिकारिकर्तृकस्त्रैगुण्यरूपोनाज्ञेनत्यक्तुंविषयः सोपि साधनफ
लभेदेनद्विविधः तत्रसात्विकेनफलाभिसंधित्यागपूर्वककर्मानु
ष्ठानरूपेणत्यागेनशुद्धचित्तस्यात्मविविदिषस्यात्मज्ञानसाधनवेदा
न्तविचारायफलेच्छारहितस्यविनष्टदोषस्यसंगतेनसाधनस्यकर्मणो
वैधानामनावश्यकत्वेनैवहननस्यैवपरित्यागः सएकःसाधनभूतो
विविदिषासंन्यासः नैःकर्म्यसिद्धिंपरमामितिवदतीति द्वितीय।
स्तुजन्मान्तरसाधनाभ्याससंपरिपाकादस्मिन्जन्मन्यात्मावबोधप्रत्ता
त्मबोधस्यतत्त्वज्ञानएवफलेच्छायाःकर्मणाश्चत्यागःसविद्वत्संन्यासः
सत्वयस्यात्मरतिरेवेत्यक्तः ४ ॥

ज्ञानवैजयंती टीका ४ ॥

एवंनानाविधमतभेदमुपवर्ण्यस्वाभिमतमाह निश्चयमिति हे
भरतसत्तमभरतवंशोत्तमतत्रानेकवादिमतभेदावत्रैत्यागोत्यागवि
षयेमेसर्वज्ञस्यसर्वेश्वरस्यममनिश्चयंत्यागविषयकंनिर्णयंशृणु
ननुलोकेत्यागस्यप्रसिद्धत्वात्तत्रविशेषश्रोतव्योकिमस्तियत्त्व।
त्वंशृणुवितिप्रतिज्ञांकरोषीतिचेत्तत्राह त्यागोहीति हे पुरुषव्या
घ्रपुरुषश्रेष्ठहियस्मात्तत्त्वविद्भिस्तामसादिभेदेनत्यागस्त्रिवि
धःसंप्रकीर्तितोविविच्योक्तस्तस्मात्सत्यागःश्रोतव्योस्तिबुद्धी
यत्नेष्यःनियतस्यतुसंन्याससमितामादिभिस्तैःसर्वैर्विधेयमपापि
वाच्यम् यद्वाहीतिनिश्चयेनमपिसर्वाणिमासादिनापूर्वमेवत्यागा
स्त्रिविधोमयैवसंप्रकीर्तितः तत्रैहिकामुष्मिककर्मजन्यफलेम
मतस्यादितिफलविषयकस्त्यागएकः भगवत्कारितेनमया।
तत्कारितमिदंकार्यंकृतमतोममेदंतस्यादितिममतात्यागवि
षयोद्वितीयः भगवदत्रद्वित्वलोपोक्तषादिनैवाहमिदंकर्माकर
वैकरोमिकरिष्येऽतः सएवसर्वंत्रःकर्ताहंतेनत्रयोज्य इतिक
र्तृत्वविषयस्त्यागस्तृतीयःभरतसत्तमेत्यनेनत्वंतुभरतवंशणात्ता
मुत्तमोऽतस्त्वंत्यागविषयेश्रवणाधिकारीऽस्यतोऽहंवदामी
तिसूचितम् पुरुषव्याघ्रेत्यनेनत्रिविधत्यागस्यकर्तुमशक्य

एवंचिंतामाकृष्या इतिस्वचिंतनम् ४ ॥

मधुसूदनी टीका १- ॥

तत्रत्यागे द्वैककर्माधिकारिकर्तृके संन्यासत्यागशब्दाभ्यां प्रतिपादि-
ते त्यागे फलाभिसंधिपूर्वकैककर्मत्यागे मे मम वचनान्निश्चयं शृणु बो-
चार्यैः कृतेऽस्मिन् भरतसत्तम किं तत्र तत्त्वमस्तीत्यत आह हे पुरु-
षव्याघ्र पुरुषश्रेष्ठ हि यस्मात् त्यागः कर्माधिकारिकर्तृकः फला-
भिसंधिपूर्वककर्मत्यागस्त्रिविधः त्रिप्रकारः तामसादिभेदेन संप्र-
कीर्तितः अथवा विशिष्टाभावरूपस्त्यागो विशेषणाभावाद्विशे-
ष्याभावादुभयाभावाच्च त्रिविधः संप्रकीर्तितः तथाहि फला-
भिसंधिपूर्वककर्मत्यागो सत्यपि कर्मणि फलाभिसंधित्यागादेकः
सत्यपि फलाभिसंधौ कर्मत्यागात् द्वितीयः फलाभिसंधेः कर्मणश्च
त्यागात्तृतीयः तत्र प्रथमः सात्त्विकश्चादेयः द्वितीयस्तु हेयो द्वि-
विधः दुःखबुद्ध्या कृतो राजसः विपर्यासेन कृतस्तामसः एतावान्क-
र्माधिकारिकर्तृकस्त्यागोऽज्ञेन सप्रश्नविषयः तृतीयस्तु कर्मान-
धिकारिकर्तृको नैर्गुण्यरूपो नाज्ञेन सप्रश्नविषयः सोऽपि साधनफ-
लभेदेन द्विविधः तत्र सात्त्विकेन फलाभिसंधित्यागपूर्वककर्मानुष्ठा-
नरूपेण त्यागेन शुद्धान्तःकरणस्योत्पन्नविविदिषस्यात्मज्ञानसाध-
नश्रवणाद्यवेदान्तवाक्यविचाराय फलाभिसंधिरहितस्यान्तःकर-
णशुद्धैः समस्तसाधनस्य कर्मणो वैलक्ष्यं जानतः स्वावरुहनेन सपरि-
त्यागः स एकः साधनभूतो विविदिषासंन्यास उच्यते तमग्रे नै-
ष्कर्म्यसिद्धिं परमामिति वक्ष्यति द्वितीयस्तु जन्मान्तरकृतसाध-
नाभ्यासपरिपाकादस्मिन्जन्मन्यादावेवोत्पन्नात्मबोधस्य कृत-
कृत्यस्य तत एव फलाभिसंधेः कर्मणश्च परित्यागः फलभूतः स
विद्वत्संन्यास उच्यते स तु यस्त्वात्मरतिरेव स्यादित्यादिश्लोकाभ्यां
प्राग्व्याख्यातः स्थितप्रज्ञलक्षणादिभिश्च बहुधा प्रपंचितः यस्मा-
देवं त्यागस्यानेकदुर्ज्ञेयतया चोक्तं तत्त्वं वेदितुमिच्छामीति अतो म-
म सर्वज्ञस्य वचनाद्दृढीमाभिप्रायः संबोधनद्वयेनकुलानिमित्तो।

त्कृषैः पौरुषवनिभिनोत्कर्षश्चयोगपन्ना निशयमच्छृवनायोक्तः
यो निश्चयो विप्रतिपत्तिको विमृग्यगोः पदयोः द्वितीयः पद्ययो
द्वत्यो ॥ ४ ॥

सदानंदी टीका ११ ॥

तत्र त्यागे त्वयाऽष्टेकर्माधिकृतकर्तृके संन्यासत्यागशब्दाभ्याम्।
षिभिः प्रतिपादिते १ निश्चयं मद्वचोभिस्त्वत्सर्वाचार्यैः कृतं शृणु
कर्माधिकारिणो यस्मात्त्यागः सफलकर्मणः २ तामसादिकभे
देन त्रिः प्रकारस्तु दाहृतः फलाभिसंधिसत्यागो विद्यमानोऽपिक
र्मणि ३ सात्विकोयं परित्यागउपादेयो मनस्विभिः फलाभिसं
धौ सत्येव कर्मत्यागस्तु राजसः ४ अज्ञानतो द्वयोरेव प्रमादा
दिभिरेव यः त्यागः फलाभिसंधेश्च कर्मणश्च स तामसः ५
यत्वेन मतावेतौ त्यागौ राजसतामसौ मुख्योयः कर्मसंन्यासो
निर्गुण्यः सतु हृद्वे अर्जुनप्रश्नविषयो न वातस्य विवेचनं
यतस्त्यागस्य त्रैविध्यं तत्त्वेन स्मात्कर्मणि तः ७ वाक्याद्वि द्वितीय
प्रायः संबोधनद्वयेन तत्कुलीनकर्मानुकोत्कर्षद्योत्यते।
सूच्यते जिते ८ ॥ ४ ॥

नीलकंठी टीका १२ ॥

निश्चयमिति तत्र कर्मणां त्यागात्यागविषये विप्रतिपत्तौ स
त्यां त्वमोपाते त्यागविषये मम वचनात् निश्चयं शृणु द्विय
स्मात् हे पुरुषव्याघ्र त्यागः त्रिविधः सात्विकराजसतामस
भेदेन त्रिप्रकारः परिकीर्तितः शास्त्रे दृष्टवैराग्यपूर्वकः क
र्मसंन्यासः सात्विकः आयासभयात्त्यागो राजसः मोहात्त
त्यागस्तामस इति तस्मादि[illegible]त्यागो निश्चयेन विचारणीय
इत्यर्थः ॥ ४ ॥

आनंदी टीका १२

तत्र तयोः पक्षयोर्मध्ये तावन्निश्चयमेवाह ॥ ४ ॥

+ संन्यासत्यागयोः परमार्थतप्रकार्थयोस्तत्स्वरूपासन्देहनिर्हृत्तये त्यागविषयमेव वक्तव्यमाह

श्री॰
गी॰टी॰
अ॰

रामकंठी टीका १४

+ तत्र तथाविधे संन्यासादभिन्नार्थे त्यागे प्रोक्तलक्षणविषये नि
श्चयं निर्णयं मन्मतमवधारय व्याख्यानलक्षणस्य कइदानीं निश्च
यो वशिष्यते यदर्थमेवमुच्यते इत्याशङ्क्याह हि शब्दो हेतौ यस्मात्त्या
गः सामान्येनोक्तलक्षणस्त्यागो विशेषतो वक्ष्यमाणहेयोपादेयरूप
ण विभागेन त्रिप्रकारः पुरस्तात्सम्यक्प्रकटीकृतः [illegible]
[illegible]
[illegible] ४ ॥

लासिकी [illegible] टीका

एवं विप्रतिपन्नोक्तमतं सर्वमतशिरोमणिभूतं निश्चाययितुमाह ॥
तत्रैवं विप्रतिपन्ने त्यागे मद्वचनान्निश्चयं शृणु त्यागस्य लोके प्र
सिद्धत्वात् किमत्र श्रोतव्यमिति मावमंस्था इत्याह हि यतो हे पुरु
षव्याघ्र अयं त्यागः सामान्यजनदुर्बोधस्तत्त्वविद्भिः सात्त्विका
दिभेदेन त्रिप्रकारः सम्यग्विवेकेन प्रकीर्तितः [illegible]

पंचोलीटीका

एवं मतभेदस्योपन्यस्य स्वमतं कथयितुमाह निश्चयमिति हे भर
तसत्तम तत्र त्यागे त्यागसंन्यासविकल्पे मम निश्चयं मतं शृणु
त्यागो हि त्यागसंन्यासशब्दार्थो हि एक एव सन् हे पुरुषव्याघ्र सत्त्वा
दिभेदैस्त्रिविधः संप्रकीर्तितः शास्त्रेषु कथितः ४ ॥

गणवीर समिद्धोधिनी ॥

अथ स्वमतं दर्शयति निश्चयमिति तत्र तयोस्त्यागस्वीकारयो
र्मध्ये त्यागे शास्त्रतिपादितस्वरूपे तत्त्वेन पर्यवसायिनि संन्या
सैकार्थे मम निश्चयमवधारय व्याख्यातलक्षणस्य कइदानीं निश्चयो वशिष्यते यदर्थ
मेवमुच्यते इत्याशङ्क्याह हि यस्मात् त्यागः सामान्येनोक्तलक्षणो

पिवक्ष्यमाणविभागेन त्रिविधः निवृत्तामसादयो विधाः प्रका
रायस्य सतादृशाः सम्यक्प्रदर्शितः परमार्थविद्भिरिति शेषः अ
तो हेयोपादेयतावशिष्यते तज्ज्ञानार्थं श्रोतव्यमेवास्तीति भावः
४॥

मधुभाष्य

निश्चयमित्यादिना यत्तभेद उक्तोऽद्वयस्तत्रइत्यादिना
दानेनाभयदानमंतर्भवति एतेषामध्ये यत्किंचिद्यज्ञा
दि कर्तव्यमेवेत्यर्थः अन्यथा ब्रह्मचारी गृहस्थो वा
वानप्रस्थो यतिस्तथा यदीच्छन्मोक्षमास्थातुमुत्तमा
श्रममाश्रयेदित्यादि व्याससूत्रादिविरोधः ज्ञानय
ज्ञविद्याभयदानब्रह्मचर्यादितपसो हिते अतोयद्वचो
ऽन्यथा प्रतीयते अधिकारिभेदेन योज्यं अन्यथेतरे
षां गत्यभावात् अन्यत्यागार्थी न युक्तं इत्याह ४॥

श्रीभगवानुवाच काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः २॥

शाङ्करभाष्यटीका १

तत्र तत्र निर्दिष्टौ संन्यासत्यागशब्दौ न निर्लुठितार्थौ पूर्वेष्वध्यायेषु अतोऽर्जुनाय बुभुत्सवे तन्निर्णयाय भगवानुवाच काम्यानामिति काम्यानां अश्वमेधादीनां कर्मणां न्यासं संन्यासं न्यासं संन्यासशब्दार्थमनुष्ठेयत्वेन प्राप्तस्यानुष्ठानं कवयः पण्डिताः केचिद्विदुर्विजानन्ति नित्यनैमित्तिकानामनुष्ठीयमानानां सर्वकर्मणामात्मसम्बन्धितया प्राप्तस्य फलस्य त्यागः सर्वकर्मफलत्यागः तं प्राहुः कथयन्ति त्यागं त्यागशब्दार्थं विचक्षणाः पण्डिताः २॥

आनंदगिरिकृतटीका २

ननु पूर्वेष्वध्यायेषु तत्र संन्यासत्यागयोरुक्तत्वात् किमिति पुनस्तौ पृष्टौ इति तत्राह तदर्थयोगात् तत्राह तत्र तत्रेति न निर्लुठितार्थौ न निष्कृष्टार्थौ न विविक्तार्थौ विमर्शः भ्रमस्तया प्रश्नस्य प्रवृत्तत्वात् प्रष्टुरभिप्रायं प्रश्नेन प्रतिपद्य भगवाननन्तरमुक्तवानित्याह पुनरिति पदद्वयोपन्यासेन संन्यासत्यागशब्दयोरर्थभेदं कथयति काम्यानामिति २

स्वामिकृतटीका ३

उत्तरं श्रीभगवानुवाच काम्यानामिति पुत्रकामो यजेतेत्येवमादिकाम्योपबन्धेन विहितानां काम्यानां कर्मणां न्यासं परित्यागं संन्यासं कवयो विदुः सम्यक् फलैः सह सर्वकर्मणामपि न्यासं संन्यासं परित्यागं पण्डिता विदुः जानन्तीत्यर्थः सर्वेषां काम्यानां नित्यनैमित्तिकानां च कर्मणां फलमात्रत्यागं प्राहुस्त्यागं विचक्षणा निपुणाः ननु स्वरूपतः कर्मत्यागं ननु नित्यनैमित्तिकानां फलाश्रवणात् विद्यमानस्य फलस्य कथं त्यागः स्यात् नहि वन्ध्यायाः पुत्रत्यागः संभवति उच्यते यद्यपि स्वर्गकामः पशुकाम इत्यादिवत् संध्यामुपासीत यावज्जीवमग्निहोत्रं जुहोतीत्यादिषु फलविशेषो न श्रूयते तथाप्यपुरुषार्थे कार्ये प्रेक्षावन्तं प्रवर्तयितुमशक्नुवन् विधिर्विश्वजिन्न्यायेन स्वर्गादिविशेषमाक्षिपतु मा वा किमपि फलमाक्षिपत्येवेत्यवश्यं फलमस्त्येवेत्याह

सिद्धिरेव विधेः प्रयोजनमिति मंतव्यं श्रुतश्च प्रहम्यूपपत्तेरीश्वरविहस्तवात्
श्रूयते च नित्यादिष्वपि फलं सर्वे एते पुण्यलोका भवंतीति कर्मणा पितृ।
लोक इति धर्मेणापापमपनुदतीत्येवमादिश्रुतस्मात् प्रकृतं कर्म सर्वं कर्म फल
त्यागं प्राहुस्त्यागं विचक्षणा इति न च फलत्यागेन पुनरपि निष्फले
ष्व कर्मसु प्रवृत्तिरेव स्यात् न च सर्वेषामपि कर्मणां संयोगपृथक्त्वेन विवि
दिषार्थतया विनियोगात् तथा च श्रुतिः तमेतमात्मानं वेदानुवचनेन ब्राह्म
णा विविदिषंति यज्ञेन दानेन तपसानाशकेनेति श्रुतः श्रुतिपदोक्तसर्वक
लेवेधकत्वेन कर्मणां विविदिषार्थं सर्वकर्मावश्यानेचेदत एव विविदिषाव
नित्यानि भवंतु विवेकेन निहतदेहाद्यभिमानतया प्रवृद्धः श्रवणमनना ता
वस्थायां तेच सर्वत्र भूतार्थज्ञानाविरुद्धत्वयोर्विनमावश्यकं कर्म कुर्वतः तत्क
तस्माराप्य कर्मयोगेनात्मनः स्वरूपेण तथा च श्रुतिः कुर्वन्नेवेह क
र्माणि जिजीविषेच्छतं समाः इति ततः परं तु सर्वकर्मनिवृत्तिः स्वत एव भ
वतीत्युक्तं नैष्कर्म्यसिद्धौ श्रवणमननाद्युत्तरे कर्माण्युत्थाय पद्धतिः
कर्तव्यान्यस्तमायोनिर्याहूंइते च नाइवेति तदुक्तं भगवता यस्त्वा।
त्मरतिरेव स्यादात्मतृप्तश्च मानवः आत्मन्येव च संतुष्टस्तस्य कार्यं न
विद्यते इति श्रीवसिष्ठमहर्षिणोक्तं न कर्माणि त्यजेद्योगी कर्मभिस्त्य
ज्यते ह्यसौ कर्मणो मूलभूतस्य संकल्पस्यैव नाशनं इति ज्ञाननिष्ठावि
क्षेपकत्वमात्रं त्यज्यते तदुक्तं श्रीभगवता भागवते तावत्कर्माणि
कुर्वीत न निर्विद्येत यावता मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते
ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः सलिंगानाश्रमांस्त्यक्त्वा चरे
दविधिगोचर इत्याद्यलमतिप्रसंगेन प्रकृतमनुसरामः २ ॥

पैशाचभाष्यटीका ४

प्रज्ञेनेन च भक्तितमर्थं यथावद्बुभुत्सकामः श्री- काम्यानां कर्मणां।
यफलानां कर्मणां कर्तव्यतया प्राप्तानां त्यागे न गतानां वा न्यासं
न्यासं विदुः विज्ञानेनिकवयः पंडिताः न च सकाम्यानामिति विशे
षणमनर्थकं यावज्जीवमग्निहोत्रादिष्वपि निबोदितानां आहत
मिति वेदनात्तेषामपि कमनीयफलत्वेन काम्यत्वादथ यथो लोका वे लाक
कांक्षाजनमन्यस्मादिष्ट्याप्रशमता निष्फलत्वेन तस्मात्सर्वेषां कर्मणां स।
धर्मैकं तेमानानां पदमिति तत्समिनित्सर्तेस्थ तथा रहेववद
ति भगवान् अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलमिति न

भाषा अनुवाद

इस प्रकारसे अन्य मत कहि कर अब अपने मत कहनेको इ
च्छासे भगवान कहते कि हे भरतसत्तम भरतवंशी अर्जुन इ
स पूर्वोक्त परस्पर विरुद्ध मतके विषय मे निश्चयरूप जो मे
रे वचन सो सुनो और त्याग की लोकमे प्रसिद्धि है तो इसके वि
षयमे और का सुने ऐसा अनादर न करना यही कहते है कि
हे पुरुषव्याघ्र कहे पुरुषश्रेष्ठ अर्जुन त्याग पदार्थ बड़ा कठि
न दुर्वोध है जिस हेतु इस काम्य कर्म्म कात्यागतत्त्वदर्शी लो
गो ने अच्छीतरहसे विचार करके तामस आदि भेदसे त्रिवि
ध कहे तीन प्रकार कहा है सो त्यागविषयक तीन प्रकार इ
सी अध्यायके इस सतये श्लोकसे कहेंगे कि नियतस्यतु
सन्न्यासः इति ४ ॥

दोहा

ता में मो निश्चय है तहं तिनके सुनहुं भारत त्यागहि
माहि पुरुषश्रेष्ठसोत्यागहि तीनप्रकार कहाहि ४

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् । य
ज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ५ ॥

शांकरभाष्यटीका १ ॥

कः पुनरसौ निश्चय इत्याह यज्ञ इति यज्ञो दानन्तप इत्येतत्त्रिवि
धं कर्म न त्याज्यं न त्यक्तव्यं कार्यं करणीयमेव तत् कस्मात् य
ज्ञो दानं तपश्चैव पावनानि विशुद्धिकारणानि मनीषिणां फला
नभिसन्धीनामित्येतत् ५ ॥

आनंदगिरिकृतटीका २

तमेव भगवतो निश्चयं विशेषतो निर्धारयितुं प्रश्नपूर्वकमन
न्तरश्लोकमवहति दर्शयति कः पुनरिति यज्ञादीनां कर्तव्यत्वे हेतु
माह यज्ञ इति न केवलं न त्याज्यं किंतु कर्तव्यमेवेत्याह कार्यमि
ति प्रतिज्ञामेव विभज्य हेतुं विभजते कस्मादिति ५ ॥

स्वामिकृतटीका ३ ॥

त्रैविध्यं तु नियतस्य तु संन्यासः कर्मण इत्यादिना वक्ष्यति प्रथमं ता
वन्निश्चयमाह यज्ञ इति द्वाभ्यां मनीषिणां विवेकिनां पावनानि चि
त्तशुद्धिकराणि ५ ॥

पैशाचभाष्यटीका ४ ॥

यज्ञदानतपःकर्म न त्याज्यं न त्याज्यं स्वत्वस्वरूपमीश्वरार्पणाय नार्थ्य
व कार्यमेव यत् यज्ञो दानं तपश्चैव पावनानि उपानदुरि नत्तयार्थी
नि मनीषिणां ज्ञानिनां यस्मात्त्रियाणि यज्ञदानतपांसि उपानदुरि
नत्तयार्थी तस्मात्कार्याण्येवेत्यभिप्रायः ५ ॥

रामानुजभाष्यटीका ५ ॥

यज्ञेति यज्ञदानतपःप्रभृति वैदिकं कर्म मुमुक्षुणा कदाचिदपि
न त्याज्यं अपि त्वाप्रयाणादहरहः कार्यमेव कुतः यज्ञदानतपःप्र
भृतीनि वर्णाश्रमसंबंधीनि कर्माणि मनीषिणां मननशीलानां पा

श्री॰
गी॰ ता॰
टी॰
सं॰

वनानि मनस्तेउपासनेनमनुष्याणांयज्ञदानतपः प्रभृतीनिपावनी
वेउपासनेऊर्वनामुपासनंनिषिद्धानिविरोधिप्राचीनकर्मविनाशनानि
५ ॥

शुभिनवगुप्तकृत टीका ६
स्पष्टार्थः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपासी टीका ७ ॥
नत्वादेशागस्यस्वरूपंदर्शयति यज्ञदानतपइति द्वाभ्यां यज्ञदान
तपोरूपंकर्मनत्याज्यं किंतुतत्कार्यमेव कुतः यज्ञोदानंतपश्च
मनीषिणांज्ञानवतांकर्त्तृपावनानिचित्तशोधकानि ५ ॥

वनमाली टीका ८ ॥
कोसौनिश्चयोविप्रतिपत्तिकोटिभूतयोःपक्षयोर्हितीयइत्याह
यज्ञइतिद्वाभ्यां वोहेतौयस्माद्यज्ञदानतपांसिमनीषिणामकृत।
कानि अकृतफलाभिसंधीनांपावनानिचित्तस्यभगवदर्पणेनयोग्यतासंपाद
भवेमेवतस्माच्चित्तशुद्ध्यर्थिभिःकर्माधिकृतैर्यज्ञोदानेतपइत्यि
फलाभिसंधिरहितेकर्मितत्रत्याज्यंकिंतुकार्यमेवतत् अत्याज्यत्वे
नकार्यत्वेलब्धेपुनरादरार्थमुक्तःकार्यमेवेत्युक्तं ५ ॥

ॐसमवैजयंती टीका ९ ॥
त्यागविषयेप्रतिज्ञातंस्वनिश्चयमाहद्वाभ्यां यज्ञदानेति चकारो
हेत्वर्थोह्यर्थकः हियस्मान्मनीषिणांशास्त्रीयविवेकबुद्धिमतां
मननशीलानांवायज्ञदानतपांसिवर्णाश्रमोचितानि एवकारा
न्नवंदनतरभ्युदितानामज्ञानदारासंस्कृतिहेतुभूतप्राचीनकर्मविनाश
शकानिभवंतितस्माद्यज्ञदानतपःप्रभृतिसत्कर्ममनुष्याणा
प्रकृष्टेनत्याज्यंप्रमादालस्यादिनानहेयंभवतिकिंतुतत्कर्मका
र्यमेवकर्तव्यमेवपरंतुकर्मप्रकृष्टेनकुर्यात् तर्हिबुद्धिशुद्ध्याभा
वेनज्ञानोदयाभावान्नमुक्तिनप्राप्यतिमसंसारीभवतीमेवकाराभि
प्रायः ५ ॥

+ कोऽसौ निश्चयो विप्रतिपत्तिकोटिभूतयोः पक्षयोः द्वितीयः पक्ष इत्याह द्वाभ्यां ॥

मधुसूदनी टीका ९ ॥

+ चो हेतौ यस्माद्यज्ञदानतपांसि मनीषिणामकृतफलाभिसंधीनां पा
वनानि ज्ञानप्रतिबंधकपापमलक्षालनेन ज्ञानोत्पत्तियोग्यतापाद-
कानि उपशमाद्यानेन च शोधकानि अकृतफलाभिसंधीनामेव य
ज्ञदानतपांस्येव शोधकानि भवंत्येव उपाधिशुद्धौ वा दाहेन शुद्धिरिवा
भिप्रेता तस्मादेतैः कर्माणुद्ध्यर्थिभिः कर्माधिकृतैर्यज्ञो दानं तपः
नियमफलाभिसंधिरहितं कर्म तन्न त्याज्यं कार्यमेव तत् [illegible]
[illegible] फलाभिसंधिना कृ
[illegible] फलाभिसंधिनां [illegible]
[illegible] ५ ॥

सदानंदी टीका ११ ॥

कस्मात्सोऽयं निश्चयस्तत्र हेतुमाह यज्ञेति फलाभिसंधिहीनानां
यज्ञदानतपांसि हि १ शोकं स्यात्मचित्तानप्रतिबंधमलक्षालनात् त
स्माच्चित्तविशुद्ध्यात्मचित्तानापादिकानि मनीषिणां २ फलाभिसंधिही
नेयं कर्म न त्याज्यं न तु द्वैधं यस्माद्यज्ञादिकं कर्म कर्तव्यमेव नचोदितं
तस्मात्त्याज्यमेवेति किं तु कार्यमेव तत्तः ५ ॥ ५ ॥

नीलकंठी टीका १२ ॥

स्तीकरोति मायेन मार्गस्वरूपकथनात्माक् परमतमस्यानपद्ये उ
पसंहरति यज्ञेति यज्ञादिकं कर्म न त्याज्यं किं तु कार्यमेव विशिष्टं
ग्रहीतेनेव वंशस्याश्रवशयमनष्टयमेव तत् प्रकरणप्रस्तावायाश्रव
णात् चकारो हेत्वर्थः यस्माद्यज्ञो दानं तपश्चैव मनीषिणां निष्कामा
नां दंभादिरहितानां पावनानि चित्तशोधकानि तथा च श्रुतिः त्र
यो धर्मस्कंधा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्म
चर्याचार्यकुलवासी तृतीयः सर्व एते पुण्यलोका भवंतीत्यादी
नां गृहस्थधर्माणां तपसो वानप्रस्थधर्मस्याचार्यकुलवासस्य ब्रह्मचारि
धर्मस्य च पावनत्वं दर्शयति अत्रापि यज्ञदानशब्देन गृहस्थधर्मोक्ते
यः तप इति वानप्रस्थधर्माः परिशेषात् कर्मेति ब्रह्मचारिधर्मा
स्तेयाः ५ ॥

श्री॰ गी॰ टी॰ अ॰

आनंदी टीका ६

एवं न त्याज्यं कार्यमेवेति नियोगेन सर्वथैव केवलज्ञानानुष्ठायिमतेनिरस्तं परमेश्वरेण ॥ ५ ॥

इत्यं त्यागविषयनिश्चयेवक्तव्ये सति कर्मणां त्यागस्यपराभिमतापवर्गलक्षणफलहेतुत्वादत्यागमेवप्रतिपादयितुं प्रदर्शितागमोपपत्तिगर्भीकारेण सर्वकर्मणामत्यागत्वमेवतावदाह ॥ म

रामकंठी टीका ५

यज्ञादिरूपं कर्म सर्वैः शास्त्राधिकृतैः सर्वदा न त्याज्यं न तस्य त्यागउपपद्यते तस्मादवश्यं कर्तव्यमेवतत् कुतो यज्ञादीनि कर्माणि मनीषिणां पावनानि मनीषिणः पुरुषाः प्रज्ञायुक्ता देवसर्गभाजः शास्त्रार्थानुष्ठानाधिकृता उच्यंते ते च द्विधा संभवंति प्रवृत्तिधर्मात्मकशास्त्रार्थानुष्ठानाधिकृता रजोलेशानुगतसत्त्वप्रधानहृदयास्तथाविधश्रद्धाश्च केचिन्निवृत्तिलक्षणेऽध्याये सहयज्ञाः प्रजाः सृष्ट्वेत्यादिना चाग्रुविद्याशमोमोचापार्थ सजीवतीत्यंतेन ग्रंथेनःगर्भेपपत्तिप्रतिपादकेन सर्वकर्मणामत्याज्यत्वं पावनं चोक्तम् अपरेतुमनीषिणो निवृत्तिधर्मात्मकशास्त्रार्थानुष्ठानाधिकृतागुणीभूतरजस्तमस्कत्वादुद्रिक्तसत्वात्मकहृदयास्तथाभूतश्रद्धाश्च यास्तितत्रैव तच्चास्त्रप्रतिपादितज्ञाननिष्ठतया यज्ञादिकर्मणो यथाख्यं यथास्वास्वयस्मात् यस्त्वात्मरतिः स्यादित्यादिना तस्मादसक्तः सततं कार्यं कर्मसमाचर असक्तो ह्याचरन्कर्मपरमाप्नोति पूरुष इत्यंतेन ग्रंथेनाःत्याज्यत्वमुक्तमित्युभयेषां मनीषिणां यज्ञादिकर्माणि पावनान्युक्तानि ५ ॥

लासिकी ... टीका

निश्चयमेवाह — सर्वैर्नैरेतानि भिरत्तानि भिर्वा यज्ञदानतपोरूपं कर्म न त्याज्यं न परिहार्यं किंतु तदवश्यं कर्तव्यमेव तत्र कर्मात्यागे प्रयोजनमाह यज्ञ इति मनीषिणां देवसर्गभाजां विवेकवर्जं यज्ञो दानं तपश्चैतान्येतानि पावनानि शोधकानि अज्ञानतूपमलनिर्णेजकानीत्यज्ञानपक्षे ज्ञानिपक्षेतत्पावनानि देहाहंभावात्मकमलनाशकानि [illegible] ५

पंचोलीटीका

अथ स्वमतं नियममाह यज्ञइति यज्ञोदानं तपः कर्म न त्याज्यं तत्का
र्यं करणीयमेव तस्मात् यज्ञोदानं तपः एतानि त्रीणि मनीषिणां फ
लकामनारहितानां पावनानि चित्तशुद्धिकरणानि ५॥

रणवीरसमिद्बोधिनी

निश्चयस्वरूपमाह यज्ञइति यज्ञादिरूपं कर्म न त्याज्यं वेदादिवि
तेः सर्वदा परिहर्तुं नोपपद्यते तस्मादवश्यं कर्तव्यं तत् यतो म
नीषिणां दैवीसंपदभिजातानां प्रज्ञातिशयशालिनां धर्मानु
ष्ठानाधिकृतानां पावनानि अनेकजन्मांतरार्जितदुष्कृतमलप
रिमार्जकानि भवंति ५॥

मधुभाष्य

५॥

भाषा अनुवाद

अब प्रथम अपने निश्चित वचन को दो श्लोक से कहते हैं कि यज्ञ दान औ तपरूप कर्म त्याग करने योग नहीं है वरन अवश्य ही कर्तव्य है क्यों कि ये यज्ञ दान तप इत्यादि सत् कर्म विवेकी पुरुषों को पावन करते हैं अर्थात् चित्त के शुद्धि करनेवाले हैं ५ ॥

दोहा

यज्ञ दान तप त्याज्य नहिं योग्य हि करणो सोय यज्ञ दान
तप तीन यह पावन मुनिन को होय ५॥

एतान्यपि तु कर्म्माणि संगं त्यक्त्वा फलानि च
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमं ६ ॥

शांकरभाष्यटीका १ ॥

एतान्यपीति एतान्यपि तु कर्म्माणि यज्ञदानतपांसि पावनान्यु
क्तानि संगमासक्तिं तेषु त्यक्त्वा फलानि च तेषां परित्यज्य कर्त
व्यानीति अनुष्ठेयानीति मे मम निश्चितं मतमुत्तमं निश्चयं श्र
णु मे तत्रेति प्रतिज्ञाय पावनत्वं च सहेतुमुक्त्वा एतान्यपि कर्म्माणि
कर्तव्यानीत्येतन्निश्चितं मतं उत्तममिति प्रतिज्ञातार्थोपसंहार एव
नापूर्वार्थं वचनमेतान्यपीति प्रकृतसन्निकृष्टार्थत्वोपपत्तेः सासंगस्य
फलार्थिनो बंधहेतवो एतान्यपि कर्म्माणि मुमुक्षोः कर्तव्यानीति अपिश
ब्दस्यार्थः न त्वन्यानि कर्म्माण्यपेक्ष्य एतान्यपीत्युच्यते अन्ये वर्णयन्ति नि
त्यानां कर्म्मणां फलाभावात् संगं त्यक्त्वा फलानि चेति नोपपद्यते एता
न्यपीति यानि काम्यानि कर्म्माणि नित्येभ्योऽन्यानि एतानि अपि कर्त
व्यानि किमुत यज्ञदानतपांसि नित्यानि इति तदसत् नित्यानामपि
कर्म्मणां फलवत्त्वोपपादितत्वात् यज्ञो दानं तपश्चैव पावनानीत्या
दि वचनेन नित्यान्यपि कर्म्माणि बंधहेतुत्वाशंकया जिहासोर्म्मुमु
क्षोः कुतः काम्येषु प्रसंगः दूरेण ह्यवरं कर्म्मेति च निंदितत्वात् यज्ञा
र्थात् कर्म्मणोऽन्यत्रेति च काम्यकर्म्मणां बंधहेतुत्वस्य निश्चितत्वात् त्रै
गुण्यविषया वेदाः त्रैविद्या मां सोमपाः क्षीणे पुण्ये मर्त्यलोकं विशंती
ति च दूरव्यवहितत्वाच्च न काम्येष्वेतान्यपीति व्यपदेशः ६ ॥

आनंदगिरिकृत टीका २ ॥

प्रतिज्ञातमर्थमुपसंहरति एतान्यपीति उपसंहारश्लोकाक्षराणि
व्याकरोति एतानीत्यादिना उक्तार्थमुक्त्वा तात्पर्यार्थमाह निश्चय
मिति प्रकृतार्थोपसंहारे गमकमाह एतान्यपीति अपिशब्दस्य विव
क्षितमर्थं दर्शयति सासंगस्येति व्यावर्त्यं कीर्तयति नत्विति एतान्यपी
त्यादिवाक्यं न नित्यकर्मविषयमिति मतमुपन्यस्यति अन्य इति न
चेदं नित्यकर्मविषये किं विषयं तर्हि इत्याशंक्य वाक्यमवतार्य

श्री·
गी·टी·
म

२७

व्याकरोति एतानीत्यादिना नित्यानामफलत्वमभ्युपेत्य पक्षोपन्यस्त
मुक्तमिति दूषयति तदसदिति यत्तु काम्यान्यपि कर्तव्यानीति त
न्निरस्यति नित्यान्यपीति किंच काम्यानां भगवता निर्दिष्टत्वान्न तेषु
मुमुक्षोरनुष्ठानमित्याह हरेरिति किंच मुमुक्षोरपेक्षितमोक्षापेक्ष
या विरुद्धफलवत्त्वात् काम्यकर्म्मणां न तेषु तस्यानुष्ठानमित्या
ह यज्ञार्थादिति काम्यानां बन्धहेतुत्वे निश्चितमित्यत्रैव पूर्वोक्तवा
क्यानुकूल्यं दर्शयति त्रैगुण्येति किंच पूर्वश्लोके यज्ञादिनित्यक
र्मणां प्रकृतत्वादेतच्छब्देन सन्निहितवाचिना परामर्शात् काम्यक
र्मणां च काम्यानां कर्मणामिति व्यवहितानां सन्निहितपरामर्शि
कैतच्छब्दाविषयत्वान्न काम्यकर्म्मणामपीति व्यपदेशमर्हन्ती
त्याह हरेरिति ६ ॥

स्वामिकृत टीका ३ ॥

येन प्रकारेणाकृतान्येतानि पावनानि भवन्ति तं प्रकारं दर्शयन्नाह
एतानीति यानि यज्ञादीनि कर्म्माणि मया पावनानीत्युक्तान्येतान्यपि
कर्तव्यानि कथं संगं कर्तृत्वाभिनिवेशं त्यक्त्वा केवलमीश्वराराधन
तया कर्तव्यानि फलानि च त्यक्त्वा कर्तव्यानि इति च निश्चितं मम मत
मेवोत्तमं [illegible] ६ ॥

पिशाचभाष्य टीका ४ ॥

एवं तु कर्तव्यानि कथमेतानि कर्म्माणि यज्ञादीनि संगं फले स्पृहां फ
लानि च त्यक्त्वा कर्तव्यानीति निश्चितमसंदिग्धमुत्तममेतद् ६ ॥

रामानुजभाष्य टीका ५ ॥

२४

एतानि नियमान्मनीषिणां यज्ञदानतपः प्रभृतीनि पावनानि तस्मा
दुपासनवदेतान्यपि यज्ञादीनि कर्माणि मदाराधनरूपाणि संगं क
र्म्मणि ममतां फलानि च त्यक्त्वा आप्रयाणादहरहरुपासननिर्वृत्तये
मुमुक्षुणा कर्तव्यानीति मम निश्चितमुत्तमं मतं ६ ॥

अभिनवगुप्तकृत टीका ६ ॥

स्पष्टार्थः ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७ ॥ ॥ ॥ ॥

केनप्रकारेणकृतानिपावनानिभवंतीत्याह एतान्यपि[तु]ीति एतानिय
ज्ञदानतपोरूपाणिकर्माणिसंगंत्यक्त्वाफलानिचहिकामुष्मिका
निमुक्त्वाकेवलमीश्वरार्पणतयाकर्तव्यानीतिमेमतंनिश्चितंचसंदि
ग्धंउत्तमंचाटे तदेवादरणीयमित्यर्थः ६ ॥

वनमाली टीका ६ ॥

ननुयदियज्ञादीनांचित्तशोधनसामर्थ्यमस्तितर्हिफलेछयाकृ।
तान्यपिशोधकानिस्युरेवंकृतफलेछात्यागेनेत्यतआह एतानीति
काम्यान्यपिकर्माणिशोधकानिभवंत्येवपरंतुसाशुद्धिस्तत्फलभो।
गायैवभवतिननुमुक्तये एतान्यपियज्ञादीनियानिफलेछयाकृता
निबंधहेतुभूतान्यपिमुमुक्षुभिः संगमहमिदंकर्मकरोमिमदीय
मिदंकर्मेतिकर्मसंगंएतत्कर्मणामानिफलानिभवंत्येतान्यभि।
संधायमानानिफलानिचत्यक्त्वाशुद्धयेकर्तव्यानीतिमेमम
तंनिश्चितं यद्वा केवलकाम्यानांफलानपेक्षयाकरणेफलान
भावादेवसर्वसाम्यमितोयेनप्रकारेणकृतानिपावनानितमाह
एतानीति संगंस्वस्यकर्तृत्वाभिनिवेशमीश्वराराधनतयाफला
निचत्यक्त्वाकर्तव्यानीतिनिश्चितंमतं अतस्त्यक्तफलेछानांकर्म
णांचित्तशुद्धिरेवफलमित्यर्थः ६ ॥

उत्तमवैजयंती टीका ६ ॥

ननुयज्ञादीनिकर्माणिकेनप्रकारेणपावनानीत्यपेक्षायांप्रका
रमाह एतान्यपीतिचकारोयथाशब्दार्थकः यथामदुपासनमु
नानिभक्तिज्ञानादीनिमुमुक्षुणाकर्तव्यानिभवंतितथाएता
न्यपि यज्ञदानतपःप्रभृतीनिमदाराधनलक्षणानिकर्माणि
कर्तव्यानिभवंति किंतुसंगंस्वकर्तृत्वाभिनिवेशंफलानिच।
इहराज्यपशुपुत्रादिरूपाणि अमुत्रचदेवांगनाविहारादिरूपा।
नादिलक्षणानिचत्यक्त्वाइतोनिषिद्धवर्णाश्रमेहपार्थमेम।
मैतन्मेत्यागविषयेसर्वेभ्योमतेभ्यःश्रेष्ठंमतंत्यागरूपंनि।
श्चितंपार्थेत्यनेनयतस्त्वमस्तिमत्परःअतोमामेवत्व।

+ यदि यज्ञदानतपसामंतःकरणशोधने सामर्थ्यमस्ति तर्हि फलाभिसंधिना कृतान्यपि तानि तच्छोधकानि भविष्यंति कृतफलाभिसंधित्यागेनेत्यत आह ॥

त्वा र्थे निश्चितं मतं गीतं कृष्णेनाम्नेयामिनिमूर्छिते ६ ॥

मधुसूदनी टीका १० ॥

+ तत्राहः शंकानिराकरणार्थः यद्यपि काम्यान्यपि शुद्धिमादधति य
मित्वाभावात् तथापि सानन्फलोपयोगिमेव काम्यं कर्मफलोपयो
गिमेव विशुद्ध्याहादिदेहेन नहीदं भज्यते फलमिति ज्ञानोपयोगिनी
तशुद्धिमादधति यानि यज्ञादीनि कर्माणि एतानि फलाभिसंधि पूर्व
कत्वेन बंधहेतुभूतान्यपि मुमुक्षुभिः संगमहमेवं करोमीति कर्तृ
त्वाभिनिवेशं फलानि चाभिसंधीयमानानि त्यक्त्वा करणशुद्धये
कर्तव्यानीति मम निश्चितं अत एव हे पार्थ कर्माण्येतैः कर्माणि
त्याज्यानि न त्याज्यानि वेति द्वयोर्मतयोर्नत्याज्यानीति मम निश्चितं मत
मतमुत्तमं यदुक्तं निश्चयं शृणु मे तत्रेति सोयं निश्चय उपसंहृतः
भगवत्पूज्यपादानामभिप्रायोयमीरितः अनिमान तयाभावेतु रा
स्वपतः स्यापितः ... कर्मन त्याज्यमिति चापरे इति
६ ॥

महानंदी टीका ११ ॥

धीशोधने स्ति सामर्थ्यं यदि यज्ञादिकर्मणां शोधकानेव तर्हि स्युः
कृतान्यपि फलेप्सुना १ कृतफलाभिसंधेः कत्यागेनैव वेच्छ
एव धर्मस्वभावतः शुद्धिः काम्यानामपि संभवेत् २ तथापि का
मिनां सानन्फलभोगोपयोगिनी ज्ञानोपयोगिनी नास्ति तदुक्तं
वार्तिके स्फुटं ३ काम्येपि शुद्धिरस्त्येव भोगसिद्ध्यर्थमेव सा विद्
राहादिदेहेन नैवेदं भज्यते फलं ४ ज्ञानोपयोगिनी शुद्धिमादध
त्यवयानि तु यज्ञादीन्येव कर्माणि विधकान्यपि कामिनां ५ मम
त्वाभिः परित्यज्य कर्तृत्वाभिमतिं तथा अभिसंधीयमानानि त्य
क्त्वा कर्मफलान्यपि ६ कर्तव्यानि धियः शुद्ध्यै इति मे निश्चितं मत
ने अत एव हि हे पार्थ न त्याज्यानि मुमुक्षुभिः ७ कर्माणि का
विभिः त्रिभिः कर्माणीत्येतन्मे मतं ८ ॥ ६ ॥

नीलकंठी टीका १२ ॥

एवमत्यागपक्षमुक्त्वा श्रौतत्वकाम्यस्य मे स्वाभिमतं तमेवाग्यामत्यागमस्त
स्वपक्षं दर्शयति एतानीति तु शब्दः पूर्वोपक्षस्त्वात्यक्ता छेलन
र्णयदर्शयति अपिशब्दएवशब्दार्थः एतान्येव कर्माणि यज्ञदान
तपांसि संगं त्यक्त्वा अहं मे तेषां कर्ता ममायावश्यमेतानि कर्तव्यानीत्य
भिमानं वर्जयित्वा यथासनिमित्तं त्यक्त्वा एतैः कृतैरहं स्वर्गं वा चि
त्तशुद्धिं वा ज्ञानं वा प्राप्स्यामीति फलानि च त्यक्त्वा चकारादेषाम
करणे मम प्रत्यवायो भविष्यतीत्येतमप्यभिसंधिं त्यक्त्वा अवश्यमेति
हैतैर्वा संगत्वभावेन पुरुषेण कर्तव्यानि इति एवंप्रकारं मे
मम मतं उत्तमं पूर्वमतानां श्रेष्ठ तत्र हि कर्तृत्वाभिमानरूपेण
संगेन प्रत्यवायो मा दभयाच्च कर्मानुष्ठाने विहिते श्रुत्वा ततद
भावादसंगत्वाद्विशेन कर्मणां त्यागः स्वरूपेणात्यागइतिभेदः ६

आनंदी टीका १३

आसंगं रागद्वेषादिहठेन प्रहृतिम् फलानि इष्टार्थानि ६ ॥

रामकंठीटीका १४

एतान्यत्याज्यत्वेनेह प्रतिपादितानि परस्मै दोषवत्त्याज्यत्वेनम
तिपन्नान्यपि सर्वाणि कर्तव्यान्यवश्यमनुष्ठेयानीत्युत्तमं मत्कृ
तं मतं दीयं चैतन्मतं तेनिश्चितं प्रदर्शितं प्रकारेण एवमेव निर्णी
ते कथं कर्तव्यानीतीति विशेषमाह संगं त्यक्त्वा फलानि चे
ति संगात्संजायते कामः इत्यत्र व्याख्यानस्वरूपः संग एकः क
र्मिस्तदोषस्तथानन्तरं रागद्वेषदोषयोगादिष्टानिष्टविषयप्रा
प्तिपरिहाररूपाणि फलानि द्वितीयो दोषः तत्त्वनुष्ठानमनः
संगफलानि च त्यक्त्वा कर्माणि कर्तव्यान्येव तेन कर्मसु संगफ
लाभिसंधित्यागस्त्यागउच्यते न तत्वननुष्ठानमेव त्यागस्तस्माद्व
क्तव्योपपन्ना ॥ ६ ॥

लासिकी [illegible] टीका १५

येनप्रकारेणकृतान्येतानि पावनानि भवंति तंप्रकारमाह ॥ ॥

अपित्विति किंत्वर्थे एतान्यप्यपतयो कानि कर्माणि यज्ञदानादीनि कर्तव्यान्यवश्यं करणीयानि किंतु संगं तन्निमित्तमभिनिवेशं फलानीष्टानिष्टरूपाणि त्यक्त्वा कर्तव्यानीति मे मे ईश्वरस्य सर्वोत्कृष्टं निश्चितं प्रमाणैरवधारितं मतमुत्तमम् ॥ ६ ॥

पंचोलीटीका

तेषां पावनत्वप्रकारमाह एतानीति तुपुनः हे पार्थ एतानि यज्ञदानतपांसि कर्माणि तेषु कर्मसु संगं आसक्तिं प्रीतिं त्यक्त्वा च पुनः फलानि त्यक्त्वा कर्तव्यानीति एवं मे मम निश्चितं मतमुत्तमं ६ ॥

रत्नवीरसमिद्बोधिनी

अनुष्ठानप्रकारमाह एतानि यज्ञादीनि कर्माणि हात्याज्यत्वेन प्रतिपादितानि परैः सदोषत्वात्याज्यत्वेन प्रतिपन्नान्यपि सर्वाणि कर्तव्यान्यवश्यमनुष्ठेयानि विशेषमाह संगं त्यक्त्वा प्रतिपादितलक्षणः संगः फलानि चेष्टानिष्टप्राप्तिपरिहाररूपाणि तद्द्वयमपि त्यक्त्वा इत्येतन्मे मतमुत्तमं प्रकृष्टं मतं निश्चितमस्ति कर्मसु कर्मफलाभिसंधित्यागपूर्वकत्यागेनानुष्ठानमेव सम्यक् इति भावः ६ ॥

मधुभाष्य

६ ॥

भाषा अनुवाद

जिस प्रकार से किये गये ये कर्म्म विवेकी जनो के चित्त को शुद्ध करतेहैं सोई प्रकार से इन कर्मोंका अनुष्ठान देखावते हुये कहते हैं कि हे पार्थ्य अर्जुन संग कहे कर्त्तृत्वाभिनिवेश अर्थात् हमकर्त्ता इस कर्म्म को करतेहैं इस अहंकार को छोड़कर केवल ईश्वर केआधीन रूपसे कर्म्म का अनुष्ठान करना उचितहै और फल की कामना कोभी त्याग करके जो कर्म्मकाकरना है यही हमारा निंत अभिमत सिद्धान्त है इसी से वह कर्म्म उत्तम है इय भगवान अर्जुन से कहाहै ६ ॥

दोहा

यहभिजो पुनकर्म हैं त्यागसंगफलकोय मोमत करणे योग्यहै पार्थनिश्चितसोय ६

नियतस्य तु संन्यासः कर्मणो नोपपद्यते मो
हात्तस्य परित्यागस्तामसः परिकीर्तितः ७

शाङ्करभाष्य टीका १ ॥

तस्मादज्ञस्याधिकृतस्य मुमुक्षोः नियतस्येति नियतस्य तु
नित्यस्य संन्यासः परित्यागः कर्मणो नोपपद्यते अज्ञस्य पावन
त्वेष्टत्वात् मोहादज्ञानात्तस्य नियतस्य परित्यागो नियतं चा
वश्यं कर्तव्यं त्यज्यते चेति विप्रतिषिद्धमतो मोहनिमित्तः परि
त्यागस्तामसः परिकीर्तितो मोहश्च तम इति ७ ॥

आनंदगिरिकृत टीका २ ॥

नित्यकर्मणामवश्यकर्तव्यत्वमुक्तमुपजीव्याविदिते प्र
यत्नं तत्र श्लोकमवतारयति तस्मादिति न तु कश्चिन्नियतम
पि कर्म त्यजन्नुपलभ्यते तत्राह मोहादिति अज्ञाते पावन
त्वापरिज्ञाने अज्ञस्य नित्यकर्मत्यागो मोहादित्येतदुपपादय
ति नियतं चेति नित्यकर्मत्यागस्य मोहकृतत्वे उक्तस्तामस
त्वमित्याशंक्याह मोहश्चेति ७ ॥

प्रतिज्ञातं त्यागस्य त्रैविध्यमिदानीं दर्शयति —

स्वामिकृतटीका ३

नियतस्येति त्रिभिः काम्यस्य कर्मणो बंधकत्वात्संन्यासो युक्तः
नियतस्य तु नित्यस्य पुनः कर्मणः संन्यासस्त्यागो नोपपद्यते सत्व
शुद्धिद्वारा मोक्षहेतुत्वात् अतस्तस्य परित्याग उपादेयमिदमाज्ञ
मित्येवं लक्षणान्मोहाद्देवभवेत् स च मोहस्य तामसत्वात्ता
मसः परिकीर्तितः ७ ॥

पैशाचभाष्य टीका ४ ॥

काम्यकर्मणां त्यागोस्तु नित्यस्य नियतस्य कर्मणस्त्यागो नोपप
द्यते सत्वशुद्ध्यर्थं सतां कर्तव्यत्वात् मोहादज्ञानात्तस्य नियतस्य क
र्मणः त्यागस्तामसः परिकीर्तितः ७ ॥

रामानुजभाष्यटीका ५

नियतस्येति नियतस्य नित्यनैमित्तिकस्य च महायज्ञादेः कर्मणः संन्यासस्त्यागो नोपपद्यते शरीरयात्रापि च ते न प्रसिध्येदकर्मण इति शरीरयात्राया एवासिद्धेः शरीरयात्रा हि यज्ञशिष्टाशनेन निर्वर्त्यमाना सम्यक्ज्ञानाय प्रभवति अन्यथा ते त्वघं भुञ्जते पापा इत्ययज्ञशिष्टाघरूपाशनाप्यायनमनसो विपरीतज्ञानाय भवति अन्नमयं हि सोम्य मन इत्यनेन हि मन आप्यायते आहारशुद्धौ सत्वशुद्धिरित्यादिना ब्रह्मसाक्षात्काररूपं ज्ञानं आहारशुद्ध्यायत्तमिति श्रूयते तस्मान्महायज्ञादि नित्यनैमित्तिकं कर्म आप्रयाणात् ब्रह्मज्ञानायोपादेयमिति न तस्य त्यागो नोपपद्यते एवं ज्ञानोत्पादिनः कर्मणो बन्धकत्वमोहात्परित्यागस्तामसः तमः कार्याज्ञानमूलत्वेन त्यागस्य तमोमूलत्वं प्रमादमोहौ तमसो भवतोऽज्ञानमेव चेति प्रोक्तं अज्ञानं तु ज्ञानविरोधि विपरीतज्ञानं तथैव वक्ष्यते अधर्मं धर्ममिति या मन्यते तमसावृता सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी इति अतो नित्यनैमित्तिकादेः कर्मणस्त्यागो विपरीतज्ञानमूलस्तामस एव ७ ॥

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं ॥ ७ ॥

परमार्थप्रपा टीका ७ ॥

अथ त्यागस्य त्रैविध्यमाह नियतस्येति काम्यस्य कर्मणो बन्धकत्वात्तस्य त्यागो युक्तः नियतस्य नित्यस्य तु कर्मणः संन्यासस्त्यागो नोपपद्यते न युज्यते सत्वशुद्धिद्वारा मोक्षहेतुत्वात् मोहादज्ञानात्तस्य (त्या) नित्यस्य कर्मणो यस्त्यागः स तामसः परिकीर्तितः ७ ॥

वनमाली टीका ८ ॥

ननु देवयज्ञदानतपःकर्म न त्याज्यमिति चापरे इति स्वपक्षं स्थापयित्वा त्याज्यं दोषवदित्येके इति परपक्षं त्रैविध्याख्यानेन निराकरणमारभते नियतस्येति काम्यस्य कर्मणः फलेच्छया कृतस्य शुद्धिहे

न्त्वाभावेनवैयर्थ्यहेतुत्वेनचदोषत्वानुपपत्तेःक्रियमाणस्यागउ
पपद्यतएव नियतस्यनित्यतयास्ववर्णाश्रमोदितस्यकर्मणश्चित्त
शुद्धिहेतुत्वेनादोषस्यतस्यत्यागोनोपपद्यते नचकाम्यस्यैव।
नित्यस्यापिदर्शपूर्णमासज्योतिष्टोमादेःपश्वादिहिंसामिश्रितत्वेनस
दोषत्वं नचाग्नीषोमीयंपशुमालभेतइत्यादिविशेषविधिगोचरत्वा।
क्रत्वंगहिंसायांनहिंस्यात्सर्वभूतानीतिसामान्यनिषेधस्यप्रवृत्तिरप
रत्वमितिवाच्यंभिन्नविषयत्वेनविधिनिषेधयोर्बाधेनैवसमावेशात्
निषेधेनहिंसापुरुषस्यानर्थहेतुर्हिंसेत्यभिहितं विधिनाचक्रत्वर्थासउ
केनत्वनर्थहेतुत्वेनेति तथाचक्रतूपकारकत्वपुरुषानर्थहेतुत्वयो
रेकत्रसंभवात् क्रत्वर्थापिहिंसानिषिद्धेतिहिंसायुक्तंदर्शपूर्णमास
ज्योतिष्टोमादिसर्वंदुष्टमेवविहितस्यापिनिषिद्धत्वेतिषिद्धस्यापिच
विहितत्वेश्येनादिवदुपपन्नत्वमेवयथाहिश्येनेनाभिचरन्यजेतेत्याद्य
भिचारविधिनाविहितोपिश्येनादिर्नहिंस्यात्सर्वभूतानीतिनिषेधवि
षयत्वादनर्थहेतुरेवतद्दोषादिवर्गीकृतस्यतत्राधिकारः एवंज्यो।
तिष्टोमादावपितथाचोक्तंमहाभारते जपस्तुसर्वधर्मेभ्यःपरमोधर्म
उच्यते अहिंसयाहिभूतानांजपयज्ञःप्रवर्तते इति मनुनापिज।
प्येनैवतुसंसिध्येद्ब्राह्मणोनात्रसंशयः कुर्यादन्यन्नवाकुर्यान्मैत्रो
ब्राह्मणउच्यतइतिवदतामैत्रीमहिंसांप्रशंसताहिंसायादुष्टत्वमेव
प्रतिपादितमतस्माज्जपमेवज्योतिष्टोमादिकमितिप्राप्ते नक्रत्वर्थ
हिंसानर्थहेतुः विधिविहितेनिषेधानवकाशात् लिङाद्यर्थोविधि
वाक्येप्रवर्तनाप्रेरणाविध्यपरपर्यायः निषेधवाक्येतुनिवर्तनानि
वारणानिषेधापरपर्यायः शाब्दीभावनाभाव्यंतस्यायथायोगंप्रवृ
त्तिनिवृत्तीशाब्दभावनाज्ञानेकरणाकरणांशंचशाब्दभावार्थभावना
निष्पादकत्वेइतिकर्तव्यतानुग्राह्यायोगस्तुतिनिंदे शाब्दभावनाभा
व्यार्थभावनायास्तिसृभिरूपायाप्रवृत्तेर्निवृत्तेश्चज्योतिष्टोमकलंज
भक्षणादाविष्टसाधनत्वानिष्टत्वज्ञानेविनानुपपत्तेस्तत्रेष्टसाधनत्वा
निष्टत्वज्ञानेविनानुपपत्तेस्तत्रेष्टसाधनत्वानिष्टसाधनत्वेप्रमीये
ते ज्योतिष्टोमादेरनिष्टहेतुत्वेविधिवाक्यानुपपत्तेःप्रवृत्तिर्नस्यात्
अनिष्टसाधनत्वज्ञानस्यप्रवृत्तिविरोधिनिवृत्तिजनकत्वेनप्रवृत्तिप्र

32

तिवेधकत्वात् लिङाद्यर्थप्रवर्तनाया प्रवृत्तिविषये यानर्थकरणे
प्रवर्तनावलेव तेस्यानर्थहेतेन विषयीकरोतीतियागोपहिंसा
विधिवाधिते सामान्यनिषेधवाक्यं रागद्वेषमूलकं क्रत्वर्थभिन्न
लौकिकहिंसाविषयकं श्येनेनेवेष्टसाधनताया विधिवोधितत्वात्
सधर्मत्वमेव अनिष्टजनकत्वेन श्येनफलस्य वैरिमरणस्य कलश
सिचानादिरूपहिंसात्मकाभिचारस्य वेदवोधितत्वात्तस्य धर्मत्व
मेव अनिष्टजनकत्वेन श्येनानिष्टसाधनताकत्वादधर्मत्वं फल
स्यविधिजन्यप्रवृत्तिविषयताभावेन तत्रानिष्टसाधनत्वज्ञानेन प्र
वृत्तिप्रतिवंधकेप्यत्र त्वैरिवधकामो यजेतेति श्येनेन त्वैरिमरणा
नुकूलकरैलौकिकव्यापाराभावे निवैरिमरणारूपपरानिष्टचि
न्तनादेवपापं अभिचारार्थकरणस्यास्मत्वाज्वनशिष्टानां नचप्रह
निः परस्योत्सादनार्थमिति विहितस्यापि निषेधविषयत्वेषो
डशिग्रहणस्यापि कलंजभक्षणवदनर्थहेतुत्वापत्तेः तस्यापि
नातिरात्रेषोडशिनं गृह्णातीति निषेधात् उक्तं हि श्रीवादरायणेन
अशुद्धमिति चेन्न शब्दादिति ज्योतिष्टोमादिकं अग्नीषोमीयादिहिं
साधकत्वेनाशुद्धमिति चेन्न अग्नीषोमीयं पशुमालभेतेत्यादिवि
धिशास्त्रादित्यस्यार्थः जपप्रशंसावाक्येन तु नेग्नीषोमीयहिंसाया अश्रेय
मित्वबोधकं तत्त्वेनास्वर्थात् तथा च सांख्यानां विहितेनिषिद्धत्व
ज्ञानमर्थहेतावनर्थहेतुत्वज्ञानं धर्मे वाधर्मत्वज्ञानमतत्त्वे तत्त्वज्ञा
नेविपर्यासरूपो मोहः तस्मात्तामसकर्मणो यः परित्यागः सतामसः
परिकीर्तितः ७ ॥

ऊँसमवैजयंती टीका ८ ॥

त्यागस्यतत्त्वं विप्रतिज्ञातं त्रैविध्यं तद्दाह त्रिभिः नियतस्येति यद्यपि
स्वर्गकामो यजेतेत्यादिशास्त्रविहिते काम्यकर्म तथापि तस्यावश्य
कत्वाभावात् रागप्राप्तरूपत्वं नियतस्येति गृहस्थः संध्यामुपासीत यावज्जी
वमग्निहोत्रं जुहोतीत्यादिशास्त्रविहितनित्यनैमित्तिकस्य पंचयज्ञादेः
कर्मणस्त्वमरणालस्याणादिवंदनगीतात्मज्ञानेन संसारमोचकत्वा
देहशुद्धिसाधकत्वाच्च संन्यासस्यायोगान्नोपपद्यते तद्युक्तो न भवति य
दि मोहात् इदं सर्वमेव कर्म बंधनहेतुर्भवतीत्येवंप्रकारेण शास्त्रवि

वेकज्ञानात्तस्य कर्मणः परित्यागः परित्यक्तृरूपेण त्यागः पुरुषेण क्रि
यते तं हि सत्वागस्तामसो मोहस्य तमोगुणधर्मत्वात् परिकीर्तितः निया
तं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः इत्यादिभिस्तत्रतत्रभगवतामया
परित्तो विस्तरेण कीर्तितः कथितः अयं भावः यज्ञादिकर्मत्यागोयज्ञशि
ष्टाशिनः संतो मुच्यंते यज्ञशिष्टामृतभुजो यांति ब्रह्म सनातनमित्याद्युक्त
प्रकारेण यज्ञशिष्टान्नभक्षणाद्ब्रह्मज्ञानहेतोः शरीरयात्राया अप्रसिद्धे
स्तदसिद्ध्या अन्नं हि सौम्य मनः इत्यनेन हि मनस आप्यायनस्यासिद्धिस्तद
सिद्ध्या आहारशुद्धौ सत्वशुद्धिरित्यादिना ब्रह्मसाक्षात्कारज्ञानं न सिद्ध्य।
ति तदसिद्ध्या च विपरीतज्ञानान्मोक्षाभावो भवतीति ७ ॥

+इदानीं त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः इति परपक्षस्य पूर्वोक्तत्याग त्रैविध्यव्यापनेन निराकरणमारभते ॥

मधुसूदनी टीका ९ ॥

+काम्यस्य कर्मणः अंतःकरणशुद्धिहेतुत्वाभावेन बंधहेतुत्वेन च दोष
वत्त्वं यन्निवृत्तिहेतुर्वा यार्थिना क्रियमाणस्त्याग उपपद्यत एव नित्य
नैमित्तिकस्य तु नित्यस्य कर्मणः शुद्धिहेतुत्वेनादोषस्य संन्यासस्त्यागोऽनुपपन्न।
ण अंतःकरणशुद्ध्यर्थिना नोपपद्यते शास्त्रयुक्तिभ्यां तस्यांतःकरण
शुद्ध्यर्थमवश्यानुष्ठेयत्वात् तथा चोक्तं प्राक् आरुरुक्षोर्मुनेर्योगं
कर्म कारणमुच्यते इति ननु दोषवत्त्वं काम्यस्येव नित्यस्यापि दर्श
पूर्णमासज्योतिष्टोमादेः व्रीहिपश्वादिहिंसामिश्रितत्वेन सांख्यै।
रभिहितं न च व्रीहीनवहंति अग्नीषोमीयं पशुमालभेत इत्यादिवि
शेषविधिगोचरत्वात् क्रत्वंगहिंसायाः न हिंस्यात्सर्वा भूतानीति सा
मान्यनिषेधस्य तदितरपरत्वमिति सांख्यैर्भिन्नविषयत्वेन विधिनि
षेधयोरबाधेनैव समावेशसंभवात् विधेयेनापि पुरुषस्यानर्थहेतु
हिंसेत्यभिहितं न त्वक्रत्वर्थासेति विधिना च क्रत्वर्थासेत्यभिहितं
न त्वनर्थहेतुर्नेति तथा च क्रतूपकारकत्वपुरुषानर्थहेतुत्वयोरे
कत्र संभवात् क्रत्वर्थापि हिंसा निषिद्धैवेति हिंसायुक्तं दर्शपूर्णमा
सज्योतिष्टोमादि सर्वं कर्म दुष्टमेव विहितस्यापि निषिद्धत्वं निषि
द्धस्यापि विहितत्वं श्येनादिवदुपपन्नमेव यथा श्येनेनाभिचरन् यजे
तेत्याद्यभिचारविधिना विहितोपि श्येनादिः न हिंस्यात्सर्वा भूतानीति
निषेधविषयत्वादनर्थहेतुरेवं तद्दोषवत्त्वात् हिंसारूपत्वाच्च रागद्वेषादिवशी

श्री॰
गी॰टी॰
प्र॰

33

क्तत्त्वस्य तत्राधिकारः एवं ज्योतिष्टोमादावपि तथा चोक्तं महाभार
ते जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते अहिंसया हि भूतानां ज
पयज्ञः प्रकीर्तितः इति मनुनापि जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र सं
शयः कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते इति वदता मैत्रीमहि
मां प्रशंसता हिंसाया दुष्टत्वमेव प्रतिपादितं अतः करणशुद्धिरहिते
न गायत्रीजपादिना तत्राप्रपन्नस्य इति हिंसादिदोषदुष्टज्योति।
ष्टोमादिनित्यकर्मदोषासहिष्णुना शेषनादिकमिव कर्माधिकारिणा
पिष्टाज्यमिति यामेहुमः न च क्रत्वर्था हिंसानर्थहेतुः विधिस्पृष्टे नि
षेधानवकाशात् तथा हि विधिना बलवदिच्छाविषयसाधनताबो
धरूपां प्रवर्तनां कुर्वता नानर्थसाधनेनेदं न प्रत्याय्यते स्वविषयस्य प्रवर्तना।
गोचरस्यानर्थसाधनत्वाभावो ध्यर्थादिति ख्यते तेन विधिविषयस्यना
र्थहेतुत्वं कल्प्यते न हि क्रत्वर्थत्वे सा तादृशार्थैः येन विरोधो न स्यात् किं
तु प्रवर्तितेन प्रवर्तनाकर्मभूता न पुरुषप्रवृत्तिः पुरुषार्थमेव विषयीक
रोति किंचित्कन्नमपि पुरुषार्थसाधनत्वेन पुरुषार्थभावमापन्नं विषयी
करोतीत्यत्र पुरुषप्रवृत्तिः प्रबलवदिच्छोपधानदशायां जायमाना
नुभावस्यार्थहेतुतामापादयति न वा अनर्थहेतुतां प्रतिषेधति किं
तु विधेयतयेव ज्ञानात् अत एवाविहितेऽपि न फलस्यापि शब्दवयस्या
भिचारस्यानर्थहेतुत्वं न प्रयत एव फलस्य विधिजन्यप्रवृत्तिविषय
त्वाभावात् विधिजन्यप्रवृत्तिविषयत्वं यागत्वेऽकरणप्रवर्तनावल
वेन साचानर्थहेतुत्वेन विषयीकरोतीति विशेषविधिवारितेन समानवि
षयत्वाभावे रागद्वेषादिमूलाः क्रत्वर्थलौकिकहिंसाविषये तेन रूपेणा।
निषेधविषयत्वे षोडशीग्रहणस्याप्यनर्थहेतुतापत्तिर्नातिरात्रे षोडशि
नं गृह्णातीति निषेधात् तस्मात् किंचिदेतदिति भावः दर्शने प्राभाक
रदर्शने फलसाधनेऽस्यागतमेव प्रवृत्तिसिद्धेर्नियोगस्यप्रवर्तकत्वे
न श्येनस्य यागत्वात् प्रवृत्तिविषयत्वेन विधेयोदासीनात्त्वतस्यानर्थहेतुत्वं
विधिनाप्रतिपादिते अग्नीषोमीयहिंसायाः तु क्रतुगतोपकारकत्वात् फलसाधन

त्वाभावेन रागाभावाद्धिंसाया एव प्रवर्त्तकः स च स्वविषयस्यानर्थहेतु
त्वप्रतिसंधिपतीति यथानभ्यता हिंसानर्थं जनयति न क्रत्वर्थेति न।
हिंसामिश्रत्वेन ज्योतिष्टोमादेर्दुष्टत्वमिति सममेव यत्तावन्मात्रेण वि
शेषः चोदनालक्षणोर्थो धर्म इत्यत्रार्थपदव्यावर्त्यत्वेनाधर्मविशेषणादेः
प्रभाकरमते भाट्टमते तु विशेषणफलस्यैवाभिचारस्यानर्थहेतुत्वादधर्म
त्वेऽपि न सर्वविहितस्य समीहितसाधनस्य धर्मत्वमेव श्येनस्यापि धर्मत्व
मकले जनमतेणादेर्निषिद्धस्यैव निफलेनानर्थहेतुत्वेन न शिष्टानां शे
नादौ न धर्मत्वेन व्यवहारः तदुक्तं फलतोपि च यत्कर्म नानर्थेनानुबध्य
ते केवलप्रीतिहेतुत्वात्तद्धर्म इति कथ्यते तार्किकाणां तु दर्शने कलिसा
ध्यत्वमर्थहेतुत्वं चेति त्रयं विरुध्यते तत्र क्रत्वर्थहिंसायाः साक्षाद्विषेधा
भावात्साधनविधानवदेशात्क्रतुनिसाध्यत्वार्थहेतुत्ववदनर्थहेतुत्व
मपि विधिनाबोध्यते इति न तस्याश्चानर्थहेतुत्वं श्येनादेस्त्वभिचारस्य
साक्षादेव निषेधान्मा यच्छिन्नोपदेशाच्चानर्थहेतुत्वावगमाभावमात्रे त
द्विधिनानवबोधने इष्टसाधनत्वेनाग्नीषोमीयादिवल्लक्षणं ज्योतिष्टे
त्वभावमेवदर्शनेव्यवहारेऽप्ययोगाबलेविते तथा च भगवद्वादरायण
प्रणीतं सूत्रं अशुद्धमिति चेन्न शब्दादिति ज्योतिष्टोमादिकर्मण्यग्नीषो
मीयहिंसादिमिश्रितत्वेनाशुद्धमिति चेन्न अग्नीषोमीयं पशुमालभेतेत्या
दिविधिशास्त्रादिमन्त्रार्थः जपश्रेशमापरत्ववाक्ये न क्रत्वर्थहिंसायाअ
धर्मत्वबोधकं न तत्र तस्यानारभ्याधीतं तथा च सार्थ्यानो विहितेति निषिद्धधर्म
चाधर्मत्व[illegible]त्वानमनर्थहेतुतज्ज्ञानमतत्वेष्टचानत्वेष्टत्वत्वेनेविप
र्यास्त्रूपो मोहः तस्मान्मोहान्नियतस्य कर्मणस्त्यागः परित्यागः स तामसः
परिकीर्तितः मोहो हि तमः [illegible] मोहाभावेपि ॥
सदानंदी टीका ॥ ॥
तदेवं कर्मत्यागं त्वयात्मनः स्थापितं मते त्याज्यं दोषवदित्यादि परप
क्षनिराकृति १ कर्तव्यार्थं तत्त्यागेऽपि विध्यसमुन्नाहारः कामसदो
षवत्त्वात्स्यात्त्यागः श्रद्धाप्रीनोरत्नं २ नियतस्य कर्मणः शुद्धिहेतुत्वे
नानवस्थान विनश्रद्धापीनस्त्यागो मत्वादौ नोपपद्यते ३ श्रीकृष्णो।
शास्त्रविहितमात्मनश्चेयमन्तव्यं कामत्येवास्य नियतस्य दोषवत्त्वेनसं

श्री॰
गी॰ टी॰
भ॰

34

भवेत् ४ पावनत्वापरिज्ञानत्यागो नित्यस्य कर्मणः अवश्यमेव कर्त्तव्यत्वाज्ञित्यमितीर्यते ५ अज्ञानाज्जत्परित्यागस्तामसः परिकीर्तितः ६॥ ७ ॥

नीलकंठी टीका १२ ॥

प्राक्प्रतिज्ञातं त्यागत्रैविध्यमाह नियतस्येति तु शब्दः पूर्वोक्तपक्षद्वयवैलक्षण्यार्थः यस्माद्विक्तृतस्य मन्दतो नियतस्यावश्यानुष्ठेयस्य कर्मणः संन्यासः स्वरूपेण त्यागो नोपपद्यते न युज्यते अशुद्ध्यपेक्षत्वात् एवं सति यो मोहादज्ञानात् तस्य ~~त्यागात्~~ नियतस्य कर्मणः परित्यागः स तामसः परिकीर्तितः आवश्यकं च न युज्यते चेति विप्रतिषेधात् ७ ॥

आनंदी टीका १३

त्यागस्य त्रैविध्ये न हेयोपादेयतामाह मोहात् मिथ्याज्ञानात् तामसः उक्तयोनिः प्राप्तिहेतुर्नतमो वा हेतुरित्यर्थः ७ ॥

रामकंठी टीका १४

चशब्दो हेतौ यस्मान्नियतस्य वर्णाश्रमविभागेन नित्यस्याव्यभिचारिणः कर्मणो यज्ञादेः संन्यासस्त्यागो नत्वनुष्ठानं नोपपद्यते यथा नोपपद्यते तथा न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः इत्यादिना च बहुशः प्रतिपादितमेव तस्मादेवं विधस्य सर्वथैवात्याज्यस्य कर्मणो मोहाद्विपर्ययलक्षणाद्धेत्वविद्यात्यागः परित्यागस्तामसस्तमोगुणसंभव उच्यते तमसो हि कार्यं मोहः यदुक्तं प्रमादमोहौ तमसो भवतोऽज्ञानमेव च इति एवमयं तामसस्त्यागो विपरीतफलपर्यवसायी यतोऽपवर्गबुद्ध्या प्रतिपन्नः संसारमेव फलत्यतो हेयः एवाऽसौ ~~अत्राजस्य~~ त्यागमाह ७ ॥

लासिकी ~~……~~ टीका

अत्र हेतुमाह कामं भवतु काम्यस्य कर्मणः संन्यासः नियतस्य तु वर्णाश्रमविभागेन नित्यस्याव्यभिचारि॰ कर्मणो यज्ञादेः संन्यासस्त्यागो नत्वनुष्ठानं नोपपद्यते शास्त्रयुक्तिभ्यां न घटते अधोगतिहेतुत्वात् तथा च शास्त्रं तु हृष्टैव ये परित्यक्तं कर्मकांडमपंडितैः पाखंडाः पंडितंमन्यास्ते यान्ति नरकं प्रियेऽइति युक्तिश्च न हि देहभृ

ण॰:४

ताशक्यंत्यक्तुंकर्माण्यशेषत इत्यादिनोक्तश्च अथप्रतिज्ञातंत्याग-
स्यत्रैविध्यंदर्शयति मोहादिति अद्वैतज्ञानपरिनिष्ठितज्ञानिदृष्टान्ते
न मोहाद्विपर्यासरूपात्तस्यात्याज्यस्यनियतस्याकर्मणः परित्याग-
स्तामसः तमःकार्यमोहजन्यत्वादधोगतिहेतुत्वाच्चतामसः परिकी
र्तितः [illegible] १

पंचोलीटीका

प्रतिज्ञातंत्यागत्रैविध्यमधिकारिणोऽप्रवृत्तस्यप्रवृत्तोर्दर्शयिन्नमाह नियत
स्येति त्रिभिः ननु नः नियतस्यनित्यस्यकर्मणः संन्याससन्त्यागोनोपपद्यते
नघटतेतस्यपावनत्वेनेष्टत्वात्तस्यमोहात्परित्यागःतामसःपरिकीर्तितः १

रमावीर समिद्धोधिनी॥

अधुना प्रतिज्ञातमेवत्यागस्यत्रैविध्यंदर्शयन्ननुष्ठानोपपत्तिप्रदर्श
नपुरस्सरं तावत्तामसंतं प्रतिपादयति नियतस्येत्यादि वो हेतोय-
स्मान्नियतस्यवर्णाश्रमविभागेनव्यवस्थापितस्यातएवनित्यंव्यभि
चारिणोयज्ञादेःकर्मणः संन्यासःपरिहारोनोपपद्यते नचच नहि
कश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृदित्यादिना नहिदेहभृताशक्यं
त्यक्तुंकर्माण्यशेषत इत्यादिनाचदेहःप्राकृतः यस्मादेवंतस्मात्तस्य
नियतधर्मस्यमोहाद्धेतोःपरित्यागकरस्य मोहस्यतामसत्वात्तामसः
तमोगुणसंभवः परिकीर्त्यते तामसस्याधोगतिफलप्रवणत्वाद्धेय
त्वेत्यर्थः ७॥

मधुभाष्य

७॥

35

भाषा अनुवाद

अब इस श्लोक से देखावतेहै कि सकल काम्य कर्मों को बन्ध
कत्व है अर्थात् कामना करि किये कर्म बन्धन करते हैं इस
हेतु से उन का त्याग करनाही कर्तव्यहै परंतु नियत कहेते नि
त्यकर्मों का त्यागकरना योग्य नही है क्यों कि नित्यकर्म स
त्वशुद्धिके द्वारा मोक्षके साधन स्वरूप हैं इससे यद्यपि का
म्य कापरित्याग करना ठीकहै तो भी नित्यकर्म का त्याग मो
हसे ही होता अर्थात् तामस है क्यों कि मोह तमोगुण सेहो
ताहै इससे उसत्यागको शिष्ट लोगोंने तामस ही कहाहै ७

दोहा

नित्यकर्मकात्यागहि कदा न करयो होय ताकों त्यागहि
मोह सें तामसकहियत सोय ७ ॥

36

दुःखमित्येवयत्कर्मकायक्लेशभयात्त्यजेत् सकृत्वाराजसंत्यागंनैवत्यागफलंलभेत् ८ ॥

शाङ्करभाष्यटीका १ ॥

किंच दुःखमिति दुःखमित्येव यत् कर्म कायक्लेशभयात् शरीरदुःखभयात्त्यजेत् सकृत्वा राजसं रजोनिर्वर्त्यं त्यागं नैवत्यागफलं ज्ञानपूर्वकस्य सर्वकर्मत्यागस्य फलंमोक्षाख्यंनलभेन्नैव लभेत ८ ॥

आनन्दगिरिकृतटीका २ ॥

इतश्च नित्यकर्मत्यागोनास्ति सम्भवतीत्याह किंचेति ननुमोहं विनैव दुःखात्मकं कर्म कायक्लेशभयात्त्यजति करणानि हि कार्यं जनयन्ति श्राम्यन्ति तथाच न तत्त्यागस्तामसोयुक्तस्तत्राह दुःखमित्येवेति यत् कर्म दुःखात्मकमशक्यसाध्यमित्येवालोच्य तन्निर्वर्तने देहस्येन्द्रियाणांच क्लेशात्मनोभयात्त्यजति सतत्यक्त्वा रजोनिमित्तं त्यागं कृत्वापि न तत्कृतं मोक्षं लभते किन्तु कृतेनैवराजसेन त्यागेन तदनुरूपं नरकं प्रतिपद्येतेत्याह दुःखमित्येवेत्यादिना सर्वत्यागस्तामसोराजसश्च निषिद्धविधेयोर्दर्शितः ८ ॥

स्वामिकृतटीका ३ ॥

राजसत्यागमाह दुःखमित्येवेति आत्मबोधंविनाकेवलंदुःखमित्येवमत्वाशरीरायासभयात् नित्यकर्मत्यजेदितियत् तादृशस्त्यागोराजसः दुःखस्यराजसत्वात् अतस्तंराजसंत्यागंकृत्वाराजसःपुरुषस्त्यागस्यफलंज्ञाननिष्ठालक्षणंनैवलभेतेत्यर्थः सात्विकंत्यागमाह कार्यमिति ८ ॥

पिशाचभाष्यटीका ४ ॥

कर्मकायक्लेशभयाद्दुःखंदुःखतरमितित्यजेत्सराजसः राजसंत्यागंकृत्वानैवज्ञानपूर्वत्यागफलंमोक्षंलभेत् ८ ॥

रामानुजभाष्यटीका ५ ॥

श्री॰
गी॰टी॰
अ॰

37

दुःखमिति यद्यपि परंपरया मोक्षसाधनभूतं कर्म तथापि दुःखा-
त्मकं द्रव्यार्जनसाध्यत्वात् वाक्कायमनःरूपतया कायक्लेशकरत्वा-
च्च मनसो ऽवसादकरमिति तं ज्ञीमा योगानिष्पत्तये ज्ञानाभ्यासप्रवृ-
त्तो यः शनिर्यो महायज्ञाद्यशुभं कर्म परित्यजेत् स राजसं रजोमूलं
त्यागं कृत्वा ज्ञानद्वारा वस्थितशास्त्रार्थरूपमिति ज्ञानो मुक्तिरूपं त्याग-
फलं न लभेत् अयथावज्ज्ञानात् बहिः सापार्थे राजसो ऽतिवक्ष्यते
न हि कर्म दृष्टदुःखं भेण मनःप्रसादहेतुः अपि तु भगवत्प्रसादद्वारेण ८

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं ८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटी टीका ७ ॥

राजसं त्यागमाह दुःखमिति अयथकर्तृकर्म दुःखं दुःखसाध्यमिति
मत्वा कायक्लेशभयाद्यस्त्यजेत् स राजसं त्यागं कृत्वा ज्ञाननिष्ठा-
लक्षणं त्यागफलं नैव लभेत् ८ ॥

वनमाली टीका ८

अन्नमत्रचित्तशुद्धितया कर्माधिकृतो ऽपि दुःखमेवेति मत्वा काय-
क्लेशभयान्नित्यं कर्म यजेत् सत्यागो राजसः दुःखं हि रजः अतः स-
मोहरहितो ऽपि राजसः प्रकृष्टत्वाद्दशराजसं त्यागं कृत्वा नैव त्यागफ-
लं सात्त्विकत्यागस्य फलं भगवज्ज्ञानं नैव लभेत न लभते ८ ॥

उत्तममवैजयन्ती टीका ९ ॥

राजसं त्यागमाह दुःखमित्येवेति यद्यपीदं यज्ञादिकं कर्म नित्यं कर-
णं शुद्धिद्वारा ज्ञानभक्त्यादिसाधनजनकतया निष्कामतया वृत्ति-
तं समर्पणतया भक्तिहेतुरूपं स्यादिति जानन् तथापि दुःखं यतः
स्नानश्रोपार्जनादिदेहपरिश्रमेण दुःखरूपकमेव दुःखं स्वरूपतो
गणयन्मत्वा तत् न किं चित्कारणमित्येवं प्रकारेण कामक्लेशभयात् व
दिहरूपं त्यजेत् यः कश्चिद्रजोगुणान्वितः प्रकृतो ममतुल्यः
ज्ञानं कुर्यात् स राजसं रजोगुणान्वितं त्यागं कृत्वा त्यागफलं मोक्षहेतु

भूतेज्ञानोग्यनिरूपेत्यागस्यफलंनैवलभेत् नैवप्राप्नुयात् किंतु
संसारमेवपुनःपुनर्लभेदिमेवकारेणाख्यातिनम् ८ ॥

मधुसूदनी टीका १० ॥

+ पूर्वोक्तमोहाभावेपि॥

+अनुपजातांतःकरणशुद्धितयाकर्माधिकृतोपिदुःखमेवेदमिति
मत्वाकायक्लेशभयात्त्रित्यकर्मत्यजेदितियत्सत्यागोराजसःदुःखि
हिराजसःअतःसमोहरहितोपिराजसत्वहेयोदर्शितः सपुरुषःतादृशे
राजसंत्यागंकृत्वानैवत्यागफलंसात्विकत्यागस्यफलंज्ञाननिष्ठा
लक्षणंनैवलभेत् ८ ॥

सदानंदी टीका ११ ॥

चित्तशुद्धिंविनायस्तुकर्मण्यधिकृतःश्रमात् दुःखमित्येवदेहादा
वभिरागितयाजडः १ मत्वाकर्मत्यजेत्कायक्लेशभीत्यागमोहि
ते पूर्वोक्तमोहमूल्योपिराजसःसचपूरुषः २ तादृशंराजसंत्या
गंकृत्वात्मज्ञानयोग्यतां चित्तशुद्ध्यानचाप्नोतिसात्विकत्यागजे
फले ३ प्रत्युतत्यागतोवश्यकर्तव्यस्यैवकर्मणः प्रत्यवैतिततो
मूढःसंसरतिनरकंव्रजेत् ४ अतोमुमुक्षुभिर्नित्येनत्याज्योपीवि
शोधके किंतुकार्यस्वकर्मेतिश्रीहरेराशयः ५॥८ ॥

नीलकंठी टीका १२ ॥

एवंतामसंत्यागमुक्त्वाराजसंत्यागमाह दुःखमिति यःदुःख
रूपमेवेदंकर्मेतिमत्वाकायक्लेशभयात् त्यजेत् सत्यमानत
स्मादेवहेतोःराजसंरजोगुणनिर्वृत्तंत्यागंकृत्वात्यागफलंचित्तशुद्धि
द्वारामोक्षंनैवलभेत्नलभेत ८ ॥

आनंदीटीका १३

दुःखमित्येव इदंसर्वथादुष्करमितिज्ञानात् अत्रफलालाभ
मेवनकिंतुप्रत्यवायाप्तिरपीत्यर्थः ८ ॥

रामकंठीटीका १४॥

अथराजसंत्यागमाह ॥

यः पुरुषः शास्त्रचोदितं कर्मस्नानाग्निहोत्रादि दुःखं सत्स्वप्रतिकू
लमिदमित्येतावन्मात्राद्धेतोः शरीरकदर्थनत्रासात्त्यजति ना
नुतिष्ठति राजसं रजोगुणनिमित्तकं त्यागं नियतकर्मपरिहारं
कृत्वा नस्य त्यागस्यापवर्गभोगसुखलक्षणमभिहितं फलं नैव
प्राप्नुयात् रजोगुणयुक्तत्वान्न फलं दुःखमेवासौ लभेत
ततो राजसोत्यागोपि हेय एव इदानीं सात्त्विकं त्यागमाह ८

लासिकी टीका १५ ॥

तामसं त्यागमुक्त्वा राजसं त्यागमाह ॥
यत्कर्म दुःखं विदावहमित्येवं मत्वा कायक्लेशभयाच्छरीर
कदर्थनात्रासान्नित्यं कर्म यस्त्यजेदिति यत् पुरुषस्तादृशं रा
जसं त्यागं कृत्वा त्यागस्याहेतज्ज्ञानधारापथिरूपयोगपरस्या
फलं मोक्षफलं नैव लभेतेत्यर्थः सात्त्विकं त्यागमाह ८

पंचोलीटीका

राजसं त्यागमाह दुःखमिति यत्कर्म दुःखं दुःखाकारमित्येव बु
द्धा कायक्लेशभयात्त्यजेत् त्यागं करोति स राजसः त्यागः प्रमा
णेन राजसं त्यागं कृत्वा त्यागफलं मोक्षाख्यं न लभेत् ८ ॥

रत्नावीर समृद्धोथिनी

राजसं त्यागमाह दुःखमेवेति यत् दुःखोत्पादकत्वात्सर्व
प्रतिकूलमित्येतावन्मात्राद्धेतोः शरीरायासत्रासाद्धेतोः
कर्म शास्त्रचोदितं यज्ञादिलक्षणं स्वधर्मं यः पुमांस्त्यजेन्नानु
तिष्ठति स राजसः कारणस्य दुःखभयाद्राजसत्वाद्रजोगुणसंभ
वं त्यागं विहितधर्माननुष्ठानलक्षणं कृत्वा त्यागस्य फलाभि
संधिमात्रपरिहारेण स्वधर्मानुष्ठानलक्षणस्य फलं भोगापव
र्गलक्षणं न लभेत् न प्राप्नुयात् आर्षं परस्मैपदित्वं अतः सोपि
हेय इति भावः ८ ॥

मधुभाष्य

८॥

88/2

भाषा अनुवाद

आत्मज्ञान विना
राजस त्याग को कहते है कि जो मनुष्य आत्मज्ञान विना
केवल कर्म करना दुःख मात्र विचारिके शरीर के क्लेशके भ
य से नित्यकर्म त्याग करता है सो त्याग राजस है क्यों कि दुःख
रजोगुण का धर्म है इसीसे राजस त्यागकारी रजोगुणी पुरुष
को ज्ञान मे निष्ठा जो त्याग का फल सो कभू नही मिले है ८

दोहा

सोकरित
जान दुःख जो कर्म को तजैं देहकष्ट भय सोय
जस त्याग है नहि त्याग फल लहैं सोय ८॥

39

कार्य्यमित्येव यत्कर्म्म नियतं क्रियतेर्जु
न संगंत्यक्त्वाफलंचैव सत्यागःसात्वि
कोमतः ९ ॥ शांकरभाष्य टीका १ ॥

कः पुनः सात्विकस्त्यागः कार्य्यमिति कार्य्यं कर्तव्यमित्येव
यत् कर्म्म नियतं नित्यं क्रियते निर्वर्त्यते हेऽर्जुन संगं फ
लंच एवनित्यानां कर्म्मणां फलवत्वे भगवद्वचनं प्रमाणमवोचा
माथ वा यद्यपि फलं न श्रूयते नित्यस्य कर्म्मणस्तथापि नित्यं क
र्म्म कृतमात्मसंस्कारं प्रत्यवायपरिहारं वा फलं करोत्यात्मन इ
ति कल्पयत्येवाज्ञस्तत्र तामपि कल्पनां निवारयति फलं त्यक्त्वे
त्यनेनातः साधूक्तं संगं त्यक्त्वा फलंचेति सत्यागो नित्यकर्म्म
सु संगफलपरित्यागः सात्विकः सत्वनिर्वृत्तो मतोऽभिमतः ९

आनंदगिरिकृत टीका २

सम्प्रति सात्विकं त्यागं प्रश्नपूर्वकं वर्णयति कः पुनरिति कर्त
व्यमित्येवेत्येवकारेण नित्यस्य भावान्तरं निषिध्यते नित्यानां
विध्युद्देशे फलाश्रवणात् तेषां फलं त्यक्त्वेत्ययुक्तमित्याशं
क्याह नित्यानामिति फलं त्यक्त्वेत्यस्य विषयान्तरेण तात्पर्यमा
ह अथवेति नहि विधिना कृतं कर्म्म अनर्थकं विधानर्थक्यात्
न श्रौतफलाभावेपि नित्यं कर्म्म विधितो नतिष्ठत्यात्मानम।
जानन्नपहृतमनस्कोऽज्ञस्तस्मिन् कर्म्मण्यात्मसंस्कारं फलं
कल्पयति तदकरणे प्रत्यवायस्तस्मात्तत्करणं कर्तुरात्मनस्त
न्निवृत्तिं करोतीति वा नित्ये कर्म्मण्यज्ञो कल्पनामतस्तन्निषेधादि
तफलकल्पनां च फलं त्यक्त्वेत्यनेन भगवान्निवारयतीत्यर्थः नित्य
कर्म्मसु फलत्यागोक्तेः संभवे फलितमाह स त्याग इति ९ ॥

^सात्विकंत्यागमाह कार्यमिति ॥ स्वामिकृतटीका ३ ॥

^कार्य्यमित्येवबुद्ध्या नियतमवश्यकर्तव्यतया विहितं कर्म्म संगं

श्री
गी॰टी॰
ग्रं॰

फलं च त्यक्त्वा क्रियते ३ नियतत्वात् शास्त्रेण सः त्यागः सात्विको मतः [illegible]
[illegible] ९ ॥

पिशाचभाष्य टीका ४ ॥

कार्यं कर्मकर्तव्यमित्येव यत् यज्ञादि नियतं नित्यं क्रियते निर्वर्त्यते संगं फलेच्छां त्यक्त्वा विद्यमानसंगफलत्यागः सात्विकः सत्वनिष्ठः नियतं नित्यं कर्म संगं त्यक्त्वा फलानि च त्यक्त्वा यदा क्रियते ३ निरीश्वरवचनात् नित्यकर्मणस्सफलत्वं सिद्धं ९ ॥

रामानुजभाष्य टीका ५ ॥

कार्यमित्येव नित्यं नैमित्तिकं महायज्ञादि वर्णाश्रमविहितं कर्म मदाराधनरूपतया कार्यं स्वयं प्रयोजनमिति मत्वा संगं कर्मणि ममतां फलं च त्यक्त्वा यत् क्रियते स त्यागः सात्विको मतः सत्वमूलः यथावस्थितशास्त्रार्थज्ञानमूल इत्यर्थः ननु सत्वं यथावस्थितज्ञानं उत्पादयतीत्युक्तं सत्वात्संजायते ज्ञानमिति प्रवृत्तिं च कार्यं भयाभये वंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्विकीति ९ ॥

अभिनवगुप्तकृत टीका ६ ॥

स्पष्टार्थी ९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

सात्विकं त्यागमाह कार्यमिति कार्यमवश्यकर्तव्यत्वेन शास्त्रमित्येव मत्वा नियतं नित्यं कर्म संगं फलं च त्यक्त्वा यत् क्रियते स त्यागः सात्विको मतः अत्रेदं तु उक्तं भवति वेदबोधितनित्यकर्मणां प्रयोजन हृदयंदर्शितमस्ति स्वर्गादि श्रुतिभिः संसाराद्यनर्थपरिहारश्च त वेष्टप्राप्तिर्मीनस्य वडिशामिषग्रासिरिवद्धः स्वर्गभोगस्य वेनावस्था नेमेवानर्थपरिहारः तथाचोभयोर्मध्ये आवश्यकत्वेन किमन्वेष्ट यमिति विचारेऽनर्थपरिहार एवावश्यं तं श्रेयान् इति भगवतो हार्दं ९ ॥

वनमाली टीका ८ ॥

नियतं नित्यं कर्म विधिवाक्योक्तफलाश्रवणात् पि कार्यं कर्तव्यमेवेति बुद्ध्या नित्यं नित्यकर्म संगं कर्तृत्वाभिनिवेशं फलं च त्यक्त्वैव यत् क्रियते स

त्यागः सात्विकस्तत्त्वनिर्दिष्टो मतः ननु नित्यानां फलमेव नास्तीति
कथं फलं त्यक्त्वेति चेत् उच्यते एतद्भगवद्वाक्यादेव नित्यानां फल
मस्तीति गम्यते नहि फलस्याननुष्ठानासंभवात् तथाप्यापस्तम्भः न
आं यथाम्रे फलार्थे निर्मिते छायागन्ध इत्यनूत्पद्यते एवं धर्मं चर्यमाणमर्था
त्प अनूत्पद्यन्ते इत्यानुषंगिके फले नित्यानां दर्शयति ९ ॥

ऊसमवैजयंती टीका ९ ॥

सात्विकं त्यागमाह कार्यमित्येवेति भगवदाराधनत्वेन नियतं नित्यं नैमित्तिक
महायज्ञादिरूपं ... मिदं कर्म कार्यमेवमयावश्यकर्तव्यमेव
मेव न तु त्याज्यमित्येवं प्रकारेण हेतुर्जनेन नियतं वर्णाश्रमोचितं तथा
शास्त्रविहितं यत् कर्म शुद्धान्तःकरणेन क्रियते किं कृत्वा संगं कर्म
णि ममत्वाकर्तृत्वाभिनिवेशं च तत्फलं च फलमैहिकामुष्मिकभोग।
रूपं सर्वं समर्पणमपरित्यज्य एवं प्रकारान्तरे त्यक्त्वाऽभिमानेन फलेन तदेवोपा
सनेन च त्यक्त्वा सर्वेश्वरेश त्यागः सात्विकः सम्यक् ज्ञायते ज्ञानमित्यनेक
प्रकारेण प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये बन्धं मोक्षं च या वे
त्ति बुद्धिः सा पार्थ सात्विकी इत्युक्तप्रकारेण च ज्ञानसत्त्वज
न्यत्वात् तत्त्यागोऽपि सात्विक इत्यर्थः मम निश्चितं मतम् :
अर्जुनेन ... सत्वगुणत्वात् एवं दृशो त्यागो नास्ति यथा सङ्कल्पितेन ९

मधुसूदनी टीका १० ॥

विधुद्देशे फलाश्रवणेऽपि कार्यं कर्तव्यमेवेति बुद्ध्या नियतं नित्यं कर्म
संगं कर्तृत्वाभिनिवेशं फलं च त्यक्त्वैव यत् क्रियते नतः करणशुद्धिप
र्यन्ते स त्यागः सात्विकः सत्वनिर्वृत्तो मतः तस्मादेय इति सम्मतः शिष्टा
नां ननु नित्यानां फलमेव नास्तीति कथं फलं त्यक्त्वेत्युक्तं उच्यते एत
देव भगवद्वचनान्नित्यानां फलमस्तीति गम्यते निष्फलस्याननुष्ठाना
संभवात् तथाचापस्तम्बः तद्यथाम्रे फलार्थे निर्मिते छायागं
ध इत्यनूत्पद्यते एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते इत्यानुषंगी
के फले नित्यानां दर्शयति शुक्ररोगाद्यपवादश्रुतिरपि नित्यानां प्रत्य
वायपरिहारं फलं दर्शयति धर्मेण पापमपनुदतीति स्मार्तमपर
मेवं दर्शितं न केनचित् जनापि वादविहीनं तत्प्रदर्शनमनापवम

श्री·
गी·टी·
अ·

वति तदाह नैवयाजीश्रेयानात्मयाजीइत्यात्मयाजीतिहस्मयात्म
हवा आत्मयाजी यो वेदेदं मेऽनेनांगं संस्क्रियत इदं मेऽनेनांगमुपधी
यत इत्यादि श्रुतयश्च तानप्रतिवेयकपापक्षयलक्षणं ज्ञानयो
ग्यतारूपं पुण्यं चोत्पत्तिलक्षणांचात्मसंस्कारं नित्यानां कर्मणां फ
लं दर्शयति तदभिसंधिमत्कानामनुष्ठेयानीमर्थः यदुक्तं त्या
गसंन्यासशब्दौ चटपटशब्दाविव नभिन्नजातीयार्थौ किंत्वफ
लाभिसंधिपूर्वककर्मत्यागरूपत्वत्तयोरर्थ इति तत्र विस्मर्तव्यं तत्र
सत्यपि फलाभिसंधौ मोहाद्वा कायक्लेशभयाद्वा यः कर्मत्यागः
स विशेष्याभावकृतो विशिष्टाभावस्तामसत्वेन राजसत्वेन च निंदि
तः यस्तु सत्यपि कर्मणि फलाभिसंधित्यागः स विशेषणाभाव
कृतो विशिष्टाभावः सात्त्विकेन स्तूयते इति विशेष्याभावकृते वि
शेषणाभावकृते च विशिष्टाभावत्वमसमानत्वान्न पूर्वापरविरो
धः उभयाभावकृतस्तु निर्गुणत्वात्त्रिविधमध्ये गणनीय इति
वा वोचाम यत्तेतत्त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तित इति
प्रतिज्ञाय कर्मत्यागलक्षणौ द्वे विधे दर्शयित्वा प्रतिज्ञानन्नरूपं क
र्मानुष्ठानलक्षणं तृतीयाविधां दर्शयतो भगवतः प्रकटमकौश
ल्यमापतितेन हि भवति यो ब्राह्मणा भोजयितव्या हौ कट को
[illegible] तीयः त्रिय इति तद्वदिति परास्तं निरस्तमपि विधानो
ख्यातर्न्वत् तस्मात् भगवदकौशलोद्भावनमेवमहदकौशलमि
तिद्रष्टव्यं [illegible] यसत्वसमुद्दिष्टो रेण ज्ञानवि
[illegible] कर्मणा इह ॥ ॥

सदानंदी टीका ॥ ॥

नाम मोरानसोहृयः कर्मत्यागश्च दर्शितः कीदृशः सुनरादृयः
सात्त्विकस्त्यागउच्यते १ श्रवणपकार्यमेव नित्यश्चाशास्त्रविधे
वेगात् नकर्तृत्वाभिनिवेशात्संगंत्यक्त्वा फलं तथा २ निरे
नैमित्तिकं कर्म क्रियते सत्त्वसुहृदये शादेयत्वे न शिष्टानां सत्यागः
सात्त्विको मतः ३ नतनात्योव नित्यानां फलेष्वन्ते तितत्कर्ययं ३

क्रमित्यत्रचतुर्थः श्रीमद्भगवतोहरेः ४ वाक्यादेवफलंतेनेषामल्ली
नेवेहित्यवगम्यते यतोननिष्फलस्यास्तित्वंहिस्वैमनुष्ठितिः ५ क
र्मणांपित्र्यलोकःस्यादित्याद्युक्तिवाक्यतः श्रवणफलमनस्यावा
नुतिष्ठादिचकर्मणां ६ नित्यानामननुष्ठानेप्रत्यवायस्तुतिस्त
था प्रत्यवायन्ययेतेषांफलेसंदर्शयन्मतः ७ धर्मेणपापमित्यादि
श्रुतयोदर्शयंत्यपि साक्षात्फलविधिःश्रुतिर्नित्यानामानुषंगिक ८
पितृलोकादिसंप्राप्तिःप्रत्यवायस्तुयस्तथा मोहाद्वाक्लेशभीत्यावा।
फलासंगेनवस्यापि ९ नित्यकर्मपरित्यागःक्रियतेयोऽविपश्चिता स
त्यागस्तामसस्तेनराजसस्तेननिर्दिशः १० फलाभिसंधिसंत्यागोयस्त
कर्मणामस्यापि स्यात्तेनसात्त्विकत्वेनसंत्यागःसम्बोधकः ११।९॥

नीलकंठी टीका १२ ॥

एवंशास्त्रोक्तकाम्यानांमसराजसोमनुष्याणांवत्यागाउक्तौ तामस।
राजसयोरसात्त्विकत्यागयोरसंभवस्यपरित्यागइतिकायक्लेशभया।
त्यजेदितिवस्तुवचनात् नह्येवंसंभवति मूढश्चकरोतिचेतिविप्रति
षेधात् यदिकरोतितर्हिनैवमूढः यदिमूढस्तर्हिनैवकरोति एवंयदि
कायक्लेशाद्बिभेतिनैवकरोति यदिकरोतिनैवकायक्लेशाद्बिभे।
तितस्मात्करोतिचकायक्लेशाद्बिभेतिचेतिविप्रतिषिद्धं अतस्ता
मसराजसयोरसात्त्विकत्यागयोरसंभवान्नैवोक्तौ सात्त्विकस्त्वत्र
त्यागःसंभवति यथास्फटिकेजपाकुसुमाश्रितेलौहित्यंविवेकि
नोप्रतीतिनत्वास्तिनवस्तुतएवमात्मनिईश्वराधीनेविवेकिनांक।
र्तृत्वप्रतीतिनत्वास्तिनवस्तुतइतिवक्ष्यमाणएवचकर्तृत्वाभिनि
वेशमूलः शुभान्प्रतीतिनःकरोत्येवनवस्तुतइतिसंभवतस्त्वो
पिसात्त्विकत्यागइतितमेवमसात्त्विकत्यागोपिकारद्वैतेनत्यक्तममाह का
र्यमिति कार्यंकर्तव्यमित्येवयत्कर्मनियतंनित्यंक्रियतेहेअर्जुन
संगंफलंचसंत्यक्त्वैवमवधारणंप्रागुक्तस्यत्यागपदस्याध्याहारार्थं
सएवंभूतस्त्यागःसात्त्विकोमतःवेदेदृष्टः तथाचश्रुतिः ईशावा
स्यमिदंसर्वंयत्किंचजगत्यांजगत् तेनत्यक्तेनभुंजीथामागृधःक
स्यस्विद्धनमितिईशावास्येनपरमेश्वरेणसर्वकार्यकरणकर्त्राप्रवर्ते

श्री॰
गी॰टी॰
प्र॰

केनइदंजगत्स्थावरजंगमेजगतोवस्थितेस्थितेवासमाच्छादितं
यामि येनेदंततासर्वंतदर्थीनेनेनकारणेनमयकेनमायेनकर्तृत्वभो
क्तृत्वाभिमानवर्जनेनमेजीस्याविषयान्केवल मारब्धः गर्हमाका
क्षीः कस्यस्विद्धनेनकस्यापितच्चस्वामित्वमस्तीतिह्येवततग्रहेस्य
क्षेः एवंकर्माण्यपियज्ञादीनिकर्तृत्वाभिमानेमत्कांक्षवर्जनेनत्वंक
र्मलेपोनभविष्यति एतद्व्यतिरेकेणानवद्युपायान्तरंचनास्तीमयोग्रम
मेत्रेणप्रदर्शयते कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाः एवंत्वयि
नान्यथेतोस्तिनकर्मलिप्यतेनरेइति इदमेवस्त्रोक्तस्वमंतेभगवताप्र
दर्शितं एतान्यपितुकर्माणिनिसंगोके नचनिसानोफलमेवना।
स्ति किंतत्फलत्यामितिचेत् इत्येवभगवद्वचनात्तेषामपिफलमस्ती।
तिजानीहि निष्फलस्यवेदेनानुष्टापनासंभवात् तथाचापूर्ववस्तु
यथाम्रफलार्थेनिमित्तेछायागंधइत्यनुत्पद्यते एवंधर्मचर्यमाण
मर्थाअनुत्पद्यंतइतिअनुषंगिकंफलेनिसानोदर्शयति प्रकरणा
प्रत्यवायस्तस्यापितेषांप्रत्यवायपरिहारः फलमितिप्रदर्शयते धर्मा
णापापमपनुदतीत्यादिनाचनित्यपिकर्मस्वफलंदर्शयतेततदेव
वक्तव्यमितिनकोपिदोषः ९ ॥

आनंदीटीका १३

श्रेयोपादेयमाह संगलाभइत्यादियंत्येयप्रवर्त्तिंदृष्टम् फलमद
ष्टस्वर्गादिकम् ९ ॥

+श्रेयोपादेयंसात्विकंत्यागमाह॥

रामकंठीटीका १४

+ससात्विकोज्ञानफलसत्वगुणहेतुकस्त्यागोभिमतः कोसौ
यन्नियतंशास्त्रचोदितंकर्मक्रियतेनुष्ठीयते कर्मणःकरणमे
वत्यागेनपरिहारइत्यर्थः कथंक्रियतेयेनक्रियेवत्यागःसंप
द्यते इत्याह कार्यंपरमगुरोः परमेश्वरस्यनिरूपणत्वप्रमाणभू
तशास्त्ररूपवचनचोदितत्वादवश्यकरणीयमित्येवेनेदंतना
क्रियतेनपवर्गव्याख्यानंसंगफलंचत्यक्त्वा
अनुपपन्नत्यागस्यापिकर्मणोरजस्तमोभिभूतत्वादत्यागोपिमा
गमनिपत्तिः संगफलाभिसंधानच्छेदात्कर्मचसंसारकारणं किमनेनोक्तंभवति

संपद्यते विशुद्धसत्वगुणोऽहंकारनयथोक्तज्ञानेनैर्मल्ये सति संग
फलाभिसंधिशून्यत्वेन नियतस्य कर्मणोऽनुष्ठानमेव संसारोच्छे
दकारणं त्यागः संपद्यते इति सात्विक एव त्याग उपादेय ९ ॥
एवंविधसात्विकस्य त्यागिनः स्वरूपं प्रतिपादयितुमाह

लासिकी [illegible]टीका

सात्विकं त्यागमाह संगं तल्लीनचित्तत्वं फलं च त्यक्त्वा नित्यं स्वरूपप्रतिष्ठप्रज्ञातया तदि
परिहार्यं कार्यमवश्यकर्तव्यमिति नियतं शास्त्रचोदितं नित्यं क
र्म क्रियते इति यत् स तादृशस्त्यागः सात्विको मतः ईदृशे वि
[illegible] सात्विकस्य त्यागिनः स्वरूपं प्रतिपादयति

पंचोलीटीका

सात्विकत्यागमाह कार्यमिति हे अर्जुन यत्कर्म कर्मणि संगं प्री
तिं फलं च त्यक्त्वा कार्यं कर्तव्यमित्येव बुद्ध्या नियतं नित्यं कर्म क्रियते
स त्यागः नित्यकर्मणि फलसंगत्यागात् सात्विको मतः ९

रत्नावीर समिद्धोधिनी॥

अथोपादेयं सात्विकं त्यागमाह कार्यमित्येवेति स त्यागः सा
त्विकः सत्वेन विशुद्धेन निर्वृत्तत्वादुपादेयो मतः कोऽसौ यन्नि
यतं शास्त्रचोदितं कर्म स्ववर्णाश्रमोचितं क्रियते नुष्ठीयते कोऽ
र्थः नियतकर्मस्वीकार एव त्याग इति कथं स्वीकारस्य त्यागत्वं
न हि तद्रूपमुपपद्यते इत्यतोऽनुष्ठानं विशिनष्टि कार्यं परमेश्वराज्ञ
त्वेन तदवश्यमाचरणीयमित्यनेनैव हेतुना पूर्वोक्तलक्षणं संगं
फलं च त्यक्त्वा यदनुष्ठीयते इति संगफलाभिसंधिराहित्येन नि
यतकर्मानुष्ठानमुक्तवक्ष्यमाणप्रमास्य फलकत्वेनोपादेयः
सात्विकस्त्याग इति भावः ९॥

मधुभाष्य

९॥

43

भाषाअनुवाद ॥

अब सात्विकरूप त्याग कहतेहैं कि हे अर्जुन कर्म्मसब
कर्त्तव्यहै ऐसे विचार से नियत कहे अवश्य कर्त्तव्यरूप वि
हित कर्मों को कर्त्तव्य अभिनिवेश कहे अहंवृत्ति औ फल
की कामनारहितजो त्यागकरना सोसात्विकत्यागहै ९ ॥

दोहा

करणा योग्य है कर्म यह नित्यकरहे नरजीय संगत्या
गफलकोतथात्यागसुसात्विक होय ९॥

© Dharmartha Trust. Digitized by eGangotri

नद्वेष्ट्यकुशलंकर्मकुशलेनानुषज्जते
त्यागीसत्वसमाविष्टोमेधावीछिन्नसंश
यः १० ॥ शाङ्करभाष्यटीका १ ॥

ननुकर्मपरित्यागस्त्रिविधः सन्न्यासइति च प्रकृतस्तत्र ताम
सोराजसश्चोक्तस्त्यागः कथमिह संगफलत्यागस्तृतीयत्वेनो
च्यते यथात्र येब्राह्मणा आगतास्तत्र षडंगविदोद्वौ तृतीयस्तृ
तीयइति नहत् नैषदोषस्त्यागसामान्येन स्तुत्यर्थत्वादस्तिहि
कर्मसन्न्यासस्य फलाभिसन्धित्यागस्य च त्यागत्वसामान्यन्त
त्रराजसतामसत्वेन कर्मत्यागनिन्दया कर्मफलाभिसन्धित्या
गः सात्विकत्वेन स्तूयते सत्यागः सात्विकोमतइति यस्त्वधिकृ
तः संगं त्यक्त्वा फलाभिसन्धिंच नित्यं कर्म करोति तस्य फलरा
गादिना कलुषीक्रियमाणमन्तःकरणं नित्यैश्च कर्मभिः सं
स्क्रियमाणं विशुध्यति तत् विशुद्धं प्रसन्नमात्मालोचनक्षमं भ
वति तस्यैव नित्यकर्मानुष्ठानेन विशुद्धान्तःकरणस्यात्मज्ञाना
भिमुखस्य क्रमेण यथा तन्निष्ठा स्यात्तद्वक्तव्यमित्याह नद्वेष्टि अकु
शलं अशोभनं काम्यं कर्म शरीरारम्भद्वारेण संसारकारणं किम
नेनेत्येवं कुशले शोभने नित्ये कर्मणि सत्वशुद्धिज्ञानोत्पत्तितन्निष्ठा
हेतुत्वेन मोक्षकारणमिदमित्येवं नानुषज्जते तत्रापि प्रयोजनम
प्रपश्यन्नसङ्गं प्रीतिं न करोतीत्येतत् कः पुनरसौ त्यागी पूर्वोक्तेन
संगफलपरित्यागेन तद्वान्त्यागी यः कर्मणि संगं त्यक्त्वा तत्फलं च
नित्यकर्मानुष्ठायी सत्यागी कदा पुनरसावकुशलं कर्म नद्वेष्टि कु
शले च नानुषज्जते इत्युच्यते सत्वसमाविष्टो यदा सत्वेनात्मानात्म
विवेकविज्ञानहेतुनासमाविष्टः संव्याप्तः संयुक्तइत्येतत् अतएव
च मेधावी मेधयात्मज्ञानलक्षणया प्रज्ञया संयुक्तस्तद्वान्मेधावी
मेधावित्वादेव छिन्नसंशयः छिन्नोऽविद्याकृतः संशयोयस्य आत्म

श्री
गी॰टी॰
श्र॰

स्वरूपावस्थानमेव परं निःश्रेयससाधनं नान्यत् किंचिदित्येवं
निश्चयेन छिन्नसंशयः १० ॥

आनंदगिरिकृतटीका २

कर्म्मतत्फलत्यागस्य त्यागसंन्याससंशब्दितस्य प्रकृतस्य त्यागो
हीति त्रैविध्यं प्रतिज्ञाय प्रतिज्ञानुरोधेन द्विविधे उत्पाद्य तृती-
यो विधान्तविरोधेन उत्पादयतो भगवतोऽकौशलमापतितमि-
ति शंकते नन्विति अकर्मप्रतिकूलमुपसंहारवचनमनुचितमि-
त्यत्र दृष्टान्तमाह यथेति पूर्वान्तरविरोधेन भगवत्कौशलं प्रत्या-
दिशति नैष दोष इति कर्म्मत्यागफलत्यागयोस्त्यागत्वेन सादृश्या-
त् कर्म्मत्यागनिंदया तत्फलत्यागस्तुत्यर्थमिदं वचनमित्युपगमात्
न विरोधोस्तीत्युक्तमेव व्यक्तीकुर्वंस्त्रैविध्यं त्यागसामान्ये विशद-
यति अस्तीति सति संभवे निर्दिष्टस्य स्तुत्यर्थत्वं समर्थयते तत्रे-
ति एवं पूर्वापरविरोधं परिहृत्य अनन्तरश्लोकतात्पर्यमाह य-
स्त्विति फलरागादिनेत्यादिशब्देन कर्म्मस्वरूपासंगो गृह्यते अ-
न्तःकरणमकलुषीक्रियमाणमिति च्छेदः विशुद्धान्तःकरणः किं-
स्यादित्याशंक्याह विशुद्धमिति मलविकलत्वं विशुद्धत्वं संस्कारत्वं
प्रसन्नत्वमिति भेदः क्रमेण श्रवणाद्यावृत्तिद्वारेणास्यार्थः तन्निष्ठ-
त्वात्मज्ञाननिष्ठोक्ता काम्यकर्म्माणि त्याज्यत्वेन द्वेषमभिनयति
किमिति उभयत्र द्वेषं प्रीतिं च न करोतीति सामान्येनोक्तं कर्त्तारं
प्रश्नपूर्वकं विशेषतो निर्दिशति कः पुनरिति त्यागीत्युक्तं त्यागिन-
मभिव्यनक्ति पूर्वोक्तेनेति कर्म्माणि संगस्य तत्फलस्य च त्यागेने-
त्यावत् उक्तमेव त्यागिनं विवृणोति यः कर्म्माणीति तत्फले त्य-
क्तेति संबन्धः काम्ये निषिद्धे च कर्म्मणि बन्धहेतुरिति न द्वेष्टि नि-
त्ये नैमित्तिके च मोक्षहेतुरिति न प्रीयते तत्र कालविशेषं पृच्छति
वेति नित्यादिकर्म्मणां फलाभिसंधिवर्जितेनानुष्ठायित्व कल्पस-
कृप्रीति यथार्थग्रहणानन्तर्यमवगम्यते तेन समावेशदशायाम्
प्रीतिद्वेषयोरभावो भवतीत्याह उच्यत इति चतुर्थपादे वाक

रोति अत एवेति सम्यग्दृष्टयथार्थग्रहणसामर्थ्ये समाविष्टत्वादित्य
र्थः छिन्नसंशयत्वमेव विशदयति आत्मेति परानिःश्रेयसन्तस्य च सा
धने सम्यग्ज्ञानमेवेति योजना १० ॥

स्वामिकृतटीका ३ ॥

+ एवंभूतसात्विकत्यागपरिनिष्ठत त्वलक्षणं ॥

+ न द्वेष्टीति सत्त्वसमाविष्टः सत्त्वेन संव्याप्तः सात्विकस्त्यागी अकुशले
दुःखावहे शिशिरे प्रातःस्नानादिके कर्मणि न द्वेष्टि कुशले च सुखकरे
कर्मणि निदाघे मध्याह्नस्नानादौ नानुषज्जते प्रीतिं न करोति तत्र हेतुः
मेधावी स्थिरबुद्धिः यत्र परपरिभवादिमहदपि दुःखं सह्यते स्वर्गादि
सुखं च त्यज्यते न तु क्रियते तात्कालिकं दुःखं सुखं चेत्येवमनुसं
धानवानित्यर्थः अत एव छिन्नः संशयो मिथ्याज्ञानं दैहिकसुख
दुःखयोरुपादित्सापरिजिहीर्षालक्षणं यस्य सः १० ॥

पिशाचभाष्यटीका ४ ॥

न द्वेष्टि न कुप्यति अकुशले दुःखसाधने कर्मणि हेमन्ते प्रातःस्नाने
सुखसाधनेऽपि तस्मिन्नेव काले अग्निसेवादौ नानुषज्जते त्यागी कर्म
फलानां सत्त्वसमाविष्टः सात्विको मेधावी विवेकी अत एव छि
न्नसंशयः सत्त्वशुद्ध्यर्थं नित्यानि कर्तव्यानि निश्चयात् १० ॥

रामानुजभाष्यटीका ५ ॥

न द्वेष्टीति एवं सत्त्वसमाविष्टो मेधावी यथावस्थिततत्त्वज्ञानः तत ए
व छिन्नसंशयः कर्मणि संगफलकर्तृत्वत्यागी न द्वेष्टि अकुशले कर्मकु
शले च कर्मणि नानुषज्जति अकुशले कर्मण्यनिष्टफले कुशले च क
र्मेष्टरूपस्वर्गपुत्रपश्वन्ना[illegible]दिफले सर्वस्मिन्कर्मणि ममतारहि
तत्वसंगरहितत्वात्सर्वफलत्वात्संकर्तृत्वाच्च तयोः क्रियमा
णयोः प्रीतिद्वेषौ न करोति अनिष्टफले पापकर्मणि त्वप्रमादेन माम्भि
मे नाविरतो दुश्चरितान्नाशान्तो नासमाहितः नाशान्तमानसो वापि
प्रज्ञानेनैनमाप्नुयादिति दुश्चरितात्तेनाज्ञानोत्पत्तिविरोधित्वश्रवणात्
अतः कर्मणि कर्तृत्वसंगफलानां त्यागः शास्त्रीयस्त्यागः न कर्मस्वरू
पत्यागस्तदाह १० ॥

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं १० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥:

भ॰ गी॰ टी॰

श्रु॰

46

परमार्थप्रपा टीका ७ ॥

शुद्धेवेमं तं सात्विकत्यागं परिनिष्ठितस्य लक्षणमाह नद्वेष्टीति
यस्त्वजस्तमस्कः सत्वसत्वेन समाविष्टः प्रविष्ट एवं विधस्त्यागी अकु
शलं देहपीडाकरं कर्म न द्वेष्टि एतत्कार्यमिति न मन्यते तथा कुशले
निर्दोषेनध्यानस्नानवदेहसुखावहे कर्मणि नैव सज्जते एतत्सात्विक
रमिति प्रीतिं न कुरुते प्रतिनेनकायक्लेशभयात्यजेदिष्टादिवद्जोराहि
त्यं दर्शितं यतो मेधावी बुद्धिमान् देहिकस्य सुखेः खिन्नममस्मानः अ
न एवमन्मना तावत्त्वे वेनेन छिन्नसंशयः १० ॥

वनमाली टीका ८ ॥

त्यागी सात्विकत्यागयुक्तः संगफलेच्छावर्जनकाचित्तशुद्ध्यर्थकर्मा
नुष्ठाता यदा सत्वसमाविष्टः सत्वेनात्मानात्मविवेकज्ञानहेतुना चित्तग
तेनातिशयेन ज्ञानप्रतिबंधकरजस्तमोमलराहित्येनासमेतान्क
लाद्याभिचारेण विशिष्टश्चामो भवति भगवदर्पितकर्मानुष्ठानाच्चिर
स्तसमस्तज्ञानोत्पत्तिप्रतिबंधकरस्यर्थैः तदा मेधावी श्रवणा म
ननिदिध्यासनादिजन्या भगवद्विषयकापरोक्षधीर्मेधा तया नि
तसंशयो भवति तदा भगवत्तत्त्वे छिन्नसंशयः तदा तीव्रा कर्मत्वात्
नद्वेष्टि अकुशलं कर्म अशोभनं काम्यं निषिद्धं वा नप्रतिकूलनयाम
ते कुशले शोभने नित्ये नानुषज्जते न प्रीतिं करोति यद्वा अकुश
ले दृष्टः खेदशीते प्रातःस्नानादिके कुशले दृष्टे जन्मकृते शु
णफले नुसज्जते शेषं प्राग्वत् १० ॥

कुसुमवैजयंती टीका ९ ॥

ननु सात्विकस्त्यागी कीदृशो भवतीत्यपेक्षायां तस्य लक्षणमाह न
द्वेष्टीति सत्वसमाविष्टः सत्वगुणेन सम्यगाविष्टो व्याप्तः यद्वा सत्व
मन्तःकरणं मननेनास्मिन्नस्मम्यगाविष्टोऽत्यन्तस्थिरमना इत्यर्थः एवंभू
तो यतो मेधावी यथार्थविदविद्वत्स्वरूपज्ञानी अत एव छिन्नसंश
यः जीवेशयो रोपा[illegible]धिकमभेदो वा स्वाभाविको वा मायामिथ्या वा
ममत्वाकाङ्गाक्रियासन्नेवाजगत्कारणं किं कालो वा परमाणुर्वा
प्रकृतिर्वा जीवो वेश्वरोवेत्याद्यनेकस्वरूपाः क्रियाः संशयाः यस्मात्
यासः ईदृशस्त्यागी अकुशलेदुःखदशीतकालेप्रातःस्नानादिरूप

कर्म न द्वेष्टि कुशले शोभने यथा स्नानादिरूपे स्वर्गादिके कर्मणि ना
नुसज्जते प्राप्तिं न करोति ॥ १० ॥

+ सात्विकस्य त्यागस्य दानाय सत्वशुद्धिद्वारेण ज्ञाननिष्ठा फलमाह ॥

मधुसूदनी टीका ॥ १० ॥

+ यस्त्यागी सात्विकेन त्यागेन युक्तः पूर्वोक्तेन प्रकारेण कर्तृत्वा।
भिनिवेशं फलाभिसंधिं च त्यक्त्वांतःकरणशुद्ध्यर्थं विहितकर्म
प्रवणः स यदा सत्वसमाविष्टः सत्वेनात्मानात्मविवेकज्ञान
हेतुना चित्तगतेनातिशयेन सम्यग्ज्ञानप्रतिबंधकरजस्तमो
मलराहित्येन प्रासमेतात् फलाऽव्यभिचारेण समाविष्टो व्या
प्तो भवति भगवदर्पितनित्यकर्मानुष्ठानात् पापमलापकर्षणल
क्षणेन ज्ञानोत्पत्तियोग्यतारूपगुणाधानलक्षणेन च सं।
स्कारेण संस्कृतमंतःकरणं यदा भवतीत्यर्थः तदा मेधावी श
मदमसर्वकर्मपरमगुरूपसदनादिसाधनवायिकांगयुक्तेन म
ननिदिध्यासनाख्यफलोपकार्यंगयुक्तेन च श्रवणाख्येन वेदां
तवाक्यविचारेण परिनिष्पन्नेन वेदांतमहावाक्यकरणकेन निरस्त
समस्तप्रमाणप्रमेयशंकाकलंकेन चिदात्मविषयकमहं ब्रह्मास्मी।
ति ब्रह्मात्मैक्यज्ञानमेव मेधा तया नित्यं युक्तो मेधावी स्थितप्र
ज्ञो भवति तदा छिन्नसंशयः अहं ब्रह्मास्मीति विद्यारूपया
मेधया तदविद्योच्छेदे तत्कार्यसंशयविपर्ययशून्यो भवति त
दा च क्षीणकर्मत्वात् न द्वेष्ट्यकुशलं कर्म अशोभनं काम्यं निषि
द्धं वा कर्म न प्रतिकूलतया मन्यते कुशले शोभने नित्ये कर्म
णि नानुषज्जते न प्रीतिं करोति कर्तृत्वाद्यभिमानरहितत्वे
न कृतकृत्यत्वात् तथा च श्रुतिः भिद्यते हृदयग्रंथिश्छिद्यं
ते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे
इति यस्मादेवं सात्विकत्यागस्य फलं तस्मान्महता प्रय
त्नेन स एवोपादेय इत्यर्थः [illegible]
[illegible]
[illegible]
[illegible] हेतुमाचष्टे १० ॥

सदानंदी टीका ११ ॥

श्री·
गी·टी·
सु·

सात्विकस्त्यागस्त्रादेयः सत्वशुद्ध्यात्मलब्धये स्वकेनफलेत्यक्त्वं
निष्ठामाहाधुनाहरिः १ यस्त्यागी सात्विकेनैवत्यागेनयुतउत्तमः
त्यक्त्वाफलाभिसंधिंचकर्तृत्वाभिनिवेशनं २ योद्वेष्टिविहितेक
र्मकुर्वन्भगवदर्पणं नचसाक्षादमयीशुद्धिसत्ययासायाधिकारिता
३ सत्वेनतत्वविज्ञानहेतुभूतेनसंयुतः वैराग्यसहविवेकादियोगिना
स्वकेनच ४ सुसंदिग्धाविपर्यस्तवेदान्तवचसासदा विचारेणास
निष्पन्नाहंब्रह्मास्मीतियामतिः ५ सामेधायस्तयानित्यंयुक्तो
मेधाव्युदारधीः मेधावित्वेनसंछिन्नः संशयो यस्यमोहजः ६
स्वात्मावस्थानमेवास्तिपरमोक्षैकसाधनं नैवान्यत्किंचिदित्येवं
निश्चयेनमहात्मना ७ द्वेष्टिवत्त्यागकर्मत्वात्काम्यकर्मायशोभनं
प्रतिकूलतयानायंमन्यतेस्वात्मनिस्थितः ८ कुशलेशोभनेनि
त्येनकर्मानिरतिस्तधीः कृतकृत्यतयात्मस्यात्मकर्तृत्वधीयतः
भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्माणितस्मिन्दृ
ष्टपरावरे ९ त्यागस्यसात्विकस्यास्ययस्मादेवंफलेनतः महतापि
प्रयत्नेनसत्यादेयोमुमुक्षुणा ॥ ११ ॥ १० ॥

नीलकंठी टीका १२ ॥

एवंमुख्यंसात्विकत्यागमुक्त्वाः तत्फलेनमाह नद्वेष्टीति सत्वेनसम
गाविशेषात्मत्यागीमुख्यःसात्विकत्यागीसंन्यासीमेधावीः अकुशलं
प्रसादप्रदंकर्मत्रिषवणस्नानवत्तरेणाशौचभिक्षाटनादिप्रयासरू
पंनद्वेष्टि कुशलेमिश्रेचभिक्षाटनादीनानुषज्जते नसंगंकाकवन्नीति
करोति यद्वाकर्मअकुशलेसेवादिकर्मअकुशलेशिष्यादीनसज्जते
तत्राकुशलेचानेनद्वेष्टि एतेनरागद्वेषशून्यत्वमस्यदर्शितं नद्वेष्टी
कुतउपपत्तायामाह मेधावीति ऊहापोहकुशलतयानित्यानि
त्यवस्तुविवेचनादौप्रज्ञावान् अतएवछिन्नसंशयः किंकर्माणि
वमुक्तिसाधमानिउतसंन्यासएवेतिविचिकित्सारहितः एवंवत्या
गीमेनेनयज्ञोदानेनतपःकर्मनत्याज्यमित्युक्ताद्दत्यागात्स्याद्वृत्तिः
मेधावीत्वेनमोहात्तस्यपरित्यागस्तमसकात्तामसत्यागात्स्याद्वृत्तिः
दृष्टार्थनरागद्वेषाभावप्रतिपादनेनकायक्लेशभयात्यजेदित्व।

कोऽग्रजसस्त्यागो व्याहृतः किंत्वसंशयइमनेन कार्यमित्येव यत्क
र्मैत्यक्तादेव व्याख्यातः सात्विकत्यागो व्याहृतिः नद्वेष्टोकर्मणानकुत्वेस
त्यागस्य महाभाग्यत्वं वक्तव्यतो वेदद्वेदं त्वन्नामपिकर्म नतिष्ठत
न हिंदाहोपशमार्थीनि कर्त्तव्येजाऊवीम हाकदंजानन्नग्रीश्चोऽमप्र
तमपाद्य सिपत्वलेतरामपिरमेत संशयश्छेदोपिहेत्कः सत्वसमा।
विष्टइति यत्क संन्नैवकर्त्ता सम्यगा विशेषेनतद्ग्रंथेसहत्वमाश्रितइति
महान्विशेषः एवंचद्वैश्लोकोक्तसम्यसात्विकत्यागरूपस्य कर्मयोग
स्यफलभूतो येन त्वेः संन्यासो विविदिषुणामनुष्ठेयो यदहरेव विरजे
त्तदहरेव प्रव्रजेत् एतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंतीति श्रु
तिप्रसिद्धः भाष्येत तत्रकर्मपरित्यागद्विविधः संन्यास इति च प्रकृतः
तत्रनामसो राजसश्चोक्तस्त्यागः कथमिह संगफलत्यागस्तृतीयोक्त।
नोच्यते यथात्रयोन्नाणाद्यागतास्तत्र बुद्धिविरोधोतत्रिविधत्वजीय
इतितन्न नैषदोषः त्यागसामान्येन त्रयस्यार्थत्वात् श्रुतिकर्मसंन्या
सस्य फलाभिसंधित्यागस्य च त्यागत्वसामान्यं तत्रराजसतामसत्वेनक
र्मत्यागनिंद्या कर्मफलाभिसंधित्यागः सात्विकत्वेन स्तूयते स त्यागः
सात्विको मत इति श्रेष्ठेन त्यागत्रैविध्यंसमाधाय एवंसंगफलत्यागरू
पंके नित्यकर्मानुष्ठानेन विशुद्धांतःकरणस्यात्मज्ञानाभिमुखस्य न
त्विष्ठाक्रमकथनार्थोयंश्लोकइत्युक्ते तथैवश्लोकं व्याख्याय इत्युक्त
स्यकर्मयोगस्य प्रयोजनमनेन श्लोकेनोक्तमित्युपसंहृते श्रुत्येतफला
भिसंधिविशिष्टस्य कर्मणस्त्यागद्विविधः विशेषणाभावात् विशे।
ष्याभावादुभयाभावाच्च आद्यौ चैव विधिस्तिनः द्वितीयस्तु नामसरा
जसभेदेन द्विविधोप्येवं निंदितः तृतीयस्तु कर्मानधिकारिणा विवि
दिषुणा विदुषा च कर्त्तव्यो योग्योद्विविधः तत्रात्मःस्थितप्रज्ञलक्षणादौ प्र
व्याख्यातः आद्यस्तु नैष्कर्म्यसिद्धिं परमामित्यत्र वक्ष्यते तत्र भाष्येति ह
त्यागविधाः प्रतिज्ञाय द्वेय्यावन्यद्वयं तृतीयापि केनचित्त्यागमात्रेण
प्रतिपादिता अत्र तु एकसोद्वयोर्भवतभावेक्तत्वाद्वेय एव विधेयउपपाद्य
तृतीया प्रदेशांतरे प्रतिमेति प्रकृते प्रतिज्ञाया अनिर्वाह इति विशे
षः १० ॥

आनंदी टीका १३

अकुशलं दुःखोत्पादकं परैः प्रयुक्तमवमानताडनादि न द्वेष्टि पू
र्वकृतफलमिदं मयावश्यं भोक्तव्यमिति मत्वा कुशलं सुखोत्पा
दकं परैः प्रयुक्ते लाभपूजादौ संगमासक्तिं न करोति इत्थं सत्वेन
प्रकाशेन समाविष्टः मेधावी गुणदोषाववद्य पर्यालोचयन् अत एव
छिन्नसंशयस्तत्ववित् विगतरागद्वेषो नियतकर्मानुतिष्ठन्नेव
त्यागीत्युच्यते ॥१०॥

\+ तस्यैवंविधसात्विकस्य त्यागिनः स्वरूपं प्रतिपादयितुमाह ॥

रामकंठी टीका १४

\+ योत्यन्तगुणीभूतरजस्तमस्केन विशुद्धसत्वमात्रेण समावि
ष्टो व्याप्तान्तःकरणः संन्यासी यथोक्तेन संगफलाभिसंधिरहि
तेन नियतकर्मानुष्ठानरूपेण त्यागेन त्यागफलहेतुत्वात्त्याग
त्वमापन्नेन युक्तोऽत एव मेधावी प्रशस्यमतिस्तत्त्वज्ञच्छिन्नसंशयः
यथोक्तस्य परब्रह्मस्वरूपस्य तत्वस्यैकस्यास्तित्वे इति न सन्देहः
स सर्ववस्तुषु प्रख्यमानपरमात्मैकस्वरूपत्वादकुशलं संसा
धीभिमुख्यस्य साधनभूतं कर्माग्निहोत्रादिशारीरक्लेशावह
न द्वेष्टि तानेव शब्दद्वेषलक्षणदोषाभावान्नाप्रीत्याभावयति
नापि कुशले कर्म त्यागादौ स्वसाधनभूते त्वनुषजते संगं
न भाति तस्यैवंविधस्य त्यागिनो नित्यादि तानन्तनिजानंद
दित्वाद्वषपकरणीयमित्येव सर्वं नियतकर्मानुतिष्ठन्नेवा
सौ सर्वत्यागीत्यर्थः ॥१०॥

\+ अथैवंविधस्य सात्विकस्य त्यागिनः स्वरूपं प्रतिपादयति ॥

लासिकी टीका १५

\+ सत्वेनाहन्तया ममाविष्टो व्याप्तः सात्विकस्त्यागी मेधावी तत्व
बोधनित्यसंबंधः छिन्नसंशयस्तुदित देहाभिमानः अकुशलं
शरीरानन्तकलेशादिरे प्रातःस्नानादिकं कर्म न द्वेष्टि अप्री
त्यान भावयति तथा कुशले देहानुकूले निदाघे मध्याह्नस्ना
नादौ नानुषजते रतिं न भाति

पैचोलेटीका

एवंतस्यनित्यकर्मानुष्ठानेनविशुद्धांतःकरणस्यात्मतत्त्वाभिव्यक्ते
स्तत्क्रमेणयथात्मज्ञाननिष्ठास्यात्तंप्रकारंआह नद्वेष्टीति सात्त्विककर्म
संगफलत्यागवान् सत्त्वसमाविष्टः सत्त्वेनआत्मविवेकज्ञानेनहेतु
नासमाविष्टः संयुक्तः अतएवमेधावीमेधयाआत्मज्ञानलक्षणयायु
क्तः छिन्नसंशयोयस्यसःछिन्नसंशयः अकुशलमशोभनंकाम्य
कर्मसंसारकारणंनद्वेष्टिकुशलेशोभनेनित्येकर्मणिसत्त्वशुद्धिद्वा
रामोक्षसाधनेनानुषज्जतेप्रीतिं नकरोति १०

रत्नावीरसमिद्धोधिनी

एवंत्यागंलक्षयित्वात्यागिनःस्वरूपंप्रतिपादयितुमाह नद्वे
ष्टीति यःअकुशलंपरबाधवादिहिंसाजनकत्वेन निर्मंगलं
स्ववर्णोचितंयुद्धादिलक्षणंकर्मनद्वेष्टि कुशलेपरवर्णोचिते
चकृषिवाणिज्यादिकेसुखप्रायत्वात्मंगलेकर्मणिनसंसक्तो
भवतिसत्यागीप्रशस्यत्यागवान्कथ्यते इतिशेषः कीदृशःस
त्त्वेनगुणेनधैर्येणवा समभ्यक्तदेहाछादेनाविष्टोव्याप्तांतःकर
णः तथामेधानिश्चयग्राहिणीधीरस्यास्तीतिमेधावी अतए
वछिन्नःसंशयोयस्यसछिन्नसंशयः १०॥

मधुभाष्य

49

भाषा अनुवाद ॥

एवम्भूत सात्विक त्याग मे प्रकष्ट निष्ठायुक्त पुरुष के लक्ष
ण कहतेहैं कि सतोगुण से सात्विकत्यागीपुरुष अकुशल क
हे दुखदायी अर्थात् शिशिर कहे जाडे से प्रातःस्नान आदि
कर्म्मसे द्वेष नहीं करते और कुशल कहे ग्रीष्म काल के म
ध्यान स्नान आदि कर्म्म मे प्रीतिनहीं रखतेहैं इसका कारणय
है कि वे लोग स्थिरबुद्धि अर्थात् विवेकसे अपमकृत पराभव
अनादर आदि महा दुख भी सहते हैं औरस्वर्गादि सुखकोभी
त्याग करते है केरि सुख औ दुःख जो क्षणिक कहे क्षणमा
त्र रहनेवाला है यह निश्चय जानते है औ जिस का दैहिक
सुख दुख का ग्रहण औ त्याग की इच्छारूप जो मिथ्या ज्ञानन
ष्ट हो गया है सो छिन्नसंशय पुरुषहै १० ॥

दोहा

अकुशलादिकर्मनद्वेषहि कुशलमेनबंधाय त्यागीसत्व
संयुक्तजो सुधीअसंशय कहाय १०

50

नहिदेहभृताशक्यंत्यक्तुंकर्माण्यशेषतः यस्तुकर्मफलत्यागीसत्यागीत्यभिधीयते ॥

शांकरभाष्यटीका १ ॥

योऽधिकृतः पुरुषः पूर्वोक्तेन प्रकारेण कर्मयोगानुष्ठानेन क्रमेण संस्कृतात्मा सन् जन्मादिविक्रियारहितत्वेन निःक्रियमात्मानमात्मत्वेन संबुद्धः सः सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नासीनो नैष्कर्म्यलक्षणां ज्ञाननिष्ठामश्नुत इत्येतत् पूर्वोक्तस्य कर्मयोगस्य प्रयोजनमनेन श्लोकेनोक्तं यः पुनरधिकृतः सन् देहात्माभिमानित्वेन देहभृदज्ञोबाधितात्मकर्तृत्वविज्ञानतयाहं कर्तेति निश्चितबुद्धिस्तस्याशेषकर्मपरित्यागस्याशक्यत्वात् कर्मफलत्यागेन चोदितकर्मानुष्ठानएवाधिकारो न त्यागइत्येतमर्थं दर्शयितुमाह नहीति नहि यस्माद्देहभृता देहं बिभर्तीति देहभृद्देहात्माभिमानवान् देहभृदुच्यते नहि विवेकी सहि वेदाविनाशिनमित्यादिना कर्तृत्वाधिकारान्निवर्तितोतस्तेन देहभृताज्ञेन न शक्यं त्यक्तुं संन्यसितुं कर्माण्यशेषतो निःशेषेण तस्माद्यस्त्वज्ञोधिकृतो नित्यानि कर्माणि कुर्वन् कर्मफलत्यागी कर्मफलाभिसन्धिमात्रसंन्यासी सत्यागीत्यभिधीयते कर्म्यपि सन्निति स्तुत्यभिप्रायेण तस्मात् परमार्थदर्शिनैवादेहभृता देहात्मभावरहितेनाशेषकर्मसंन्यासः शक्यतेक र्तुं ॥ ११ ॥

आनंदगिरिकृतटीका २ ॥

नहि देहेत्यादिना श्लोकेनोक्तमर्थं संक्षिप्यानुवदति योऽधिकृत इति पूर्वोक्तप्रकारेणेति कर्माणि तत्फले च संगत्यागेनेत्यर्थः कर्मात्मयोगस्यानुष्ठानेन संस्कृतात्मा सन् क्रमेण श्रवणाद्यनुष्ठानद्वारेण कूटस्थब्रह्मात्मकेन संबुद्ध इति संबंधः परस्य निःक्रियत्वे हेतुमाह जन्मादीति उक्तज्ञानवतः सर्वकर्मत्यागद्वारा मुक्तिभाक्त्वं दर्शयति सर्वेति आत्मज्ञानवतः सर्वकर्मत्यागसंभावनामुक्त्वा तद्धीनस्य तदसंभवे हेतुवचनत्वेन अनन्तरश्लोकमवतारयति यः पुनरिति नबाधितमात्मनि कर्तृत्वविज्ञानमस्येत्यज्ञस्तस्य तद्भावस्तत्तानयेति यावत् एतमर्थं दर्शयितुमस्य सर्वकर्मसंन्यासासंभवे हेतुमाहेति योजना

श्री·
गी·टी·
अ·
51

यस्मादित्यस्यतस्मादित्यनेनसंबंधः विवेकिनोपि देहधारितया
देहभृत्वाविशेषे कर्माधिकारः स्यादित्याशंक्याह नहीति कर्तृत्वाधि
कारस्तत्पूर्वके कर्मानुष्ठाने तस्मादिति यावत् ज्ञानवतो देहधारणे
पि तदभिमानित्वाभावान्नेत्याशयार्थः अज्ञस्य सर्वकर्मत्यागायोगमु
क्ते हेतूकृत्य फलितमाह तस्मादिति कर्मानुष्ठायिनस्त्यागित्वोक्तिर
युक्तेत्याशंक्याह कर्माणीति कर्मिणोपि फलत्यागेन त्यागित्ववचने
फलत्यागस्तुत्यर्थमित्यर्थः कस्य तर्हि सर्वकर्मत्यागः संभवती
माशंक्य विवेकवैराग्यादिमतो देहाभिमानहीनस्येत्युक्ते निरा
मयतितस्मादिति ॥ ११ ॥

स्वामिकृतटीका ३ ॥

नन्वेवंभूतात्कर्मफलत्यागाद्वरं सर्वकर्मत्यागः तथा सति कर्मवि
क्षेपाभावेन ज्ञाननिष्ठासुखं संपद्यते तत्राह नहीति देहभृता देहा
त्माभिमानवता निःशेषेण सर्वाणि कर्माणि त्यक्तुं न शक्यं तदुक्तम्
नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् इत्यादिना तस्माद्यस्तु
कर्माणि कुर्वन्नेव कर्मफलत्यागी स एव मुख्यस्त्यागीत्यभिधीयते
[illegible] कर्मफल [illegible] ॥ ११ ॥

पिशाचभाष्यटीका ४ ॥

देहंविभर्तीति देहभृत् विद्यावान्देहात्मदर्शीतेन देहभृता कर्माण्यशे
षतः त्यक्तुं न शक्यं यस्तु विद्यावान् [illegible] कर्माणि कुर्वन्कर्मफल
त्यागी स कर्मसंन्यासीत्युच्यते ॥ ११ ॥

रामानुजभाष्यटीका ५ ॥

तदाह नि

नहीति नहि देहभृता ध्रियमाणशरीरेण कर्माण्यशेषतस्त्यक्तुं श
क्यं देहधारणार्थानामशनपानादीनां तदनुबंधिनां च कर्मणामवर्ज
नीयत्वात्तदर्थं च महायज्ञाद्यनुष्ठानमवर्जनीयं यस्तु तेषु महायज्ञा
दिकर्मसु फलत्यागी स एव त्यागेनैकेनामृतत्वमानशुरित्यादिशास्त्रे
षु त्यागीत्यभिधीयते फलत्यागीति प्रदर्शनार्थः फलकर्तृत्वकर्मसंगा
नां त्यागी त्रिविधः संप्रकीर्तित इति प्रक्रमात् ननु कर्माण्यग्निहोत्रद
र्शपूर्णमासज्योतिष्टोमादीनि महायज्ञादीनि च फलसंबंधितया शास्त्रे
विधीयन्ते नित्यनैमित्तिकानामपि प्राजापत्यंगृहस्थानामित्यादिफल

सेवेयितया विधाने अनस्तत्फलसाधनस्वभावतयावगतानां।
कर्मणामनुष्ठाने वीजावापादीनामिवानभिसंहितफलस्यापीष्ट
निष्ठरूपफलसंबंधो वर्जनीयः [illegible]
[illegible] ॥ ॥

अभिनवगुप्तकृतटीका ६

दोषवद्धिंसादिमत्त्वात्पापयुक्तत्वेन फलेनान्येन सर्वं शुभफलमिति
केचिद्योगविशेषमन्यन्ते सांख्यास्वरसाद् इव अन्ये तु मीमांसकेषु।
काव्यविशेषः क्रतुर्थो हिंसाहादवगम्यत इति तथा न स्यादेव
दिके हिंसादिनयेनेतिकर्तव्यतांशभागिनी हिंसैव वञ्चयति न
हिंसादिनिषेधमात्रशास्त्रस्य तत्र बाधनात्प्रेमनाप्येवं नन्वहिंसा फला
शेभावनायास्त्वप्रयोजकत्वविधायकत्वमिति अन्ये महात्मानो हिंसादियो
गिनोपि न त्यजेयुः यास्त्वैकशरणा कार्याकार्यविभागः पंडिताः
इति मन्यन्ते तत्र त्वयं निश्चयः आफलसितगुणस्वरूपैव विश्वात्मा
गस्यैव सत्त्वरजस्तमोमयी चित्तवृत्त्या क्रियमाणस्य तद्विशिष्टस्व
भावावभासवस्तुस्थित्यास्तु त्यागो नाम परब्रह्मविदां सिद्धास्ति।
स्यादिशुभमनयारागद्वेषपरिहारेण फलप्रेप्सा विहरणकर्मणां
निवर्तनं अनपवाहराजसंतमसं च त्यागं कृत्वा न किंचित्फलसंबं
धः इति सात्त्विकस्तत्त्यागाख्यो ह्यार्थपालनात्मकं फलं त्यक्तगुण
ग्रामग्रहस्याभिनवमनैः समस्तत्यागवाचो युक्तिरूपपत्तिमती ॥ ॥

परमार्थप्रपादी टीका ७ ॥

न देवाहं न हीति देहभृता देहाभिमानवता दैहिकव्यवहारायक
रकरणव्यापारं कुर्वता अशेषतः सर्वाणि त्यक्तुं हि शक्यं कायक्लेश
भयात्कर्मत्यक्तुं शक्यं न इत्यर्थः न हि कश्चित्क्षणमपीति श्रीमेवोक्तं
अतो यस्तु कर्माणि कुर्वन्नपि कर्मफलत्यागी स एव त्यागीत्यभिधी
यते कर्माकरणेन त्यागी न भवतीत्यर्थः ११ ॥

वनमाली टीका ८ ॥

नन्वेवं मूढात्कर्मफलत्यागाद्वरं सर्वकर्मपरित्यागः विहितकर्मप
रित्यागो वा त्यागशब्दार्थः कर्ममात्रस्य मनोविक्षेपकत्वादित्यत आह

नहीतिदेहभृतादेहधारणपोषणार्थंचेष्टांकुर्वताअशेषतोशे
षाणिकर्माणित्यक्तुंनहिशक्यंनशक्यानिदेहपोषणार्थंलौकि
ककर्मणामावश्यकत्वात् स्वोचितकर्मणोदेहाभिमानिनाकरणप्र
त्यवायापत्तिरतोयावद्देहाद्यावदहंममेत्यभिमानस्तावल्लौकिकवैदि।
काद्विककर्मद्वयत्यजमित्यर्थः तस्माद्यस्त्वविकारीसत्वशुद्ध्यर्थंकर्मा
णिकुर्वन्नपिभगवदर्पणतयातत्फलत्यागीतुशब्दस्तस्यऽलभवतो
तनार्थः सत्यागीत्यभिधीयतेत्यागफलस्यैतेनसम्यक्त्वाप्यवाक्यै
णाहत्यासत्यागीतिकथ्यते अशेषकर्मत्यागस्तुनिवृत्तेदेहाभिमा
निनेवशुक्लपक्षेणसएवमुख्यःसंन्यासइतिभावः ॥ ११ ॥

उत्समवैजयंती टीका ॥ ११ ॥

नत्वफलकरत्वादित्यागस्यातिप्रयासविनेपायनेकविघ्नग्रस्तै
नत्वाननिष्ठावाधकत्वात्कर्मस्वरूपत्यागःसेववरीयस्त्वस्यादित्याश
ंकीतितत्याननेनचियमाणशरीरेणकेनापिक्षत्वेषणाकर्माणितिभि
मितिकमहायत्तादीनिनिखिलानिअशेषतः माकल्येनत्यक्तेंहानेन
शकंनशक्यानिभवेतिहीत्यनेनतत्त्यागेसर्वविदेहादिभिरपित्यक्तं
मशक्यत्वेर्देहात्माभिमानिभिः किमवक्तव्यमितिकेवलतिकेस्व
च्यतेकर्मणांप्रत्याजनकादयः नहिकश्चित्क्षणमपिजातुति
ष्ठत्यकर्मकृदित्यायुक्तत्वात् तस्मात्तुशब्दादेवंनिश्चित्ययोमुमुक्षुःक
मफलत्यागी कर्मफलत्यागी कर्मफलत्यक्तेशीलवान्कर्माणिकुर्व।
मेवनत्फलत्यागीभवतिसएवत्यागीत्यभिधीयतेत्यागेनैके अमृतत्व
मानशुरित्यादिशास्त्रेकच्यतेनाविरतोदुश्चरितान्नाशान्तोनासमाहितः
नाशांतमनसोवापिप्रज्ञानेनैवमाप्नुयादितिदुश्चरितादविरतेर्ज्ञानो
त्पत्तिरोधित्वश्रवणादतःकर्माणिकर्तृत्वाभिनिवेशंनफलेच्छांच
परित्यज्यज्ञानार्थीसर्वकर्माणिकुर्यान्नतुतत्स्वरूपत्यजेदितिपा
र्थसारथ्येराशयः ॥ ११ ॥

मधुसूदनी टीका ॥ १० ॥

\+ मनुष्योऽहंब्राह्मणोऽहंगृहस्थोऽहमित्याद्यभिमानेनावाधितेन देहेकर्मा
धिकारहेतुर्वर्णाश्रमादिरूपंकर्तृत्वभोक्तृत्वाद्याश्रयंस्थूलसूक्ष्मशरीरं

\+ तदेवमात्मज्ञानवृत्तांसर्वकर्मत्यागःसंभाव्यतेकर्मप्रवृत्तिहेत्वोःरागद्वेषयोरभावादित्युक्तं
संप्रतिअज्ञस्यकर्मत्यागासंभवेहेतुरुच्यते ॥

द्रियसंघातं बिभर्ति अनाद्यविद्यावासनावशाद्व्यवहारयोग्यत्वेनक
ल्पितमस्मत्यमपि सत्यतयात्वभिन्नमपि स्वाभिन्नतयापश्यन् धारयति
पोषयति चेति देहभृत् अबाधितकर्माधिकारहेतुदेहाभिमानः तेन
विवेकज्ञानशून्येन देहभृता कर्मप्रवृत्तिहेतुरागद्वेषपौष्कल्येन सत
तं कर्मसु प्रवर्तमानेन कर्माण्यशेषतः निःशेषेण त्यक्तुं संन्यसितुं हि
यस्मान्न शक्यं न शक्यानि समग्रकारणसामग्र्यां कार्यत्यागस्याशक्य
त्वात् तस्माद्यस्त्वज्ञोऽधिकारी सन्नवश्यकर्तव्यकर्माणि कुर्वन्नपि भगवद
त्वकर्मण्यायस्तत्फलत्यागी तुशब्दस्तस्य दुर्लभत्वद्योतनार्थः स त्या
गीत्यभिधीयते गौण्यावृत्त्या तत्त्वतस्त्यागोऽपि सन्नशेषकर्मसंन्यासस्त
परमार्थदर्शिनैवादेहभृता शक्यते कर्तुमिति स एव मुख्यस्त्या
गीत्यभिप्रायः ननु देहभृतः परमात्मज्ञानशून्यस्य कर्मिणोऽपि कर्म
फलाभिसंधित्यागित्वेन गौणस्य संन्यासिनः परमात्मज्ञानवतो देहाभि
मानरहितस्य सर्वकर्मत्यागिनः मुख्यसंन्यासिनश्च कः फले विशेषो
पदलाभेन गौणत्वमेकस्य पदलाभेन च मुख्यत्वमन्यस्य कर्मफलत्या
गित्वतद्धीरपि तत्त्यागिनस्तयोर्विशेषो वाच्य उच्यते ॥ ११ ॥

सदानंदी टीका ॥ ११ ॥

एवमात्मविदः सर्वकर्मत्यागोऽपि संभवेत् कर्मप्रवृत्तिहेतोस्तस्याभ
(२०) वाद्वेषरागयोः १ यत्त्वकर्मणां त्यागासंभवे हेतुरुच्यते ब्राह्मणो
हमेव ब्रह्मोऽहमित्याद्यार्थ्यसिके न च अबाधितनाभिमानेन देहं वर्णाश
माश्रये कर्तृत्वाद्याश्रयं स्थूलसूक्ष्मसंघातमाग्रहात् ३ विभर्ति
नाद्यविद्यादिवशादात्मतयास्व देहभृत्तेन कर्माणि कर्मण्यधि
कारिणा ४ विवेकज्ञानशून्येन रागद्वेषवता सदा त्यक्तुं निःशेष
तो यस्मान्न शक्यानि कथंचन ५ समग्रकारणसामग्र्यां कार्यत्यागोऽति
दुष्करः तस्मादज्ञोऽधिकारी यः कुर्वन्कर्माणि सुहृदये ६ फलाभिसं
धित्यागी न शक्तेनातिदुर्लभः स त्यागी त्युच्यते गौण्या मुख्यस्त्वा
त्मतत्त्ववित् ७ ईश्वरानुग्रहात्कर्मफलत्यागिनया स्वधीः शुध्यते तत
स्तद्बोधेन नामयत्येनाश्रयो हरेः ८ ॥ ११ ॥

नीलकंठी टीका ॥ १२ ॥

अन्नत्यमेव सात्विकं त्यागमनुष्ठानत्वयोजनमाह द्वाभ्यां नहीति दे

श्री
गी॰ टी॰

53

देहभृता देहाभिमानिना हि यस्मात् अशेषतः कर्माणि त्यक्तुं न शक्यं
अशक्यं प्राणयात्रालोपप्रसंगात् तस्माद्यस्तु यः कर्मफलत्या
गशीलः तथाह्युपचारार्थं स एव त्यागीत्युच्यते यस्त्वशेषतः कर्माणि
त्यक्तुं शक्नोति परमार्थदर्शी स मुख्यस्त्यागी मुख्यः ॥ ११ ॥

आनंदटीका १३

कर्मसंन्यासमपवदति देहभृता ध्रियमाणशरीरेणाशेषतः
कायिकवाचिकमानसिकसामस्त्येन कर्माणि त्यक्तुं न शक्यं कर्मणाम्
अवश्यंभाविनामपरिहार्यत्वात् तत्पुनरुक्तप्रकारेणाकुर्व
मेव कर्माणि यः फलत्यागी स त्यागीत्युच्यते न निरग्निर्न चाक्रिय
इति सिद्धम् ॥

+एतदेव पूर्वप्रोक्तमपि स्मारयन्नुद्रढयितुमाह॥

रामकंठी टीका १४

+पूर्वमेव व कृशो व्याख्यातत्वाद्गतार्थमेवैतत् [illegible] फलमाह ॥

+नन्वेवंविधस्य सात्त्विकस्य त्यागिनः कर्मत्याग एव वरं किं कर्मानुष्ठानेनेत्यत आह॥

सात्त्विकी [illegible] टीका

+देहभृता ज्ञानिनापि देहं बिभ्रता सर्वाणि कर्माणि त्यक्तुं नैव
शक्यं तस्माद्यस्तु कर्माणि कुर्वन्नपि कर्मफलत्यागी स एव
मुख्यस्त्यागीत्यभिधीयते [illegible] ११

पंचोलीटीका

यस्तु देहाभिमानवान् तस्य कर्मफलत्यागेन कर्मानुष्ठाने प्रवृत्तिका
रोन कर्मत्यागे इत्येतदर्थं दर्शयितुमाह नहीति हि यस्माद्देहभृ
ता देहाभिमानवता कर्माणि अशेषतो निःशेषेण त्यक्तुं न शक्यं त
स्मात् यो नित्यानि कर्माणि करोति कर्मफलत्यागी कर्माभिसंधि
मात्रस्य संन्यासी स कर्माण्यपि स मुख्यस्त्यागी इत्यभिधीयते ॥ ११

रणवीरसमिद्धोद्योतिनी

ननु फलत्यागपूर्वककर्मानुष्ठानाद्वरं सर्वकर्मत्याग एव
बंधनिमित्तभूतपुण्यपापमूलकारणाभावात्सर्वदुःखध्वंस
लक्षणमोक्षोऽपि स्वयं सिद्ध्येदित्यादित्याशंक्य पूर्वोक्तमेव स्मार

यदुक्तमेवार्थं दृढयितुमाह नचेति नहि कश्चित्क्षणमपीमनेन व्याख्यातचरमेतत् ११ ॥

मधुभाष्य

नहीति त्यागं स्तौति ११ ॥

भाषा अनुवाद

जो कहो कि पूर्वोक्त कर्मों के फल त्याग से कर्मों ही का त्याग
करना ही श्रेष्ठ क्यों न होय जिस हेतु विक्षेप करनेवाले कर्म्म
हर होने से अविक्षेप क्रमसे ज्ञाननिष्ठारूप जो सुख सो सम्भव
होयगा इस पर कहते हैं कि देहअभिमानयुक्त मनुष्य तावत् स
र्व कर्मों का सम्पूर्ण त्याग नहीं कर सकते हैं इस मे प्रमाण तीस
रे अध्याय के पंचवें श्लोक आदि से कहा है किन कश्चित् क्षण
मपिजातु तिष्ठत्यकर्मकृत् इति इससे जो सकल कर्म्म का
अनुष्ठान करके भी फलके त्यागी है वेई पुरुष प्रधान त्यागी है
११

दोहा

नहिंजीवकों शक्य है त्याग न कर्म अशेष कर्महि के फ
ल त्यागी जो सो कह्यो त्यागी विशेष ११

54

अनिष्टमिष्टंमिश्रंचत्रिविधंकर्मणःफलं भ
वत्यत्यागिनांप्रेत्यनतुसंन्यासिनांक्वचित् १२

शांकरभाष्यटीका १ ॥

किंपुनस्तत् प्रयोजनं यत्सर्वकर्मपरित्यागात् स्यादित्युच्यते अनिष्टं
नरकतिर्यगादिलक्षणं इष्टंदेवादिलक्षणं मिश्रं इष्टानिष्टसंयुक्तं मनु
ष्यलक्षणंचैवं त्रिविधं त्रिःप्रकारं कर्मणोधर्माधर्मलक्षणस्य फलंबा
ह्यानेककारकरूपं व्यापारनिष्पन्नं सदविद्याकृतमिंद्रजालमायोपमं
महामोहकरं प्रत्यगात्मोपसर्पीव फलत्यतया लयमदर्शनं गच्छतीति
फलनिर्वचनं तदेतदेवलक्षणं फलंभवत्यत्यागिनामज्ञानां कर्मिणाम
परमार्थसंन्यासिनां प्रेत्यशरीरपाताहूर्ध्वं नतुपरमार्थसंन्यासिनां परम
हंसपरिव्राजकानां केवलज्ञाननिष्ठानां क्वचिन्नहि केवलंसम्यक्दर्श
ननिष्ठाःविद्यादिसंसारबीजं नोन्मूलयन्ति कदाचिदित्यर्थः १२ ॥

आनंदगिरिटीका २ ॥

उक्ताधिकारिणः सर्वकर्मसंन्यासासंभवेपि फलाभावे कृतस्तस्य कर्त्त
व्यतेतिशंकते किंपुनरिति गौणस्य मुख्यस्य वा संन्यासस्य फलंविव
क्षितमिति विकल्पयति उच्यतइति सर्वकर्मत्यागोनाम तदनुष्ठानेपि
तत्फलाभिसंधित्यागः सचामुख्यसंन्यासस्तस्य फलमाह अनिष्टमिति
मुख्ये तु संन्यासे सर्वकर्मत्यागे सम्यग्धीद्वारा सर्वसंसारोच्छित्तिरेव फ
लमित्याह नत्विति पादत्रयं व्याकरोति अनिष्टमित्यादिना तिर्यगादीत्या
दिपदमवशिष्टनिकृष्टयोनिसंग्रहार्थं देवादीत्यादिपदं विशिष्टोत्कृष्ट
योनि ग्रहणायेति विभागः फलशब्दं व्युत्पादयति बाह्येति कारणद्वा
रकमनेकविधत्वमुक्त्वा मिथ्यात्वमाह अविद्येति तत्कृतत्वेन दृष्टि
मात्रदेहत्वे दृष्टान्तमाह इंद्रेति प्रतीतितोरमणीयत्वं सूचयति महा
मोहेति अविवेकोत्पाद्यत्वादविद्याश्रितत्वाद्वात्माश्रितत्वं वस्तुतो नास्तीत्याह
प्रत्यगिति उक्तं फलं कर्मिणामिष्यते चेदमुख्यसंन्यासफलोक्तिपर
त्वे पादत्रयस्य कथमिष्टमित्याशंक्याह अपरमार्थेति फलाभिसंधि
विकलानां कर्मिणां देहपाताहूर्ध्वं कर्मानुरोधि फलमावश्यकमित्यर्थः

श्री॰
गी॰टी॰
अ॰

55

कर्मिणामेव सतामफलाभिसन्धीनाममुख्यसंन्यासित्वात्तदीयाशुभ
संन्यासस्य फलमुक्त्वा चतुर्थपादं व्याचष्टे नत्विति मुख्यसंन्यासमनन्त
रमुक्तं तद्वच्छिन्नमपि परमार्थेति तेषां सम्यग्ज्ञानं यमुपदिशन्ति केवले
ति कचिद्देशे कालेवा नास्ति यथोक्तं फलं तेषामिति संबंधः नहि परा
मार्थसंन्यासेऽफलत्वात् नान्वयीयेतेत्याशंक्य तस्य मोक्षावसायित्वान्नैव
मित्याह नहीति १२ ॥

+एवंभूतस्य कर्मफलत्यागस्य फलमाह ॥

स्वामिकृतटीका ३ ॥

+अनिष्टमिति अनिष्टं नारकित्वं इष्टं देवत्वं मिश्रं मनुष्यत्वं एवं त्रिविधं
यस्य श्रवणस्य चतुर्भयमिश्रस्य च कर्मणो यत्फलं प्रसिद्धं तत्सर्वमत्यागि
१मा नां सकामानामेव प्रेत्य परत्र भवति तेषां त्रिविधकर्मसंभवात् न तु संन्यासि
नां क्वचिदपि भवति संन्यासिशब्देनात्र फलत्यागसाम्यात् प्रकृताः कर्मफ
लत्यागिनो गृह्यन्ते अनाश्रितः कर्मफलं कार्यमित्येवमादौ फलत्यागि
षु संन्यासिशब्दप्रयोगदर्शनात् तेषां सात्त्विकानां पापासंभवात् ईश्वरा
र्पणेन च श्रवणफलस्य त्यक्तत्वात् त्रिविधमपि कर्मफलं न संभवतीत्यर्थः
१२ ॥

पिशाचभाष्यटीका ४ ॥

अनिष्टं दुःखमिष्टमिष्टं मिश्रमाणं मिश्रमुभयात्मकं इष्टानिष्टकर्मणः फले
फलतया लीयत इति फलं तत्त्रिविधं प्रकारं भवति जायते अत्यागि
नामसत्त्वानां कर्मिणां सोऽस्य कृतानि तानि निश्चयायोक्तानि काचिदिति
निश्चितार्थेव दयोक्तानीत्यर्थः सिद्धये निष्पन्नये सर्वकर्माणि शरीरादी
नां १२ ॥

+अथो मोक्षफलत्वेन श्रवणेन कर्मानुष्ठेयमित्यत उत्तरमाह ॥

रामानुजभाष्यटीका ५ ॥

+अनिष्टमिति अनिष्टं नरकादिफलं इष्टं स्वर्गादिफलं मिश्रं शुभमिश्रं
भिन्नं ब्राह्मणादिवर्णाश्रमविधिं त्रिविधं कर्मणः फलं मिश्रं शुभमिश्र
त्वममतया फलत्यागरहितानां प्रेत्य भवति प्रेत्य कर्मानुष्ठानोत्तरकाले
मित्यर्थः न तु संन्यासिनां क्वचित् न तु कर्तृत्वादिपरित्यागिनां क
दपि मोक्षविरोधि फलं भवति एतदुक्तं भवति यथा पाति से त्रम हाय
त्यादीनि तानि एव तत्यापि जीवनादि कारयोरिव मोक्षादि कारे व विनि
योगः एवं क्रतेन परिहृत्य ते मोक्षविनियोग आश्रमे सुवेदान वचनेन।
ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेनेत्यादिभिरिति
नेदं क्रियमाणस्य कर्मणः कर्तृत्वादिपरित्यागः शास्त्रसिद्धिस्त्या

मि

स स एव च त्यागः॥ कस्के इदानीं भवति पुरुषो न तैर्नीयोगकर्तृत्वानु
संधानेनात्मनः कर्तृत्वानुसंधानप्रकारमाह ननु एवं फलकर्मणः
पि ममतापरित्यागो भवतीति परमपुरुषो हि स्वकीयेन जीवात्मना
स्वकीयैश्च करणकलेवरप्राणैः स्वलीलाप्रयोजनाय कर्माण्यारभ
ते अतो जीवात्मगतं स्वर्गादिकमपि फलं तत्साधनभूतं च कर्म परम
पुरुषस्यैव १२ ॥

अभिनवगुप्तकृतटीका ६ ॥

अत्यागिनां फलमयानां अनुनाव्यवहारदशायामपि पंचस्वपि कर्म
हेतुष्वपि स्थिते अवलादेवामी अविधेयाः अमी मम स्वात्ममेव सकलक
र्तृभावभारमारोपयन्तो निजैरेव धियामानैव भेतिन तु वत्त्व स्थि
त्या सर्वं पश्यन्तः परिदृश्यन्ते १२ ॥

परमार्थप्रपा टीका ७

अथ कर्मफलत्यागस्य फलमाह अनिष्टमिति अनिष्टं नारकि
त्वं इष्टं देवत्वं मिश्रं मनुष्यत्वं एवं त्रिविधं पापस्य पुण्यस्य मिश्रस्य
च कर्मणः फलं प्रसिद्धं सर्वमत्यागिनां सकामानामेव प्रेत्य पर
त्र भवति तेषां त्रिविधकर्मसंभवात् न तु संन्यासिनां किंचिदपि भ
वति संन्यासत्वेनात्र फलत्यागिनो गृह्यन्ते अनाश्रितः कर्मफलं का
र्यं कर्म करोति य इत्येवमादौ फलत्यागे संन्यासित्वप्रयोगदर्शनात् १२

वनमाली टीका ८ ॥

एतादृश कर्मफलत्यागस्तोति अनिष्टं नारकत्वादि इष्टं स्वर्गस्थ
त्वादि मिश्रं मिश्रितानिष्टसमुत्कं मानुषं फलत्वं इमिमे त्रिविधमित्य
नवाद्येहेयतार्थः अत्यागिनां सकामानां फलासक्तानां प्रेत्य परलो
के देहान्ते वा भवति न तु संन्यासिनां क्वचित् फलेच्छाशून्यानां कर्म
कुर्वतां यद्वा अत्यागिनां कर्मफलत्यागिनां अपि कर्मानुष्ठायिनामज्ञानां
गौणसंन्यासिनां प्रेत्य विविदिषापर्यन्त सत्त्वशुद्धेः प्रागेव मृतानां पूर्व
कृतस्य कर्मणः फलं देहग्रहणं भवति तच्च फलं कर्मणां त्रिविधत्वा
त् त्रिविधं पापस्यानिष्टं प्रतिकूलवेदनीयं नरकतिर्यगादिरूपं
पुण्यस्येष्टमनुकूलवेदनीयं स्वर्गादि मिश्रस्य पापपुण्यसंगलस्य मि
श्रमानुषादि एवं गौणसंन्यासिनां देहपाताद् ऊर्ध्वं देहान्तरग्रहणमा
वश्यकं मिश्रकाम्यत्वं संन्यासिनां परमात्मसाक्षात्कारापिविधायां

गु

श्री·
गी·टी·
प्र·
56

निहत्तौ कैवल्यमेवेत्याह नतु संन्यासिनां क्वचित् परमात्मज्ञान
वतां मुख्यसंन्यासिनां प्रेत्य कर्मणः फलं देह ग्रहणमनिष्टमि
ष्टं मिश्रं च क्वचिद्देशे काले वा न भवत्येवेत्यवधारणार्थस्तुशब्दः
भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि त
स्मिन्दृष्टे परावरे इति श्रुतेः १२ ॥

उत्तमवैजयंती टीका ९ ॥

एवंभूतफलकर्तृत्वादित्यागाभावे मोक्षाभाववत्त्यादित्याशयेना
ह अनिष्टमिति अनिष्टं नारकित्वं इष्टं स्वर्गित्वं मिश्रं मनुष्यत्वं
दुःखसुखवत्तद्रूपयोगीति त्रिविधं अत्यागिनां फलकर्तृत्वा
दित्यागरहितानां सकामकर्मकर्तॄणां प्रेत्य कर्मानुष्ठानां नरका
लेकर्मणः फलं भवति तेषां तत्फलमेवेति तथा तत्कर्तृत्वा
भिमानतया च मोक्षाभाव इत्याशयः नतु संन्यासिनां क्वचित्सं
पुनः क्वचिदपि इहामुत्र च लोकेपि साधनसिद्धकालेपि वासं
न्यासिनां फलकर्तृत्वादित्यागवतो मोक्षविरोधिरूपमेतत्फ
लेन भवति किंतु तेषां कर्मणां ज्ञानेन मोक्षो भवतीत्य
भिप्रायः १२ ॥

मधुसूदनी टीका १० ॥

अत्यागिनां कर्मफलत्यागित्वेपि कर्मानुष्ठायिनामज्ञानां गौ
णसंन्यासिनां प्रवृत्तिविविदिषापर्यंतसत्त्वशुद्धेः आगवस्तानां ऊर्ध्वं फ
लस्य कर्मणः फलं शरीरग्रहणं भवति इंद्रजालमायामयं फल्गु त
यालयमदर्शनेन गलतीति निरुक्तेः कर्मण इति ज्ञाप्य अभिप्रायमेकव
चने एकस्य त्रिविधफलत्वानुपपत्तेः नच फले कर्मणस्त्रिविधत्वा
न् त्रिविधं पापस्यानिष्टं प्रतिकूलवेदनीयं नारकतिर्यगादिलक्षणं
पुण्यस्येष्टमनुकूलवेदनीयं देवादिलक्षणं
लस्य मिश्रं इष्टानिष्टसंयुक्तं मानुष्यलक्षणं मिश्रस्य तु पापपुण्य
हेयत्वार्थः एवं गौणसंन्यासिनां एवं त्रिविधमिष्यते वादी
वण्यकर्मिनस्त्का मुख्यसंन्यासिनां शरीरपातानंतरं शरीरांतरग्रहणमा
ध्यति हत्तौ विदेहकैवल्यमेव भिन्नाहनेन संन्यासिनां परमात्मसाक्षात्कारेणाविद्यानत्का
ज्ञानवतां मुख्यसंन्यासिनां परमहंसपरिव्राजकानां प्रेत्य कर्मणः फलंश
रीरग्रहणमनिष्टमिष्टं मिश्रं च क्वचिद्देशे काले वा न भवत्येवेत्यवधारणार्थ

त्वशब्दः ज्ञानेनाज्ञानस्योच्छेदे तत्कार्याणां कर्मणामुच्छिन्नत्वात् तथा
च श्रुतिः भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि त
स्मिन्दृष्टे परावरे इति पारमार्थिकं च मुख्यं तदधिगम उत्तरपूर्वाघयोरश्लेषवि
नाशौ तद्व्यपदेशादिति परमात्मज्ञानादशेषकर्मक्षयं दर्शयति तेन गौण
संन्यासिनो पुनः संसारः मुख्यसंन्यासिनो मोक्ष इति फलविशेष उक्तः
अत्र कश्चिदाह अनाश्रितः कर्मफलं कार्यं कर्म करोति यः स संन्यासी च
योगी चेत्यादौ कर्मफलत्यागिषु संन्यासिशब्दप्रयोगात् कर्मिण एव त्यक्तफलत्या
गसाम्यात्संन्यासिशब्देन गृह्यन्ते तेषां च सात्त्विकानां नित्यकर्मानुष्ठानेन
निषिद्धकर्माननुष्ठानेन च पापासंभवात् अनिष्टफलं संभवति नापीष्टका
म्याननुष्ठानादीश्वरार्पणेन फलस्य त्यक्तत्वाच्च अत एव मिश्रमपि नेति
त्रिविधकर्मफलासंभवः अत एवोक्तं मोक्षार्थी न प्रवर्तेत तत्र काम्यनि
षिद्धयोः नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासयेति स वक्तव्यः शब्द
स्यार्थस्य च मर्यादानतिपातो भवतीति तथा हि गौणमुख्ययोर्मुख्ये
कार्यसंप्रत्यय इति शब्दमर्यादा यथा अमावस्यायामपराह्णे पिण्डपि
तृयज्ञेन चरन्तीत्यत्र अमावास्याशब्दः काले मुख्यः तत्कालोत्पन्ने कर्म
णि च गौणः य एवं विद्वानमावास्यां यजत इत्यादौ तु अमावास्याशब्दे
न नैमित्तिककर्मग्रहणे पितृयज्ञस्य तदङ्गत्वात् फलं कल्पनीयमिति वि
धेर्लाघवमिति पूर्वपक्षिते कालावयवेन अङ्गं वा समभिव्याहारादिति
गौणार्थस्य मुख्यार्थापत्तिपूर्वकत्वात् मुख्यार्थस्य चेह प्रतिबाधाद
मावास्याशब्देन काल एव गृह्यते फलकल्पनागौरवं तूत्तरकाली
नप्रमाणवत्त्वादङ्गीकार्यमिति सिद्धान्तितं जैमिनिना पितृयज्ञः स्व
कालत्वादनङ्गं स्यादिति एवं स्थिते संन्यासिशब्दस्य सर्वकर्मत्यागिनि
मुख्यत्वात् कर्मिणि च फलत्यागसाम्येन गौणत्वात् मुख्यार्थस्य चे
हाबाधात् नैवं संन्यासिशब्देन ग्रहणमिति शब्दमर्यादया सिद्धे स
र्वाकारणसामर्थ्यात् कार्यो न स्यादिति चार्थमर्यादा तथा हि ईश्वरार्पणेन
त्यक्तकर्मफलस्यापि सत्त्वशुद्ध्यर्थं नित्यानि कर्माण्यनुतिष्ठतः अन्तरा
ले मृतस्य प्रागर्जितैः कर्मभिस्त्रिविधं शरीरग्रहणं केन वार्यते यो वा एत
दक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति श्रुतेः अन्ततः स
त्त्वशुद्धिफलज्ञानोत्पत्तिसमर्थं तदधिकारिशरीरमपि तस्यावश्यकमेव अत

श्री॰
गी॰टी॰
अ॰

एवंविविदिषासंन्यासिनः श्रवणादिकं कुर्वतः अंतराले मृतस्य योगभ्र
ष्टशब्दवाच्यस्य शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते इत्यादिना ज्ञानाधि
कारिशरीरप्राप्तिरवश्यंभाविनीति निर्णीतं षष्ठेऽध्याये यत्र सर्वकर्मत्यागि
नोऽप्यज्ञस्य शरीरग्रहणमावश्यकं तत्र किं वक्तव्यमज्ञस्य कर्मिण इति त
स्मादज्ञस्यावश्यं शरीरग्रहणमित्यर्थः मयोद्याभिसंहं पराक्रांतं चैकभवि
कपक्षनिराकरणेन सूरिभिः तस्माद्यथोक्तं भगवत्पूज्यपादभाष्यकृत
व्याख्यानमेव ज्यायः तदयमत्र निष्कर्षः अकर्त्रभोक्तृपरमानंदाद्वि
तीयस्य स्वप्रकाशब्रह्मात्मसाक्षात्कारेण निर्विकल्पेन वेदांतवाक्यज
न्येन विचारनिश्चितप्रामाण्येन सर्वप्रामाण्येन सर्वप्रकाराप्रामाण्यशंका
शून्येन ब्रह्मात्मज्ञाननिष्ठोऽतत्कार्यकर्तृत्वाभिमानरहितः परमार्थसं
न्यासी सर्वकर्मोच्छेदकः केवलः सन्नविद्याकर्मादिनिमित्तेन पुनः शरी
रग्रहणेनाव भवति सर्वभ्रमाणां कारणोच्छेदेनोच्छेदात् यस्त्वविद्या
वान् कर्तृत्वाभिमानी देहभृत्स त्रिविधः रागादिदोषप्राबल्यात्
काम्यनिषिद्धादिप्रवृत्त्या कर्मानुष्ठायी मोक्षशास्त्रानधिकारी एकः अपर
ग्नयः प्राक्कृतसुकृतवशात्किंचिन्न्यूनरागादिदोषः सर्वाणि क
र्मेणि क्रमशः क्वचिन्निषिद्धानि काम्यानि च परित्यज्य नित्यानि नैमि
त्तिककर्माणि फलाभिसंधित्यागेन सत्त्वशुद्ध्यर्थमनुतिष्ठन् गौणसं
न्यासी मोक्षशास्त्राधिकारी द्वितीयः ततो नित्यनैमित्तिककर्मानुष्ठाने
नांतःकरणशुद्ध्या समुत्पन्नविविदिषः श्रवणादिना वेदनेमोक्षसा
धनं संपिपादयिषुः सर्वाणि कर्माणि विधितः परित्यज्य ब्रह्मनिष्ठं गुरु
मुपसर्पन् विविदिषासंन्यासी समाख्यायते तृतीयः तत्र प्रथमः संसारे ए
व ग्रहयोर्वेन इति प्रसन्नस्यात्मन्यपि निर्णीतं षष्ठे श्रुतस्य संसारित्वं
णसामग्र्याः सत्त्वात् तत्कस्य विज्ञानानन्तरणे कस्य विज्ञानात् यत्
णमिति विशेषः विक्षिप्तस्य संसारे फलं कार
हौ पदार्थौ सविनावस्थित स्लोके। संसारकारणाभावान्न तत्पवके वल्प मिति

कर्मणामसंभवात् अतिरिक्त इह मन्ना राकस्य नसामर्थ्यमाविवेकेन
...नस्य कर्मत्यागासंभवे काह्नः कर्मनाशः प्रणश्यतीति
दोषाणां ... सर्वसंन्यासिनां च ... श्लोकैः प्रतिपादयति तत्र सर्वसंन्यासी।

नतु कर्मफलत्यागितया देहाभिमानिनः गौणसंन्यासिनोऽज्ञानस्य न
स्यापि च कर्मणः १ देहाभिमानस्य न्यस्य मुख्यसंन्यासिनस्तथा त्यागित्व
मुभयत्रापि तत्त्वमस्तीति गम्यते २ तयोः फलविशेषः कोऽयं तल्लाभेन
गौणेन त्यक्तस्याप्यस्य फलाभे मुख्येन तु मिति चेत्तुणु ३ कर्मनिष्ठापि
ते कर्मफलत्यागितयापि च गौणसंन्यासिनो विनष्टहेः प्रागेव कालतः ४
स्तानां प्राक्कृतस्यास्ति शरीरग्रहणे फले मायिकं फलत्रयं भावनाद
र्शनेन लयमेति यत् ५ प्रकृते कर्मणस्त्रैतिज्ञानाभिप्रायतः स्वते श्रु
त्यादि विविधं तत्त्यागात्कथमेकस्य कर्मणः ६ कर्मणस्त्रिविधत्वात्त्रि
विधं फलमीरितं पापस्यानिष्टमाश्रीचिं तिर्यगादिकलक्षणे ७ देवा
दिलक्षणं चेष्टं पुण्यस्य फलमीरितं मिश्रस्य पुण्यपापात्मकस्य गलस्य न
लक्षणे ८ इष्टानिष्टं तथा प्रोक्तं फलं हेयतयाखिलं गौणसंन्यासिनामेव
वे देहपातादनंतरं ९ देहांतरस्य ग्रहणमावश्यकमितीरितं मुख्यसं
न्यासिनां ब्रह्मसाक्षात्कारेण न हि दो १० अविद्यादिनिवृत्तौ स्यात्कैव
ल्यात्मकनिर्वृतिः न देहग्रहणं तेषां क्वचित्कालिकयवा दिशि ११ श्रुति
दृष्टमनिष्टं मिश्रं च त्रिविधं कर्मणः फलं ज्ञानेनाज्ञानबाधे हि तत्कार्याणां च
कर्मणां १२ उच्छिन्नत्वान्न देहस्य ग्रहणं संभवेत्कथं ज्ञानीयंते वास्य कर्मा
णीत्यवेक्षणात्स्मृतीरितं १३ गौणसंन्यासिनोऽतेन संसारो हरिणोरितः
सत्वसंन्यासिनां मोक्षो विशेषो यं फलेनयोः १४ अयमत्राशयस्त्वविक्ष
ढः सर्वात्मकस्य विवेचनात् नित्यशुद्धपरानंदब्रह्मगद्वैतवस्तुनः १५
साक्षात्कारेण वेदान्तवाक्यजन्येन भास्वता स्वनिश्चितस्वभावेन तत्त्वज्ञाने
न सर्वथा १६ अज्ञानस्याति बाधेन कार्यकर्तृत्वबाधनात् यः परमा
र्थसंन्यासी कर्मोच्छेदात्स निर्मलः १७ नाविद्याकामकर्मादि तिमितं
त्रिविधं फलं शरीरग्रहणाभ्यां न भवत्येव सर्वथा १८ कारणोच्छेदतः
सर्वभ्रमाणां विनिवृत्तितः यस्त्वज्ञो देहभृत्सोऽयं त्रिविधो भवतीरितो
१९ रागादिदोषप्राबल्यात्यथेष्टाचारसंश्रवः कर्म काम्यं निषिद्धादि स
माचरति मूढधीः २० एकोऽयमेव शास्त्रीयो नयि कार्यति पामरः श्रद्ध
याकृतेः पुण्यः किंचित्क्षीणमलः शमात् २१ त्वकाम्यं निषिद्धं च
नित्यनैमित्तिकं शुभं फलाभिसंधिसंत्यागात्सत्वशुद्ध्यै समाचरेत् २२

सचाय गौणसंन्यासी मोक्षशास्त्रेऽधिकारवान् अन्योऽपीशुद्धिमासाद्य श्र
वणाधिकारवान् ॥ २३ विवेकी वल्लविकार्गप्रवृत्तो यस्तृतीयकः त
त्रायस्य महानर्थभाक्त्वमवदत्स्मे वहि २४ द्वितीयस्याप्यनिष्टादिफले
त्रिविधं स्मृते तृतीयस्य तु राघवेष्वाये विनिर्णयः कृतः २५ द्विती
यस्यापि सत्कर्मत्यागेऽन्त्याज्ञनेऽपि नाम्बतं पस्त्यवेदं निर्णीतं च म
नीषिभिः २६ संसारित्वं भवदेहाद्यभिमानेनिरूपितं अविद्याकाम
कर्मादिसामग्रीसम्भवादिति २७ सा च संसारितात्मानां गुणात्कस्यचि
द्भवेत् कस्यचित्तत्प्रयेव विशेषस्तत्र कोऽपि न २८ न त्वत्तत्स्यात्तु सं
सारकारणाभावतः स्वतः सिद्धे कैवल्यमेवास्तीत्यत्रार्थे स्मृति विनां तु
भी २९ तावत्कर्मफलेनृणाम विरतं संसारवारानिधि अविद्यानिष्टवि
ध्रजन्मनिवृत्तिंभोग्याकुलानां भवेत् यावत्सज्जनवैचरीकनिवहस्था
ध्येस्मैकास्पदे श्रीमत्कृष्णपदांबुजेन मनसो हन्तीरनाथस्त्वदी ३ ॥ १२

नीलकंठी टीका १२ ॥

एवंभूतस्य त्यागस्य फलमाह अनिष्टमिति अनिष्टं नरकतिर्यगादि
रूपं इष्टं देवत्वादिरूपं मिश्रं मानुषभावरूपमिति कर्मणः कर्मजातीयस्य
फलं त्रिविधं प्रेत्य मरणानन्तरं अत्यागिनां पूर्वोक्तमुख्यसंन्यासहीनानां भ
वति मुख्यसंन्यासिनां तु न क्वचिद्भवति तेषां कर्तृत्वाभिमानाभा
वात् अतो गौणसंन्यासिनामेवायं कर्मत्यागपरस्तादुः तेषां च आ
ख्यानं कार्यमित्येव यत्कर्म तत्र अन्यथा संन्यासिनां गौणसंन्यासिनां च
विशेषानस्यात् नचैवं मुख्यसंन्यासिनो गौणसंन्यासिनो चाविशेषाप
त्तिरिति वाच्यं उभयेषामन्तरकर्माभावसाम्येऽपि पूर्वकर्मदाह्यदाहक
र्मभिरेव भविष्यति आपस्तंबोक्तामतिदर्शनेन योगभ्रष्टानिवृत्तात
रीयकं वा नन्ततस्य अथात्मफलस्वर्गादिभवितमर्हत्यतदिष्टत्वादिति
१२ ॥

आनंदी टीका १२

कर्मफलत्यागिनं स्तौति अनिष्टं नरकादि इष्टं स्वर्गादि मिश्रं मा
नुषकम् अत्यागिनां कर्मफलाभिसंधायिनां प्रेत्य जन्मान्तरे भव
ति न तु संन्यासिनां कर्मफलत्यागिनां कश्चित्स्वर्गनरकादौ पतन्त
वति तेहि काम्यं न कुर्वन्ति नापि प्रतिषिद्धं यदि कदाचिन्निषिद्धमा
पतितं तदापीन्द्रियाणीन्द्रियार्थेषु वर्तन्ते नाहमेषां कर्तेत्यहंकाराय

गमादपनीतप्रायमित्युक्तं वक्ष्यतः १२ ॥

यथोक्तत्यागिविपरीतवृत्तीनाम **रामकंठीटीका** ४ नुष्ठातृणां फलमाह ॥

ये यथाप्रतिपादितपारमार्थिकत्यागरहितास्तेषामत्यागिनां प्रेत्य पर
लोके त्रिविधं फलमनिष्टमित्यादि तत्रानिष्टमभिप्रेतरहितं दुःखात्म
कं यत्तामसविभैस्तामसश्रद्धैः कर्तृभिरनुष्ठितात्तामसात्कर्मण उपजा
तं सन्नरकतिर्यग्योन्यादौ लब्धोपपत्तिभिस्तैर्भुज्यते इष्टमभिप्रेतं सु
खात्मकं यद्यज्ञोल्लेशानुगतसत्त्वप्रधानविभैः स्वर्गादिफलभूमिषूत्ता
हकैः श्रद्धैर्यथाविधिविहितात्कर्मण उत्पन्नं तत्पुरुषैरुपभुज्यते तथा
मिश्रं सुखदुःखात्मकं यद्रजःप्रधानविभैस्तादृकश्रद्धैस्तत्कर्तृभि
रनुष्ठितात्कर्मण उपजातं यत्कर्मभूमौ मनुष्ययोनिगतैस्तैस्तैरुप
भुज्यत इत्येवं त्रिविधं कर्मणः फलं ज्ञानमप्यन्यसंसारिपुरुषविषयं
संन्यासिनां तु यथोक्तसात्विकत्यागवतां ज्ञानविज्ञाननिस्नातमन
सां कर्मयोगिनां तत्रोपपद्यते तत्तस्त्यागिनः कुशलाकुशलकर्मनी
रागद्वेषतयानुतिष्ठन्तीति पूर्वेणासंबंधः [illegible]
[illegible] १२

फलस्यैत्रैविध्यमाह ॥ **लासिकी टीका**

अनिष्टमनभिप्रेतं दुःखात्मकं नारकित्वादि इष्टमभिमतं सुखा
त्मकं देवत्वादि मिश्रं सुखदुःखात्मकं मनुष्यत्वादि इत्येवं पापस्य
पुण्यस्योभयमिश्रस्य च कर्मणो यत्फलं प्रसिद्धं तत्सर्वमत्यागिनां
कर्मानुष्ठातृणां तत्फलात्यागिनां प्रेत्य परलोके भवति संन्यासि
नां कर्म कुर्वतामपि फलत्यागिनां क्वचिदपि इह वा परत्र वा न भव
ति अभिसंधिनैव कर्मणां फलावहत्वात् ॥ [illegible]
[illegible] १२

पंचोलीटीका

एवंभूतस्य कर्मफलत्यागस्य फलमाह अनिष्टमिति अनिष्टं नरकं

गी॰
टी॰
अ॰

तिर्यगादिलक्षणं इष्टं देवादिलक्षणं मिश्रं मनुष्यलक्षणं एवं त्रिविधं त्रिप्रकारं कर्मफलं अत्यागिनां असंन्यासिनां कर्मिणाम परमार्थसंन्यासिनां प्रेत्य शरीरपातादूर्ध्वं एवंविधं नैव भवति एवं संन्यासिनां केवलज्ञाननिष्ठानां कर्मफलं किञ्चिदपि न भवति १२

59

रणवीर समिद्धोपिनी

त्यागस्य फलमाहानिष्टमिति अनिष्टमनभिप्रेतं दुःखप्रायं यत्तामसैर्नारकैस्तिर्यग्योन्यभिजातैश्चोपभुज्यते इष्टमभिप्रीतं सुखप्रायं यत्स्वर्गादौ सात्विकैरुपभुज्यते मिश्रं सुखदुःखप्रायं यद्राजसैर्मनुष्यलोके उपभुज्यते त्रयस्य कर्मणो यज्ञादेस्त्रिप्रकारं फलं तत्तच्छ्रद्धानुरूपं तच्च संगफलाभिसंधिना कर्माण्याचरतामत्यागिनां प्रेत्य परत्र भवति संन्यासिनां तु प्रोक्तविधिइष्टरूपतया विहितकर्माण्यनुतिष्ठतां न भवति तादृशफलाभावेन च महामप्रामित्वलक्षणा मुक्तिस्तेषां भवतीति भावः १२॥

मधुभाष्य

अनिष्टमित्यादिना पुनः संन्यासं प्रपंचयिष्यं कर्मकार्यत्यागान्याह १२॥

अब पूर्वोक्त त्यागका फल कहते हैं कि अनिष्ट कहे नरक औ इष्ट कहे देवत्व तथा मिश्र कहे मनुष्यत्व ये ३ पाप पुन्य मिले हुये कर्मों के फल हैं सो काम्य कर्म करनेवालों को देहान्त होने पर प्राप्त होते हैं औ कि सकाम मनुष्यों को पाप पुन्य औ दोनो से मिले त्रिविध कर्म सम्भवे हैं परन्तु ये कर्म संन्यासी पुरुष को किसी तरह सम्भव नहीं होते और संन्यासी इस प्रसंग मे कर्मफल का त्यागी ही लेते हैं यहांपर भाषा सुनो कि अनाश्रितः कर्मफलं कार्यं कर्म करोति यः स संन्यासी च योगी च इति ६ अध्यायके प्रथमश्लोक से लेकर कहा है और कर्मफल त्यागी पुरुष को सब जगह संन्यासी कहा इससे यह फल त्यागी सात्विक मनुष्य को पाप के असंभव होने से और भगवान को अर्पण करनेसे पुन्यफलके भी त्याग होने से त्रिविध जो कर्मफल वे किसी प्रकार से भी नहीं होते हैं १२

दोहा

प्रिय अप्रिय मिश्रित त्रिविध कर्मनि को फल होय अत्या-
गी को प्रिय होत हैं संन्यासी को नहि सोय १२ ॥

60

पंचैतानि महाबाहो कारणानि निबोध मे
सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणां १३

शांकरभाष्य टीका १ ॥

अतः परमार्थदर्शिनएवाशेषकर्मसंन्यासित्वं संभवत्यविद्याध्या।
रोपितत्वादात्मनि क्रियाकारकफलानां नत्वज्ञस्याधिष्ठानादीनि
क्रियाकर्तृणि कारकाण्यात्मत्वेन पश्यतोऽशेषकर्मसंन्यासः संभव
ति तदेतदुत्तरैः श्लोकैर्दर्शयति पंचेति पंच इमानि वक्ष्यमाणानि
हे महाबाहो कारणानि निर्वर्त्तकानि निबोध मे मम इत्युत्तरत्र चे
तःसमाधानार्थं वस्तुवैषम्यप्रदर्शनार्थं च तानि च कारणानि ज्ञा
तव्यतया स्तौति सांख्ये ज्ञातव्याः पदार्थाः संख्यायन्ते यस्मिन् शास्त्रे
तत् सांख्यं वेदान्तः कृतान्त इति तस्यैव विशेषणं कृतमिति कर्मो
च्यते तस्यान्तः परिसमाप्तिर्यत्र स कृतान्तः कर्मान्तः इत्येतत् या।
वानर्थ उदपाने सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत इत्यात्म।
ज्ञाने संजाते सर्वकर्मणां निवृत्तिं दर्शयति अतस्तस्मिन्नात्मज्ञाना
र्थे सांख्ये कृतांते वेदान्ते प्रोक्तानि कथितानि सिद्धये निष्पत्त्यर्थं सर्वक
र्मणां १३ ॥

आनंदगिरिकृत टीका २ ॥

ननु अपरमार्थसंन्यासवदविशेषादज्ञानां परमार्थसंन्यासोऽपि किं
न स्यात्त्यागस्य सुकरत्वात्तत्राह अतः परमार्थेति तस्य सम्यग्दर्श
नादविद्यानिवृत्तौ तदारोपितक्रियाकारकादिनिवृत्तेरिति हेत्वर्थः
विद्यावतः सर्वकर्मसंन्यासित्वसंभावनामुक्त्वा एवकारव्यावर्त्यं द
र्शयति नत्विति अविदुषोऽशेषकर्मणां तद्धेतूनां च रागादीनां त्या
गायोगे कारकेष्वधिष्ठानादिष्वात्मदर्शने हेतुमाह क्रियेति कथमधि
ष्ठानादीनां क्रियाकर्तृत्वं कथं वा विदुषस्तेष्वात्मत्वधीरित्याशंक्या
नंतरश्लोकचतुष्टयस्य तात्पर्यमाह तदेतदिति कर्मकारणत्वेनाधिष्ठा
नादीनामप्रामाणिकत्वाशंकामादावुद्धरति पंचेति उत्तरत्वेनाधिष्ठा।
नादिषु वक्ष्यमाणेष्वित्यर्थः वस्तुनो तेषामेव वैषम्यं निदिदर्शयिषि

श्री॰
गी॰टी॰
अ॰

61

ते नहिचेतःसमाधानादृते ज्ञाने शक्ते तेन सांख्यशब्दः सु
न्पादयति ज्ञातव्येति आत्मा त्वंपदार्थस्तत्पदार्थो ब्रह्म तयोरैक
धीसङ्ख्यायोगिनश्च श्रवणादयः पदार्थास्ते संख्यायन्ते सुज्ञाय
न्ते कृतान्तशब्दस्य वेदान्तविषयत्वं विभजते कृतमित्यादिना
वेदान्तस्य तत्वर्थोद्वारा कर्मावसानभूमित्वं वाक्योपक्रमात्वकु
त्य दर्शयति यावानिति उदपाने कूपादौ यावानर्थः स्नानादिः
तावानर्थः समृद्धे सम्पद्यते प्रतोयथा कूपादिकृते कार्यं सर्व
सम्बद्धेनान्तर्भवति तथा सर्वेषु वेदेषु कर्मार्थेषु यावत् फलं ताव
त् ज्ञानवतो ब्राह्मणस्य ज्ञानेन्तर्भवति ज्ञानेप्राप्तस्य कृते व्या
नवशेषादित्यर्थः तत्रैव वाक्यान्तरमनुक्रामति सर्वमिति उद
हृतवाक्यार्थोस्तावर्थमाह प्राप्नोतीति आत्मज्ञाने सति सर्वकर्म
तिहृत्वापि कथं वेदान्तस्य कृतान्तत्वमित्याशंक्याह श्रुतरिति
तानि महत्वततोनिबोधेति पूर्वेण संबंधः १३ ॥

स्वामिकृतटीका ३ ॥

तत्रकर्मकुर्वतः कर्मफलं कथं न भवेदित्याशंक्यासंगत्यागिनो नि
रहंकारस्य ततः कर्मफलेन लेपो नास्तीत्युपपादयितुमाह पंचैता
नीति पंचभिः सर्वकर्मणां सिद्धये निष्पत्तये इमानि वक्ष्यमाणानि पंच
कारणानि मे वचनाद्विबोध जानीहि आत्मनः कर्तृत्वाभिमाननिवृ
त्त्यर्थं अवश्यमपेक्षितानि ज्ञातव्यानीत्येवं तेषां स्तुत्यर्थमाह सम्यक्ख्याय
ते ज्ञायते परमात्मानेनेति सांख्यं कृतं कर्म तस्यान्तः समाप्तिरस्मि
न्निति कृतान्तः तस्मिन्वेदान्तसिद्धान्त इत्यर्थः यद्वा संख्यायन्ते गण्यन्ते
तत्वान्यस्मिन्निति सांख्यं कृतस्तत्वनिर्णयो यस्मिन् सांख्यशास्त्रमेव त
स्मिन्प्रोक्तानि अतः सम्यग्विबोधेत्यर्थः १३ ॥

पैशाचभाष्यटीका ४ ॥

तानि कानीति प्रोच्यते परमार्थसंन्यासिनां केवलज्ञाननिष्ठानां व
कृतसर्वकर्मसंन्यासानां भवतीत्युक्तं तेन संबंध इति कर्मानुष्ठा
नेन फलाभिसंधिरहितेन प्राप्ततत्वदृष्टीनां सकलकर्मसंन्यासो वि
धीयते १३ ॥

रामानुजभाष्यटीका ५ ॥

पंचेति सांख्यबुद्धिः सांख्ये कृतांते यथावस्थितविषयया वैदिका
बुद्ध्यानुसंहितनिर्णये सर्वकर्मणां सिद्धये प्रोक्तानि पंचेमानि का
रणानि तानि निबोध मे मम सकाशात् अनुसंधत्स्व वैदिकी।
हि बुद्धिः शरीरेंद्रियप्राणजीवात्मोपकरणं परमात्मानमेव का
रणमवधारयति यथात्मनि तिष्ठन्नात्मनो तरो यमात्मा न वे
द यस्यात्मा शरीरं य आत्मानमंतरो यमयति स त आत्मांतर्याम्य
मृतः अंतःप्रविष्टः शास्ता जनानां सर्वात्मा इत्यादिषु

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं १३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपादी टीका ७ ॥

ननु भजिक्रियायाः कर्तृत्वेन बुद्धिमिभवतीत्यत्र भवेत् कर्म कर्तृत्वेन फले।
कथं न भवेदित्याशंक्य संगत्यागिनो निरहंकारस्य सतः कर्मले
पो नास्तीत्युपपादयितुमाह पंचैतानीति सर्वकर्मणां सिद्ध
ये निष्पत्तये एतानि वक्ष्यमाणानि पंच कारणानि मे मत्तः सकाशा
न्निबोध जानीहि आत्मनः कर्तृत्वाभिमाननिवृत्त्यर्थमेतानि ज्ञातव्या
नीत्येवं तेषां स्तुत्यर्थमाह सांख्ये इति किंभूतानि सांख्ये कृतांते प्रो
क्तानि यद्वा सम्यक् ख्यायते ज्ञायते परमात्मानेनेति सांख्यं सम्यक्ख्या
यते न परिगम्यते तेन तत्त्वानि यस्मिन्निति सांख्ये कृतांतः सिद्धांतस्तस्मि
न्वेदांतसिद्धांते इत्यर्थः १३ ॥

वनमाली टीका ८ ॥

न केवलं काम्यकर्मत्यागः संन्यासः किं त्वेतेषां मिश्रितदेहेंद्रिया
दीनां कर्मोपायतया नाहं कर्मकर्तेत्याद्यभिमानत्यागश्च संन्यास इति
प्रागुक्तं संन्यासं प्रपंचयितुमात्मनो कर्तृत्वे कथं क्रियानिष्पत्तिः
कर्तृत्वे च कथमभिमानत्याग इति शंकानिराकरणायाह पंचेति
एतानि वक्ष्यमाणानि पंच सर्वकर्मणां सिद्धये निष्पत्तये कारणानि
हे महाबाहो मे मम परमात्मनस्तु वचनान्निबोध बोधाय सावधानो
भव किमेनात्र प्रमाणकांक्षावत्वहवेनाह्नेयानिनेत्याह सांख्ये।
कृतांते प्रोक्तानि निरतिशयपुरुषार्थं ज्ञानं ख्यानि जीवेश्वरस्वरूपा
नानिश्च वर्णादयस्तु पदार्थाः संख्यायंते प्रतिपाद्यंते यस्मिंस्त

श्री·
गी·टी·
प्र·

62

न्ति सांख्ये वेदांतशास्त्रे न त्वात्मप्रतिपादके तस्मिन् किमर्थं
लोकसिद्धानि च कर्मकारणानि पंच प्रतिपाद्यंते इत्यतः शास्त्र
विशेषणं कृतांत इति कृतमिति कर्मोच्यते तस्यांतः परिसमाप्ति
स्तत्वज्ञानोत्पत्त्या यत्र तस्मिन् कृतांते शास्त्रे आत्मनोऽकर्तृत्वज्ञानाप
प्रोक्तानि यद्वा सांख्ये कापिलप्रोक्ते सेश्वरे कृतांते सिद्धांते प्रो
क्तानीत्यर्थः १३ ॥

ऊ हनवैजयंती टीका ८ ॥

तत्र नित्यहोत्रदर्शपूर्णमासज्योतिष्टोमादीनि महायज्ञादीनि च क
र्माणि उक्तवेदांतत्वात् फलानि कृतेन स्वर्गीयाशां कस्मास्मिन्नयोजक
त्व निश्चयेन च तेषां तानि न भवंतीत्यादि रूपं च भिः पंचैतानीति हे
महाबाहो मामक्त्स्कि पुरुषलक्षणा वक्रिमतेन यच्छन्येषां स
र्वकर्मसिद्धिहेतुभूतानि पंचैतानि दुर्बोधानि स्वस्त्यापितवम
हाबाहुत्वान्नबोधानि भवंतीति सूचितं सर्वकर्मणां सर्वेषां यज्ञ
तपोदानादीनां कर्मणां सिद्धये निष्पत्तये एतानि वक्ष्यमाणानीमा
किंप्रमाणमिति चेत्तत्राह सांख्ये इति कृतांते कृतांतः नो निर्णयो
यस्मिंस्तस्मिन् यद्यात्मनि तिष्ठन्नात्मनो यदेयमात्मानं वेदयद
शास्त्रं तन्नामिमादिना परमात्मनः सर्वविदश्चिदस्तन्नियम
त्वं सर्वकर्महेतुत्वं प्रवर्तकत्वं सर्वात्मत्वं चेति निर्णयकारिणीम
र्थः सांख्ये सम्यक् ख्यायते ज्ञायते परमात्मानेन सम्यक् ख्यायते ग
ण्यते तन्नान्यस्मिंस्त्रिनिसाऽत्र्यान्तरेव सा चिदचिदीश्वरतत्वप्रति
पादके वेदांतशास्त्रे तस्मिन् प्रोक्तानि सांख्यविद्भिरिति शेषः तस्य
सम्यक् निबोधेत्यर्थः १३ ॥

+ तत्रात्मज्ञानरहितस्य संसारिणो हेतुः कर्मत्यागः संभवत्युक्तः न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषत इति तत्रात्मज्ञस्य कर्मत्यागासंभवे को हेतुः कर्महेतावधिष्ठानादिपंचके तादात्म्याभिमान इतीममर्थं चतुर्भिः श्लोकैः प्रपंचयति तत्र प्रथमेनाधिष्ठानादीनि पंच वेदांतप्रमाणसिद्धानीति यत्नार्थमवधानं ख्यापनीयमाह ॥

मधुसूदनी टीका १० ॥

+इमानि वक्ष्यमाणानि पंच सर्वकर्मणां सिद्धये निष्पत्तये का
रणानि निर्वर्तकानि हे महाबाहो मे मम परमाप्तस्य सर्वज्ञस्य व
चनान्निबोध बोद्धुं सावधानो भव न त्वेतद्दुर्ज्ञानानि अन
वहितचेतसा शक्यानि ज्ञातुमिति चेतः सावधानविधानेन नाति
स्तौति महाबाहो ते न च सन्त्युक्तपवर्गकोटानमिति सूचयति

स्तुत्यर्थमेव किमेतावताप्रामाण्यात्कामेव तत्र वचनादेतानि तेषां
हेतोरिहोक्तानीति प्रोक्तानि निरतिशयपुरुषार्थस्य स्यादर्थस्यैवानर्थनि
वृत्त्यर्थं च ज्ञातव्यानि जीवब्रह्मणोरैक्यं नहि योगपद्योमितस्वव
णादयः पदार्थाः सेद्धांगतेष्वसांख्येतेः स्मिन्निति सांख्यवेदान्तशा।
स्त्रे तस्मिन् शास्त्रवस्तुमात्रप्रतिपादके किमर्थमनात्मभूतानामव
स्तूनि लोकप्रसिद्धानि च कर्मकारणानि पंचप्रतिपाद्यन्त इत्यतः शा
स्त्रविशेषणं कृतान्तेति कृतमिति कर्मोच्यते तस्यान्तः परिसमाप्ति
र्यत्र स प्रोक्तमतः शास्त्रविशेषणं कृतान्ते इति कृतमिति कर्मो
च्यते तस्यान्तः परिसमाप्तिर्यत्र ज्ञानेऽसौ यत्र तस्मिन्नुक्तानि तेषां
स्वरूपे कानि प्रसिद्धान्येव लोके अनात्मभूतान्येवात्मतया मिथ्या
ज्ञानारोपेण गृहीतान्यात्मतत्त्वज्ञानेन बाध्यसिद्ध्यर्थे हेयत्वेनो
क्तानि यदा हि प्रपंचमपवर्गं कर्म आत्मन्यविद्याध्यारोपितमिति च
नेतदात्मज्ञानेन तद्बाध्यात्कर्मणोऽन्तः कृतो भवति अतः शास्त्रं
नः कर्मासंबन्धप्रतिपादनात्मभूतान्येव पंच कर्मकारणानि वेदा
न्तशास्त्रे मायाकल्पितानामनात्मनो नीतिनां हेतात्ममात्रतामयैदृशा
नि तेषां तद्गतत्वेनैवेतत्प्रतिपादनात् इहापि च सर्वकर्मा तत्त्वे।
ज्ञानस्य प्रतिपादिते सर्वकर्माखिलं पार्थ ज्ञाने परिसमाप्यते इति
तस्मात् ज्ञानशास्त्रस्य कर्मान्तत्वमुपपन्नं अधिष्ठानादीनि कर्म।
[illegible]
कानि तानीत्यपेक्षायां तान्स्वरूपमाह अधिष्ठानमिति येन १३ ॥

सदानंदी टीका ११ ॥

तत्रात्मज्ञाननिष्ठस्यासत्तेस्संसारनिवृत्तिकारणं प्रोक्तं सर्वकर्मणां त्यागा
त्से भवो हरिणा स्वयं १ नहि देहभृतेऽतोऽदानीं तत्सर्वदेहिनः २
च्यते कर्मणां त्यागात् संभवे संसृतेस्तथा तदात्मायाध्यासकोऽहेतुरधिष्ठानादि
पंचकं अमुंपंचयत्नार्थं श्लोके सुतरां भीरीश्वरः ३ इमानि कारणा
णानि पंच निर्वर्तकानि च सर्वेषां कर्मणां चैव निबोधार्थं महाभुज
४ ममैषा रस्य वचनाद्धेतुं भव समाहितः समाधानेऽविनाज्ञातुं त
च्छक्यं तस्मात्त्वमपि ५ सर्वानर्थनिवृत्त्यर्थं ज्ञातव्यानि प्रमाणतः जी
वब्रह्मणोरैक्यं नहि ज्ञानोपयोगिनः ६ प्रपंचकार्या पदार्थाः स्युः
सांख्ये तत्त्वशास्त्रके तस्मात्प्रोक्तानामवेदान्तशास्त्रे तस्मिन्कृतान्तके ७

कृतमित्युक्ते कर्मणि तस्मात्तत्त्वबोधतः संवादो जायते येन स कृतो नास्ति न चैव च ८ शोकामनात्मभूतानि भोग्यात्मत्वेन लौकिकैः गृहीतानामात्मबोधेन बाधसिद्ध्यर्थमेव हि ९ यतो हेय तयोः ख्यातिज्ञानध्यानीमतो पिया भ्रमधर्मोस्ति कर्मेन्न्यायया प्रत्यगात्मनि १० आरोपितमतो बाधात्कर्मणोतः कृतो भवेत् अत एवात्मनः कर्मास्वेव ध्यानसिद्धये ११ अविद्यारोपितानां देहेन्द्रियादिककर्मणां अनूदितास्ते वेदान्तशास्त्रे हेतुबोधके १२ श्रोत्रेण मातृतां मत्वा हानिर्नैव स्मृतो यतः तदंगत्वेन तेषां च प्रतिपादनमागमे १३ फलवत्सन्निधौ यत्र जरद्गमफलं श्रुतं इति न्यायेन चैतेषामेवगत्वे बलबोधने १४। १३ ॥

नीलकंठी टीका १३ ॥

ननु आत्मनः कर्मालेपनिमित्तं यदकर्तृत्वं तत्संस्थानेन तत्किं योऽधिदनिरस्मादिवदाहार्यमुत वास्तवमेव स द्विविधमप्यकर्तृत्वे नाहमिति निशास्वदृष्टाकर्तृत्वं तिरोधानेनाकर्तृत्वमेव भाव्यते इत्याशंक्याह स्फीत्वेन दृष्टायां योषिति दृष्टत्वादर्शनेनेव कल्पितेनाकर्तृत्वेन वास्तवस्य कर्मालेपस्यासंभवादाहार्यनिरस्याहितीयमुपपादयिष्यन्पीठिकामारचयति पंचेति हे महाबाहो सर्वकर्मणां सिद्धये इमानि वक्ष्यमाणानि पंच कारणानि निबोधेति कानि मे मद्वचनान्निबोध बुध्यस्व स्ववचने विश्वासोत्पादनार्थं कारणानामसमूलत्वमाह सांख्ये कृतान्ते प्रोक्तानीति सम्यग्विविच्य ख्यायते प्रकटीक्रियते तत्त्वान्यात्मानात्मपदार्थरूपाणि यस्मिंस्तत्सांख्यं वेदान्तशास्त्रं तदेव विशिनष्टि कृतान्ते कृतस्य कर्मणोऽन्तः परिसमाप्तिर्यस्मिन् सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते इत्यात्मज्ञाने सति सर्वकर्मणां समाप्तिदर्शनात् तस्मिन्सांख्ये कृतान्ते प्रोक्तानि १३ ॥

आनंदी टीका १३

तदेवं देहभृतामपरिहरणीयस्य नियतस्य कर्मणः सिद्धिकारणान्याह सांख्ये सम्यक् ख्यायन्ते विशेषैः कथ्यन्ते महाभूतादिविकृतिप्रकृतिपुरुषकालपरमेश्वराख्याः पंचपदार्था यस्मिंस्तस्मिन्सांख्यस्य मोक्षशास्त्रस्य सिद्धान्ते १३ ॥

११

+अथात्यागिनस्त्रिविधकर्मफलेनयुज्यन्तेनतुत्यागिनइत्यत्रहेतुंक्रमेणप्रतिपादयितुमाह॥

रामकंठीटीका १३॥

+इहेमानिवक्ष्यमाणानिकारणानिनिमित्तानिसर्वकर्मणांसकल
शरीरसंबंधिनांमनोवाक्कायनिर्वर्त्यानामशेषक्रियाविशेषा
णांकृतान्तेकृतनिष्ठेसांख्येनिश्चयशास्त्रेप्रोक्तानिप्रतिपादिता
निनिबोधनिबुध्यस्व [illegible] १३॥

+नतुकर्मकुर्वतःकर्मफलंकथंनभवेदित्याशंक्यासंग
+त्यागिनोनिरहंकारस्यसर्वकर्मफलेनलेपोनास्तीत्यु
पपादयतुमाह॥

ला सिकी [illegible] टीका

+कृतान्तेकृतनिश्चयेसांख्यशास्त्रेसर्वेषांमनोवाक्कायनिर्व
र्त्यानांकर्मणांसिद्धयेनिष्पत्तयेप्रोक्तानिप्रतिपादितानीमानि
वक्ष्यमाणानिपंचकारणानिहेतून् हेमहाबाहोमेवचनात्त्रिबो
धावधारय [illegible] १३

पैठोलीटीका

कर्मफलत्यागिनःशुद्धान्तःकरणस्यपरमार्थदर्शिनःअधिष्ठा
नादीनिश्चनात्मत्वेनजानतःकर्मलेपोनास्तीत्याह पंचैतानीति
हेमहाबाहोसर्वकर्मणोसिद्धयेनिष्पत्तयेसांख्येवेदान्तेकृतान्ते
कर्मसमाप्तिलक्षणेप्रोक्तानिपंचकारणानिमेमत्तः तावत्त्रिबो
धजानीहि १३

रसवीरसमिद्बोधिनी

उक्तेऽर्थेहेतुंक्रमेणप्रतिपादयितुमाह पंचेमानीति इमानिवक्ष्य
माणानिपंचसंख्याकानिकारणानिसर्वेषांकायवाङ्मनो
निर्वर्त्यानांकर्मणांयथास्वंविहितानांशुद्धादिव्यापाराणांसि
द्धयेनिष्पत्तयेमेमत्तोनिबोधबुध्यस्वकीदृशानिसांख्येकृता
न्तेप्रोक्तानि संख्यंशुद्धंतत्संबंधिसिद्धान्तेप्रतिपादितस्वरूपा
णीत्यर्थः १३॥

मधुभाष्य

पंचेत्यादिना सांख्ये कृतांते तान्नुसिद्धांते अधिष्ठानं दे
हादिः कर्त्ता विभुः साक्षि सर्वकर्तेत्युक्तं जीवस्य वा क
र्तृत्वेप्रमाणमुक्तं करणमिंद्रियादि चेष्टाः क्रियाः
हस्तादिक्रियाभिर्हिंदोमादिकर्माणिजायंते अपातां
देशपि मानसी चेष्टा कारणं पूर्वतनी चेष्टापि संस्कार
कारणत्वेन भवति दैवमदृष्टं तथाचायास्य श्रुतिः
देहोत्र प्राप्येंद्रियाद्याः क्रियाश्च तथादृष्टं पंचमं कर्म
हेतवइति केवलं निष्क्रियं पनं केवलमात्मानं निष्क्रि
यत्वादृष्टेतिहि प्रतिपत्तेव तन्नज्ञानं स्तौति ॥१३॥

भाषा अनुवाद ॥

जो कहो कि कर्मी पुरुष को कर्मफल क्यों नहीयेगे इस शंका पर
संगत्यागी विद्वान मनुष्य को जो कर्मबन्ध नहीं यह सिद्ध करने
की इच्छा से यहां से पांच श्लोक से कहते हैं कि हे महाबाहो कर्मी
की निष्पत्ति मे ये पांच कारण मेरे वचन से जानो और अपने कर्त्त
त्व रूप अभिमान को निवृत्ति के अर्थ इन कारणों को अवश्य जान
ना चाहिये कि इस प्रकार परमात्मा सम्यक रूपसे प्रसिद्ध अर्थात
ज्ञान का विषय होता है इस अर्थका सूचन करनेवाला जो सांख्य भा
वार्थ यह कि तत्व ज्ञान मे प्रकाशमान आत्मा वो यही को सांख्य कह
ते है और ऐसे कर्मो का अन्त कहे समाप्ति इस मे है इस अर्थका सूच
क जो कृतान्त अर्थात सांख्य कृतान्त कहे वेदान्त सिद्धान्त से अथ
वा इस मे सब तत्व गिने हैं इस अर्थ का सूचक सांख्य और इस
तरह से किया है अन्त अर्थात सकल निर्णय इस मे है इस अर्थ
का सूचक जो कृतान्त पद इन दोनो पदार्थो की सांख्य कहते है
सोर सांख्य ने ये पांचो कारण अच्छी प्रकार से कहा है इससे त
म सम्यक प्रकार से जानो १३ ॥

दोहा

कारण पंच महाबाहु मो सों सुण यह सोय करे सांख्य
सिद्धांत में सर्व कर्म सिद्धि कोय १३

65

अधिष्ठानंतथाकर्ताकरणंचपृथग्विधं
विविधाश्चपृथक्चेष्टादैवंचैवात्रपंचमं १४

शांकरभाष्यटीका १ ॥

कानि तानीत्युच्यते अधिष्ठानमिति अधिष्ठानमिछाद्वेषसु
खदुःखज्ञानादीनामभिव्यक्तेराश्रयोधिष्ठानंशरीरंतथाकर्ता
उपाधिलक्षणोभोक्ता करणंच श्रोत्रादिकं शब्दाद्युपलब्धयेपृ
थग्विधं नानाप्रकारं द्वादशसंख्यं विविधाश्च पृथक्चेष्टावाय
वीयाः प्राणापानाद्यादैवंचैव दैवमेवात्रएतेषु चतुः पंचमं पंचा
नां पूरणमादित्यादि चक्षुराद्यनुग्राहकं १४ ॥

आनंदगिरिटीका २ ॥

कर्मणोधिष्ठानादीनि मानमूलत्वात् ज्ञेयानीत्युक्तमिदानीं
प्रश्नपूर्वकं विशेषतस्तानि निर्दिशति कानीत्यादिना प्रतीकमा
दाय व्याकरोति अधिष्ठानमिति उपाधिलक्षणोऽज्ञानादिरुपाधि
लक्षणमस्येति तत्स्वभावोबुद्ध्याद्यनविद्यादौ तदहमस्मीत्यात्मेति यथाप्रत्यय
हितत्वप्रधानस्तदर्थः तत्र कार्यलिंगकमनुमाने सूचयति शब्दा
दीति ज्ञानेंद्रियाणिपंच पंचकर्मेंद्रियाणि मनोबुद्धिश्चेति द्वादशसं
ख्यत्वं चेष्टायाविविधत्वे नानाप्रकारत्वं तदेव स्फुटयति वायवीया इ
ति पृथक्त्वमसंकीर्णत्वं नहि प्राणापानादिचेष्टानां मिथः सं
करोस्ति दैवं विशदयति आदित्यादीति १४ ॥

स्वामिकृतटीका ३

तानेवाह अधिष्ठानमिति अधिष्ठानंशरीरं कर्ताचित्जडग्रंथिरहंकारः
पृथग्विधमनेकप्रकारंकरणंचक्षुःश्रोत्रादि विविधाश्चकार्यतः स्वरू
पतश्च पृथग्भूताश्चेष्टाः प्राणापानादीनांव्यापाराः अत्रैतेषुदैवंपंच
मंकारणं चक्षुराद्यनुग्राहकमादित्यादिसर्वप्रेरकोंतर्यामीवा १४ ॥

पिशाचभाष्यटीका ४ ॥

लौकिकानांतेषांकानिसिद्धयेसर्वकर्मणां अधिष्ठानंशरीरंतथाकर्ता
[illegible]मीश्वरोस्मीतिमन्यते करणंचश्रोत्रादीन्द्रियंपृथग्विधंपंचधाहि।
विधानानाप्रकाराःपृथक्चेष्टाप्राणादिवायूनांप्रवृत्तिप्रकाराणांवर्गे

श्री॰ पंचानां स्मरणं दैवं १४ ॥

गी॰टी॰

अ॰

रामानुजभाष्यटीका ५

इदमाह अधिष्ठानमिति शरीरं वा मनोभिरिति मायेशास्त्रसिद्धे विपरीते प्र
तिषिद्धे वा सर्वस्मिन्कर्मणि शारीरे वाचिके मानसे च पंचैते हेतवः अधि
ष्ठानं शरीरं अधिष्ठीयते जीवात्मनेति महाभूतसंघातं शरीरं अधिष्ठानं
तथा कर्ता जीवात्मा अस्य जीवात्मनो ज्ञातृत्वं कर्तृत्वं च संज्ञानपूर्वक
मीशास्त्रार्थवत्त्वादिति च सूत्रोपपादितं करणं च पृथग्विधं वाक्पाणि
पादादि पंचकं समनस्कं कर्मेंद्रियं पृथग्विधं पृथग्व्यापारं विविधाश्च पृ
थक्चेष्टा चेष्टाशब्देन वायुरभिधीयते तत्तद्वृत्तिर्वा विना शरीरेंद्रिय
धारणं प्राणापानादिभेदभिन्नस्य च वायोः पंचात्मनो विविधाचे
ष्टा विविधा वृत्तिः दैवं चैवात्र पंचमं अत्र कर्महेतुकलापे पंचमं परमा
त्मा अन्तर्यामी कर्मनिष्पत्तौ प्रधानहेतुरित्यर्थः उक्तं हि ॥ सर्वस्य चाहं हृदि सं+

+निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं चेति वक्ष्यति च ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यन्त्रारूढानि माययेति परमात्मायत्तं जीवात्मनः कर्तृत्वं परात्तु तच्छ्रुतेरित्युपपादितं १४॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं १४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७ ॥

तन्याह अधिष्ठानमिति अधिष्ठानं शरीरं कर्ता जडचेतनग्रंथिरहंकारः पृ
थग्विधं बहुविधं करणं चक्षुरादि विविधा नैकप्रकाराश्चेष्टाः प्राणापा
नादिव्यापाराः एतेष्वेव पंचमं दैवं चक्षुरादीनामधिदैवं सूर्यादि सर्वप्रेर
कोन्तर्यामी वा १४ ॥

वनमाली टीका ८ ॥

प्रामाण्येकारणानि पंचात्मनोकर्तृत्वज्ञानार्थं तान्यानि कानीत्य
पेक्षायामाह अधिष्ठानमिति इच्छाद्याश्रयोऽधिष्ठानं देहः तथा कर्ता
परमेश्वरः करणं चेंद्रियं हेदं पृथग्विधं यत्नैर्ज्ञानेंद्रियकर्मेंद्रियादिभेदेन
नानाप्रकारकरणं विविधा नानाप्रकाराः पंचधावायुप्रसिद्धाः पृथग्
संकीर्णाश्चेष्टाः प्राणापानव्यानोदानसमानाः नागकूर्मकृकलदेवद
नयनेनयायोम्निदत्तभूतलावायवः दैवमदृष्टं देहेन्द्रियाणां
क्रियाश्च तथाऽदृष्टं पंचमं हेतुरिति निष्कृतेः यद्वा कर्तृणां स्वार्थवत्त्वात्
नेमारात्कर्ता जीवो दैवमपरोक्षस्य करणाद्देवतभावः यथा चत्वारः
क्रियायां हेतवस्तथा जीवोऽपि न तु केवलो जीवः प्रवर्तक इति भावः १४ ॥

ज्ञमसमेवजयेती टीका ९ ॥

कानि पंच कारणानी मयेतान्येतान्येव गणयति अधिष्ठानमिति
अधिष्ठाने अधिष्ठीयते जीवात्मास्मिन्नधिष्ठीयते जीवात्मनाऽनेने
तिवाऽधिष्ठानं पंचमहाभूतसंघातरूपं शरीरं तथा कर्ता जीवात्मा
कर्ता शास्त्रार्थवत्वादिति सूत्रमस्य स्वाभाविकं कर्तृत्वं वदंति तथाध्या
हाद्यस्तस्मात्तनमपि स्वाभाविकं शास्त्रसिद्धं एष हि द्रष्टा श्रोता रसयिता
घ्राता स्प्रष्टा मन्ता बोद्धा विज्ञाता न्या विज्ञातारमरे केन विजानीयात् ज्ञाना
मेवायं पुरुषः नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वा
नतोऽन्यविमादिकं च पुनः पृथग्विधं कर्मनिष्पत्तौ पृथग्व्यापार
पकं करणं मनसह श्रोत्रादीन्द्रियपंचकं कर्मेन्द्रियपंचकं च पुनः वि
विधाः पृथक्चेष्टाः प्राणादिपंचानां नानागादिपंचानां च नाना विधाभि
न्नभिन्नगणानाः चेष्टा वाह्याभ्यंतरेंद्रियप्रवर्तनकारिणस्तथा।
हिंदिवस्तापवकारिणा प्रकृतिगुणकालादयश्चाग्रहोते अत्रास्मिन्क
र्मनिष्पादके हेतुसमूहे दैवं सर्वस्य प्रेरकं सर्वाराध्यः परब्रह्म तः
सर्वान्तर्यामी ह्यहमेव पंचमो मुख्यो हेतुर्भवतु भवामि सर्वस्य चाहं हृ
दि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च उपक्रमत्वात् ईश्वरः सर्व
भूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि माययेति
वसमागाव नन यच्च कर्मनिष्पादके हेतुत्वं पंचविधे परमात्मैव मुख्यो
हेतुस्तर्हि परेशाधीनकर्ता जीवस्य काष्ठादेरिव कर्मसु नियोज्यत्वात्
पतिस्याद्विधिनिषेधशास्त्राणि च व्यर्थानि स्युः स्वप्रियाप्रवर्तित
निवर्तितव्यशक्तो नियोज्योऽदृष्ट इति चेत् परमात्मनादत्तैस्तैरेवाहि।
तशक्तिभिर्देहेंद्रियादिभिः सहाधारभूतो जीवात्मा परेशाहितशक्ति
कः सत्कर्मसिद्धये स्वयं देहेंद्रियाद्यधिष्ठानं प्रपद्य चारभते पर
मात्मा तु जीवांतःस्थ स्तस्मिन्स्वात्मनि दृढानः संस्तं प्रेरयतीति जी।
वस्थापि विधिपात्रत्वं निहेतुत्वमस्ति प्रवेस्तु कारणाद्रूपानां हेतुरे
रिध्यादिना यथा गृहनगरनरूपाषाणादिप्रचलनादिषु हेतुर्निश्चयेने
नसाध्यापवरूनाहेतवे पिविधिनिषेधभाक्त्वेपि च स्वाम्याज्ञया पार
जपुरसेवमास्वाहेतवे न तद्वेतनजी विनां तथा देहेंद्रियप्राणानां
कर्महेतुत्वे पि परेशाज्ञया जीवस्यैव मुख्यहेतुत्वं विधिनिषेधभक्तु
त्वे चात समर्वमनवद्यम् १४ ॥

+ प्रमाणमहलानि कर्मकारणानि पंचात्मनोऽकर्तृत्वसिद्ध्यर्थं हेयत्वेन ज्ञातव्यानीत्युक्तं कानि
तानीत्यपेक्षायां तत्स्वरूपमाह द्वितीयेन॥

मधुसूदनी टीका १८ ॥

+ इच्छाद्वेषसुखदुःखवेदनाद्यभिव्यक्तेराश्रयोऽधिष्ठानं शरीरं तथा क
र्ता यथाधिष्ठानमनात्माभौतिकं मायाकल्पितं तथायमहंकारस्यादिवत्
तथा कर्ता अहं करोमीत्याद्यभिमानवान् ज्ञानशक्तिप्रधानः पंचीकृत
पंचमहाभूतकार्योऽहंकारः ग्रंथिः करणं बुद्धिर्विज्ञानमित्यादिपर्यायश
ब्दवाच्यः तदाभासाध्यासेनात्मनि कर्तृत्वादिधर्माध्यारोपहेतुरनात्माभौ
तिको मायाकल्पितश्चेति तथाशब्दार्थः स्थूलशरीरस्य लोकायतिके
रात्मत्वेन गृहीतस्याप्यस्य परीक्षकैरनात्मत्वेन निश्चयात् दृष्टान्तेन।
तार्किकादिभिरात्मत्वेन परिगृहीतस्य कर्तुरप्यनात्मत्वनिश्चयः स्व
करः स्पष्टः करणं च श्रोत्रादिशब्दाद्युपलब्धिसाधनं चशब्दस्तथेत्य
नुकर्षणार्थः पृथग्विधं नानाप्रकारं पंचज्ञानेंद्रियाणि मनो बुद्धिश्चेति
द्वादशसंख्यं करणवर्गो मनो बुद्धिश्चेति वृत्तिविशेषौ वृत्तिमांस्त्वहंका
रः कर्तैव चिदाभासस्तु सर्वत्रैवाविशिष्टः विविधा नानाप्रकाराः पृथ
गादशधा वा प्रसिद्धाः चशब्दस्तथेत्यनुकर्षणार्थः पृथगसंकीर्णाः
चेष्टाः [illegible] क्रियारूपाः क्रियाशक्तिप्रधानाः अपंचीकृतपंचमहा
भूतकार्याः क्रियाप्राधान्येन वायवीयत्वेन व्यपदिश्यमानाः प्राणा
पानव्यानोदानसमानाः नागकूर्मकृकरदेवदत्तधनंजयाः सर्वे प्रवृत्ते
तभेदात्तएव पंचवायुभावेन करणस्य कर्तुर्वैविध्यप्राणव्यापारदर्शि
नाद्व्यपदेशाच्चातः करणादत्यन्तभिन्नप्रवृत्त्याः प्राणा इति केचित् क्रिया
शक्तिज्ञानशक्तिमदेकमेव जीवनोपाधिभूतमपंचीकृतपंचमहा
भूतकार्यं क्रियाशक्तिप्राधान्येन प्राण इति ज्ञानशक्तिप्राधान्येन चांतः
करणमिति व्यपदिश्यत इत्यभियुक्ताः स ईक्षांचक्रे कस्मिन्नहमुत्क्रा
न्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राण
मसृजतेति श्रुतावुत्क्रान्त्याद्युपाधित्वं प्राणस्योक्तं तथा सधीः
स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि ध्यायतीव लेलाय
तीवेत्यादिश्रुतावुक्तो बुद्ध्युपाधित्वे तद्भेदव्यपदेशस्तु शक्तिभे।
दात्सुषुप्तौ च ज्ञानशक्तिभागलयेऽपि क्रियाशक्तिभागदर्शनमेकत्वे
ऽपि न विरुद्धमनुभवसिद्धत्वात् दृष्टिसृष्टिनये सर्वलयेऽपि प्राणाद्यव
हारवच्छरीरस्य सुषुप्तौ प्रसिद्धेर्द्वयोरपि परैः कल्पितत्वाच्च तस्माद्भ
यथापि व्यपदेशभेद उपपन्नः दैवं चात्रानुग्राहकं देवताजातं च राहस्त

येत्यनकर्षार्थः अत्रकारणवर्गं पंचमेव संख्याप्रेषणपंचशब्दस्तु।
प्राणशब्देन संबध्यमानः अनात्मत्वभौतिकत्वकल्पितत्वावधारणा
र्थः पंचानामपि तत्रशरीरस्यकर्तृकरणक्रियाधिष्ठानस्यदेवताः पृ
थिवीयत्राप्यऊष्मवायुरन्तस्याग्निर्वागध्यात्मं तेषामा चन्द्रादि।
त्ये दिशः श्रोत्रेमनश्रुद्धेः पृथिवीशरीरमितिक्रतोवागाद्यधिष्ठात्र
गन्धादिभिः सहशरीराधिष्ठानत्वेन पृथिवीपादानात् कर्तव्यहंकारस्या
धिष्ठात्रीदेवता रुद्रः श्रवणादिषु प्रसिद्धः करणानांचाधिष्ठात्र्योदेव
ताः प्रसिद्धाः श्रोत्रत्वक्चक्षूरसनघ्राणानां दिग्वातार्कप्रचेतोश्विनः
वाक्पाणिपादपायूपस्थानां वह्नीन्द्रोपेंद्रमित्रप्रजापतयः मनोत्र
श्रोत्रह्यहंदद्रस्सनीरिति पंचप्राणानां क्रियारूपाणां सद्योजातवाम
देवाः घोरतत्पुरुषेशानाः पुराणप्रसिद्धाः आध्यैदेवमादिग्रादि
चन्द्रायवग्राहकमिमधिष्ठानादिदेवतानामप्युपलक्षणं
पंचभूतेषपंचानांकर्मेन्द्रियैस्तु माहत्मीयेन ॥१॥

सदानंदी टीका ॥ ॥

कालिनानीसपेत्ताद्योनत्स्वरूपमिहोच्यते इच्छाद्वेषाद्यभिव्यक्ते
श्रो॰ रधिष्ठेशरीरके १ द्रष्टानार्थस्तथाशब्दो विज्ञेयोत्रमनीषिभिः य
थाधिष्ठानमप्यस्यशरीरंभौतिकंजडं २ तथैवाहंकरोमीतिक
र्तोहंकारस्त्वात्मनि कल्पितोमतयथासूक्ष्मभूतकार्यतयाजडः ३
यथास्थूलशरीरस्यचार्वाकैरात्मताधिया गृहीतस्यापिवेदज्ञैरना
त्मत्वेननिश्चयात् ४ तदृष्टेनैनकर्तुश्चनास्तिकैरात्मताधिया गृ
हीतस्याप्यनात्मत्वनिश्चयः सुकरोभवेत् ५ श्रोत्रादिकरणंचैव
ग्राह्यादिज्ञानसाधने दर्शीन्द्रियमनोबुद्धिरूपेणास्मिश्रष्णविधे ६
वृत्तिभेदेमनोबुद्धीअहंकारस्तुवृत्तिमान् क्रियाशक्तिप्रधानाश्च
प्राणानानाविधाः क्रियाः ७ दशदापंचधावापिप्राणापानादिरू
पतः असंकीर्णाः क्रियारूपाभौतिकाः कल्पिताः परे ८ अत्राहं
कमर्काद्विदेवचन्द्रमालास्वच अत्रकारणवर्गेतत्पंचसंख्याप्रशके
९ तथैव नकर्षणार्थश्चशब्दोस्तिस्थलत्रये तेनाथ्यस्तत्वमेते।
षांभौतिकत्वमनात्मता १० प्रतिगात्मत्वसंगोस्मिंपंचानामीय
तेजगौ ११ ॥ १५ ॥

श्री
गी॰टी॰
प्र॰

68

तामेव पंच गणयति अधिष्ठानमिति अधिष्ठानं इच्छाद्वेषसुखदुःखज्ञानादीनामभिव्यक्तेराश्रयो देहः तस्यानात्मत्वं चार्वाकव्यतिरिक्तसमस्तवादिसिद्धं तथा कर्ता बुद्धिविशिष्टश्चिदाभासः अयमात्माहंप्रत्ययविषयोऽहंकारः न चैषमनेन न तद्देवानात्मैव न तेषु परस्परस्य देहस्यैव सुषुप्तौ प्रलये च तस्याप्युत्पत्तिविनाशयोर्दर्शनात् एतच्च विशेषणनाशाद्विशिष्टनाशो विशेषणोत्पत्त्या च विशिष्टोत्पत्तिमभिप्रेत्य श्रूयते विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीति यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवैतस्मादात्मनः सर्व आत्मानो व्युच्चरंतीति च विशिष्टस्यैवानतिरेकादर्शनात् सिद्धं करणं च शब्दाद्युपलब्धिसाधनं पृथग्विधं द्वादशविधं पंच कर्मेंद्रियाणि पंच ज्ञानेंद्रियाणि मनो बुद्धिश्च तथा विविधाश्च पृथक्चेष्टाः वायवीयाः प्राणापानादिरूपाः दैवं चैवात्र पंचमं तत्करणानुग्राहकसूर्यादिदेवतारूपं पंचमं पंचानां पूरणं १४॥

आनंदीटीका १३ ॥

तामेवाह अधिष्ठानं शरीरं भूतेंद्रियादिप्रकृतिविकृतिसंघातरूपं कर्ता जीवात्मा पुरुषः करणं पृथग्विधमेकादशेंद्रियवर्गः पृथक्चेष्टाः संकल्पविकल्पाः श्रवणादिके गमनादिके चेंद्रियव्यापाराः दैवं चात्र कृत्स्नरूपेणान्तर्यामिस्वरूपेण च परमेश्वरेण प्रकृतकर्मफलभोगं प्रति प्रेरणम् १४ ॥

कानि तानीत्याह ॥

रामकंठीटीका १४

अधिष्ठानं तत्क्रियानुगुणमधिकरणं शरीरादि यदधिष्ठानकर्तृत्वं तत्कर्मकर्तृत्वं शक्यं तथा कर्ता तत्तद्देहादिनिबद्धाहंप्रत्ययः पुरुषः करणं पृथग्विधं विविधास्तत्पृथक्चेष्टास्तत्र तत्क्रियानुगुणशरीरेंद्रियव्यापारभिः प्रवर्तितः पृथक्चेष्टास्तत्र ल्पेन तत्फलाभ्याससिद्धसंस्कारभिः प्रवर्तितः पृथक्चेष्टाभ्यामनुरूपात्मकं कर्मसर्वैः प्रवर्तनकारणं दैवं पंचमं दैवापरपर्याय त्वमनन्तकालेन संनिहितानामपि फलमनन्तस्मादनन्ताधारस्य फलरूपसाधनानां साधनानामपि फलमनन्तमनन्ताधारेणास्य ... सिद्धिहेतुं निगमयति १४

लासिकी[illegible]टीका

+कानितानीत्याह ॥

+अधिष्ठानं शरीरं कर्ता चिज्जडग्रन्थिरहंकारः पृथग्विधं नानाप्रकारं करणं चक्षुःपाण्याद्यन्तःकरणात्मकं तथा स्वरूपतः पृथग्भूताः कार्यतो विविधाश्च चेष्टाश्चक्षुरादीनां प्राणापानादीनां च व्यापाराः अत्रैव तेषु चक्षुरादिषु देवं चक्षुराद्यनुग्राहको देवसमूहः पंचमं पंचसंख्यापूरणं देवसमूहः पुराणप्रसिद्धो यथा कर्तुरहंकारस्याधिष्ठात्री देवता रुद्रः बुद्धीन्द्रियाणामधिष्ठात्री देवता दिग्वातार्कप्रचेतोश्विनः कर्मेन्द्रियाणां वह्नीन्द्रोपेन्द्रप्रजापतयः मनोबुद्ध्योश्चन्द्रबृहस्पती पंचप्राणानां क्रियारूपाणां सद्योजातवामदेवाघोरतत्पुरुषेशाना इति

तेषामेव पंचानां सर्वकर्महेतुत्वं निगमयति १४

पंचोलीटीका

तान्येवोपदिशति अधिष्ठानमिति इच्छादीनामभिव्यक्तेरधिष्ठानं आश्रयः शरीरं उपाधिलक्षणो देही कर्ता भोक्ता करणं च श्रोत्रादि पृथग्विधं नानाप्रकारं द्वादशसंख्याकं च पृथक् विविधा पृथक् चेष्टा व्यापारा प्राणापानाद्या अपने पंचमं दैवं पंचमं सर्वेन्द्रियाणां चक्षुराद्यनुग्राहकं आदित्यादि १४

रणवीरसमिद्धोधिनी ॥

कानितानीत्याह अधिष्ठानमिति अधितिष्ठन्त्यस्मिन्नित्यधिष्ठानं देहादिकर्मानुष्ठानोचितः ऊरुजंघादिप्रदेशाः तथा कर्ता योद्धा अनेकप्रकारं च पाशखड्गादिरूपं करणं क्रियायाः साधनं अनेकप्रकारस्वस्वरूपेण कार्येण च विलक्षणो व्यापारः अत्र च वक्ष्ये दैवं प्राक्तनं कर्म च पंचमं प्रधानं कारणं १४ ॥

मधुभाष्य

१४ ॥

64

भाषा अनुवाद ॥

सोई सर्वकर्म सम्पत्तिके विषयमे कारण कहतेहैं कि अधिष्ठान कहे शरीर औ कर्ता कहे चित्त औ जड़की ग्रंथिरूप अहंकार औ भिन्न भिन्न अनेक प्रकार करणस्वरूप चक्षु आदि इंद्रीय और विविध कहे कार्य से या स्वरूप से भिन्न भिन्न चेष्टा अर्थात् प्राण अपानादि वायु के व्यापार समूह और अब कहे अधिष्ठान शरीर आदि सब के मध्यमे पंचम स्वरूप दैव अन्तर्यामी सर्वनियन्ता अथवा चक्षु आदि इंद्रियोंके अनुग्रहकारी सूर्य आदि देवता जानो इन्हे चिन्हा अर्थ जानने १४ ॥

दोहा

अधिष्ठान तथा कर्ता कारण भिन्न विचजोय चेष्टाविविध प्रकारकी दैवहि पंचम होय १४॥

20

शरीरवाङ्मनोभिर्यत्कर्मप्रारभतेनरः न्या
य्यंवाविपरीतंवापंचैतेतस्यहेतवः १५ ॥

शांकरभाष्य टीका १ ॥

शरीरेतिशरीरवाङ्मनोभिर्यत्कर्म त्रिभिरेतैः प्रारभते निर्वर्तय
ति नरः न्याय्यंवाधर्म्यं शास्त्रीयं विपरीतंवा अशास्त्रीयं अधर्म्यं
यच्चापि निमिषितचेष्टादि जीवनहेतुस्तदपि पूर्वकृतधर्माधर्म
योरेव कार्यमिति न्याय्यविपरीतयोरेव ग्रहणेन गृहीते पंचैते य
थोक्तास्तस्य सर्वस्यैव कर्मणो हेतवः कारणानि ननु अधिष्ठाना
दीनि सर्वकर्मणां कारणानि कथमुच्यते शरीरवाङ्मनोभिः प्रा
रभ्यतइति नैषदोषः विधिप्रतिषेधलक्षणं सर्वं कर्म शरीरादित्रय
प्रधानं तदंगतया दर्शनश्रवणादिचजीवनलक्षणं त्रिधैवराशी
कृतमुच्यते शरीरादिभिरारभ्यतइति फलकालेपि तत्प्रधानैर्भुज्यते
इति पंचानामेव हेतुत्वं न विरुध्यते १५ ॥

आनंदगिरिकृत टीका २ ॥

पंचानामधिष्ठानादीनामुक्तानां सर्वकर्मनिर्वर्तकत्वे स्फुटयति श
रीरेति ननुजीवनकृतं निमिषोन्मेषादिकर्मान्तरं साधारणमस्ति
ततकथं राशिद्वयकरणमिति तत्राह यच्चेति अधिष्ठानादीनां क
र्ममात्रहेतुत्वे प्रतिज्ञाय शरीरादित्रिविधकर्महेतुत्वोक्तिरयुक्तेति
शंकते नन्विति पूर्वापरविरोधं परिहरति नैषदोषइति ननुजीवन
कृतानि स्वाभाविकानि कर्माणि दर्शनादीनि विधिनिषेधवाह्यत्वा
न्नदेहादिनिर्वर्तनानीत्याशंक्याह तदंगतयेति तस्यदेहादित्रयस्य प्र
धानस्यांगवत्त्वात् तत्त्रिधापृथक्त्वेनजीवनकृतं दर्शनादि प्रधानक
र्मण्यन्तर्भूतमिति त्रैविध्यमविरुद्धमित्यर्थः देहाद्यारम्भे त्रिविधे
कर्मणि सर्वकर्मान्तर्भावेपि कथंपंचानामेवाधिष्ठानादीनां तत्र
हेतुत्वं फलोपभोगकाले करणान्तरापेक्षासम्भवादित्याशंक्य जन्म
कालभाविनोभोगकालभाविनश्च सर्वस्य कारणस्य तेष्वेवान्त
र्भावान्नैवमित्याह फलेति १५ ॥

श्री
गी टी
श्र

स्वामिकृत टीका ३ ॥

तेषांसर्वकर्महेतुत्वमाह शरीरेति पंचभिः प्रारभ्यमा णंकर्मविविधंआवश्यंशरीरवाङ्मनोभिरित्युक्तेःशारीरंवाचिकंमा नसंवात्रिविधंकर्मेतिप्रसिद्धेः शरीरादिभिर्यत्कर्मधर्म्यंवाअधर्म्यं वाकरोतिनरस्तस्यसर्वस्यकर्मणःपंचैतेहेतवः १५ ॥

पिशाचभाष्य टीका ४ ॥

शरीरंचवाङ्मनश्चशरीरवाङ्मनांसितैर्यत्कर्मक्रियारूपंप्रारभतेनरः न्याय्यंवाशास्त्रीयंवातत्कर्मणस्तेपंचहेतवः १५ ॥

रामानुजभाष्य टीका ५ ॥

[illegible] ननुचैवंपरमात्मायत्तंजीवात्मनःकर्तृत्वेजीवा त्मकर्मणानिर्योज्योभवतीतिविधिनिषेधशास्त्राण्यनर्थकानि स्युः इदमपिनोपपन्नंत्रकारेणपरिहृतं तेनकृतप्रयत्नापेक्षंविहितप्र योरेश्वरादिकारणकलेवरादिभिः तदाहितशक्तिभिस्वयंचजी नाकारेप्रयत्नेवारभते तदन्तरवस्थितपरमात्मास्वानुमितदानेन शिलामहीरुहादिवहतिरेवमस्तियथागुरुतर मिन्द्रेवयमाक्रंवेति १५ ॥

स्पष्टार्थे १५ ॥

श्रभिनवगुप्तकृत टीका ६ ॥

॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाठी टीका ७ ॥

पतेषामेवसर्वकर्म हेतुत्वमाह शरीरेतिनरः शरीरवाङ्मनोभि र्न्याय्यंधर्म्यंविपरीतमधर्म्यंवायत्कर्मप्रारभतेतस्यहेतवउक्ताः पं चैते १५ ॥

वनमाली टीका ८ ॥

तेषांकारणानामुपपादयति शरीरेतिशारीरंवाचिकंमानसंचविधि

प्रतिषेधरूपं त्रिविधं कर्म धर्म्यं शास्त्रेषु प्रसिद्धं शरीरेण वाचा म
नसा वा यत्कर्म प्रारभते नरः मनुष्याधिकारत्वात्तस्य
कीदृशं न्याय्यं शास्त्रीयं धर्म्यं विपरीतं वा अशास्त्रीयमधर्म्यं यच्च नि
मिषितचेष्टितादि जीवनहेतुरपि महाविहितप्रतिषिद्धसमं तत्सर्वं
पूर्वकृतधर्माधर्मयोरेव कार्यमिति न्याय्यविपरीतयोरेवानर्थं ते।
पंचैते यथोक्ताधिष्ठानादयस्तस्य सर्वस्यैव कर्मणो हेतवः १५॥

ॐ समवैजयंती टीका ९॥

पुनरप्येतेषां कर्महेतुत्वं वदन्सर्वकर्मणां त्रैविध्यमाह शरीरेति
नरो नीतिमान्मनुष्यः शरीरवाङ्मनोभिः शरीरेण वाचा मनसा
च यत् शरीरं वाचिकं मानसं त्रिविधमेव न्याय्यं शास्त्रीयमन्यद्वा वि
परीतमशास्त्रीयं कर्म प्रारभते करोति तस्य कर्मणः पंचैते अधिष्ठाना
दयः पंच हेतवो भवंति १५॥

सहपंचकानेषां पंचानां कर्महेतुत्वमाह
तृतीयेन

मधुसूदनी टीका ९॥

शारीरे वाचिके मानसिके च विधिप्रतिषेधलक्षणे त्रिविधे कर्म
धर्म्ये शास्त्रेषु प्रसिद्धे श्लोकपादेन चोक्तं प्रवृत्तिर्वाग्बुद्धिशरीरारंभ
इति तदिदमनेः अंतःकरणाध्यायाभिप्रायेणोच्यते शरीरेण।
वाचा मनसा वा यत्कर्म प्रारभते निर्वर्तयति नरः मनुष्याधिका
रत्वात्तस्य कीदृशं कर्म न्याय्यं वा शास्त्रीयं धर्म्यं विपरीतं वा अ।
शास्त्रीयमधर्म्यं यच्चानिमिषितचेष्टादि जीवनहेतुरपि महाविहि।
तप्रतिषिद्धसमं तन्नु सर्वं पूर्वकृतधर्माधर्मयोरेव कार्यमिति।
न्याय्यविपरीतयोरेवानर्थं तेन पंचैते यथोक्ताधिष्ठानादय
स्तस्य सर्वस्यैव कर्मणो हेतवः कारणानि १५॥

सदानंदी टीका ११॥

उक्तानां स्वरूपं पंचानामेतेषां कर्महेतुतां माहेदानीं जगत्त्राता
भगवान्करुणानिधिः देहेन मनसा वाचा निर्वर्तयति कर्म यत्
शास्त्रीयं वाप्यशास्त्रीयं धर्माधर्मात्मकं नरः २ निमेषोन्मेष
चेष्टादि निमित्तं जीवनोचितं यत् धर्माधर्मफलत्वेन गौतनर्थं तत्तु
योर्द्वयोः ३ न्याय्याद्वा विपरीताद्वा भिन्नं कर्म न किंचन सर्व

श्री
गी॰टी॰
म्र

स्यकर्मणास्तेनेयथोक्ताःपंचहेतवः ४॥ १५॥

नीलकंठी टीका १२॥

शरीरेति न्याय्यं धर्म्यं शास्त्रीयं विपरीतमन्याय्यमधर्म्यम
शास्त्रीयं न त्र शरीरादिभिस्त्रिभिरारभ्यते पंचैते तस्य हेतव
इति च विप्रतिषिद्धमुच्यते नैष दोषः अत्रापि शरीरपदेना
धिष्ठानस्य नरपदेन कर्तुर्वाङ्मन इति करणस्य प्रारभत इति
चेष्टानां न्याय्यमिति धर्माधर्मरूपस्य दैवस्य च संग्रहात् तथैव
कर्मणः पंचानां समानेऽप्युपयोगे विधिप्रतिषेधफलत्वेन त्रैवि
ध्यमेव कर्मणो हेतुप्रसिद्धमिति इदं शारीरं कर्मेदं मानसमिदं वा
चिकमिति व्यपदेशो देहादीनां प्राधान्यापेक्ष इति न कश्चिद्वि
रोधः १५॥

आनंदीटीका १२

एतदेव लक्षयति न्याय्यं शास्त्रचोदनया विहितं विपरीतं निषि
द्धम् १५॥

+एषां पंचानां सर्वकर्मसिद्धिहेतुत्वं निगमयति॥

रामकंठीटीका १४

+यः कश्चित्कर्मी कायेन वचसा चेतसा वा यत्कर्म कर्तुं प्रक्रमते
तस्यैते पूर्वोक्ताः पंचहेतवः कारणानि न तस्य एतेषामन्यतमा
भावेपि चिकीर्षितकर्मासिद्धेः कीदृशं कर्मारभते न्याय्यं शास्त्र
प्रोक्तं नियममनुपाल्यादनयेन वा विपरीतेन वा यथाशास्त्रं वा
दृष्ट्याप्य किंच १५॥

ते॰

+एतेषामेव पंचानां सर्वकर्महेतुत्वं निगमयति॥

लासिकी टीका

+यत्तेषु सर्वस्मिन्कर्मणि करणत्वेन प्रसिद्धैः शरीरवाङ्मनो
भिर्यत्कर्म धर्म्यमधर्म्यं वा नरः करोति तस्य सर्वस्य एते अ
धिष्ठानादयः पंचहेतवः कारणानि

पंचोलीटीका

एतेषामेव सर्वकर्महेतुत्वमाह शरीरेति नरो यत्कर्म एतैः श
रीरवाङ्मनोभिस्त्रिभिर्यत्कर्म न्याय्यं वा धर्म्यं वेदोक्तं यद्वा धर्म्यं।

मनसा शरीरमुद्राभ्यां वा निषिद्धचेष्टादि जीवनहेतुमारभते तत्र
तेषु कर्मसु सर्वेष्वेव पंचाधिष्ठानादयो हेतवः कारणानि १५

रमावीरसमिद्धोधिनी

एतदेव निगमयति शरीरेति न्याय्यं शास्त्रचोदितं वा ह्यधर्म्यं वा विप
रीतमतथाभावाद्धर्म्यं वा यच्छरीरादिनिर्वर्तितं त्रिविधं कर्म तस्यैते
अधिष्ठानादयः पंच हेतवो भवंति एतेषामन्यतमाभावे चिकीर्षि
त कर्मासिद्धेरिति भावः १५॥

मधुभाष्य

१५॥

73

भाषा अनुवाद

इन्ही पांचों को सर्व कर्म मे कारणत्व कहतेहै कि इन्ही पांचो के कारण से आरम्भ किये जाते जो कर्म सकल तिन को शरीरादि मे अन्तर्गत कहे मानिके इस श्लोक मे कहा है कि जिस हेतु कर्ममात्र जो शारीरिक औ वाचनिक तथा मानसिक होते है यह प्रसिद्ध है श्लोक का अर्थ यह है कि शरीर वचन औ मन के द्वारा सब मनुष्य जो कोई धर्म वा अधर्म करतेहै सोई सकल कर्म के कारणहै येह अधिष्ठान कहे शरीर आदि पांच कर्मो के हेतुहै १५

दोहा

देह वाक मनसें हि जो अर्जुन कर्महि होय न्याय हि वा
विपरीतवा पंचहेतु तिहकोय १५॥

74

तत्रैवं सति कर्तारमात्मानं केवलं तु यः । प
श्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥१६॥

शांकरभाष्यटीका १ ॥

तत्रेति तत्रेति प्रकृतेन सम्बध्यते एवं सति एवं यथोक्तैः पंच
भिर्हेतुभिर्निर्वर्त्ते सति कर्मणि तत्रैवं सतीति दुर्मतित्वस्य हे
तुत्वेन सम्बध्यते तत्रैतेष्वात्मानन्यत्वेनाविद्यया परिकल्पि
तैः क्रियमाणस्य कर्मणोऽहमेव कर्त्तेति कर्तारमात्मानं केवलं
शुद्धं तु यः पश्यत्यविद्वान् कस्माद्वेदान्ताचार्योपदेशन्यायैरकृत
बुद्धित्वादसंस्कृतबुद्धित्वाद्योपि देहादिव्यतिरिक्तात्मवाद्यात्मान
मेव केवलं कर्तारं पश्यत्यसावप्यकृतबुद्धिरेवातोऽकृतबुद्धित्वा
न्न स पश्यत्यात्मनस्तत्वं कर्मणो वेत्यर्थोऽतो दुर्मतिः कुत्सिता वि
परीता दुष्टाजस्रं जननमरणप्रतिपत्तिहेतुभूता मतिरस्येति दु
र्मतिः स पश्यन्नपि न पश्यति यथा तैमिरिकोऽनेकं चंद्रं यथा
वाभ्रेषु धावत्सु चंद्रं धावन्तं यथा वा वाहने उपविष्टोऽन्येषु
धावत्स्वात्मानं धावंतं पश्यति १६ ॥

आनंदगिरिकृत टीका २ ॥

क्रियाकर्तृत्वमधिष्ठानादीनामुपपाद्य विशुद्धस्यात्मनस्तदभिम
न्तृवदति तत्रेति तत्र पदपरामर्शयोग्यं प्रकृतं सर्वकर्मप्रती
कमाशयपूर्वेण सहार्थं कथयति एवमिति अधिष्ठाना
दीनामुक्तरीत्या कर्तृत्वे सम्पन्ने कर्तृत्वमात्मनो यारोप्य पश्य
तोऽदुर्मतित्वमात्मनि कर्तृत्वं पश्यन्निमाह तत्रैवमिति कर्तार
मित्यादि व्याचष्टे तत्रेत्यादिना तेष्वधिष्ठानादिषु तैरधिष्ठानादि
भिरारोपितात्मभावैरित्यर्थः अकर्तारमात्मानं कर्तारं पश्यतीम
त्र सम्महारा हेतुमाह कस्मादिति तत्र शास्त्रसंस्कृतबुद्धिरेवा
तिरिक्तात्मवादी कर्तृत्वं तस्यानुमन्यते नासौ कर्तृत्वमात्मनि पश्य
त्यपि भवत्यकृतबुद्धिरित्याह योपीति तस्यापि शास्त्रपूर्वकमाचा
र्योपदेशेन तदनुसारिन्यायैश्चानाहितबुद्धित्वादकृतबुद्धित्वसिद्ध

मित्यर्थः कौटस्थ्यमात्मनस्तत्त्वे यद्यात्मा कर्मणोपि तत्त्वमवि
द्याकृताधिष्ठानादिकृतत्वेनान्यापरोक्षत्वमात्मकर्मणोस्तत्त्वदर्शि
नाभावोऽतः शास्त्रार्थः दुष्टत्वमसिद्धेः कर्तृ दुर्मतित्वे विहतोऽतिज्ञत
येति यद्वा कर्तृत्वात्मदर्शनवतोपि नाविदुषस्तद्दर्शनमस्तीम
त इष्टान्तमाह यथेति तिमिरोपहतनयनास्तेकेचंद्रं पश्यन्त्य
पि न तत्वतोनंतं पश्यत्येवमविद्वानात्मानं कर्तारं पश्यन्नपि न
तत्वतोनंतं पश्यतीत्यर्थः अधिष्ठानादिषु विषया सम्बद्धात्मनः
स्वात्मनि तत्कृतक्रियारोपे दृष्टान्तमाह यथावेति अभ्रेषु वा
हकेषु प्रकृतेषु धावनकर्तृत्वं वाहने स्थितः स्वात्मनि प्रधाव
नकर्तारं विवेकादभिमनुते तथाधिष्ठानादिषु क्रियाकर्तृषु
तत्कृतं स्वात्मनि कर्तारं मन्यमानो दुर्मतिरित्यर्थः १६ ॥

स्वामिकृत टीका २ ॥

ततः किमत आह तत्रैवेति तत्र सर्वस्मिन्कर्मणि एते पंच हेतवस्त
वं सतीति केवलं निरुपाधिकमसंगमात्मानं तु यः कर्तारं पश्यति
शास्त्राचार्योपदेशाभ्यामसंस्कृतबुद्धित्वाद् दुर्मतिरसौ सम्यङ्
पश्यति [illegible] ॥

पिशाचभाष्य टीका ४ ॥

तत्र कर्मणः एवं सति कर्तारं क्रियानिर्हेतिकारणमन्यं च
रूपं केवलमसाहाय्येन यः पश्यति योऽज्ञानान्निष्कृतबुद्धि
त्वान्न शास्त्राचार्योपदेशासंस्कृतबुद्धित्वात् स पश्यति न स
र्वमस्तीति आत्मानं निरपेक्षकर्तृत्वमविद्याकृतं न वास्तवं क
मानस्य साक्षात्सज्ज्ञाननिरपेक्षयोगिनः सकलकर्मसंन्या
सएवेत्यभिप्रायः १६ ॥

रामानुजभाष्य टीका ५ ॥

तत्रैवमिति एवं सति परमात्मानुमतपूर्वके जीवात्मनः कर्तृ
त्वे सति तत्र कर्मणि केवलात्मानमेव कर्तारं यः पश्यति स
दुर्मतिः विपरीतमतिरसंस्कृतबुद्धित्वात् अतिदुष्टन्यायाव स्थि

तत्र हित्वात्मपश्यति न यथावस्थितं कर्तारं पश्यति १६ ॥

अभिनवगुप्तकृत टीका १६ [illegible]

सर्वार्थे १६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटी टीका ७ ॥

ततः किमत आह तत्रेति तत्र सर्वस्मिन् कर्मणि एवं हेतुवर्गे एवं सति केवलं निरुपाधिमसंगमात्मानं यः कर्तारं पश्यति स यथा शास्त्राचार्योपदेशाध्यात्मकृतबुद्धित्वाद्दुर्मतिर्विपरीतबुद्धिः तत्त्वं सम्यक् न पश्यति १६ ॥

वनमाली टीका ८ ॥

केवले स्वस्यैव कर्तृत्वाभिमानिनं निन्दति तत्रेति तत्र कर्मणि एवं सति पञ्चानां कारणत्वे यस्त्वात्मानं केवलं निःक्रियमपि स्वात्मानं कर्तारं पश्यति स गुरूपदेशेनासंस्कृतबुद्धित्वाद्दुर्मतिर्न पश्यति सम्यग् ज्ञानानामर्थः केवलमिति देहगर्भविशेषणं अयं भावः ज्ञानानन्दस्वरूपस्यासङ्गस्य निःक्रियस्य जीवस्यानाद्यविद्यया देहादावहं ममेत्यभिमानस्तदभिमानसंवेद्येन कर्मजन्यादृष्टेन जीवे संबन्धेनादृष्टजन्यकृत्यादिमत्त्वरूपकर्तृत्वादिकं स्वजनकादृष्टवैतसंवेद्येन जीवे वास्तवमेव संवाद्यते यथा उत्तरे सकले विकलेऽहमेव सकलो विकलोऽस्मि च स्वस्वरूपयोर्भेदज्ञानेन वाधानाभेदारोपस्तथा स्वमदेहस्यात्मभेदज्ञानेन बाधात् देहात्मनोर्भेदारोपः किं लोपचारिकोऽयं व्यवहारः आभिमानिको वा स्वकर्तृत्वे यदभिमानादिकं विहाय केवलात्मानमेव पश्यति । स दुर्मतिः सत्कोपदेशनादिकर्तृत्वे स्वरूपमज्ञानिदानीमविद्याहतो भगवन्महाप्रसादादाविर्भूतेन नतत्त्विराक्रियते किं वास्य संवेद्यादृष्टाभाविकं यत्कर्तृत्वं तदेवानर्थहेतुस्तदेवच शास्त्राणि वारयन्त इति १६ ॥

क्षमवैजयन्ती टीका ९ ॥

एवमविज्ञानतोऽदुर्मतित्वमाह तत्रैवमिति एवं सति जीवात्मनः परमात्मानमतिदूर्वैकेकर्तृत्वेन हृदि देहेन्द्रियादिसापेक्षत्वे सति तत्र कर्माणि न शास्त्रोऽन्वयारणाद्यकः केवलमेवात्मानं जीवात्मानमेवाकर्तारं स्वतन्त्रं कर्तारं यः शास्त्राचार्योपदेशशून्यो

श्री। भा। गी। टी। अ।

इदानीमेतेषामेव कर्मकर्तृत्वादात्मनो नकर्तृत्वमित्यधिष्ठानादिनिरूपणफलमाह ॥

76

दुर्मतिर्दुष्टबुद्धिः पश्यन्न जानाति यतः अकृतबुद्धित्वादलब्धशास्त्री। यज्ञानत्वान्न पश्यति जनको यथा बालकश्च किंचिदपि न जानातीत्यर्थः ॥ १६ ॥

मधुसूदनी टीका १८ ॥

तत्र कर्मणि शास्त्रीके सर्वस्मिन् एवं सति अधिष्ठानादिपंचहेतुके सति तैर्निर्वर्त्यमाने आत्मानं सर्वजडप्रपंचस्य भासकं सत्तास्फूर्तिरूपं स्वप्रकाशपरमानंदमबाध्यं केवलमसंगोदासीनमकर्तारमविक्रियमद्वितीयं तदेवं परमार्थतः अविद्ययात्वधिष्ठानादेशति। विविक्तमादित्यमिव तोयेन तद्धर्मकमनन्यत्वेन परिकल्प्य तोयचलनेनादित्यश्चलतीतिवदधिष्ठानादिकर्मणाहमेव कर्तेति साक्षिणमपि संतं कर्तारं क्रियाश्रयं यः पश्यत्यविद्यया कल्पयति। रज्जुमिव भुजंगत्वेन स एवं पश्यन्नपि न पश्यत्यात्मानं तत्त्वेन स्वरूपाज्ञानकृतत्वादध्यासस्य सभ्रमाद्विपरीतमेव पश्यति न यथातत्त्वमित्यत्र को हेतुरत आह अकृतबुद्धित्वात् शास्त्राचार्योपदेशन्यायैरनुपजनितविवेकबुद्धित्वात् नहि रज्जुतत्त्वसाक्षात्काराभावे भुजंगभ्रमं कश्चन बाधते एवं शास्त्राचार्योपदेशन्यायैः परिनिष्ठितेहमस्मि सततं ज्ञानमनंतमकर्त्रभोक्तृ परमानंदघनमनवद्यमद्वयं ब्रह्मेति साक्षात्कारेऽनुपजनिते ज्ञानतो मिथ्याज्ञाननतत्कार्यबाधः एतादृशं साक्षात्कारमेव गुरुमुपसृत्य वेदान्तवाक्यविचारेण कृतेन जनयतीमत आह दुर्मतिः दुष्टा। विवेकप्रतिबंधकपापेन मलिना मतिर्यस्य सः अतोऽशुद्धबुद्धित्वान्नित्यानित्यवस्तुविवेकादिशून्यत्वेन तत्त्वज्ञानायोग्यत्वादकर्तारमपि कर्तारं केवलमात्मानमविद्यया कल्पयन् संसारी कर्माधिकारी देहेऽहंदृढबुद्धिः कर्मकरणादात्माभिमानात्कर्मत्यागासमर्थः सर्वदा जननमरणप्रवाहे निवेशेनानिष्टमिष्टं मिश्रं च कर्मफलमनुभवति एतेन यस्तार्किको देहादिव्यतिरिक्तमात्मानमेव कर्तारं केवलं पश्यति सोऽप्यकृतबुद्धित्वेन व्याख्यातः अन्यस्त्वाह आत्मा केवलो न कर्ता किंत्वधिष्ठानादिभिः संहतः स न परमार्थतः कर्तैव कर्तारमात्मानं केवलं पश्यन्दुर्मतिरिति केवलशब्दप्रयोगादिति अत्र परमार्थतः

सर्वक्रियाश्रयस्यासंगस्यात्मनोधिष्ठानादिभिःसंहतत्वानुप
पत्तेः जलसूर्यकादिवन्नाविषकेन संहतत्वेन कर्तृत्वमपिता
दृशामेव अधिष्ठानादीनामप्याविषकानां च केवलशब्दस्तस्व
भावसिद्धमात्मनोऽसंगत्वं द्वितीयरूपत्वमनुवदतिकर्तृत्वदर्शी
नोऽहमिति न देहत्वेनेत्यदोषः [illegible] मेदेचतनोभिःसलोकैरनिष्पन्निःश्रेम
[illegible] विषकनेणफलं भवत्यत्यागिनोऽपैमेतिवरणाच्चयेऽत्या
[illegible] नित्यदीनेन [illegible] विविदितिनरोविषयाणामेकेन
[illegible] ९ ॥

सदानंदी टीका ११

एतेषामेवकर्तृत्वे सर्वस्यापीहकर्मणः आत्मनोनास्तिकर्तृत्व
मित्याहभगवान्हरिः १ नचकर्माणिसर्वाणिकेसर्वस्मिन्नेवहेतुभिः
निर्वर्त्यमानेसतियआत्मानं सर्वसाक्षिणं २ स्वप्रकाशपरा
नंदमव्ययंकेवलंपरं उदासीनमकर्तारमद्वितीयमविक्रियं ३
वस्तुतोऽसंगिनं संतमधिष्ठानादिकर्मणः कर्ताहमितिचाध्या
सात्कर्तारंहिक्रियाश्रयं ४ पश्यत्यविद्ययारज्जुंभुजंगमिवमूढ
धीः महामोहाहतत्वेनपश्यत्त्वयमन्यथामतिः ५ शास्त्राचार्यो
पदेशाभ्यामसंस्कृतमतिःकुधीः प्रतिबंधवशापापेनदुष्टाशयस्सम
तिः सच ६ नपश्यत्येवविभ्रांतोतस्यात्मानंवभासतः यतोऽसुहृ
मनस्कत्वादविवेकान्निरागवान् ७ ज्ञानयोग्यतयासंतमकर्ता
रमविक्रियं कर्तारंविक्रियावंतं कल्पयन्मायया परं ८ संसारीदे
हमत्वकर्माधिकारीकर्मकर्तृभु नानात्माध्यासतःकर्मप्रकर्तृत्वे
स्वरतयः ९ एतेननास्तिकोयस्तु देहादिभ्योविलक्षणं आत्मा
नं केवलं व्याकर्तारं पश्यतीन रः १० शुष्कतर्कमतयासोपिव्या
ख्यातोनात्मदर्शनः कर्तृत्वेकल्पितेमिथ्या देहादिजडपंचके ११
प्रमगात्माक्रियः सिद्धोवाच्याजगवतोहरेः १२ सकलजडवि
काराध्यासतत्त्वाच्छिद्रनेकुमतिरकृतबुद्धिः कल्पयन्कर्तृभावे
भ्रमतिभवभयाब्धौ नैकविधोपदेशान्निवदतिहरिर्यस्तत्प्र
येमकृत्स्न १५।१६ ॥ नीलकंठी टीका १२ ॥
एतत्प्रतिपादनफलंकर्तृत्वस्यारोपितत्वसिद्धिःकर्तृत्वस्यस्वा।

श्री॰
गी॰टी॰
प्र॰

भाविकत्वमिति हिशब्देनिहाभ्यांश्लोकाभ्यांदर्शयति तत्रेति तत्रैत
स्मिन्कर्मणि एवमुक्तरीत्या पंचभिर्निर्वर्त्यमानेसति केवलंत्वकर्तार
मप्यात्मानंचेतनं साक्षीचेताकेवलोनिर्गुणश्चेतिश्रुतेः अधिष्ठा
नादिपंचकव्यापारदर्शिनमुदासीनमपियः कर्तारंकरणत्वाश्रयंप
श्यति सदुर्मतिः पापाभिभूतमतिर्नैवपश्यति श्रेयएवसः अद
र्शनेहेतुः अकृतबुद्धित्वादिति शास्त्राचार्योपदेशशमदमादि
संस्कृताबुद्धिर्यस्य सकृतबुद्धिस्तद्विपरीतोऽकृतबुद्धिस्तस्यभाव
स्तत्वंतस्मात् यथास्वच्छस्वस्योदपात्रसंसर्गिकत्वेपश्यताजलचं
चलत्वमपितत्रारोप्यतएवमात्मनोबहिःसंसृष्टत्वेपश्यताबुद्धिध
र्मः करणत्वादिरप्यात्मन्यारोप्यतेइतिभावः १६ ॥

आनंदीटीका १६

तत्रैवंतस्मिन्पंचके एवंसमस्तत्वेनकर्तरिसति यस्त्वात्मानंके
वलमेकाकिनमनन्यापेक्षिणंकर्तारंपश्यतिजानाति सदुर्म
तिस्तामसिकः अतएवाकृतानुत्पन्नाबुद्धिः सम्यग्ज्ञानाध्यव
सायोयस्यतस्याभावान्नपश्यतिनालोचयति सदुर्मतिस्ताम
सिकः अतएवाकृतानुत्पन्नाबुद्धिः आत्मनः शरीरादिसंयोगे
नदर्पिष्ठात्तत्त्वाहंकारात्कर्तृत्वम् योगसिद्धेस्तस्यकौस्थ्यंतस्मा
त्तत्कर्तृत्वमित्यर्थः १६ ॥

रामकंटीका १६

तत्रपंचकेएवमुक्तक्रमेणसमस्तशीर्षिकयाकारणभूतेसतिवि
द्यमानेयः कर्मादेबुद्धिविशेषः केवलमेकमेवात्मानमोहवशा
दनात्मभूतदेहादिविविक्ताहंप्रत्ययंकर्तारंकर्मसंपादयन्तंपश्य
ति बुध्यते सनपश्यतिविपरीतेनतस्यज्ञानमित्यर्थः अतोनप
श्यन्नकृतबुद्धित्वात्अकृतायथोक्तज्ञाननिष्ठत्वाभिमुख्याबुद्धिः
प्रज्ञायस्यसतथोक्तः नकृतबुद्धिरकृतबुद्धिः सम्यग्ज्ञानशून्यतर
मतिरतएवनसुधीः किमुक्तंभवति एकः परमेश्वरः स्वशक्ति
प्रसरभूतस्यसकलजगज्जातक्रीडनकचक्रस्यात्मकः स्वस्वप्रभाव
तस्यावभासयितापारमार्थिकः कर्तेतिसम्यग्ज्ञानाभावादकृतबु

द्विजात्याद्यभिमानावच्छिन्नं देहत्रयस्वरूपमात्रमात्मानं कर्तारं मन्यमानो य
त्करोतीति तस्यैतदधिष्ठानादिविभागेन त्रिविधं कर्मफलं [illegible]
[illegible]
[illegible] प्रतिपादयन्नाह १६ ॥

लासिकी [illegible]टीका

ततः किमत आह

तत्र सत्युदिते एवाधिष्ठानादिपंचके एवमुक्तक्रमेण समष्टीर्षि क्रियाकारणभूते सति यः कश्चित्पुरुषः केवलमात्मानं कर्तारं कर्मसंपादकं पश्यति बुध्यते स पुरुषो न पश्यति न सम्यगवैति अकृतबुद्धित्वाद्धेतोः न कृता न सम्यक्संपादिता बुद्धिर्देहादिव्यतिरिक्तस्यात्मनो बोधो येन स भावस्तस्मात् यतोऽयं मतिर्दुष्टा विपरीतभावनाभिभूता मतिः प्रज्ञा यस्य सः १६ [illegible]

पंचोलीटीका

ततः किं अत आह तत्रेति तु पुनः यतः तत्र एवं सति एवमधिष्ठानादिभिः पंचभिः निष्पाद्ये सर्वस्मिन् कर्मणि आत्मानमकर्तारं केवलं विशुद्धं अहं करोमीति कर्तारं पश्यति मन्यते स दुर्मतिः अकृतबुद्धित्वात् आचार्योपदेशवर्जनात् मायेरसंस्कृतबुद्धित्वात् आत्मनः तत्त्वं न पश्यति १९

रणवीर समिद्धोधिनी

ततः किमित्याह तत्रैवमिति तत्र पंचके प्रोक्तक्रमेण सर्वकर्मकारणभूते सति यः कश्चिदात्मानमेव केवलं कर्तारं कर्मनिवर्तकं पश्यति स दुर्मतिर्दृष्टार्थो न पश्यति सम्यगिति शेषः तत्र हेतुः न कृता निष्पन्ना बुद्धिर्निश्चयात्मिका यस्य तस्य भावस्तत्त्वं तस्माद् दृढनिश्चयत्वादित्यर्थः किमुक्तं भवति एक एव परमेश्वरः सर्वत्र कर्मणि स्वतंत्रः करोतीति ज्ञानशून्यस्य पुरुषस्यापयो विषये स्वात्मन एव कर्तृत्वाभिमानेन त्रिविधं फलं परमेश्वरेणोतदवश्यं संपाद्यं निमित्त

78

मात्रस्त्वहमिति निश्चयेन फलाभिसंधिं विहाय स्वधर्ममनुष्ठातःउ नैनैतदिति २८॥

मधुभाष्य

२८॥

तो इसमे फेरि क्या होता है इस अपेक्षा पर कहते है कि उन
कर्म्मोके हेतु जो अविद्यानादि पांचमात्र है और कई हेतु नही है सो
होनेसे भी शास्त्र औ आचार्य के उपदेश सेनही खोयीगई बुद्धि इस
कारण जो दुर्म्मति मनुष्य उपाधि रहित असंगरूप आत्माको क
र्त्तारूप देखते है इस से ये दुर्म्मति मनुष्य सम्यक दर्शी नही है १६

दोहा

याहि अहंकृति भावनाहि याकी बुद्धि लिपेन सोहनके
यहलोक को हनेन फिर बंधेन १७

दोहा

ताभें कर्त्ता आत्मकोकेवल देषतजोय याहि अकृता
र्थबुद्धिसें दुर्मतिलषेनसोय १८ ॥

79

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ह
त्वापि स इमाँल्लोकान्न हंति न निबध्यते १७

शांकरभाष्यटीका १ ॥

कः पुनः सुमतिर्यः सम्यक् पश्यतीत्युच्यते यस्येति यस्य शा
स्त्राचार्योपदेशन्यायसंस्कृतात्मनो न भवत्यहंकृतो ऽहं कर्ते
त्येवंलक्षणो भावो भावना प्रत्यय एव पंचाधिष्ठानादयोऽविद्या
त्मनि कल्पिताः सर्वकर्मणां कर्तारो नाहमहन्तु तद्व्यापारा
णां साक्षिभूतः अप्राणोह्यमनाः शुभ्रोऽक्षरात् परतः परः केव
लो ऽविक्रिय इत्येवं पश्यतीति यद्बुद्धिरन्तःकरणं यस्यात्मन उपा
धिभूता न लिप्यते नानुशयिनी भवतीदमहमकार्षं तेनाहं नरकं
गमिष्यामीत्येवं यस्य बुद्धिर्न लिप्यते स सुमतिः स पश्यति हत्वापि
स इमाँल्लोकान् सर्वान् प्राणिन इत्यर्थः न हंति हननक्रियां न करो
ति न निबध्यते नापि तत्कार्येणाधर्मफलेन संबध्यते ननु हत्वापि
न हंतीति विप्रतिषिद्धमुच्यते यद्यपि स्तुतिः नैष दोषः लौकिक
पारमार्थिकदृष्ट्यपेक्षया तदुपपत्तेः देहाद्यात्मबुद्ध्या हताहमिति
लौकिकीं दृष्टिमाश्रित्य हत्वापीत्याह यथा दर्शितां पारमार्थिकीं दृ
ष्टिमाश्रित्य न हंति न निबध्यत इति तदुभयमुपपद्यत एव नन्व
धिष्ठानादिभिः संभूय करोत्येवात्मा कर्तारमात्मानं केवलं त्विति
केवलशब्दप्रयोगान्नैष दोषः आत्मनोऽविक्रियस्वभावत्वेऽधिष्ठाना
दिभिः संहननानुपपत्तेः विक्रियावतो ह्यन्यैः संहननं संभवति संह
त्य वा कर्तृत्वं स्यात् न त्वविक्रियस्यात्मनः केनचित् संहननमस्तीति न
संभूय कर्तृत्वमुपपद्यते अतः केवलत्वं आत्मनः स्वाभाविकमि
ति केवलशब्दोऽनुवादमात्रं अविक्रियत्वं चात्मनः श्रुतिस्मृतिन्याय
प्रसिद्धं अविकार्योयमुच्यते गुणैरेव कर्माणि क्रियंते शरीरस्थो
पि न करोतीत्याद्यसकृदुपपादितं गीतास्वेव तावत् श्रुतिषु च ध्या
यतीव लेलायतीवेत्येवमाद्यासु यानि वाक्यानि दर्शितान्यायतश्च
निरवयवमपरतंत्रमविक्रियमात्मतत्त्वमिति राजमार्गः विक्रिया

श्री॰
गी॰ टी॰
म॰

वत्वाभ्युपगमेप्यात्मनः स्वकीयैव विक्रिया यस्य भवितुमर्हति
नाधिष्ठानादीनां कर्म्मणामात्मकर्तृकाणि सन्तेहि परस्य कर्म्मप
रेण कृतमागन्तुमर्हति यत्तु विषया गमितेन तत्तस्य यथा रजतत्व
न शुक्तिकाया यथा वा तलमलवत्वं बालैर्गमितं न तद्विषया नाकाश
स्य तथाधिष्ठानादिविक्रियापि तेषामेवेति नात्मनः तस्मात् शुक्लस्य
के शरीरे कृतत्वेऽपि लेपाभावात् विद्वान् देहेऽपि न निबध्यत इति नायं
हेति न लिप्यत इति प्रतिज्ञाय न जायत इत्यादिहेतुवचनेनाविक्रियत्व
मात्मन उक्तं वेदाविनाशिनमिति विरुद्धः कर्म्माधिकारनिवृत्तिशा
स्त्रादौ संन्यस्त उक्तं मध्ये प्रसारितेव तत्र प्रसंगं कृत्वा इहोपसंह
रति शास्त्रार्थपिंडीकरणाय विद्वान् देहेऽपि न निबध्यत इति पूर्वेच
सति देहस्थत्वाभिमानानुपपत्तावविद्याकृताशेषकर्म्मसंन्यासोपप
त्तेः संन्यासिनामित्यादि त्रिविधं कर्म्मणः फलं न भवतीत्युपपन्ने त
दि विपर्ययाच्चेतरेषां भवतीत्येतच्चापरिहार्यमित्येष गीताशास्त्रस्या
र्थ उपसंहृतः स एष सर्ववेदार्थसारो निपुणमतिभिः पण्डितैर्विचा
र्य प्रतिपत्तव्य इति तत्र तत्र प्रकरणविभागेन दर्शितोऽस्माभिः
शास्त्रन्यायानुसारेण ८ ॥

आनन्दगिरिकृतटीका २ ॥

किं रीतस्त्रेहईस्मिन्निवे शिष्टा सम्यगदृष्टेः स्वमतिं च प्रमस्वक
माहकः पुनरित्यादिना शुद्धे कर्तृत्वात्मनि कर्तृत्वसम्बन्धाभावे
ऊर्ध्वं कर्तृत्वधीरित्याशंक्याह पुनरिति कथं तर्हि प्रकर्तृत्वधीरि
त्यनीत्याशंक्याधिष्ठानादीनां देहादीनां प्रकारेणात्राविवादित्याशंक्या
ह शरीरेष्विति आत्मनो न स्वतोऽस्ति क्रियाशक्तिमत्त्वमित्यत्र प्रमाण
माह प्रमाणोदीति नापि तस्य स्वतो ज्ञानशक्तित्वमित्याह स्वमन इति
उपाधिद्वयासम्बन्धे श्रुतं तत्फलितमाह शुभ इति कारणत्वमयाद
श्रुतिमाणवोक्तं शुद्धादीति कार्यकारणयोरात्मस्पर्शितत्वेन पा
केवलः इति जन्मादिसर्वविक्रियारहितत्वेन कौटस्थ्यमाह अवि।
क्रिय इति उदाहृतमेमादिवाचेन उदाहृतिति नान्तशायिनी नावश

यवती नक्लेशशालिनीत्यर्थः द्वितीयपादस्यावतारार्थमुक्त्वा
कार्यमाह इदमिति पापं कर्म इदमारभ्यपते लोकानुसारेण
सम्बन्धाभावे उक्तो हिंसेत्याशंक्याह यागेनेति विवक्षार्थाकारस्य
निरपेक्षं शुक्तेति शंकते नन्विति विरोधं परिहरति नैषदोषइति लौ
किकदृष्टिमवष्टभ्याह हन्तापीति निर्देशं विशदयति देहादीति ना
त्विकीं दृष्टिमास्थाय न हन्तीति निर्देशमुपपादयति यथेति ना
हं कर्ता किंतु कर्तृत्वव्यापारयोः साक्षी क्रियाज्ञानशक्तिमदुपाधि
द्वयविनिर्मुक्तः शुद्धः सन् कार्यकारणसम्बन्धो द्वितीयोविक्रियइ
त्येवं पारमार्थिकदृष्टिर्यथा दर्शितत्वे इष्टवो हन्तापीत्येतन्न हन्तीत्या
दि चोभयं उभिहयावस्थाद्वयमुपपन्नमित्युपसंहरति तदुभयमिति
केवलमेवात्मानं कर्तारं पश्यन् दुर्मतिरित्यत्रात्मविशेषणसमर्पक
केवलशब्दसामर्थ्यादात्मनो विशिष्टस्य कर्तृत्वमिति शंकते नन्विति
आत्मनो वैशिष्ट्ययोगात्त्वविशिष्टस्यापि कर्तृत्वमिति दूषयति नैष
दोषइति अविक्रियस्वाभाव्येपि कथमात्मनो संहतत्वमित्याशंक्या
ह अविक्रियेति अधिष्ठानादिभिरात्मनः संहननेपि न कर्तृत्वम
विक्रियस्य क्रियान्वयस्थानादित्याह संहत्येति संहतत्वानुपपत्ति
मङ्गीकरोति नन्विति असंहतत्वे फलितमाह इतीनेति कथं नहि
केवलत्वमात्मनि केवलशब्दादुक्तं तदाह तत इति कर्तृत्वमात्मनोनु
पपन्नं तस्याविक्रियत्वमेवेतीत्याशंक्याह अविक्रियत्वेचेति तत्र स्मृ
तिवाक्यान्युदाहरति अविकार्योयमिति नायं हन्ति न हन्यत इत्यादिवा
क्यमादिशब्दार्थः उक्तवाक्यानामात्माविक्रियत्वे तात्पर्यं सूचयति
श्रुतक्तादिति निःकलंनिःक्रियं शान्तमित्यादिवाक्यं स्मृतावादिश
ब्दार्थः यानि वाक्यानि तैरात्मनोविक्रियत्वं दर्शितमितियोजना
न्यायतस्तु न दर्शितमिति पूर्वेण सम्बन्धः न्यायमेव दर्शयति निर
वयवमिति न तावदात्मास्वतो विक्रियेत निरवयवत्वादाकाशवन्ना
पि परतोसंगस्याकार्यस्य पराधीनत्वायोगादित्यर्थः किंवात्मनः स्व
निष्ठावा विक्रियाधिष्ठानादिनिष्ठावा नाद्यः स्वनिष्ठाविक्रियानुपपत्ते
रात्मनोदर्शितत्वादित्याशयेनाह विक्रियावत्वेति साचाबडकेत्यकामि
निरोधः द्वितीयं दूषयति नैस्यादिना अधिष्ठानादिकृतमपि कर्मात

श्री-
गी-टी-
श्र-

९१

योगादात्मत्यागस्य नीत्याशंक्य तदागमनं वास्तवमाविद्यं वेति
विकल्प्याद्यं दूषयति नहीति द्वितीयं निरस्यति यद्यपीति आत्म
न्यविद्यारोपितं कर्म नात्मीयमित्येतद्दृष्टान्ताभ्यामुपपादयति य
थेत्यादिना आत्मनो विक्रियत्वेन कर्तृत्वाभावे फलितमाह तस्मा
दिति ननु प्रागेवात्मनो विक्रियत्वं प्रतिपादितं तदिह कस्मादुच्यते
तत्राह नायमिति शास्त्रादौ प्रतिज्ञाय हेतुपूर्वकं सेत्युपोक्ता म
ध्ये तत्प्रसंगं कृत्वा प्रस्तारितां कर्मानधिकारनिवृत्तिमिहोपसंहरती
ति सम्बन्धः प्रतिज्ञातस्य हेतुनोपपादितस्यान्ते निगमनं किमर्थ
मित्याशंक्याह शास्त्रार्थेति कर्मानधिकारो विदुषो नेति स्थिते तस्य
देहाभिमानाभावे सत्यविद्योत्थसर्वकर्मत्यागसिद्धेरनिष्टमिष्टं मि
श्रं चेति त्रिविधं कर्मफलं संन्यासिनो नेति प्रागुक्ते युक्तमेवेति पर
मप्रकृतमुपसंहरति एवं चेति ये पुनरविद्वांसो देहाभिमानिनस्तेषां। मा-
त्रिविधं कर्मफलं भवत्येवेति हेतुवचनमिदमर्थं निगमयति त
द्विपर्ययाच्चेति अधिष्ठानादिकृते कर्म नात्मकृतमविदुषामेव
कर्मानधिकारो देहाभिमानित्वेन तत्त्यागयोगाद्देहाभिमानाभावा
त्तु विदुषां कर्मानधिकारनिवृत्तिरित्युपसंहरनमर्थं संक्षिप्याह इमे
य इति उक्तं च गीतार्थविदा द्वितीयत्वादुपादेय इत्याह तत एव इति कथम
यमर्थो वेदार्थोऽपि प्रतिपत्तुं शक्यते तत्राह निश्चयेनेति भाष्यकृता

+ कर्तुर्हि स्वमतिर्यस्य कर्म लोपो नास्तीत्यपेक्षायामाह॥

मानस्य किम्भावि भज्यानुक्त्वात्रास्यार्थस्योपादेयत्वमित्याशंक्याह त
त्वेति ॥ १८ ॥

स्वामिकृत टीका ३० ॥

+यस्येति अहंकृतोऽहं कर्तेत्येवंभूतो भावोऽभिप्रायो यस्य नास्ति यद्वाहं
कृतोऽहंकार्यस्य यः स्वभावः कर्तृत्वाभिनिवेशो नास्ति यस्य शरीरादी
नामेव कर्मकर्तृत्वालोचनादित्यर्थः अत एव यस्य बुद्धिर्न लिप्यते इ
ष्टानिष्टबुद्ध्या कर्मसु न सज्जते अत एवंभूतो देहादिव्यतिरिक्तात्मद
र्शी इमांल्लोकान् सर्वानपि प्राणिनो लोकदृष्ट्या हत्वापि विविक्तया
तनू- दृष्ट्या न हन्ति न च फलेन निबध्यते एवं यतेन प्राप्नोति किंपुनः स तत्र
हिंसारागः परोऽहत्वात्मनोऽप्यतिरिक्तैः कर्मभिस्तस्य बन्धशंकेत्यर्थः त
दुक्तं ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः लिप्यते न स पापे
नेति हत्वापि न हन्ति न निबध्यते १७ [illegible]

पिशाचभाष्य टीका ४ ॥

न केवलं तस्य योगिनः सकलकर्मसंन्यास एव सः यस्य शास्त्राचा न भो पदेश मात्रैः संस्कृतात्मनः अहं कर्ता इत्येवं भूतो भावः अस्य योगिनः नभवति एतत् एवाधिष्ठानादयो । धिष्ठानकर्तृकरणचेष्टादीनि सर्वकर्मणां कर्तारो नाहमित्य णाकरणानि अविद्यया चैव कल्पितानि सर्वकर्मणां कर्तारो नाहंस्य हेतन व्यापाराणां साक्षिभूत इति पश्यतो बुद्धिर्न लिप्यते यस्य नानु योचिनी भवति तदहमकार्षं तेन नरकं गमिष्यामि इति न लिप्यते हत्वापि स इमान् लोकान् योगिनः नहन्ति न च हन्तेनैककर्मणा निब ध्यते न च हत्वापि न हन्ति न निबध्यत इति १७ ॥

रामानुजभाष्य टीका ५ ॥

यस्येति परमपुरुषकर्तृत्वानुसंधानेन यस्य भावः कर्तृत्वविशि षयो मनोवृत्तिविशेषो नाहंकृतः नाहमभिमानकृतः अहं करोमी ति यस्य न विद्यत इत्यर्थः बुद्धिर्यस्य न लिप्यते अस्मिन् कर्मणि मम कर्तृत्वाभावादेतत् फलेन मया संबध्यते न च मदीयमिदं कर्मेति य स्य बुद्धिः जायते इत्यर्थः स इमांल्लोकान् युद्धे हत्वापि न हन्ति न केवलं भी ष्मादीनित्यर्थः ततस्तेन युद्धाख्येन कर्मणा न निबध्यते तत्फलं ना नुभवतीत्यर्थः ॥

॥

अभिनवगुप्तकृत टीका ६ ॥

स्पष्टार्थं १७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७ ॥

कस्तर्हि पर्यवनीनित्याह यस्येति अहमित्यहंकारेणाकृतो निष्पादि तो भावः स्वभावः कर्तृत्वाभिनिवेशो यस्य नास्ति शरीरादीनामेव कर्तृत्वालोचनादित्यर्थः अत एव यस्य बुद्धिर्न लिप्यते इष्टानिष्टबुद्ध्या । कर्मस्वनसज्जते स एवंभूतो देहादिव्यतिरिक्तात्मदर्शी इमान् लोका

श्री·
गी·टी·
अ·

४२

न्सर्वान्प्राणिनोलोकस्थान्हत्वापिविविक्ततयास्वस्थानहंति नचतत्फलेनिर्बध्यतेबंधनंप्राप्नोति किंपुनः सत्वशुद्धिद्वाराज्ञप्रपरो दत्तानोत्पत्तिहेतुभिस्तत्सर्वंयथाशक्त्येत्यर्थः ब्रह्मार्पणाद्यधिकर्मी णासंगमत्वाकरोतितत्सर्वदैवमेवोक्तमस्ति १७ ॥

वनमाली टीका ८ ॥

अविद्यादेहेंद्रियादिसंबंधविमुक्तकेवलमात्मानंयोकर्तारंपश्यतिनेत्तीति यस्येतियस्यज्ञानेश्वरापरोक्षस्य विघस्य जीवन्मुक्तस्य देहादौनिहंता शोधाहमितिकृतोजातोभावोभिप्रायोयस्य अहंमममभिमानस्य अकर्तेत्यभिमानोनास्तीत्यर्थः देहादौनास्तिबुद्धेःस्वतः निष्ठत्वात्कर्मस्वनसज्जते अतएवबुद्धिर्यस्यनलिप्यतेरश हंति सलोकानिमान्प्राणिनोहत्वापिन हंतिलोकदृष्ट्याहननकर्तापि विवेकदृष्ट्याहन्मीतिभावात् नवाहननफलपापादिनानिबध्यते यद्यपिजीवन्मुक्तस्य प्राक्तनपालितहिंसादिधर्मस्य संस्कारवशात् केवलंहिंसादिदुष्टकर्मकर्तृत्वं तथापि हत्वापीत्यपिनाकैमुत्यन्यायेनजीवन्मुक्तोकर्तृत्वमनभिसंधानवान् इत्युच्यते यद्वात्मनोकर्तृत्वमनुसंदधानः सोविहितकर्मकुर्वन्नपि तत्फलेनननलिप्यते नहिवियत्स्वधर्माभिप्रायेणाहत्वापीत्युक्तं आत्मनोकर्तृत्वज्ञाननत्त्रवियः स्वधर्मेयुद्धेसर्वलोकान्हत्वापितत्फलेनलिप्यते गुणादिजन्यस्वर्गादिनानलिप्यतइत्यर्थः नवानिबध्यतेत तत्फलभोगपरंपरायांसंसारीनभवतीत्यर्थः १७ ॥

ज्ञानमेवजयती टीका ९ ॥

यद्येवंतर्हिनेत्रवान्कर्मनतिः कोभवेदित्यपेक्षायामाह यस्य नाहमितियस्यसंबंधात्वत्तस्यसदाचार्योपदेशावतः शुद्धस्वभावोऽहमेवंदकरोमीतिस्वकर्तृत्वविशेषणोमनोहतिर्विशेषानाहंकृतोऽहमेवंदकरोमीत्यभिमानकृतोनभवेत् यस्यवृद्धिर्नलिप्यतेऽहमिष्टकारीतिकर्ममदीयेनास्मिन्कर्मणिममकर्तृत्वाभावादेतत्फलमपिमानवभावितस्य

+ तदेवं चतुर्भिः श्लोकैरनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलं भवत्यत्यागिनां प्रेत्येति चरण
त्रयं व्याख्यातं इदानीं न तु संन्यासिनां क्वचिदिति तुरीयं चरणमेकेन व्याचष्टे ॥

परमेश्वरार्पितत्वादित्येवं यस्य च बुद्धिर्न लिप्यते स पुरुषः इमान् वृत्त
देशपरिमितान् लोकान् भवनानि हत्वापि न तु भीष्मद्रोणादीनेव न
हन्ति हननक्रियायाः कर्ता न भवति न च निबध्यते सर्वलोकहनन
रूपेणानेन कर्मणा च न लिप्यते १७ ॥

मधुसूदनी टीका ९ ॥

+ यस्य पूर्वोक्तविपरीतस्य शुभैः कर्मभिः क्षपितेषु विवेकविरोधि
पापेषु नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयेन भवतः शास्त्रा
चार्योपदेशन्यायजनिताकर्त्रभोक्तृस्वप्रकाशपरमानन्दाद्वितीय
ब्रह्मात्मसाक्षात्कारस्य तेन साक्षात्कारेण बाधितेन भवमहं कृतोऽहं कर्तेत्ये
वंरूपो भावः प्रत्ययो यस्य भावः सद्भावश्च अहंकृतोऽहमिति व्यपदेशाद्धी
नः अहंकारबाधेन शुद्धस्वरूपमात्रपरिशेषादिति वा अहंकृतोऽहं
कारस्य भावः तादात्म्यं यस्य न विवेकेन बाधितत्वादिति वा बाधिता
नुवृत्त्यापि तत्प्रपञ्चाधिष्ठानाद्वयमायया अपि सर्वात्मनि कल्पि
ताः सर्वकर्मणां कर्तारो मया स्वप्रकाशचैतन्येनासंगेन कल्पितस्वदेये
न प्रकाश्यमाना अहं तु न कर्ता किं तु कर्तृत्वव्यापाराणां साक्षिभूतः
क्रियाज्ञानशक्तिमदुपाधिद्वयविविक्तः शुद्धः सर्वकार्यकारणासंबद्धः
कूटस्थो नित्यो निर्द्वयः सर्वविकारशून्यः अप्रमेयोऽयं पुरुषः साक्षी चे
ता केवलो निर्गुणश्च अप्राणो ह्यमनाः शुभ्रो अक्षरात्परतः परः अजआ
त्मा महान् ध्रुवः सलिल एको द्रष्टाद्वैतः अजो नित्यः शाश्वतोऽयं पुराणो
निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् इत्यादिश्रुतिभ्यः अविका
र्योऽयमुच्यते प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहंकार
विमूढात्मा कर्ताहमिति मन्यते न च विद्वान्सज्जते शरीरस्थोऽपि कौन्ते
य न करोति न लिप्यते इत्यादिस्मृतिभ्यश्च तस्मान्नाहं कर्तेत्येवं परमार्थ
दृष्टेः बुद्धिरन्तःकरणं यस्य न लिप्यते नानुशयिनी भवति इदमहम
कार्षमेतत्फलं भोक्ष्ये इत्यनुसंधानेन कर्तृत्ववासनानिमित्तलेपो न
यस्य स च शुभेषु कर्मसु हर्षरूपः पापेषु पश्चात्तापरूपः ईदृशेन हि विवे
नापि लेपेन बुद्धिर्लिप्यते कर्तृत्वाभिमानबाधात् तथा च श्रुतिः नैनं
कृताकृते तपतः यतमहं वेत्तेन नतरत इत्यतः पापमकरवमित्यतः कल्या

श्री॰
गी॰टी॰
भ॰

णामकरवमित्यभेउहेवेषपतेनरतनेनेकृत्ताकृतेनपतः तदेत
द्वाप्युक्तमेषनिमित्तमहिमाबाल्मणस्पनवद्देतेकर्मणानोकर्ता।
यान् तस्यैवस्यामसर्वविदेविदित्वान्नलिप्यतेकर्मणापापकेनेति
पापकेनेतिउणस्याष्टपलत्वंणवद्देनेकर्तायानितिचउणप
पयोः पतितोषपतिनापाभिशाठेपवेयस्यनाहंकृतोभावोउद्दिष
सनलिप्यते तस्यैवीकृत्तुमतिनिविलत्वणः सम्मतिः परमार्थदर्शी
पयपसकर्तारमात्मानेकेवलेसकर्तृत्वाभिमानाभावादनिष्टादि
त्रिविधकर्मफलभागीनभवतीयेनावतिशास्त्रार्थहंकाराभाव
हिलेपभवेस्तावमाहत्वेति हत्वापिसत्वापिसइमान्लोकान्
प्राणिनः नहंतिहननक्रियायाः कर्तानभवति श्वकर्त्वस्त्रूपस्मा
त्वाकारात् ननिवध्यतेनापितत्कार्येणाधर्मफलेनसंवध्यते
श्रवनाहंकृतोभावइत्यस्यफलंनहंतीतिवद्धिर्नलिप्यतइत्यस
स्यफलंननिवध्यतेइतिश्रुतेनचकर्मालेपप्रदर्शनेनतिशयमा
श्रस्केननसर्वप्राणिहननेसंभवतिहत्वापीतिकर्तृत्वाभ्यनुज्ञा
वाधितकर्तृत्वहष्टालौकिकानहंतीतिकर्तृत्वनिषेधः शास्त्री
ययापरमार्थदृष्ट्येतिनविरोधः शास्त्रादौनायंहंतिनहन्यते
इतिसर्वकर्मासंस्पर्शित्वमात्मनः प्रतिज्ञायनजायतइत्यादिहे
तुवचनेनसाधयित्वावेदाविनाशिनमित्यादिनाविदुषः सर्वा
कर्माधिकारनिवृत्तिः संक्षेपेणकामयेचतेनतेनप्रसंगेनप्रसा
रितेहृणासे यनावतत्प्रदर्शनायोपसंहृताचनहंतिननिवध्यत
इति एववाविधाकल्पितानानामुपिष्ठानायतनात्मकृतानासर्वथा
मपिकर्मणामात्मविधुपासमुक्त्वेदापपतेः परमार्थसन्न्यासिना
मनिष्टादित्रिविधं कर्मफलंनभवतीत्युपपन्नं परमार्थसन्यास
श्रोकर्तात्मसाक्षात्कारएवजनकादीनामेनादर्शसन्यासित्वपिव
लवत्प्रारब्धकर्मवशात् वाधितानुवृत्त्यापरपरिकल्पनयावाक
मर्दर्शनेनविरुद्धपरमहंसानामीदृशानामिन्द्रादीनांचन् भुत
पवस्तानफलभ्न्नेविदतंसन्यासउच्यते साधनभूतस्तुविविदि
षासन्यासोऽनेवविधोपिश्रमसन्नरकोलत्तानोप्यन्नावेवा।

योभवतीतिवक्ष्यते एवमधिष्ठानादिपंचकस्यक्रियाहेतुत्वेना।
त्मनः सर्वकर्मासंस्पर्शत्वमुक्तंसंप्रतितमेवार्थंज्ञानज्ञेयादिप्रक्रि
यारचनयात्रैगुण्यभेदव्याख्ययाचविवरीतुमुपक्रमते १७ ॥

सदानंदी टीका ११ ॥

श्लोकैश्चतुर्भिरेवैतद्गौणसंन्यासिनांफलं अनिष्टादित्रिधायोक्तं
व्याख्यातंहेतुभिः सह १ इदानींतुर्यपादेनआवेष्टमुख्यतस्य स्व
वीक्तविपरीतस्यसंस्वब्रह्मविदःसतः २ शास्त्राचार्योपदेशाभ्यांस
स्फूर्तात्मैकात्म्यमतेः स्वप्रकाशचिदानंदाकर्तृभोक्तात्मवेदिनः ३
स्वकार्यैर्बाधितेज्ञानेनास्त्येवाहंकृतामतिः अहंकर्तेतिरूपायःस्व
मयत्तस्यनास्तिता ४ नास्यहंकारतादात्म्ययस्यशुद्धात्मदर्शि
नः अधिष्ठानादयःपंचमाययामयिकल्पिताः ५ कर्तारःक
र्मणांनाहंकर्तोदासीनभावनः किंतुसाक्षीतयातेषांव्याप्यतेरव
भास्करः ६ इत्येवयस्यशुद्धात्मनेतेनाहंकृतिर्नतु यस्यातःकारण
बुद्धिर्नैवानुशायिनीफले ७ अकार्यमिदमत्राहंभोक्ष्यएतत्फलेति
ति कर्तृत्ववासनाहेतुर्लेपोनानुशयात्मकः ८ सपरमार्थदृशा।
र्त्स्यपश्यन्नात्मानमक्रियं हिंसित्वाप्यखिलांल्लोकान्प्राणिनःका
लधर्मिणः ९ हननक्रियायाःकर्तानभवत्यनहंकृतेः नचाथ
मेफलेनासौसंबध्यतउदारधीः १० अत्रनाहंकृतोभावोनहंतीत्य।
स्तित्वफलं बुद्धिर्नलिप्यतेत्वस्यननिबध्यतइत्यपि ११ अनेनाति
शयोक्तेनकर्मालेपःप्रदर्शितः हत्वापीतितुलोकिकाद्दृष्ट्या
बाधितेयरिते १२ शास्त्रीययानहंतीतितुविरोधोमनागपि एवं
मायाकृतेसर्वव्याकर्तृत्वस्वजगत् १३ मुख्यसंन्यासिनोनास्ति
त्रिविधकर्मणःफले परमार्थिकसंन्यासोब्रह्मबोधोनचापरः १४
ब्रह्मात्मैक्यापरिज्ञानेनशुद्धानेसकार्यके स्वतःसिद्धोस्तिसंन्यासः
सर्वेषामेवकर्मणां १५ संन्यासिनोपिपूर्वेषांजनकादिमहीभृतां
प्रारब्धकर्मणांतेषांलोकदृष्ट्याक्रियावतां १६ तटस्थानांक्रिया।
कापिवकर्तानाकर्मवाक्वचित् भिक्षाटनादिकेकर्मयथासंन्यासिनो।

श्री॰
गी॰टी॰
अ॰

८५

गधित^

यिया ८ ^ मत्वेवयस्य कारणेसर्वथाभवेत् तथातत्वविदांसर्वक
मैश्चोनेवलौकिके १८ रहस्यानामपिस्त्रीयद्दृष्णावायितमेवसत्
नवेपकेयतस्तेषांप्रतिगात्मनिकेवले १९ सदाश्रितिनेदेहादौज
उवगौविनश्वरे श्रतोनिरंकुशाहमिः कृतकृत्यतयाविदां २० यस्माद्दे
वजषट्पदीमतिरियेमकाविलाहेकाति स्वात्मानंरमतेनकुत्रविष
येरतेमनागोपस्पृशति यदीयाम्रतस्वरभूतिनयियेकाविक्लियानस्पृशे
तेश्रीकांतमनर्थयामविभुरंतेममकंदभजे २१ ॥ १७ ॥

नीलकंठी टीका १८ ॥

द्वितीयंप्रयोजनमाहयस्येति यस्यप्रमातृभावः प्रमातृप्रमात्रस्तृ
पश्चात्मा नाहंकृतः शुद्धमिवकृतः अहंकारानादात्म्यापितोऽहं
कृतस्तथान यस्यबुद्धिर्नलिप्यते आत्मभावेनउदितानभवति
यस्यबुद्धेर्व्यतिरिक्तमात्मानंपश्यतोबुद्धिधर्माः कर्तृत्वादयोनात्म
निप्रतीयंतेइतिकर्त्रात्मवादितार्किकनिरासः यस्यचआत्मधर्मो
रासः विदचितोरन्योन्यस्मिन्नतोन्यधर्माध्यासोवाध्यतइतिद्रः एवं
दिसर्गनिषेधेनभोक्तृत्वाभावोदर्शितः हत्वापिसइमांल्लोकान्न
हंतिननिबध्यतेइतितत्त्वतिमात्रे कर्तृत्वमेववाधेनहेतुत्वाद्यो
गात् इत्यपटवकर्तृत्वानहत्वावपिहन्तनक्रियायांश्चवनेकस्य
रागद्वेषादेरभावाच्च एतेनात्मनस्तात्विकमकर्तृत्वंभावयताक
नेकर्मतात्विककर्तृत्वाभिमाननिमित्तेस्वफलेप्रसक्तेतंनाहंनीति
दर्शितं नहिराज्ञसर्वस्वबहिंकृत्वाप्रहरतः सर्वतोभजेदशना
दिफलंभवति सर्पवत्तथाज्ञवेतत्स्तत्वस्येवतन्तद्दिदमपिज्ञेय
म १७ ॥

आनंदीटीका १८

एतदेवप्रकटमाह अहमेवैकाकीकर्तातत्र पंचकस्यामग्रीत्वे
वप्रकारोहंकृतोभावोयस्यनास्ति यस्यचैवंसात्विकस्यबुद्धि
र्नलिप्यते पंचककर्मविनास्वात्मनेवमभाप्यभकर्तृत्वनम

नाते स इमांल्लोकान्हत्वापि न हंति कर्तृत्वानभिमानात् न बध्यते
न च तस्य तत्कर्म बंधकमित्यर्थः अत्र कपिलैर्यदुक्तम् आत्मनः
स्वस्वभाव एव कर्तृत्वं नास्ति विक्रियाप्रसंगादिति तदयुक्तम्
नहि क्रियायोगमात्रेण विक्रिया नहि पचनक्रियादेवदत्तस्य वि
क्रियास्वरूपविच्युतिर्भवति विक्रिया हि सावयवस्यावयवविश्ले
षादिना स्वर्णादेः कुण्डलत्वादिनेवेति शास्त्रसिद्धान्तः १७ ॥

रामकंठीटीका १४

त्समर्थं सर्वज्ञानचक्षुषा पश्यतो तत एव तस्य ताद्दशी हति प्रतिपदयितुमाह ॥

न त्र यथोक्तस्य त्यागिनः परमा

यस्यात्ममयसमस्तवस्तुनो भावश्चिन्न हृतिर्नाहंकृतो देहादावनिमे
हंमत्ययग्रहणेन संपादितो न एव यस्य बुद्धिः संविन्न लिप्यते रागद्वे
षादिभिर्मलैर्मायोपहतसमस्तजीवनिबद्धैर्न कलुषीक्रियते स परमे
श्वरभावसमाविष्टः कर्मेहयोऽनुभवस्थितान् लोकान्हत्वाप्यापाद्या
पि न निबध्यते न तद्दुष्यसाधनेन क्रियाफलेन युज्यते पारमार्थिक
स्यानित्यस्य ब्रह्मस्वरूपस्यात्मनो नानाभावाच्छरीरादेश्चानित्यविनश्व
रस्वभावत्वादत्र नायं हंति न हन्यते इत्यादिना प्रतिपादित एव हेतुः अ
कु अतस्त्वं यथोक्तत्यागवान्कार्यकर्मेदमाचरेत्यर्थः (अथ त्यागपत्या
गिशाद्यप्रतिपादितयोगिसंसारिपुरुषविषयत्रयाज्ञानकर्मक
र्तॄणां गुणनिमित्तकं भेदं प्रतिपिपादयिषुः सर्वदेहसाधारणयो
ज्ञानकर्मणोः फलसंपत्तिहेतुं तावत्प्रतिपादयितुमाह १८ ॥

अथ संन्यासिनो लक्षण माह ॥

लासिकी टीका

+यस्य स्वं स्वरूप प्रतिष्ठस्य कर्मकर्तुरपि अहंकृतो हंकारस्य भावः स्व
भावः अहं करोमीत्येवं देहाद्यभिमानाभावान्नास्ति बुद्धिश्च य
स्य न लिप्यते नानुशायिनी भवति स पुरुषश्रेष्ठ इमान्योऽनुभवस्थि
तानिमान्सर्वान्वा लोकान्प्राणिनो हत्वापि न हंति कर्तृत्वाभिमा
नाभावात् न निबध्यते तत्फलेश्च न [illegible]युज्यते वासनानादानात्
निष्ठतु तावत्कर्महेतोः पंचविधत्वं लोकप्रसिद्धं त्रैविध्यमेव ज्ञान
कर्महेतोः प्रतिपादयामीत्याह १२

पंचोलीटीका

कः पुनः सन्मतिः यः पश्यति स स्वमतार यस्येति यस्य शास्त्राचा
र्योपदेशाभ्यां संस्कृतांतःकरणस्याहंकृतोहंकर्तेत्येवंलक्षणोभा
वो न भवति यस्य बुद्धिरंतःकरणं मया कर्म कृतं मम स्य कर्मणः फ
लं स्वर्गनरकादि प्रहं भोक्ष्ये इति न मम तेन लिप्यते स बुद्धिरिमा
न्लोकान्सर्वान्प्राणिनः हत्वापि लोकदृष्ट्या हत्वेते कृत्वापि परमा
र्थतो पि न हंति न निबध्यते न तस्य फलेन संबध्यते १७

रणवीरसमिद्धोयिनी ॥

अत एव तस्य स्तुतिं प्रतिपादयति यस्येति यस्य कर्मानुष्ठातुः अह
मेव करोमीति भावो मानसो व्यापारो न भवति परमेश्वरस्यैव सर्व
कर्तृत्वात् अत एव यस्य बुद्धिर्न लिप्यते प्रोक्तलक्षणाना हेयादिम
लैर्न कलुषीक्रियते स भवादृशः कर्माधिकारी इमान्योद्धुमवस्थि
तांल्लोकान्हत्वापि न हंति हिंसाजन्यपापानाक्रांतबुद्धित्वात् अत
एव न तं निबद्धो भवति १७ ॥

मधुभाष्य

यस्येति यस्तोपपद्यते सईश्वरहंकारीव एवंमर्दिन
पुरुषमपेक्ष्य विधिः अकर्तृत्वादित्यत आह १७ ॥

भाषा अनुवादः ॥

जिस को कर्म लेप नहीं है ऐसा सन्मति कौन है इस अपेक्षा से कहते हैं कि मैंने यह कर्म क्रिया और मैं कर्त्ता हूं ऐसी वासना जिस के नहीं है अथवा शरीर और इंद्रीमात्र को कर्तत्व देखने से अहंकार स्वभावरूप कर्तत्व का भी लेश जिसको नहीं है इस हेतु से जिस की बुद्धि इष्ट अनिष्ट विचार से सकल कर्मोंमें आसक्त नहीं होती है ऐसा जो देहादि से भिन्नरूप आत्मदर्शी पुरुष प्राणियोंको लोक दृष्टि से हनन करके भी सब में अभिन्नरूप आत्मदृष्टि हेतु से किसी का भी हनन नहीं करता है और कर्मफल से बन्धको नहीं पावता है सत्वशुद्धि के द्वारा अपरोक्ष कहे प्रमत्त ज्ञान उत्पन्न हेतु से निष्काम कर्मके द्वारा इसको बन्धनकी शंका और कहा है यह ५ अध्यायके १० श्लोक में कह चुके हैं कि जो कर्म फलकी आसक्ति छोड़ भगवदर्पण पूर्वक कर्मका अनुष्ठान करते हैं वे मनुष्य जलके बीच वर्तमान पद्मपत्र के समान पुण्य पाप समस्त कर्म से अलग रहते लिप्त नहीं होते हैं १७ ॥

दोहा

यादि अहंकृति भाव नहि याकी बुद्धि लिपे न सो हन्तके यह लोक को हनेन फिर बंधे न १७

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः १८

शांकरभाष्यटीका १॥

अथेदानीं तेषां कर्मणां प्रवर्तकमुच्यते ज्ञानमिति ज्ञानं ज्ञाय
तेऽनेनेति सर्वविषयविशेषेणोच्यते तथा ज्ञेयं ज्ञातव्यं तदपि
सामान्येनैव सर्वमुच्यते तथा परिज्ञातोपाधिलक्षणोऽविद्याक
ल्पितो भोक्ता इत्येतत्त्रयमेषामविशेषेण सर्वकर्मणां प्रवर्तिका
त्रिविधा त्रिःप्रकारा कर्मचोदना ज्ञानादीनां हि त्रयाणां सन्निपाते
हानोपादानादिप्रयोजनः सर्वकर्मारंभः स्यात्ततः पंचभिरधिष्ठा
नादिभिरारब्धं वाङ्मनःकायाश्रयभेदेन त्रिधा राशीभूतं त्रिषु क
रणादिषु संगृह्यते इत्येतदुच्यते करणं क्रियतेऽनेनेति बाह्यं श्रो
त्रादि अन्तःस्थं बुद्ध्यादि कर्मेप्सिततमं कर्तुः क्रियया व्याप्यमानं क
र्ता करणानां व्यापारयितोपाधिलक्षण इति त्रिविधः त्रिःप्रकारः
कर्मसंग्रहः संगृह्यतेऽस्मिन्निति संग्रहः कर्मणः संग्रहः क
र्मसंग्रहः कर्म एषु हि त्रिषु समवैतीति तेनायं त्रिविधः कर्मसंग्रहः १८

आनंदगिरिकृतटीका २॥

शास्त्रार्थोपसंहारानन्तर्यमथेत्युक्तं मिदानीमिति प्रवर्तकापेक्षा
पेक्षावस्थोक्ता कर्मणां येषु विदुषां नाधिकारो विदुषां चाधिकार
स्तेषामित्यर्थः ज्ञानशब्दस्य करणव्युत्पत्त्या ज्ञानमात्रार्थत्वमाह ज्ञा
नमिति ज्ञेयशब्दस्यापि तद्वदेव ज्ञानत्वमात्रार्थत्वमाह तथेति उ
पाधिलक्षणत्वं तत्त्वप्रधानत्वमपहर्तुं तस्याविद्यात्वार्थमवि
द्याकल्पितत्वविशेषणमेतदेव त्रयं सर्वकर्मप्रवर्तकमित्याह इत्ये
तदिति सर्वकर्मणां प्रवर्तकमित्यत्र हेतुमाह चोदनेति क्रियायाः
प्रवर्तकं वचनमिति भाष्यानुसारेण चोदनाशब्दार्थमाह प्रवर्ति
केति सर्वकर्मणामित्युक्तं संबंधः त्रैविध्ये ज्ञानादीनां साधु
त्वं कर्मणां चोदनेति विग्रहः तेषां सर्वकर्मप्रवर्तकत्वमनुभवेन

श्री॰
गी॰ टी॰
अ॰

९७

+इत्येतदेवोपपादयितुं कर्मचो
दनायाः कर्माश्रयस्य च कर्म
फलादीनां च त्रिगुणात्मकत्वा
त्रिगुणस्यात्मनस्तत्संबंधो ना
स्तीत्यभिप्रायेण कर्मचोदनां
कर्माश्रयं चाह॥

साधयति ज्ञानादीनामिति हानोपादानादीत्यादिग्रहणेनोपेक्षावि
षयिता करणमित्यादेस्तामर्थमाह तत इति ज्ञानादीनां प्रत्येक
त्वादित्यर्थः उक्तेर्थे श्लोकभागमवतारयति इमेतदिति वाह्यम
न्तस्यैव द्विविधं करणमुत्तमा कथयति करणमिति उक्तलक्ष
णं कर्मैव स्फुटयति कर्तेति स्वतंत्रो हि कर्ता स्वातंत्र्यं च कार
कप्रयोज्यस्य तत्प्रयोक्तृत्वमित्याह कर्तेति कथयत्युक्ते त्रिविधेक
र्मेत्यस्यार्थमाह कर्मेति कर्मणो हि प्रसिद्धकारकाश्रयत्वमिति।
भावः १८ ॥

स्वामिकृत टीका ३ ॥

+ज्ञानमिष्टसाधनमेतत्स्वनिबोधः ज्ञेयमिष्टसाधनं कर्म परिज्ञा
ताप्येवंभूतज्ञानाश्रयः एवं त्रिविधा कर्मचोदना चोद्यते प्रवर्त्य
तेनयेति चोदना ज्ञानादित्रितयं कर्मप्रवृत्तिहेतुरित्यर्थः यद्वा
चोदनेति विधिरुच्यते तदुक्तं भट्टैः चोदना चोपदेशश्च विधिश्च
कार्यवाचिन इति तेनायमर्थः तदुक्तलक्षणत्रिगुणात्मके
ज्ञानादित्रयमवलंब्य कर्मविधिः प्रवर्तत इति तदुक्तं त्रैगुण्य
विषया वेदा इति तथा च करणं साधकतमं कर्म च कर्तुरीप्सि
ततमं कर्ता क्रियानिर्वर्तकः कर्मसंग्रहलनुस्मिन्निति संग्रहः क
रणादित्रिविधं कारकं क्रियाश्रय इत्यर्थः संप्रदानादिकारक
त्रयं तु परंपरया क्रियानिर्वर्तकमेव केवलं न तु साक्षात् क्रिया
याश्रय अतः करणादित्रितयमेव क्रियाश्रय इत्युक्तं ॥

पिशाचभाष्य टीका ४

ज्ञायतेनेनेति ज्ञानं प्रकाशनं ज्ञायत इति ज्ञेयं ज्ञानक्रियायाः क
र्मीभूतं परिज्ञाता ज्ञानक्रियाकर्ता त्रिविधा कल्पितमेतत्त्रिविधं
कर्मणः क्रियायाश्चोदना प्रवर्तिका उपलक्षितं यस्य त्रिविधोऽपि प्रवृत्ताः
नेतिकरणं श्रोत्रादि बुद्धीन्द्रियं परिज्ञातात्मिका क्रियते तेन
क्रियायामभिमतमं कर्ता वागादि कर्मेन्द्रियं च कर्मकर्तुः
कर्तामीप्सिततमं निष्पन्नोत्पत्तं त्रितयं क

+ सर्वमिदं कर्तृत्वाद्यनुसंधानेन सत्वगुणवृद्ध्यैव भवतीति सत्वस्योपादेयताज्ञापनाय
+ कर्मणि सत्वादिगुणकृतं वैषम्यं प्रपंचयिष्यन् कर्मचोदनाप्रकारं तावदाह ॥

र्मसंग्रहः कर्म क्रिया तल्लक्षणोऽसौ संगृह्यते आश्रीयतेऽनेने
ति संग्रहः करणकर्मकर्तृभिर्हि सर्वं कर्म समवेतमतोऽयं त्रिविधः
कर्मसंग्रह उच्यते १८ ॥

रामानुजभाष्यटीका ५ ॥

+ ज्ञानमिति ज्ञानं कर्तव्यकर्मविधिविषयं ज्ञानं ज्ञेयं कर्तव्यं कर्म परि
ज्ञाता कर्मणः तस्य बोद्धेति त्रिविधा कर्मचोदना बोध्यबोधबोद्धृ
युक्तो ज्योतिष्टोमादिकर्मविधिरित्यर्थः तत्र बोध्यरूपं कर्म त्रिवि
धं संगृह्यते करणं कर्म कर्तेति करणं साधनभूतं द्रव्यादिकं कर्म
यागादिकं कर्म यागादिकर्तानुष्ठातेति १८ ॥

अभिनवगुप्तकृतटीका ६ ॥

कर्मणि चोदना प्रवृत्तीच्छा ज्ञानत्रयमेवैषामवबोधमात्रनिष्ठत्वाज्ज्ञाने
ज्ञेयत्वान्स्फुरति वासनानामेषामेव संग्रहणरूपे यत्फलाभिसंधा
नेनात्मीयबुद्ध्या स्वीकरणं अहमनेनोद्देश्येन मया कृतमिमेवरू
पेत्त्वमये तथा निर्वर्तनावसरे करणकर्मकर्तृशब्दाभिधेयत्वमावि
ष्ट्वात् अतो योगिनामावेशो नास्तीति नात्र निकरणादिगिरां प्रसं
गो नास्ति अपि तु ज्ञानादिमात्रमेवतात्पर्यम् १८ ॥

परमार्थप्रपा टीका ७ ॥

तदेवोपपादयितुं कर्मचोदनायाः कर्माश्रयस्य च कर्मफलानां च त्रि
गुणात्मकत्वात् त्रिगुणास्यात्मनस्तत्त्वतो नास्तीत्यभिप्रायेणाह ज्ञान
मिति ज्ञानमिष्टसाधनमिति बोधः ज्ञेयमिष्टसाधनं कर्म परिज्ञा
ता एवंभूतज्ञानाश्रयः एवं त्रिविधा कर्मचोदना चोद्यते प्रवर्त्यतेऽने
नेति चोदना ज्ञानादित्रयं कर्मप्रवृत्तिहेतुरित्यर्थः यद्वा चोदनोपदे
शः तदुक्तं चोदना चोपदेशश्च विधिश्चैकार्थवाचिन इति तथा चा
यमर्थः उक्तलक्षणं त्रिगुणात्मकं ज्ञानादित्रयमनुवर्त्य कर्मविधिः
प्रवर्तत इति ज्ञाने करणं साधकतमं कर्म च कर्तुरीप्सिततमं क
र्ता च क्रियानिर्वर्तकः कर्म संगृह्यतेऽनेनेति कर्मसंग्रहः १८ ॥

वनमाली टीका ८ ॥

मधु

लं

श्री॰
गी॰ टी॰
अ॰

88

ननु परादेर्जीवो न कर्त्ता तर्हि तेनापि महतस्य विधिनिषेधशास्त्र
स्य वैयर्थ्यं स्यात् तत्राह ज्ञानमिति ज्ञानं विधिविषयं तत्रेच्छा।
प्रयत्नलक्षणा अधिष्ठानादिलक्षणा पुरुषार्थलक्षणं च परिज्ञाता
सर्वज्ञ ईश्वरः सर्वप्रेरक इति त्रिविधा कर्मचोदना कर्मविधिः निमि
त्तं भेदोपचारात् त्रिविधेष्वेकैक एतत्त्रिविधनिमित्तमपेक्ष्य कर्म
विधिः प्रवर्तत इत्यर्थः एतदुक्तं भवति तत्स्वतन्त्रकर्तृत्वे विधिवि
षयत्वप्रयोजके यत्नजीवे प्रतिकर्म विधिवैयर्थ्यं स्यात् तथा स
तोऽस्यापि विधिविषयत्वं स्यात् किं तु परस्य संबन्धितया विधि
ज्ञानं कर्म तत्फलं चोद्दिश्य पश्चात् तदनुगुणशुभप्रयत्नाधिष्ठानादि
त्रिधानं कर्म संबन्धः फलभाक्त्वास्ति तत्प्रतिकर्मविधयः प्रवर्तन्ते
ऽस्मिन्विवदे समस्ते परमेश्वराधीने जीवे इति कथं तत्प्रतिकर्मविध
यः स्युरिति स्वतन्त्रोऽपीश्वरो जीवे विधिज्ञानमस्याधीवेच्छाप्रयत्नौ
कारयितृलोकशरीरादिपंचकारणैः कर्म च कारयित्वा च फलं नि
यमेन ददातीति यद्वा जडउपेक्षयालातस्मीश्वराधीने जीवे ली
सतोऽपि न विधिवैयर्थ्यं स्यादिदं प्रवृत्तविधिवैपृथ्यं यदि जीवस्य कि
यालातस्मलतराकर्तृत्वं सर्वथा स्यात् नैव च ईश्वरायत्तस्यात् स्वा
कारात् ईश्वराधीनापेक्षया तदभावोक्तेः नैवं ज्ञानेच्छालौल्यज
हेति ज्ञानदापरकृतेन तनोदनादिना क्रियावद्भवति नभागेतुक
कारणस्वबलया जीवत्वनादिसिद्धया परमेश्वरप्रसादायत्तया स।
तानल्पया क्रियाशमाकर्तेति उक्तस्तत्प्रतिकर्मविधिरिति विधिज्ञा
नेसममसि नीतापूर्वप्रयत्नादीनेतद्भवसीदं ईश्वराधीनत्वं यथा
निषेकोऽसि तथा करोमीत्याग्रमान्नमिदं ग्रहणपदे ईश्वरस्य
वेकर्मसत्प्रेरकत्वमन्कान्तत्वेरणासर्वौकिककर्मकारणानि संदिष्णा
संक्षेपः कर्मशब्देन तत्कारणानि लक्ष्यन्ते करणानि मध्यमपदलो
पो वा क्रियते नैतेनिकरणमाध्यनो वा कर्मशब्दः यद्वा दैवशब्दो
दितेश्वरस्य वस्त्वकर्तृत्वात् स्वतन्त्रात्वं तेनकर्त्रीरीशजीवयोः क

र्शहेतोरुक्तः कारणानां त्रैविध्यमित्यर्थः केचित्तु अधिष्ठानादि।
पंचकस्य क्रियाहेतुत्वमुक्त्वा तस्यैव ज्ञानज्ञेयादिरचनया त्रैगुण्यभे
दं व्याख्यातुमुपक्रमते ज्ञानमिति ज्ञानं विषयप्रकाशक्रिया ज्ञेय
तस्य कर्म परिज्ञाता तस्याश्रयः कर्ता एतत्त्रयं सकर्मणां प्रवर्तकं त
देवाह त्रिविधा कर्मचोदना चोद्यतेऽनया प्रवर्त्यते कर्मस्विति चोदनापरशब्दा
नयापर्नीयते तथापि वचनत्वं विहाय प्रवर्तकमात्रमिह लक्ष्यते ज्ञा
नादित्रयं वचनत्वाभावात् तथा करणं साधकतमं बाह्यं श्रोत्रादि तस्यबु
द्ध्यादि कर्म कर्तुरीप्सिततमं क्रियया व्याप्यमानं उत्पाद्यमाप्यं विकार्यं
संस्कार्यं च कर्ता स्वतंत्रः कारकाणां प्रयोजक इति सकलकारकाणामप्यो
कात्रिविधस्त्रिप्रकारः कर्म संगृह्यतेऽस्मिन्निति कर्मसंग्रहः कर्माश्रयः
प्रेरणीयस्यैवं त्रिविधा कर्मचोदना कर्म क्रियारूपं व्यापाररूपार्थ
भावना तद्विषया चोदना प्रेरणा विधिरूपा शाब्दीभावनेत्यर्थः तथा क
रणमेतत्कर्तृत्वनाकसाधनेयान्वयः कर्मभाष्ये हगादि फलकर्मापि फ
लकामवान्पुरुषः क्रियायां निर्वर्तकः स एवं त्रिविधः कर्मसंग्रहः क
र्मणां व्यापाररूपस्यार्थभावनायाः संग्रहः संक्षेप इत्यर्थः ॥ १८ ॥

कृतमैवजयंतीटीका ९ ॥

पुरुषस्य सत्त्वगुणं हेतोर्वा कर्तृत्वायत्तं संधानेऽभवमतः सत्त्वगुणस्यो
पादेयत्वं कर्मणां समादिगुणकृतत्वेन सम्यक्प्रपंचयिष्यन्नादौ त्रि
विधायाः कर्मचोदनायाः प्रकारत्रयमाह ज्ञानमिति ज्ञानमिष्टकर्म
साधनबोधः ज्ञेयं कर्तव्यमिष्टसाधनं कर्म परिज्ञाता कर्तव्यस्य कर्म
णो बोद्धा स एवं त्रिविधा बोधबोद्धव्यबोद्धृभेदेन त्रिकरूपा कर्मचोदना
बोधनप्रवर्तते नयेति चोदना वा उपदेशस्त्रविधिप्रकार्यकाचिता।
इतिभेदोक्तेः तत्त्रिकमेव समुच्चयति करणमिति ज्ञायते अनेनेति क
रणं ज्ञानेन देवकरणं साधकतमं करणकारकमित्यर्थः यज्ञेयंका।
र्येऽसौ ज्योतिष्टोमादि तद्वकर्तुरीप्सिततमं कर्मकारकमित्यर्थः
तेष्वधर्मं ज्योतिष्टोमादि तद्व [illegible]
गस्तत्तस्य कर्मणः परितो नष्टो नेत ज्ञाता बोद्धा स तज्ज्ञानाश्रयत्वात्कि
याश्रयस्य क्रियानिर्वर्तकः कर्तेति कर्तृकारकमित्येवं त्रिविधः कर

२४

श्री॰
गी·टी
प्र·

89

णा कर्म कर्तेति त्रिविधः कर्मसंग्रहः कर्म संगृह्यते स्मिन्निति क
र्मसंग्रहः कर्मविधिर्भवति चोदना संग्रहः यो ऽसौ संप्रदानापा
दानाधिकरणकारकत्रयाणां परंपरया क्रियानिर्वर्तकत्वेन तत्साधा
रणकरणादित्रयाणामन्तःपातादेवमाशयः १८ ॥

मधुसूदनी टीका ॥

ज्ञानं विषयप्रकाशक्रिया ज्ञेयं तेन स्वकर्मपरिज्ञाता तस्याश्रयो भो
क्तान्तःकरणोपाधिपरिकल्पितः एतेषां त्रयाणां संनिपाते हि
हानोपादानादिसर्वकर्मारंभः स्यादतएतत्त्रयं सर्वेषां कर्मणां प्र
वर्तकं तदेतदाह त्रिविधा कर्मचोदनेति प्रवर्तकमुच्यते चोद
नाविधिश्चकार्थवाचिन इति भाष्ये चोदनाचोपदेश।
चनत्वं यद्यपि चोदनापदं शाबरतया प्रवर्तकवचने क्रियाप्रवर्तकव
विहाय प्रवर्तकमात्रमिह लक्ष्यते ज्ञानादिषु वचनत्वाभावात्
एवं च प्रेरणी यत्वं प्रेरकत्वं चात्मान एवात्मन इत्यभिप्रायः त
स्मिन्नन्तर्म क्रियया आप्यमानं व्याप्यमानं विकार्यं संस्कार्यं च
कर्ता चेतरकारकाप्रयोज्यत्वे सति सकलकारकाणां प्रयोक्ता
क्रियाया निर्वर्तकश्चिद्विवर्तोऽपि रूपइति त्रिविधः प्रकारः क
र्मसंगृह्यतेस्मिन्नेवेति संग्रहः कर्माश्रयः चकारार्थादि तिश
ब्दात्संप्रदानमपादानमधिकरणं च गृह्यते अनेनैवं कार।
कषट्कमेव त्रिविधं क्रियायाश्रयेण तत्कृद्दर्श्य प्राप्त्येव सर्थः
कर्मप्रेरकस्य कर्माश्रयस्य च कारकरूपत्वात्त्रिगुणात्मकत्वा
त्संभावो गुणानीते स्वात्मा सर्वकर्मासंस्पर्शी त्वभिप्रायः प्र
यत्नेन लिङ्गादिशब्दस्वरूपेण प्रेरकं परिज्ञातात्तस्य ज्ञानस्य विष
प्रेरणीयः इमे वैचित्र्यविधाकर्मचोदना कर्मक्रियापुरुषव्यापा
रः प्राप्तीभावनानन्दिषयाचोदनाप्रेरणाविधिरूपाशाब्दीभा
वनेत्यर्थः तथाकरणं मेतिकर्तव्यताकसाधनेनयान्वयः कर्म

भावेस्वर्गादिफलेकर्त्तॄफलकामनावान्पुरुषःक्रियायांनि
वर्त्तकइत्येवद्विविधःकर्मसंग्रहः कर्मणःउद्व्यापाररूपस्यार्थभाव
नायाःसंग्रहःसैषैवःनदैवमर्थभावनारूपंप्रयत्नस्यविधेयस्य
भावात्शब्दभावनारूपोविधिर्नस्वद्रुमात्मानेगोचरयतिकारकाप्र
यत्नाद्धिविधेयपोः तदुक्तं द्वेगुणप्रविषयावेदानिसेगुणोभवा
र्थेनेतिकारकाणांत्रेगुण्यरूपत्वमनेनतरमेवव्याख्यास्यतइतनि
मायः प्रत्ययसंगाद्विधिक्षिप्यते प्रवृत्तिहेतुत्वेनप्रेरणानावत्
वैलोकानभवसिद्धाराज्ञाप्रेरितोबालेनप्रेरितोब्राह्मणेनप्रेरितो
हमितिहिप्रवर्त्तमानानावकारोभवतिसाचप्रवर्त्तनाप्रवर्त्तकरा
ज्ञादिनिष्ठानत्वोत्कृष्टस्यनिकृष्टंप्रतिप्रवर्त्तनाज्ञाप्रेषणेति
चोच्यतेनिकृष्टस्योत्कृष्टंप्रतिप्रवर्त्तनायाच्ञाध्येषणेतिचोच्यते
समस्यसमंप्रत्यकर्षणिकर्षविदासीमेनप्रवर्त्तनानुज्ञानमतिरिति
चोच्यतेनवाज्ञादयोज्ञानविशेषाइच्छाविशेषावाचेतनधर्मीप्र
वलोकेप्रसिद्धाःवेदेतुविधिनाहंप्रेरितःकरोमीतिव्यवहारतो
पिभवतितत्रस्वधमचेतनत्वादपौरुषेयत्वाच्चवैदिकस्यविधेर्न।
चेतनधर्मेणाज्ञादिनाप्रेरकतासंभवस्ततःस्वधर्मेणैवस्या।
स्वपरगतव्यापारासंभवात् सएवधर्मस्त्वोदनाप्रवर्त्तनाप्रेर
णाविधिरुपदेशःशब्दभावनेतिचोच्यते नचकेचिदलौकिकमे
वशब्दव्यापारंकल्पयंति प्रमेयत्वमित्येवोपपन्नोलौकिकक
ल्पनासहेतेप्रवर्त्तनाहिप्रवृत्तिहेतुर्व्यापारः विधिशब्दस्यचा
ख्यातत्वेनदशलकारसाधारणोनोपाधिनाप्रकृष्टप्रवृत्तिरूपा
र्थभावनांप्रतिवाचकत्वेनतज्ज्ञानहेतुत्वमितियावत् साचज्ञाने
वानुष्ठानेशकानइतितद्धीहेतोरपिशब्दस्यतहेतुत्वपरंपरया
भवत्येव नत्वविधिशब्दस्यप्रकृष्टप्रवृत्तिरूपभावनाज्ञानहेतु
र्व्यापारस्तद्धावकशक्तिमत्तयाविधिशब्दज्ञाने सएवचतस्यप्र
वृत्तिहेतुर्व्यापारइतिप्रवर्त्तनाभिधानीयकल्पमेतेज्ञानद्वारेणै
वशब्दस्यप्रवृत्तिजनकत्वात् ज्ञानजनकव्यापारातिरिक्तव्या।
पारकल्पनेमानाभावात् ज्ञानजनकस्यव्यापारस्यसत्त्वानेश

श्री॰
गी॰ टी॰

क्तिज्ञानेशक्तिविशिष्टत्वज्ञानेच तज्ज्ञापयोरभ्यन्तरस्यशाब्दभा
वनांशं स्तौयस्य तत्तत्करणत्वमितिविवेकः एवंस्थितेलि
ङर्थः विधिनात्वज्ञानेजन्मनेप्रवर्तनात्वेनाभिधीयतेपि इति
विधिज्ञानमेवशाब्दभावना तस्याश्चपुरुषप्रवृत्तिरूपार्थभावनै
वभाव्यतयान्वेति करणतयाचपुरुषप्रवृत्तिवाचकशक्तिम
द्विधिज्ञानमेव भावनाख्यस्यापिफलावच्छिन्नाभावनांप्रति
करणत्वेफलकारणत्वादेवयागस्यस्वर्गभावनांप्रतिनविकल्प
ते तथाचपुरुषः स्वप्रवृत्तिंभावयेत् नेतिकरणांशस्वरूपकथ
मित्याकांक्षायामर्थवादैः स्तुत्वेनीतिकर्तव्यतांशपूरणे ३
पंगोः क्रत्वेतिलौकिकेविधौवरुत्तोराजीवदन्तास्यपस्या
समांसमीनेन्यादिलौकिकार्थवादवत् नत्वाख्यानत्वेनग्र
पिशाद्धाड्पस्थितापुरुषप्रवृत्तिभावितयान्वेतकरणतकथ
मन्वपस्थितमन्वेतितुच्यतेविधिशब्दस्यावच्छेदेनोपस्था
नातद्धभयवैशिष्ट्यंतत्रिष्टज्ञानताचमननेतिवाचकशक्ति
मतयाज्ञानेविधिशब्दउपस्थितएव श्रुतेनयच्छक्यातत्राव
येदितिप्रतिशाब्दस्याध्यापविधिनाप्यर्थोक्षराणितिरिक्तेनोप।
स्थितमपिशाब्दबोधेभासतएवयथाज्योतिष्टोमादिनामधे
यपदयावालिंगादिनियोज्योमंत्रः तद्वत् भावार्थहृदिदधिक
रणादनपस्थितविशेषणविशिष्टत्वदिदंभवतितन्वनभि
धानस्यनतेरवलक्षणयातद्धभयतिष्ठज्ञातताया स्तन्मन
पन्नएव नन्वकिंप्राशस्त्यं ततावत्फलसाधनत्वेतस्ययागेन
भावयेत् स्वर्गमितिपर्थीभावनान्वयवशेनविधिवाक्यादेवल
ब्धत्वात् नान्यत् प्रवृत्तावनुपयोगात् उच्यते बलवदनि
ष्टानतुबंधित्वप्राशस्त्यं तदवेष्टहेतुत्वज्ञानादलभ्यते ३ष्टहे
तावपिकलंजभक्षणादावनिष्टहेतुत्वस्यापिदर्शनात् वि

हितश्रेयनफलस्यवशाद्वचनस्यानिष्टानवैधित्वेदहे श्रुतोयावत्सा
धनस्यफलस्यानिष्टहेतुत्वेनोच्यतेतावदिष्टहेतुत्वेनज्ञानेपितद्ब
पुरुषोनप्रवर्तते श्रुतएवोक्तफलतोपिचयत् कर्मतानर्थेनानुबद्ध
तेकेवलमपीतिहेतुत्वानद्वेषमिश्रमिकथ्यतइति ततः स्वतः फलतो
वानर्थानन्वैधित्वरूपशास्त्रबोधनेनाधिवासविधिशक्तिस्तम्भ
ति कउक्तंभः स्वतः फलतोवानर्थानन्वैधित्वेशेकायाः प्रवृत्तिप्रति
वैधिकायाविरामः इदमेवचविधेः प्रवृत्तिजननेसाहाय्यमर्थ
वादैः क्रियतइति विधिरर्थवादसाकांक्षः एवमर्थवादाश्चाप्यभिध
याभाणावाहत्याभूतमर्थंवदन्तोपिस्वाध्यायविध्यापादितप्रयोज
नवत्त्वलाभायविधिसाकांक्षाः सोयंनष्टाश्वदग्धरथवत्संप्रयोगः
यथैकस्यदग्धस्यरथस्यजीवद्भिरश्वैरस्यविद्यमानरथस्यावि
द्यमानाश्वस्यसंप्रयोगः परस्परसार्थकत्वायतथार्थवादानांप्रयोज
नांशोविधिनाप्यन्तेविधेश्चप्राशस्त्यभावनायाइतिकर्तव्यतांशोऽर्थ
वादैरितितदिदमुभयोः श्रवणादृष्टमेववाक्यं एकस्यश्रवणाद
नमस्यकल्पनयादृष्टार्थीयथावसन्तायकपिंजलानालभतेइति
विधायार्थवादांशोऽश्रुतोपिकल्प्यतेप्रतितिष्ठन्तिहवायएतारात्री
रुपयंतीत्यायर्थवादेविधेशः तथाचसूत्रं विधिनात्वेकवाक्यत्वा
त्स्तुत्यर्थेनविधीनांस्युरिति विधिनास्तुतिसाकांक्षेणप्रयोजन
साकांक्षाणामर्थवादानामेकवाक्यत्वाद्विधीनांविधेयानांस्तुत्यर्थे
नस्तुतिप्रयोजनेनस्तुतिरूपेणलाक्षणिकेनार्थेनवाचकाअ
वादार्थवादानन्वयएवलौकिकाः शब्दास्तएववैदिकास्तएव।
चामीषामर्थाइतिन्यायाद्विधिपदस्यलोकेप्रशस्तकिरदहीनावेद
पितरर्थकेनैवतेनभवितव्यं लोकेचप्रेषणादिरूपधर्मवाचि
त्वंलक्ष्यमितिवेदेशाब्दीभावनावाचित्वंकथमुपपद्यते उच्यते लो
केवेदयोरेकरूप्यमेव तथाहिलोकेप्रेषणादिकंनतेनतेनरूपे
णविधिपदवाच्यं अनन्यगमेननानार्थत्वप्रसंगात् तदेवभावना
वाचित्वोपपत्तेश्च किन्तुप्रेषणाध्येषणानुज्ञास्वरूपवृत्तेनानुगमे
केनचशाब्दीभावनारूपेणत्वमितितत्रदेवालिङादिपदवाच्यं तच्चलो

श्री॰
गी॰टी॰
मं॰

91

किंकशब्देनास्यैवतत्रराजादीनामेवप्रवर्तकत्वात् प्रवर्तकव्यापारएव
द्धिप्रवर्तिनाप्रवर्तकत्वेचराज्ञादेरिववेदस्याप्यनुभवसिद्धं नचवेदेपि
प्रवर्तनावानीश्वरः कल्पनीलोकेराज्ञादिवत् तदुक्तं विधिरेवनाव
र्भश्वकृतिकर्मार्थः प्रयोगमात्रमिति नवेदस्यापौरुषेयत्वात्
तरिवेदस्यकर्तृप्रत्यक्षोलोकेवेदेवाप्रसिद्धः ततकल्पनेचनज्ञानप्र
माणापेक्षया वेदवचनत्वेसमानेपिबुद्धवाक्येनप्रमाणंवेदवाक्येतु
प्रमाणमितिसभगाभिव्यक्तमायप्रसंगः महाजनानामुभयसि
द्धत्वाभावेनतत्परिग्रहापरिग्रहाभ्यामपिविशेषानुपपत्तेः ईश्वर
प्रेरणायालोकवेदसाधारणत्वेनलोकेपिराजादीनांप्रेरकत्वेनस्मा
त् ईश्वरप्रेरणायांस्थितायामेवराजादिरप्यसाधारणतयाप्रेरकत्व
तिचेत् हेतसातिष्ठतुनवाकिंविहायसाधारणतयाप्रेरकत्व
राजादिस्थानीयश्चायातेमार्गेईश्वरप्रेरणायाः साधारणत्वा
साधारणप्रेरणासहकारिणैवप्रवर्तकत्वात् किंचईश्वरप्रेरणा
यांसर्वोपिविहितेकर्मादेवनतुकश्चिदपिनिषेधेत् निषिद्धेपिवे
श्वरप्रेरणास्येव प्रमयथानकोपितत्रप्रवर्तेतेतितदपिविहितंस्यात्
तथाचोक्तं प्रज्ञोजंतुरनीशोयमात्मनः सुखदुःखयोः ईश्वरप्रेरि
तोगच्छेत्स्वर्गंवाश्वभ्रमेववा तस्माज्जादिरिववेदोपिस्वप्रवर्तनाज्ञा
पकत्रिकोपहारमुखेनप्रवर्तयतीतिसिद्धं लोकवेदयोरेकरूप्य
मेवमीमांसकानांस्वतंत्रोवेदोपौरुषेयमीमांसकानांतुमूलविवर्तस्तस्य
वेदस्यनिरपायपिविशेषत्वस्त्यापिनिश्वसितत्वेनवेदस्यापौरु
षेयत्वमुभयेषामपिसमाने प्रयचप्रवृत्त्यनुकूलव्यापारत्वंप्रवर्त
नात्वंसलिङः स्वशब्दोपाधिस्तस्मिन् विधिपदशक्तोपितदाश्रयवि
शेषोपस्थितिर्गौवादितत्स्यैव प्रवृत्त्यनुकूलव्यापारत्ववाशक्तोप्रवृत्तप्र
स्वाख्यानत्वेनशक्तितरलभ्यएव देवीप्रवृत्तसेवायितिमतपर्य
प्रकृतस्वार्थेदेशवत् फलसाधननावोधएवप्रेरणानामेवकर्त्रे
न्यप्रेरकोविधिरतः फलसाधनत्वेचप्रेरणात्वेनविधिपदशक्तो
मेरनाचार्याः फलसाधननाचार्यभावनान्वयलभ्येत्युक्तंप्राक्
इममेववपदार्थमाश्रित्यप्रश्नतयः पंडिताः प्रतिपन्नाः प्रोपन्नि

घटानामपि केषांचिदिष्टसाधनतावादेनैनैवमनेनोपपादनीयः
इष्टसाधनत्वं स्वरूपेणैव लिङादिपदशक्तेन प्रेरणात्वेनेति तार्कि
काः तत्र गौरवादनन्यलभ्यत्वादन्वयाः योग्यताच्छेदकत्वाविषयता
यत्वापेक्षया प्रवर्तनात्वमतिलघु इष्टकालत्वादिश्वियोरप्रवेशात् इ
ष्टसाधनस्यापि प्रवृत्तिजनकत्वेन प्रवृत्तिहेतुत्वापातात् वस्तुगत्या
इष्टविषयत्वं साधनमिति शाब्देन प्रतिपादयितुमशक्यत्वात् सा
धनत्वमात्रस्य च शक्यत्वे तेनैव प्रत्ययेनोपस्थापितयाप्रवृत्त्यास्य
कस्मात्तदन्वयसंभवे पदान्तरोपस्थापितस्वर्गादिसम्बन्धेन तदन्व
याः संभवात् प्रवर्तनात्वरूपवपर्यवसानं तत्कर्तव्यतावाक्यसमवायात् प्र
त्ययस्य करणे परस्मिंस्तिन्नोपि वलीयस्त्वेन पशुना यजेत स्वर्गकामः इ
त्यादि विहाय पशुमुपाय्येतत्करणेन सहैकत्वसामान्यादेकैकारणापत्ति
निर्वचनत्वाकाङ्क्षावशात्वमेकत्वस्य स्थितं किं तद्वस्तुत्वोपदानत्वसम
भिव्याहारत्वेन हाकाङ्क्षावलीयस्त्वमिति वाक्यार्थान्वयलभ्यत्वाच्चैतत्
साधनत्वोपहार्थः तथाहि प्रवर्तनाकर्मभूतात्स्पष्टप्रवृत्तिरूपार्थभा
वनाकिं केन कथमिति शब्दप्रवृत्तौ विधिना लभ्यतेन प्रतिपादितत्वात्
केषांक पूर्वकृष्णार्थकर्मिकायां च तत्र प्रवर्तनान्वयपतेरेकपदो
पस्थापितमप्यपूर्वकृष्णार्थयातव्यं विहाय भिन्नपदोपात्तमप्यविशेषण
मपि कर्मपदसंबन्धेन साध्यत्वान्वययोगपस्वर्गमेव पूर्वकृष्णार्थसंभाव्य
तयात्वेनेति नियमात् स्वर्गकामयतेस्वर्गकामश्चेति कर्मणा हितीया
तयात्वेनेति नियमात् स्वर्गकामो यजेतेति कर्मकेनैव स्वर्गमित्येतेनत्वपायत्वं अनपत्व
याश्रुतत्वात् यजेतेरकर्मकत्वेन स्वर्गमित्येतेन तथात्वं श्रुतप्रत्य
त्रकर्मपदं न श्रूयते तत्रापि न तत्कल्प्यते यथायतिनिष्टेतिहवाय।
पतारात्रीरुपयन्तीत्यादौ प्रतिष्ठाकामा रात्रिसत्रमुपेयुरित्यादिप
वेचलत्वभावाद्यान्तस्तोत्रमानपदोपस्थापितोयानर्थप्रवकरण।
तयान्वेतिभावांशस्य कर्मविधेयगणावरुद्धत्वात् स्वर्गमक्रियो
गोयानर्थनामये यज्ञोऽनिष्टोमादौन्तनीयापुरुवणात् यज्ञापिनाम
धेयविनीयाश्रूयते तत्रापि श्रमयान्नुशासनेन नरनीयाकल्पनात्तत
उक्तं महाभाष्यकारैः निर्हाते तत्र हेमन्तीनिरन्तनीयार्थद्वितीयेति प्रे
तपवतैः प्रकृतिप्रत्ययौ प्रकृतिप्रत्ययार्थसहत्वं तत्रयोः प्रत्ययार्थः
मायासेनप्रकृत्यर्थो गुणत्वेनेति प्रत्ययार्थभावनाप्रतियानर्थस्य।

श्री-
गी-टी
म्र-
९२

गुणत्वेनकरणत्वस्यैकस्याख्यातेनक्रियाप्रधानमितिवदन्तिनिरुक्त
कारैस्येनदेवताकैभावाद्यधिकरणेचनत्वेवस्थितेतेनसर्वत्रप्रम
पार्थश्रुतिधानार्थस्यकरणत्वेनैवान्वयनियमः अतएवगुणवि
शिष्टधात्वर्थविधेर्धात्वर्थानुवादेनकेवलगुणविधेर्वामत्वर्थ
लक्षणाविधेर्विप्रकृष्टविषयत्वेचयथासोमेनयजेतेतिविशि
ष्टविधौसोमवतायागेनेति दध्नाजुहोतीतिगुणविधौदधिमता
होमेनेतिनामधेयान्वयेनसामानाधिकरण्योपपत्तेर्धात्वर्थमा
त्रविधानाच्चनमत्वर्थलक्षणानवाविधिविप्रकर्षः तदेवंज्योतिष्टो
मेनयजेतस्वर्गकामइत्यत्राख्यातार्थोभावयेदितिकिमित्याकां।
क्षायांकर्मविषयेस्वर्गमितिविशिष्टकर्तुर्बलीयस्त्वादाकांक्षायाउ
त्कटत्वाच्च तथाचस्थितेषष्ठाध्यायेनतः केनेत्यपेक्षितेयागेनेति
तृतीयांतपदसमानाधिकरणत्वात् करणत्वेनैवान्वयनियमाच्च
किंत्वामित्यपेक्षितेज्योतिष्टोमेनेतिनचास्यसमर्थः यागादेवपास्थि
तोपिज्योतिष्टोमशब्दोभामतत्पवशाब्दबोधेश्रवणेनोपस्थापित।
स्तामर्थ्यवशात् नामधेयान्वयेचनविभक्त्यर्थद्वारेणहिधात्वर्थान्व
यश्चवतेनमत्वर्थलक्षणामन्तरेणैवज्योतिष्टोमशब्दवतेमन्वयला
भः तथाचकर्तविप्रयोगः हिमालयोनामनगाधिराजइतिहिमाल
यनामवानितिसमर्थः एवंद्रव्यभिन्नकमलोदरेमधूनिमधुकरःपि
बतीमादावगृहीतसंगतिकेकपदत्वनिवाकेमधुकरादिपदेस्वरूपे
णैवभासतेनामधेयवत् नार्थमुपस्थापयतिप्रागगृहीतसंगति
कत्वात् अतएवमधुकरशब्दवाच्यत्वमपिलक्षणयानान्वयः शृंग
त्वानस्वैकत्वालक्ष्यत्वानस्वरूपतस्तुशब्देभानेवाच्यवाचकसंबं
धः पश्चात्कल्पनेसंसर्गानिर्वाहायेति तदयंवाक्यार्थः ज्योतिष्टो
मनाम्नायागेनस्वर्गमिष्टंभावयेदितिकथमित्यपेक्षितेषुक्ति।
लिंगवाक्यप्रकरणस्थानसमाख्याभिःसामग्र्यपकाराद्युपकार।
कांगंग्राममष्टस्यैति विकृतौप्रकृतिवदितिएवंयेनतिमेयथाश
कीन्सएवंयेनसाख्यानाभप्रतिनिधायापीतिपावन्नायलंभत्तत्र
रणं एवंवयागस्यस्वर्गाववत्तिभावनाकरणत्वेनस्वर्गकरणत्व
करणत्वेनचसाक्षात्कारंयापारविषयत्वेनद्रूपेक्ष्यतिसाध्यत्वंसिद्धं।

तर्थाऽभ्यांलभ्यत इति तद्भयमपि न लिङादिपदवाच्यं अप्रामाण्या
त्समर्थवदिति न्यायात् अतन्त्वयागद्दष्टसाधनमिति समानेगुणाभ्
तमिष्टपदं स्वर्गकामइति समानाधिकरणाभूतेन स्वर्गपदेनकर्मत
न्वियात् इष्टस्वर्गसाधनमिति नहि राजपुरुषो वीर इत्यत्र वीरप
दराजपदयोरन्वयोस्ति पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेने
ति न्यायात् कस्मात् विभक्त्यंतं ज्योतिष्टोमादिनामधेयानन्वयप्रसंगादि
दोषाश्च अस्मिन् पक्षे इष्टत्वात् एतेनेष्टसाधनत्वमनिष्टसाधनत्वे कृ
तिसाधनमिति त्रयमपि विध्यर्थः इत्यपास्तं प्रतिगौरवादर्थवादानां
सर्वथा वैयर्थ्यापत्तेश्च अतएव कृतिसाध्यत्वमात्रं विध्यर्थ इत्यपि न ।
भावनाकरणेनेनार्थलभ्यत्वादित्याहुः अलौकिको नियोगस्तु लौ
किकत्वादेव न विध्यर्थः परोक्तेनैवात्र सूरिभिः तस्मादनन्यलभ्याल
भ्भावनाचप्रेरणा वा लिङादिपदवाच्येति स्थितं प्रवर्तकज्ञाने वाक्या
र्थमर्यादालभ्यमस्त्येव सर्वेषामपि वादिनां आख्यातार्थ एव च वि
शेष्यतयाभासते नयात्वर्थोनना मार्थः स्वर्गकामो वेति चोक्तप्रा
यमेवनेनचयागान्वयकृतिमान् स्वर्गकाम इति नार्किकमते
पुरुषविशेष्यक वाक्यार्थज्ञानमपास्तं संक्षेपेणमतं भाट्टमिदम
त्रोपपादितं यदुक्तव्यमिहास्मतदंतसंधेयमाकरात् [illegible] दानींशा
[illegible]
[illegible]

२८ ॥

सदानंदी टीका ११

क्रियाहेतुतया श्लोकमपि ष्ठानादिपंचकं कर्मासंस्पर्शितानहदा
त्मनस्तद्विदस्तथा १ अथेदानीतमेवार्थं ज्ञानं ज्ञेयादिभेदतः ज्ञेयगु
णभेदाद्याख्यातुं सत्वपक्रमते हरिः २ वर्तमानक्रियाज्ञानं ज्ञेयं
तस्यास्तिकर्मच तस्याश्रयापरिज्ञाताभोक्तात्रज्ञाप्रपादिकः ३ च
याणां सन्निपातेनप्रारंभः सर्वकर्मणां अतएतत्त्रयं प्राहसर्वकर्म
प्रवर्तकं ४ चोदनेति क्रियायाश्च प्राकरत्र प्रवर्तके चोदनाचोपदे
शश्च विधिश्चैकार्थवाचिनः ५ इत्येवशावरभाष्ये चोदनानेणायः
कर्तः एवंचप्रेरणीप्रन्येप्रेरकत्वमनात्मनः ६ नात्मनश्चैवमपिसा।

श्री॰
गी॰ टी॰
म॰

यस्त्रिविधेनक्रियतोहेतुः वाह्यंश्रोत्रादिकरणंतन्नायकतमंस्मृते ७
श्रोतस्यनस्पृत्यादिकारणंत्रिविधंस्मृते क्रिययाव्याप्यमानंयत्कर्तु
रेप्सिततमंमितं ८ तत्कर्मेत्युच्यतेतच्चोत्पाद्याप्याप्यादिचतुर्विधं स्वतंत्रः
कारकैरस्यप्रयोजकः स्वयंक्रियः ९ समस्तकारकाणांचकर्तास।
साम्प्रयोजकः निर्वर्तकः क्रियायाश्चविदुर्विद्धिस्थिरूपकं १० कर्म
संगृह्यतेवास्मिन्नमेवेतीतिसंग्रहः कर्माश्रयोस्तित्रिविधश्चार्थो
दितिप्रयोगतः ११ संप्रदानमपादानमाधारश्चत्रयंयदि७ श्रतर्भूत
मेनेनोक्तकारकषट्कगाक्रिया १२ तत्त्वान्मतिक्रियातीतसकूटस्था
यतस्त्विति कर्माश्रयस्यकर्मणोऽप्रेरकस्यचसर्वतः १३ कारकान्त
नयानहंत्रिगुणात्मनयातथा प्रकाशकस्वभावोयत्रगुणातीतोऽक्रि।
योचलः १४ सर्वकर्माघसंस्पर्शीत्यभिप्रायोहेरर्विभोः १५ ॥ १८ ॥

नीलकंठी टीका १८ ॥

समासः सात्विकत्यागोपपादनोपयोगीआत्मनोऽकर्तृत्वोपपाद
नीनितत्क्ष्यामहे नत्यपरिणामीचेतनः परिस्पंदात्मकस्यकां
पिकादिभेदेनत्रिविधस्यकर्मणः कर्ताभवतीतिवक्तुंयुज्यते यत्र
नतिवध्यतश्रुतिभोक्तृत्वमकर्मापिप्रत्याख्यातेतन्नत्क्ष्यामहे नहि
जलालादयः स्वप्रयुक्तापवचरादीत्रिवर्तयंतिकिंतुभोक्तृपुरुष
प्रयुक्ताः अन्यथाभोक्तृणामभावेप्यर्थवन्नत्वहानिरित्यापतति प
वैप्रधानमात्राभूताः कर्मोदयः पुरुषस्यभोगापवर्गसाधनप्रयुक्ताः
सर्वाणिकर्माणिनिर्वर्तयंति तस्मात्पुरुषस्यभोक्तृस्वभावत्वाद
कर्तृत्वात्संधानस्सर्वकर्माणिकर्तेनकर्मभोक्ताऽवश्यमेवभोक्तव्या
मितिसात्विकत्यागोपिकर्मलेपवचनमसंगतमिति अत्रप्रतिवि
यते ज्ञानंज्ञेयमिति ज्ञानेनज्ञायतेप्रकाश्यतेवस्तुतत्वमनेनेतिप्रम
तादिप्रमाणजन्योचिदादिप्रकाशः सचवर्तमानोतीतोवा ज्ञेयंवे
यविषयोचिदादिः परिज्ञाताविषयीसाभासधीरूपोयोभोक्तेत्यव
ने पूर्वोक्तरूपप्रकारत्रयवतीत्रिविधाकर्मणांचोदना त्रयंसमस्वित्तसं
त्कर्मणांप्रवर्तकमित्यर्थः समापितेयज्ञानेविवाज्ञानेप्रवृत्तत्वप

त्तेः ज्ञाने ज्ञातरि च सति देशकालव्यवहिते ज्ञेये प्रवृत्त्यनुपपत्तेः
सत्यपि संस्कारात्मके ज्ञाने ज्ञेये च सन्निहिते तथापि सुषुप्तौ प्रमा
त्रभावात्प्रवृत्त्यदर्शनादेतत्त्रयं त्रिविधं दृष्टं विशिष्टं भवदस्मीयापेक्षं सत्।
हानोपादानोपा[illegible]पेक्षावुद्धिरूपं कार्यं जनयित्वा हानादावनुकू
ले व्यापारे प्रवर्तयतीति कर्मपदाभिधेयमित्यर्थः चोदनेति कर्तरि
णिजादित्वप्रत्ययान्तत्वेन चोदनाशब्दः कर्तृवाची लिंगत्वविव।
क्षितेन लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति वा तथा करणमिंद्रि
यं कर्मेतेन यत्क्रियमाणं विषयग्रहणं कर्तेश्वरीक एव परिज्ञा
ता एतत्त्रयमस्तीति सत् कर्मसंग्रहः कर्मणः ईप्सिततमस्य भोग्य
स्य संग्रहः संगृह्यतेऽस्मिन्निति संश्लेषस्थानं भोक्तेत्यर्थः सम्यग्विभो।
क्तरि करणे च क्रियां विना भोगासंभवात् क्रियायाश्चाश्रयं विना
स्वरूपालाभादाश्रयस्य करणं विना भोक्तृत्वोगकर्तृत्वानुपपत्ते
श्चैतत्त्रयं मिलितं सत् भोक्तेत्युच्यत इत्यर्थः तथा च श्रुतिः आत्मे
न्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति इंद्रियं प्रसिद्धं मनश्चानेन
बुद्धिरप्युच्यते युक्तं इंद्रियद्वारा मतेर्भोग्येन सह संबंधक्रिया इंद्रि
यं च मनश्च युक्ते चेति विग्रहे इंद्रियमनोयुक्तमिति द्वंद्वैकवद्भावः
एतत्त्रयं भोक्तात्मेत्याहुर्मनीषिण इति श्रुत्यर्थः एवं हि श्रुतिस्मृ
त्योर्व्याख्यानेनयोर्मूलमूलिभावो युज्यते नान्यथा तथा च कर्तृत्ववत्
भोक्तृत्वमपि त्रयात्मगणायत्तमित्याश्रोक्तृत्वं भोगकर्तृत्वमिति निर्वच
नाद्यः कर्ता स एव भोक्तेति प्रतिपादनादहमकर्ता भोक्तेति चानुसं
धानपूर्वकं कर्माणि कुर्वतः कर्तृत्वभोक्तृत्वहतः कर्मलेपो नास्ती।
ति सिद्धं भाष्यस्याप्ययमेवार्थः येन करणं क्रियायाः साधकतमं दश
विधं वाह्यं मनोबुद्धिरूपमान्तरं कर्म कर्तुरीप्सिततमं क्रियया व्याप्य
मानं उत्पाद्यमाप्यं विकार्यं संस्कार्यं चेति चतुर्विधं कर्ता कारकाणां
प्रयोजकश्चिदचिद्ग्रन्थिः एतत्त्रयं कर्मसंग्रहः कर्माश्रयः कर्त्रित्यर्थः
तथा ज्ञानं विषयप्रकाशनशक्तिः ज्ञेयं विषयः परिज्ञाता ज्ञानाश्रयो
भोक्ता एतत्त्रयं कर्मणि प्रवर्तकमिति व्याचक्षते तेषामपि ज्ञानस्य क
रणेनापि संग्राह्यत्वान्नाभिव्यक्तत्वेन प्रकृतेः प्रवर्तकत्वमेवासारः तथापि।
क्रियया व्याप्यमानस्य वस्तुमात्रस्याविकारादिभेदानर्हस्य च तथादिरूपस्य क

श्री॰
गी॰ टी॰
प्र॰

मणः कर्तृकोटिप्रवेशायोगः तस्य क्रियाश्रयत्वमात्रविवक्षायां
प्रकृते तत्कथनानुपयोगश्च स्पष्टः तथा च स्वाकेतचटादिव्याप
कक्रियायाः कर्मशब्दवाच्यत्वेनाभावः कर्तृकोटिप्रवेशस्य क्रियाक्रिया
वतोर्धर्मधर्मिणोरभेदापेक्षयाभ्युपगते तथा ज्ञाने प्रकाशनक्रिये
ति मते क्रियाश्रयोऽस्मिन् प्रवर्तकज्ञानेनान्तरस्यापेक्षेति तत्र तत्राप्यस्या
प्यस्यापेक्षेत्यनवस्था दुर्निवारा १८ ॥

आनंदीटीका १८

सामस्त्येन सर्वेष्वेव कारकेषु सत्सु क्रियया निष्पत्तिर्न त्वेकस्मि
न्कस्मिंश्चिद्व्यस्ते इति दर्शयति चक्षुषा त्वं रूपं पश्येत्यादिकं क
र्मणः प्रवर्तकमागमवचनं कर्मचोदना ज्ञानं ज्ञेयं परिज्ञातृभ
देन त्रिविधा त्रितयसंयोगादेव सिध्यति न त्वेकतरापाये तथा
हि ज्ञेयवस्तु येनेन्द्रियादिना करणेन ज्ञायते तज्ज्ञानं यो हि जा
नाति स परिज्ञाता ज्ञेयवस्तुपरिज्ञानकर्ता पुरुषः तस्मात्क
र्मसंग्रहः कर्मणः ज्ञानादिसम्बन्धेन ग्रहणं करणं कर्म कर्ते
ति त्रिविधः त्रयाणां सम्बन्धेन सामस्त्येन समुदाये नैव भवति
न त्वेकतरापाये व्यस्तत्वे नेत्यर्थः तथा हि चक्षुषा त्वं रूपं पश्ये
ति दर्शनक्रियाचोदनायां चक्षुषेति प्रतिपादिते करणं साध
के करणं तृतीयान्तम् रूपमिति क्रियया साध्यमिष्टं कर्म द्वि
तीयान्तम् त्वमिति करणस्य कर्मणः प्रवर्तकः क्रियायाश्च
सम्पादकः प्रथमान्तः कर्तेति तस्मात्करणादिसाधारण्ये
न कर्मसिद्धौ तत्कथं केवलश्चात्मा कर्तेति वाक्यान्वयः १८ ॥

रामकंठीटीका १८

अत्र प्रथमेन कर्मग्राहेन ज्ञानात्मिकायाः क्रियायास्त्रिफलत्वं फ
लमुच्यते कारणेन कार्योपचारात् तेन तादृशे क्रियाफले विष
ये त्र्यधीनत्वात् त्रिप्रकारा चोदना प्रवर्तना त्रीण्येतानि त्रिफलत्वेन ज्ञा
नात्मकक्रियाफले बोधयति प्रवर्तयतीत्यर्थः कानि त्रीणि ज्ञानं
येन ज्ञायते तदिन्द्रियादि ज्ञेयं च यज्ज्ञायते स घटः घटनीलपीता
दि परिज्ञाता फलमिदं यो हमिदं स घटः घटादि जानामीत्यव
सति त्रयाणामेषां सामग्री त्रिफलत्वेन फलं बोधयतीत्यर्थः प्रव

मेवकर्मणिकर्मफलेननत्कार्यनिहृत्तिलक्षणः संग्रहोयेनसंगृह्यते
सोक्रियतेसोपित्रिविधस्त्रीण्येतानिसंग्रहयंतिकानि करणंहस्ता
दिकर्मघटादिकार्यविषयाचेष्टा कर्ताघटादिव्याप्तकुंभकारादि
एतत्त्रितयसामग्रीवशाद्घटादेःकार्यस्यस्वरूपनिहृत्तिलक्षणभव
तीत्यनेन कीदृशित्ताज्ञानादीनियोगविषयाणीतिप्रक्रान्तप्रतिपाद
यितमाह १८ ॥

लाभिवी वसुधगतीटीका

ज्ञायतेनेनेतिज्ञानमिंद्रियादिकं ज्ञेयंयज्ज्ञायतेघटपटइःखनीर
लपीतादि परिज्ञाताज्ञानात्मिकायांक्रियायांस्वतंत्रइत्येवंकर्म
णःक्रियायाश्चोदनाप्रवृत्तिहेतुःतथाकरणंसाधकतमंहस्ता
दि कर्मक्रियानिर्वर्त्यंघटादि कर्ताक्रियानिवर्तकइत्येवंकर्मणः
क्रियायाःसंग्रहःनिष्पत्तिहेतुर्नामसंक्षेपः [illegible] १८

पंचोलेटीका

प्रश्नेशानीपूर्वोक्ताधिष्ठानादिभिः पंचभिरारभ्यमाणानांप्रवर्तका
माह ज्ञानमिति ज्ञानमविशेषेणसर्ववस्तुविषयेनयाज्ञेयमवि
शेषेणसर्ववस्तुपरिज्ञानाउपाधिलक्षणाअविद्याकल्पितोभोक्ता
एतत्त्रयंत्रिविधंत्रिप्रकाराकर्मचोदनाकर्मप्रवर्तनाकरणंश्रो
त्रादिपाणिदशबाह्यंअंतःकरणमेकादशमनोबुद्ध्यादिकरणंउपादेयमा
पंसेत्कार्यं [illegible] विकार्यंचेतिचतुर्विधंकर्मकर्ताकरणानामिंद्रियाणां
व्यापारकर्ताप्रयंत्रिविधःकर्मसंग्रहःसर्वकर्मत्रयस्मिन्संगह्यते १८

मणवीरमभिहोयिनी ॥

उक्तमेवार्थमुपपादयति ज्ञानमिति ज्ञायतेनेनेति ज्ञानंनिश्चय
साधनंप्रमाणंज्ञेयंतत्प्रतिपादितोधर्मस्तस्यचपरिज्ञाताधिकारी
त्येवंत्रिप्रकाराकर्मणि कारणेकार्योपचारात्कर्मफलेचोदना
प्रवर्तनाज्ञानादित्रयंकर्मफलेप्रवर्तयतीत्यर्थः प्रमाणेनपदेष्टुः
सकाशाल्लब्धेनतदर्थंचपरिज्ञातानुष्ठितेधिकारिणस्तदुक्तफलं
भवतीतिभावः यद्वा ज्ञानादित्रितयंसत्वेकर्मणि प्रवृत्तिविषयीभवं
तीत्यर्थः प्रकारांतरेणचाह करणमिति करणंयेनातिशयेनक्रि

यसाध्यते तद्गुणादिकं कर्म बुद्ध्यादिव्यापारविषयः कर्तातद्धा
रणोधिकारी क्रियानिर्वर्तक इत्येवं त्रिप्रकारः कर्मसंग्रहः श्रीएवे
तानि स्वधर्मभूतं कर्म संग्राहयंति स्वीकारयंतीति तदर्थः कारक
त्रयमेव सर्वक्रियाश्रयमिति तात्पर्यार्थः १८ ॥

मधुभाष्य

ज्ञानमिति त्रिविधाकर्मचोदना एतत्त्रिविधमपेक्ष्य कर्म
विधिरिति त्रिविधेनुच्यते कारणानि संग्राह्य करणमि
ति कर्मसंग्रहः कर्मकारणसंक्षेपः अधिष्ठानादिकारण
पंचांतर्भूतं तथाऽस्य वेदाखिलेषु ज्ञानं ज्ञेयं ज्ञातिनं चाप
पेक्ष्य विधिः कथितः करणं चैव कर्ता च कर्मकारणसंग्र
हः अतिप्रकर्तृत्वेपि विधिहा ईश्वरप्रसादादिष्ठो यस्मात्
कारणैः कर्महानापुरुषार्थो भवतीति ईश्वराधीनत्वेपि वि
धिहानिपतस्तेनैव यदि चेष्टादिर्नीयते तर्हि कारितम
हेश्वरेण फलं च तत्रियं वस्तुतोऽकर्तृत्वेपि चाभिमानि
कं कर्तृत्वं तस्यैव स्वातंत्र्यं तदपेक्ष्येति च प्रवृत्तिविधि
वैयर्थ्यं सर्वं चैतदनुभवोक्तप्रमाणसिद्धमिति न पृथक्
प्रमाणमुच्यते पुनः साधनप्रपंचनाय गुणभेदानाह १८

भाषा अनुवाद

कर्म्म मे अभिनिवेश जो इच्छा औ आशक्ति कहे ततमत मेह
गे रहना इनदोनो से रहित पुरुष हनन करके भी हनन नही
करते और बन्धन को नही प्राप्त होते इस पूर्वोक्त वाक्यमात्र के
कहने केलिये कर्म्म की विधि है औ कर्म श्रेय कहे कल्याणकर
है और कर्म्मफल आदि सबको त्रिगुणात्मकत्व हेतुसे गुणातीत
जो आत्मा तिसको इस कर्म्मविधि आदिके साथ कुछ सम्बन्ध
नही है इस कहने की अभिप्राय से कर्म्मविधि औ कर्म्म श्रेयकर
ने है कि ज्ञान कहे यही इष्ट का साधन है ऐसा जो बोध औ ज्ञेय
कहे इष्टके साधन स्वरूप जो कर्म्म और परिज्ञाता कहे ऐसे ज्ञा
नका आश्रयभूत जो मनुष्य यही त्रिविध कर्म्मविधि कहे प्रेरणा
है अर्थात इसी प्रेरणा से लोग कर्म्म मे प्रवृत्त होते हैं श्लोकार्थ
यह है कि कर्म्मविषयक जो विधि सो उत्कृष्ट त्रिगुणात्मक ज्ञान
आदि को अवलम्बन करके प्रवृत्त होती है यह दूसरे अध्यायके
४५ श्लोक मे कहा है कि हे अर्जुन त्रिगुणात्मक सकाम अधि
कारी के सम्बन्ध वेद मे कहा है और करण कहे साधन श्रोक
मि कहे कर्त्ता की अमन्त इच्छा की अधिकाई से किया जायजो
व्यापार और कर्त्ता कहे क्रियाका करने हारा और सब कर्म्म संग्रह
णरूपसे इसी मे गृहीत होते है इस अर्थ के सूचन करनेवाले
पदको कर्म्मसंग्रह कहते हैं करण कर्म्म कर्त्तारूप तीन कारक ये
क्रियाके आश्रय है और सम्प्रदान अपादान औ अधिकरण येतीन
केवल परस्पर आक्रमण से क्रियाके प्रवर्त्तक है साक्षात् क्रियाके
आश्रय स्वरूप नही है इसीसे पूर्वोक्त तीन करणो को क्रियाके
आश्रय स्वरूप कहा है १८ ॥

दोहा

ज्ञान ज्ञेय ज्ञाता त्रि विधि कर्म प्रेरना होय करण कर्म कर्ता
त्रिविध कर्म संग्रह पद सोय १८ ॥

96

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः प्रो
च्यते गुणसंख्याने यथावच्छृणु तान्यपि १९

शांकरभाष्य टीका १

अथेदानीं क्रियाकारकफलानां सर्वेषां गुणात्मकत्वात् सत्वर
जस्तमोगुणभेदतः त्रिविधो भेदो वक्तव्य इत्यारभ्यते ज्ञानं कर्म चे
ति ज्ञानं ज्ञायतेऽनेनेति कर्म च कर्म क्रियते न कारकं पारिभाषिक
मीप्सिततमं कर्म कर्ता च निर्वर्तकः क्रियाणां त्रिधैवावधारणं गुणव्य
तिरिक्तजात्यन्तराभावप्रदर्शनार्थं गुणभेदतः सत्वादिभेदेनेत्यर्थः प्रो
च्यते कथ्यते गुणसंख्याने कापिले शास्त्रे कापिलमपि गुणसंख्याने
शास्त्रं तदपि गुणभोक्तृविषये प्रमाणमेव परमार्थब्रह्मैकत्वविष
ये यद्यपि विरुध्यते तथापि ते हि कापिला गुणगौणव्यापारनि
रूपणेऽभियुक्ता इति तच्छास्त्रमपि वक्ष्यमाणार्थस्तुत्यर्थत्वेनोपा
दीयत इति न विरोधः यथावद्यथान्यायं यथाशास्त्रं शृणु तान्य
पि ज्ञानादीनि तद्भेदजातानि गुणभेदकृतानि शृणु वक्ष्यमाणे
ऽर्थे मनःसमाधिं कुर्वित्यर्थः १९ ॥

आनंदगिरिकृतटीका २ ॥

अनंतरश्लोकेन वक्तव्यमर्थमाह अथेति ज्ञानादिप्रस्तावानन्त
र्यमथशब्दार्थः इदानीं प्रसक्तत्यागावान्तरभेदापेक्षायामित्य
र्थः तेषां गुणभेदात् त्रैविध्ये हेतुमाह गुणात्मकत्वादिति वक्तव्यो वक्ष्य
९८ माणः श्लोकत्रयेणेति शेषः पूर्वं स्थिते प्रथममवान्तरभेदप्रतिज्ञा
क्रियत इत्याह इत्यारभ्यत इति कर्तुरीप्सिततमं कर्मेति यत्तत्परिभा
ष्यते तन्नात्र कर्मशब्दवाच्यमित्याह नेति गुणातिरेकेण विधान्तरं
ज्ञानादिषु नेति निर्धारयितुमवधारणमित्याह गुणेति ज्ञानादी
नां प्रत्येकं गुणभेदप्रयुक्ते त्रैविध्ये प्रमाणमाह प्रोच्यत इति नच
कापिले पातंजलमित्यादिशास्त्रे विरुद्धार्थत्वादप्रमाणे कथमिह
प्रमाणीक्रियते तत्राह तथापीति विषयविशेषविरोधेऽपि प्रकृते
ऽंशमात्रेणमविरुद्धमित्यर्थः यद्यपि कापिलादयो गुणाहंतिविचारे

गौणत्वात्तस्य भोगादेर्निरूपणीच निर्गुणात्तथापि कथं तदीयं
शास्त्रमत्र प्रमाणीकृतमित्याशंक्याह तेहीति ज्ञानादित्रयमेकम
वान्तरभेदो वक्ष्यमाणो येस्तस्य तेत्रान्तरेपि प्रसिद्धिकथनेस्तुति
स्तादर्थ्यन्कापिलादिमतोपादानमिहोपयोगीत्यर्थः इतीयपाद
स्याविरुद्धार्थत्वं निगमयति नेति यथावदित्यादिव्याचष्टे यथाभा
यमिति १९ ॥

ततः किमत आह—

स्वामिकृत टीका ३ ॥

ज्ञानमिति गुणाः सम्यक्कार्यभेदेन संख्यायन्ते प्रतिपाद्यन्ते स्मि
न्निति गुणसंख्यानं सांख्यशास्त्रं तस्मिन् ज्ञानं कर्म च कर्ता च प्र
त्येकं सत्वादिगुणभेदेन त्रिधैवोच्यते तान्यपि ज्ञानादीनि वक्ष्यमा
णानि यथावच्छृणु त्रिधैवेत्येवकारो गुणत्रयोपाधिव्यतिरेके।
निर्मलत्वादिमादिगुणानां वैधकत्वप्रकारो निरूपितः सप्तद
शेध्याये यज्ञेनेसात्विकादेवानित्यादिना गुणकृतं त्रिविधस्वभा
वं निरूपणेनरजस्तमः स्वभावपरित्यज्य सात्विकाहारादि सेव
यासात्विकः स्वभावः संपादनीय इत्युक्तमिह तु क्रियाकारकफ
लादीनामात्मसंबोधनास्तीति दर्शयितुं सर्वेषां त्रिगुणात्मकत्व
मुच्यत इति विशेषो ज्ञातव्यः
तार ॥

पिशाचभाष्य टीका ४ ॥

अथेदानीं क्रियाकारकफलानां सर्वेषां सत्वरजस्तमात्मकत्वा।
त्रैविध्यमुच्यते ज्ञानं पूर्वोक्तं कर्म क्रियारूपं कर्ता ज्ञानानिवर्तयि
ता च त्रिधा त्रिप्रकारा गुणभेदतः प्रोच्यते कथ्यते गुणसंख्याने
गुणप्रतिपादके शास्त्रे यथावद्यथान्यायं तान्यपि ज्ञानादीनि
१९ ॥

रामानुजभाष्य टीका ५

ज्ञानमिति कर्तव्यकर्मविषयं ज्ञानं क्रियमाणं कर्म तस्य
कर्ता सत्वादिगुणभेदतः त्रिधैवोच्यते गुणसंख्याने गुणका
र्यगणने यथावत्शृणु तान्यपि ज्ञानादीनि गुणतोभिन्नानि ज्ञानादी
नि यथावच्छृणु १९ ॥

अभिनवगुप्तकृत टीका ६

अथैषां प्रत्येकमपि सत्वादिभेदेन गुणभेदात्त्रैविध्यं दर्शयितुमाह

गुणानां संख्याने निश्चयो यत्र तत्सांख्यं प्रोक्तं तेषां ज्ञानादि त्रिविध
मुच्यते यथावच्छृणु इति संगतिः ज्ञानमित्यनेन ज्ञानं क्रियायाश्चतुर्थ।
कारणानां द्विविधमुक्तं प्रवेकर्मेति ज्ञेयं कार्यं च कर्तेति ज्ञानाकर्ता
वेति तत्र सर्वभूतेष्वित्यादिना श्लोकत्रयेण ज्ञानकरणस्य त्रैरूप्यम
क्तं अत एव यत्तु कृत्स्नवदित्यनाद्युक्तं ज्ञानकरणसामान्यस्वरूप
मुक्तं नियतमित्यादिना श्लोकत्रयेण कर्मणोऽस्य कार्यरूपस्य द्वै
विध्यमुक्तं मुक्तसंग इत्यादिना श्लोकत्रयेण कर्तृरूपस्य तस्यैव
णस्वरूपं कारणविशेषस्य स्वरूपभेदप्रतिपादनार्थं बुद्धेर्भेदं वि।
ध्येति रूप्यते तद्द्वारेण करणानां गुणमयत्वेन त्रैविध्यमुपलक्षितं
करणानि निकर्तव्यतापेक्षत्वादिनि कर्तव्यताया श्लोकसप्तकेन च
रूपत्वेऽपि श्रुत्युक्ता त्रिविधा विविदिषा योऽयं स्पष्टं नि
रूपितं भगवता गीतायां विविध्यं नानात्वं बहुविधमुक्तं नैविद्या ते नी मि
तेन श्लोकमिति नवाह ॥

परमार्थप्रपाती टीका ७

ततः किमतआह ज्ञानमिति गुणाः सम्यककार्यभेदेन ख्यायन्ते
प्रतिपाद्यन्ते यस्मिंस्तस्मिन् गुणसंख्याने सांख्यशास्त्रे तस्मिन् ज्ञानं च
कर्म च कर्ता च प्रत्येकं सत्वादिगुणभेदेन त्रिधैवोच्यते तान्यपि
ज्ञानादीनि वक्ष्यमाणानि यथावच्छृणु त्रिधैवमेव कारणगु
णत्रयोपाधिव्यतिरेकेण आत्मनः स्वतः कर्मादिप्रतिषेधार्थं १९ ॥

वनमाली टीका ८ ॥

इदानीं ज्ञानज्ञेयज्ञातृरूपस्य करणकर्तृकर्मरूपस्य च त्रिविध
स्य त्रिगुणात्मकत्वं वक्तव्यमिति तद्भयं संक्षिप्य त्रिगुणात्मकत्वं
प्रतिजानीते ज्ञानमिति ज्ञानं प्राग्व्याख्यातं कर्म क्रिया त्रिविधः
कर्मसंग्रह इत्यत्रोक्तः कर्ता क्रियानिर्वर्तकः गुणाः सत्वरजस्त
मांसि सम्यक् ख्यायन्ते यस्मिन्निति कपिलोक्ते सांख्ये गुणसं
ख्याने ज्ञानं क्रिया च कर्ता च गुणभेदतः सत्वरजस्तमोभेदेन।
त्रिधैवोच्यते यथावद्यथाशास्त्रं शृणु तानि ज्ञानादीनि त्रिधापि
वशात् त्वं ज्ञानानि च गुणभेदकृतानि च तद्दर्शनत्रयमत्र

श्री. गी. टी. ग्र.

98

निर्मलत्वादिधर्मादिनागुणातीतेवेयनप्रकारोनिरूपितोगुणाती
तस्यजीवन्मुक्तत्वनिरूपणायसमष्टिश्रेयन्तेसात्त्विकादेवा
निमादिनागुणकृतत्रिविधस्वभावनिरूपणेनास्वैरजस्तमः
स्वभावेपरित्यज्यसात्त्विकाहारादिसेवयादेवः सात्त्विकःस्वभा
वसंपाद्यरस्तके ३ हत्स्वभावतोगुणातीतस्यात्मनस्त्रिगुणा
कार्यक्रियादिसेवेयोनास्तीतिदर्शयितेतेषांसर्वेषांत्रिगुणा
त्मकत्वमेवनरूपांतरमस्तियेनात्मसेवयितास्यादिनुच्यतइ
तिनप्रनरुक्तिः १८ ॥

ऊष्टमनैवजयेती टीका ४

ततःकिमित्यपेक्षायांतेषांज्ञानादित्रयाणांगुणभेदात्त्रैवि
ध्यमाहज्ञानमितिगुणसंख्यानेगुणाः सम्यक्ख्यायन्तेका
र्यभेदेनप्रतिपाद्यन्तेयस्मिंस्त्रितिगुणसंख्यानेगुणानिरूपके
सांख्यशास्त्रेतस्मिन्गुणभेदतः सत्त्वादिगुणभेदेनज्ञानंकर्म
प्रोच्यतेतान्यपिवस्तमाणानितुत्रैविध्येनयथावद्यथाशास्त्रमेव
गुणाःनपाननतमाश्रवणंकुरु [illegible]
[illegible]
[illegible]
[illegible]
[illegible] १९ ॥

+इदानींज्ञानज्ञेयज्ञातृरूपस्य करणकर्मकर्तृरूपस्य चत्रिक द्वयस्यत्रिगुणात्मकत्वंवक्तव्य मितितदुभयंसंक्षिप्यत्रिगुणात्म कत्वंप्रतिजानीते ॥

+ज्ञानंज्ञेयं [illegible]

मधुसूदनी टीका १० ॥

स्यकर्मक्रिया त्रिविधः कर्मसंग्रहः [illegible]
कर्मकारकयोरेवान्तर्भावः क्रियोपाधिकत्वाच्चकारान्कारणं
तोक्रियायानिर्वर्तकं चकारान्ज्ञानाच कर्तुः क्रियोपाधिकत्वे
पिपृथक्करणकथनंकर्तात्किंकथमकल्पितानिवारणं
भेदेनख्यापयितुमितिगुणाः सत्त्वरजस्तमांसिसमकार्य
स्मिन् ज्ञानंक्रियाचकर्माचगुणभेदतः सत्त्वरजस्तमोभेदतस्त्रि

वक्ष्यते एवकारो विषयांतरनिवारणार्थः यद्यपि कापिलशास्त्रं
परमार्थब्रह्मैकत्वविषये न प्रमाणं तथापि परमार्थगुणगौणभेदनि
रूपणे व्यावहारिकप्रामाण्यं भजत इति वक्ष्यमाणार्थस्तु अतः गुण
संख्याने प्रोच्यत इत्युक्तं तेषां [illegible] प्रसिद्धमिदं न केवलमस्मिन्नेव तंत्रे
इति स्तुतिः यथावत् यथाशास्त्रं शृणु श्रोतुं सावधानो भव तानि ज्ञा
नादीनि अपि शास्त्रांतरे दृष्टानि तानि च गुणभेदकृतानि एवं चैवमपि
न कुतः संदृष्टं यं चतत् देशोपायेन तत्र सत्त्वं निर्मलत्वादित्यादिना गुणानां
वैधर्म्येण प्रकारो निरूपितो गुणातीतस्य जीवन्मुक्तत्वनिरूपणा
य समदर्शी पुनर्यज्ञेन सात्त्विकादेवानित्यादिना गुणकृतत्रिविधस्व
भावनिरूपणे नाहारे रजस्तमः स्वभावे परित्यज्य सात्त्विकाहारादिसे
वया दैवः सात्त्विकस्वभावः संपादनीय इत्युक्तं इह तु स्वभावतो गुणा
तीतस्यात्मनः क्रियाकारकफलसंबंधो नास्तीति दर्शयितुं तेषां स
र्वेषां त्रिगुणात्मकत्वमेव न तु रूपांतरमस्तीति येनात्मसंबंधिता स्यादि
त्युच्यते इति विशेषः

॥

सदानंदी टीका ११ ॥

ज्ञानादिकत्रिकस्याथ करणादित्रिकस्य च वक्ष्यमाणत्रिगुणात्मत्वमि
त्युपक्रमते हरिः १ ज्ञानं प्रागेव व्याख्यातं ज्ञेयमंतर्गतं त्विह ज्ञानो
पाधिकतया स्मात् ज्ञेयत्वस्य तत्र [illegible] २ कर्मशब्दात् क्रिया ग्राह्या च का
रकउभयोरपि ग्रंथे भावः क्रियायाः स्यात् करणस्य च कर्मणः ३ क्रियो
पाधिकतया स्मात् कारकत्वस्य सर्वथा निर्वर्तकः क्रियायाश्च कर्ता
ज्ञाना च चात्र था ४ गुणाः सत्त्वादयः सम्यक् ख्यायंते सिद्धिकापि
ले शास्त्रे त्रिधैव भेदेन सत्त्वाद्यैः प्रोच्यते यतः ५ यथावत् संशृणु श्रो
ते सावधानो भवेति च यद्यपि कापिलशास्त्रं ब्रह्मैकत्वनिरूपणे ६
अप्रमाणं तथाप्यत्र गुणगौणनिरूपणे व्यावहारिकप्रामाण्यं भज
ते चेत् दोषकृत् ७ ॥ १९ ॥

नीलकंठी टीका १२

एवं श्लोकोक्ते ज्ञानादिषट्के परिज्ञाता कर्ता चैक एवेति परिशेषात्

श्री॰
गी॰टी॰
प्र॰

99

िचैतेषां सर्वेषां प्राकृतत्वेन त्रिगुणात्मकत्वेऽप्येते ज्ञेयकरणयोर्जडयोर्वि
ष्टकर्तृकल्पयोः परिसंख्यार्थं त्रयाणामेव प्रत्येकं त्रिविधत्वं विवरीतुं
प्रतिजानीते ज्ञानमिति ज्ञानं कर्म च कर्ता चेति त्रयमेव गुणभेदतस्त्रिधा न
तु ज्ञेयकरणे। गुणसंख्याने कापिलशास्त्रे यद्यपि तत्रैकस्याः प्रमदाया भ
र्तुः सुखं जायते तेऽपि तस्याः सत्त्वोद्रिक्तत्वात् तामविदन्तश्चैव सपत्न्या दुःखं
जायते तेऽपि तस्याः रजउद्रिक्तत्वात् तस्यामेव सपत्न्या द्वेषस्तत्प्रति।
तस्यास्तमउद्रिक्तत्वात् प्रमदयैव सर्वे भावा व्याख्याता इति कापिलानां
ज्ञेयकरणयोरपि त्रैविध्यं प्रसिद्धं तथापि प्रमदादयः प्रकृत्यैव स्वसंनि
मित्तभेदेन प्रीतिदुःखविषादविषयाण्यपि भवन्तीति सर्वेषां कल्पनया निर्धा
लत्वात् प्रीत्यादीनां कर्तृसमवायित्वाभ्युपगमान्नीयमानानामालम्बनभूतायाः
प्रमदायाः प्रीत्याद्यात्मकत्वं कल्पितेन शास्त्रान्तरेति न भगवतानयोस्त्रि
विधत्वं व्याख्यायते श्रुत्वा तथैवः सूचः १९ ॥

आनन्दटीका १९

गुणभेदतः गुणानां सत्त्वादीनां विभागात् गुणसंख्याने गुणसंख्यायते स्व
रूपभेदादिकथनेन न विचार्यन्ते यस्मिन्निति गुणसंख्याने शास्त्रे १९

रामकण्ठटीका १९

प्रतिपादितस्वरूपं ज्ञानादित्रितयं च तद्गुणसंख्याने गुणानां स्वरूप
भेदकथने प्रत्येकं त्रिधा त्रिभिः प्रकारैः सत्त्वादिगुणभेदात्प्रोच्य
मानानि सात्त्विकराजसतामसभेदेन प्रत्येकं त्रिप्रकाराण्यवधारय
त्विकं तावत् १९ ॥

ततः किमत आह ज्ञानं कर्म कर्ता चेत्येतत्त्रयं प्रत्येकं सत्त्वादिगुणभेदेन गुणानां

लालिनीटीका

संख्यानां निश्चयो यत्र तत्र सांख्यीयसिद्धान्ते प्रोच्यते तान्यपि ज्ञा
नादीनि वक्ष्यमाणानि यथावच्छृणु [illegible]

[illegible] १९ [illegible]
१९

पंचोलेटीका

अथेदानीं क्रियाकारकफलानां सर्वेषां त्रिगुणात्मकत्वात्सत्वादिगुणभेदतः त्रिविधो भेद उच्यते ज्ञानमिति वक्ष्यतः ज्ञानं कर्म च पुनः कर्तृपदं क्रियाकारकफलात्मकं गुणभेदतः सत्वादिगुणभेदेन सर्वं त्रिविधा विभक्तः गुणसंख्याने कपिलशास्त्रे त्रिविधे एव प्रकारमेवोच्यते तान्यपि यथावच्छृणु १९ ॥

रामवीर नामिहोथिनी

ततस्त्र किमित्याह ज्ञानमिति ज्ञानादित्रयं सत्वादिभेदेन त्रिप्रकारं प्रोच्यते गुणविभागविद्भिरिति शेषः गुणसंख्याने गुणाः संख्यायंतेऽस्मिन्निति व्युत्पत्त्या यन्तु वेदशास्त्रे तानि च मत्तोपि यथावत्स्वकीनतिरिक्तत्वेन शृणु अवधारय १९ ॥

मधुभाष

ज्ञानमित्यादिना गुणसंख्याने गुणगणनप्रकरणे प्रकभावं विसृज्य परकृतं दोषं दीर्घकालकृतमप्यनुविंतयः सूचयति स दीर्घसूत्री परेणयः कृतो दोषो दीर्घकालकृतोपि वा यस्तस्य सूचको दोषान्दीर्घसूत्री स उच्यते अत्यभिधानात् यथार्थत्वनियमाभावो गुणस्याः श्रत्यघातामसस्याभेदाभावात् नैष्कर्म्यसिद्धिं नैष्कर्म्यफलयोगसिद्धिं यथायेनोपायेन सिद्धिं प्राप्तो ब्रह्म आप्नोति तच्यानिबोधं या सिद्धिर्ज्ञानस्य परानिष्ठा ब्रह्मभूयायकल्पते ब्रह्मणि भावो ब्रह्मभूयं ब्रह्मणि स्थितिः सर्वदा तन्मनस्कतेत्यर्थः पुनरंतरंगसाधनान्युक्तोपसंहरति १९

100

भाषा अनुवाद

अब क्रिया कारक औ फल को गुणात्मता से सत्व रज तम कृत त्रिविध भेद कहा चाहते हैं इस अपेक्षा पर कहते हैं कि इसीमें गुणकार्य भेद से संपूर्ण प्रतिपादन करके कहते हैं इस अर्थ का सूचन करने वाला संख्यान कहे सांख्यशास्त्र तिस में सात्विक आदि गुणभेद क्रम से तथा कार्य के द्वारा ज्ञान औ कर्म तथा कर्ता ये अनेक त्रिविध स्वरूप कहे गये हैं सोई मैं यथावत् कहता हूं तिनको भी तुम श्रवण करो १९ ॥

दोहा

ज्ञान कर्म कर्ता त्रिविध होत भेद गुण सोय कहियत
गुणसंख्यान मे यथावत सुण हूं सोय १९

सर्वभूतेषु येनैकं भावमव्ययमीक्षते अ
विभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकं २०

शांकरभाष्य टीका १

ज्ञानस्य तावत् त्रिविधत्वमुच्यते सर्वेति सर्वभूतेषु अव्यक्ता
दिस्थावरान्तेषु भूतेषु येन ज्ञानेनैकं भावं वस्तुभावशब्दो वस्तुवा
ची एकमात्मवस्त्वित्यर्थः अव्ययं न व्येति स्वात्मना स्वधर्मेण वा कूट
स्थं नित्यमित्यर्थः ईक्षते येन ज्ञानेन पश्यति तंच भावमविभक्तं
प्रतिदेहं विभक्तेषु देहभेदेषु न विभक्तं तदात्मवस्तु व्योमवन्निर
न्तरमित्यर्थः तत् ज्ञानं अद्वैतात्मदर्शनं सात्विकं सम्यक् दर्शनं वि
द्धीति २० ॥

आनंदगिरिकृत टीका २

ज्ञानादीनां प्रत्येकं त्रैविध्यं ज्ञातव्यं प्रतिज्ञाय ज्ञानत्रैविध्यार्थं श्लो
कत्रयमवतारयति ज्ञानस्येति तत्र सात्विकं ज्ञानमुपन्यस्यति स
र्वेति भूतानि कार्यकारणात्मकानि उपाधिजातानि अद्वितीयमेव
ऐकरस्ये प्रत्यगात्मभूतमबाधितत्वं तत्त्वेनैव विवक्षितमित्याह
एकमिति विवक्षितमव्ययत्वं संक्षिपति कूटस्थमिति प्रतिदेहमवि
भक्तमित्युक्ते व्यनक्ति विभक्तेष्विति तत् ज्ञानमित्यादि व्याकरोति
अद्वैतेति २० ॥

स्वामिकृत टीका ३

+ तत्र तत्त्वज्ञानस्य सात्विकादित्रैविध्यमाह ॥

+ सर्वभूतेष्विति त्रिभिः सर्वेषु भूतेषु ब्रह्मादिस्थावरान्तेषु विभक्ते
षु परस्परं व्यावृत्तेषु अविभक्तमनुस्यूतमेकमव्ययं निर्विकारं भा
वं परमात्मतत्त्वं येन ज्ञानेनेक्षते आलोचयति तज्ज्ञानं सात्विकं वि
द्धि [illegible] ॥

पैशाचभाष्य टीका ४

अव्यक्तादिस्थावरान्तेषु येन ज्ञानेन एकं भावं शब्दो वस्तुवाचीएक
मात्मतत्त्वमित्यर्थः ईक्षते पश्यति येन ज्ञानेन कं भूतेभावम
विभक्तमपि भिन्नेष्वव्यक्तादिस्थावरान्तेषु भूतेषु देहभेदेषु व्योमवन्नि

श्री॰ गी॰ ता॰ टी॰ अ॰

रंतरं साधुज्ञानं विद्धि सात्त्विकं सत्त्वनिर्वृते २० ॥

रामानुजभाष्य टीका ५

सर्वभूतेष्विति ब्राह्मणक्षत्रियब्रह्मचारिगृहस्थादिरूपेणावि भक्तेषु भूतेषु कर्माधिकारिषु येन ज्ञानेनैकाकारमात्माख्यं भावं त च्चापि विभक्तं ब्राह्मणाद्यनेकाकारेष्वपि भूतेष्वविभक्तं सितदीर्घादिवि भागवत् स ज्ञानेनैकाकारमात्मानं विभागरहितेष्वव्ययं स्वभावेष्वपि सर्वेष्वविकृतं फलादिसंगरहितं च कर्माधिकारवे लायामीक्षते तज्ज्ञानं सात्त्विकं विद्धि २० ॥

नीमित्यनेन चोक्तमिति तदाह ॥ स्पष्टार्थः २० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अभिनवगुप्तकृत टीका ६ इतेष्वित्यनेन

परमार्थप्रपा टीका ७ ॥

अथ सात्त्विकं ज्ञानमाह सर्वभूतेष्विति सर्वेषु भूतेषु ब्रह्मादिस्था वरांतेषु विभक्तेषु नामरूपकर्मभिः परस्परं व्यावृत्तेषु अविभक्त मनुस्यूतं घटपटादिष्वाकाशमिव एकमद्वितीयमव्ययं निर्वि कारं भावं सद्रूपं परमात्मतत्त्वं येन ज्ञानेनालोचयति तज्ज्ञानं सात्त्विकं विद्धि सात्त्विकादिकं संपादनमाहारादिकं सर्वशोकमेव अ ति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते ऽविनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति भाष्यं अविनाशी अरेऽय मात्मानुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवतीति सर्वश्रुतावेत १५ नोविनाशित्वं दृष्टेर्नोच तदाश्रयवर्तित्व सक्ते तदेव दृष्टं पश्यतीत्येत मात्मानं यदा अकारानेरीति दिवादिना न पश्यति किं त्वात्मनैव त्मानं पश्यति अथ न यावत् नात्मानं पश्यत्यपि यत्र त्वंगौवर्तिपदा १६ एवं स्वस्य भिन्नाकारेण न पश्यति दृष्टेर्विपरिलोपो न विद्यते इति प्रकृष्टमस्य दृष्टेर्विपरिलोपो न विद्यते ऽविनाशित्वात् कपदार्थं ज्ञानेनेष्ट मति पदार्थं नरज्ञाने भवति प्रकृते द्वितीय

स्याभावाद्दृष्टेर्विपरिलोपो विपर्यासो न संभवति यतस्तद्द्विती
यं तस्माद्द्वितीये [illegible] नास्ति यत् तत्त्वं आत्मनः सकाशाद्वि
भक्तं यत्प्रश्येत्तस्मादात्मानि रिक्तं नाकिमपि पश्येदित्यर्थः २० ॥

वनमाली टीका ८

ज्ञानत्रैविध्यमाह सर्वभूतेष्विति सर्वेषु विषयेषु भूतानि जी
वाः भवेष्ययेतेषु भूतानि जडानि तेषु विभक्तेषु जडेश्वराभ्यां।
जीवेश्वराभ्यां परस्परं च यथा योग्यं पंचभेदवत्सु तथा तारतम्य
लक्षणविभागवत्सु चिदचिद्रूपसर्ववस्तुषु स्थितं अविभ
क्तं स्वभावतारतम्यकर्मादिभिर्भेदनारहितं स्वादिरूपविभागरहि
तं श्रवयेद्दुःखोत्पत्तिनाशादिविकाररूपं एकं समं भावं अधिक
हीनं सर्वोत्तमं भावं सदास्तं श्रीहरिं येन ज्ञानेन ईक्षते विषयीक
रोति तज्ज्ञानं सात्विकं विद्धि येन साधनेन जानाति तज्ज्ञानं सा
धनं सात्विकमिति वा जीवजगत्भ्यां भिन्नं तु लक्षणं च सर्वोत्त
मं यामकं सर्वव्यापकं सदन्तं तत्पुणाश्रयं यं भगवन्तं येन ज्ञानेन वि
षयीकरोति तज्ज्ञानं सात्विकमिति भावः २० ॥

ऊसमवैजयन्ती टीका ९ ॥

++ सर्वभूतेष्विति सर्वेषु निखिलेषु भूतेषु ब्रह्मनरादिदेहेषु येन ज्ञा
नेन एकं ज्ञानैकाकारमव्ययं अव्ययस्वभावेषु देवमनुष्यादिदेहे
षु विकाररूपेषु तत्रः विभक्तेषु चतुराननपंचाननषडाननप
ञ्चाननसहस्राननैकाननदीर्घह्रस्वस्थूलकृशादिरूपेण भि
न्नेषु अविभक्तं ज्ञानैकस्वरूपत्वेन विभागरहितं भावं स
द्रूपं जीवात्मानमीक्षते सत्वगुणान्वितो जनो वीक्ष्यते तज्ज्ञानं सा
त्विकं विद्धि तपानि श्रमानि पाद्यं प्रकृतिविविक्तात्मज्ञानं तत्त्वज्ञा
नीत्यर्थः २० ॥

मधुसूदनी टीका ९

+ सर्वभूतेषु अव्याकृतहिरण्यगर्भविराट्संज्ञेषु बीजसूक्ष्मस्थू
लरूपेषु समष्टिव्यष्ट्यात्मकेषु सर्वेषु स्थितेन नैव निर्विहेषु भूते।

+ त्रिधैवेत्यवकारेण जीवात्मनोर्थे द्रष्टुणाहमने
ज्ञातृत्वं कर्मित्वं कर्तृत्वं च तत्संहारहेतु
येन स्वाभाविकं तन्मोक्षहेतु रितिसूचितवि
त्वमिति ज्ञाते सात्विकादिगुणभेदतो
ज्ञानादीनां त्रैविध्यं तदेवाह नवभि
स्तत्रादौ ज्ञानस्य त्रैविध्यवक्तव्यत्वे प्रथ
मं सात्विकं ज्ञानमाह ॥

+ एवं ज्ञानस्य कर्मणः कर्तुश्च प्रत्येकं त्रैविध्ये ज्ञातव्यत्वेन प्रतिज्ञाते अथ मं ज्ञानत्रैविध्यं निरूपयति त्रिभिः
श्लोकैः तत्राद्वैतवादिनां सात्विकं ज्ञानमाह ॥

श्री-
गी॰टी॰
मु॰

षिन्येनेन भवनयभिकत्वमुच्यते तेनोमति विनाशशीलेषु देहप्रवर्गे
ष्वविभक्तेषु परस्परं व्याहृतेषु नानाकारेषु अव्ययमस्ति विनाशा
दि सर्वविक्रियाशून्यं सदेकरूपमविभक्तमव्याहृतं सर्वेषु वस्तुतम
पिष्टानतयावाधावधितया चैकमद्वितीयं भावं परमार्थसत्तारूप
स्वप्रकाशानंदमात्मानं येनांतःकरणपरिणामभेदेन वेदांतवाक्य
विचारपरिनिष्ठेनेक्षते साक्षात्करोति तन्मिथ्याप्रपंचवाधकम
द्वैतात्मदर्शनं सात्विकं सर्वसंसारोच्छित्तिकारणं ज्ञानं विद्धि द्वैतदर्शि
ने तु राजसं तामसं च संसारकारणं न सात्विकमित्यभिप्रायः २० ॥

सदानंदी टीका ॥ ॥

हेयोपादेयस्वरूपेण ज्ञानाख्यातत्रयेण गुणाः निरूपिताः इहेदानीमा
त्मनस्तैरसंगिनः १ गुणातीतस्य संवेद्यः स्वाभाव्यान्नास्तिकार
कैः इति तेषां गुणानां मध्ये एव नत्रय निरूप्यते २ ज्ञानं त्रैविध्यमेवाद्वै
३ आब्रह्मस्थावरेषु सर्वभूतेषु एकया दृश्यवर्गेषु चात्मा सम
हितेषु विनाशिषु ४ जन्मादिविक्रियाशून्यमव्याहृतं स्वरूपक
मधिष्ठानतयावाधावधिमात्मानमद्वयं ५ स्वप्रकाशोपानंदं ये
न ज्ञानेन पश्यति तन्मिथ्यादृश्यवाधेनाविदद्वैतात्मदर्शनं ६ सात्वि
कं सर्वसंसारोच्छित्तिहेतुमेव हि भोः राजसं तामसं द्वैतदर्शनं बंध
कारणं ७ हेयं गाहस्तु सत्त्वो मज्ज्ञानमोक्षैकसाधनं ८ ॥ २० ॥

नीलकंठी टीका ॥ ॥

एवं ज्ञानादित्रयस्य त्रैविध्यं वक्तुं प्रतिज्ञाय ज्ञानत्रैविध्यं तावदा
ह सर्वभूतेष्विति यथा कटककुंडलादिषु व्यावर्तमानेषु तत्त्व
विदेकं कांचनमेव दर्शनिपश्यति एवं येन ज्ञानेन सर्वभूतेषु
भावं चिन्मात्ररूपं देहादिषु व्ययमपरिणामि नमेकं
त्विकं विद्धि एकात्म्यज्ञानमेव सात्विकमित्यर्थः २० ॥

आनंदीटीका १३

उक्तः सर्वं ब्रह्मार्पणप्रकारकं ज्ञानं यत्तत्सात्त्विकं विद्धीत्यर्थः २० ॥

रामकंठटीका १४

तत्सात्त्विकमभिभूतरजस्तमस्कं विशुद्धसत्त्वमात्रहेतुकं ज्ञानं संवेद
नं विद्धि जानीहि किं तद्येन साधनभूतेन देशकालाकारादिभेदेन वि
विभक्तेषु परस्परपृथग्भावेनावस्थितेष्वपि सर्वेषु भूतेषु चेतनाचे
तनेषु सत्त्वेषु विभक्तमभिन्नरूपं चिदात्मकं भावं सत्तामीक्षते येन पश्य
ते बुध्यते इत्यर्थः इह विशुद्धचिन्मात्रस्वभावस्यात्मन एवैकं तत्त्वं परमा
र्थसन्न तद्व्यतिरिक्तं किंचन पदार्थान्तरं तत्त्वतः संभवति केवलं तदी
यनिरतिशयैश्वर्याज्ञाविततमायामलमुषितस्वप्रकाशज्ञानमये
चक्षुषि तदेकमेव तत्त्वं नानात्वेन प्रतिपद्यते देवज्ञः तदेव यदा ज्ञा
नमयं चक्षुः परमेश्वरानुग्रहशक्तिशलाकापरिमृष्टमलत्वाद्वि
मलीभवति तदा सर्वमेवेदमेकत्वेन योगिनः पश्यन्तीत्यर्थः रा
जसं ज्ञानमाह २० ॥

लासिकी[illegible]टीका

तत्र त्रिविधज्ञानमध्यात्सात्त्विकं माह

येन ज्ञानेन करणभूतेन सर्वेषु ब्रह्मादिस्थावरान्तेषु विभक्तेषु प
रस्परं व्याहतेष्वविभक्तमनुस्यूतमेकमव्ययं शाश्वतं चिदात्मानं तत्त्व
मीक्षते स्वात्मतया साक्षात्करोति तज्ज्ञानं संवेदनं सात्त्विकं विद्धि २०

पंचोलेटीका

तत्र सात्त्विकं ज्ञानमाह सर्वेति येन ज्ञानेन सर्वभूतेषु ब्रह्मादिस्था
वरान्तेषु भेदवत्स्वाकाशवत्सर्वगतं अव्ययं कूटस्थमेकं भेदरहितं
भावमीक्षते गृह्णात्यात्मदर्शनेन तज्ज्ञानं सात्त्विकम् २० ॥

रणवीरसमिद्धायिनी ॥

तत्र ज्ञानस्य त्रैविध्यं दर्शयन् ज्ञानवत्सात्त्विकं लक्षयति तज्ज्ञानेन यात्वेण
सर्वेषु जीवेषु परेषु च विभक्तेषु पृथक् पृथगवस्थितेषु तत्तत्संबंधमे
देन भिन्नेषु वा विषये विभक्तमेकरूपमेव वस्तुतामेव विषयीकरोति

मित्यर्थः एकं तत्त्वमव्ययं स्थिरं भावं सर्वेषां योहुमागतानामेषां
निश्चदः परमोधर्म अत्यभिप्रायमीक्षते विलोकयति तस्माद्विकं
तानेन विहिनानीहि एतच्चोपादेयं २०॥

मधुभाष्य

२०॥

भाषा अनुवाद

इस श्लोक से ले तीन श्लोक से इस ज्ञान का सात्विक आदिभेदसे तीन प्रकार कहते हैं कि ब्रह्मादि स्थावर पर्यंत परस्पर भिन्न भि न्न सकल वस्तु में प्राप्त एक निर्विकार स्वरूप अव्यय परमात्मत त्व का जिस ज्ञान से आलोचन किया जाय उस ज्ञान को सात्विक ज्ञा नजानो २० ॥

दोहा

सर्वभूतमें एकजिह अखंडभाव लषहोय अभिन्नहिभि न्नमेज्ञानजो सात्विकहि पहसोय २० ॥

105

पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान्
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसं २१ ॥

शांकरभाष्य टीका १ ॥

यानि द्वैतदर्शनान्यसम्यक् भूतानि राजसानि तामसानि चेति निबोध
तत् संसारोच्छित्तये न भवन्ति पृथक्त्वेनेति पृथक्त्वेन तु भेदेन प्रतिशरी
रमन्यत्वेन यत् ज्ञानं नानाभावान् भिन्नानात्मनः पृथग्विधान्
पृथक्प्रकारान् भिन्नलक्षणानित्यर्थः वेत्ति विजानाति यत् ज्ञानं
सर्वेषु भूतेषु ज्ञानस्य कर्तृत्वासंभवाद्येन ज्ञानेन वेत्तीत्यर्थः २१ ॥

आनंदगिरिकृत टीका २ ॥

द्वैतदर्शनान्यपि कानिचिद्भवन्ति सत्वनिर्द्दिष्टानि सम्यचीत्याशंक्याह
यानीति तेषामसम्यक्त्वे हेतुमाह राजसानीति प्रतिदेहमन्यत्वेन भिन्ना
नात्मनो येन ज्ञानेन जानाति तत् ज्ञानं राजसमिति व्याचष्टे भेदेने
ति पृथक्त्वे पृथग्विधत्वे च पुनरुक्तिमित्याशंक्य हेतुहेतुमत्वेन
विभागे विवक्षितेत्याह भिन्नेति ज्ञानस्य ज्ञानकर्तृत्वमयुक्तमि
त्याशंक्याह येनेति २१ ॥

स्वामिकृत टीका ३ ॥

राजसं ज्ञान
माह पृथक्त्वेनेति यज्ज्ञानमित्यस्यैव विवरणं सर्वेषु भूतेषु देहेषु नाना
भावान्वस्तुतः पृथगनेकान् देत्रज्ञान् पृथग्विधान् सुखित्वदुःखित्वा
दिरूपेण विलक्षणान्येन ज्ञानेन वेत्ति तज्ज्ञानं राजसं विद्धि २१ ॥

ना. पिशाचभाष्य टीका ४ ॥

पृथक्त्वेन भेदेन नानाभावान् पृथग्विधान् भिन्नप्रकारान्वेत्ति जानाति।
कारणं कर्तृत्वेनोपचर्यते सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसं २१ ॥

रामानुजभाष्य टीका ५ ॥

पृथक्त्वेनेति सर्वेषु भूतेषु ब्राह्मणाद्याकारपृथक्त्वेनात्माख्यान् भावान्ना
ना नाकित्वसीत्वादि पृथक्त्वेन च पृथग्विधान् फलादिसंयोगयोग्यात्म
काधिकारत्वेनाप्यायज्ज्ञानं वेत्ति तज्ज्ञानं राजसं विद्धि २१ ॥

श्री॰
गी॰टी॰
मु॰

अभिनवगुप्तटीका ६ ॥

स्पष्टार्थः २१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

राजसमाह पृथक्त्वेनेति सर्वेषु भूतेषु देहेषु नानाभावात् तेषु ज्ञान हेतुत्वीश्वहेतुः स्त्रीत्वादि प्रतीमावस्तुतः पृथक्पृथग्विधान् येन ज्ञा नेनवेत्ति तद्राजसं ज्ञानं विद्धि २१ ॥

वनमाली टीका ८ ॥

सर्वभूतेषु स्थितमीश्वरं पृथक्त्वेन भूतेभ्यो भिन्नत्वेन तत्त्वेति यज्ज्ञा नेनेत्यर्थः सर्वात्मकत्वज्ञानेऽभावेति यत्ति भूतेभ्यो भिन्नत्वेन नतस्य सर्वात्मत्वेनेत्यर्थः तथा नानावस्तुतो भिन्नाज्जीवानन्येकं पृथग्वि धानेवेति विषयीकरोति यज्ज्ञानं तद्राजसं स्मृतं यदा कर्मकरोतिजी वस्तदा स्वभावतः कर्तैव यदा स्वर्गनरकादौ सुखादिकं भुङ्क्ते तदा स्वभावतस्तत्सुखादिभोक्तैवेति यज्ज्ञानेन विषयीकरोति न तु सर्वा त्मत्वं दुःखभोक्तृत्वकर्मकर्तृत्वाद्यवस्थास्वनुगतं चिदानंदरूपे णेकमेरणाविधयाकर्तृत्वभोक्तृत्वादिप्रकर्मापि स्वभावतस्तदृहि नेजीवस्वरूपं विषयीकरोति तज्ज्ञानं स्वर्गनरकसंसृतिहेतुत्वाद्राज समिति भावः २१ ॥

उत्तमवैजयन्ती टीका ९ ॥

राजसं ज्ञानमाह पृथक्त्वेनेति सर्वभूतेषु देवमनुष्यादिशरी रेषु पुनः पृथक्त्वेन स्वरूपतोऽपि दीर्घह्रस्वादिदेहाकारभिन्नत्वे न यज्ज्ञानं ह्रस्वदीर्घाकारकोऽदेहत्वं जीवस्य च नाशं तस्य नाश इत्या कारकं नानाभावान् ह्रस्वदीर्घादि पृथक्त्वेन नानाविधान् भावा न् जीवात्मान् पृथक्विधान् भिन्नभिन्नप्रकारान् देहएवात्मादे हाद्वयो देहपरिमाणएवात्मानित्यो क्षणिकविज्ञानमात्मानित्यविज्ञा नमात्रो विभुरात्मा देहादन्यो ज्ञानादिगुणाश्र योऽणुर्विभुरात्मा स्वैरलोकायतिकजैनबौद्धमायावादिनाङ्कंकणा दिमतरूपकानेवेति यज्ज्ञानं ज्ञानानितिन्नहीनेन राजसं त्वं विद्धि जानीहि २१

मधुसूदनी टीका १० ॥

तेषाह: प्रागुक्तसात्विकव्यतिरेकप्रदर्शनार्थः पृथक्त्वेन भेदेन स्थि-
तेषु सर्वेषु भूतेषु देहादिषु नानाभावान् प्रतिदेहमन्यानात्मनः पृथग्-
विधान् सुखित्वदुःखित्वादिरूपेण परस्परविलक्षणान् येन ज्ञानेन वे-
त्तीति वक्तव्ये यज्ज्ञानं वेत्तीति करणे कर्तृत्वोपचारादेधांसि पचतीति-
वत् कर्तुरहंकारस्य मनसो भेदाद्वा तज्ज्ञानं विद्धि राजसमिति पूर्वेणा-
न पृथगात्मभेदज्ञानमनात्मभेदज्ञाने च परामृशतीति नात्मनो पर-
स्परभेदस्तेषामीश्वराद्भेदस्तेभ्य ईश्वराद्भेदो मनश्चाचेतनत्ववशा-
त्स्वभेदश्चेत्यौपाधिकभेदपंचकज्ञानं तु तार्किकाणां राजसमेवे-
त्यभिप्रायः २१ ॥

सदानंदी टीका ११ ॥

तेषाह: सात्विकाज्ज्ञानाद्भिन्नं तीर्थं हि राजसं भेदेन सर्वभूतेषु स्थि-
तेषु देहनामसु १ प्रतिदेहं विभिन्नानात्मनां तरात् स-
खित्वादिकरूपेण परस्परविलक्षणान् २ येन ज्ञानेन नाना निमज्ज-
वे विद्धि राजसं ज्ञानं वेत्तीति करणे कर्तृत्वोपचारिके ३ यथैधां-
सि पचतीति प्रयोगोस्ति तथैव तत् प्रयोगः आत्मनो भेदस्तेषां भे-
दस्तेश्वरात् ४ भेदश्चेतनवर्गस्य तेभ्य ईशान्तर्यामिणः इत्यौ-
पाधिको भेदस्तार्किकाणां च पंचधा ५ सम्मतो राजसत्वेन तत्
ज्ञानं हेयमेव हि ६ ॥ २१ ॥

नीलकंठी टीका १२ ॥

भेदज्ञानं राजसत्वमाह पृथक्त्वेनेति यत्पृथक्त्वेन भिन्नत्वेन ज्ञाने
तद्राजसमिति संबंधः पृथक्त्वेन स्थितं देहेष्विति सर्वेषु भूतेषु
प्राणिभौतिकत्वेनाविशिष्टेषु नानाभावान् सुरनरतिर्यक्स्थावरत्व-
भेदेन नानात्वानि बहुवचनमत्र तद्भेदप्रदर्शनार्थं पृथग्विधान्
एकजातीयेष्वपि नरादिषु प्रत्येकं विभिन्नप्रकारान् यज्ज्ञानं वेत्ति विष-
यीकरोतीति येन ज्ञानेन वेत्तीति वक्तव्ये एधांसि पचतीतिवत् यज्ज्ञा-
नं वेत्तीति करणे कर्तृत्वोपचारो बोध्यः तेन आत्मनां परस्परभेदा

श्री
गी टी
३

तेषामीश्वराद्देहेंद्रियभेदविशिष्टभेदप्रस्त्रजडवर्गस्य भेदद्वयं तेनोपा
धिकमेदपंचकज्ञानेऽनताकिकाणां राजसमेवेत्यभिप्रायः २१

घानंदीटीका १३

तेस्तेर्भावैर्हीनत्वात्तत्कर्मकप्रकारकं राजसंज्ञानमित्यर्थः तथा
च ज्ञानघनेन चाप्यन्ये यजन्तो मामुपासते एकत्वेन पृथक्
त्वेनेत्यपि न वमाध्यायोक्तं परीक्षितम् २२ ॥

रामकंठीटीका १४

तद्दत्सर्वेषु भूतेषु समस्तेषु मायीयेषु प्राणिषु वर्तमानं राज
संरजोगुणहेतुकं स्वरूपं तत्त्वविद्धि किं तद्यत्पृथक्त्वेनान्यव्यति
रिक्तयान्यरस्परतो व्यतिरिक्तानानाभावानपि वेद्यान्नानारूपान्विविधान्पृथ
ग्भावत्वाद्रुपचारेणावेदनक्रियाकरत्वं वेदितव्यमेतत्त्वविषय
स्वगार्थलक्षणलोभकारणभूतादृतसः समर्थनमसम्याद
शनेहेतुत्वात्संसारिणरूपं नियमितं हेयमेव प्रयत्नाममसमा
ह २१ ॥

लाभिश्री[illegible]टीका

राजसंज्ञानमाह सर्वेषु चतुर्दशविधेषु भूतेषु प्राणिषु नानाभावानानेकात्व
नत्तात्पृथग्विधान् सविद्धः ज्ञित्वादिरूपेण स्थावरजंगमादि
भेदेन वा परस्परतो व्यतिरिक्तान्वेत्तीति यत्पृथक्त्वेन स्वतो भेदा
[illegible] २१ नज्ञानं तद्राजसं विद्धि यथा सांख्यतार्किकादीनां [illegible]

९१

पंचोलीटीका

राजसंज्ञानमाह पृथक्त्वेनेति तपुनः पज्ज्ञानं सर्वेषु भूतेषु
ना० पृथग्विधान्मित्रप्रकारान्भावान्भिन्नान्मतः प्रतिशरीरं पृथ
क्केन भेदेन वेत्ति येन ज्ञानेन नानात्वं तज्ज्ञानं राजसं विद्धि २२ ॥

रत्नवीम समिद्धायिनी

राजसमाह पृथक्त्वेनेति सर्वेषु भूतेषु पृथक्त्वेन स्वीयो सो दं त
मनर्दोषिश्वरमोहनत्वप्रतिभिन्न[illegible]यज्ज्ञानं यत्तदेव विहरणीति

येनचनानाभावान् अनेकरूपान्प्रतिपन्नान् पृथग्विधान् पृथक्स्वीयपरत्वेनभिन्नाविधायेषां तांस्तान्दृष्टान्वेत्ति जानाति तज्ज्ञानंराजसंस्मृतं प्रत्यक्षदृष्टमेव २१॥

मधुभाष्य

२१॥

भाषा अनुवाद

इस श्लोक मे राजस ज्ञान कहते हैं कि भूत कहे देहधारी मात्र मे ना ना भाव अर्थात् सब की शरीर मे क्षेत्रज्ञ आत्मा पृथक् पृथक् सुखी दुःखी रूप से भिन्न भिन्न भी जाना जाय जिस ज्ञान से सो ज्ञान राजस जानो २१ ॥

दोहा

पृथक भाव सें ज्ञान जो अनेक भाव भिन कोय जानत सर्व विभूत मे राजस कहियत सोय २१

108

यत्तुकृत्स्नवदेकस्मिन्कार्येसक्तमहैतु
के अतत्वार्थवदल्पंचतत्तामसमुदाहृतं २२

शांकरभाष्यटीका १ ॥

यत्त्विति यत्तुज्ञानं कृत्स्नवत् समस्तवत् सर्वविषयमिव एक
स्मिन् कार्येदेहे वहिर्वा प्रतिमादौसक्तं एतावानेवात्मेश्वरोवाना
तः परमस्तीति यथा नग्नक्षपणकादीनां शरीरान्तर्वर्ती देहप
रिमाणोजीवईश्वरोवा पाषाणदार्वादिमात्रं इत्येवं एकस्मि
न् कार्येसक्तमहैतुकं हेतुवर्जितं अयुक्तिकं निःप्रमाणकमत
त्वार्थवत् अयथाभूतोऽर्थस्तत्वार्थःसोऽस्य ज्ञेयभूतोस्तीतितत्वा
र्थवत्तत्वार्थवदहैतुकत्वादेवाल्पंचाल्पविषयत्वादल्पफलत्वाद्वा
तत्तामसमुदाहृतं तामसानांहिप्राणिनामविवेकिनामीदृशंज्ञानं
दृश्यते २२ ॥

आनंदगिरीकृतटीका २ ॥

यत्त्विति सक्तत्वमेव व्यनक्ति एतावानिति एकस्मिन् कार्येज्ञानस्य
सक्तत्वमेव दृष्टांतेनसाधयति यथेत्यादिना यत्तुशुक्तिकेंतद्रैव
ज्ञानस्याभासत्वे कारणमित्याह अहैतुकत्वादिति स्वरूपतो
विषयतश्चाभासत्वे फलतोपेत्याह अल्पमिति तामसंज्ञानमुक्त
लक्षणमित्यज्ञानात्मभवं प्रमाणयति तामसानांहीति २२ ॥

स्वामिकृतटीका ३ ॥

तामसंज्ञानमाह यत्त्विति एकस्मिन्कार्येदेहेप्रतिमादौवाकृत्स्न
वत्परिपूर्णवत्सक्तं एतावानेवात्मा ईश्वरोवेत्यभिनिवेशयुक्तं
अहैतुकं निरुपपत्तिकं अतत्वार्थवत्परमार्थावलंबनशून्यं अतए
वाल्पंतुच्छमाल्पविषयत्वादल्पफलत्वाच्चयदेवंभूतंज्ञानंतत्तामस
मुदाहृतं [illegible] ॥

पिशाचभाष्यटीका ४ ॥

यज्ञानं कृत्स्नवत्सर्वविषयमिवैकस्मिन्कार्येदेहेप्रतिमादौवासक्तंनिर्वि।

श्री
गी॰टी॰
सं॰

109

हेनानेनः परमस्तीतिश्रुहेतुकर्मशुक्तिर्निर्मितममननवार्थव
दत्तेवा परमार्थविषयमलेवश्रुत्पन्नादृत्य विषयत्वा दत्त
फलेवानत्तानेनामस्तेनमः प्रभवमुदाहृतेउक्तेनामसानो
हिमागिनामविवेकिनामोदृशंज्ञानेदृश्यते २२ ॥

रामानुजभाष्य टीका ५ ॥

यदिति यत्तुज्ञानमेकस्मिन्कार्ये कस्मिन्कर्मणेकर्मणिप्रेतभू
तगणाराधनरूपेऽल्पफलेकृत्स्नफलवत्सक्तमदेहेतुकंव
स्तुतस्तत्कृत्स्नफलनयात्तत्याविषयंगृहेत्वरहितेश्रुतत्वार्थव
त्सर्ववेदवाक्यनिश्चयकारादिशुक्ततयामिथ्या भूतार्थविषयंश्र
त्पल्पफलेवप्रेताराधनरूपंविषयत्वादल्पवत्तनमावेतामस
मुदाहृतं

[illegible]

५ ॥

अभिनवगुप्तकृत टीका ६ ॥
स्पष्टार्थं २२ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटी टीका ७ ॥

तामसमुदाहृतयत्त्विति एकस्मिन्कार्ये देहेप्रतिमादौवाकृत्स्न
वत्परिपूर्णमिव सक्तं एतावानीश्वरएवेत्यभिनिवेशयुक्तमह
हैतुकंनिरूपपत्तिकं अतत्त्वार्थवत् परमार्थावलेवमय
एतामल्पतुच्छं यदेवंभूतंज्ञानं तत्तामसमुदाहृतं २२ ॥

वनमाली टीका ८ ॥

यत्तुप्रमत्तकार्येषु एकस्मिन्कार्येमननविकारेदेहेप्रतिमा
हैतुकेदेहेन्द्रियविशुक्तिसक्तमहिते अमेघाभक्तकार्याणांमाननवात्त
वकार्यमेकमेवाहंएवमात्मत्वाभिमानंतत्त्वयानस्मय कृत्स्न
वाभिरूपिवत्संपन्नेवानेवास्मिनानात्मनःपरमस्तीत्यभिनिवेश
नल्पेन प्रमादेनवराणांसावयवोदेहपरिमाणोज्ञानी
यद्यावर्तिकाणांदेहएवात्मेति प्रदेहेनकतत्त्वादेवानना

लेवने ऽप्यस्य च निमित्तात् २२ ॥

ॐ समवैजयंती टीका ९ ॥

तामसज्ञानमाह यत्त्विति तु शब्दः यज्ज्ञानमेकस्मिंस्थिलौकिके।
स्नानस्नापानमांसभोजनपोषितस्रगवेषणानुसंदर्शनादौ भ
तविनाशकायाशायनरूपे मारणमोहनोच्चाटनाद्यभिचारादौ।
वा कार्ये कर्मणि न तु वैदिकयज्ञदानादौ कृत्स्नवत् समग्रं सर्वकर्म
कृतमनेनाधिकं किंचिदप्यस्ति नास्तीत्येवमल्पफलेऽपि पूर्णवत्
सक्तं विषयभोगाभिनिवेशयुक्तम् अहैतुकं स्वाभाविकेन न शास्त्र
हेतोर्जीवनम् अतएवानत्त्वार्थवत् यत्र जीवेश्वरयोर्याथात्म्यस्वरूप
बोधो नास्ति तत् एवाल्पम् तद्विनाशकायाराधनरूपविषयत्वादल्प
तुच्छं च शरीरैवंभूतज्ञानवतो तुच्छफलत्वान्निम्नसंसारे वहति
इदृशमशास्त्रीयं लौकिकं यज्ज्ञानं तत्तामसं तमोगुणप्रकृत्युदाहृ
तं प्राज्ञैर्विज्ञैः कथितं २२ ॥

मधुसूदनी टीका १० ॥

न शास्त्रेण राजसमादिनं निवृत्तभूतकार्येषु विद्यमानेषु एकस्मिन्
कार्ये भूतविकारे देहे प्रतिमादौ वा अयं देहतावदेव रूपपात्मेतदहि
ते अत्रैव भूतकार्याणामात्मत्वाभावे कथमेकस्मिन्नात्मेश्वरात्मा।
तमिमं संधानरूपं कृत्स्नवत् परिपूर्णवत्सक्तं एतावानेवात्मा
ईश्वरो वा नातः परमस्तीत्यभिनिवेशेन लग्नं यथा दिगंबराणां।
सावयवो देहपरिमाण आत्मेति यथा चार्वाकाणां देह एवात्मेति
एवं पाषाणदार्वादिमात्रमीश्वर इत्येकस्मिन्कार्ये सक्तमहेतुकम्
देवातत्त्वार्थवत् न तत्त्वार्थो लेपवनेऽप्यस्य च निमित्तविभ्रन्याग्रहादर्थ
दर्शनं नित्यविभुदेहातिरिक्तात्मतत्त्वातिरिक्तेश्वरग्राहिता किं कृत्वा न वि
लं तत्त्वमनित्यपरिच्छिन्नदेहाद्यात्माभिमानरूपं चार्वाकादीनां यज्ज्ञा
नं तत्तामसमुदाहृतं तामसानां प्राकृतजनानां मोहरशज्ञाने दर्शितं २२

२२ ॥

सदानंदी टीका ११ ॥

श्री॰
गी॰टी॰
ग्रं॰

११०

भूतकार्येषु बहुषु विद्यमानेष्वनेकधा एकस्मिन्भौतिके देहे प्रति
मादौ वा विकारके १ अमीषां भूतकार्याणामात्मत्वाभावतः कथमे
कस्मिन्नीदृशस्यात्मभावस्तत्त्वविचारतः २ परिच्छिन्नवदासक्तमेता
वानीश्वरो ल्पकः आत्मा वा तः परं नास्तीत्येवं चाभिनिवेशतः ३
दिगंबरमते यद्वत्सावयववतया मतः आत्मा देहपरिमाणश्चा
र्वाकाणां यथा वपुः एवं पाषाणदार्वादिमात्र ईशोपि संमतः
उपेवास्मिंस्तदासक्तमहेतुकमयेवच ५ तत्त्वार्थालंबनेना
स्ति विभुत्वार्थग्रहात्तथा अल्पत्वाल्पविषयत्वादल्पेनाल्पफल
त्वतः ६ एवं पञ्चास्तिकादीनां ज्ञानं तत्तामसं त्विदैः प्राकृतानां
विमूढानां हेयत्वेन ह्युदाहृतम् ७ ॥ २२ ॥

नीलकंठी टीका २२ ॥

यत्तु ज्ञानेनैकस्मिन्कार्ये देहे प्रतिमादौ वा कृत्स्नवत्परिपूर्णव
देतावानेवात्मा ईश्वरो वेति सक्तमभिनिवेशयुक्तं अहेतुकं नि
रुपपत्तिकं अतत्त्वार्थवत्परमार्थावलंबनशून्यं अल्पं तुच्छ
विषयत्वादल्पफलत्वाच्च यदेवंभूतं ज्ञानं तत्तामसमुदाहृतं २२

आनंदी टीका २२

अकृत्स्नवित् येन ज्ञानेन कृत्स्नवत्सर्वप्रकारकं कर्मकरणमौषधी
दीनामैकान्तज्ञायते एकस्मिन्कस्मिंश्चित्कार्ये सुखसाधने स
क्तमभिचारादौ अतत्त्वार्थवत् तत्त्वार्थः परमार्थज्ञानं यत्र न वि
द्यते अल्पमदो विषयम् २२ ॥

रामकंठी टीका १४

तत्तामसं तमोगुणहेतुकं ज्ञानमुदाहृतं शास्त्रेषूदीरितम् किं तत्
त्सकलसर्वविशेषसंयुक्तेव यत्कृत्स्नविद्विषयीभूतं तेन समर्थं
हि परीतमकृत्स्नविलासमसं तथैव भौतिके कृत्स्नवित्सात्विकादि न
स्मिंश्चित्कार्ये साध्ये वस्तुनि तथैकस्मिन्विषयसुखसाधनभूतेक
नमात्मा ईश्वर इति तत्रैव सक्तं लीनं यदेव किंचिद्दृष्टसुखसाध
नं तामसं तथा तत्त्वार्थवत् न त्वर्थः तथा हेतुकमुपपत्तिकारणमस्
नं तत्त्वार्थवन्न तत्त्वमात्मादि परमार्थः स एवार्थो वस्तु

तत्त्वार्थः सविषयेन यस्य तन्न तत्त्वार्थवत्सात्त्विकादि न हि विपरीतं हि इदमतत्त्वा
र्थवच्छरीराद्यवस्तुनिष्ठमित्यर्थः अल्पं च शाल्पसमर्थं कं तदेतदसा
त्त्वादिकारणभूतं तमोगुणसमुद्भूतत्वात्सदसद्विपरीतमन्यथा हेतवे
निकृष्टं संसारविषयत्वात्स्तनतां हेयम् अथ कर्मत्रिविधमाह २२

लासिकी टीका

तामसंज्ञानमाह॥
एकस्मिन्कार्यभूते देहे प्रतिमादौ वा कृत्स्नवत्परिपूर्णवत्सक्त
मेतावानेवात्मा ईश्वरो वेत्यभिनिवेशेन लग्नं अहेतुकं निरुपपत्ति
कं अतत्त्वार्थवत्परमार्थावलम्बनशून्यं अतएवाल्पविषयत्वा
दल्पफलत्वाच्चाल्पं तुच्छं यदेवंभूतं ज्ञानं तत्तामसमुदाहृतम्
यथाचार्वाकादीनां
२२

पंचोलीटीका

तामसंज्ञानमाह यत्त्विति तुपुनः यज्ज्ञानमेकस्मिन्कार्ये देहे बहिः
प्रतिमादौ वा कृत्स्नवत्समग्रवत्सर्वविषयमिव सक्तं एतावानेवात्मा
ईश्वरो वा नातःपरमस्तीति कृत्वा लग्नं अहैतुकं युक्तिवर्जितम् अतत्त्वा
र्थवत् यथाभूतार्थविषयं न भवति अल्पविषयत्वादल्पफलविष
यत्वाच्च अल्पं एवंविधं यत् ज्ञानं तत्तामसं २२

रणवीरसमिद्धोधिनी

तामसमाह यत्त्विति एकस्मिन्नेव कार्ये अन्येभ्यः कर्तव्येभ्यः सकाशा
दवश्यावरणीये प्रधाने स्वधर्मे विषये कृत्स्नवत् साधारणकर्म
स्विव सक्तमभिनिवेशयुक्तं कोऽर्थः यथान्यानि सर्वसाधारणानि
तथा स्वधर्मेऽपि तत्प्रतीत्युत्पादकं क्वचिद्धि हिंसादोषः क्वचित्तु न
गुणः येन तु ज्ञानेन सर्वत्र पापबुद्धिरेव भवेत्तत्त्वाविर्धं प्रतिकू
लवज्ज्ञानं तामसमिति अकृत्स्नवदिति पाठे तु कृत्स्नः शाख्याख्या
तो युद्धाधिकारी तदन्यो कृत्स्नो ब्राह्मणादिस्तद्वत्तथा नैव यथा तु ह्ये
ष स्वधर्मे हिंसा न त्वपापाभिनिवेशकारकमित्यर्थः तथा हेतुकं

शुक्तिरूप्यं अतत्त्वार्थवत् तत्त्वं सर्वोपविवर्तमानः परमेश्वरस्तस्मै मदं तत्त्वार्थ परमेश्वरप्रीणनार्थ मित्यर्थः ततो नञ्समासः अतत्त्वार्थं सकामं कर्म वदति प्रतिपादयति यत् तत् अत एवाल्पं फलेन विषयेण वाल्पतुच्छं यतः रूपाज्ञानेन्मत्समसंबुद्धाहत कथितं पतत्त्वद्देयं २२॥

२२॥

मध्वभाष्य

भाषा अनुवाद

तामसज्ञान कहते हैं कि एक कार्य में अर्थात् स्थूल शरीरमें अ
थवा प्रतिमा आदि में सक्त कहे शरीरही आत्मा औ प्रतिमा ही ई
श्वर है ऐसे निश्चय से युक्त और अहेतुक कहे युक्तिविरुद्ध औ प
रमार्थ अवलम्बन रहित जो ज्ञान उक्त कारणों से अल्प विषय अ
ल्प फल हेतु से तुच्छ है उस ज्ञान को शिष्टजनोंने तामस रूप
निरूपण किया है २२ ॥

दोहा

जो सम वन इक कार्य में सक्त होत बिनहेतु तत्वअर्थ बि
न तुच्छ जो सात्विक कहियत सेतु २२

112

नियतंसंगरहितमरागद्वेषतःकृतं अ
फलप्रेप्सुनाकर्मयत्तत्सात्विकमुच्यते २३

शंकरभाष्य टीका १ ॥

अथकर्मणोत्रैविध्यमुच्यते नियतमिति नियतंनित्यंसंगरहि
तमासक्तिवर्जितमरागद्वेषतःकृतं रागप्रयुक्तेन द्वेषप्रयुक्तेन
च कृतं तद्विपरीतं कृतमरागद्वेषतःकृतमफलप्रेप्सुना फलंप्रे
प्सतीतिफलप्रेप्सुः फलतृष्णस्तद्विपरीतेनाफलप्रेप्सुना कर्त्राकृ
तं कर्म यत्तत् सात्विकमुच्यते २३ ॥

आनंदगिरिकृत टीका २

त्रिविधं कर्म वक्तुमनन्तरश्लोकत्रयमित्याह अथेति तत्रसा
त्विकं कर्म निर्दिशति नियतमिति २३ ॥

स्वामिकृत टीका ३ ॥

इदानींत्रिविधं कर्माह-

नियतमितित्रिभिः नियतंनियतयाविहितं संगरहितमभि
निवेशशून्यं अरागद्वेषतः पुत्रप्रीत्यावाशत्रुद्वेषेणवायत्कृ
तंनभवति फलंप्राप्तुमिच्छतीतिफलप्रेप्सुस्तद्विलक्षणेननि
ष्कामेनकर्त्रायत्कृतंकर्मतत्सात्विकमुच्यते २३ ॥

पिशाचभाष्य टीका ४

नियतंनित्यंसंगरहितंफलेच्छावर्जितमरागद्वेषतःकृतंशास्त्रचो
दितमित्यर्थःअफलप्रेप्सुनाकर्त्राकृतंकर्मयत्तत्सात्विकमुच्यते २३

कर्तृत्वकर्मविषयज्ञानस्याधिकारबेला
धिकार्यांशेनगुणतस्त्रैविध्यमुक्त्वा
...गुणतस्त्रैविध्यमाह ॥

रामानुजभाष्य टीका ५ ॥

नियतमिति नियतंवर्णाश्रमोचितं संगरहितंकर्तृत्वादिसंगर
हितं अरागद्वेषतःकृतंकीर्तिरागादकीर्तिद्वेषाच्चनकृतंअदंभे
नकृतमित्यर्थः अफलाभिसंधिनाकार्यमित्येवकृतंयत्कर्मत
त्सात्विकंकर्मइत्युच्यते २३ ॥

अभिनवगुप्तकृत टीका ६

श्री
गी टी
अ

113

स्पष्टार्थं २३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ८

इदानीं त्रिविधं कर्माह नियतमिति त्रिभिः नियतं नित्यतया विहितं संगरहितमभिनिवेशशून्यं अरागद्वेषतः कृतं पूर्वमात्मनि कं गतं दम्भदर्पार्थं शरीरं द्वेषोत्तरपक्षार्थं पञ्च भवति फलप्राप्ति मिच्छतीति फलप्रेप्सुना तद्विलक्षणेन कृतं कर्म सात्विकमुच्यते २३ ॥

वनमाली टीका ९ ॥

कर्मत्रैविध्यमाह नियतमिति त्रिभिः नियतं यावदाजीवं सं(?)हता समर्थानामपि फलावश्यंभावव्याप्ति मिति यावत् असंगं संगोमदीयमिदं कर्मेनेनैतं दृष्टाज्ञयामित्यभिमानस्तद्रहितम् रागेनेन कर्मणा राजसेमानादिप्राप्स्यामीति वाद्वेषः शत्रुमनेन नाशयिष्यामीत्यभिप्रायस्ताभ्यां न कृतं न तया अफलप्रेप्सुना फले कामरहितेन पुंसा यत्कृतं कर्म तत्सात्विकमुच्यते २३ ॥

ॐ समभेवजयती टीका ९ ॥

एवं कर्तृत्वकर्मानुष्ठानकाले कर्मणो विषयस्य ज्ञानस्याधिकारिभेदेन गुणतस्त्रैविध्यमुक्त्वेदानीमनुष्ठेयस्य कर्मणो गुणतस्त्रैविध्यमाह त्रिविधं त्रिविधत्वादौ सात्विकं कर्माह नियतमिति नियतं स्ववर्णाश्रमविहितं संगरहितं कर्तृत्वाद्यभिनिवेशवर्जितं अरागद्वेषतः कृतं कीर्तिरागात्कीर्तिद्वेषाच्च यन्न कृतं मदं भेन रहितेन पुरुषेण कृतं मीश्वरार्चनबुद्ध्यैव फलेच्छा न तु गुणश्रममुच्यते वेदविधिर्भगवान्ने यत्कर्म भवेत्तत्कर्म सात्विकमुच्यते २३ ॥

+ न देवमेव पनिषदानाम इत्येतानां नि दैत्यानां दर्शनेन सात्विकमुपोद्घातसुगुरुभिः हितदर्शितं निरपेक्ष्य परस्परं विभिन्नास्तदर्शनराज सं प्रतिस्युपविक्षिप्तात्मदर्शनं + तलामसंज्ञानात्संप्रति त्रिविधकर्माच्यते ॥

मधुसूदनी टीका १०

+ नियतं यावदंगोपसंहारासमर्थानामपि फलावश्यंभावव्याप्ति मितिनिमितिनियावत् संगः अहमेव महापातकहर्तायमभिमानस्तदहंकारापरपर्यायो राजसो गर्वविशेषः तेन शून्यं संगर

हितेयावदृत्तानेनतुकर्त्तभोक्तत्वप्रवर्ततेनोहंकारेणवर्ततप
वसात्विकस्यापितद्रहितस्यतुननविद्येनकर्माधिकारइतिउक्त
मसकृत् रागोराजसेमानास्तिकमनेनेनलप्स्यइत्यभिप्रायः द्वेषः
शत्रुमनेनपराजेष्यइत्यभिप्रायः ताभ्यांनकृतमरागद्वेषतःकृ नू४.
ते अफलप्रेप्सुनाफलाभिलाषरहितेनकर्त्रायत्कृतंकर्मयागा
दानसोमादितत्सात्विकमुच्यते २३ ॥

सदानंदी टीका ११ ॥

अद्वैतदर्शिनोज्ञानेनउपादेयमदीरितं तार्किकाणांनयाद्वैयं
भेदज्ञानमनर्थदं १ नामसंतुष्टमंग्मेतेद्वैयंसंहतिकारणं इ
त्युक्तेविविधकर्मप्रोक्तंनेहरिणाधुना २ नित्यमावश्यकंक
र्मगर्वोसक्तिविवर्जितं अनेनाहमिदंलप्स्येरागइत्याशयःस्फुट
तः ३ अनेनारिपुमंजेष्येद्वेषइत्याशयस्तथा ताभ्यांनकृतं
मित्युक्तमरागद्वेषतःकृते ४ फलाभिलाषशून्येनकर्त्राकर्म
हयत्कृतं यागदानादिशास्त्रीयंतत्सात्विकमुदाहृतं ५। २३ ॥

नीलकंठी टीका १२

अथकर्मत्रैविध्यमाह नियतमित्यादिना नियतंनित्यं संगरहि
तंअभिमानवर्जितं रागइच्छाप्रीतिर्द्वेषोनिष्टेऽप्रीतिस्ताभ्यांकृ
तं इष्टानिष्टप्राप्तिपरिहारार्थंकृतंरागद्वेषतःकृतंतदन्यदरा
गद्वेषतःकृतंनिष्काममित्यर्थः फलत्यागलोपतेचेतिफले
किंयप्राप्यमनात्मवस्तुतदन्यदफलमनागतंतुकंपरिग्र
हमविनाशिप्राप्तमतत्वेनतत्प्रेप्सुनाकृतंविविदिषेतियज्ञेने
तिश्रुत्याप्राप्तमलाभार्थयज्ञादेर्विनियोगात् तत्कर्मसात्वि
कमुच्यते २३ ॥

आनंदीटीका १३

अथकर्मत्रैविध्यम् नियतं मावश्यकंस्ववर्णाश्रमम् संग
रहितंलाभसंज्ञायर्थरहितम् २३ ॥

श्री॰
गी॰ टी॰
अ

रामकंठीटीका ४९

तत्कर्मसात्त्विकंसर्वबुद्धिस्थसत्वगुणहेतुकमभिधीयते किंतत् अफलप्रेप्सुना दृष्टादृष्टविषयस्पृहालिप्सारहितेन कर्त्रा निर्वर्त्तितं कीदृशं नियतं वर्णाश्रमविभागेनावश्यकरणीयं तथा संगेनोक्तलक्षणेन मूत्यमतपवसंगाभावात्तल्लरागद्वेषाभावेन कृतं संपादितं तदेतज्ज्ञानकारणभूतसत्वगुणाजूत्वादपवर्गलक्षणोत्तमपुरुषार्थसाधनयोगिविषयमुपादेयं २३

लाक्षिकी ...टीका

इदानीं त्रिविधं कर्माह— नियतं नित्यतया विहितं संगेनात्मनिष्ठत्वाभिमानविनतयारहितं अरागद्वेषतः पुत्रादिप्रीत्या शत्रुद्वेषेण वा यत्कृतं कर्म न भवति फलाभिलाषरहितेन कर्त्रा यत्कृतं कर्म तत्सात्त्विकमुच्यते ...
२३

पैशाचीटीका

कर्मणां त्रैविध्ये सात्त्विकं कर्माह नियतमिति यत्कर्म अफलप्रेप्सुना फलकांक्षारहितेन संगरहितेन नियतं नित्यं अवकर्तव्यं अरागद्वेषतः रागस्त्रीतेन द्वेषेण वा विना कृतं तत्सात्त्विकमुच्यते २३

रणवीरसमिद्बोधिनी

अथ कर्मत्रैविध्यमाह नियतमिति नियतं शास्त्रचोदितं तथा संगरागद्वेषाः पूर्वव्याख्याता तै रहितं फलाभिसंधिशून्येन कर्त्रा यन्निष्पाद्यते तत्कर्म सात्त्विकमुच्यते एतद्बोपादेयं २३॥

२३॥ मधुभाष्य

भाषा अनुवाद

अब इस श्लोक में ले तीन श्लोक के द्वारा सकल कर्म को त्रिविध कहते हैं कि फलप्राप्ति की इच्छा करते हैं ऐसे जो फल के लोभी जनो से किये जाते हैं उन से भिन्न रूप निष्काम कर्म के अनुष्ठान करने वालो से नियत कहे नित्य रूप से विहित औ अभिनिवेश आशक्ति शून्य जो कर्म किये जाये और जो पुत्र आदि के प्रीत्यर्थ अथवा शत्रु पर क्रोध क्रम से किये न होय ऐसे कर्म सात्विक है २३ ॥

दोहा

शास्त्र विहित संग रहित जो राग द्वेष बिन होय बिन फल
इच्छा कर्म जो सात्विक कहियत सोय २३

115

यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः
क्रियते बहुलायासं तद्राजसमुदाहृतं २४

शांकरभाष्य टीका १ ॥

यत्त्विति यत्तु कामेप्सुना कर्मफलप्रेप्सुनेत्यर्थः कर्म साहंका
रेणेति न तत्त्वज्ञानापेक्षया किं तर्हि लौकिकश्रोत्रियनिरहंकारा
पेक्षया यो हि परमार्थनिरहंकार आत्मवित् न तस्य कामेप्सुत्वब
हुलायासकर्तृत्वप्राप्तिरस्ति सात्विकस्यापि कर्मणोऽनात्मवित्
साहंकारः कर्ता किमुत राजसतामसयोः लोकेऽनात्मविदपि श्रो
त्रियो निरहंकार उच्यते निरहंकारोऽयं ब्राह्मण इति तस्मात्तद
पेक्षयैव साहंकारेण वेत्युक्तं पुनःशब्दः पादपूरणार्थः क्रियते
बहुलायासं कर्म महतायासेन निर्वर्त्यते तत् कर्म राजसमु
दाहृतम् २४ ॥

श्रीआनंदगिरिकृत टीका २ ॥

राजसं कर्म निर्दिशति यत्त्विति फलप्रेप्सुना कर्त्रा यत् कर्म क्रि
यते तद्राजसमित्युत्तरत्र सम्बन्धः तत्त्वज्ञानवता निरहंकारेण
साहंकारेण तत्त्वज्ञेन क्रियते कर्मेति विवक्षां वारयति साहं
कारेणेति तत्त्वज्ञानवता निरहंकारेण कृतं कर्मापेक्ष्य साहंका
रेणानेन कृतमेतत् कर्मेति न विवक्ष्यते चेत्तर्हि किमत्र विवक्षि
तमिति पृच्छति किं तर्हीति यो हि दुरितरहितः श्रोत्रियो लोकाद
नपेतस्य यदहंकारवर्जितं कर्म तदपेक्षयेदं साहंकारेण कृते
कर्मण्युक्तमित्याह लौकिकेति न च तत्त्वज्ञानवतो निरहंकारस्य क
र्मकर्तृत्वमपेक्ष्य साहंकारेणेत्यादि किं नेष्यते नेत्याह यो हीति वि
शेषणान्तरवशात् तत्त्वविदो निवारितत्वाच्च तदपेक्षमिदं विशेष
णमित्यर्थः साहंकारस्यैव राजसे कर्मणि कर्तृत्वमित्येतत्कै
मुतिकन्यायेन साधयति सात्विकस्यापीति नन्वात्मविदोऽन्यस्य निरहं
कारत्वायोगात् कथं तदपेक्षया साहंकारेणोक्तं नेत्याह लोक इति २४

श्री॰ गी॰ टी॰ पृ॰

116

+राजसं कर्माह यत्त्विति ॥

स्वामिकृत टीका ३ ॥

+यत्तु कर्म कामेप्सुना फलं प्राप्तुमिच्छता साहंकारेण वा मत्समः को
न्योऽस्तीत्येवं निरूढाहंकारयुक्तेन च क्रियते यच्च पुनर्बहु
लायासं अतिक्लेशयुक्तेन कर्म राजसमुदाहृतं २४ [illegible]

पिशाचभाष्य टीका ४ ॥

यत्तु कामेप्सुना फलार्थिना साहंकारेण कर्तास्मीति भावनेनापरमा
र्थज्ञानेन च बहुलायासेन तद्राजसं २४ ॥

रामानुजभाष्य टीका ५ ॥

यदिति यत्तु पुनः कामेप्सुना फलप्रेप्सुना साहंकारेण वा शब्दश्च
अहंकारेणाभिमानयुक्तेन च बहुलायासं यत्कर्म क्रियते तद्राजसं
बहुलायासमिदं कर्म मयैवं क्रियत इत्येवं रूपाभिमानयुक्तेन य
त्कर्म क्रियते तद्राजसमित्यर्थः २४ ॥

अभिनवगुप्तकृत टीका ६ ॥

स्पष्टार्थं २४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

राजसमाह यत्त्विति कामेप्सुना फलप्राप्तिमिच्छता साहंकारे
ण मत्समः कोऽन्यः श्रोत्रियोऽस्तीति निरूढाहंकारेण कर्त्रा बहुल
श्रमम् अतिक्लेशयुक्तं यत्कृतं तद्राजसं २४ ॥

वनमाली टीका ८ ॥

कामेप्सुना फलकामेन साहंकारेणाहमेव सम्यक् कर्मकर्तेति गर्
वयुक्तेन वा शब्दः समुच्चये पुनरिति नियतं यावन्न कामेप्सा
साधनैः बहुलायासं सर्वाङ्गोपसंहारेण क्लेशावहं यत्कर्म
क्रियते तद्राजसमुदाहृतं २४ ॥

अथ मधुजयन्ती टीका ९

राजसं कर्माह यत्त्विति यत्तु पुनः कामेप्सुना फलाकांक्षिणा वा पु
नः साहंकारेण कर्त्राभिमानयुक्तेन प्रकृष्टेन बहुलायासं बहु
नरक्लेशप्रदं यत्कर्म क्रियते तत्कर्म राजसं रजोगुणयुक्तं

नैशास्त्रज्ञैः कथितम् २४ ॥

मधुसूदनी टीका ९

नः सात्विकाद्भिन्न निष्कामेप्सुना फलकामेन कर्त्री साहंकारे
ण शुद्धकस्वेगात्मकगर्विष्टेनैव वा शब्दः समुच्चये पुनरिति
नियते यावत्कामं नैकाम्याहंकृतेः बहुलायासेन सर्वयोगोपसंहारेण पुनः सर्वे विशे
लेशावहं यत्काम्यकर्म क्रियते तद्राजसमुदाहृतं २४ ॥
षणैः सात्विकसर्वविशेषणव्यतिरेको दर्शितः २४

सदानंदी टीका ११ ॥

फलकामेन कर्त्रा पुनर्विष्टेनैवाहंकृते यावत्तत्कामनाकाम्या
हेतोर्नियते पुनः १ सकलयोगोपसंहारात्क्लेशादं कामप्रमफुवे
क्रियते कर्म यत्तद्राजससमुदाहृतं २ सर्वैर्विशेषणैरन्वा
सात्विकाद्दर्शिताभिदा ३ ॥ २४ ॥

नीलकंठी टीका १२ ॥

यत्तु कामेप्सुना फलार्थिना साहंकारेण यद्यपि सात्विको
ऽनात्मवित्साहंकारस्तथापि शुद्धमेव कर्मकुशलो महान्
श्रोत्रियस्स्याभिमानी हि कारस्तद्वता साहंकारेण वा शब्दार्थो
क्रियते बहुलायासं प्रतिश्रमकरं तत्कर्म राजसमुदाहृतं २४

आनंदी टीका १३

कामेप्सुना ऐहिकामुष्मिकभोगेप्सुना साहंकारेण ब्रह्मा
त्मनः किंचित्परित्यज्य शरीरादावहंभावेन यद्बहुमहात्म
भिः कृतं तदहमपि कुर्वेऽहमिति गर्वेण च शरीरचित्तवित्तव्यया
यासमुपि बहुक्लेशावहं फलम् २४

रामकंठी टीका १४

अथ राजसं कर्माह तद्राजसं रजोगुणहेतुकं किं तद्यदैहिकामुष्मि
कभोगलिप्सुना तथा साहंकारेणात्मनि शरीरादावहंप्रत्यय

श्री॰ वताकर्त्रा क्लेशबहुलं वित्तशरीरायासभूयिष्ठं क्रियते तद्देहाभ
गी॰टी॰ मानिहेतोः दुःखबहुलाद्राजसः सम्बन्धेनतस्मादिविषयत्वाद्
ग्र॰ हेयं २४ ॥

लाभिकी ... टीका

राजसंकर्माह— अनुबंधं पश्चाद्भाविशुभाशुभं तथा धनादिनाशं हिंसां प्रा
णिपीडां पौरुषं स्वसामर्थ्यम् अनवेक्ष्यापर्यालोच्य केवला
न्मोहादविवेकादेव यत्कर्मारभ्यते तत्तामसमुदाहृतं
२५

पंबोलीटीका

राजसंकर्माह यत्त्विति यत्कर्म कामेप्सुना वा पुनः साहं
कारेण साभिमानेन बहुलायासेन महतायासेन क्रियते तदे
वंविधं कर्म राजसमुदाहृतं २४ ॥

रसाबीसमभिहोधिनी

राजसमाह यत्त्विति फलमभिसंधाय तु यत्साहंकारेण
ममस्मः कोन्योस्त्येवं दंभहेत्वभिमानसहितेन अथवा हं
कारः क्रोधकरणं तदभावो हंकारः क्रोधत्यागस्तत्सहि
तेन वा कर्त्रा यत्कर्म परोचितं स्वोचितं वा क्रियते तद्राजस
कथितं कीदृशं क्लेशबहुलं वित्तशरीरायासभूयिष्ठं
मतो दृश्यमेवतत् २४

२६॥ मधुभाष्य

भाषा अनुवाद

और कर्म्मफल प्राप्ति का इच्छुक अथवा अहंकारी कहे जो अपने समान और को नही मानता है ऐसे अहंकारयुक्त मनुष्य से किये गये अथवा जो कर्म्म अति क्लेशयुक्त होय उन्ही को शिष्टजन राजसस्वरूप कहते हैं २८ ॥

दोहा

जो अभिलाषि कर्म को कर अहंकार हि सोय क्लेश बहुत है याहि में राजस कहिय सोय २४ ॥

118

अनुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषं मो
हादारभ्यते कर्म यत्तत्तामसमुच्यते २५

शांकरभाष्य टीका १ ॥

अनुबंधमिति अनुबंधः पश्चाद्भावि यद्वस्तु सोऽनुबंध उच्य
ते तं चानुबंधं क्षयं यस्मिन् कर्मणि क्रियमाणे शक्तिक्षयो
ऽर्थक्षयो वा स्यात्तं क्षयं हिंसां प्राणिपीडां चानपेक्ष्य च पौरुषं पुरु
षकारं शक्नोमीदं कर्म समापयितुमित्येवमात्मसामर्थ्य
मित्येतान्यनुबंधादीन्यनपेक्ष्य पौरुषान्तानि मोहादविवेकत
आरभ्यते कर्म यत्तत्तामसं तमोनिर्वृत्तमुच्यते २५ ॥

आनंदगिरि टीका २ ॥

सम्प्रति तामसं कर्मोदाहरति अनुबंधमित्यादिना २५ ॥

स्वामिकृत टीका ३ ॥

तामसं कर्माह ॥
अनुबंधमिति अनुबध्नातीत्यनुबंधं पश्चाद्भावि शुभा
शुभं क्षयं वित्तव्ययं हिंसां परपीडां च पौरुषं स्वसामर्थ्यं चा
नपेक्ष्यापर्यालोच्य केवलं मोहादेव यत्कर्मारभ्यते तत्तामसमुदा
हृतम् २५ ॥

पिशाचभाष्य टीका ४ ॥

अनुबध्यत इत्यनुबंधः कर्मणि क्रियमाणे येनानुसंबध्यते सोऽनुबं
धस्तमनवेक्ष्य कर्मनिमित्ताहिंसा पुरुषकारं चानवेक्ष्य मोहा
दज्ञानादारभ्यते तत्तामसं २५ ॥

रामानुजभाष्य टीका ५

अनुबंधमिति कृते कर्मणि अनुबध्यमानं दुःखमनुबंधः कर्म
णि क्रियमाणे ऽर्थविनाशः क्षयः तेन प्राणिपीडा आत्मनः कर्म
समापन[illegible]सामर्थ्यं पौरुषं एतान्यनवेक्ष्याविमृश्य मोहा
दारभ्य पुरुषकर्तृत्वाज्ञानानात्परतः कर्म क्रियते तत्तामसमुच्यते
२५ ॥

अभिनवगुप्तकृत टीका ६

विभक्तेश्छेदवमनुष्यादि नया एष्ठा केन इहमस्मीति विह मे हेष इत्यादिबुद्ध्या अहेतुकं
कारणमविचार्यैव अभिनिवेशावेशवशात्कार्य रागादिग्रहणं यत्तत्तामसं संज्ञं

श्री॰
गी॰टी॰
पं॰

119

नियतंकर्तव्यमिति क्लेशैरविद्याद्यैर्बहुलेवाप्रं मोहादभिनिवेशमयात्॥ स्पष्टार्थः २५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

तामसमाह अनुबन्धमिति अनुबध्यत इत्यनुबन्धः भावि शुभाशुभं तत्परिज्ञाय हिंसां स्वपरपीडां पौरुषं स्वसामर्थ्यं चानपेक्ष्य अविगणय्य केवलं मोहादेव यत्कर्मारभ्यते तत्तामसं २५॥

वनमाली टीका ८

अनुबन्धं पश्चाद्भाविशुभाशुभं तथा देहसामर्थ्यस्य धनादेश्च नाशं हिंसां प्राणिपीडां पौरुषमात्मसामर्थ्यं चानपेक्ष्य अनालोच्य मोहात्केवलादविवेकादेवारभ्यते यत्कर्म तत्तामसमुच्यते २५॥

कृष्णवैजयन्ती टीका ९

तामसं कर्माह अनुबन्धमिति अनुबन्धं कृतकर्मणि अनुपश्चाद्भाव्यमानं दुःखमनुबन्धं स्वराजभटयमभटादिकृतं तदं कर्मणि क्रियमाणे च मार्यादिविनाशं हिंसां कर्मणि क्रियमाणे प्राणिपीडां च पौरुषं स्वस्य कर्मसमापनसामर्थ्यमनपेक्ष्य अविविच्य मोहान्नैवं करिष्यामीत्यभिनिवेशाद्यत्कर्मारभ्यते न मोक्षाय केन जनेन क्रियते तत्कर्म तामसं तमोगुणकार्यत्वात्तमसेवदर्शितं कृतकर्म २५॥

मधुसूदनी टीका १०

अनुबन्धं पश्चाद्भाविशुभाशुभं शरीरसामर्थ्यस्य धनस्य च नाशं हिंसां प्राणिपीडां पौरुषमात्मसामर्थ्यं चानपेक्ष्य अपर्यालोच्य मोहात्केवलादविवेकादेवारभ्यते यत्कर्म यथा दुर्योधनेन युद्धं तत्तामसमुच्यते २५

सदानन्दी टीका ११

पश्चाद्भाव्यशुभं देहसामर्थ्यस्य धनस्य च विनाशं प्राणिनां पीडां आत्मसामर्थ्यमेव च अपर्यालोच्य मोहात्केवलादविवेकात् आरभ्यते जडैः कर्म तत्तामसमुदाहृतम् २॥ २५॥

नीलकंठी टीका १२

अनुबध्यतेनेनेत्यनुबंधः फले तत्क्षयेशक्तेर्व्ययोवनाशो हिंसांपरपीडां पौरुषंस्वसामर्थ्यं अनपेक्ष्यअनालोच्यके वलेमोहादविवेकतोयदारभतेकर्मतत्तामसमुदाहृतं २५

आनंदीटीका १३

अनुबंधंफलंशुभमशुभंवेत्यनवेक्ष्याविचार्य तथाक्षयं द्रव्यादिव्ययं हिंसांपरपीडां पौरुषंस्वसामर्थ्यं चानवेक्ष्य मोहाद्विपरीतज्ञानाद्यदारभते तत्तन्निर्वाह्यते तत्तामसमुच्यते २५

रामकंठी टीका १४

अथतामसं तत्तामसंतमोगुणहेतुकंकर्मकिंतद्यन्मोहादार भतेकर्त्तेत्युपक्रमते कथमिदंक्रियमाणंकिमर्थमनुबध्नाति पुष्णाति किंवात्वयपयन्त्यस्मिन्क्रियमाणेकस्यहिंसोपघातः समुत्पद्यतइत्यनुबंधंतत्क्षयंहिंसांचानवेक्ष्याविचार्यैव यत्तदपि मोहाज्ञानप्रमादकारणभूततमःसमुद्भवत्वान्निकृष्टतमसं सारविषयंस्वतराहेयमेव [illegible] २५ ॥

लासिकी टीका

अथत्रिविधःकर्तोच्यते तत्रसात्विकस्तावत् ॥

अनुबंधंपश्चाद्भाविशुभाशुभं तत्क्षयंधनादिनाशं हिंसांप्राणिपी डां पौरुषंस्वसामर्थ्यमनवेक्ष्यापर्यालोच्य केवलान्मोहादवि वेकादेवयत्कर्मारभ्यतेतत्तामसमुदाहृतं २५

पंचोलीटीका

तामसंकर्माह अनुबंधमिति यत्कर्मअनुबंधंपश्चाद्भाविशुभा शुभंवस्ततः तत्क्षयंयस्मिन्कर्मणिक्रियमाणेशक्तिक्षयोर्थः त थावास्यानंतरयेहिंसाप्राणिपीडा चयत्न पौरुषंस्वकीयसा

मंथंएतच्चतक्षयमनवेक्ष्यकेवलंमोहादविवेकादारभ्यते
तत्तामसं २५

रणवीरसमिद्धोयिनी॥

तामसं कथयति अनुबंधमिति एतत्क्रियमाणं कर्म किं शुभा
शुभं फलमनुबध्नाति पुष्णाति किं वा क्षिपयति कस्य वा हिं
सायै उपघाताय भवतीत्येवं प्रकारेणानुबंधक्षयहिंसाः त
था स्वस्य परस्य च पौरुषं सामर्थ्यं वा पर्यालोच्यैव केवलं मो
हादेव यत्कर्मारभ्यते कर्तुं प्रक्रम्यते तत्तामसमुदाहृतमित्य
र्थः एतदप्यनिष्टफलकत्वाद्धेयमेव २५॥

मधुभाष्य

२५॥

भाषा अनुवाद

अब तामस कर्म कहते हैं कि पश्चात् बन्ध करैं ऐसे अनुब
न्ध कहे पश्चात् भावी शुभ अशुभ और धन व्यय और अपा
नी सामर्थ्य न विचारि केवल मोह से जो कर्म आरम्भ किये
जाये वेई तामस कर्म हैं २५ ॥

दोहा

हिंसा क्षय अनुबंधको पौरुषकों बिनजान कर्म अरंभ
मोहसें तामस सो हि वषान २५

121

मुक्तसंगोनहंवादीधृत्युत्साहसमन्वितः
सिद्ध्यसिद्ध्योर्निर्विकारःकर्तासात्विकउच्यते
२६ ॥

शांकरभाष्यटीका १

मुक्तेति मुक्तसंगोमुक्तः परित्यक्तः संगोयेन समुक्तसंगो
ऽनहंवादी नाहं वदनशीलोधृत्युत्साहसमन्वितोधृतिर्धारणं
उत्साहउद्यमस्ताभ्यां समन्वितः संयुक्तोधृत्युत्साहसमन्वितः
सिद्ध्यसिद्ध्योः क्रियमाणस्यकर्मणः फलसिद्धावसिद्धौचसिद्ध्य
सिद्ध्योः निर्विकारः केवलं शास्त्रप्रमाणप्रयुक्तफलरागादिनाप्रयु
क्तोयः सनिर्विकारउच्यते एवंभूतःकर्तायःससात्विकउच्यते २६

आनंदगिरि टीका २

इदानीं कर्तृत्रैविध्ये ध्रुवत्वात् सात्विकं कर्तारं दर्शयति मु
क्तेति संगोनाम फलाभिसंधिर्वा कर्तृत्वाभिमानोवा नाहंवद
नशीलः कर्ताहमिति वदनशीलोन भवतीत्यर्थः धारणं धै
र्यं क्रियमाणस्य कर्मणोयदि फलसिद्धिस्तर्हि नात्यर्थं न
विस्रंभः संभवेदित्याशंक्याह केवलमिति फलरागादिने
त्यादिशब्देन कर्मरागोगृह्यते प्रयुक्तइतिच्छेदः २६ ॥

स्वामिकृत टीका ३

कर्तारंत्रिविधमाह मुक्तसंगइतित्रिभिः मुक्तसंगस्त्यक्ताभि
निवेशः अनहंवादीगर्वोक्तिरहितः धृतिर्धैर्यमुत्साहउद्य
मस्ताभ्यांसमन्वितः संयुक्तःप्रारब्धस्यकर्मणः सिद्धावसि
द्धौचनिर्विकारोहर्षविषादशून्यःएवंभूतःकर्तासात्विकउच्य
ते [illegible] ॥

पिशाचभाष्यटीका ४

मुक्तसंगः मुक्तफलत्वमनहंवादी आत्मानंसंभावितेनवद

श्री० गी० टी० अ०

122

तिष्ठति धात्मनः संधारणा धृत्याहः प्रयत्नः ताभ्यां समन्वितेः धृत्यु
त्साहसमन्वितः सिद्ध्यसिद्ध्योः सिध्यसिद्धोनयोर्निर्विकारः
हर्षविषादरहितः कर्त्ता सात्विकः २६ ॥

रामानुजभाष्यटीका ५

मुक्तसंगइति मुक्तसंगः फलसंगरहितः अनहंवादी कर्तृत्वा
भिमानरहितः धृत्युत्साहसमन्वितः आरब्धकर्मणि यावत्समाप्ति
वर्जनीयदुःखधारणाधृतिः उत्साहः उन्मुक्तचेतस्त्वं ताभ्यां समन्वि
तः सिद्ध्यसिद्ध्योर्निर्विकारः युद्धादौकर्मणि तदुपकरणभूतद्र
व्यार्जनादिषु वा सिद्ध्यसिद्ध्योरविकृतचित्तः कर्त्ता सात्विक उच्यते २६

+ अहंकर्तेति न वदनशील अहं मस्तत्मा ध्रुकारी वा यो भवतीति नाहंवादी त्वनेन ती
तिनाव्यवहारमात्रसंहृतिवशेन योगिनोप्यहंकरोमीति
वचोन निषिद्धम् हर्षशो
कान्वितः सिद्ध्यसिद्ध्योः ॥

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थः २६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

अथ त्रिविधं कर्तारमाह मुक्तसंग इत्यादित्रिभिः मुक्तसंगस्य
क्ताभिनिवेशः अनहंवादी गर्वस्याचाररहितः धृतिर्धैर्यमुत्सा
हः प्रवृत्तिवेगस्ताभ्यां समन्वितः सिद्धाव सिद्धौ वा निर्विकारः हर्ष
विषादरहितः एवंभूतः कर्त्ता सात्विकः २६ ॥

वनमाली टीका ८ ॥

कर्तृत्रैविध्यमाह मुक्तेति त्रिभिः मुक्तसंगः फलेच्छाशून्यः
अनहंवादी कर्ताहमिति वदनशीलो न भवति धृतिर्विघ्नावाप्ता
अपि नावश्यमारब्धं परित्यागहेतुर्धैर्यमुत्साहः इदं क
रिष्यामीति निश्चयात्मिका बुद्धिः ताभ्यां समन्वितः क्रियमाण
कर्मफलस्य सिद्धाव सिद्धौ च हर्षशोकाभ्यां हेतुभ्यां विकारो वदन
विकाशम्लानत्वादिस्तेन रहितः सिद्ध्यसिद्ध्योर्निर्विकारः एतादृ
शः कर्त्ता सात्विक उच्यते २६ ॥

…समवैजयंती टीका ९

अथ कर्तुर्भेदविधं त्रिभिर्विवृण्वन्नादौ सात्विकं कर्तारमाह मुक्तसंग इ
ति मुक्तसंगः स्वकर्तृत्वाभिनिवेशफलाकांक्षारहितः अनहंवा

दीप्त महायोऽहमेवेदं सर्वं कर्माकरवमस्य करोम्यग्रेऽपि करिष्या
मीति स्वगर्वोक्तिरहितः धृत्युत्साहसमन्वितः धृतिर्गृहीतकर्म
समाप्तिपर्यन्तावर्जनीयदुःखसहिष्णुता उत्साहः कर्मानुष्ठानोद्य
न चित्तता धृतिश्चोत्साहश्चैतौ ताभ्यां समन्वितो युक्तः सिद्ध्यसिद्ध्योः
यस्तदानुष्ठाद्देः कर्मणा स्तत्साधनस्य तद्व्याजेनादेनावर्षक
सतस्फलस्य चेति सिद्धापासावसिद्धावपामो चानिर्विकारः विकृतवि
नः हर्षशोकविषादेन वर्जितः उपर्यर्थः ईदृशः कर्ता सात्त्विकः सत्व
गुणान्वित उच्यते कथ्यते २६ ॥

+ इदानीं त्रिविधः कर्तोच्यते ॥

मधुसूदनी टीका १० ॥

+ मुक्तसंगः मुक्त फलाभिसंधिः अनहंवादी कर्ताऽहमिति न वद
नशीलो भवति स्वगुणश्लाघाहीनो वा धृतिः विघ्नाद्युपस्थिता
वपि प्रारब्धापरित्यागहेतुरन्तःकरणवृत्तिविशेषो धैर्यं उत्साहः इ
दमहं करिष्याम्येवेति निश्चयात्मिका बुद्धिः धृतिर्हेतुभूता ताभ्यां
संयुक्तः धृत्युत्साहसमन्वितः कर्मणः क्रियमाणस्य फलस्यासि
द्धौ च सिद्धौ च हर्षशोकाभ्यां हेतुभ्यां यो विकारः वदनविकास
म्ला[illegible]नत्वादिः तेन रहितः सिद्ध्यसिद्ध्योर्निर्विकारः केवलं शा
स्त्रप्रमाणप्रयुक्तो न फलरागेण [illegible]तः एवंभूतः कर्ता सात्त्विक उच्यते
२६ ॥

सदानंदी टीका ११ ॥

इदानीं त्रिविधः कर्ताप्रोच्यते हरिणा त्रिभिः फलाभिसंधिशून्यो
योऽहं कर्तेति मतिविना १ स्वस्य स्वगुणश्लाघा चानहंवादी तिवो दि
नः विघ्नाद्युपस्थितौ समारब्धापरित्यागकारणं २ चित्तवृत्तिविशे
षो हि धृतिर्धैर्यमितीर्यते इदं करिष्याम्येवेति निश्चया
त्मिका ३ धृतिकारणमुत्साहस्ताभ्यां संयुक्त उत्तमः कर्मणः क्रि
यमाणस्य सिद्ध्यसिद्ध्योः फलस्य यः ४ विकारो हर्षशोकाभ्यां वि
कासम्लानकोऽस्य वै तेन शून्यश्च शास्त्रप्रयुक्तो न तु रागवान्
५ एवंभूतो महाभागः कर्ता सात्त्विक उच्यते ६ ॥ २६ ॥

श्री
गी टी
अ॰

123

नीलकंठीटीका १२

कर्तारं त्रैविध्यमाह मुक्तेत्यादिना मुक्तसंगस्त्यक्ताभिनिवेशः
अनहंवादी अहंवादीका अहंकारोक्तिरहितः धृतिर्धैर्यं उत्साहः सा
धयिष्याम्येवेति दृढनिश्चयः ताभ्यां समन्वितः सिद्ध्यसिद्ध्योः
कर्मणः प्रारब्धस्येति शेषः निर्विकारः हर्षविषादशून्यः क
र्ता सात्विक उच्यते २६ ॥

आनंदीटीका १३

कर्ताकर्मानुष्ठाता मुक्तसंगः हृष्टे चादृष्टे च कर्मफले नास
क्तः अनहंवादी यन्मया कृतं तत्कोन्यः कर्तुं शक्नुयादिति
तू॰ विकत्थनशून्यः धृतिः प्रारब्धस्य कर्मणः समाप्तिं यावत्स्थैर्यं
उत्साह उद्योगः सिद्ध्यसिद्ध्योर्निर्विकारः हर्षशोकशून्यः २६

+ अथ त्रिविधः कर्तोच्यते तत्र सात्विकस्तावत् ॥

रामकंठीटीका १४

+ ईदृशः कर्ता कर्मणामनुष्ठाता सात्विक उच्यते सात्विकचित्तत्वा
त्कर्ता सात्विकस्तमुपदिशति सकीदृशः मुक्तसंगो मुक्तः परित्यक्तः
संगः संसारतरुबीजभूतो व्याख्यातरूपो दोषो येन यतोनहंवादी
देहत्रयरूपमनित्यमर्थमात्मत्वेन प्रतिपद्याहं यज्ञामीत्यादि यो व
हं॰ दति सोहंवादी सर्वः संसारिजनस्तद्विपरीतोनहंवादी शरीरादिषु
नात्मभूतेष्वपि निरहंकारस्तथा धृत्या वक्ष्यमाणलक्षणया
नुष्ठेयवस्तुहृष्टावष्टंभशालितया तथोत्साहेनोद्योगेन समन्वितः
अत एव सिद्धौ फलनिष्पत्तौ वा सिद्धौ तदनिष्पत्तौ च हर्षशोकल
क्षणविकाररहितं ईदृशं कर्तृत्वं ज्ञानिदेहेनोः एवं व [illegible] सत्वा
त्वगुणाश्चेयमेव तस्य प्राप्तिहेतुत्वादुपादेयम् अथ राजसः २६

+ अथ त्रिविधः कर्तोच्यते तत्र सात्विक
स्तावत् ॥

लासिकी [illegible]टीका

+ मुक्त त्यक्तः संगः आसक्तिर्येन सः विरक्त इत्यर्थः देहाद्यभिमाना
भावादनहंवादी अहमहमिति गर्वोक्तिरहितः धृत्यादार्ढ्येन
नोत्साहेनोद्यमेन च समन्वितः तथा प्रारब्धकर्मणः फलस्य सि

ज्ञावसिद्धौवानिर्विकारोहर्षविषादशून्यः एवंभूतःकर्तासात्विक
उच्यते [illegible] २६

पंचोलीटीका

कर्तव्ये त्रिविधे सात्विकंकर्तारमाह मुक्तसंगइति मुक्तसंगःमक्त
फलासंगः अनहंवादीनाहंवदनशीलः धृत्युत्साहसमन्वितः धैर्यो
द्यमाभ्यांसमन्वितः सिद्ध्यसिद्ध्योर्निर्विकारः फलसिद्धावसिद्धौचनि
विकारः प्रीतिद्वेषरहितः एवंविधःकर्तासात्विकउच्यते २६॥

महावीरसमिद्बोधिनी

कर्तृत्रैविध्यंप्रतिपादयंस्तत्रसात्विकंकर्तारंलक्षयति मुक्तसंगः
ति मायगोव्यक्तार्थःश्लोकः किंतु नहंवादी परमेश्वरस्येवसर्वत्र
स्वातंत्र्यमित्यभिमानान्निरहंकारः यद्वा नअहंवादी किंतुहंवादी
कोयस्सर्वमेवप्रतिपन्नंसंबोधयतीति प्रकृतार्थीनजुगुप्सोथीः २६॥

मधुभाष्य

२६॥

भाषा अनुवाद

इस श्लोक से ले तीन श्लोक से कर्म्मकर्ता सब को त्रिविध करके कहते है कि कर्म्म अवश्य ही ग्रहण करिव अभिनिवेश बुद्धि रहित औ राग देवचन रहित औ धैर्य उत्साह जो उद्यम इन दोनो के द्वारा युक्त समस्त कर्म्म मे सिद्धि असिद्धि की अपेक्षा हर्ष विषाद शून्य होय ऐसे कर्त्ता पुरुषो की सात्विकस्वरूप कहते है २६ ॥

दोहा

बिना संग अहंकार बिन धृति उत्साह समेत विकार बिना सिद्धि असिद्धि मे सात्विककर्त्ता कहेत २६॥

125

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः २७

शंकरभाष्य टीका १॥

रागीति रागी रागोस्यास्तीति रागी कर्मफलप्रेप्सुः कर्मफलार्थी लुब्धः परद्रव्येषु संजाततृष्णः तीर्थादौ च स्वद्रव्यापरित्यागी हिंसात्मकः परपीडकस्वभावः अशुचिर्बाह्याभ्यन्तः शौचवर्जितो हर्षशोकान्वितः इष्टप्राप्तौ हर्षोऽनिष्टप्राप्तौ इष्टवियोगे च शोकः ताभ्यां हर्षशोकाभ्यां समन्वितः संयुक्तः तस्यैव च कर्मणः सम्पत्तिविपत्त्योर्हर्षशोकौ स्यातां ताभ्यां समन्वितः संयुक्तो यः कर्ता स राजसः परिकीर्तितः २७ ॥

आनंदगिरि टीका २

राजसं कर्तारं कथयति रागीति कर्मविषयो रागः कर्मफलप्रेप्सुरिति फलरागस्य पृथक्कथनात् स्वाभिप्रायप्रकटीकरणं सर्वं के परपीडने परद्रव्यविक्षेपेनेन स्वार्थपरश्चार्थः २७ ॥

स्वामिकृत टीका ३

राजसंकर्तारमाह ॥
रागीति रागी पुत्रादिप्रीतिमान् कर्मफलप्रेप्सुः कर्मफलकामी लुब्धः परस्वाभिलाषी हिंसात्मको मारकस्वभावः अशुचिः विहितशौचशून्यः लाभालभयोर्हर्षशोकाभ्याम् अन्वितः कर्ता राजसः परिकीर्तितः [illegible] २७ ॥

पिशाचभाष्य टीका ४

रागोस्यास्तीति रागी लुब्धः दद्यविर्ग्याग वर्जितः हर्षशोकाभ्यामन्वितः हर्षशोकान्वित एवं भूतः कर्ता राजसः २७ ॥

रामानुजभाष्य टीका ५

रागी कर्मेति रागी प्रीतिमान् कर्मफलप्रेप्सुः कर्मफलार्थी लुब्धः कर्मापेक्षितद्रव्यव्ययस्वभावरहितः हिंसात्मकः परान्पीडयित्वा तैः कर्माणि कुर्वाणः अशुचिः कर्मापेक्षितशुद्धिरहितः हर्षशोकान्वितः उ

६०

श्री
गी॰ टी॰
म॰

126

ह्रादौ कर्मणि विजयादिसिद्ध्यसिद्ध्योर्हर्षशोकान्वितः कर्ता राज सः परिकीर्तितः २७ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थः २७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटी टीका ७

राजसमाह रागीति रागी पुत्रादिप्रीतिमान् कर्मफलप्रेप्सुः कर्म फलकामी लुब्धः स्वगृहव्ययविलोपी सर्वहिंसात्मकः हिंसापरात्मा मामनोवाक्कायशुचिः शौचरहितः लाभालाभयोर्हर्षशोकाभ्या मन्वितः कर्ता राजसः २७ ॥

वनमाली टीका ८ ॥

रागी कामाद्याकुलचित्तः अतएव कर्मफलप्रेप्सुः लुब्धः पर द्रव्याभिलाषी यथार्थव्ययानासमर्थश्च परस्य निच्छेदने हिं सात्मकोऽशुचिः शास्त्रोक्तशौचहीनः सिद्ध्यसिद्ध्योः कर्मफल स्य हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः २७ ॥

ज्ञसमवैजयंती टीका ९

राजसं कर्तारमाह रागीति रागी पुत्रपामदारपशुपुत्रादिषु सक्त चित्तः कर्मफलप्रेप्सुः इहामुत्र वा स्वर्गस्त्र्यादिभोगरूपकर्मफल स्पृहयालुर्लुब्धः कर्मापेक्षितद्रव्यपरित्यक्तः हिंसात्मकः परा पीडाकर्मकर्तृत्वशीलः अशुचिः कर्मापेक्षितन्त्रशुद्धिशून्यः हर्षशोका न्वितः कर्मणामारम्भफलस्यावाप्त्यावाप्त्योर्हर्षः प्राप्तौ शोकस्त्वप्राप्तौ माभ्यामन्वितः ईदृशः कर्ता राजसो रजोगुणात्मकः परिकीर्तितो भगव न्मतमाश्रित्य शालेसु विशेषतः २७ ॥

मधुसूदनी टीका ९

रागी कामाद्याकुलचित्तः अतएव कर्मफलप्रेप्सुः कर्मफलार्थी लुब्धः परद्रव्याभिलाषी यथार्थव्ययद्रव्यमागासमर्थश्च स्वाभिप्रा यप्रकटनेन परस्य निच्छेदने हिंसानपात्मकस्तन्स्वभावः स्वाभिप्रा याप्रकटनेनानेकानिकरतिमेदः अशुचिः शास्त्रोक्तशौचहीनः

सिद्ध्यसिद्ध्योः कर्मफलस्य हर्षशोकान्वितः एवंविधः कर्ता रा जसः परिकीर्तितः २७ ॥

सदानंदी टीका ११ ॥

कामाद्याकुलचित्तोयः फलार्थी कर्मणः सदा परद्रव्याभि लाषी स्वतीर्थेष्वपि स्वक्रमलमः १ स्वाशयोद्धाटनेनान्यहत्ति क्लेदनशीलवान् प्राप्ताप्राप्तशोचरहितः सिद्ध्यसिद्ध्योः फल सच हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ३ २७ ॥

नीलकंठी टीका १२ ॥

रागी विषयलोलुपः अतएव कर्मणः फलप्रेप्सुः नीतिकर्मफ लप्रेप्सुः लुब्धः परद्रव्यादौ संजाततृष्णः स्वतीर्थादौ वाद्रव्याप्रति त्यागी हिंसात्मकः परपीडाकरस्वभावः अशुचिर्विहीनः शौ च वर्जितः इष्टानिष्टप्राप्तौ हर्षशोकान्वितः अयः कर्ता सरा जसः परिकीर्तितः २७ ॥

आनंदीटीका १३ ॥

रागी विषयेषु प्रीतिमान् लुब्धोऽद्रव्ययभीरुः २७ ॥ ५

रामकंठीटीका १४

ईदृशः कर्ता राजसः पूर्वबद्धजोगुणात्मकः कथ्यते कीदृशो रागी विषयस्वेवेषभिलाषवांस्तथा कर्मफलप्रेप्सुः क्रियमाण स्य कर्मणो यज्ञादेः फलमनित्यं स्वर्गभोगादिरूपं लिप्सुः तथा लु ब्धो गर्ववान् तथा हिंसात्मकः प्राणिद्रोहपरायणः तथा अशुचिः बाह्याभ्यन्तरशौचरहितः तथा फलेकालस्वनचिन्तत्वात्तत्सिद्ध्यसिद्ध्योः भवाभ्यां परितोषविषादाभ्यां युक्तः एतादृशः कर्ता लोभादि दोष कारणभूतरजोगुणसमन्वितत्वात्संसारविषयदेयं अप्यतामसः मचासं २७

लाक्षिकी टीका

राजसं कर्तारमाह ॥
रागी विषयाभिलाषवान् कर्मफलंलिप्सुः लुब्धः परस्वाभिला

गी॰
टी॰
म॰

षी हिंसात्मकोऽमार्त्स्वभावः अशुचिर्बाह्याभ्यंतरशौचरहितः फलसिद्ध्यसिद्ध्योर्हर्षशोकाभ्यामन्वितः एवंविधः कर्ता राजसः परिकीर्तितः [illegible] २७

पैचोलीटीका

राजसं कर्तारमाह रागीति रागी कर्मण्यासक्तियुक्तः कर्मफलप्रेप्सुः कर्मफलेषु लुब्धः परद्रव्यादिषु संजाततृष्णः सामीप्यौ। तीसद्रव्यापरित्यागी हिंसात्मकः परपीडाकरस्वभावः अशुचिः बाह्यान्तरशौचवर्जितः हर्षशोकान्वितः इष्टप्राप्तौ हर्षः इष्टवियोगे शोकः ताभ्यां युक्तः अथवा कर्मसंपत्तिविपत्त्योर्हर्षशोकसंयुक्तः एवंविधः कर्ता राजसः परिकीर्तितः २७

रमावीरसमिद्धोधिनी

राजसं कर्तारमाह रागीति रागी विषयसुखेष्वभिलाषवान् पुत्रमित्रादिविषयकप्रेमाक्रान्तचित्तो वा तथा कर्मफलप्रेप्सुः क्रियमाणस्य कर्मणो यज्ञादेः फलमनित्यं स्वर्गभोगादिकं प्राप्तुमिच्छन् तथा लुब्धः परस्वाभिलाषी तथा हिंसात्मकः विरुद्धस्य स्ववर्णोचितस्य धर्मस्य परित्यागेनोपघातो हिंसा तत्रात्मा बुद्धिरन्तःकरणं यस्य परधर्मस्वीकारेण स्वधर्मस्य पीडने हिंसा तन्निवर्तक आत्मा यत्नोऽस्येति वा तथा अशुचिः विहितःकरणादिकः यद्वा सर्वधातस्य उत्पन्नेन शरीरस्यैव केन च प्रत्ययेन व्युत्पन्नः अशुचिः शोकः ननु वक्तव्यायां निषेधः यद्वा शोकोऽस्यात्य अशुचिर्वा तन्नुवितं इत्यादि शोकं करोतीत्यर्थः यद्वा पावकेऽशुचिः मासमात्रेण वा तत्पदेषु सिमेध्येमिति विश्विति नानुणामनात अशुचिर्निः सविवेकः सविवेको वा तथा जयपराजययोर्विषये हर्षशोकाभ्यां सहितः ईदृशः कर्ता राजसः

मधुभाष्य

२७॥

भाषा अनुवाद

और पुत्र आदि मे स्नेह युक्त औ कर्मफल का कामी और पर धन का अभिलाषी औ निर्दयस्वभाव औ शौच रहित औ हानि लाभमे शोक हर्ष युक्त कर्मकारी मनुष्य राजस स्वरूप कहे रजोगुणी है २७ ॥

दोहा

अनुरागी फलकांक्षि जो लोभी पापी अशुद्ध हर्षशोकयुत कर्त्ता तिह कहत है राजस बध २७

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोलसः

विषादी दीर्घसूत्री च कर्ता तामस उच्यते २८

शांकरभाष्य टीका १ ॥

अयुक्त इति अयुक्तो समाहितः प्राकृतोत्यन्तासंस्कृतबुद्धिः प्रकृतिपरवशो बालिशः स्तब्धो दण्डवत् न नमति कस्मैचित् शठः मायावी शक्तिगूहनकारी मायावीः कृतिकः परवृत्तिच्छेदनप रः अलसोऽप्रवृत्तिशीलः कर्तव्येष्वपि विषादी सर्वदा अवसन्न स्वभावः दीर्घसूत्री च कर्तव्यानां दीर्घप्रसारणः सर्वदा मन्द स्वभावः यदद्य श्वो वा कर्तव्यं तन्मासेनापि न करोति यश्चैवम्भूतः स कर्ता तामस उच्यते २८ ॥

आनन्दगिरि टीका २

दीर्घं सूत्रयितुं शीलमस्येति व्युत्पत्तिं गृहीत्वा विवक्षितमर्थ माह कर्तव्यानामिति एवं क्रियमाणे सति अनिष्टमिदं क माह कर्तव्यानामिति एवं क्रियमाणे सति अनिष्टमिदं क

+नामसंकर्तारमाह ॥

स्वामिकृत टीका ३

+अयुक्तोनवहितः प्राकृतो विवेकशून्यः स्तब्धः अनम्रः शठः अलसोनद्यमशी शक्तिगूहनकारी नैष्कृतिकः परावमानी अलसोनद्यमशी लः विषादी शोकशीलः यदद्य श्वो वा कार्यं तन्मासेनापि न सम्पा दयति यः स दीर्घसूत्री एवंभूतः कर्ता तामसः कर्तव्ये विधेने वनत्वानरपि त्रैविध्यमुक्तं वेदितव्यं कर्मत्रैविध्येन चतेय ज्ञानाप त्रैविध्यमुक्तं वेदितव्यं त्रैविध्येन करणस्यापि त्रैविध्यमुक्तं भविष्यति २८ ॥

पिशाच भाष्य टीका ४

अयुक्तः असमाहितः प्राकृतस्त्वसंस्कृतबुद्धिरत्यन्तप्रमाण शीलः स्तब्धः वञ्चकः निकृत्याचरतीति नैष्कृतिकः क्रूरः अल

श्री॰
गी॰ टी॰
प्र॰

सः प्रवृत्तिशीलः विषादी दीर्घसूत्री च कार्येषु आसेकस्मै दीर्घेन कालेन निर्वर्तयति स तामसः २८ ॥

रामानुजभाष्य टीका ५

अयुक्त इति अयुक्तः शास्त्रीयकर्मायोग्यः विकर्मस्थः प्राकृतः अनधिगतविद्यः स्तब्धः अनारम्भशीलः शठः अभिचारादिकर्मरुचिः नैष्कृतिकः वञ्चनपरः अलसः आरब्धेष्वपि कर्मसु अप्रवृत्तः विषादी अतिमात्रविषादशीलः दीर्घसूत्री अभिचारादिकर्म कुर्वन् परेषु दीर्घकालवर्त्यनर्थपर्यालोचनशीलः एवंभूतो यः कर्ता स तामसः

२९ ॥

अभिनवगुप्तकृत टीका ६

निकृतिर्नैष्कृतिकः २८ ॥

परमार्थप्रपा टीका ७

तामसमाह अयुक्त इति अयुक्तः नियमरहितः प्राकृतः विवेकशून्यः स्तब्धः अविनीतः शठः मायावी नैष्कृतिकः परवृत्तिच्छेदकः अलसः किंचित्कृत्वा किंचित्करोति विषादी शोचनशीलः सर्वदा स च दीर्घसूत्री यस्मिन् देशकाले ... कर्तव्यमिति विलम्बयति

सतामसः कर्ता ॥ २८ ॥

वनमाली टीका ८

अयुक्तः कर्तव्येष्वनवहितः प्राकृतः शास्त्रासंस्कृतचित्तः
स्तब्धः स्वज्येष्ठेष्वप्यनम्रः शठः परवञ्चनार्थमयाज्ञानत्र
प्रच्छन्नवादी नैष्कृतिकः स्वस्मिन्नुपकारिणि [illegible]माप
परिहृतनिद्रादिनेन स्वार्थपरः वंचक इति यावत् अलसोऽव
श्यकर्तव्येष्वप्यप्रवृत्तिशीलः विषादी सततमसंतुष्टस्वभा
वः [illegible] शोचनशीलः दीर्घसूत्री चिरेण शोकामर्षक
लिनोऽनः कारणान्वेषणानिमग्नस्वप्नकृतिः यदेव तद्देवतन्मा
सेनाप्यकरोति तद्वेषस्यवशीलः कर्ता तामस उच्यते ॥ २८ ॥

ज्ञानमैव जयंती टीका ९ ॥

तामसं कर्तारमाह अयुक्त इति अयुक्तोऽशास्त्रीयकर्मकृत
प्राकृतः प्रकृतोऽस्वभावे वर्तमानः शास्त्रविधिं विहाय स्वभा
वानुसारेणैव कर्मकृदित्यर्थः स्तब्धः कर्मारंभशिथिलोऽन
म्रो वा शठः स्वशक्तिगोपनकृद्भिवादिकर्माभिरुचिर्वी
नैष्कृतिकः परापमानकृत्परवंचको वा अलसः प्रारब्धेक
र्मण्यप्रवृत्तः विषादी प्रतिमानशोकाकुलः दीर्घसूत्री प्रहर
केनैव यत्कर्तव्यं तद्दिनेनापि यो न करोति यद्वा अभिचारा
दिकर्मस्वनिष्टसंकल्पः तेषु निर्दीर्घकालवर्तमानद्वेषाल्लो
चनशीलः वशाद्वेन प्रमादाय एनोति द्रालः खलः कपटी मा
दयः सम्प्रत्याते २८ विधीयः कर्ता स तामस तमो गुणाद्युक्त
ध्याने सर्वभोगामयाकथ्यते २८ ॥

मधुसूदनी टीका ९

अयुक्तः सर्वदा विषयापहृतचित्तत्वेन कर्मण्यनवहितः प्रा
कृतः शास्त्रासंस्कृतबुद्धिर्बालसमः स्तब्धो गुरुदेवतादिष

श्री॰
गी॰टी॰
अ॰

१३०

णनम्रः शठः परवंचनार्थमसमर्थाज्ञानवान्मायावादी नैः
कृतिकः स्वस्मिन्नुपकारिवभ्रमसन्यायपरवृत्तिछेदने स्वा
र्थपरः अलसः अवश्यकर्तव्येष्वप्रवृत्तिशीलः विषादीसत
तमसेनद्रष्टस्वभावेनानुशोचनशीलः दीर्घसूत्री चिरंतरश
कासहस्रकलितालानः कारणेनानिवर्षरमहूतिः यदपक
नैवेनमासेनापि करोति नवेमेवंशीलस्य कर्ता तामस उच्य
[illegible]
[illegible]
च्यते २८ ॥

सदानंदी टीका ११

विषयाकृष्टचित्तत्वात्कर्तव्येषु समाहितः शास्त्रासंस्कृतत्व
हितवाद्बालवत्सोनियामकः १ अनम्रोगर्वाहंकारादीपरवंचनत
त्परः स्वस्मिन्नोत्कृष्टमन्यायपरवृत्तिविचारतकः २ अवश्य
कर्तव्येष्वप्रवृत्तिस्वभावकः सदासेनद्रष्टशीलत्वादनुशोचन
परः ३ सदाशोकासहस्रेणाक्लिविनयालसः अतिमंद
वृत्तिः सोवायकार्यंकरोतिन ४ मासेनापियद्वर्षेणाक्ततो
कः सतामसः ५ २८ ॥

नीलकंठी टीका १२

अयुक्तोऽनवहितः प्राकृतोऽत्यन्तमसंस्कृतबुद्धिर्बालसमः स्त
ब्धः दंडवदनमतिकस्मैचित् शठः शक्तिगूहनकारी नैष्कृति
कोऽवंचकः परावमानी वा अलसः अप्रवृत्तिशीलः कर्तव्येष्व
पि विषादी सर्वदावसन्नस्वभावः दीर्घसूत्री चिरकारी प्रक
हमात्रं कार्यं मासेनापि न करोतीत्यर्थः यएवंभूतः सकर्ता
तामस उच्यते २८ ॥

आनंदीटीका १३

अयुक्तोयुक्तिशून्यपायसानंविनाप्रवृत्तः प्राकृतोनीचात्मा

ब्धः सगर्वः शठोमायावी नैकृतिकः परहिंसार्थप्रवृत्तः अलसः
सामर्थ्येपिनिरुत्साहः विषादीपश्चात्तापीदीर्घसूत्रः सद्यः संपाद्य
मपिकार्यंविलंब्यनिर्वाहयन् २८ ॥

रामकंठीटीका ६

एवंविधः कर्तातामसः पूर्ववत् किंविधोयुक्तः समाधिरहितः य
तः प्राकृतः प्रकृतिमेवात्मत्वेनप्रतिपन्नः स्तब्धोमिथ्याभिमानाभि
निवेशान्नकंचित्प्रणमति शठोमायावीतथानैकृतिकः निकृतिः
परोपतापनंप्रयोजनंयस्य अलसोदार्ढ्यरहितः अतएवविषादी
अवसादवान्दीर्घसूत्रश्चाल्पकार्येपिवस्तुनिचिरकारी एवंविधंक
र्तृत्वंप्रमादमोहादिदोषकारणभूततमोगुणसमुद्भूतत्वादत्यन्त
हेयमेवेतिकर्तृकर्मणोः पृथक्त्रैविध्यप्रतिपादनंविस्पष्टार्थं यतः
प्रायएकतरत्रैविध्यंभवत्युक्तं अयंतुद्वयोरेवत्रैविध्यंवक्तुमुप
क्रमते २८ ॥

लाभिकी [illegible]टीका

तामसंकर्तार

अयुक्तोसमाहितः प्राकृतः प्रकृतिंतद्विकारंवात्मत्वेनप्रतिपन्नः
स्तब्धोमिथ्याभिमानाभिनिवेशान्नकंचित्प्रणमति शठोमायावी
नैकृतिकोनिकृतिः परवंचनंप्रयोजनंयस्यसः अलसोनुद्यमः
विषादीशोकशीलः दीर्घसूत्रीचिरकारीईदृशः कर्तातामसउच्य
ते [illegible] २८

पंचोलीटीका

तामसंकर्तारमाह अयुक्तइति अयुक्तः असमाहितचित्तः प्राकृतः
असंनाशक्तिमतिर्बालिशः स्तब्धः दंडवदकस्मैचिन्नमतिनमतिवे
नकापट्येनशठः शक्तिगूहनकारीमायावीनैकृतिकः परविकेरन
करः अलसः कर्तव्येष्वपिकार्येष्वप्रवृत्तिशीलः विषादीसर्वदाखिन्नस्व
भावः दीर्घसूत्रीअल्पकालेनकर्तव्यंबहुकालेनकरोतियएवंवि
धः कर्तासतामसउच्यते २८

तामसमाह अयुक्त इति अयुक्तः करणीयेष्वनवहितः तथा प्राकृतः कार्याकार्यविवेकशून्यः प्रकृष्टमकृतं दुष्टं निंद्यं च कर्म यस्येति वा तथा स्तब्धो दंभादावमर्षेणानम्रः तथा शठो मायावी तथा नैष्कृतिकः निकृतिः कुसृतिर्निंद्यो मार्गस्तेन गंतुं शीलमस्येति तथा अलसोऽनुद्यमपरः पटुतारहितः अत एव विषादी विषादवान् अवशोचन इति यावत् अथ च विषाणि धत्तूरादीनि अत्तुं शीलमस्येति विषादी अमली इति भाषा अत एव दीर्घसूत्री एकदिनेनापि निवर्त्यं कर्म मासेनापि यो न साधयतीत्यर्थः एतादृशः कर्ता तामस उच्यते २८॥

मधुभाष्य

२८

131

भाषा अनुवाद

औरअयुक्त कहे असावधान औ प्राकृत कहे विवेकरहित औ स्तब्ध अ
नम्र स्वभाव औ शठ कहे कर्मचोर औ नैष्कृतिक कहे परका अप
मान करनेवाला तथा आलसी औ विषादया सदा शोगी औ दीर्घसू
त्री कहे जो कर्म्म तुर्त करने का होय उसे महीनों टाले ऐसे मनुष्य
तामसकर्त्ता कहावते हैं ऐसेही कर्त्ता की त्रैविध्य से ज्ञाता मोतीनप्र
कार और कर्म्मको त्रैविध्य से ज्ञेय मात्रको त्रैविध्य कहा औ बुद्धि
त्रिविध कहने सेकारण भी तीन प्रकार केहै २८ ॥

दोहा

अयुक्त जो आलसी सठ निःकृत विषादी दीर्घसूत्री हिक
तीतामस कहित २८

132

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु।
प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय २९

शांकरभाष्य टीका १ ॥

बुद्धेर्भेदमिति बुद्धेर्भेदं धृतेश्चैव भेदं गुणतः सत्त्वादिगुणतः
त्रिविधं शृणु इति सूत्रोपन्यासः प्रोच्यमानं कथ्यमानमशेषेण
निरवशेषतो यथावत् पृथक्त्वेन विवेकतो धनंजय दिग्वि
जये मानुषं दैवं च प्रभूतं धनं जयति नासौ धनंजयोऽर्जुनः २९

आनंदगिरि टीका २

ज्ञानादीनां प्रत्येकं त्रैविध्यमुक्त्वा इति समाप्य बुद्धेर्धृतेश्च ए
स्याख्यायास्त्रैविध्यं सूचयति बुद्धेरिति सूत्रविवरणं प्रतिजा।
नीते प्रोच्यमानमिति अर्जुनस्य धनंजयत्वं प्रसादयति दि
गिति २९ ॥

स्वामिकृत टीका ३

इदानीं बुद्धेर्धृतेश्चापि त्रैविध्यं प्रतिजानीते स्पष्टार्थः २९ ॥

पिशाचभाष्य टीका ४

बुद्धेर्ज्ञानस्य धृतेः धैर्यस्य चैव गुणतः त्रिधाः पृथक्त्वेन विवेकपूर्वक
केण २९ ॥

रामानुजभाष्य टीका ५

बुद्धेरिति बुद्धिर्विवेकपूर्वकनिश्चयरूपं ज्ञानं धृतिरारब्धाया।
क्रियायाः विघ्नोपनिपातेऽपि धारणसामर्थ्यं तयोः सत्त्वादिगुण
तस्त्रिविधं भेदं पृथक्त्वेन प्रोच्यमानं यथावच्छृणु २९ ॥

अभिनवगुप्तकृत टीका ६ ॥

स्पष्टार्थं २९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७ ॥

अथ बुद्धेर्धृतेश्च त्रैविध्यमाह बुद्धेरिति स्पष्टार्थं २९ ॥

वनमाली टीका ८ ॥

+ पूर्वं कर्तृस्य कर्मविषयज्ञानेक
+ त्वैवोक्तकर्मणि प्रवृत्तानां त्रिगुणे
न त्रैविध्यमुक्तं इदानीं सर्वतत्त्वग्रहणा
र्थं निश्चयरूपया बुद्ध्या धृत्या गुणत
स्त्रैविध्यमाह ॥

श्री
गी॰ टी॰
अ॰
133

बुद्धिधृत्योस्त्रैविध्यं प्रतिजानीते बुद्धेरिति बुद्धेरध्यवसाया
दिवृत्तिमत्या धृतेश्च तत्त्वतः सत्त्वादिगुणतस्त्रिविधं भेदं मया
प्रोच्यमानमशेषेण निरवशेषं पृथक्त्वेन हेयोपादेयवि
वेकेन शृणु २९ ॥

उत्तममैवेजयंती टीका ९

एवं ज्ञानं ज्ञेयं परिज्ञाता गुणगणतस्त्रैविध्यं प्रतिपाद्येदानीं बु
द्धिधृत्योरपि गुणतस्त्रैविध्यं वक्तुं भगवान् प्रतिजानीते बुद्धे
र्भेदमिति हे धनञ्जय बुद्धेर्विवेकनिश्चयज्ञानरूपायाः धृ
तेः प्रारब्धकर्मणो विघ्नोपनिपातेऽपि विधारणसामर्थ्यरूपाया
वं निश्चयेन गुणतः सत्त्वादिगुणतस्त्रिविधं पृथक्त्वेन भिन्नत्वेना
शेषेण समग्रेण प्रोच्यमानं ... प्रोच्यमानं मया प्रक
र्षेणोच्यमानं कथ्यमानं भेदं शृणु श्रवणं कुरु धनञ्जयेति
दोषेण नयस्माद्दिग्विजये सकलमपव परेषां धनं जयति ना
स्त्वं नाम निष्पन्नं येस्य परमान्नसो श्रवणावधानेन न तयोर्द्वयोः
विनिश्चितम् २९ ॥

+ तदेवं ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदत इति व्याख्यातं संप्र
ति धृत्युत्साहसमन्वित इत्यत्र सूचितयोर्बुद्धिधृत्योस्त्रैविध्यं प्रति
जानीते ॥

मधुसूदनी टीका ९

+ बुद्धेरध्यवसायादिवृत्तिमत्या धृतेश्च तत्त्वतः सत्त्वादिगुणतस्त्रि
विधमेव भेदं मया सर्वज्ञेनापरिच्छिन्नकालेन परमात्मना प्रोच्यमानमशे
षेण निरवशेषं पृथक्त्वेन हेयोपादेयविवेकेन शृणु श्रोतुमवधा
नं कुरु हे धनञ्जय दिग्विजये उत्तरान्कुरून्विजित्य महद्धनमाहृतवानसि तेन धनञ्जय इति
हृयते एवं दैवं मानुषं च वित्तं धनं जितवानसीति मामभिप्रेत विशि
ष्टं हि तन्मिदं तः करणं प्रथमे ज्ञाने पृथक्त्वेन वक्तव्यं हि ज्ञानीयकर्तृ
त्वं नवक्तव्यः हि तन्मिदं तः करणत्रैविध्यकथनेन सर्वसामग्रीत्रैविध्यमा
सः कर्ता इत्यनूपादिना त्रिकेषत्रयपादिमात्रं करणत्वेन विवक्षितं
विवेककरणोपाधिके तस्य कर्तृत्वात् यद्यपि च कामः संकल्पो विचि
कित्साश्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव

भ्रमन्त्वदिनानेसत्वीसामपिद्दतीनोत्रैविध्यंविवक्षितेनेत्यापि ।
धीरस्योस्तैविध्यंपृथग्युक्तं ज्ञानशक्तिक्रियाशक्त्युपलक्षणार्थं
नवपरिसंख्यार्थमितिरहस्यं [illegible] २९

सदानंदी टीका ११

ज्ञानंकर्मचकर्ताचत्रिदेवंत्रयमीरितं इदानींप्रतिजानीतेत्रैविध्ये
बुद्धिधृत्योः १ बुद्धेरध्यवसायादिवृत्तिमत्याद्वंतेस्तथा सत्वादि
गुणतोभेदंत्रिविधत्वंप्रतिस्फुटं २ प्रोच्यमानंमयाशेषेणहेयादे
यविवेकतः सावधानोभवस्त्रोत्रंसाकल्येनधनंजय ३ बु
द्धापाधिश्चिदाभासःकर्तासोक्तःश्रुतावत करणत्वेननिष्का
मापाधिमात्रंविवक्षितं ४॥ २९ ॥

नीलकंठी टीका १२

बुद्धिधृत्योस्त्रैविध्येनव्याख्यानमाह बुद्धेरिति नत्रबुद्धिविशि
ष्टश्चिदाभासःकर्ताज्ञानेचप्रागुक्तं अत्रतुकेवलाबुद्धिरेवनिम
तीतद्वीयवहृत्तेनतोपलक्षणार्थंतदृत्तिविशेषोधृतिस्त्रैवि
ध्येनकथ्यतइत्यर्थः २९ ॥

आनंदीटीका १३

एवंकर्मणःकर्तुश्चत्रैविध्यमुक्त्वान्तःकरणस्यबुद्धेर्धृतेश्च
त्रैविध्यमाह अशेषेणैकैकेनपृथक्त्वेनभेदेन २९ ॥

रामकंठीटीका १४

बुद्धिर्वीध्यवसायसाधनंकारणं धृतिरवष्टम्भः कार्येत्तेयप्रवार्थ
सिद्धिपर्यन्तंस्थैर्यं तयोर्बुद्धिधृत्योःसत्वादिगुणापेक्षयात्रिविधं
भेदंसाकल्येनविविक्ततयाचाभिधीयमानंशृणु [illegible] २९ ॥

यथाबुद्धिधृत्योरेव लाक्षिकी [illegible] टीका
त्रैविध्यंवक्तुमुपक्रमते ॥
वस्तुनिश्चायकमन्तःकरणंबुद्धिः धृतिरारब्धेकर्मणिस्थि

गीं
टीं
त्रं

द्धिपर्यंतंस्थैर्यंदार्ढ्यं तयोः सत्वादिगुणतस्त्रिविधंभेदंशृ
णुमयासाकल्येनविशेषेणचप्रोच्यमानंहेधनंजय
२९

134

पंचोलीटीका

इदानींबुद्धेर्धृतेश्चत्रैविध्यंप्रतिजानीते बुद्धेरितिहेधनंजय
बुद्धेश्चात्मन धृतेः धैर्यभेदंगुणतः सत्वादिगुणैः कृतंत्रिवि
धमशेषेणसाकल्येनपृथक्त्वेनविवेकेनोच्यमानंशृणु २९

रत्नावीरसमिद्धायिनी

अधुना बुद्धिधृत्योः सात्विकादिभेदेनत्रैविध्यं वक्तुमुपक्रमते
बुद्धेरिति बुद्धिर्बोध्यवस्तुसाधनमंतःकरणं धृतिश्चानुष्ठानवि
ध्येसमाप्तिपर्यंतंस्थैर्यं तयोर्गुणतः सत्वादिगुणापेक्षयात्रिवि
धंभेदंमयासाकल्येनपरस्परंपृथक्केनभिन्नतयाचकथ्यमा
नंशृणुअवधारय २९॥

मधुभाष्य

२९॥

भाषा अनुवाद

अब बुद्धि औ धृति कहे धैर्य की त्रैविध्य कहने की प्रतिज्ञा करते है कि हे धनंजय अर्जुन बुद्धि के औ धैर्य के सत्व आदि गुण क्रमसे ती न भेद जो है उन को मै भिन्न भिन्न कहता हूं तुम सावधान होय सु नो २९ ॥

दोहा

बुद्धिभेद धृतिभेद गुणगणसें त्रिविध दिखोप कथ्यमान भिनभावसें धनंजय सकल दिखोप २९

135

प्रवृत्तिंचनिवृत्तिंचकार्याकार्येभयाभये
बंधंमोक्षंचयावेत्तिबुद्धिःसापार्थसात्विकी
३० ॥

शांकरभाष्यटीका १

प्रवृत्तिंचेति प्रवृत्तिंच प्रवृत्तिः प्रवर्तनं बन्धहेतुः कर्ममार्गः
निवृत्तिंच निवृत्तिर्मोक्षहेतुः संन्यासमार्गः बंधमोक्षसमान
वाक्यत्वात् प्रवृत्तिनिवृत्ती कर्मसंन्यासमार्गाविति अवगम्यते अ
थवा कार्याकार्ये विहितप्रतिषिद्धे लौकिके वा शास्त्रीये वा क
र्तव्याकर्तव्ये करणाकरणे इत्येतत् कस्य देशकालाद्यपेक्षया वि
जानाति दृष्टादृष्टार्थानां कर्मणां भयाभये बिभेत्यस्मादिति भ
यं तद्विपरीतमभयं भयंचाभयंच भयाभये दृष्टादृष्टयोर्भ
याभययोः कारणे इत्यर्थः बंधं सहेतुकं मोक्षंच सहेतुकं या
वेत्ति विजानाति बुद्धिः सा पार्थ सात्विकी तत्त्वज्ञानं बुद्धेर्वृत्तिर्बुद्धि
स्तु वृत्तिमती धृतिरपि वृत्तिविशेष एव बुद्धेः ३० ॥

आनंदगिरिटीका २

तत्रादौ सात्विकीं बुद्धिं निर्दिशति प्रवृत्तिंचेति प्रवृत्तिराचरण
मात्रं अनाचरणमात्रंच निवृत्तिरिति किं नेष्यते तत्राह बंधेति य
स्मिन् वाक्ये बंधमोक्षावुच्येते तस्मिन्नेव प्रवृत्तिनिवृत्त्योरुक्तत्वा
त् कर्ममार्गस्य बंधहेतुत्वान्मोक्षहेतुत्वाच्च संन्यासमार्गस्य तावे
वात्र ग्राह्यावित्यर्थः करणाकरणयोर्निर्विषयत्वायोगाद्विषया
पेक्षामवतार्य योग्ये विषये निर्दिशति कस्येति अनिष्टसाधनं
भयमिष्टसाधनमभयमिति विभजते भयेति बंधादिज्ञानमा
त्रस्य बुद्धित्वेपि संभवाद्विशेषणं न बुद्धिशब्दितस्य ज्ञानस्य
त्रैविध्यप्रतिपादनात् किमिति बुद्धेरिदानीं त्रैविध्यं प्रति
पाद्यते तत्राह ज्ञानमिति नहि ज्ञानेन गतत्वाच्च धृते
र्वृत्तिविशेषस्यापि त्रैविध्यमाशंक्याह धृतिरपीति विशेषणाद्धेतुनानात्वा
देति निरस्ता ३० ॥

श्री
गी टी
भ०

136

तामिलकृत टीका ३

तत्र बुद्धेर्भेदत्रैविध्यमाह प्रवृत्तिं चेति त्रिभिः प्रवृत्तिं धर्मं निवृत्तिमधर्मं यस्मिन्देशे काले च यत्कार्यमकार्यं च भयाभये यत्कार्याकार्ये नि मित्ताववधानयोः कथं वा बन्धः कथं वा मोक्ष इति या बुद्धिः वेत्तिः करणं वे त्ति सा सात्त्विकी यया प्रमाणं वेत्ति निवर्त्तते करणे कर्तव्यो पदार्थः का ध्या नि पंचमी तिवत ॥

पिशाचभाष्य टीका ४

प्रवृत्तिः प्रवर्तनं मोक्षार्थं निवृत्तिः संन्यासः कार्याकार्ये कार्यं कर्त व्यमकार्यं तदभावः भयाभये भयं संसारः अभयं तदभावरूपो मोक्षः बंधं बंधनं मोक्षं मुक्तिः एतान्सर्वान्या बुद्धिर्वेत्ति सात्त्विकी ३० ॥

रामानुजभाष्य टीका ५

प्रवृत्तिमिति प्रवृत्तिरभ्युदयसाधनभूतो धर्मः निवृत्तिर्मोक्षसाध नभूतः धर्मस्तावुभौ यथावस्थितौ या बुद्धिर्वेत्ति कार्याकार्यं सर्व वर्णा नां प्रवृत्तिनिवृत्तिधर्मयोरनुष्ठाने देशकालावस्थाविशेषेषु इदं कार्यमिदमकार्यमिति वा या वेत्ति शास्त्राविषयवृत्तिः भयस्थानं तद्वृत्तिरभयस्थानं बंधं मोक्षं च संसार याथात्म्यतः हि या याथात्म्य वया वेत्ति सा सात्त्विकी बुद्धिः ३० ॥

श्रीमदभिनवगुप्तकृत टीका ६

स्पष्टार्थं ३० ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

तत्र प्रथमं बुद्धेर्भेदत्रैविध्यमाह प्रवृत्तिं चेति त्रिभिः शास्त्रविहितविष यां देशकालादिविनाच धर्मप्रवृत्तिं निवृत्तिमधर्मं देशकालानुसारवशी कृतानुसारेण वा कार्यमकार्यमिति अकार्यं भयं कार्यमभयं बंधं सं सारं बंधं मोक्षं महापुरुषकारं या वेत्ति सा बुद्धिः सात्त्विकी ३० ॥

वनमाली टीका ८

तत्र बुद्धेर्भेदत्रैविध्यमाह प्रवृत्तिमिति त्रिभिः प्रवृत्तिकर्ममार्गं निवृत्तिं संन्यासमार्गं कार्यं प्रवृत्तिमार्गे कर्मणां करणं अकार्यं निवृत्तिमार्गे कर्मणामकरणं भयं प्रवृत्तिमार्गे गर्भवासादिदुःखमभयं निवृत्ति

५ मोक्षं च गा

मार्गे तदभावे चैवं प्रवृत्तिकरणे कर्तृत्वोपचारात् यथावेत्ति कर्तीउ
हिः सा प्रमाणजनितनिश्चयवती हे पार्थ सात्त्विकी बंधमोक्षं चयोरे।
तिकीर्तनात् हि विषयमेव प्रवृत्त्यादि व्याख्यातम् ३० ॥

ऊत्तमवैजयंती टीका ९

नयोर्मध्ये बुद्धेस्त्रिभिद्वैविध्यं वक्रमादौ सात्त्विकीं बुद्धिमाह प्र
वृत्तिं चेति या बुद्धिः प्रवृत्तिमभ्युदयसाधनरूपं धर्मं च प्रनिवृ
त्तिं मोक्षसाधनरूपं धर्मं यद्वा शास्त्रविपर्ययं धर्मं तस्मिन्निवृत्ति
वैवं निजानातीति करणरूपाया बुद्धेः यद्वा ज्ञानत्वकर्तृत्ववात तदुप
रिते ऊदारस्थित्वतीतिवत् कार्याकार्ये कार्यं शास्त्रीयं निष्का
मकर्म प्रकार्यं सकामं तन्मशास्त्रसिद्धत्वेपि समासप्रसिद्धहेतुत्वेन।
निषिद्धं वद्धेयत्वादकार्यमेव ते उभे या बुद्धिर्वेत्ति भयाभये प्रशास्त्री
येषु धर्मकर्मादिषु भयं शास्त्रीयेषु तेषु अभयं ते उभे च या बुद्धिर्वेत्ति
बंधं संसारयाथात्म्यं मोक्षं तदुच्छेदनयाथात्म्यं च या वेत्ति हे पार्थ सा।
बुद्धिः सात्त्विकी सत्त्वगुणप्रकाशा भवतीति त्वया बोध्या संबोधनेन
सात्त्विक्याः पृथायास्त्वं पुत्रो सन् त्वमपि सात्त्विक्येव बुद्धिर्न राज
सी तामसी चेति सूचितम् ३० ॥

मधुसूदनी टीका १०

+ तत्र बुद्धेस्त्रैविध्यमाह त्रिभिः ॥

+ प्रवृत्तिकर्ममार्गं निवृत्तिं संन्यासमार्गं कार्यं प्रवृत्तिमार्गे कर्मणां क
रणं प्रकार्यं निवृत्तिमार्गे कर्मणामकरणं भयं प्रवृत्तिमार्गे गर्भ
वासादिदुःखं प्रभयं निवृत्तिमार्गे तदभावे बंधं प्रवृत्तिमार्गे मिथ्या
ज्ञानकृतकर्तृत्वाद्यभिमानं मोक्षं निवृत्तिमार्गे तत्त्वज्ञानकृतमत्ता
न तत्कार्याभावे च यावेत्ति करणे कर्तृत्वोपचारात् यथावेत्ति का।
तो बुद्धिः सा प्रमाणजनितनिश्चयवती हे पार्थ सात्त्विकी बंधमोक्ष
योरिति कीर्तनात् हि विषयमेव प्रवृत्त्यादि व्याख्याते ३० ॥

सदानंदी टीका ११

नज्ञाहै भगवानाह बुद्धेस्त्रैविध्यमादरात्, प्रवृत्तिकर्ममार्गं च वे
यहेतुत्वतया मते १ निवृत्तिकर्मसंन्यासमार्गं मोक्षैकसाधने प्रवृ

श्री
गी टी
प्र

137

निमार्गे करणे कर्मणामधिकारिणः २ निवृत्तौ कर्मणां त्यागः
प्रवृत्तौ भयमास्ते निवृत्तावभयं बंधं प्रवृत्तौ भाति जंतूनां ३ मो
क्षं निवृत्तिमार्गे वै ज्ञानात्तत्प्रसादजं वेत्ति बुद्धिर्यया वा सा सात्वि
की सा मतिः स्मृता ४ या वेत्ति मत्र कारणे कर्त्तव्यमुपचारतः यया
वेत्ति प्रमाणेनान्यत्र ह्यकर्तेति वार्थतः ५ प्रवृत्तावस्ति कर्तव्ये
विधिः किंकरतायतः न चास्ति लयमनत्रैवं यस्तत्र दृष्टो भवेत्
६ निवृत्तौ नास्ति कर्तव्यं विध्यादेरप्यभावतः भ्रमयेत्तत्र चेत्स
मोक्षः स्यादात्मनि स्थितिः ७ ॥ ३० ॥

नीलकंठी टीका १२

प्रवृत्तिनिवृत्ती शास्त्रविहितप्रतिषिद्धविषये यजेत स्वर्गका
मः न हिंस्यात् पिबेदित्यादिरूपे कार्ये कृतिसाध्ये स्वर्गादि प्रका
र्ये निरसितं तेन निमित्तानि भवस्तनी उक्ते भयाभये कार्याका
र्ये निमित्ते बंधं मोक्षं च या वेत्ति यया वेत्ति निवृत्तेव न करणे कर्
त्रोपचारः बुद्धिः सा पार्थ सात्विकी ३० ॥

आनंदगिरी टीका १३

स्पष्टार्थं ३० ॥ ॥

+तत्रोद्देशक्रमेण बुद्ध्यादेस्त्रैविध्यं प्रतिपाद्य सात्विकं भेदं तावदाह ॥

रामकंठी टीका १४

+सात्विकी सत्वगुणसमुद्भूता बुद्धिर्मता का सा यया प्रवृत्तिं च निवृ
त्तिं च वेद जानाति स्वर्गापवर्गफलसाधनत्वादिते कर्मणी प्रवृत्ति
निवृत्तिशब्देनोच्येते यदुक्तं प्रवृत्तिलक्षणो धर्मो गृहस्थेषु विधी
यते निवृत्तिलक्षणस्त्वन्यो धर्मो मार्गके देशिकः अन्यत्रापि प्र
वृत्तिं च निवृत्तिं च द्विविधं कर्म वैदिकं इह चामुत्र च काम्यं प्रवृ
त्तं कर्म कीर्त्यते निष्कामं ज्ञानपूर्वं च निवृत्तमुपदिश्यते इति त
था कार्याकार्ये शास्त्रीयविधिनिषेधवशादनुष्ठेयपरिहार्ये च
तनीया जानाति सा सा सात्विकी बुद्धिरिति ननु ज्ञानं बुद्धिस्थि
ध्यानं सर्वभूतेषु येनैकमित्यादिना सात्विकज्ञानलक्षणेनैव
सात्विकबुद्धिलक्षणमुक्तं न तद्यथा किमिति पुनरुच्यत इत्याशं

ध्याते सत्यं ज्ञानबुद्ध्योर्नास्तिकश्चिद्विशेषः किंतु पूर्वं ज्ञानं ज्ञेयं ज्ञातृ
लक्षणं सात्विकत्रयस्यैकप्रयोजनविषयत्वेन प्रतिपादनप्रसंगात्सं
क्षेपेण सात्विकज्ञानतो लक्षणमुक्तमधुनात्र प्रवृत्तिसाहित्येन तस्यै
व बुद्धिशब्दप्रतिपादितस्य विस्तरेणो लक्षणमुक्तं नहि पूर्वं धर्मादि
वेदनं ज्ञानसंबंधित्वेन प्रतिपादितमधुनात्र प्रतिपादितमिति न
पौनरुक्त्यदोषः चोदनीयः यदि वा पूर्वं मात्रस्फोर्यायोगिसंबंधस्य ज्ञा
नस्य लक्षणमुक्तमधुनात्वारुरुक्षुसंबंधस्यैव मयि न पौनरुक्त्य
प्रत्ययं नासी ३० ॥

लाक्षिकी [illegible]टीका

*सात्विकीं बुद्धिमाह ॥

+धर्मे प्रवृत्तिमधर्मे निवृत्तिं यस्मिन्देशे काले च यत्कार्यमकार्यं च
भयाभये कार्याकार्यनिमित्तावर्थानर्थौ कथं बंधः कथं वा
मोक्ष इति या बुद्धिरंतःकरणं वेत्ति सा सात्विकी यया पुमान्वेत्तीति
वक्तव्ये कर्तृत्वोकाद्युपचारः काष्ठानि पचंतीतिवत् [illegible]
[illegible] ३०

पंचोलीटीका

तत्र बुद्धेस्त्रैविध्ये सात्विकीं बुद्धिमाह प्रवृत्तिमिति हे पार्थ या बुद्धिः प्र
वृत्तिं वेद विषये निवृत्तिं शास्त्रनिषिद्धविषये देशकालाद्यपेक्षया
दृष्टादृष्टार्थानां कर्मणां करणं कार्याकार्ये विभ्रमस्यादिति भयं
अभयं तेभयाभये दृष्टादृष्टयोः भयाभययोः कारणं द्रष्टव्यौ बंधमो
क्षौ कारणहृदये संबंधं सकारणं वेत्ति मोक्षं वेदेहत्यान्मुक्तिं सकारणं
वेत्ति सा बुद्धिः सात्विकी ३०

रमावीरसमिद्बोधिनी

तत्र सात्विकं भेदं कथयति प्रवृत्तिं चेति प्रवृत्तिनिवृत्ती तत्त्वद
र्शनो धर्मो तत्र प्रवृत्तिर्विहिते निवृत्तिर्निषिद्धे तथा कार्याकार्ये प्रवृत्ते
तुपनिवृत्ते च वस्तुनी स्वधर्मपरधर्मरूपे तथा भयाभये साध्यमतदि
रहो कार्याकार्यनिमित्ताव र्थानर्थौ तथा बंधमोक्षौ संसारापवर्गौ बंध

138

हृतव्यूहादैः प्रतिष्ठ एतेन कर्मणा बद्धो भवति एतेन च मुक्तो भ
वतीत्येवंरूपोवा याबुद्धिर्वैतिकरणोकर्त्तोपचारायथाबुद्ध्या
तःकरणेनवैतिकर्माधिकारीसासात्विकीबुद्धिरित्यर्थः ३०॥

मधुभाष्य

३०॥

भाषा अनुवाद ॥

अब इस श्लोक से ले तीन श्लोक से बुद्धि की त्रैविध्य कहते हैं कि य
र्म मे प्रवृत्ति औ अधर्म से निवृत्ति औ देश काल के अनुसार जो
कर्तव्य औ अकर्तव्य औ काज अकाज जानि अर्थी अनर्थ जान तथा
बन्ध हीन कैसे औ मोक्ष ही वा कैसे होती इस विचार से भय अभ
य ये सब बुद्धि कहे अन्तः करण जानि शकैहै ऐसी बुद्धि सात्वि
कीहै इसजगह बुद्धि केद्वारा पुरुष सबजानताहै यह कहने को
थी पर वह रीतिछोड इसी तरह कहा करण को कर्ता करके कहा
है ३० ॥

दोहा

पार्थप्रवृत्ति निवृत्तिको कार्य अकार्य भयअभयकोय बं
ध मोक्षको जानहि सोबुद्धि सात्विकी होय ३० ॥

139

यया धर्ममधर्मं च कार्यं चाकार्यमेव च । अ
यथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ३१

शांकरभाष्य टीका १

ययेति यया धर्मं शास्त्रचोदितं अधर्मं च प्रतिषिद्धं कार्यं चाका
र्यमेव च पूर्वोक्ते एव कार्याकार्ये अयथावत् यथावत्सर्वतो नि
र्णयेन न प्रजानाति या बुद्धिः सा पार्थ राजसी ३१ ॥

आनंदगिरिकृत टीका २

कार्याकार्ययोर्धर्माधर्माभ्यां पौनरुक्त्यं परिहरति पूर्वोक्ते इति पू
र्वस्मिन्श्लोके कार्याकार्यशब्दाभ्यां दृष्टादृष्टार्थानां कर्मणां करणाक
रणे निर्दिष्टे तयोरेवात्रापि ग्रहात्तु धर्माधर्माभ्यां सर्वपदार्थाभ्या
... नार्थेनेमर्थः या बुद्धिर्यया बुद्ध्या बोद्धा निर्णयेन न जानातीस
... र्थः ३१ ॥

स्वामिकृत टीका ३

ययेति अयथावत्संदेहास्पदत्वेनेत्यर्थः ३१ ॥ ॥ ॥ ॥

पिशाचभाष्य टीका ४

यया बुद्ध्या धर्ममधर्मं च स्नाध्यं न अकार्यमधर्मं कार्यं च अयथावत्प्र
जाना... ति सा राजसी ३१ ॥ ॥ ॥ ॥

रामानुजभाष्य टीका ५

ययेति यया पूर्वोक्तं द्विविधं धर्मं तद्विपरीतं च तन्निष्ठानां देशकाला
वस्थादिषु कार्यं च यथावन्न जानाति सा राजसी बुद्धिः ३१ ॥:

अभिनवगुप्तकृत टीका ६

स्पष्टार्थः ३१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

राजसीमाह ययेति अयथावत्संदेहास्पदत्वेनेत्यर्थः स्पष्टमन्यत्
३१ ॥

वनमाली टीका ८

धर्मं शास्त्रविहितं अधर्मं शास्त्रप्रतिषिद्धं अदृष्टार्थमभयं का
र्यं च दृष्टार्थमभयं च अयथावदेव प्रजानाति यथावन्न जानाति

Margin: रामभोगेषु ... साह॥ ; ...मकार्यं

श्री॰
गी॰ टी॰
प्र॰

किंस्विदिदमिदमित्येन वेत्तिवानयथावत्साधेवा भजतेयथात्र। ध्या सा राजसीबुद्धिः ३१ ॥

उत्तममैवजयंतीसख्योः ९

राजसीबुद्धिमाह यया धर्ममित्ति धर्मं श्रौतंकमधर्मं तद्विपरीतंच एवंकार्यमहानिं चकार्यंमभयं हिनीयचकारदर्थंमोत्तेचयथावत्प्रजानाति राजसः बुद्धेषोययाबुद्ध्यायथावत्रवेत्तिहेपार्थसाबुद्धिः राजसीरजोगुणोत्थाइतिघावोध्यापार्थेत्येनेनश्रुतज्ञानेवेदश्रीबुद्धिनीलोलीतिसूचितम् ३१ ॥

मधुसूदनी टीका १०

धर्मंशास्त्रविहितंअधर्मंशास्त्रप्रतिषिद्धंअदृष्टार्थमभयंच कार्यंचदृष्टार्थमभयं अयाथावदेवप्रजानाति यथावत्रजानाति किंस्विदिदमित्यनवेत्तिवानयथावत्साधेसंशयेवाभजतेयथाबुद्ध्या सा राजसीबुद्धिः अत्रजनोयानिर्देशादमत्राषिकरणेव्याख्येयम् ३१ ॥

सदानंदी टीका ११

शास्त्रेणविहितंधर्ममधर्मंशास्त्रनिंदितं दृष्टार्थेवाप्यदृष्टार्थंकरणाकरणेतथा १ यथावत्नविजानातीदमित्थंवानवेत्तिव अनिश्चयंसंशयंवायथाबुद्ध्या भजत्यसौ बुद्धिसाराजसीयन्नाज्ञोधनीयासमस्तभिः २ ॥ ३१ ॥

नीलकंठी टीका १२

अयथावत्संदेहास्पदत्वेन स्पष्टमन्यत् ३१ ॥ ॥

आनंदीटीका १३

अयथावत् यथावदावश्यकतयाप्रवृत्तिनिवृत्तिविषयंनजानाति धर्मादपिनिवर्तते अधर्मेपिप्रवर्तते ३१ ॥

रामकंठीटीका १३

राजसीरजोगुणसमुद्भवाबुद्धिर्ययाहेतभूतयाजानादेवन्नः पुरुषोधर्माधर्मादीन्पादयानेदृयान्स्वपदार्थानयथावन्निश्चयाभा

वादसम्यग्वेत्तिधर्माधर्मौवदृष्टविषयौसदाचारदुराचारौ कार्या
कार्येदृष्टविषयेइतिनैपोनहर्म्यं अथवा धर्माधर्मौलक्षणया
फलविषयावुक्तौ कार्यकार्येतुतन्निमित्तकर्मविवक्षया एवमपि
नैपोनहर्म्यं एषामपियासंशयात्मकरजोगुणप्रभवत्वान्संसारि
विषया अथतामसी ३१ ॥

राजसींबुद्धिमाह॥ लास्तिकी [illegible]टीका

यथाबुद्ध्याअदृष्टविषयौधर्माधर्मौसदाचारापचारौदृष्टविषये
कार्याकार्येच अयथावन्निश्चयाभावादसम्यक्संशयास्पदत्वे
नवेत्ति साराजसीबुद्धि[illegible] ३१

पंचोलीटीका

राजसींबुद्धिमाह ययेति हेपार्थययाबुद्ध्याधर्मंशास्त्रविहितं।
वपुनः अधर्मंशास्त्रनिषिद्धंकार्यंदेशकालाद्यपेक्षयादृष्टादृष्टार्था
नांकर्मणांकरणंवपुनरकार्यंतदकरणंअयथावत्निर्णीयतेया
थात्म्येननप्रजानातिसाबुद्धिराजसीमता ३१

रणवीरसमिद्धोधिनी

राजसीमाह ययेति अयथावदिति निश्चयाभावात्सन्देहास्पदत्वे
नेत्यर्थः शेषंस्पष्टम् ३१ ॥

मधुभाष्य

३२॥

भाषा अनुवाद ॥

और हे पार्थ अर्जुन जिस बुद्धि से धर्म अधर्म औ काज अकाज अ
यथावत् कहे ठीक ठीक न जाना जाय सो बुद्धि राजसी है ३१

दोहा

यासें धर्म अधर्म कों कार्य अकार्यहि कोय नपार्थयथा
वतजाननहि सोमतिराजसीहोय ३१

अधर्मं धर्ममिति या मन्यते तमसावृता सर्वा
र्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ३२

शांकरभाष्यटीका १

अधर्ममिति अधर्मं प्रतिषिद्धं धर्मं विहितमिति या मन्यते जानाति तमसावृता सती सर्वार्थान् सर्वानेव ज्ञेयपदार्थान्विपरीतानेव जानाति बुद्धिः सा पार्थ तामसी ३२ ॥

आनंदगिरिटीका २

धर्मशब्देनाधर्मं शास्त्रीयं च तमसावृता इति विवेकेन ... कार्याकार्यादीन् ... सर्वार्थानित्युक्ते ... सर्वानेवेति विपरीतांश्चेति चकार ... विपरीतानेवेत्युक्ते ३२ ॥

स्वामिकृतटीका ३

तथा अधर्ममिति विपरीतग्राहिणी बुद्धिस्तामसीत्यर्थः बुद्धेः ... करणस्य ... धर्मिणो बुद्धिरध्यवसायलक्षणा ... विधा ... धर्मं ... ३२ ॥ ... उपलक्षणं चैतत् [illegible]

पिशाचभाष्यटीका ४

अधर्मं ... धर्ममिति धर्मत्वरूपेण विपरीतं विपर्यस्तां सा ता मसी ३२ ॥

रामानुजभाष्यटीका ५

अधर्ममिति बुद्धिस्तमसावृता सती सर्वार्थान् विपरीतान् मन्यते अधर्मं धर्मं धर्मं चाधर्मं सन्तमसन्तं च सन्तं परं चापरं चापरं परं एवं सर्वं विपरीतं मन्यते इत्यर्थः ३२ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ३२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मध्ये

सर्वार्था स्वमन्यते

श्री
गी॰ टी॰
अ॰

143

परमार्थप्रपा टीका ७

तामसीमाह अधर्ममिति या तमसावृतत्वेनाहता सती अधर्ममेव धर्ममिति यथा लतागोमतिकामारणेनैकोऽघः स्याद्दोषादिति मन्यते यद्वा योऽधर्मेण परमेण स्थितं धर्म इति मन्यते सर्वार्थानुत्तमादीन् विपरीतान् प्रतिकूलकर्तॄन् पश्यति सा तामसी अत्र बुद्धिर्व्यवसायात्मिकान्तःकरणवृत्तिर्न तु निश्चयात्मिका यतः सैकविधा न त्रिविधा न तु केचिद्व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दनेति तर्हि कथमस्या इच्छाद्वेषादीनां मध्ये हेशाश्वतिचेत्क्षमेय धर्मो धर्मप्रहेतो। बुद्धेस्तेनैव प्राधान्यमिति ज्ञेयं ३२॥

वनमाली टीका ८

तमसा विशेषदर्शनविरोधिना दोषेणावृता या बुद्धिरधर्मं धर्ममिति मन्यते अदृष्टार्थे सर्वत्र विपर्यस्यति तथा सर्वार्थान् सर्वानदृष्टप्रयोजनानपि ज्ञेयपदार्थान् विपरीतानेव मन्यते सा विपर्ययवती बुद्धिस्तामसी ३२॥

उत्तमवैजयंती टीका ९

तामसीं बुद्धिमाह अधर्ममिति या बुद्धिस्तमसा हेतुनाऽऽवृतानेन वेष्टिता सती सर्वार्थांस्त्रिविल पदार्थान् विपरीतान्मन्यते ज्ञातानि हेयपाणीन् दर्शयति अधर्मं धर्मं चाधर्मं सन्तमसन्तमसन्तं च सन्तं ध्रुवमध्रुवं पारं परमपरं पारमिति मनुते सर्वानर्थकारिणी तामसी बुद्धिर्भवतीत्यनन्तरं तां परित्यजेदिति सेवायनाभिप्रायः ३२

मधुसूदनी टीका १०

तमसा विशेषदर्शनविरोधिना दोषेणावृता या बुद्धिरधर्ममधर्ममिति मन्यते अदृष्टार्थे सर्वत्र विपर्यस्यति तथा सर्वार्थान् दृष्टप्रयोजनानपि ज्ञेयपदार्थान् विपरीतानेव मन्यते सा विपर्ययवती बुद्धिस्तामसी ३२॥

सदानंदी टीका ११

तमसा दोषरूपेणाऽऽमनिर्याच्छादिता सती अधर्ममधर्ममिति वेमम

तेविपरीतत्ता २ विपर्ययस्तनिसर्वत्रविशेषादर्शनात्यथा दृष्टम्
योजना सर्वान्पदार्थान्मन्यते यथा २ विपर्ययवतीबुद्धिस्तामसीसम्मतेर्थः ३ ३२ ॥

नीलकंठी टीका १२

अधर्ममिति विपरीतग्राहिणीबुद्धिस्तामसीमर्थः ३२ ॥

आनंदीटीका १३

स्पष्टार्थः ३२ ॥

रामकंठी टीका १४

तामसीतमोगुणहेतुकाबुद्धिर्याधर्मीधर्मादीनदृष्टविषयान्स तामसीतमोगुणाहेतुकाबुद्धिर्याधर्माधर्मादीनदृष्टविषयान्सर्वार्थांश्च दृष्टविषयांस्तमसाहेतुनाहतासती विपर्ययेणजानाति सैषामिथ्याज्ञानहेतुभूततमोगुणत्वात्रिकृष्टासंसारविषयेनिहूया ३२ ॥

लासिकी टीका

^तामसीबुद्धिमाह॥ ^सर्वार्थान्दृष्टपदार्थान् विपरीतग्राहिणीतामसीत्यर्थः बुद्धिः

[illegible] ३२

पंचोलीटीका

तामसीबुद्धिमाह अधर्ममिति हेपार्थयाबुद्धिस्तमसाग्राह तासती अधर्ममपतिषिद्धविहितंधर्ममितिमन्यते जानाति व पुनः सर्वार्थान् सर्वानेवज्ञेयपदार्थान्विपरीतानेवजानाति साबुद्धिस्तामसी ३२

श्रीवीरसमिद्धोधिनी

अथतामसीमाह अधर्ममिति ययामोहाक्रांतयाबुद्ध्या अधर्मं परहतिस्त्रीकारत्वदर्णं धर्ममन्यते इतिशब्दः प्रकारे तथाच धर्मं वस्त्ववर्गोचितं गृहचर्यादिकं हिंसाजनकत्वादधर्मंमन्यते किमन्यत् सर्वार्थांश्च विपरीतान्ययावेत्ति सातामसीबुद्धिः ३२॥

मपुमाध

३२॥

144

भाषा अनुवाद ॥

और तमोगुणसे आवृत कहे वेरी जो बुद्धि अधर्मकोभी जानि धर्मके सकल विषयको विपरीत कहे उलटा जानै ऐसी विपरीत ग्रहणक रने वाली बुद्धि तामसी है यहां भी करणता बुद्धि को उचित थी पर कर्ता रूपसे कहा है अथवा धर्म रूप अन्तःकरण की वृत्ति बुद्धिओ निश्चय तथा इच्छा द्वेष आदिरूप अन्तःकरण की वृत्ति बहुत भी रहतेय मी अधर्म औभय अभय की साधन रूप बुद्धि को प्रधान कियाहै औ र सब उपलक्षण रूपसे त्रिविध कहे गये ३२ ॥

दोहा

अधर्महि धर्म जो जानहि तमसें आवृत होय पार्थ अर्थस भविपरीत जोबुद्धि तामसी सोय ३२

145

धृत्याययाधारयतेमनःप्राणेंद्रियक्रियाः
योगेनाव्यभिचारिण्याधृतिःसापार्थसात्विकी

शांकरभाष्य टीका १

॥३३॥

धृत्येति धृत्याययाऽव्यभिचारिण्येति व्यवहितेन संबन्धः या
धारयते किंमनःप्राणेंद्रियक्रियाः मनश्च प्राणाश्चेंद्रियाणि तेषां
क्रियाश्चेष्टास्ताः^ च्छास्त्रमार्गविषया भवंति योगेनेति योगेन स
माधानेनाव्यभिचारिण्या नित्यसमाधानानुगतयेत्यर्थः एतदु
क्तं भवत्यव्यभिचारिण्या धृत्या मनःप्राणेंद्रियक्रियाः धार्यमा
णा योगेन धारयतीति सैवलक्षणा धृतिःसापार्थसात्विकी ३३

^ उच्छास्त्रमार्गप्रवृत्तेर्धारयंति धृत्या हि धार्यमाना नु

आनंदगिरिकृत टीका २

इदानीं धृतित्रैविध्ये प्रतिपादयिषुरादौ सात्विकीं धृतिं स्वमाह
यति धृत्येति निर्दिष्टानां चेष्टानां कथं धृत्या धारणं तत्राह नाडीति
नैदेवाचभवेन साधयति धृत्याहीति ध्रियतेऽनयेति धृतिर्यत्नवि
शेषः तया धृत्या धार्यमाणा यथोपदिष्टाश्चेष्टाः शास्त्रमतिक्रमा
नार्थान्तरावगाहिन्यो भवंतीत्यर्थः धृतिमेव समाध्यविनाभूतत्वे
ने विशिनष्टि योगेनेति नवष्टैर्नियमेन समाध्यनुगतत्वे
कथमुक्तक्रियाधारणोपयोगीत्याशंक्याह एतदिति उक्तक्रिया
धार्यमाणा योगेन ब्रह्मणि समाधानेनैकाग्र्येणाव्यभिचारिण्याः
विनाभूतया धृत्या धारयमेव तदविनाभावाभावे नियमेन तद
वि रणासिद्धेरित्यर्थः ३३ ॥

+ इदानीं धृतेस्त्रैविध्यमाह ॥ तेन ४

स्वामिकृत टीका ३

+ धृत्येति त्रिभिः योगेनचित्तैकाग्र्येण हेतुनाऽव्यभिचारिण्या विषयांत
रमधारयंत्या यया धृत्या मनसः प्राणेंद्रियाणां च क्रियाधारयते ३३ ॥
नियच्छति साधृतिः सात्विकी

पिशाचभाष्य टीका ४

धृत्या धैर्येण धारयति नियमयति प्राणा असवः तेषां क्रियाः व्यापारान्
योगेन समाधिनाऽप्यव्यभिचारिण्या नियमाधृत्यासासात्विकी ३३ ॥

श्री
गी॰ टी॰
अ॰

रामानुजभाष्य टीका ५

धृत्येति यया धृत्या योगेनाव्यभिचारिण्या मनःप्राणेन्द्रियाणां
क्रियाः पुरुषो धारयते योगो मोक्षसाधनभूतं भगवदुपासनं यो
गेन प्रयोजनभूतेनाव्यभिचारिण्या योगोद्देशेन प्रवृत्तास्तत्साधन
भूता मनःप्रभृतिजाः क्रिया यया धृत्या धारयते सा सात्विकी त्यर्थः
[illegible] ३३ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ३३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

अथ धृतेस्त्रैविध्यं सात्विकीं धृतिमाह धृत्येति योगेन चित्तैका
ग्र्येणाहेतुनाव्यभिचारिण्या विषयान्तरमधारयन्त्या यया धृत्या म
नसः प्राणानामिन्द्रियाणां च क्रियाः धारयते नियच्छति सा धृतिः
सात्विकी ३३ ॥

वनमाली टीका ८

एतेषु त्रैविध्यमाह धृत्येति त्रिभिः योगेन समाधिनाव्यभिचारि
ण्याविनाभूतया समाधिव्याप्तया यया धृत्या प्रयत्नेन मनसः
प्राणेन्द्रियाणां च क्रियाश्चेष्टा धारयते यया वा धारयते यया वा
धृत्या मनःप्राणादिक्रियाः शास्त्रमतिक्रम्य नार्थान्तरमवगाहन्ते
धृतिः सा पार्थ सात्विकी ३३ ॥

कुसुमवैजयंती टीका ९

एवं बुद्धेस्त्रैविध्यमुक्त्वेदानीं धृतेस्त्रिभिस्त्रैविध्यं वक्तुमादौ सात्वि
कीं धृतिमाह धृत्या ययेति योगेन परमात्मचिंतनरूपेणाव्यभि
चारिण्या न तदंशं विषयमगच्छन्त्या यया धृत्या मनःप्राणेन्द्रियक्रि
याः मनसोऽन्तःकरणं च बुद्ध्यादि [illegible] प्राणानां दशानां [illegible] नामिन्द्रि
याणामेकादशबाह्यकर्मणां च क्रियाः पुरुषो धारयते हे पार्थ सा धृतिः
सात्विकी योगसाधनरूपा वा [illegible] सत्त्वगुणनिर्वृत्ता [illegible]
[illegible] ३३ ॥

मधुसूदनी टीका १०

+ इदानीं धृतेस्त्रैविध्यमाह त्रिभिः॥

+ योगेनसमाधिनाऽव्यभिचारिण्याऽविनाभूतयासमाधिव्याप्त
तयाययाधृत्याप्रयत्नेनमनसः प्राणस्येन्द्रियाणांचक्रियाश्चेष्टाधा
रयतेउक्तास्वप्रवृत्तेर्निरुणद्धि यस्यांसत्यामवश्यंसमाधिर्भवतिय
यावद्धार्यमाणामनःप्राणादिक्रियाःशास्त्रमतिक्रम्यनार्थान्तरमवा
गाहन्तेधृतिःसापार्थसात्त्विकी ३३ ॥

महानंदी टीका ११

धृतेरिदानींत्रैविध्यमाहधारयेत्यादिति: समाधिनाविनाभूतत्वरूप
यात्वचलत्वया १ ययाधृत्याप्रयत्नेनप्राणस्यमनसः क्रियाः इन्द्रि
याणांतथाचेष्टानिरुणद्धिउन्मार्गतः २ यस्यांसत्यामवश्यंहिसमा
धिर्जायतेसततं धार्यमाणाययाधृत्यामनःप्राणेन्द्रियक्रियाः ३ नैव
शास्त्रमतिक्रम्यावगाहन्तेऽयगोचरं साधृतिःसात्त्विकीपार्थमहा
गुणपवनाभवेत् ४ ॥ ३३ ॥

नीलकंठी टीका १२

ययाधृत्याऽव्यभिचारिण्यासमाध्यनुगतयामनःप्राणेन्द्रिया।
णांक्रियाश्चेष्टाःसंकल्पश्वासप्रश्वासौशब्दादिग्रहणंचयोगेनवि
नहतिनिरोधेनचैकाग्र्येणवासंयतास्तास्तथैवनिरोधावस्थायामे
काग्र्यावस्थायांवाधारयतेचिरमवस्थापयतिसाधृतिःपार्थसात्त्वि
की ३३ ॥

आनंदी टीका १३

योगेनज्ञानकर्मसमुच्चययुक्ताभ्यासान्तरेणचित्तवृत्तिनिरोधेनवा
अव्यभिचारिण्यासदैकरूपयाधृत्याचित्तस्थैर्येणपुरुषः मनःप्राणे
न्द्रियक्रियाःधारयतेवशयतिसासात्त्विकीधृतिः ३३ ॥

रामकंठी टीका १४

अथधृतिस्त्रैविध्यानत्रसात्त्विकींतावत् सासात्त्विकीपूर्ववद्विश्य
हसत्त्वगुणात्मिकाधृतिः कासौययायोगीमनःप्रभृतीन्धारय
तिकीदृशयापरमात्मविषयेणयोगेनसमाधिनासहाव्यभिचा
रिण्यानित्यमव्यतिरिक्तया योगीहिमनोऽन्तःकरणंप्राणमाभ्य
न्तरंमारुतंतत्तत्क्रियाभेदान्नानासंज्ञाभिरिन्द्रियाणिचक्षुर्वागादी

श्री० गी० टी० अ०

नियोगार्थमेवधारयति नत्वात्मसमाधिविषयेवष्टम्भस्थैर्यमे
वकारणमित्यर्थः यथानन्वत्तानहेतुविशुद्धसत्वगुणसमुद्भू
तत्वादपवर्गफलत्वेसम्पादया अथराजसी ३३ ॥

लासिकी [illegible]टीका

सात्विकींधृतिमाह—

अव्यभिचारिण्यानिश्चलयाययाधृत्यादार्ढ्यहेतुभूतया यो
गेनात्मसमाधानेनकारणेनमनसःक्रियासंकल्पात्मिकाः
प्राणानांक्रियाउच्छ्वासनिःश्वासात्मिकाः इंद्रियक्रियाद
र्शनादिरूपाधारयतेवष्टभ्नातिसाधृतिःस्थैर्यंसात्विकी [illegible]
[illegible] ३३

पंचोलीटीका

धृत्येवेविधेसात्विकींधृतिमाह धृत्येति हेपार्थययाअव्यभिचा
रिण्यानित्यसमाध्यनुगतयाधृत्यामनःप्राणेन्द्रियाणांक्रियाःचे
ष्टाउच्छ्वासमार्गप्रवृत्तेः सकाशात् हार्थमाणयोगेनचित्तसमा
च धानेनधारयतिएवंविधासात्विकीधृतिः ३३

रणवीरसमिद्धोधिनी ॥

अधुनाधृतेस्त्रैविध्यंदर्शयंस्तावत्सात्विकंभेदंदर्शयति धृत्येति
योगेनकर्मकौशलसमन्तोभयत्वलक्षणेनहेतुनाव्यभिचारि
णाविषयांतरमधारयंत्यायथाधृत्यास्थैर्यलक्षणयामनः
प्राणेंद्रियक्रियाधारयतेनियच्छतिसाधृतिःसात्विकीमता ३३

मधुभाष्य

३३ ॥

भाषा अनुवाद ॥

अब इस श्लोक को अवधि कर तीन श्लोक से धृति की त्रैविध्य क
हते हैं कि हे अर्जुन योग कहे चित्त की एकाग्रता से और और
विषय का धारण न करके जो धैर्य से मन औ प्राण तथा सब इंद्रि
यों की सकल क्रिया की हुई जाये वही धृति सतो गुणी है ३३

दोहा

यासें धर्म अधर्म कों कार्य अकार्य हि कोय पार्थ यथार्थ न
जान हि राजसी कहिय सोय ३१

यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन प्र
संगेन फलाकांक्षी धृतिः सा पार्थ राजसी ३४

शंकरभाष्यटीका १

ययेति यया तु धर्मकामान् धर्मश्च कामश्चार्थश्चेति धर्मका
मार्थाः तान् धर्मकामार्थान् धृत्या यया धारयते मनसि नि
त्यकर्तव्यरूपानेव धारयते हे अर्जुन प्रसंगेन यस्य धर्मादिधार
णप्रसंगस्तेन तेन प्रसंगेन फलाकांक्षीच भवति यः पुरुषः
तस्य धृतिर्या सा पार्थ राजसी ३४ ॥

आनंदगिरि टीका २

राजसी धृतिं दर्शयति ययेति तेषां धारणप्रकारमभिनय
ति मनसीति फलाकांक्षीत्यस्य विशेषणे तदाह यः पुरु
ष इति ३४ ॥

स्वामिकृत टीका ३

राजसी धृतिमा
ह—
ययेति यया धृत्या धर्मार्थकामान्प्राधान्येन धारयते न विमोक्षं च
तेन तेन प्रसंगेन फलाकांक्षी च भवति सा राजसी धृतिः तामसीं
धृतिमाह ययेति ३४ ॥

पैशाचभाष्यटीका ४

यया तु धर्मकामार्थान् धारयते विभर्ति प्रसंगेन प्रसक्ता
नि फलमित्यर्थः ३४

रामानुजभाष्यटीका ५

फलकांक्षी पुरुषः प्रसंगेन धर्मकामार्थान्यया धृत्या धार
यति सा राजसी धर्मकामार्थशब्देन तत्साधनभूतं मनः प्राणेंद्रिय
क्रियाजालं लक्ष्यते फलाकांक्षीत्यत्रापि फलशब्देन राजसत्वात् धर्मका
मार्थाः पर्व विवक्षिताः प्रवृत्ता धर्मकामार्थापेक्षया मनः प्रवृत्तीनां कि
यया धृत्या धारयते सा राजसीत्युक्तं भवति ३४ ॥

अभिनवगुप्तकृतटीका ६ ॥ ॥

सापार्थे ३४ ॥ ॥ ॥ ॥ ॥

श्री
गी॰ टी॰
अ॰

१४९

परमार्थप्रपा टीका ७

राजसीमाह ययेति यया धृत्या धर्मकामार्थान् प्राधान्येन धारयते न विमुं[illegible]चति न प्रसंगेन फलाकांक्षी च भवति सा राजसी धृतिः ३४ ॥

वनमाली टीका ८

प्रसंगेन कर्तृत्वा[illegible]भिनिवेशेन फलाकांक्षी सन् यया धृत्या धर्मकाममर्थं धारयते नित्यकर्तव्यतया वधारयति न तु मोक्षं कदाचिदपि धृतिः सा पार्थ राजसी ३४ ॥

ऊं समवैजयंती टीका ९ का

राजसीं धृतिमाह ययेति हे अर्जुन प्रसंगेन संमविहत्वसंगेन फलाकांक्षी कृष्णः यहा फलाकांक्षी निःकामविहत्वसंगेन यया धृत्या धर्मकामार्थान् शास्त्रान् साधनभूतान् मनः प्राणेंद्रियक्रियाः धारयते हे पार्थ सा धृती राजसी रजोगुणयुक्ता तया धीमानत्वेव हर्षशोकधृतिर्नास्ति संदेहं मा कुरु कृष्ण इति सूचितं ३४ ॥

मधुसूदनी टीका १०

तः सात्विकाभिनतिप्रसंगेन कर्तृत्वाद्यभिनिवेशेन फलाकांक्षी सन् यया धृत्या धर्मं काममर्थं च धारयते नित्यकर्तव्यतया वधारयति न तु मोक्षं कदाचिदपि धृतिः सा पार्थ राजसी ३४ ॥

सदानंदी टीका ११

कर्तृत्वाभिनिवेशेन फलाकांक्षी च सन् यया धर्ममर्थं तथा कामं नित्यकार्यतया जनः १ धृत्यावधारयत्यच्छेन न तु मोक्षं कदाचन सा धृती राजसी पार्थ संसारैकफलप्रदा २ ३४ ॥

नीलकंठी टीका १२

यया धृत्या धर्मादीन् धारयते न त्वेतेभ्यो निवर्तते अर्जुन प्रसंगेन यः संसर्गेन फलाकांक्षी च भवति कृष्णः धृतिः सा पार्थ राजसी ३४

आनंदीटीका १२

फलाकांक्षीधर्मस्यप्रसंगेययाधृत्याधर्ममेवधारयते नार्थकामौ का मप्रसंगेनतत्रधर्मार्थौ अर्थप्रसंगेनतत्रधर्मकामौसाचचलत्वाद्राजसी धृतिः ३४ ॥

रामकंठीटीका १४

रजोगुणजाधृतिर्ययासाधनभूतयासंसारीपुरुषः प्रसंगेनोक्तल क्षणेनफलाकांक्षीस्वर्गादिसुखात्मककर्मफललिप्सुर्धर्मादींस्त्या रयेन ... नत्वपवर्गं धर्मः शास्त्रचोदितसमाचारः तत्फले च्छुः कामः अर्थोधनं त्रिवर्गमात्रनिबद्धधृतयोहिसंसारिणः पुरु षाः तदेषाधृतिरीदृश्येव प्रथतामसी ३४ ॥

लासिकी ... टीका

^राजसीधृतिमाह ॥

^ययाधृत्यादार्ढ्येनधर्मकामार्थांस्त्रिवर्गंधारयतेनित्यंकर्तव्यत यावष्टभ्नाति प्रसंगेनतथाभिनिवेशेनफलाकांक्षीचभवति सा धृतीराजसी ... ३४

पंचोलीटीका

राजसीधृतिमाह ययाइति हेपार्थ तत्पुनः ययाधृत्याधर्मकामा र्थान्त्रीनपदार्थान्त्रवश्यकर्तव्यान् धारयतिप्रसंगेनफलाकांक्षीयस्य धर्मादेरवश्यकर्तव्यत्वेनधारणप्रसंगोयदातद्यातेनप्रसंगेनतस्य फलाकांक्षीभवतियःपुरुषःसाधृतिराजसी ३४

रत्नावीरसमिद्धोधिनी

राजसींधृतिमाह ययाचेति प्रसंगेन प्रकृष्टेनसंगेनोक्तलक्षणेन फलाकांक्षीफलमभिसंदधानः कर्मयोगीधर्मादीनेवप्राधान्ये नधारयतेनतुमुक्तिमपिसाराजसीधृतिः ३४॥

मधुभाष्य

३४॥

150

भाषा अनुवाद ॥

अब राजसी धृति कहते है कि हे अर्जुन तिससे भिन्न जो धृति कि
जिससे धर्म अर्थ औ काम सब श्रेष्ठ रूप से धारण किये जाय परि
सक्त न होय और उन के संङ्गम से धर्मादि के फल की आकांक्षी भी
होय ऐसी धृति का नाम राजसी है २४ ॥

दोहा

यासें धर्म अर्थ कामको नर धरहे धृति सोय संगहिसें फल
कांक्षी जो पार्थ सो राजसी होय ३४।

151

ययास्वप्नंभयंशोकंविषादंमदमेवच नवि
मुंचतिदुर्मेधाधृतिःसातामसीमता ३५

शांकरभाष्य टीका १

ययेति यया स्वप्नं निद्रां भयं त्रासं शोकं सन्तापं विषादमव
सादं विषण्णतां मदं विषयसेवां आत्मनो बहु मन्यमानो
मत्तइव मदमेवच मनसि नित्यमेव कर्तव्यरूपतया कुर्वन्न
विमुंचति धारयत्येव दुर्मेधाः कुत्सितमेधाः पुरुषो यस्तस्य
धृतिर्यासा तामसी मता ३५ ॥

आनंदगिरि टीका २

तामसीं धृतिं व्याचष्टे ययेति शोकं प्रियवियोगनिमित्तं सन्तापं
विषण्णतामिन्द्रियाणां ग्लानिः विषयसेवां कुमारीप्रवृत्तेरुपल
क्षणमेके स्वमादिमदान्ते सर्वमेवकर्तव्यतयात्मनो बहु मन्य
मानो मनसि नित्यमेव कुर्वन्दुर्मेधाः नः मुंचति किंतु धा
रयत्येवेति योजना ३५ ॥

स्वामिकृत टीका ३

दुष्टाविवेकबहुलामेधायस्यसदुर्मेधाःपुरुषोययाधृत्यास्व
प्नादीन्नविमुंचति पुनःपुनरावर्तयति स्वप्नोत्र निद्रा सा धृति
स्तामसी ३५ ॥ पिशाचभाष्य टीका ४
नमःप्रभवा ३५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रामानुजभाष्य टीका ५

ययेति ययाधृत्यास्वप्नंनिद्रांमदंविषयानुभवजनितंमद
स्वप्नादीन् उद्दिश्यप्रवृत्तामनःप्राणेन्द्रियक्रियादुर्मेधान
विमुंचतिभयशोकविषादांश्चाहाश्च भयशोकादि[illegible]विष
यान्नसायनभूतान्मनःप्राणादिक्रियाययाधारयति
साधृतिस्तामसी ३५ ॥

अभिनवगुप्तटीका: ६
तस्सष्टार्थः २५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटी ७
नाम सो र्महा यथास्वप्नमिति दुष्टाव विवेकवद्दुर्लामेधा यस्मा सो दुर्मेधाः पुरुषः यथाऽत्यावस्वप्नमस्यपदार्थदर्शनेन भयं विधिंतयति तथा भयशोके विषादं मदं च न विमुंचति तास्थिरीकरोति सा तामसी धृतिः २५ ॥

वनमाली टीका ८
स्वप्नं निद्रा भयं शोकं इष्टवियोगनिमित्तं तापं विषादं मिंद्रियावसादं मदं मशास्त्रीयविषयसेवोन्मत्ततां च यया न विमुंचत्येव किं तु सदैव कर्तव्यतया मन्यते दुर्मेधा अविवेका समर्थः धृतिं सा तामसी २५

उपमैवजयेती टीका ९
नामसी धृतिमाह यथा स्वप्नमिति दुर्मेधा दुष्टबुद्धिः पुरुषो यया धृत्या स्वप्नं निद्रां भयं शोकं विषादं च मन्दं मदं विषयभोगं वैवशोद्धतस्माथनभ्रतामनः प्राणेन्द्रियाणि विमुंचति किं तु धारयति पुवहे यार्थसा धृतिस्तामसी तमोगुणप्रकाशवयावी यापार्थसनेन धृत्या प्रवचनानवद्दुर्मेधत्वाभावेने दृश्या पूर्वैरप्यमावर्त्त तिसूचितं २५

मधुसूदनी टीका १०
स्वप्नं निद्रां भयं त्रासं शोकं इष्टवियोगनिमित्तं संतापं विषादं मिंद्रियावसादं मदं मशास्त्रीयविषयसेवोन्मत्तत्वं च यया न विमुंचत्येव किं तु सदैव कर्तव्यतया मन्यते दुर्मेधाः विवेकासमर्थः धृतिः सा पार्थ तामसी [illegible] २५ ॥

सदानंदी टीका ११
निद्रां त्रासं च संतापं बकीयेष्टवियोगजं इंद्रियावसादं च भोगास्किकं मदं १ न विमुंचति किं त्वेतान्कर्तव्यत्वेन मन्यते निर्विवेको यया धृत्या सा धृतिः पार्थ तामसी २ २५ ॥

नीलकंठी टीका १२

स्वप्नं निद्रां भयं त्रासं शोकमिष्टवियोगजं विषादं विषण्णतां मदं दर्पम्। योगी विषयसेवयात्मानं विवशं च पुनः पुनः न विमुञ्चति धारयते
वयं धार्ष्ट्यात् सा धृतिः सा पार्थ तामसी ३५ ॥

आनंदी टीका १२

दुर्मेधाः धर्मादिभ्यो गात्रं स्वप्नादिषु वा सक्तं बुद्धिः विषादमनुत्सा
हम् ३५

रामकंठी टीका १४

सा तामसीत्याह तमोगुणजाया धृतिर्यया हेतुभूतया दुर्मेधा विपर्यय
ग्रस्त बुद्धित्वात् दुष्टा मेधा प्रज्ञा यस्य स तादृशः पुरुषः स्वप्ना
दीन् दोषान्न विमुञ्चति नन्वयमेव नित्यं मन्यते इत्यर्थः स्वप्नोनि
द्रा मनः कार्यं भयमिष्टविषयविनाशशङ्कया त्रासः शोको न
ष्टानुशोचनम् विषादमनुत्साहं मदं विवेकः मूढः किल ता
नेव नित्यमवहदन्नात्मेति ननु यथा निकृष्टैवं धृतिस्तामसी च
३५ ॥

लासिकी टीका

नामसी धृतिमाह ॥ येन स्वप्नं निद्रां भयं त्रासं शोकं विनष्टानुशोचनं विषादं
दैन्यं धैर्येण स्वप्नं निद्रां भयं त्रासं शोकं विनष्टानुशोचनं विषादं पुनः पुनरावर्त
विषण्णतामनुत्साहं मदं वित्तादिकेन न विमुञ्चति पुनः पुनरावर्त
यति यतो दुर्मेधाः दुष्टा देहाद्यभिमानाभिनिवेशेन विपर्यस्ता
बुद्धिर्यस्य सा धृतिस्तामसी

पंचोली टीका

तामसीं धृतिमाह यथेति हे पार्थ दुर्मेधा यया धृत्या स्वप्नं निद्रां भयं
त्रासं शोकं संतापं विषण्णतां यथेष्टविषयप्राप्त्याशानाविषयसे
वनं च मदं मन्यमानस्य यामदः स्वयं तानि वस्तूनि ममेति नित्यकर्तव्यत
या न विमुञ्चति धारयत्येव सा धृतिस्तामसी ३५

तामसीमाह यथेति दुर्मेधा उक्ताविपर्ययप्रत्ययरूपत्वाद्वि
वेकसून्यामेधायस्यसतादृशः पुरुषोययाधृत्यास्वमादीन्न
विमुंचति सातामसीधृतिः ३५ ॥

153

मधुभाष्य

३५॥

भाषा अनुवाद

अब तामसीधृति कहते हैं कि हे अर्जुन जिस मनुष्य की दुर्मेधा कहे अविवेकिनी नीच बुद्धि है और वह दुर्बुद्धि मनुष्य जिस धृति करके स्वप्न से निद्रा औ भय शोक तथा विषाद कहे दुख औ मद इ न को नहीं छोडता है वह धृति तामसी है ३५ ॥

दोहा

यासें स्वप्न भय शोक को मद विषादहि कोय त्यागे मूढ न सो धृति पार्थ तामसी होय ३५

154

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ । अ
भ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ३६

शांकरभाष्यटीका १

गुणभेदेन क्रियाणां कारकाणां च त्रिधा भेद उक्तोऽथेदानीं फलस्य
सुखस्य त्रिविधो भेद उच्यते सुखमिति सुखं तु इदानीं त्रिविधं शृणु
समाधानं कुर्विति मे मम भरतर्षभ अभ्यासात् परिचयादावृत्तेः र
मते रतिं प्रतिपद्यते यत्र यस्मिन् सुखानुभवे दुःखान्तं च दुःखा
वसानं दुःखोपशममेव निश्चयेन प्राप्नोति ३६ ॥

आनंदगिरिटीका २

हेतुमनूद्यानन्तरश्लोकतात्पर्यमाह गुणेत्यादिना क्रियमाणे
कारकाणां गुणतस्त्रैविध्योक्त्यनन्तरं फलस्य सुखस्य त्रैविध्यमव
वसरे सतीत्याह इदानीमिति हेयोपादेयभेदार्थं त्रैविध्यं समा
धानेनैकाग्र्येण मम वचनादिति शेषः यत्रेत्यस्य यत्र सेव्यते न
न्त्रिविधं सुखमिति पूर्वेण संबंधः ३६ ॥

स्वामिकृतटीका ३

सुखस्य त्रैविध्यं प्रतिजानीते सुखमिति सार्धेन तत्र
सात्त्विकं सुखमाह अभ्यासादिति सार्धेन यस्मिन् सुखे अभ्यासा
दतिपरिचयाद्रमते न तु विषयसुखवत् सहसा रतिं प्राप्नोति
यस्मिंश्च रममाणः सन् दुःखस्यान्तमवसानं नितरां गच्छति ३६ ॥

पिशाचभाष्यटीका ४

सुखे शमे अभ्यासाद्रमते निगच्छति दुःखान्तं
दुःखावसानं गच्छति प्राप्नोति ३६ ॥

रामानुजभाष्यटीका ५

सुखमिति पूर्वोक्ताः सर्वे ज्ञानकर्मकर्त्रादयो येन भूतास्तेषां सुखं गु
णतस्त्रिविधं इदानीं शृणु यस्मिन् सुखे चिरकालाभ्यासात् क्रमेण नि
रतिशयां रतिं प्राप्नोति दुःखान्तं च निगच्छति निखिलसांसारिक
दुःखावसानं निगच्छति ३६ ॥

श्री॰
गी॰टी॰
अ॰

155

अभिनवगुप्तकृतटीका ६

सख्यर्थम् ३६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

अथ त्रिविधं सुखमाह सुखं त्विति द्वाभ्यां इदानीं त्रिविधं सुखं मे म
नः शृणु अभ्यासादिति यत्र यस्मिन्सुखे अभ्यासाद्रतिं तदानन्दसेवा
नादुर्मतेरमसाणः दुःखांतं दुःखावसानं निगच्छति नितरां प्राप्नो
ति ३६ [illegible]
[illegible]
[illegible]
[illegible] त्रिविधमपि वेति त्रिविधं
[illegible]
[illegible] ३६ ॥

वनमाली टीका ८

सुखस्य त्रैविध्यं प्रतिजानीते साऽर्द्धेन यत्र यस्मिन् सुखे चिरकाल
मभ्यासात्क्रमेण रमते निरतिशयां रतिं प्राप्नोति यतश्च दुःखसा
तेनाशं नितरां गच्छति ३६ ॥

ऊरुमैवेजयंती टीका ९

अथ सुखस्य गुणतस्त्रैविध्यं प्रतिजानीते सार्धेन सुखं त्विति हे भर
तर्षभ नन्दयतः इदानीं [illegible] मे मत्तः सकाशात्सर्वेषां ज्ञानास
वेषां ज्ञानकर्तृत्वादीनां मस्फलरूपं तत्सुखं गुणतस्त्रिविधं त्वं शृणु
भरतर्षभेत्यनेन भरतवंशोद्भवानां मध्ये तव श्रेष्ठत्वादेतच्छ्रवणा
धिकारोऽस्तीति सूचयामीति सूचितं तत्सुखं कीदृशमित्यपे
क्षायामादौ सात्त्विकं सुखमाह सार्धेन अभ्यासादिति यत्र यस्मि
न्सुखे अभ्यासात्पुनः पुनश्चिरकालपरिशीलनाद्रमते निरति
शयां प्रीतिं प्राप्नोति यत्र च रममाणः पुरुषो दुःखसांतं मोक्षं निग
च्छति प्राप्नोतीति निखिलसांसारिकदुःखं तरतीत्यर्थः ३६ ॥

+ पूर्वं क्रियाणां कारकानां च गुणतस्त्रैविध्यमुक्त्वा तत्फल
स्य त्रैविध्यं प्रतिजानीते श्लोकार्धेन ॥

मधुसूदनी टीका १०

+ मे मम वचनात् शृणु हेयादेयविवेकार्थं श्रोतुमवहितो भवेत्यर्थः [illegible]

त्मनः स्थिरीकुरु हे भरतर्षभेति योगयता दर्शीनां सात्विकसु।
खमाह सार्द्धेन यत्र समाधिसुखविषयाभ्यासात् दिनपरिचर्यात् रमते
परिरमो भवति न तु विषयसुखवदवमयपद यस्मिंश्च समाधिसुखे दुः
खस्य सर्वस्यान्तं तमवसानं निगच्छति न तु विषयसुखे इव तो
तेमहदुःख [illegible] ति ३६ ॥

सदानंदी टीका ११

क्रियाणां कारकाणां च गुणतस्त्रैविध्यमीरितं त्रैविध्यं प्रतिज्ञा।
तीतेन फलस्य सुखस्य १ हेयोपादेयविवेकाय वचनान्मे।
शृणु स्फुटं सुखं त्रिविधमसंतेनावधानेन चेतसा २ सार्द्धेन सा
त्विकं राहसुखमानंदवारिधिः समाधानसुखे यत्राभ्यासात् रति
वर्धते ३ प्रपद्यते तया यत्र रममाणो नु भूतिकः सर्वदुःखो
पशमने निवर्तां गच्छति सत्ये ४ ३६ ॥

नीलकंठी टीका १२

गुणभेदेन क्रियाणां कारकाणां च त्रैविध्यमुक्तं तत्फलस्य सु
खस्य त्रैविध्यमाह सुखं त्विमादिना अभ्यासात् यो न तु प्रेमेन
सेवनात् यत्र सात्विके राजसे नाम सेवा सुखे रमते रतिं प्रा
मोति यथा रत्नादुःखस्य पुत्रशोकादेरुपेक्षितेन प्रवसाने निग
च्छति निश्चयेन प्राप्नोति तत्सुखं त्रिविधं शृणु यदा त्वयम
र्थः सात्विकसुखसेवलक्षणार्थः तदा यत्र समाधिसुखे
अभ्यासाद्रमते न तु विषयसुखवद्रागात् दुःखान्ते मोक्षे
च निगच्छतीत्यर्थः ३६ ॥

आनंदी टीका १३

अथैतत्कर्मफलस्य सुखस्य त्रैविध्यमाह ३६

+अथ कर्मभूतफलस्य सुखस्य त्रैविध्यं प्रतिपादयितुमुपक्रमते सार्धमेतत्+

रामकंठी टीका १४

अथ त्रैविध्ये प्रतिपाद्ये सात्विकत्वेनावश्यसुखस्य प्रतिपादयि
तुमाह तत्सात्विकं विशुद्धसत्वहेतुकं सुखमानंदं विद्या
जानीयात् कीदृशमात्मबुद्धिप्रसादजं आत्माब्रह्मस्वरूप

श्री॰
गी॰ टी॰
अ॰

परंतत्वंतदालम्बनात्बुद्धिः पराप्रसन्ना तस्याः प्रसादो नैर्मल्यं।
यद्यपेतया विक्षुब्धमपि सत्वं मलिनत्वात्परिहार्यमेव ततस्त
याविधात्बुद्धिप्रसादाज्जातमद्भूतं किं तत् यत्र यस्मिन्सुखे
भ्यासान्नित्यानुशीलनाद्योगी रमते रतिं भावयति ननु हि
जते विषयभोगात्मकस्य हि सुखस्याभ्यासो विषयाकांक्षया
तत्रोद्वेगं जनयति समाधिजं तु सुखं रतिमेवावहति यत्र च
सुखेनुभूयमाने सुखदुःखानामन्तं समाप्तिमभावं नियच्छ
ति नितरां प्राप्नोति अन्यस्मिन् हि सुखेनुभूयमाने क्षणान
न्तरं तदेव दुःखं संपद्यते ३६ ॥

15b

लास्किकी [illegible]टीका

+ सुखस्य त्रैविध्यं प्रतिजानीते त्र्यर्धेन॥
+मेव वचनात् शृणु अन्यत्स्पष्टं तत्र सात्विके सुखमाह अभ्यासा
दिति सार्धेन यत्र यस्मिन्सुखे अभ्यासान्नित्यानुशीलाद्योगी रम
ते यथोत्तरं प्रीतिं भजते न तु द्विजते यस्मिन्।प्राप्ते दुःखस्या
ध्यात्मिकादिना त्रिविधस्यान्तमवसानं निगच्छति नितरां प्रा
प्नोति ३६

पंचोलीटीका

इदानीं फलस्य सुखस्य त्रैविध्यं प्रतिजानीते सुखमिति हे भरत
र्षभ त्वं पुनः इदानीं सत्वादिभेदेन त्रिविधं सुखं मे मत्तः शृणु।
यत्र यस्मिन्सुखे रतानुभवे अभ्यासादतिपरिचयात् विशेषं रमते।
रतिं प्रतिपद्यते च अयम् तत् दुःखान्तं दुःखाभावं निगच्छति प्राप्नो।
ति ३९

बालावीरसमिद्धोधिनी॥

इदानीं कर्मफलभूतस्य सुखस्य त्रैविध्यं प्रतिजानीते सुखं त्विति
त्र्यर्धेन गतार्थमेतत् अथ तस्य सात्विकं भेदं दर्शयति अभ्यासा
दिति सार्धेन यत्र यस्मिन्सुखे अभ्यासान्नित्यानुशीलनात् रमते रतिं
करोति न तु विषयभोगात्मके सुखाभासे सदसोद्वेगं याति यस्मि
न्समासाद्य दुःखान्तं दुःखावसानं च नितरां गच्छति अन्यत्र हि सु
खेनुभूयमाने तत्क्षणमेव दुःखोत्पत्तिर्दृश्यते ३६॥

मधुभाष्य

३६॥

भाषा अनुवाद ॥

अब सुख भी तीन प्रकार काहै यह प्रतिज्ञा आये स्लोक मे कहते
है किहे भरतवंशी अर्जुन अब त्रिविध सुख भी हम से सुनो कि
जो पुरुष नित्य अभ्यास के हेत से सुख भोग करताहै और विषयी
लोगोके समान विषय वासनासे अति हठ्यर करके सुखभोग नंही
करता प्रीतिको नंही प्राप्त होताहै ऐसा जो सुख भोगी पुरुष सो दु
ख के अन्त को प्राप्त होता अर्थात् दुख से छूटजाताहै ३६ ॥

दोहा

मोसे अब सुखकों सुनहु त्रिविध भरतवरसोप जामहि
रमहि योगसें दुःखनाशक सोइ सोप ३६॥

157

यत्तदग्रे विषमिव परिणामेऽमृतोपमं त
त्सुखं सात्विकं प्रोक्तमात्मबुद्धिप्रसादजं ३७

शांकरभाष्यटीका १

यदिति यत्तत्सुखमग्रे पूर्वं प्रथमसन्निपाते ज्ञानवैराग्यध्यान
समाध्यारम्भेऽत्यन्तायासपूर्वकत्वाद्विषमिव दुःखात्मकं भवति
परिणामे ज्ञानवैराग्यादिपरिपाकजं सुखममृतोपमं तत् सु
खं सात्विकं प्रोक्तं विद्वद्भिरात्मनो बुद्धिरात्मबुद्धिः प्रसादो नैर्मल्य
सलिलवत् स्वच्छता ततो जातमात्मबुद्धिप्रसादजमात्मविषया
वात्मावलम्बना बुद्धिरात्मबुद्धिस्तत्प्रसादप्रकर्षाद्वा जातमि
ति तस्मात् सात्विकं तत्स्मृतं ३७ ॥

आनंदगिरिकृतटीका २

तत्र सात्विकं सुखमादेयत्वेन दर्शयति यत्तदिति प्रथमसन्निपाते।
विभजते ज्ञानेति कुतस्तस्य दुःखात्मकत्वं तत्राह अत्यन्तेति दुःखा
त्मकत्वे दृष्टान्तमाह विषमिवेति ज्ञानादिपरिपाकावस्था परिणा
मस्तस्मिन् सति ततो जातमिति योजना तत्रैव हेत्वन्तरमाह आत्म
न इति आत्मबुद्धिशब्दार्थान्तरमाह आत्मविषयेति अन्तःकरणनै
र्मल्याद्वा सम्यक्ज्ञानप्रकर्षाद्वा जातत्वादिति तच्छब्दार्थः ३७ ॥

स्वामिकृतटीका ३

कीदृशं तत् यत्तदिति यत्किमप्यग्रे प्रथमं विषमिव मनःसंयमाधी।
नत्वात् दुःखावहमिव भवति परिणामे त्वमृतसदृशं आत्मविषया या
बुद्धिः तस्याः प्रसादो रजस्तमोमलत्यागेन स्वच्छतयावस्थानं ततो जा
तं यत्सुखं तत्सात्विकं प्रोक्तं योगिभिः [illegible] ॥

पिशाचभाष्यटीका ४

यत्तत्सुखमग्रे प्रथममभ्यास[illegible]रकालममृतोपमं आत्मबुद्धिप्रसादजं बु
द्धिप्रसादादंतःकरणप्रसादाज्जातं तत्सात्विकं ३७ ॥

* यतदेव विज्ञिनहि ॥

रामानुजभाष्यटीका ५ ॥

* यदिति यत्तत्सुखं अग्रे योगोपक्रमवेलायां बह्वायाससाध्यत्वाद्वि।

श्री॰
गी॰टी॰
म॰

विकरूपस्यात्मभावान्विषमिवदुःखमिवभवतिपरिणामेस्वतो
पसेव्यमानेपरिणामेविपाकेअभ्यासबलेनविविक्तस्वरूपाविर्भा
वेअमृतोपमंभवतितदात्मबुद्धिप्रसादजं आत्मविषयाबुद्धिरात्म
बुद्धिस्तयानिवृत्तसकलेतरविषयत्वंप्रसादः निर्मलत्वंतेनते
नतत्सुखं बुद्धेर्विविक्तस्वभावात्मानुभवजनितंतत्सुखंअमृतो
पमंतत्सुखंसात्विकंप्रोक्तं ३७ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं ३७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

तथायदग्रेआदौमनः आया दुःखाकारत्वेन
विषमिवदुःखमिवगतिपरिणामेत्वमृतोपमं परमानंदसदृशंभवति यच्च
आत्मबुद्धिप्रसादजमात्मविषयाव्यवसायात्मिकाबुद्धिस्तयायः प्रसादः
प्रसन्नतातत्रजातंतत्सात्विकंसुखम् ३७ ॥ ३७ ॥ ३७

वनमाली टीका ८

यदग्रेज्ञानवैराग्यध्यानसमाध्यारम्भेत्यायासनिर्वाह्यत्वाद्विषमि
वदेहवशिषादिवद्दुःखमिवभवतिपरिणामेज्ञानवैराग्यादिपरिपा
केत्वमृतोपमंप्रीत्यतिशयास्पदंभवति आत्मनोविषयः प्रसाद
नं उक्तःप्रसादोनिद्रालस्यादिराहित्येनसत्त्वकृतयावस्थानेनतज्जा
नमात्मबुद्धिप्रसादजं नतुराजसमिवविषयेंद्रियसंयोगजंनवाता
मसमिवनिद्रालस्यादिजं ३७ ॥

ऊसमवैजयंती टीका ९

किंचयत्तदिति यत्सुखंतदग्रेसत्त्वस्यप्रथमेयोगारंभसमयेपर्यंतः
विषमिववाह्येंद्रियदमनोत्तमकरणसंयमादिरूपबहुक्लेशसाध्य
त्वाद्विविक्तरूपानुभवाभावाच्चनिःस्वभवत्वणवदतिशयदुःखाव
हमिवभवति परिणामेयोगपरिपाकरूपसमाधिसमयेत्वमृ
तोपमंयोगाभ्यासबलेनाखिलेंद्रियवोधवल्याद्विविक्तात्माविर्भा
वपीयूषप्रवाहनिपातमिवभवतियच्चात्मबुद्धिप्रसादजंआत्मसंब
धिनीबुद्धिरात्मबुद्धिः तस्याः प्रसादःनिर्मलात्मनरागादिलविषयत्व
पकलत्वस्मात्ज्ञानतत्सात्विकंसात्विकंसत्वगुणकृतंप्रोक्तंशास्त्रैरि
तिशेषः ३७ ॥ ॥

मधुसूदनी टीका १०

+तदेवविवृणोति ॥

+यदग्रेज्ञानवैराग्यध्यानसमाध्यारंभेऽत्यंतायासनिर्वाह्यत्वाद्विष
मिवदुःखविशेषावहंभवति परिणामेज्ञानवैराग्यादिपरिपाके
त्वमृतोपमंप्रीत्यतिशयास्पदंभवति आत्मविषयाबुद्धिरात्मबु
द्धिस्तस्याः प्रसादोनिद्रालस्यादिराहित्येनस्वच्छतयावस्थानंततो
जातमात्मबुद्धिप्रसादजं नतुराजसमिवविषयेंद्रियसंयोगजंनवा
तामसमिवनिद्रालस्यादिजं ईदृशंयदनात्मबुद्धिनिष्ठात्मबुद्धि।
प्रसादजंसमाधिसुखंतेनतत्सात्विकंप्रोक्तं योगिभिः अपरस्याह्लादप्रमा
साहाय्येर्यत्ररमते प्रीयतेयत्रचदुःखावसानंप्रशमोनितंतत्सुखेन
चत्रिविधगुणभेदेनश्रीविवृतिमत् यदग्रेत्याद्यर्थश्लोक
स्यान्वयः यत्तदग्रइत्यादिश्लोकेनतुसात्विकसुखलक्षणमिति
भाष्यकाराभिप्रायोप्येवं ३७ ॥

सदानंदी टीका ११

तदेवविवृणोतीशः स्वविबलप्रसादजं ज्ञानवैराग्यध्यानस
माध्यारंभप्रवयत् १ अत्यंतायाससाध्यत्वाद्विषवद्दुःखकमेवे
नेति १ अत्यंतायाससाध्यत्वात् प्रीतेरतिशयास्पदं २ निद्रालस्यादिरा
न् ज्ञानादिपरिपाकेनप्रीतेरतिशयास्पदं २ निद्रालस्यादिरा
हित्यात्बुद्धिर्यास्वच्छतांगता तस्याआत्मावलंबिन्याः प्रसादाज्जात
मेतत् ३ तत्समाधिसुखंप्रोक्तंसात्विकंयोगवित्तमैः ४॥ ३७ ॥

नीलकंठी टीका १२

यत्तत्सुखमिहसर्वशास्त्रप्रसिद्धं अग्रेसमारंभकालेमनःप्राणेंद्रियसंवदनिरोधेनयत्नेसंतप्यमानस्यपशोरिवजायमाने विष
मिवातितीव्रवेदनाकरं परिणामेसात्विकाभ्यासनिरुद्धासुमन
सांअमृतोपमंअमृतवदाह्लादकरं आत्मनःस्वस्येवबुद्धेः
प्रसादोनैर्मल्यंराजसतमोमलराहित्यं तस्मादाविर्भूतंनतुविषय
संगजंनिद्रालस्यादिजंवातत्सुखंसात्विकंप्रोक्तं ३७ ॥

आनंदीटीका ११

अभ्यासाद्यत्ररमते नतुविषयसुखवदभ्यासात्सहिजनेतेदुःखसं
तमोहंचनियच्छतिददाति तदात्वेसाधनावस्थायांविषमिवेंद्रिया
णांनिरोधेक्लेशावहत्वात् आत्मबुद्धिःपरमात्मविषयंज्ञानंतस्यानैर्मल्य
तज्जातम् ३७ ॥

श्री॰
गी॰टी॰
अ॰

159

अतः सर्वज्ञः खानामन्तो यच्च सत्वं तदात्वे साध्यसानावस्था
यां चित्तसमाधानविशेषाधानलक्षणं क्लेशयत्नरूपत्वाद्विषव
त्परिणामे तु सिद्धावस्थायाममृतोपमं निरुपमास्वादमि
त्यर्थः वा यत्सुखं स्वेन देवविविपरीतेव दृश्यति नेदं तद्धि सुखं
निरतिशयनिरूपमास्वादरूपसमाधिप्रज्ञाप्रभवं योगविष
यं सुखमुपादेयम् ॥ ३७ ॥

लासिकी टीका

यत्तदिति किमप्यनिर्वाच्यं अग्रे अभ्यासकाले विषमिव दुःस
ह जन्मशताभ्यस्तदेहाहंभाववासनाया दुष्परिहरत्वात्
परिणामे पर्यंते योगस्य संसिद्धावमृतोपमं निरुपमास्वाद
एवं सामान्येनोक्ता विशेषतो निर्दिशति आत्मबुद्धिप्रसाद
नमिति आत्मनः परतत्वस्य बुद्धेः सम्यग्बोधस्य वैशद्या
जातं एवंविधं यत्सुखमानंदस्तत्सात्विकमुपदिष्टं
३७

पंचोलीटीका

तत्र सात्विकसुखमाह यदिति तत्त्रिविधसुखमध्ये यत्सुखम
ग्रे प्रथमसन्निपाते विषमिव दुःखसाध्यमपि परिणामे ता
नैवैराग्यादिपरिपाकजं सुखममृतोपमं तत्सुखं सात्विकं आ
त्मना बुद्धिस्तस्याः प्रसादो नैर्मल्यं तस्माज्जातं तत् अथवा आत्म
विषया बुद्धिः आत्मबुद्धिस्तस्याः प्रकर्षः तस्माज्जातं ३७

रत्नावीर समिद्धोधिनी

यत्र सुखं तत्किमप्यनिर्वाच्यं प्रारंभे विषयतुल्यं मनःकरणसंय
माधीनत्वात् परिणामे सिद्धावस्थायाममृतसदृशं तत्सात्विकं
सुखं विद्याज्जानीयात् कीदृशं तत् आत्मबुद्धिप्रसादजं आत्माय
त्तत्वहि विषयाप्यात्मबुद्धिर्निश्चयस्तस्याः प्रसादो रागद्वेषादिकालुष्य
राहित्यं तस्माज्जातमित्यर्थः आत्मनो बुद्धिः प्रतीतिर्वै तेषा मा

त्मीयानां बांधवानामपियः प्रकृष्टोधर्मोनुसारी माद्रोहिंसातत्तो
जातमितिवार्थः ३०॥

मधुभाष्य

३०॥

भाषा अनुवाद ॥

और वह सुख कैसा है इस पर कहते हैं कि जो सुख प्रथम करिके प्र

थ विष के तुल्य है औ अन्तको अमृत समान होता है वह सुख

सात्विक है और आत्मा तथा बुद्धि की प्रसन्नतासे उत्पन्न है अर्था

त् मल रूप रजोगुण तमोगुण तिन को सतोगुण दूर करै है तब

वह सुख प्रगटै है ३७ ॥

दोहा

विषसदृश जो प्रथम है अंत सुधासम सोय तिहसुख सा

त्विक जानीय आत्ममति सें होय ३७ ॥

160

विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमं परि
णामे विषमिव तत्सुखं राजसं स्मृतम् ३८

शांकरभाष्य टीका १

विषयेति विषयेंद्रियसंयोगाद्यत्तत्सुखं जायते प्रथमं प्रथमक्षणे
ऽमृतोपमममृतसमं परिणामे विषमिव बलवीर्यरूपप्रज्ञामेधाध
नोत्साहहानिहेतुत्वादधर्मतज्जनितनरकादिहेतुत्वाच्च परिणा
मे तदुपभोगविपरिणामांते विषमिव तत्सुखं राजसं स्मृतं ३८ ॥

आनंदगिरिटीका २

राजसं सुखं हेयत्वाय कथयति विषयेति बले सेनातसामर्थ्ये वी
र्यं पराक्रमः कृते यशोरूपं शरीरसौंदर्यं प्रज्ञा कृतार्थग्रहणसाम
र्थ्यं मेधा गृहीतार्थस्याविस्मरणेन धारणशक्तिः धने गोहिरण्या
दि उत्साहः कार्ये प्रत्युपक्रमादिः एतेषां नाशकत्वाद्धेयत्वमेके व
वि विषसममित्यर्थः तच्चैव हेतुत्वमाह प्रथमेति ३८ ॥

राजसं सुख माह

स्वामिकृत टीका ३

विषयेंद्रियेति विषयाणामिंद्रियैः सह संयोगाद्यत्तत्प्रसिद्धं स्त्रीसं
गादिसुखममृततुल्यमायासनाशकं भवति अग्रे प्रथमं परिणामे
विषतुल्यमिहामुत्र च दुःखहेतुत्वात् तत्सुखं राजसं स्मृतं ३८ ॥

पिशाचभाष्य टीका ४

विषयेंद्रियसंयोगात् श्रोत्रादीनां शब्दादिभिः संयोगाद्यत्सुखं यदग्रे
ऽमृतोपमं परिणामे कालांतरे विषमिव तद्राजसं ३८ ॥

रामानुजभाष्य टीका ५

विषयेति अग्रे अनुभववेलायां विषयेंद्रियसंयोगाद्यत्तदमृतमिव
भवति परिणामे विपाके विषयाणां सुखत्वेनानिमित्तत्वाद्दुःखत्वादौ ति
हेतुत्वेन स्वस्वसुखस्य निरयादिनिमित्तत्वाद्विषमिव पीतं भवति तत्सुखं
राजसं स्मृतं ३८ ॥ अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ३८ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्री. गी टी. प्र

161

परमार्थप्रपादी टीका ७

राजसमाह विषयेति यदग्रइति अग्रेप्रारंभे अमृतोपममतः प्रत्नवडिशामिषवत् तत्सुखं राजसम् ३८ ॥

वनमाली टीका ८

विषयाणामिंद्रियाणांच संयोगाज्जातं नत्वात्मबुद्धिप्रसादात् यत्तदनिप्रसिद्धं सुखं चंदनवनितासंगादिसुखं अग्रेप्रथमारंभे मनः संयमादिक्लेशाभावादमृतोपमं परिणामे चैहिकपारत्रिकदुःखावहत्वाद्विषमिव तत्सुखं राजसंस्मृतं ३८ ॥

उत्तमवैजयंती टीका ९

राजसं सुखमाह विषयेंद्रियेति यत्सुखमग्रे आत्मानुभवसमये विषयेंद्रियसंयोगात् विषयैस्तरुणीरूपस्पर्शादिभिः सहेंद्रियाणां त्वक्चक्षुरादीनां संयोगात्स्वव्याप्तमृतोपममनमृतमिवानिस्वादु विषयाणां सुखं निमित्तत्वात्परिणामे तेन विषमिव विषयसुखस्य नरकहेतुत्वाद्दतिदुःखावहं भवति ईदृशं सुखं राजसं रजोगुणप्रवर्तकं स्वर्गनेकर्ममित्यादिविहितरीतिशेषः ३८ ॥

मधुसूदनी टीका १०

विषयाणामिंद्रियाणांच संयोगाज्जातं नत्वात्मबुद्धिप्रसादात् यत्तदनिप्रसिद्धं सुखं चंदनवनितासंगादिसुखं अग्रेप्रथमारंभे मनःसंयमादिक्लेशाभावादमृतोपमं परिणामे चैहिकपारत्रिकदुःखावहत्वाद्विषमिव तत्सुखं राजसंस्मृतं ३८ ॥

सदानंदी टीका ११

विषयेंद्रियसंयोगात् यत्सुखं प्रसिद्धिमत् स्त्रक्चंदनस्त्रीसंगादिसुखमात्मप्रमेयत्वात् १ धीसंयमादिसक्लेशाभावादमृतवत्स्वादं परिणामेत्वइःखमनामाकरत्वाद्विषोपमं २ इहामुत्रापि नरकारजननत्वात्तःसदा संसरति प्रमदरेनेच तत्सुखंराजसमीरितं ३ ३८ ॥

नीलकंठी टीका १२

राजसं सुखमाह विषयेति अग्रे भोगकाले परिणामे विष
मिव वियोगकाले इहामुत्र च दुःखप्रदत्वात् ३८ ॥

आनंदी टीका १५

परिणामे सिद्धावस्थायां विषमिव पुनः पुनः संसरणहेतुत्वेना
न्तदुःखदायित्वात् ३८ ॥

रामकंठीटीका १४

अथ राजसम् तद्राजसं रजोगुणसंभवं सुखं किं तद्यद्विषयेन वि
षयेणानित्येन शब्दादिनेंद्रियस्य श्रोत्रादेः संयोगात्संवेद्य
नदात्वे साध्यमानावस्थायाममृतोपमं क्षणमात्रमास्वादवि
शेषहेतुत्वात्सुधारसतुल्यं परिणामे सिद्धावस्थायां विषो
पमं तत्कालमेव देहपातात् यदि वानुभूयमानावस्था तदात्व
नदा विषयेंद्रियसंयोगजं सुखं सर्वं मधुरमेव परिणामे तु
नहि पाकावस्था तस्मिन्सर्वमेव विषयसुखं परिणामे किंचि
द्भवितुमर्हति यतो दुःखकारणं रजोगुणत्वाद्दुःखैकफलं
सुखं हेयमेव ३८ ॥

लासिकी [illegible] टीका

+राजसं सुखमाह ॥

+विषयाणां शब्दादीनामिंद्रियाणां श्रोत्रादीनां च संयोगात्सं
वेद्यायत्तत्सुखमिदं स्त्रीसंगादिसुखं अग्रे उपभोगवेलायां सु
धारसतुल्यं परिणामे पर्यंते उपभोगाभावे विषमिव । पा
स्थानापायनं तद्दुःखहेतुत्वात् तत्सुखं राजसं स्मृतं [illegible]
[illegible] ३८

पंचोलीटीका

राजसं सुखमाह विषयेति यत्सुखं विषयेंद्रियसंयोगाज्जाय
मानं अग्रे प्रथमतोऽमृतोपमं अमृतसमानं परिणामे तदुप
भोगांते बलवीर्यरूपप्रज्ञामेधाधनोत्साहहानिहेतुत्वात् प्रथमं
तनिलोकनरकादिहेतुत्वाच्च परिणामे विषमिव तत्सुखं राजसं ३८

राजसं सुखमाह विषयेति विषयाणां रूपादीनामिंद्रियैश्चक्षुरादिभिर्यः संयोगः सन्निकर्षस्तस्मादुत्पन्नं यत्स्त्रीसंगादिकं सुखं तद्राजसं कीदृशं तदग्रे नुभूयमानावस्थायाममृतोपमं क्षणमात्रमास्वादविशदत्वात्तथा परिणामे विपाकावस्थायां विषयतुल्यं तत्कालमेव द्वेष्यत्वादिहामुत्र च दुःखैककारणत्वाच्चेत्यर्थः ३८॥

मधुभाष्य

३८॥

भाषा अनुवाद ॥

अब राजस सुख कहते है कि विषय वासना सहित इंद्रियों के संयोग से जो प्रिय संगम आदि सुख होता है और पहले तो अमृत तुल्य लगता है औ अन्त को दुख दाई है जैसे विष समान होता सोई सुख राजस है ३८ ॥

दोहा

विषय इंद्रिय संयोग सें आदहु यथा सम होय अंत हि में विष सदृश राजस कहिय सोय ३८ ॥

163

यदग्रेचानुबंधेचसुखंमोहनमात्मनः
निद्रालस्यप्रमादोत्थंतत्तामसमुदाहृतं ३९

शांकरभाष्य टीका १

यदग्रे चेति यदग्रे चानुबंधे चावसानोत्तरकाले च सुखं मोहकर
मात्मनो निद्रालस्यप्रमादोत्थं निद्रा चालस्यश्च प्रमादश्च तेभ्यः सम
लिष्ठतीति निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं ३९ ॥१२

आनंदगिरिकृत टीका २

तामसं सुखं त्यागार्थमेवोदाहरति यदग्रे चेति अनुबंधशब्दार्थमा
ह अवसानेति मोहनं मोहकरं तदुत्पत्तिहेतुमाह निद्रेति ३९ ॥

स्वामिकृत टीका ३

तामसं सुखमाह यदग्र इति अग्रे प्रथमक्षणे अनुबंधे च पश्चात्
अपि यत्सुखमात्मनो मोहकारणं तदेवाह निद्रा च आलस्यं च प्र
मादश्च कर्तव्यार्थविधानरा हित्येन मनोराज्यमेतेभ्य उत्तिष्ठति य
त्सुखं तत्तामसमुदाहृतं ३९ ॥

पिशाचभाष्य टीका ४

यदग्रे अवसाने च मोहनकरं निद्रालस्यप्रमादोत्थं तत्तामसं सुखं ३९

रामानुजभाष्य टीका ५

यदिति यत्सुखमग्रे चानुबंधे चानुभववेलायां विपाके चात्मनो
मोहनं भवति मोहोऽत्र यथावस्थितवस्त्वप्रकाशोऽभिप्रेतः निद्रा
लस्यप्रमादोत्थं निद्रालस्यप्रमादजनिते निद्रादयो ह्यनुभववे
लायामपि मोहहेतवः निद्रायां मोहहेतुत्वं स्पष्टं आलस्यं इ
न्द्रियव्यापारमांद्यं [illegible] तत्र ज्ञानमांद्यं भवति
भवत्येव प्रमादः कृत्यानवधारणरूप इति तत्र ज्ञानमांद्यं भवति
ततस्तयोरपि मोहहेतुत्वं तत्सुखं तामसमुदाहृतं अतो मुमुक्षुणा
गुणत्रयात्मनः सत्त्वमेवोपादेयमित्युक्तं भवति ३९ ॥

अभिनवगुप्तकृत टीका ६ ॥ ॥ ॥ ॥

महार्थे ३९ ॥ ॥ ॥ ॥

श्री· गी· टी· अ

164

+ तामसमाह यदग्रइति अग्रेप्रथमक्षणेऽनुबंधेऽनेनेत्यनुबंधःपरिणामः तस्मिंश्चात्म
+ नोंतःकरणस्यमोहनंव्यामोहकं तस्यावस्थानियममाह ॥

परमार्थप्रपारी टीका ७

+ निद्रालस्यप्रमादेनवृथानतानिद्रायासुखमित्सुखं प्र
+ विषयभोगसुखंवा आलस्येऽगविमर्दोज्वप्रमादउक्तनावि
स्यानवोमत्त्रेयत्सुखंतत्तामसमुदाहृतं उदाहरणेवनतिरूपितं ३९

वनमाली टीका ८

अग्रेप्रथमारंभेचानुबंधेपरिणामेचयत्सुखमात्मनोमोहक
रंनिद्रालस्यप्रसिद्धप्रमादः कर्तव्यार्थावधानेविनामनोराज्य
मात्रेतेभ्यएवोत्तिष्ठतिनतुसात्विकमिवबुद्धिप्रसादजंनवाराज
समिवविषयेंद्रियसंयोगजंनिद्रालस्यप्रमादोत्थंतामसंसुख
मुदाहृतम् ३९ ॥

ऊसमवैजयंती टीका ९

तामसंसुखमाह यदग्रेचेतियत्सुखमग्रेऽनुभवसमयेचपुनर
नुबंधेपश्चाद्विपाकसमयेचापिआत्मनोजीवस्यमोहनंवस्तुया
थात्म्यावरकंयच्चभवनेनिद्रालस्यप्रमादोत्थंनिद्रेंद्रियफल
रूपा आलस्यमिंद्रियव्यापारमांद्यंप्रमादः कार्याकार्यावधा
नाभावःनिद्रादिभ्यउत्थितेजातेनिद्रादीनामप्यनुभवकालेमो
हहेतुत्वात् ईदृशंसुखंतामसंतमोगुणजत्वमुदाहृतंविदुः ३९

मधुसूदनी टीका १०

अग्रेप्रथमारंभेचानुबंधेपरिणामेचयत् सुखमात्मनोमोह
करंनिद्रालस्यप्रसिद्धप्रमादः कर्तव्यार्थावधानमनर्थेणमनो
राज्यमात्रेतेभ्यएवोत्तिष्ठतिनतुसात्विकमिवबुद्धिप्रसादजंनवारा
जसमिवविषयेंद्रियसंयोगजंतन्निद्रालस्यप्रमादोत्थंतामसं
सुखमुदाहृतं [illegible] ३९ ॥

सदानंदी टीका ११

आपदतोतत्यापश्चात्परिणामेपियत्सुखं अविवेककरंस्वप्नि
द्रादिभ्यःसमुत्थितं १ अग्रेतानस्थिहेतवानन्तसुखंतामसंस्मृतं २ ३९

नीलकंठी टीका १२

अग्रेआरंभे अनुबंधेपरिणामे मोहनं मोहकरं आत्मनो बुद्धेः यतो
निद्रादिजं ३९ ॥

आनंदीटीका १६ आत्मनोमोहनंविपरीतत्ता

अग्रेसाध्यावस्थायां अनुबंधेपरिणामे आत्मनोमोहनंविपरीत

ननकम् ३९ ॥

रामकंटीटीका १४ किंतयदग्रेःनुभूय

तथातामसं तत्तामसंतमोगुणनिमित्तकंसुखंवेबुद्धागृहीतं

मानावस्थायांचानुबंधेचपरिणामवेलायांसुखंमोहिनिद्राप्रमादादि

मोहनंवैचित्र्यकारि यतोनिद्रादिप्रभवंतमसोहिनिद्रावस्थाःलस्यमदा

कार्यं तत्रनिद्रासर्वेन्द्रियव्यापारोपरमोमोहावस्थानानुभूयमानान्यपिमा

दः प्रमादःकार्येष्वनवहिततमेतानिह्यनुभूयमानान्येव तेषांतत्ता

त्मकानिपरिणामदशायामान्यपिमोहकान्येव तल्लेसुखं

दिफलंभवत्यज्ञानहेतुकतमोगुणजत्वादेतदज्ञानफलंसुखं भावा

मत्यन्तहेयमेव (एवंज्ञानादीनांसात्विकानांकेषांचिदेवभावा

नामाधानांविवक्षयात्रैविध्यमुक्तासर्वत्रसर्वप्रमाणविषयाणांस

र्वभावानांसात्विकादिभेदेनत्रैविध्यंप्रवस्थितमितिसंग्रहेणशति पाद

थितमाह ३९ ॥

लासिकी [illegible]टीका

नामसंसुख माह– निद्रायाइंद्रियव्यापारेपरमादालस्यात्प्रमादादवधानाभावात्जा यते विस्मृतिका

तमग्रेआदावपि अनुबंधेपश्चादपि आत्मनोमोहनं [illegible]

रणंयत्सुखंतत्तामसमुदाहृतं [illegible]

[illegible] ३९

पंवोलीटीका

नामसंसुखमाह यदिति यत्सुखमग्रेप्रथमतः अनुबंधेपश्चादा

तोनरकालेचआत्मनोमोहकरंनिद्रालस्यप्रमादोत्थंनिद्रालस्य

प्रमादेभ्यः समुत्पन्नंतत्तामसमुदाहृतं ३९

तामससमाह यदेयेअति अग्रेननुभूयमानावस्थायामनुवंधेपरिणामाव
स्थायांचयत्सुखमात्मनोतःकरणस्यमोहनंवैचित्र्यकारितत्तामससु
खं तत्स्वरूपमाह निद्रेति सर्वेंद्रियव्यापारविरतिर्निद्रा आलस्यमप
टुत्वं प्रमादःकार्यवनवहितचित्तत्वं तेभ्योजातमित्यर्थः ३९॥

मधुभाष्य

३९॥

भाषा अनुवाद ॥

तामस सुख कहते हैं कि अग्रे कहे पहिले और अनुबन्ध कहे पीछे भी जो सुख मोहकारी विशेष से निद्रा औ आलस तथा प्रमाद कहे तिनकी असावधानी औ मनकी जड़ता से जो सुख होय है सोई तामस सुखहै ३९ ॥

दोहा

आदिअंतमें जाहिसें आत्ममोहन होय निद्राआलस प्रमा
द जन तामस सुख है सोय ३९

166

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः स
त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ४०

शांकरभाष्यटीका १

अथेदानीं प्रकरणोपसंहारार्थः श्लोक आरभ्यते नेति न तदस्ति त
न्नास्ति पृथिव्यां वा मनुष्यादिषु वा प्राणिजातमन्यद्वाऽप्राणिजातं
दिवि देवेषु वा पुनः सत्वं प्रकृतिजैः प्रकृतितो जातैरेभिस्त्रिभिर्गुणैः
सत्वादिभिर्मुक्तं परित्यक्तं यत् स्याद्वैवन्न तदस्तीति सर्वेण संबंधः
सर्वः संसारः क्रियाकारकफललक्षणः सत्वरजस्तमोगुणात्मकोऽ
विद्यापरिकल्पितः समूलोऽनर्थ उक्तः वृक्षरूपकपरिकल्पनतया
चोर्ध्वमूलमित्यादिना तं चासंगशस्त्रेण दृढेन छित्वा ततः पदं
तत्परिमार्गितव्यमिति चोक्तं तत्र च सर्वस्य त्रिगुणात्मकत्वात् संसार
कारणनिवृत्त्यनुपपत्तौ प्राप्तायां यथा तन्निवृत्तिः स्यात्तथा वक्तव्यः सर्व
श्च गीताशास्त्रार्थ उपसंहर्तव्य एतावानेव च सर्वो वेदस्मृत्यर्थश्च ४०

आनंदगिरिकृतटीका २

क्रियाकारकफलात्मनः संसारस्य प्रत्येकं सात्विकादिभेदेन त्रैविध्य
मुक्त्वा संसारान्तर्भूतमेव किंचित् गुणत्रयास्पृष्टमपि कश्चिदवि
ष्यतीत्याशंक्याह प्रत्येति संसारस्य सर्वस्यैव गुणत्रयसंस्पृष्टत्वे प्रकरणोप
संहाः प्राणिमात्राप्राणिशब्देन प्रसिद्ध्या स्थावरादि गृह्यन्ते प्रकरणा
र्थमुपसंहृतमनुवदति सर्वः इति तस्यानेकात्मकत्वेन हेयत्वं सूचयति
क्रियेति निर्गुणादात्मनो वैलक्षण्याच्च तस्य हेयतेत्याह सत्वेति प्रत्य
त्वाच्च तस्य न्याय्यमनर्थत्वं चाविद्याकल्पितत्वेनावस्तुत्वादित्याह अ
विद्येति न केवलमष्टादशे संसारो दर्शितः किंतु पंचदशेऽपीत्याह वृक्षे
ति चकारात् सर्वः संसारः इत्यनूद्यते संसारश्छित्वा साधने सम्यक्कृ
तानेव नैवेत्याक्षिप्याह प्रसंगेति हत्वमनूद्यानन्तरसंदर्भेनापर्यमा
ह न तच्चेति उक्तोऽविनिवर्तयिषितः संसारः सति तमस्या परामृश्यते स
वीति संसारो गुणत्रयात्मको न च गुणानां प्रकृत्यात्मकानां संसारकार
णीभूतानां निवृत्तिरेका प्रकृतेर्नित्यत्वादित्याशंकायां स्वधर्मीन
ज्ञानानामन्वतानां त्रिगुणानामनात्मकानां निवृत्तिर्यथा भवति त

श्री. गी. टी.

167

या स्वरूपमिजाते वक्तव्यमिति सुतरां श्रेयःप्रवृत्तिरित्यर्थः ननु हरीणप्रवृ
त्तयस्मिन्जाते तत्त्वपदेशे चोपसंहारप्रकरणस्य कोपः स्यादित्याह सर्व
मिति उपसंहारे गीताशास्त्रार्थे यद्यपि तत्तोवेदार्थैः स्वस्वधर्मैश्च सर्वत्र
उपसंहारस्तथापि सत्वादिभिरन्वेषणमस्ति वक्तव्यमवशिष्टमित्याश
ङ्काह एतावानिति सत्वेनैव परिमाणानि हीयमाणा वक्तृकशोकानिवर्तनं
शास्त्रार्थोपसंहारश्चैतेन इश्यैवकारार्थः ४० ॥

स्वामिकृत टीका ३

प्रकृतमपि संग्रहेन प्रकरणार्थमुपसंहरति न तदस्तीति एभिः प्र
कृतिसंभवैः सत्वादिभिस्त्रिभिर्गुणैर्मुक्तं हीनं सत्वं प्राणिजातं मनु
ष्यस्थानं पृथिव्यां मनुष्यलोकादिषु दिवि देवेषु वक्वापि नास्तीत्यर्थः
४० ॥

पिशाचभाष्य टीका ४

न तदस्ति पृथिव्यां वा दिवि अंतरिक्षे देवेषु देवैरिंद्रियादिभिः एभि
स्त्रिभिर्गुणैर्मुक्तं तैः एभिः प्रकृतिजैर्गुणैः सत्वरजस्तमोभिः विनाय
स्मात्सर्वं सत्ववस्तुजातं सत्वरजस्तमोगुणमयमेवेत्यर्थः ४० ॥

रामानुजभाष्य टीका ५

न तदस्तीति पृथिव्यां मनुष्यादिषु दिवि देवेषु वा ब्रह्मादिस्थावरान्तेषु
... प्रकृतिजैरेभिस्त्रिभि
र्गुणैर्मुक्तं सत्वं प्राणिजातं न तदस्ति त्यागेनैकेषु ...
दिषु मोक्षसाधनतया निर्दिष्टस्त्यागः संन्यासशब्दार्थः ननु दम्यः सुच
त्यागश्च परमपुरुषकर्तृत्वानुसंधानेनैव कर्तृत्व फलकर्मणां त्यागः कर्तृत्वा
दिकार्यमिति सत्वोपादेयता तापना परं सत्वरजस्तमसां कार्यभेदः प्र
पंचितः इदानीमेवं भूतस्य मोक्षसाधनतया क्रियमाणस्य कर्मणः
परमपुरुषाराधनोपदेशेन तस्यानुष्ठानस्य कर्मणस्तत्प्राप्तिलक्ष
णफलं प्रतिपादयितुं ब्राह्मणादीनामधिकारिणां स्वभावानुबंधिसत्वा
दिगुणभेदभिन्नं वृत्त्यादिकं नियतकर्मस्वरूपमाह ४० ॥

अभिनवगुप्तकृत टीका ६

बुद्धिर्निश्चयः धृतिः सन्तोषः सर्वो हि सत्कृतेन दुःकृतेन वा कृतान्तेन ध्रुव
कालेन कारणीयः किमनेनेति निश्चयेन ... तिष्ठत्यम्या क्रियाभ्यो ...

कोहेतुः स्यात् अतः सर्वस्यैवप्रवृत्तिरस्तीतितात्पर्यार्थः पदार्थ
स्त्वभिहितोव्याख्यायतेएव अयथावदसम्यक् मनःप्राणेन्द्रियक्रि
यायोगेनधारयति यथाकिंनमोपभोगादिभिः सर्वथैवात्मारा
मोभूयासमितिमन्वानः प्रसंगेनेतिनतयाभिनिवेशेन निद्रा
कलहादिषेवयथासंतोषंवभातितमरतयासातामसीधृतिः
तदात्वेभ्यासकालेविषमिवजन्मशताभ्यस्तविषयसंगसङ्गः
परिहरत्वात् उक्तंचक्षुरस्यधाराविषमादुरत्ययेमादिश्रा
त्मप्रसादाद्बुद्धिप्रसादोजायतेपरमस्यापेक्ष्यमाणस्याभावात्तवि
षयेन्द्रियाणांपरस्परसंयोगजंस्वयंचदुःखप्रवृत्तिरूपसंवेयात्
निद्रातन्द्रालस्येनशठतयाप्रमादेनस्वव्याख्यातेनयन्नावितना
मसंपर्वंकर्तृकर्मकारणानांबुद्धिधृत्योः स्वरूपस्वसत्वादिभे
दभिन्नानांपरस्परांगांगीभावबाध्यबाधकत्वसमञ्जसयाहृतिक
मयोगयथादियोगादपरिसंख्येयभेदत्वाद्धिविधफलप्रसव
समर्थत्वमितिमनेनकर्मणांप्राकृतत्वितेगाहृतत्वंवितत्यसहे
तुकेनिर्गुणे सर्वंचैनेदेवतादिस्थावरान्तागुणत्रयमेवेयता
निकामेति उक्तंहि आब्रह्मभुवनाल्लोकाःपुनरावर्तिनोऽर्जुनेति
नि तत्वतोहिसत्वादिगुणातिक्रांतमनसोनेतरस्यात्पाशयः पव
मियत्ताषट्सप्तकेचित्स्वरूपत्वंश्रुत्यादीनांचप्रतिपादितंतत्मा
त्यात्माविकोगशेवर्तमानोदैवीसंपदंप्राप्तःश्रद्धानेयोगः वे
चनयाविधरत्नज्ञेतःप्रोक्तादितःश्रुत्युनात्विदमवधानेयदिना
वदनयातानतज्ञानकर्मणामवान्वर्तते तदास्वधर्मप्रवृत्त्याविन
ज्ञानस्ततयावतकर्मसंवेयस्तत्व अथैतस्मान्मनसेतदवस्थ
नवप्रवृत्यानाथव्यक्तंज्ञानेरेवतथाभावेस्थितत्वात् यतः सर्वः
स्वस्वभावनियतः कुतश्चिद्दोषातिरोहिततत्वभावकेवि
त्कालेभूत्वापितत्तिरोधायकविगमेस्वभावंयाक्तापत्तेर्लभन
एवं [illegible] ॥ ४० ॥
[illegible]
परमार्थप्रपाटीका
श्र्याद्यन्तक्रमपरिमेरत्नप्रकारणार्थमपसंहरति ततद्दलीति

श्री-
गी-टी-
प्र-

168

एभिः सत्त्वादिभिस्त्रिभिर्गुणैर्मुक्तं सत्त्वं प्राणिजातं तत्तादृशं पृथि
व्यां मनुष्येषु नास्ति दिवि देवेषु पि नास्ति यावत्कुरीरजातं तत् त्रि
गुणात्मकमेवास्तीत्यर्थः [illegible]
[illegible]
[illegible]
[illegible]
[illegible] ४० ॥

वनमाली टीका ८

इदानीमनुक्तमपि संगृह्णन् प्रकरणमुपसंहरति नेति सत्त्वा
दीनां साम्यावस्था प्रकृतिस्ततो जातैर्वैषम्यावस्थापन्नैः प्रकृ
तिजैर्न तमात्राद्गुणानां प्रकृतिजत्वमस्तित्वरूपत्वात् तस्मा
द्वैषम्यावस्थैव तद्गुणमतिप्रवादात् पृथिव्यां मनुष्यादिषु दि
वि देवेषु वा नास्ति कापि गुणत्रयरहितमात्मवस्तु नास्तीत्यर्थः
४० ॥

उत्तमवैजयन्ती टीका ९

उक्तार्थमुपसंहरन्ननुक्तं चापि संगृह्णन्नाह नतदस्तीति पृ
थिव्यामित्युपलक्षितेषु भूर्भुवस्स्वर्महर्जनतपस्सत्येषु देवेष्वि
पलक्षितेषु भूर्भुवस्स्वर्महर्जनसत्येषु देवेषु देवर्षिषु
[illegible]पर्यन्तेषु प्रकृतिसेरशेषु ब्रह्मादिस्तंबपर्यन्तेषु वि
नत्यर्थः तत्सत्त्वं प्राणिमात्रममस्ववस्तुमात्रं नास्ति यत्सत्त्वमेभिः प्र
कृतिजैः प्रकृतिजातैः त्रिभिः सत्त्वादिभिर्गुणैर्मुक्तं विरहितं तस्मा
त् अयंभावः सर्वेषु त्रिगुणात्मकेषु वस्तुषु सात्विकेषु सात्विक
त्वमेवेति अत्यन्तमार्गेनैकैकत्वमान सर्वेमिश्रीत्वमन्ययोस्त्वेवं यत्कन्वा
योयः क्रियमाणोऽपकर्मसुकर्तृत्वभोक्तृत्वममत्वादिष्कृतिप्रतिपा
फलकर्मणास्यागस्तु परमात्मकर्तृत्वानुसंधानरूपः प्रवर्त
स्यास्य प्रावार्थ्योनतदस्यइति ४० ॥

+ तलातलवितलसुतलतलातल रसातलपातालेषु लोकेषु मनुष्यादिशेषपर्यन्तेषु दिवीत्युपलक्षितेषु

+ इदानीमनुक्तमपि संगृह्णन् प्रकरणमुपसंहरति भगवान् ॥

मधुसूदनी टीका १०

+ सत्त्वं रजस्तम इति गुणानां साम्यावस्था प्रकृतिस्ततो जातैर्वैषम्यावस्थाप
न्नैः प्रकृतिजैर्नतमात्राद्गुणानां प्रकृतिजत्वमस्तित्वरूपत्वात्
तस्माद्वैषम्यावस्थैवतद्गुणमतिप्रवादात् अथवा प्रकृतिर्माया

सत्वरजस्तमसां साम्यावस्था प्रकृतिस्ततो जातैर्वैषम्यावस्थापन्नैः
प्रकृतिजैर्नतु साक्षाद्गुणानां प्रकृतिजत्वमस्ति तद्रूपत्वात् तस्मादे
वैषम्यावस्थैव तद्भावमतिरूपत्वात् अथवा प्रकृतिर्माया तत्प्रभवैस्त
त्कल्पितैः प्रकृतिजैरेभिस्त्रिभिर्गुणैः बंधनहेतुभिः सत्वादिभि
र्मुक्तं पृथिव्यां वा मनुष्या
केषु नेन सत्वं प्राणिजातमप्राणिवा यत्स्यात्पुनः
दिवि देवेषु वा नास्ति कापि गुणायैर्विरहितमनात्मवस्तु नास्ती
त्यर्थः (नेदं सत्वरजस्तमोगुणात्मकः क्रियाकारकफललक्षणः
सर्वः संसारो मिथ्याज्ञानकल्पितोऽनर्थस्सर्वदेशाध्यायोक्त उपसं
हृतः पूर्वदेशेचवृक्षरूपकल्पनया तस्मकाश्चप्रसंगमनेन विरूढ
मूलमसंगशस्त्रेण दृढेन छित्वा ततः पदं तत्परिमार्गितव्यमि
त्युक्तं तत्र च सर्वस्य त्रिगुणात्मकत्वात्संसारकारणत्वानुपपत्तिः
नेकरूपरमात्मानं व इष्ट इत्युक्तेन च सर्वस्य त्रिगुणात्मकत्वे विच्छेदोऽसंगशस्त्रेणैवा
त्रिगुणात्मकस्य संसारवृक्षस्य कथं छेदोऽसंगशस्त्रेणेति
तत्रयेनेति त्रिगुणात्मकस्य संसारवृक्षस्य तदधिकारविहितैर्वर्णाश्रमधर्मैः परितो
न्नपपत्तेरित्याशंकायां स्वस्वाधिकारविहितैर्वर्णाश्रमधर्मैः परितो
षमाणान् परमेश्वरादसंगशस्त्रलाभ इति वदन्ननेन तावानेवस
वेदार्थः परमपुरुषार्थी मिश्रश्चेदनुष्ठेय इति च गीताशास्त्रार्थ
उपसंहर्तव्य इत्येवमर्थमनन्तरं प्रकरणमारभ्यते तत्र चेदमुक्तं ४० ॥
सदानंदी टीका ॥
उपसंहरतीदानीं गुणा
प्रवृत्तकममपि संगृह्यावर्ष्यप्रकृतमीश्वरः उपसंहरतीदानीं गुणा
नीतोजगत्सृष्टिः १ प्रकृतिरीश्वरी माया तयैव परिकल्पितैः सत्वा
दिभिर्गुणैरेभिस्त्रिभिर्बंधनहेतुभिः २ हीनं सत्वं प्राणिजातं स्याद
प्राणस्थावरं यद्वा मनुष्यादिषु भूमौ वा देवेषु त्रिदिवे यद्वा ३ पाता
लेवाप्यकृत्रापि नास्त्येवेति विनिश्चितं गुणत्रयविहीनं हि नास्त्यनात्म
मयंजगत् ४ यतो मायाकृतं विश्वं त्रिगुणात्मकमेव हि ५ ॥ ४० ॥
नीलकंठी टीका ॥
प्रकरणार्थमुपसंहरन्नवक्तमपि संगृह्णन् न तदस्तीति सत्वं प्राणि
जातं इदं रूपलक्षणं जडस्यापि सर्वस्य त्रिगुणविकारत्वात् प्रकृतिजै
रनेकानेकोपर्मायर्मसंस्कारजैः मायाप्रभवैर्वाऽशेषं सत्वं ४० ॥

श्री॰
गी॰ टी॰
अ॰

169

आनंदीटीका १६

अत्रकर्मभूतानांत्रैविध्यंसंगृह्णाति ५॰ ॥

रामकंठीटीका १४

वृत्तार्थः श्लोकः किंतद्द्वीतिफलभूम्नोपलक्षणार्थं पृथिव्या मितिकर्मभूम्नोपलक्षणार्थं वेदितव्यं इदानीं षोडशभिरध्याये र्येवोक्तज्ञाननिष्ठतयाकर्मस्ववस्थापनाद्वैयत्वेनावगते तेषाम पवर्गफलत्वकारणभूतयोस्त्यागसंन्यासयोः प्रागुक्तयोः स म्यक्स्वरूपज्ञानेजानसन्देहमर्जुनेप्रति तयोस्तत्त्वप्रतिपादन प्रसंगेनत्यागिनांसंन्यासिनांचविविक्तस्वरूपाभिव्यंजकज्ञाना दीनांगुणभेदकृतंत्रैविध्यमभिधायाध्यायप्रक्रान्तंप्रकृतमर्थ मनुवदन्त्येषांकर्मणांफलत्यागमात्रेण सामान्यतः श्लोका नि विशेषतः पुनः कानीत्याकांक्षानिरासार्थं तत्स्वरूपप्रतिपा दनंप्रस्तौति ५॰ ॥

+तत्त्वाभ्यासाद्रमते यत्रेत्या दावात्मसमाधिजसुखादी नांसात्त्विकत्वेन निर्देशात्तु चितत्रात्मनो निर्गुणत्वादि त्याशंक्याह ॥

लाक्षिकी [illegible] टीका

+यत्तत्त्वंप्राणिमात्रेयोगिलक्षणमज्ञानिलक्षणंवा प्रकृतिजै रेभिस्त्रिभिः सत्त्वादिभिर्गुणैर्मुक्तं मत्र्येषु दिवि स्वर्गे लोके देवेषु वा पुनः अस्मिंल्लोके वा नास्त्येव अतो देहधार यतो हि योगिनोऽपि सत्त्वादिगुणानामनतिक्रमणा दात्मसमाधिजसुखं सात्त्विकतयैव निर्दिष्टं पूर्वं अन्यथा प्र त्यभिज्ञालक्षणज्ञानप्राप्त्यवसर एव प्राकृतस्य देहस्य पातप्र सक्तिः नैवं तस्मादेवमनुमीयते यथा यथात्मसमाधानस्या भ्यासेनोत्तरोत्तरमुत्कर्षः तथा तथा प्रकृतेः क्षीणत्वमुपजाय ते यावन्मुक्तिरुपपद्यते [illegible]

∨ त्यक्तमस्तीति संभा ^वेन तत्सत्त्वं पृथिव्यां

∨ यवर्णाश्रमोचितेन ^ स्वकर्मणा ईश्वराराधन

५॰

पंचोलीटीका

प्रकरणार्थमुपसंहरति नेति यस्त्वं दृष्टिवांमनुष्यादिभूतेजा
तेऽस्मन्महादिविसर्गे देवेषु मध्ये यद्सत्त्वं प्राणिजातं सत्त्वमेभिस्त्रि
भिर्गुणैर्मुक्तं गुणत्रयरहितं स्यान्नत्वास्ति ४०

रणवीरसमिद्धोधिनी

मनुक्तमपि संगृह्णन्प्रकरणार्थमुपसंहरति न तदस्तीति स्पष्टा
र्थोऽयं एतदंतेन च ग्रंथेन कर्मणां फलत्यागेनानुष्ठितानां भगवद्गी
मवश्यामिष्टं मिश्रं फलं न तु फलसंन्यसनं सात्विकानामेव नान्ये
षामित्यनन्तरमुपादानार्थं सर्वस्य वस्तुजातस्य त्रैविध्यमुक्तमिति प्र
करणार्थसंग्रहः ४० ॥

मधुभाष्य

४०॥

170

भाषा अनुवाद ॥

अब जो पूर्व अध्यायो मे कंही नंही कहा सो इस स्लोक से ले
तीन स्लोक से कहते है कि इन सतो गुण आदि प्रकृतिके ग
णों से रहित अर्थात् छूटा हुआ सत्व कहे प्राणीमात्र नहीं है अथ
वा और कोई वस्तु क्या पृथिवी मे मनुष्य आदि क्या स्वर्ग मे दे
वता आदिमे कोई भी नहीं है ४० ॥

दोहा

ब्राह्मण क्षत्रिय वैश्यके परंतप शूद्रहिकेहि कर्महुय
हु भिन्न भिन्न है स्वभावजन्यगुणसेंहि ४१ ॥ वस्तुन माहि
नाहे पृथिवी माहिं यह स्वर्गनहे सुरमाहि
कगुणनसें तिहु इनसें भिन आहि ४० ॥

171

ब्राह्मणक्षत्रियविशांशूद्राणांचपरंतप क
र्माणिप्रविभक्तानिस्वभावप्रभवैर्गुणैः ४१

शांकरभाष्यटीका १

ब्राह्मणक्षत्रियविशामि
प्रकृतार्थमिक्रियतेस्वनुष्ठेयश्चेत्येवमर्थं ब्राह्मणक्षत्रियविशाम्‌ विशश्च ब्रा
मादिरारभ्यते ब्राह्मणेति ब्राह्मणाश्च क्षत्रियाश्च विशश्च शूद्राणां च शूद्रा
णांब्राह्मणक्षत्रियविशांस्तेषां ब्राह्मणक्षत्रियविशा शूद्राणां च एकजातित्वे सति वेदेऽनधिकारात्‌ हेपर
णामसमासकरणमेकजातित्वे सति वेदेऽनधिकारात्‌ व्यवस्थापितानि के
नेष कर्माणि प्रविभक्तानीतरेतरविभागेन व्यवस्थापितानि केन त्रिगुणात्मिका
न स्वभावप्रभवैर्गुणैः स्वभाव ईश्वरस्य प्रकृतिः त्रिगुणात्मिका शमादीनि
मायासा प्रभवो येषां गुणानां ते स्वभावप्रभवास्तैः शमादीनि
कर्माणि प्रविभक्तानि ब्राह्मणादीनामथवा ब्राह्मणस्वभाव
स्य सत्त्वगुणप्रभवः कारणंतथा क्षत्रियस्वभावस्य सत्त्वोपस
र्जनं रजःप्रभवः वैश्यस्वभावस्य तमउपसर्जनं रजःप्रभवः
शूद्रस्वभावस्य रजउपसर्जनं तमःप्रभवः प्रशान्त्यैश्वर्येहाम्
ढस्वभावदर्शनाच्चतुर्णां अथवा जन्मान्तरकृतसंस्कारः प्रा
णिनां वर्तमानजन्मनि स्वकार्याभिमुखत्वेनाभिव्यक्तः स्वभा
वः सप्रभवोयेषां गुणानांतेस्वभावप्रभवागुणाः गुणप्रादुर्भाव
स्य निःकारणत्वानुपपत्तेः स्वभावः कारणमिति कारणविशे
षोपादानंएवं स्वभावप्रभवैः प्रकृतिप्रभवैः सत्त्वरजस्तमो
भिर्गुणैः स्वकार्यानुरूपेण शमादीनि कर्माणि प्रविभक्तानि ब्राह्मणादीनां
ननु शास्त्रप्रविभक्तानि शास्त्रेण विहितानि ब्राह्मणादीनां
शमादीनि कर्माणि कथमुच्यते सत्त्वादिगुणप्रविभक्तानीति
नैषदोषः शास्त्रेणापि ब्राह्मणादीनां सत्त्वादिगुणविशेषापेक्षये
व शमादीनि कर्माणि प्रविभक्तानि न गुणाननपेक्ष्येति शा
स्त्रप्रविभक्तान्यपि कर्माणि गुणप्रविभक्तानीत्युच्यते ४१ ॥

आनंदगिरिकृतटीका २

संकीर्णमिति स्वस्व
सम्मति वर्णाचतुष्टयस्य स्वनुष्ठेयधर्मजाते

श्री
गी टी
प्र

172

पनस्येति आप्नोतीति उपनयनसंस्कारवत्त्वेसति वेदाधिकारित्वे
समानमिति ब्राह्मणां समासकरणमिति शेषम समासे हेतुमाह शू
द्राणामिति एकजातित्वमुपनयनवर्जितत्वे कर्मणामसंकीर्णत्वे
न व्यवस्थापके प्रश्नपूर्वकं प्रकटयति केनेत्यादिना स्वभावप्रभवै
र्गुणैरित्यस्यार्थान्तरमाह अथवेति उक्तव्यवस्थायां कार्यदर्शने
प्रमाणयति प्रशंसतीति स्वभावशब्दस्यार्थान्तरमाह अथवेति
किमिति गुणाभिव्यक्तेरुक्तवासनाधीनत्वमत्राह गुणेति ननु ना
त्रिगुणप्रादुर्भावस्य निर्हेतुकत्वे प्रकृतिजैर्गुणैरिति प्रकृतेर्गुण
कारणत्वाभिधानात् न भ्रान्तस्वभावइति वासनाकारणमिति य
णात्मके निमित्तकारणत्वे विवक्षिते प्रकृतिस्तु उपादानमितिभा
वः उक्तमुपसंहरति एवमिति स्वभावप्रभवैः सत्वादिगुणैः शास्त्र
णादीनां कर्माणि प्रविभक्तानीत्यक्रमाद्विपत्ति नन्विति शास्त्र
स्य धर्मविभागहेतोः सत्वादिविशेषापेक्षयैव विभागस्यापक
त्वादुभयत्र विभागहेतुत्वोक्तिरविरुद्धेति परिहरति नैषदोषइति
४१ ॥

स्वामिकृत टीका ३

ननु च यद्येवं सर्वमपि क्रियाकारकफलादिकं प्राणिजातं च त्रि
गुणात्मकमेव कथं तर्हि मोक्ष इत्यपेक्षायां स्वस्वाधिकारविहितैः
कर्मभिः श्रीपरमेश्वराराधनात्तत्प्रसादलब्धज्ञानेन मोक्ष इत्येवं सर्वगीता
र्थसारं संग्रहेण दर्शयितुं प्रकरणान्तरमारभते ब्राह्मणेत्यादिना यावत्स।
माप्ति हे परंतप शूद्रानापन्न ब्राह्मणानां च क्षत्रियाणां विशां शूद्राणां
च कर्माणि प्रविभक्तानि प्रकर्षेण विभागतो विहितानि शूद्राणां स
मासात्पृथक्करणं द्विजत्वाभावेन वेदेनोपाधिभागोपलक्षणा
माह स्वभावः सात्विकादिः प्रभवति प्रादुर्भवति येभ्यस्तैर्गुणैरुपल
क्षणभूतैः यद्वा स्वभावः पूर्वजन्मसंस्कारस्तस्मात्प्रादुर्भूतैर्गु
णैः तत्र सत्वप्रधाना ब्राह्मणाः सत्वोपसर्जनरजःप्रधानाः क्षत्रियाः
तमउपसर्जनरजःप्रधाना वैश्याः रजउपसर्जनतमःप्रधानाः शूद्राः ४१

[illegible]भाष्य टीका ४

श्लो
ब्राह्मणाः क्षत्रियश्च विट् च ब्राह्मणक्षत्रियविशस्तेषां च शूद्राणां कर्मा

णानीति प्रविभक्तानि स्वभावः [illegible] प्रकृतिस्तज्जैर्वैसत्त्वरजस्त
मोभिर्गुणैः ॥ ४१ ॥

रामानुजभाष्यटीका ५

ब्राह्मणेति ब्राह्मणक्षत्रियविशांस्वकीयोभावः स्वभावः ब्राह्म
णजन्महेतुभूतं प्राचीनं कर्मेत्यर्थः तत्प्रभवाः सत्त्वादयो गुणाः
ब्राह्मणस्य स्वभावस्तु रजस्तमोभिभवेनोद्रिक्तः सत्त्वः क्षत्रियस्य स्व
भावप्रभवस्तु सत्त्वतमसोरभिभवेनोद्रिक्तो रजोगुणः वैश्यस्य।
स्वभावप्रभवस्तु सत्त्वरजोभिभवेनाल्पोद्रिक्तस्तमोगुणः शूद्रस्य स्व
भावप्रभवस्तु रजःसत्त्वाभिभवेनात्युद्रिक्तस्तमोगुणः एभिः स्वभावप्रभ
वैर्गुणैः सह प्रविभक्तानि कर्माणि शास्त्रैः प्रतिपादितानि ब्राह्मणा
दय एवंगुणकास्तेषां चैतानि कर्माणि वृत्तयश्चेति हि विभज्य
प्रतिपादयन्ति शास्त्राणि ॥ ४१ ॥

श्रीअभिनवगुप्तकृतटीका ६

तथाह्येवंविधो वर्णानां स्वभावः एवमव
गूढभाविन्याय हन्तीति ततः फलविभागिता

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्पष्टार्थम् ४१ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

+ यद्येवं प्राणिजातं त्रिगुणात्मकं तदास्य
+ कथं मोक्षस्तत्राह पञ्चभिः स्वस्वाधिका
रविहितैः कर्मभिः परमेश्वराराध
नया तज्ज्ञानेन मोक्ष इति सकल
गीतार्थसंग्रहं दर्शयितुं प्रकर
णान्तरमारभते ॥

+ ब्राह्मणेति हे परंतप शत्रुतापन ब्राह्मणादीनां च वर्णानां वर्णानां क।
+ ब्राह्मणेति हे परंतप शत्रुतापन ब्राह्मणादीनां विभागोपलक्ष
र्माणि प्रविभक्तानि प्रकर्षेण विभागतो विहितानि विभिन्न
णमाह स्वभावप्रभवैर्गुणैरिति स्वभावः सात्त्विकादिः प्रभवत्यर्थः
वति येभ्यस्तैर्गुणैरुपलक्षणम् तैः यद्वा स्वभावः पूर्वजन्मसंस्कार
स्तस्मात्प्रादुर्भूतैस्तत्र सत्त्वप्रधाना ब्राह्मणाः सत्त्वोपसर्जनरजःप्रधानाः
क्षत्रियाः तमउपसर्जनरजःप्रधाना वैश्याः रजउपसर्जनतमःप्र
धानाः शूद्राः तदुक्तं चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागश इति ४१

वनमाली टीका ८

स्वस्ववर्णोचितकर्मणाराधितपरमेश्वरप्रसादेनानादिकालप्रवृत्त।
संसारस्योच्छेदो भवतीत्ययमेव सर्वगीताशास्त्रार्थ इत्यभिप्रायेण वर्णा
नां धर्मान्संक्षेपतः प्रतिपादयितुमाह ब्राह्मणेति येषां समासकरणं द्विजत्वेन वे
दाध्ययनादितुल्यधर्मत्वकथनार्थं शूद्राणामिति पृथक्करणं वे
दानधिकारित्वज्ञापनार्थं ब्राह्मणानां स्वभावो मात्सर्यादि
कर्माणि निवेदनाधिकारित्वज्ञापनार्थं ब्राह्मणस्य स्वभावमाह

श्री
गी टी
श्री
173

हू राजन्यः कृतः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायतेति स्यात्तवि
शेषोस्त्वन्नाद्यानवि गायत्र्या ब्राह्मणमसृजत त्रिष्टुभा राजन्यं
जगत्या वैश्यं न केनचिच्छन्दसा शूद्रमसंस्कारो विज्ञायत इति श्रु
दस्य वेदाहिस्मनके शूद्रश्चतुर्थो वर्ण एकजातिरिति स्मृतेः हे
परंतप एवं वर्णानामपि वर्णानां कर्माणि प्रकर्षेण विभक्तानि कैः स्वप्रभवै
र्गुणैः ब्राह्मणादिस्वभावस्य प्रभवैर्हेतुभूतैः सत्वादिभिः ब्राह्मण
स्य सत्वगुणप्रभवः प्रशान्तत्वात् क्षत्रियस्वभावस्य सत्वोपसर्ज
नत्वात् वैश्यस्वभावस्य तमउपसर्जनेन रजईहास्वभावत्वात् शू
द्रस्वभावस्य रजउपसर्जनेन तमः मूढस्वभावत्वात् आह गौत
मः द्विजातीनामध्ययनमिज्या दानं ब्राह्मणस्याधिकाः प्रवचनया
जनप्रतिग्रहाः पूर्वेषु नियमस्तु राज्ञोधिकं रक्षणं सर्वभूतानां न्या
य्यदण्डत्वं वैश्यस्याधिकं कृषिवणिक्पाशुपाल्यं कुसीदं च शूद्रश्चतु
र्थो वर्ण एकजातिस्तस्यापि सत्यमक्रोधः शौचमाचमनार्थे पाणिपादप्रक्षाल
नमेवैके श्राद्धकर्म भृत्यभरणं स्वदारवृत्तिः परिचर्या चोत्तरेषामिति अ
साधारणाश्च साधारणाश्च धर्मा उक्ताः पूर्वेष्वध्ययनेज्यादानेषु नि
यमोवश्यकर्तव्यं न तु प्रवचनयाजनप्रतिग्रहेषु इत्यर्थस्त्वा
दित्यर्थः वणिक्वाणिज्यं कुसीदं वृद्ध्यैधनप्रयोगः उत्तरेषां श्रेष्ठा
नां द्विजातीनामित्यर्थः मनुरपि अध्यापनमध्ययनं यजनं याज
नं तथा दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् प्रजानां रक्षणं
दानमिज्याध्ययनमेव च विषयेष्वप्रसक्तिं च क्षत्रियस्य समादिशत् प
शूनां रक्षणं दानमिज्याध्ययनमेव च
वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च एकमेव तु शू
द्रस्य प्रभुः कर्म समादिशत् एतेषामेव वर्णानां शुश्रूषामनसूयये
ति एवं चतुर्वर्णानां गुणभेदेन कर्माणि प्रविभक्तानि ४१ ॥

उत्तमेजयेतो टीका ९

एवं सर्वेषां त्रिगुणात्मकानां वस्तूनां सात्विकस्य ज्ञानोत्पत्तिहेतुत्वा
दुपादेयत्वमुक्तं इदानीं च वर्णाश्रमाणां ब्राह्मणादिवर्णानां मोक्षसाधनत्वल
णानि ज्ञाननिष्ठाहेतुभूतानि भगवदाराधनभूतानि कर्माणि

भावस्य
रजः ईश्वरस्वभाव
द
व

गवन्नामफलानिस्वविहितानिसंसारमोचकानिसत्वादीगु।
णभेदभिन्नानिकर्माणिब्राह्मणादिकर्त्तव्यानिभवंतीतिवक्तुंप्रक
रणमारभमाणस्तेषांकर्मणांस्वरूपाण्याहषड्भिः ब्राह्मणेतिहेप
रंतप ब्राह्मणक्षत्रियविशोब्राह्मणादीनांत्रयाणांचद्वन्द्वःशूद्र
णांद्विजत्वात्समासात्पृथक्करणंनतुवर्णत्वाभावात् इतिचतु
र्णांवर्णानांस्वभावप्रभवैःस्वभावोब्राह्मणादिजन्महेतुभू
तःप्राक्तनसंस्कारस्तस्मात्प्रभवस्तमयेतेयेतेतथातैः यद्वा
स्वानांसत्वादीनांभावःसात्विकादिःसप्रभवतिप्रादुर्भवतिये
भ्यस्तैःतत्ररजस्तमोऽभिभवेनोद्रिक्तसत्वगुणोब्राह्मणस्य
स्वभावप्रभवःशमदमादिप्रवर्त्तकत्वात् सत्वतमोऽभिभवेनोद्रि।
क्तोरजोगुणः क्षत्रियस्यस्वभावप्रभवःशौर्यादिगुणप्रवर्तकत्वात्
सत्वरजोऽभिभवेनोद्रिक्तस्तमोगुणःशूद्रस्यस्वभावप्रभवःपवे
विधैःस्वभावप्रभवैर्गुणैस्सत्वादिभिः सहकर्माणियत्तप्रहा
दीनिप्रविभक्तानिशास्त्रेणयेषांब्राह्मणादीनांकर्माणिविभ
क्तानिएवंगुणकाब्राह्मणादयस्तेषामेतानिकर्माणीत्य
भिप्रायः ४१ ॥

मधुसूदनी टीका १

त्रयाणांसमासकरणंद्विजत्वेनवेदाध्ययनादितुल्यधर्मत्वक
थनार्थंशूद्राणामितिपृथक्करणमेकजातित्वेनवेदानधि
कारित्वज्ञापनार्थं तथाचवसिष्ठः चत्वारोवर्णाब्राह्मणक्षत्रिय
वैश्यशूद्रास्तेषांत्रयोवर्णाद्विजातयोब्राह्मणक्षत्रियवैश्यास्ते।
षांमातुरग्रेऽधिजननंद्वितीयंमौंजिबंधने अत्रास्यमातासावित्री
पितात्वाचार्यउच्यतइति तथाप्रतिविशिष्टंचातुर्वर्ण्यंस्यादभि
जनकर्मविशेषात्संस्कारविशेषाच्च ब्राह्मणोऽस्यमुखमासीद्बाहूराजन्यःकृ
तः ऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रोअजायतेत्यपिनिगमोभवति
गायत्र्याब्राह्मणमसृजत् त्रिष्टुभाराजन्यंजगत्यावैश्यंनकेनचिच्छ
न्दसाशूद्रमित्यसंस्कार्योविज्ञायतइति शूद्रश्चतुर्थोवर्णएकजा
तिरितिचगौतमः हेपरंतपशत्रुतापनएषांचतुर्णामपिवर्णानां
कर्माणिप्रकर्षेणविभक्तानिइतरेतरविभागेनव्यवस्थितानिकैः

श्री॰
गी॰टी॰
अ॰

174

स्वभावप्रभवैर्गुणैर्ब्राह्मणादिस्वभावस्य प्रभवैर्हेतुभूतैर्गुणैः
सत्त्वादिभिः तथाहि ब्राह्मणस्वभावस्य सत्त्वगुण एव प्रभवः प्र
शांतत्वात् क्षत्रियस्वभावस्य सत्त्वोपसर्जनं रजः ईश्वरस्वभावत्वात्
वैश्यस्य स्वभावस्य तमउपसर्जनं रजः ईहास्वभावत्वात् शूद्रस्व
भावस्य रजउपसर्जनं तमः मूढस्वभावत्वात् अथवा मायाख्या
प्रकृतिः स्वभावः ततउपादानात् प्रभवो येषां तैः प्राग्भवीयः
संस्कारो वर्तमाने भवे स्वफलाभिमुखत्वेनाभिव्यक्तः स्वभावः
स निमित्तत्वेन प्रभवो येषामिति वा शास्त्रस्यापि दृष्टस्वभाव
सापेक्षत्वाच्छ्रोतेषां प्रविभक्तानि परिगणितानि प्रविभक्तानीत्यस्यार्थे
षां च स्वदृष्टस्वभावसापेक्षत्वे उक्तः शास्त्राणां नामर्थवि
धायिनामपि कारणशक्तिः सहकारिणीति न्यायात् तथाहि
गौतमः द्विजातीनामध्ययनमिज्या दानं ब्राह्मणस्याधिका
प्रवचनयाजनप्रतिग्रहाः पूर्वेषु नियमस्तु राज्ञोऽधिकं रक्ष
णं सर्वभूतानां न्याय्यदंडत्वं वैश्यस्याधिकं कृषिवणिक्पाशु
पाल्यं कुसीदं च शूद्रश्चतुर्थो वर्ण एकजातिस्तस्यापि सत्य
मक्रोधः शौचमाचमनार्थे पाणिपादप्रक्षालनमेवैके श्राद्ध
कर्म भृत्यभरणं स्वदारवृत्तिः परिचर्या चोत्तरेषामित्यत्र सा
धारणासाधारणाः स्वधर्मा उक्ताः पूर्वेषु अध्ययनेज्या
दानेषु नियमः अवश्यकर्तव्यत्वे न तु प्रवचनयाजनप्र
तिग्रहेषु वृत्त्यर्थत्वादित्यर्थः वणिक्वाणिज्यं कुसीदं वृ
द्ध्यै धनप्रयोगः उत्तरेषामिति श्रेष्ठानां द्विजातीनामित्य
र्थः वसिष्ठोऽपि षट्कर्माणि ब्राह्मणस्याध्ययनमध्याप
नं यज्ञो याजनं दानं प्रतिग्रहश्चेति त्रीणि राजन्यस्याध्य
यनं यज्ञो दानं च शस्त्रेण च प्रजापालनं स्वधर्मस्तेन जीवेत् एता
न्येव त्रीणि वैश्यस्य कृषिवणिक्पशुपाल्यं कुसीदं च तेषां परिचर्या
शूद्रस्येति शापसंबोधि चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्राः तेषां
पूर्वः पूर्वो जन्मतः श्रेयान् स्वकर्मणि ब्राह्मणस्याध्ययनमध्यापनं यज्ञो
याजनं दानं प्रतिग्रहश्चेति

स्वधर्मपरिग्रहेण तेनात्मवत्

त्रियस्याध्यापनयाजनप्रतिग्रहणानीति परिग्रहवद्गृहदंडं च यि।
कानिनत्वियवहैश्यस्य दंडं उग्रहवर्जं कृषिगोरक्षावाणिज्याधिके
परिवर्णाम्य दस्यनरेणो वृत्तीनामिति मनुरपि अध्यापनमध्ययनं
यजनं याजनं तथा दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् प्र
जानां रक्षणं दानमिज्याध्ययनमेव च विषयेष्वप्रसक्तिश्च क्षत्रियस
समादिशत् पशूनां रक्षणं दानमिज्याध्ययनमेव च वणिक्पथं कु।
सीदं वैश्यस्य कृषिमेव च एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्
एतेषामेव वर्णानां शुश्रूषामनसूययेति एवं च वर्णानामपि वर्णानां
गुणभेदेन कर्माणि प्रविभक्तानि
॥ ४१ ॥
सदानंदी टीका ॥
तदेवं सर्वसंसारो मिथ्याज्ञानप्रकल्पितः गुणत्रयात्मकोऽनर्थः कि
याकारकलक्षणः १ उत्कृष्टतदेशाध्यायेषु तत्त्वोपसंहृतः तथा
पवदशेहतनूपकेणापि वर्णितः २ क्षीणेनासंगशस्त्रेणाभोग
वैराग्यरूपिणा तस्य संछेदनं कृत्वा त्वेष्टव्यं पदमीरितं ३ सर्वसं।
त्रिगुणात्मवे संसारात्वेतरोः कथं छेदोऽसंगशस्त्रेण संभवेत्त्रिगु।
णात्मनः ४ असंगशस्त्रं वैराग्यं तस्याप्यप्रपत्तिनः एवं शान्तेः
माहत्म्यायतेन्क्रतिसंमतं ५ स्वस्वाधिकारविहितैर्धर्मैर्वर्णाश्रमो
दितैः परितोष्यमाणादीशाद्वैराग्यमाप्नुयाञ्जसा ६ ततो वेदान्तवा
क्येभ्यः सम्यग्ज्ञानमवाप्य हत्तत्त्वमाभिजा
सोऽस्य सम्यग्धीजन्ममात्रतः सकार्यो ज्ञानमावाप्य हि दृश्यते तत्त्ववेत्ताशा
स्यते ७ एतावान्सर्ववेदार्थो यन्नष्टश्योत्तमुक्तवान् संदर्भस्योत्तरस्य च।
स्वार्थमुपसंहारमर्हति ८ इमेवमर्थमारभ्य तल्लयधर्मस्ववोध्या
वर्णाणां हि द्विजन्मेन स्वाध्यायाध्ययनादिना ९ तत्स्वाध्यायानधिकारि
र्थसमासकरणोक्तेन शूद्राणामेकजातित्वात्स्वाध्यायानधिकारी
ता १० इत्युक्तीतित्वापनार्थीयत्नत्त्वकारणाकृते स्वभावप्रभवैर्गु
णानां परस्परविभागतः ११ ब्रवस्थितानि कर्माणि स्वभावप्रभवैर्गु
णैः तत्र सत्त्वगुणो विप्रस्वभावस्यास्तिकारणं १२ प्रशान्तवात्मना
स्वभावस्य रजोगुणः सत्त्वोपसर्जनो यस्मादीश्वरत्वं स्वभावता
१३ तमोगुणो रजोवैश्यस्वभावस्यास्तिकारणं तस्यापीह स्वभाववा

श्री
गी॰टी॰
५

ह्रेणोभयात्मस्वतः १४ रजोगुणानमःसूक्ष्मस्वभावस्यात्मिकार
णं नसम्यक्स्वभावत्वादिसैवगुणनिमित्तः १५ मायाख्याप्रकृ
तिर्यदास्वभावःसर्वगःस्मृतः ततएवास्यउपादानायेषांप्रभवश्च
पि १६ प्रागभवीयोपिसंस्कारोवर्तमानभवेयदा स्वफलाभिमुख
त्वेनाभिव्यक्तःप्रभवःसच १७ स्वभावःकारणंयेषांतैर्विभक्तानि
वागुणैः प्रागसैतेवकर्माणिप्रविभक्तानियद्यपि १८ तथाप्य
त्यवशात्स्वस्यतत्स्वभावाद्यपेक्षिता १९ ॥ ४१ ॥

नीलकंठीटीका १२

एवंपंचदशेसंसाराश्वत्थमसंगशस्त्रेणछित्वातत्पदंमार्गितव्यमि
त्युक्तंतत्रात्मनोःसंगत्वोपपादनायक्रियाकारकफललक्षणस्यकृ
त्स्नस्यसंसारस्यत्रिगुणात्मकत्वमुक्तं तथात्मानात्मनोर्गुणातीतगु
णात्मकयोःसंगःसंभवतिनत्वाकाशेनवर्धकिरथ्यादिगुणैर्नगं
धादिनाकाशःसंसृज्यतेतद्वदित्युक्तं समासःशास्त्रार्थःप्रपंचितः।
नीसर्वगीताशास्त्रार्थमुपसंहर्तुमसंगशस्त्रोपायचतुर्दशीपि
प्रकरणांतरमारभतेब्राह्मणक्षत्रियविशांशूद्राणांचपरंतप
दानधिकारात् प्रविभक्तानिप्रसंकीर्णानि नयहेतुमाह स्वभावप्र
भवैर्गुणैः स्वभावईश्वरस्यप्रकृतिस्त्रिगुणात्मिकासैवप्रभवोहेतु
र्येषांगुणानांतेस्वभावप्रभवास्तैः यद्वा ब्राह्मणस्वभावस्यसत्व
स्यस्वभावत्वात् वैश्यस्वभावस्यतमउपसर्जनेरजः क्षत्र
त्वात् शूद्रस्वभावस्यरजउपसर्जनेनतमः शूद्रस्वभावत्वात् प्रथ
मादिगुणमाकाशगमनवत् प्रतएवजातिमात्रप्रभवैःप
मादिरूपादीनदृश्यते नाहिमस्तादयोयहजातोयधर्माणांश
दिकंवाश्रुतरहस्याद्याहतेब्राह्मणानामध्यापना
किंनसर्वेसंवेजातीयानांमाध्यापनादिकंवाश्रूहयत
दिहेगुणादिसत्वात्मणोधिपरोयीदिकंमनादिभुक्तंविषयेपिघ्रमा
दिकेव्हष्टे एवमिनाय तस्मात्स्मिन्कर्मिणिहृदर्शोशमादयोहृदयंते
स्तुहोष्यंतेलक्षणोवालाणायवत्वात्तवः यद्ववद्वाह्मणापिसूद्रयमी:

दृष्टं तेन सम्यगेव तथाचारण्यके सर्वभूतेन जवं प्रतिग्रहादिभिर्वा
कां समेदातेन त्वमाशीलमानशोस्पतपोहेण दृष्टं तेन यवनागेंद्र
सब्राह्मण इति स्मृतः तथापवैनलक्ष्यते सर्वहतं सब्राह्मणाः स्व
नः यैवेतन्न भवेत्सर्पेत्स्पृष्टमिति निर्देशो दिति जातिधर्मास्त्वमत
नादर्शिताः अध्यापनेनाध्ययनेन यजनेन याजनेन तथा दानं प्रतिग्रहे
णैव ब्राह्मणानामकल्पयत् प्रजानां रक्षणं दानमिज्याध्ययनमे
व च विषयेष्वप्रसक्तिं च क्षत्रियस्य समादिशत् पशूनां रक्षणं दा
नमिज्याध्ययनमेव च वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च
एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत् एतेषामेव वर्णानां शुश्रू
षामनसूययेति तस्मात् शमादयो यद्यपि ब्राह्मणो ब्राह्मणो वा दृष्टं तेन
स एव ब्राह्मणस्त्वत्र विवक्षितं स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभ
ते नरः इत्यत्र तु मनूक्ताध्यापनादीन्येव स्वकर्माणि ब्राह्मणा
नां न तु शमदमादीनि नहि ज्ञानविज्ञानवतोऽस्या संसिद्धिर्लब्ध
व्यास्ति तस्माच्छमदमादयो ब्राह्मणस्यैव ब्राह्मणस्य लक्षणमि
ति दिक् ४१ ॥

आनंदीटीका १३

स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसीति प्रागुद्दिष्टं तल्लक्षण
मविपरीतत्वं यत्र वर्णानां स्वभावभेदेन गुणविभागमाह स्वभा
वः परैरसाधारणः स्वः भावः प्रकृतिप्रकारः तत्प्रभवैर्गुणैः
स्वनामुक्तैर्धर्मैः कर्माणि शास्त्रोक्ताः क्रियाः ४१ ॥

रामकंठीटीका १४

समन्वयान्वितप्रकार
र इत्यत्र वर्णानामुक्तवक्ष्यमाणार्थ शास्त्रचोदिताः क्रिया
स्वभावसमुद्भवैर्गुणैर्धर्मैः कर्माणि प्रविभक्तानि प्रतिव
विशेषाः समनन्तरवक्ष्यमाणभेदेन प्रविभक्तानि पृथक्कृतानि पर
र्णं साधारणासाधारणविभागेन कर्तृपृथक्कृतानि परमार्थतो विष्णु
मेवैरेणैवैकेनैव स्वेच्छामात्रोपकरणेन नानाभावभेदाभासत्वे
न स्वभावमात्राव्यतिरिक्तस्वरूपमपि

श्री॰
गी॰टी॰
अ॰

विनं जगतः कौतुकनिर्माणमिदमारचयता विभागः परिकल्पितः
तथा च भगवतैव प्रागदर्शितं चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभा
गशः तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् तथा महर्षयः स
प्त पूर्वे चत्वारो मनवस्तथा मद्भावा मानसा जाता येषां लोक इमाः
प्रजा इत्यत्र पूर्वस्मिंल्लोके परमेश्वरेच्छामात्रहेतुकत्वं वर्णविभागस्य प्र
तिपादितं अपरस्मिंल्लोके चत्वारो मनवस्तावद्वर्णप्रवर्तकाः प्रजा
पतयो यदुक्तास्तेषामीश्वरसर्गविवर्तया महाकल्पारम्भे पर
मेश्वरेच्छामात्रेण तद्भावाभिमतस्वरूपाणामेव चतुर्थासर्गविभा
सितः एतच्च तत्तद्वर्णरूपाः प्रजा यमदपादीति दशमे व्याख्यातप्रा
यम् इत्थं वर्णविभागो यथा तस्य दर्शनप्रस्तावेनोदितं तद
यमवतरो विवर्धितो यदीश्वरेण स्वसर्गारम्भे चत्वारः पुरुषाः
सपत्नीकाः प्रविभक्तकर्माणो ब्राह्मणादिव्यपदेशभाजः सृ
ष्टाः तेषामेके नयुगेमनब्राह्मणाः सर्गस्तस्मादितः अन्यैः क्ष
त्रियादिसर्गाः एवं क्रमेण ब्राह्मणादिवर्णविभागस्थितेर्यावि
च्छिन्नसंतानतया ब्राह्मणेन ब्राह्मण्यां जातः स ब्राह्मण एवं क्षत्रिया
दयः न हि इयमेभिः प्रजापतिभिर्या सृष्टिः कृता सानुलोम्यप्राति
लोम्येन वर्णसंकीर्यमाणा नान्यं भजते तत्र ब्राह्मणेन क्षत्रियायां वैश्या
यां शूद्रायां वा जाता अनुलोमजा उच्यन्ते एवं क्षत्रियेण वैश्यायां
शूद्रायां चोत्पन्ना वैश्येन शूद्रायां सर्व एवानुलोमजा धर्म्याः ये
तु विपर्ययेण क्षत्रियेण ब्राह्मण्यां वैश्येन क्षत्रियायां ब्राह्मण्यां शूद्रे
ण वैश्यक्षत्रियब्राह्मणीषूत्पादितास्ते प्रतिलोमजा अधर्म्याः
एवमनुलोमप्रतिलोमजानामपि सा कार्यसमानतया प्रजायाः ये
त्ववच्छिन्नसंतानतया ब्राह्मणेन ब्राह्मण्यां क्षत्रियेण क्षत्रियायां वै
श्येन वैश्यायां शूद्रेण शूद्रायामसंकीर्णतया जातास्ते विशुद्धाः
चत्वारो वर्णा इति वर्णविभागव्यवस्थितेः वर्णानां स्वभावजं क
र्मविभागं प्रदर्शयितुमाह ४१ ॥

लासिकी [illegible] टीका

एवं सात्त्विकानामुत्कृष्टतामुक्त्वा प्रस्तुतानां जन्मनां संसारोत्तरणाय वर्णाश्रमोचि
तेन स्वकर्मणा ईश्वराराधनरूपं ज्ञानोपायं वर्णयितुं तावद्वर्णविभागेन क
र्माण्याह ॥

स्वभावात्स्वस्वरूपविस्मरणरूपाज्जीवत्वहेतुभूतात्प्रधानात्प्रा
दुर्भवउद्रेकेणाविर्भावो येषां तैः सत्वादिभिरुपलक्षणभूतैर्ब्रा
ह्मणानां क्षत्रियाणां विशां शूद्राणां च कर्माणि प्रविभक्तानि स·
याविभागेन कथितानि तत्र सत्वप्रधाना ब्राह्मणाः सत्वोपसर्ज
नरजःप्रधानाः क्षत्रियाः तमउपसर्जनरजःप्रधाना वैश्याः रज
उपसर्जनतमःप्रधानाः शूद्राः ४१ [illegible]
[illegible]

पंचोलीटीका

तर्हि सर्वस्य क्रियाकारकफलादिकस्य प्राणिजातस्य च त्रिगुणात्मक
त्वात्कथं तस्य मोक्ष इत्यपेक्षायां स्वस्वाधिकारविहितैः कर्मभिः परमेश्व
रमाराधयतः तत्प्रसादाल्लब्धज्ञानेन मोक्षो भवतीति सर्वगीतार्थसा
रसंग्रहं दर्शयितुं प्रकरणान्तरमारभते ब्राह्मणेत्यादि यावत्समाप्तिः
हे परंतप ब्राह्मणक्षत्रियविशां च पुनः शूद्राणां वर्णानां कर्माणि स्व
भावप्रभवैः गुणैः प्रविभक्तानि विभागेन व्यवस्थापितानि स्वभावप्रभ
वैः गुणैः स्वभाव ईश्वरस्य त्रिगुणात्मिका माया सा प्रभवकारणं येषां स
त्वादीनां गुणानां ते स्वभावप्रभवास्तैः अथवा स्वभावस्य प्रभवाः कार
णानि गुणानि स्वभावप्रभवास्तैः ब्राह्मणस्वभावस्य सत्वगुणप्रभवः
कारणं क्षत्रियस्वभावस्य सत्वोपसर्जनेन रजःप्रभवः वैश्यस्वभावस्य त
मउपसर्जनेन रजःप्रभवः शूद्रस्वभावस्य रजउपसर्जनेन तमःप्रभवः श्रा
[illegible]तैः ४१ ॥

रणवीरसमिद्धायिनी

ननु यदि सर्वस्यैव त्रिभिरेव गुणैराक्रान्तत्वं तदुपादेयस्य परमसुख
निमित्तस्य सत्वस्य केवलस्यासंभवाद्भवत्सायुज्यप्राप्तिः सर्वस्य ख
त्वध्यायमानेवमभवेदित्यर्जुनाभिप्रायमाशंक्य प्रायशः सत्वप्रधाने
थ्याः सर्ववर्णाश्रमाणां प्रतिनियतैः कर्मभिः परमेश्वरमभ्यर्च्य सा
स्वत्वमेवेति सर्वगीतार्थसारं संग्रहं दर्शयितुं प्रकरणान्तरमारभ्यते
त्मामेत्यारभ्य यावत्समाप्ति ब्राह्मणक्षत्रियविशां वेदादिकानिकां हि

जानां शूद्राणांच वेदानधिकारिणां कर्माणि वक्ष्यमाणानि शमादी
नि प्रविभक्तानि प्रकर्षेण प्रतिवर्णं साधारणासाधारणविभागतः
पृथक्कृत्य विहितानि मया परमेश्वरेणे वेति शेषः स्वभावप्रभवैः
सात्विकादिस्वरूपोपलक्षणीभूतैः पूर्वभवीयसंस्काररूपस्वभा-
वात्मकृत्यैर्वा उक्तवक्ष्यमाणार्थसमन्वितनयाहि प्रकारस्वभावा
त्प्रादुर्भूतैर्वा गुणैः सत्वादिभिर्धर्मैरिति विभागकरणं कथनं प
नश्च वा तद्वर्णधर्मयोः स्पष्टमित्यत्र प्रागेव व्याख्यातं न चैवं पुनरुक्तिः
तत्र परमेश्वरस्य वर्णविभागव्यवस्थापने स्वातंत्र्येण तदर्थकर्मान
धीनत्वं प्रतिपाद्य कर्मणां यथास्वमवस्थानेन नतस्मीतिः प्रतिपादित
श्चतुर्वर्णविभागोपपत्तिप्रदर्शनप्रस्तावेन कर्मणां प्रतिवर्णंवि
भज्य प्रतिपादनार्थं कथनमिति ४१ ॥

मधुभाष्य

४१॥

भाषा अनुवाद ग

जो समस्त क्रिया औ कारक कहे क्रियोके साधन तथा फल आ
दि औ प्राणीमात्र सब भी त्रिगुणात्मक कहे त्रिगुणमय भये हैं तो
इन लोगों की मुक्ति कैसे घटै कहे होय सकै है इस शंका निवार
या के अर्थ अपने अपने अधिकार अनुसार कर्म अनुष्ठान के द्वा
या भगवत आराधन से भई भगवत की कृपा प्राप्ति ते प्रगटजो
तत्वज्ञान तिसके द्वारा ही जो मुक्ति होयगी यह जो सब गीताका
सारसंग्रह सो दिखावने का मानस कर इस श्लोक से अध्याय समाप्ति
पर्यन्त प्रकारान्तर कहे दूसरी रीत कहने का आरंभ करतेहैं कि
हे परन्तप शत्रुनाशक अर्जुन ब्राह्मण क्षत्रिय वैश्य औ शूद्र इन।
के कर्म प्रविभक्त कहे प्रकृष्ट रूप से भिन्न भिन्न विहित हैं और
द्विज पद से शास्त्रमें ब्राह्मण आदि तीन वर्णोकहे जाते हैं इससे शू
द्र को अलग करके कहाहै सोई लक्षण कहतेहैं कि स्वभाव कहे सतो
गुण आदि जिन से सब का प्रभव कहे उत्पत्ति है उन्ही के अनुसा
र ब्राह्मण आदिके कर्म पृथक पृथक विहित हैं अथवा स्वभावक
हे पूर्व जन्म का संस्कार उसके अनुसार जो ब्राह्मण आदि की गुणक
म से कर्मोमे प्रवृत्ति है विशेष यह कि ब्राह्मण सतोगुण प्रधान
है औ क्षत्रिय ऊक्क सतोगुण सहित रजोगुण प्रधान है और वैश्य
ऊक्क सतोगुण तमोगुण लेकर रजोगुण प्रधान है और शूद्र ऊ
क्क रजोगुण युक्त तमोगुण प्रधान है यह जानौ ४१ ॥

दोहा

ब्राह्मण क्षत्रिय वैश्यके परंतप शूद्र निकेहि कर्म हूयद
भिन भिन्न है स्वभावजन्य गुण सेहि ४१ ॥

178

शमोदमस्तपःशौचंक्षांतिरार्जवमेवच ज्ञा
नंविज्ञानमास्तिक्यंब्रह्मकर्मस्वभावजं ४२

शांकरभाष्यटीका १

कानितानि कर्म्माणीत्युच्यते शमइति शमदमौच यथा
व्याख्यातार्थौ तपो यथोक्तं शारीरादिशौचं व्याख्यातं क्षांतिः क्ष
मा आर्जवं ऋजुतैवच ज्ञानं विज्ञानं आस्तिक्यं आस्तिभावः श्र
द्दधानता परमार्थेषु आगमार्थेषु ब्राह्मणजातेः कर्म्मब्रह्मकर्म
स्वभावजं यदुक्तं स्वभावप्रभवैर्गुणैः प्रविभक्तानीति तदेवोक्तं
स्वभावजमिति ४२ ॥

आनंदगिरिकृतटीका २

प्रविभक्तानि कर्म्माण्येव प्रसंगद्वारा विविच्य दर्शयति कानीत्या
दिना अंतःकरणोपशमः शमोदमोबाह्यकरणोपरतिरित्युक्तं
स्मारयति यथेति त्रिविधंतपः सप्तदशे दर्शितमित्याह तपइति
शौचमपि बाह्यांतरभेदेन प्रागेवोक्तमित्याह शौचमिति क्षमा
नामाक्रुष्टस्य ताडितस्य वा मनसि विकाराराहित्यं ज्ञानं शास्त्री
यं पदार्थज्ञानं विज्ञानं शास्त्रार्थस्य स्वानुभवपर्यंततापादनं वि
था व्याख्यातं स्वभावशब्दार्थरूपमाह यदुक्तमिति ४२ ॥

स्वामिकृतटीका ३

तत्रब्राह्मणस्य स्वाभाविकानि कर्म्माण्याह शमइति शमश्चित्तो
परमो दमोबाह्येंद्रियोपरमः तपः पूर्वोक्तं शारीरादि शौचंबाह्या
भ्यंतरं क्षांतिः क्षमा आर्जवमवक्रता ज्ञानं शास्त्रीयं विज्ञानमनु
भवः आस्तिक्यमस्ति परलोकइति निश्चयः एतत्कर्म ब्रा
ह्मणस्य स्वभावजातं कर्म्म ४२ ॥

पिशाचभाष्यटीका ४

तपस्तु धर्महेतुः शौचं शुद्धिभावो क्षांतिः क्षमा आर्जवं ऋजु
भावः ज्ञानमात्मावबोधः विज्ञानं ममत्वादिपदार्थेषु मुक्तिवत्
क्तिः ब्राह्मणो ब्राह्मणस्येदं स्वभावजं प्रकृतिभावं ४२ ॥

रामानुजभाष्यटीका ५

शम इति शमो बाह्येंद्रियनियमनं दमोंतःकरणनियमनं त
पो भोगनियमनरूपः शास्त्रसिद्धः कायक्लेशः शौचं शास्त्रीयक
र्मयोग्यता क्षांतिः परैः पीड्यमानस्यापि अविकृतचित्तता आ
र्जवं परेषु मनोनुरूपं बाह्यचेष्टाप्रकाशनं ज्ञानं परावरतत्त्वयाथात्म्य
ज्ञानं विज्ञानं परतत्त्वगतासाधारणविशेषविषयं ज्ञानं आस्तिक्यं
वैदिकार्थस्य [illegible] कृत्स्नस्य सत्यतानिश्चयः प्रकृष्टः केनापि हेतुना
चालयितुमशक्य इत्यर्थः भगवान्पुरुषोत्तमो वासुदेवः परं
ब्रह्मशब्दाभिधेयो निरस्तनिखिलदोषगंधः स्वाभाविकानवधि
कातिशयज्ञानशक्त्याद्यसंख्येयकल्याणगुणो निखिलवेदवेद्यः
स एव निखिलजगदेककारणं निखिलजगदाधारभूतो निखिलस्य
स एव प्रवर्तयिता तदाराधनभूतं च कृत्स्नं वैदिकं कर्म तैस्तैराराधि
तो धर्मार्थकाममोक्षाख्यं फलं प्रयच्छतीति अस्यार्थस्य सत्यतानिश्च
यः आस्तिक्यं वेदैश्च सर्वैरहमेव वेद्यः अहं सर्वस्य प्रभवो मयि
सर्वमिदं प्रोतं भोक्तारं सर्वयज्ञतपसां मां शान्तिमृच्छति मत्तः
परं नान्यत्किंचिदस्ति धनंजय यतः प्रवृत्तिर्भूतानां येन सर्वमिदं
ततं स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः यो मामजमनादिं
च वेत्ति लोकमहेश्वरमित्यादिते तदेतद्ब्राह्मणस्य स्वभावजं कर्म ४२

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ४२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

तत्र ब्राह्मणस्य स्वाभाविकानि कर्माण्याह शमो दम इति शमश्चि
त्तोपरमः दमश्चेंद्रियोपरमः तपः शरीरक्लेशादि शौचं बाह्याभ्यं
तरं क्षांतिः क्षमा आर्जवमवक्रता ज्ञानं शास्त्रीयं विज्ञानमनुभवः
आस्तिक्यमस्ति परलोक इति निश्चयः एतद्ब्राह्मणस्य स्वभावसिद्धं कर्म
४२ ॥

वनमाली टीका ८

तत्र ब्राह्मणस्य स्वाभाविकगुणकृतकर्माण्याह शम इति शमोंतः
करणोपरमः दमो बाह्येंद्रियोपरमः तपः शास्त्रोक्तशारीरादिके शौ

वमपि श्रीगुरुक्तेः शान्तिः क्षमा आर्जवमकौटिल्यं ज्ञानं भगवद
र्थविषयकं विज्ञानं कर्मकाण्डे यज्ञादिकर्मकौशले वस्तकोरे
मदनेन गुणाः शोषिस्यलणो जीवस्य जं उस्य च विविक्ततया ज्ञाने।
आस्तिक्यं शास्त्रे विश्वासः एतत्क्षमादिनवकं स्वभावजं सत्वगुण
स्वभावकृतं ब्रह्मकर्म ब्राह्मणजातेः कर्मद्युपि वक्ष्मीतो सा। दि०
लिकावस्थायामेते धर्माः संभवंति तथापि बाहुल्येन ब्राह्मणे
भवंति सत्वस्वभावत्वात्तस्य सत्वोद्रेकवशेन तथापि कदाचिद्विरुद्धंतीति
नीर्या ब्रमरणादेर्यातितिर्यग्जेतरासाधारणधर्मतयोक्ताः तथाच वि
स्तेः क्षमा सत्यं दमः शौचं दानमिंद्रियसंयमः अहिंसा गुरुशुश्रू
षा तीर्थानुसरणं दया आर्जवं लोभशून्यत्वं देवब्राह्मणपूजनं अ
नभ्यसूया च तथा धर्मः सामान्य उच्यते इति ४२ ॥

ऊसमवेजपनीसधीः ९

ब्राह्मणस्य स्वभावजं कर्माह शमो दम इति शमोंतःकरणस्य नियम
नं दमो बहिःकरणस्य नियमनं तपो भोगनियमनपूर्वकशास्त्रीय।
कायक्लेशरूपः शौचं बाह्याभ्यंतरभेदेन द्विविधमुक्तं शास्त्रीय
कर्मानुष्ठानयोग्यतारूपं क्षांतिः परैरनवरतं नाऽमानसापि
नस्तं हिंसत्वे नाविकृतचित्ततारूपा आर्जवं परेषु मनोवाक्कायक
र्मणामवक्रत्वं एवकारेण हिंसादयः सामान्यधर्मा अपि गृह्यंते
नथाहि क्षमासत्यं दया शौचं दानमिंद्रियसंयमः अहिंसा गुरुशु
श्रूषा तीर्थानुसरणं दया आर्जवं लोभशून्यत्वं देवब्राह्मणपूजनं अ
नभ्यसूया च तथा धर्मः सामान्य उच्यते इति च श्रुतेः ज्ञानं शास्त्रा
र्थतत्वयाथात्म्यविज्ञानं शास्त्रादेव परावरतत्वानुभवरूपेश्वा
स्तिक्यं सर्वेश्वरो वासुदेवः श्रीकृष्णो नमो भगवान् ब्रह्मभूतः स्वभाव
सिद्धाः स्वाभाविकाः कारुण्यवात्स
ल्यादयो गुणाः समस्तदोषानेताविद्यासंबंधिस्वाभाविककारुण्यवान्
सर्वज्ञः सर्वप्रभ
त्यज्ञानशक्त्यादिमंगलगुणमहोदधिः सर्ववेदवेद्यः अहं सर्वस्य प्रभ
वः मयि सर्वमिदं सर्वजगत्कारणं सर्वाधारः सर्वप्रवर्तकः स्वविहितैः
स्ताराय नमस्तेः कर्मभिः केवलया भक्त्याचारादिभिः सच्चात्मपर्व्वी।
नेसर्वचतुर्वर्गफलं ददानीतिशास्त्राधिगतेः धैसमानवनिश्चयः वैद

श्री-
गी टी-
अ-

श्रमसैवेरहमेववेद्यः अहंसर्वस्यप्रभवः मयिसर्वमिदंप्रोतं ओंकारेय
तनपसांज्ञानामोशोतिस्वच्छतिमतनःपरतरेनास्त् यतःप्रवृत्ति
र्भूतानांयोमामजमनादिंचेत्यकेतदेतत्स्वभावजत्वाभाविकंब्र
ह्मकर्मब्राह्मणस्यकर्मभवति ४२ ॥

+तत्रब्राह्मणस्यस्वभाविकगुणकृतानिकर्माण्याह ॥

180

मधुसूदनी टीका १-

+शमोंतःकरणोपरमः दमोबाह्यकरणोपरमः प्राग्व्याख्यातः तपः शा
रीरादिदेवद्विजगुरुप्राज्ञपूजनादावुक्तं शौचमपिबाह्याभ्यंतरभेदे
नप्राग्व्याख्यातं क्षमाआक्रुष्टस्यताडितस्यवामनसिविकाराद्य
नुत्पादःव्याख्यातं आर्जवमकौटिल्यंप्राग्व्याख्यातंज्ञानं सांगवेदतदर्थवि
षयं विज्ञानंकर्मकांडेयज्ञादिकर्मकौशलंब्रह्मकांडेब्रह्मात्मैक्या
नुभवः आस्तिक्यंसात्विकीश्रद्धाप्राग्व्याख्यातंब्रह्मादिनवकंस्व
भावजंसत्वगुणस्वभावकृतंब्रह्मकर्मब्राह्मणजातेःकर्मयद्यपि
वर्णांतरस्यापिवर्णानांसात्विकावस्थायामेतेधर्माःसंभवंति तथा
पिबाहुल्येनब्राह्मणेभवंतिसत्वस्वभावत्वात्सत्ववैदिकवशेन
तत्रापिकदाचिद्भवंतीतिशास्त्रांतरेसाधारण्यधर्मत्वेनोक्ताः तथा
चवसिष्ठः क्षमासत्यंदमःशौचंदानमिंद्रियसंयमः अहिंसागुरुशु
श्रूषातीर्थानुसरणंदया आर्जवंलोभशून्यत्वंदेवब्राह्मणपूजनं अ
नभ्यसूयाचतथाधर्मःसामान्यउच्यते समानस्ववर्णानामपिवर्णा
नांतथाश्रमेणचवर्णानामाश्रमाणामित्यर्थः तथाचबृहस्पतिः
दयाक्षमानसूयाचशौचंवानायासमंगलं अकार्पण्यमस्पृहत्वंसर्व
सर्वेतदेवसाधारीकीर्तिता बाह्येवाध्यात्मिकेचैवदुःखेवोत्पादिते
क्वचित् नकुप्यतिनवाहंतिसादयापरिकीर्तिता २ नगुणानगु
ता ३ अभक्ष्यपरिहारश्चसंसर्गश्चाप्यनिंदितैः स्वधर्मेचव्यवस्थानंशौ
चमेतत्प्रकीर्तितं ४ शरीरंपीड्यतेयेनसुशुभेनापिकर्मणा अत्यंततं
नैतत्पनकुर्वीत नाकीर्त्यसउच्यते ५ प्रशस्ताचरणंनित्यमप्रशस्तविस
र्जनं एतद्धिमंगलंप्रोक्तंमुनिभिस्तत्वदर्शिभिः ६ स्तोकादपिप्रदात

यमदीनेनांतरात्मना अहन्यहनियत्किंचिदकार्पण्यंहितत्स्मृ
तं ८ यथोत्पन्नेनसंतोषः कर्तव्योप्यर्थवस्तुना परस्याचिंतयित्वा
र्थंसास्पृहापरिकीर्तिता ९ एतएवाष्टावात्मगुणास्तेनगोतमेनप
ठिताः अष्टावात्मगुणाः दयासर्वभूतेषुक्षांतिरनसूयाशौचम
नायासोमंगलमकार्पण्यमस्पृहेति तथामहाभारते सत्यंदमस्तपः
शौचंसंतोषोह्रीः क्षमार्जवं ज्ञानंशमोदयाध्यानमेषधर्मःसनातनः
सत्यंभूतहितंप्रोक्तंमनसोदमनंदमः तपःस्वधर्मवर्तित्वंशौचंसंकर
वर्जनं संतोषोविषयत्यागोह्रीरकार्यनिवर्तनं क्षमाद्वंद्वसहिष्णुत्व
मार्जवंसमचित्तता ज्ञानंतत्त्वार्थसंबोधः शमश्चित्तप्रशांतता दया
भूतहितैषित्वंध्यानंनिर्विषयंमनः देवलः शौचंदानंतपःश्रद्धा
गुरुसेवाक्षमादया विज्ञानंविनयःसत्यमितिधर्मसमुच्चयः तथा
व्रतोपवासनियमैःशरीरोत्तापनंतपः अन्यार्थधर्मकार्येषुतथाश्र
द्धेत्युदाहृता नास्तिह्यश्रद्दधानस्यधर्मकृत्यप्रयोजनं यत्तुवैदिकी
नांचलौकिकीनांचसर्वशः धारणंसर्वविद्यानांविज्ञानमितिकीर्ति
तं विनयोहिद्विविधप्रोक्तः शास्त्रेदमशमाविति शेषंव्याख्यातंतथायमि
निवचनानि नलिखितानि याज्ञवल्क्यः इज्याचारदमाहिंसादान
स्वाध्यायकर्मणां अयंतुपरमोधर्मोयद्योगेनात्मदर्शनमितिरूपं
च सर्वदेवीषेपत्शास्त्राद्याख्यातोत्ताश्रमाणांस्वाभाविकोऽस्तेर्वातवे [illegible] ८१
मितिकीर्तिनविरोधः [illegible]

सदानंदीटीका ॥

तत्रब्राह्मणकर्माणिस्वाभाविकगुणानेव हेतूनाहकृपार्थेक्षुस
वैकर्मफलप्रदः १ शमोंतःकरणशांतिर्वाह्येंद्रियशमोदमः त
पःस्वधर्मवर्तित्वंप्राग्रुक्तंवात्रियातपः २ वाह्याभ्यंतरभेदेनशौचं
द्विविधमीरितं क्षांतिर्द्वंद्वसहिष्णुत्वमार्जवंसमचित्तता ३ ज्ञानंवि
दार्थविषयेप्रोक्तंचैवमहर्षिभिः ५ यत्तुवैदिकीनांचलौकिकी
नांचसर्वशः धारणंसर्वविद्यानांविज्ञानमितिकीर्तिते ६ इज्यार्थेऋ
षिभिःप्रोक्तः कर्मप्रस्तावपतयोः आस्तिकोऽस्तित्विकोबुद्धाव्रह्मा
नैमकादिदर्शने ७ एतत्क्रमादिनवकंस्वकृतत्वगुणोद्भवंकर्म
ब्राह्मणाज्ञानेस्तान्तवोद्देकवशेनवै ८ चतुर्णामपिवर्णानांस

श्री॰
गीटी॰
ग्र॰

नोद्रेकेणयद्यपि संभवंतिगुणाएतेतथापिब्राह्मणेत्वमी ९ शूद्रसत्वस्वभावत्वाद्बाहुल्येनभवंतिते साधारणतयाप्युक्ताध। र्मीएतेयतोनृणां १० क्षमासत्यंदमःशौचंदानमिंद्रियसंयमः अहिं सागुरुशुश्रूषाशातीर्थानुसरणंदया ११ आर्जवंलोभशून्यत्वंदेवब्राह्म णपूजनं अनभ्यसूयाचतथाधर्मःसामान्यउच्यते १२ तथापिब्राह्म णानांतस्वभावान्नेपदीरिता आगंतुकानेरेषांप्राहिशेषोयंविचार्य तो १३ शमदमतपआदिवत्सकर्माणमात्रेनहिशरणमिहास्तिवा त्सवेयोममाहा अशरणाशरणोश्रीकृष्णस्वपवासत्वनिमेशरणमिह भवाब्धौमज्जतोमांमग्नगाये १४ ४२ ॥

नीलकंठी टीका १२

ब्राह्मणकर्माण्याह शमइति अंतःकरणनिग्रहः शमः बाह्येंद्रि यनिग्रहोदमः तपः पूर्वोक्तंशारीरादिभेदेनत्रिविधंशौचंबाह्यं मृज्जलाभ्यामाभ्यंतरंभावशुद्धिः शांतिः क्षमा आर्जवमकौटिल्यं ज्ञानंशास्त्रीयंकर्मब्रह्मविषयं विज्ञानेनतदनुष्ठानानुभवात्मकं आस्तिक्यंश्रद्धाएतन्नवकंब्रह्मकर्मब्राह्मणस्यजानामित्येतज्जके कर्मस्वभावजंप्राचीनधर्मसंस्कारजं ॥ ४२ ॥

आनंदीटीका १२

प्रविभागमाह ब्राह्मंब्राह्मणसंबंधि अन्यद्दृढशेषंव्याख्यात शर्वम् ४२ ॥

रामकंठी टीका १४

शमादयोव्याख्यातस्वरूपाब्राह्मणवर्णस्यसंबंधिस्वभावजंप्र कृतिसमुत्थंकर्मशास्त्रचोदितंक्रियतेप्रायेणस्वर्गार्थःसो कः किंत्विदमत्रतात्पर्यम इहचेतनाचेतनविभागेनद्विप्रका रेभूतसर्गोसुरनरतिर्यग्भेदेनत्रिविकारस्ततनसर्गोव्यवस्थित स्तत्रनरास्यसर्गमध्येशास्त्रीयक्रियाधिकृतः कर्मभूमिज न्मानोयेपुरुषास्तेषांकर्मविभागेनगुणविभागेनचपरमे श्वरेच्छावशादेवब्राह्मणादिभेदेनचतुर्विधत्वयनिर्मितंत त्कर्मविभागएवप्रथममेवमेकका: वर्णानांहिकर्माणिस्था धारणानियमितानिच तथाब्राह्मणस्यषट्कर्माणि

१८१

ध्ययनादीनि साधारणानि वर्णत्रयस्यापि तेषां विहितत्वात् क्षत्रिय
वैश्ययोस्तानि प्रसिद्धान्येव शूद्रस्यापि शास्त्रचोदितशौचस्नानवैश्व
देवश्राद्धादिक्रियाणामनुष्ठानविहिताधिकारस्य तदनुष्ठानोप
योगिनीतिकर्तव्यताविज्ञानहेतुशास्त्रैकदेशाध्ययने दत्त एवाव
काशः तद्विना विहितकर्मानुष्ठानानुपपत्तेः दानं च तत्तत्सर्वसा
धारणमेव एवं च साधारणकर्मानुष्ठाने शूद्रस्य भगवता परम
र्षिणा परमप्रमाणभूतेन स्ववचसैव कृतोऽवकाशो यत्र सर्ववर्णो
पदेशमयं सेतिहासं महाभारताख्यमहद्ग्रन्थं कृतवान् श्राव
येच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः इति एवमेतानि साधारणाध्य
यनादीनि त्रीणि कर्माणि ब्राह्मणस्याध्यापनयाजनप्रतिग्रहा
ख्यानि त्रीण्यसाधारणानि तान्येव कर्माणि तद्वर्णात्मकस्वभा
वजानि एवमेव दैवसर्गसंबन्धित्वेन निर्दिष्टानि शमादीन्येव सा
धारणान्यपि ब्राह्मणसंबन्धित्वेनैव किमित्यनेनोक्तानि देवासुरसर्ग
भावजान्यगुणानां तथैव साधारणाः
भेदो हि च तद्वर्णसाधारणस्तत इदमुच्यते सर्वमेतद्यथोक्तमपप
एष एव गुणविभागो विवक्षितः स्वभावजानि सात्त्विकानि शमादीनि प्रा
मे किं तत्प्रसिद्धत्वात् तद्वर्णस्वभावजानि सात्त्विकानि शमादीनि विप्र
धान्याइमानि प्रकरणेऽस्मिन्वर्णकर्मणामपवर्गसाधारणत्वेन वि
वक्षितत्वादत एषां तत्त्रियादीनां वर्णात्मकस्वभावजानां साधारणानां शमादीनां
मौनिर्दिष्टानि देवसर्गात्मकस्वभावजानां अनुपलक्षणमात्रत्वेनेहक
ब्राह्मणसंबन्धत्वेन प्रदर्शितप्रयोजनानाममानित्वमदंभित्वमित्या
नियमानामेव निर्देशः कृतः साकल्येन तत्त्वमानित्वमदंभित्वमित्या... प्रतिपादितानि ४२ ॥
दि तथाभयंसत्वसंशुद्धिरित्यत्र पूर्वमेव प्रतिपादितानि
दि तथाभयंसत्वसंशुद्धि टीका

+ तत्र ब्राह्मणस्य स्वाभाविकानि कर्माण्याह ॥

लासिकी [illegible]टीका

+ शमश्चित्तोपरमः दमो बाह्येन्द्रियोपरमः तपः पूर्वोक्तं शारीरादि
शौचं बाह्याभ्यन्तरं क्षान्तिः क्षमा आर्जवं सरलता ज्ञानं शास्त्रीयं
विज्ञानमनुभवः आस्तिक्यमस्ति परलोक इति मतिः एतत्सर्व [illegible]
स्वभावाज्जातं शमदमादि ब्राह्मणस्य ... ८२

गी.
टी.
अ

182

पंचोलीटीका

शमइतिशमः बाह्येंद्रियनिग्रहः दमः अंतःकरणसंयमः तपःशा
रीरंवाचिकंमानसंसर्वांक्लेशंवासहमभ्यनंतरं क्षांतिःक्षमाः आर्ज
वंसरलताज्ञानंशास्त्रजनितंतत्वज्ञानमनुभवरूपंविज्ञानंआ
स्तिक्यंवेदार्थेषुश्रद्धाएतन्नवात्मकंकर्मब्राह्मणजातेः एतत्कर्मस्व
भावप्रभवैःगुणैर्विभागेनसंजातं ४२ ॥

सरावीरसमिद्धबोधिनी॥

तत्रब्राह्मणानांस्वाभाविकं कर्माह शमइति शमश्चित्तोपरमः द
मोबाह्येंद्रियोपरमः तपःशारीरादिभेदेनत्रिविधंशास्त्रोक्तं शौचंमृ
ज्जलादिनाकायमलापनयनरूपंबाह्यं दंभपरित्यागेनकामादिदो
षराहित्यस्वरूपमांतरंच क्षांतिःपरापराधसहनं आर्जवंसरलस्व
भावता ज्ञानंशास्त्रीयं विज्ञानमनुभवः आस्तिक्यंपरलोकसंभाव
ना एतद्दशविधंब्राह्मणोब्राह्मणवर्णस्यसंबंधिप्रकृतिसम्भवंकर्मभव
ति ४२ ॥

मधुभाष्य

४२॥

भाषा अनुवाद

तो वे स्वाभाविक कौन कर्म है सोई कहते हैं कि शम कहे चि
त की शान्ति औ दम कहे बाह्य इंद्रियों की शांति औ तप जो १७
अध्याय के १४ श्लोक मे शरीर की तपस्या कही है तथा शौच अर्थात्
बाहर भीतर की शुद्धि औ क्षान्ति कहे क्षमा आर्जव कहे सीधापन
औ ज्ञान कहे शास्त्र के अर्थ का बोध और विज्ञान कहे अनुभव तथा
आस्तिक्य कहे परलोक है ऐसी निश्चय रूप बुद्धि ये सब ब्राह्मणों
के स्वभाव सिद्ध कर्म है सो जानो ४२

दोहा

शम दम तप पुन शौच दृ शांति सरलता जोय ज्ञान वि
ज्ञान आस्तिक मति ब्रह्म कर्म स्वभावक होय ४२॥

183

शौर्यंतेजोधृतिर्दाक्ष्यंयुद्धेचाप्यपलायनंदा
नमीश्वरभावश्चक्षात्रंकर्मस्वभावजं ४३ ॥

शांकरभाष्यटीका १

शौर्यमिति शौर्यं शूरस्य भावस्तेजः प्रागल्भ्यं धृतिर्धारणं सर्वावस्था
स्वनवसादो भवति यया धृत्योत्तम्भितस्य दाक्ष्यं दक्षस्य भावः सहसा प्र
त्युत्पन्नेषु कार्येष्वव्यामोहेन प्रवृत्तिर्युद्धे चाप्यपलायनमपराङ्मु
खीभावः शत्रुभ्यः दानं देयेषु मुक्तहस्तता ईश्वरभावः ईश्वरस्य भा
वः प्रभुशक्तिप्रकटीकरणमीशितव्यान्प्रति क्षात्रं कर्म क्षत्रिय
जातेर्विहितं कर्म क्षात्रं कर्म स्वभावजं ४३ ॥

आनंदगिरिकृतटीका २

शूरस्य भावो विक्रमो बलवतानपि प्रहर्तुं प्रवृत्तिः प्रागल्भ्यं परै
रप्रधर्षणीयत्वं महत्यामपि विपदि देहेंद्रियोत्तम्भनी चित्तवृत्तिर्धृ
तिरिति व्याचष्टे सर्वावस्थास्विति दक्षस्य भावमेव विभजते सहसेति
४३ ॥

स्वामिकृतटीका ३

क्षत्रियस्य स्वाभाविकं कर्माह शौर्यमिति शौर्यं पराक्रमस्तेजः प्राग
ल्भ्यं धृतिर्धैर्यं दाक्ष्यं कौशलं युद्धे चाप्यपलायनमपराङ्मुखत्वं दान
औदार्यमीश्वरभावो नियमनशक्तिः एतत्क्षत्रियस्य स्वभावजं कर्म
वैश्यशूद्रयोः कर्माह ४३ ॥

पैशाचभाष्यटीका ४

शौर्यं मरणान्निर्भयत्वं तेजः प्रतापः धृतिः धैर्यं दाक्ष्यं प्रवीणताश्च
पलायनं शत्रूणामभिमुखावस्थानं दानं हिरण्यादेः पात्रसमर्पणं
क्षत्रियस्येदं क्षात्रं स्वभावजं प्रकृतिभवं ४३ ॥

रामानुजभाष्यटीका ५

शौर्यमिति शौर्यं युद्धे निर्भयप्रवेशसामर्थ्यं तेजः परैरनभिभवनीय
ता धृतिः आरब्धे कर्मणि विघ्नोपनिपातेऽपि तत्समापनसामर्थ्यं दाक्ष्य
सर्वक्रियानिर्वृत्तिसामर्थ्यं युद्धे चाप्यपलायने युद्धे चात्ममरणनिश्च
येऽप्यनिवर्तने दानमात्मीयद्रव्यस्य परस्वत्वापादनपर्यन्तस्त्यागः ईश्व

श्री
गी टी
प्र

184

रभावश्चव्यतिरिक्तसकलजनजननियमनसामर्थ्यमेतत्क्षत्रिय
स्यस्वभावजं कर्म ४३ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ४३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७

अथक्षत्रियाणामाह शौर्यमिति शौर्यं पराक्रमः तेजः प्रागल्भ्यं धृ
तिर्धैर्यं दाक्ष्यं दक्षत्वं कौशलमित्यर्थः युद्धे अपलायनमपराङ्मु
खत्वं दानमौदार्यं ईश्वरभावो नियामकत्वशक्तिः एतत्क्षत्रकर्म ४३

वनमाली टीका ८

शौर्यं पराक्रमो बलवत्तरानपि प्रहर्तुं प्रवृत्तिः तेजः प्रागल्भ्यं धृति
र्महत्यामप्यापदि देहेन्द्रियानवसादः दाक्ष्यं सहसा प्रत्युत्पन्नेषु कार्येषु
व्यामोहेन प्रवृत्तिः युद्धे चापलायनमपराङ्मुखीभावः दानं वित्त
स्य स्वत्वत्यागपूर्वकं परस्वत्वापादनं ईश्वरभावः प्रजापालने प्रभु
शक्तिप्रकटीकरणं क्षत्रकर्मक्षत्रियजातिविहितं स्वभावजं कर्म ४३

उत्तमवैजयन्ती टीका ९

क्षत्रियस्य कर्माह शौर्यमिति शौर्यं युद्धे निर्भयप्रवेशसामर्थ्यं ते
जः परैरधृष्यत्वं धृतिः अतिसंकटेप्यापद्यपि देहेन्द्रियाणामनवसादः
यद्वा कर्मण्यारब्धे विघ्नोपनिपातेपि तत्समापनसामर्थ्यं युद्धे चाप्य
पलायनम् युद्धे स्वस्मादधिकशयेन शत्रुः अपिशब्दात् दृष्टे स्वमर
णादध्यवसितरूपनिश्चये पलायनमेव मत्वा दानं असंकोचेन स्व
कीयवित्तस्य परस्वत्वापादनपर्यन्तस्त्यागः ईश्वरभावः प्रजापा
लनार्थं शासनार्हेषु नियन्तृत्वेन प्रभुत्वशक्तिप्रकाशः चश
ब्दादन्येपि शरणागतवात्सल्यादयो गुणाः एतत्स्वभावजं स्वाभाविकं क्षात्रं
क्षत्रियस्येदं कर्म भवति ४३ ॥

प्रा

+ क्षत्रियस्य गुणस्वभावकृतानि कर्माण्याह ॥

मधुसूदनी टीका १०

+ शौर्यं विक्रमो बलवत्तरानपि प्रहर्तुं प्रवृत्तिः तेजः प्रागल्भ्यं प
रैरप्रधर्षणीयत्वं धृतिर्महत्यामपि विपदि देहेन्द्रियसंघातानवसादः
दाक्ष्यं दक्षभावः सहसा प्रत्युत्पन्नेषु कार्येषु अव्यामोहेन प्र

धृतिः युद्धे चाप्यपलायनम् अपराङ्मुखीभावः दानं असंकोचेन वि
तेषु स्वस्वत्वपरित्यागेन परस्वत्वापादने ईश्वरभावः प्रजापालना
र्थं ईशितव्येषु प्रभुशक्तिप्रकटीकरणं च तत्र कर्म क्षत्रियजातेर्वि
हितं कर्म स्वभावजं सत्त्वोपसर्जनरजोगुणस्वभावजं ४३ ॥

सदानंदी टीका ११

क्षत्रियस्य स्वभावोत्थकर्माण्याह शौर्येति शौर्यं पराक्रमस्तेजः
प्रागल्भ्यं चामर्षः सहः १ धृतिर्महत्यपि विपदि देहाद्यनवसादने उ
पस्थितेषु कार्येषु दाक्ष्यं सम्यक्कुशलता २ युद्धे अपराङ्मुखीभावो
दाने पात्रेषु शास्त्रतः असंकोचेन वित्तेषु स्वसत्वत्यागपूर्वके ३ पर
सत्त्वापादने स्यादीश्वरो भाव ईशिते प्रजारक्षार्थमैश्वर्यादीशितव्ये
षु जनेषु ४ उद्घाटने प्रभोः शक्तेः क्षत्रियस्य स्वभावजं विहितं
क्षत्रिया ख्याया जातेः कर्मगुणानुगं ५ ४३ ॥

नीलकंठी टीका १२

शौर्यं पराक्रमः तेजः प्रागल्भ्यं धृतिर्धैर्यं दाक्ष्यं युद्धे कौशलम्
उन्मार्गवर्तिनो नियमनश
क्तिः पलायनाभावः दानमौदार्यं ईश्वरभावः
स्वाहो वा क्षत्रकर्म स्वभावजं ४३ ॥

ज्ञानेश्वरीटीका १३

शौर्यं पराक्रमः तेजः पराभिभवासहनम् धृतिः स्वकर्मणि
दार्ढ्यं दाक्ष्यं समयः कार्याकार्यविवेकः ईश्वरभावो निग्रहानु
ग्रहशक्तिः ४३ ॥

रामकंठीटीका १४

क्षात्रं

प्रथात्र क्षत्रियाणां वर्णात्मकस्वभावजानि कर्माण्याह
क्षत्रियमेवं स्वभावजं परमेश्वरनियमितत्वात् प्रकृतिसमुद्भवं
कर्म व्यापारः किं तच्छौर्यमीश्वरभावः पराक्रमः तेजः स्वभावतः
परावपराभिभवनसमर्थमोजः धृतिः स्वभावकर्माणि दृढा वृत्तिः
दाक्ष्यं दक्षमाचातुर्यं तथा संग्रामे पराङ्मुखत्वाभावो निर्भयत्वमित्य
र्थः दानमर्थिनां त्यागो प्रत्याख्यानेष्वीश्वरभावः प्रभुत्वं पराधीन
त्वासहिष्णुतेति ४३ ॥

+ क्षत्रियस्य स्वाभाविकं कर्माह ॥

गी॰ टी॰ श्र॰

लासिकी टीका

+ शौर्यं पराक्रमः तेजः प्रागल्भ्यं धृतिर्धार्ष्ट्यं दाक्ष्यं कौशलं युद्धे चाप्यपलायनमपराङ्मुखता दानमौदार्यं ईश्वरभावो नियमनशक्तिः एतत्स्वभावजं कर्म क्षत्रियस्य ४३

185

पंचोलीटीका

शौर्यमिति शौर्यं तेजः धृतिः धैर्यं दाक्ष्यं सम्भ्रमेण कार्येषु प्रयामोहेन प्रतिपत्तिः दक्षस्य भावः दाक्ष्यं युद्धेऽपलायनं शत्रुभ्यः दानं मुक्तहस्तता ईश्वरभावः ईशितव्यान्प्रत्यात्मनः प्रभुशक्तिप्रकटीकरणमीश्वरभावः ४३

रणवीरसंस्कृतबोधिनी ॥

अथ क्षत्रियस्य स्वाभाविकं कर्माह शौर्यमिति शौर्यं शूरभावः पराक्रमश्च तेजः स्वभावजं परैरभिभवनसामर्थ्यमोजः धृतिः स्वभावजकर्मणि दृढोपष्टम्भः दाक्ष्यं चातुर्यं तथा युद्धे चाप्यपलायनमपराङ्मुखत्वं निर्भयत्वमित्यर्थः दानमौदार्यं ईश्वरभावः पराधीनत्वासहिष्णुत्वं एतत्क्षत्रियवर्णस्य स्वभावजं कर्म ४३॥

मधुभाष्य

४३॥

भाषा अनुवाद ॥

अब क्षत्रियके स्वभावज जो कर्म उनको कहतेहे कि शौर्य क
हे पराक्रम औ तेज कहे धीठापनइति कहे धैर्य औ दाक्ष्य कहे
निपुणता और संग्राम आन पड़ने से पीठिदेन भागना तथा दान
कहे उदारता औ ईश्वर भाव अर्थात् विषय सम्बंधी नियम आदि
करने की शक्ति ये सब क्षत्रिय के स्वभाव ही से उत्पन्न कर्महै ४३ ॥

दोहा

शौर्य तेजधृति चतुरता अपलायन युद्धमाहि दानहिईश्वर
ता कर्मस्वभावक क्षत्रियकाहि ४३ ॥

186

कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजं
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजं ४४

शांकरभाष्य टीका १

कृषीति कृषिगोरक्ष्यवाणिज्यं कृषिश्च गोरक्ष्यं च वाणिज्यं च कृ
षिगोरक्ष्यवाणिज्यं कृषिर्भूमेर्विलेखनं गोरक्षतीति गोरक्षस्तद्भावो
गोरक्ष्यं पाशुपाल्यं वाणिज्यं वणिक्कर्म क्रयविक्रयादिलक्षणं वैश्य
कर्म वैश्यजातेः कर्म वैश्यकर्म स्वभावजं परिचर्यात्मकं शु
श्रूषास्वभावं कर्म शूद्रस्यापि स्वभावजं ४४ ॥

आनंदगिरि टीका २

वैश्यशूद्रयोः कर्म विवक्षयानुवदति कृषीति स्पष्टार्थः ४४ ॥

स्वामिकृत टीका ३

कृषीति कृषिः कर्षणं गा रक्षतीति गोरक्षस्तस्य भावो गोरक्ष्यं पा
शुपाल्यमित्यर्थः वाणिज्यं क्रयविक्रयादि एतद्वैश्यस्य स्वभावजं
कर्म त्रैवर्णिकपरिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजं
४४ ॥

पिशाचभाष्य टीका ४

गवां रक्षा रक्षणं गोरक्ष्यं वणिक्क्रयविक्रयौ तस्य भावो वाणिज्यं
एतद्वैश्यस्वभावजम् ४४ ॥

रामानुजभाष्य टीका ५

कृषीति कृषिः सस्योत्पादनं कर्षणं गोरक्ष्यं पशुपालनमित्यर्थः वा
णिज्यं धनसंचयहेतुभूतं क्रयविक्रयात्मकं कर्म एतद्वैश्यस्य स्वभा
वजं कर्म सर्ववर्णत्रयाणां परिचर्यारूपं शूद्रस्य स्वभावजं कर्म तदेत
च्चक्रमेण वर्णानां वृत्तिभिः सह कर्तव्यानां शास्त्रविहितानां यज्ञादि
कर्मणां प्रदर्शनार्थमुक्तं यज्ञादयः त्रयाणां वर्णानां साधारणाः श
मदमादयोऽपि त्रयाणां वर्णानां समस्तानां साधारणाः ब्राह्मणस्य
सत्वोद्रेकस्य स्वाभाविकत्वेन शमदमादयः सुखोपादाना इति का।
त्वात्तस्य शमदमादयः स्वभावजं कर्मेत्युक्तं

श्री
गी.टी.
सु.

187

रजस्तमःप्रधानेनशमदमोदःस्वाभाविकं कर्म ... क्षत्रियवै
श्ययोस्तु ... रजस्तमःप्रधानेनैवशमदमादयोदुःखोपादाना
इतिकृत्वाननतत्कर्मेस्वकृताहानास्य कृषिर्याजनाध्यायनप्रतिग्रहा
नित्रियस्यजनपदपरिपालनेनैवशास्त्रकल्पाद्योयस्योक्ताःस्वस्वत
कर्तेमाहतिश्रद्धवर्णपरिचर्यां ... ति ४४ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं ४४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपारी टीका ७

अथवैश्यशूद्रयोराह कृषीति कृषिर्लांगूलादिभिर्भूमिकर्षणं गोः
रक्षतीतिगोरक्षः तस्यभावोगोरक्ष्यंपशुपालनेवाणिज्यंक्रयविक्र
यादि एतद्वैश्यस्य तथात्रिवर्गस्यपरिचर्यात्मकंसेवनात्मकंशूद्रस्य
४४ ॥

वनमाली टीका ८

अथोत्तमवर्णद्वेचकर्षणं कृषिः गोरक्षापशुरक्षणं वाणिज्यंक्रय
विक्रयादिकेवाणिज्यः कर्मवैश्यजातेःस्वभावजंकर्म द्विजातेःपरिच
र्यात्मकंकर्मशूद्रस्यापिस्वभावजम् ४४ ॥

कुसमवैजयन्ती टीका ९

वैश्यस्यकर्माहकृषीतिकृषिःसस्यार्थमत्रयहलादिनाभूमिकर्षणं
गोरक्ष्यंपशुपालनंवाणिज्यंधनार्थंवृद्धिसंचयहेतवम् तत्क्रयविक्र
यकुसीदादिरूपंकर्मस्वभावजंस्वाभाविकंवैश्यकर्मवैश्यस्यक
र्मभवतिशूद्रस्यकर्माह परिचर्येतिपरिचर्यात्मकंब्राह्मणादी
नांत्रयाणांसेवारूपं शूद्रस्यापिस्वभावजंस्वाभाविकंकर्मभवति
एतानिवर्णकर्माण्याश्रमकर्माण्युपलक्षणानीतिबोध्यं ४४ ॥

मधुसूदनी टीका १०

कृषिगोरक्ष्यमार्यभूमेविलेखनंगोरक्षस्यभावोगोरक्ष्यंपाशुपाल्यं
वाणिज्यंवाणिज्यःकर्मक्रियविक्रयादिलक्षणंकुसीदमप्यत्रांतर्गतम
नीयं वैश्यकर्मवैश्यजातेःकर्मस्वभावजंतमउपसर्जनरजोगुण
स्वभावजं परिचर्यात्मकंद्विजातिशुश्रूषात्मकंकर्मशूद्रस्यापिस्व
भावजंरजउपसर्जनतमोगुणस्वभावजं [वेदेदेवं ...]

४४

सदानंदी टीका ११

भूमेर्विलेखनेन सस्यानिष्पत्त्यर्थं कृषिः सहता गोरक्षं पशुपालनं सा
हाणिज्यं क्रयविक्रयो १ वैश्यजातेर्वैदिकमेतेषानिस्वभावजं हि
जशुश्रूषणं कर्म शूद्रस्यापिस्वभावजं २ ४४ ॥

नीलकंठी टीका १२

वैश्यशूद्रयोः कर्माण्याह कृषीति स्पष्टार्थः श्लोकः ॥ ४४ ॥

आनंदी टीका ११

गोशब्दः पशुसामान्यवाची गोरक्षं पाशुपाल्यं वाणिज्यं क्रयवि
क्रयहत्यादिनाजीवनम् ४४ ॥

रामकंठी टीका १४

अथैवं विधं वैश्यशूद्रयोः कर्माह कृषिर्भूम्यादिवापः भूह
लादि विलेखनं गोरक्षं गोरक्षणं गोरक्षस्य भावो गोरक्षं पशुपा
ल्यम् गोशब्देन पशवस्तद्राणामपि परिग्रहात् इत्येण इत्या
पालनं गोशब्देनपशवस्त... वाणिज्यं
...केपालानि क्रीणस्य योजीवति स वणिक् तस्य भावो वाणिज्यं
पनर्दर्मात्मकस्वभावजं वैश्यकर्म परिचर्यात्मकं कर्म शूद्रस्या
पिस्वभावजम् परिचर्यात्मकं वर्णत्रयस्य शुश्रूषात्मकं कर्म पूर्ववत्
इस्य स्वभावसमन्वयं कर्मेति चान्तर्वर्णस्य कर्मप्रविभागं प्रतिपा
दनार्थमा
...स्वकर्मानुष्ठानस्य प्रकरणे विवदितिन फलप्रतिपादना...
ह ४४ ॥

लासिकी ...टीका

वैश्यशूद्रयोः क
कृषिः कर्षणं गोरक्षतीति गोरक्षस्तस्य भावो गोरक्षं पशुपा
लनमित्यर्थः वाणिज्यं क्रयविक्रयादि एतद्वैश्यस्य स्वभावजं
कर्म त्रैवर्णिकपरिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजं ४४

पंडोलीटीका

...शूद्रयोः कर्मदर्शयति कृषीति कृषिगोरक्षवाणिज्यं पशु

गी.
टी.
अ

188

पालनं वैश्यकर्म स्वभावजं शूद्रजातेरपि परिचर्यात्मकं द्विजशु
श्रूषात्मकं कर्म स्वभावजं ४४

एतावीरसमिद्धाधिनी॥

वैश्यकर्माह कृषीति कृषिर्व्रीह्यादिवापनहेतो र्हलादि विलेखनं
गोरक्ष्यं पाशुपाल्यं वाणिज्यं क्रयविक्रयादि एतद्वैश्यस्य कर्म
विहितं शूद्रस्य तदाह परिचर्येति त्रैवर्णसेवारूपं शूद्रस्य विहि
तं कर्म ४४

मधुभाष्य

४८॥

भाषा अनुवाद

अब वैश्यके स्वभावज कहे स्वभाव सिद्ध कर्म कहते है कि कृ षी कहे खेती औ गोरक्षा सो दो प्रकारकी है एक तो गउका रक्षण दूसरा अपने आश्रितका पालन करना औ वाणिज्य व्यापार खरीद ना वेचना तथा ब्राह्मण देवतामे श्रद्धा रखना ये सब वैश्यवंशस्वा भाविक कर्म है अब शूद्र का कर्म सुनो कि इन तीनो वर्णोकी सेवा रूप व्यापार शूद्रका स्वभावज कर्म है शूद्रको सेवा छोड और कर्म मे नही है ४४ ॥

दोहा

कृषि गोरक्ष वणिज य वैश्य स्वभाव कर्म सेवाकर्म दिसू
द्रको स्वाभावक यह धर्म ४४ ॥

189

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः स्व
कर्मनिरतः सिद्धिं यथा विंदति तच्छृणु ॥ ४५

शांकरभाष्य टीका १

एतेषां जातिविहितानां कर्मणां सम्यगनुष्ठितानां स्वर्गप्राप्तिः फलं स्वभावतः वर्णाश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलधर्मायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते इत्यादिस्मृतिभ्यः पुराणे च वर्णिनामाश्रमिणां च लोकफलभेदविशेषस्मरणात् कारणान्तरात्तु इदं वक्ष्यमाणं फलं शृणु स्वे स्वे इति स्वे स्वे यथोक्तलक्षणभेदे कर्मण्यभिरतस्तत्परः संसिद्धिं स्वकर्मानुष्ठानादशुद्धिक्षये सति कायेन्द्रियाणां ज्ञाननिष्ठायोग्यतालक्षणां संसिद्धिं लभते प्राप्नोति नरोऽधिकृतः पुरुषः किं स्वकर्मानुष्ठानादेव साक्षात् संसिद्धिं न कथं तर्हि स्वकर्मनिरतः सिद्धिं यथा येन प्रकारेण विंदति तच्छृणु ॥ ४५ ॥

आनंदगिरिकृतटीका २

विभज्योक्तानामभ्युदयकर्मणां विहितत्वादेव मोक्षमादिपरिचर्यान्तकर्मणां स्वभावतो विहितत्वादेव मोक्षं प्रत्युपायत्वमात्रं फलमादावुपन्यस्यति एतेषामिति स्वभावत इति शेषः तत्र प्रमाणमाह वर्णा इति शेषेणेत्यस्यार्थं कर्मानुशयशब्दितेनेत्युच्यते प्रत्येकं देशादिषु विशिष्टशब्दः सम्बध्यते आदिशब्देन तद्यथा अन्नफलार्थे निमित्ते आम्राः रोप्यन्ते एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते न हि भिर्विशिष्टशब्दः सम्बध्यते एवं धर्मं चर्यमाणमर्था अनुत्पद्यन्ते इत्यादिस्मृतिर्गृह्यते इत्युक्तानां कर्मणां स्वर्गफलत्वे धर्महानिर्भवतीति ऋतं हि यस्य सम्यक् कर्माणि गृहस्थः उक्तमित्याह पुराणे चेति उक्तं हि यस्य सम्यक् करोत्येवं गृहस्थः परमं विधिं तत्र ग्रीवां पद्मकोशे लोकानामोमवक्तमातिति यत्ते नोनियतस्त्वर्थी वानप्रस्थश्चरेत् मतिः सहस्रातिवदोषान् जये लोकाश्च चाश्वतान् इति मोक्षाश्च यथाशास्त्रं यथोक्तं ब्रह्मलोकान् सु स्थिनतद्धिमुक्तः अनित्यनक्षत्रलोकाभवेनीति फलविशेषकारणैः एते हिजातिरितिचसर्वं एतेषां एष लोका भवेनीति

श्री
गी॰टी॰
अ॰

190

यदि तु कर्मभिर्ज्ञानयोग्यतानि कर्माण्यनुष्ठीयेरंस्तदा मोक्षफलत्वे
तेषां संस्पतीमाह कारणान्तरादिति तदेव कारणान्तरं यन्मोक्षाय
दृष्टा तेषामनुष्ठाने मोक्षोपायेषु सात्विकेषु ब्राह्मणधर्मेषु क्षत्रिया।
दीनामनधिकारात् ब्राह्मणानामेव मोक्षो न क्षत्रियादीनामित्याशंकाह
स्वे स्वे इति यथा स्व कर्मभिरतस्य शुद्धिद्वारा ज्ञाननिष्ठायोग्य
ताप्राप्तावप्राप्तज्ञानस्य मोक्षोपपत्ते ब्राह्मणातिरिक्तस्यापि ज्ञानवतो मु
क्तिरिति मत्वा पूर्वार्द्धं व्याचष्टे स्वे स्वे इत्यादिना संसिद्धिशब्दस्य मोक्षार्थ
त्वे गृहीत्वा स्वधर्मनिष्ठत्वमात्रेण तल्लाभे नादृष्टेन सन्न्यासादिविधा।
नानर्थक्यमिति मत्वानः शंकते किमिति न तावन्मात्रेण साक्षान्मोक्षो
ज्ञाननिष्ठायोग्यता चेति परिहरतीति नेति नहि कथं स्वधर्मनिष्ठस्य सं
सिद्धिरिति पृच्छति कथं तद्दीति उत्तरार्द्धेनोत्तरमाह स्वकर्मेति तच्छृणु
प्रकारमेकाग्रचेतोभूत्वा श्रुत्वावधारय इत्यर्थः ४५ ॥

+ एवंभूतस्य ब्राह्मणादिकर्मणो ज्ञानहेतुत्वमाह ॥

स्वामिकृतटीका ३

+ स्वे स्वे इति स्वस्वाधिकारविहितेकर्मण्यभिरतः परिनिष्ठितो नरः सं
सिद्धिं ज्ञानयोग्यतां लभते [illegible]
[illegible]
[illegible] ४५ ॥

पिशाचभाष्यटीका ४

स्वकीयेकर्मण्यभिरतः सिद्धिं यथाविन्दति तच्छृणु ४५

रामानुजभाष्यटीका ५ ॥:

स्वे स्वे इति स्वे स्वे यथोदितेकर्मण्यभिरतो नरः संसिद्धिं परमपदप्राप्तिल
भते स्वकर्मनिरतो यथा सिद्धिं विन्दति परमं पदं प्राप्नोति तथा शृणु ४५

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ४५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपादी टीका ७ ॥

अथ ब्राह्मणादिकर्मणो ज्ञानहेतुत्वमाह स्वे स्वे कर्मणीति सार्द्धेन स्वे
स्वे स्ववर्णाचितकर्मण्यभिरतः श्रद्धयाप्रवृत्तः सन्नरः संसिद्धिं ल
भते स्वकर्मनिरतः शुद्धबोधो यथा येन प्रकारेण सिद्धिं प्राप्नोति तन्मया व
र्ण्यमानं शृणु ४५ ॥

+तदेवं वर्णानां स्वभाव

+ज्ञानेगौणत्वाद्धर्मोऽत्रविहिताः अथविविधधर्माः शास्त्रेष्वाम्नाताः तदु-
क्तंभविष्यत्पुराणे धर्मः श्रेयः समुद्दिष्टंश्रेयोऽभ्युदयलक्षणं सच
पंचविधःप्रोक्तोवेदमूलःसनातनः वर्णधर्मःस्मृतस्त्वेकः आश्र-
माणामतःपरंवर्णाश्रमस्तृतीयस्तुगौणोनैमित्तिकस्तथा वर्ण-
त्वमेकमाश्रित्ययोधर्मःसंप्रवर्तते वर्णधर्मःसउक्तस्तुयथोपन-
यनंनृपयस्त्वाश्रमंसमाश्रित्यअधिकारःप्रवर्तते सखल्वाश्रम-
धर्मःस्याद्भिक्षादंडादिकोयथा वर्णत्वमाश्रमत्वंचयोऽधिकृत्यप्रव-
र्तते सवर्णाश्रमधर्मस्तुमौंज्याद्यामेखलायथा योगुणेनप्रवर्तेतगु-
णधर्मःसउच्यते यथामूर्धाभिषिक्तस्यप्रजानांपरिपालनं निमित्त-
मेकमाश्रित्ययोधर्मःसंप्रवर्तते नैमित्तिकःसविज्ञेयःप्रायश्चित्तवि-
धिर्यथा अधिकारीयूधर्मश्चविविधधर्ममाहहारीतः अथाश्रमाणां
पृथग्धर्मोविशेषधर्मः समानधर्मः कृत्स्नधर्मश्चेति पृथगाश्रमा-
नुष्ठानात् पृथग्धर्मोयथाब्रह्मचारिधर्मः स्वाश्रमविशेषानुष्ठाना-
द्विशेषधर्मोयथानैष्ठिकयायावरानुज्ञापिकवानराश्रमसिद्धा-
नांसर्वेषांयःसमानोधर्मःससमानधर्मोनैष्ठिकःकृत्स्नधर्मइतिनै-
ष्ठिकोब्रह्मचारिविशेषःयायावरोगृहस्थविशेषः अनुज्ञापिको
वानप्रस्थविशेषःचतुराश्रमसिद्धोयतिविशेषः सर्वेषामितिव-
र्णानामाश्रमाणांचसमानोधर्मोयथामहाभारते आनृशंस्यमहिंसाचा-
प्रमादःसंविभागोनाश्राद्धकर्मातिथ्यंचसत्यमक्रोधएवचस्वेषु
दारेषुसंतोषः शौचंचैनित्यानसूयताआत्मज्ञानंतितिक्षाचधर्मःसा-
धारणोनृप सर्वाश्रमसाधारण्यमाहोदाहृतः निष्ठासमाससमा-
भिक्तस्वयोजनोनैष्ठिकःमोक्षहेत्वात्मज्ञानोत्पत्तिप्रतिबंधप्रसवा-
पपरिहारायनिष्कामकर्मानुष्ठानंकृत्स्नधर्मइत्यर्थः आश्रमा-
श्चशास्त्रेषुचत्वारआम्नाताः यथाहगौतमःतस्याश्रमविकल्पमेके
ब्रुवतेब्रह्मचारीगृहस्थोभिक्षुर्वैखानसइति आपस्तंबःचत्वारआ-
श्रमागार्हस्थ्यमाचार्यकुलंमौनंवानप्रस्थमितितेषुसर्वेष्वपियथोपदे-
शमव्यग्रोवर्तमानःक्षेमंगच्छतीतिवसिष्ठः चत्वारआश्रमाब्रह्म-
चारिगृहस्थवानप्रस्थपरिव्राजकास्तेषांवेदमधीत्यवेदौवेदान्वावि-

श्री
गी टी
श्र

१९१

शीर्णब्रह्मचर्यो यमिच्छेत्तमावसेदिति एवं नैवाष्टयज्ञमार्गोपयाम्ना
नः तथा फलमप्यज्ञानामाम्नाते यथाहमनुः श्रुतिस्मृत्युदितं ध
र्ममनुतिष्ठन् हि मानवः इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखं
मुत्तमं सुखमिति यथाप्याम्नातेन फलशेषेणाजातिरूपवर्णबल
श्रुतमेधाप्रज्ञाद्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यन्ते गौतमः व
र्णाश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण।
विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्र
तिपद्यन्ते विष्वञ्चो विपरीता नश्यन्ति तच्छेषशब्देन भुञ्जन्तीति।
होमादिकर्माणि निरिके चित्रादिकर्माणि प्रायशाहितमप्यनेन तदेवं
कर्मणामेकदेश इति स्थिते कृतार्थ्येन शयवान् दृष्टस्मृतिभ्यां।
पैवमन्वेवचैतदवगम्यते गौतमोऽप्यपितत्त्वश्रवणस्मात्स्विन्नायप
त्येति विष्वञ्चः सर्वतोगामिनो यथेष्टचेष्टाः विपरीता नरकादौ ज
न्म शतिपद्य विनश्यन्ति कृमिकीटादिभावेन सर्वशः श्रुतार्थेभ्यो भ्रष्ट
नेत्यर्थः हारीतः कामैः केचिद्यज्ञदानेन तपोभिर्लोकान्
यान्ति जन्म कामैर्मुक्ताः समयज्ञाः स्वदानास्तपोनिष्ठास्तपान्यान्ति
लोकान् अत्र कामनाम्यदसज्जावनिबन्धनः फलभेदो दर्शितः भवि
ष्यत्पुराणे फले विनाप्यनुष्ठानेन निष्कामा नाभिष्यन्ते स्फुटं काम्या नोत्स्वफ
लार्थेन दोषवानार्थमेव तन्नैमित्तिकानां करणाद्विविधकर्मणां फले ह
र्यके विद्यानन्यस्तु इति सम्प्रवर्तते अत्र मतिः तथा चापस्तम्बः प्रसम
यते नित्याक्रियात्मयाचा सङ्गेषगाफलानि विदुः श्रुत्यापस्तम्बा
दयः तथा यथा फलार्थी नित्यादि वचनैरानुषङ्गिकफलता
नित्यकर्मणो विदुः स्मृतिसूत्र धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति
प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयः त्यन्तमा
त्मानमाचार्यकुले वसादयन्निति ब्रह्मसंस्थोऽमृतत्वमेति ब्रह्मचारिणः का
सर्वे एते पुण्यलोका भवन्तीति नेषां मतः कारणादभावे मोक्षमा
वेदनात्मानः कृतानामेषामेव परिज्ञानकभावेन ज्ञाननिष्ठया
मोक्षमाह ब्रह्मसंस्थोऽमृतत्वमेतीति नैष्ठिकब्रह्मचारी गृहस्थो
वानप्रस्थो वान्यमतः फलाभिसन्धिना योगेन भगवदर्पणबुध्या

वनमाली टीका ८

फलेच्छाशून्यमनयानुष्ठितेन ब्राह्मणादिकर्मणा भगवदर्पणेन द्वारा मोक्षावाप्तिर्भवतीत्याह स्वे स्वे इति स्वे स्वे नत्न वर्णाश्रमविहितेन नु स्वे स्वे कर्मणि अभिरतः सम्यगनुष्ठानपरः संसिद्धिं फलेच्छाशून्यमनयानुष्ठितेन कर्मणाशुद्धान्तःकरणः सन् चित्तशुद्धिद्वारेण सम्यग्ज्ञानोपलब्धियोग्यतां लभते नरः मनुष्याणां हि वर्णाश्रमाभिमानेन देवानामपि वर्णाश्रमाद्यभावात्तेषां कर्मणां किमधिकारोऽस्तीति साधिते देवता अधिकारिणो न नु एवं पहेन्तो कर्मणां कथं मोक्षहेतुत्वे उपायविशेषादित्याह स्वकर्मनिरतः सिद्धिं यथा विन्दति कथं यथा येन प्रकारेण विन्दति तच्छृणु ४५ ॥

उत्तमवेजयन्ती टीका ९

ननु एवं भूतं स्ववर्णोचितं कर्म कुर्वीत न हिंसा नेशाश्रयादिमाह स्वे स्वे इति स्वे स्वे वर्णाश्रमोचिते कर्मणि यत्नेनानुष्ठिते कर्मणीति स्वे स्वे यथोदिते स्वे स्वे वर्णाश्रमोचिते कर्मणि नरो मनुष्यः संसिद्धिं हासनवभिरतः परिनिष्ठितस्तदनुष्ठानकर्ता नरो मनुष्यः संसिद्धिं परमपदप्राप्तिकरणं विशुद्धं तत्त्वं कर्मणि तत्परतोज्ञानविज्ञानलाभस्य कर्मणो बन्धकत्वान्न कथं मोचकत्वं स्वकर्माणि तत्कर्मनिरतः स्ववर्णोचितानि कर्माणि स्वकर्मनिरतः स्ववर्णोचितानि अभिनन्दनीयानि चेत्तत्राह स्वकर्मनिरतः सिद्धिं यथा येन प्रकारेण विन्दति लभते तन्न कर्मनिष्ठः संसिद्धिं ज्ञाननिष्ठां यथा येन प्रकारेण उक्तहिविशेषादेव तत्त्वानन्दकारं शृणु मनः सकाशात् ४५ ॥ त्कर्मेव नाम प्रसादयेतीत्याशयः

मधुसूदनी टीका १०

स्वे स्वे तत्तद्वर्णाश्रमविहितेन तु स्वे च्छामात्रकृते कर्मणि कृतिसत्त्वात् सांसिद्धिं देहेन्द्रियसंघातस्याश्रमादिभिः सम्यगनुष्ठानपरः संसिद्धिं देहेन्द्रियवर्णाश्रमाभिमानी हितेनाभिरतः सम्यगनुष्ठानपरः संसिद्धिं लभते नरो वर्णाश्रमाहितवेन सम्यग्ज्ञानोपलब्धियोग्यतां लभते नरो वर्णाश्रमाभिमानी मनुष्यः मनुष्यस्याधिकारित्वात् कर्मकाण्डस्य देवादीनां वर्णाश्रमाभिमानाभावात् शुक्लपक्षे हैमन्ते अनधिकारः वर्णाश्रमाभिमानित्वाभावात् भिमानित्वाभावात् एवं नेयमधिकारस्तेषामप्यस्तीति साधितं देवताधिकरणे उपासनादावधिकारस्तेषामप्यस्तीति साधितं उपायविशेषादित्याह नपेते न पापसनादावधिकारस्तेषां कथं मोक्षहेतुत्वं उपायविशेषादित्याह स्वकर्मनिरतः सिद्धिं यथा येन प्रकारेण विन्दति तच्छृणु

श्री॰
गी॰टी॰
अ॰

१९८

णश्रुत्वातेप्रकारमवधारयेत्यर्थः ४५ ॥

सदानंदी टीका ॥

तदेवंस्वस्ववर्णाश्रमविहितेकर्मण्यासक्तः प्रवृत्तिपरस्तत्सिद्धि
मकुसिद्धिर्महात्मनः १ प्रवर्तनरफलैचैवस्वस्वकर्मानुतिष्ठतो
स्वर्गादिभवतीत्येवप्रमाणेवेदस्मृते २ प्राजापत्यंब्राह्मणानांस्मृ
तंस्थानंक्रियावतां स्थानमैन्द्रंक्षत्रियाणांसंग्रामेष्वनिवर्तिनां ३ वै
श्यानांमारुतंस्थानंस्वधर्ममनुवर्तिनां गांधर्वंशूद्रजातीनांपरिच
र्यानुवर्तिनां ४ एवंचेश्वरभावेनतत्फलेधर्मानुसारिणां फलाभि
संधिसंमार्गादौशास्त्रार्पणाधिपाकृते ५ चित्तशुद्ध्यात्मबोधेनमोक्षहे
तुः स्वकर्मतत् प्रवृत्तस्याफलासक्तिमीश्वरार्पणचेतसा ६ कु
र्मकर्तव्यमित्याहस्वयंश्रीपरमेश्वरः यथोक्तलक्षणेस्वेस्वेनवर्णे
तथाश्रमे ७ विहितैर्वैदिकैःस्मार्तैःकर्मण्यभिरतःप्रमान् यथा
शास्त्रमनुष्ठानपरोहंकारवर्जितः ८ कर्मानुष्ठानतःसिद्धिं
चित्तशुद्धिपरिलयात् विज्ञानेस्मिन्नियोग्यत्वेलभतेधिकृतो
नरः ९ वर्णाश्रमाभिमानित्वान्मनुष्योवाधिकारवान् नदे
वादिर्यतस्तेषांदेवादीनांनचास्त्यसौ १० वर्णाश्रमाभिमानोतो
नास्तिकर्माधिकारतः वर्णाश्रमाभिमानानपेतेब्रह्मावबोधने ११
तेषामप्यधिकारोस्तीत्युक्तंशारीरकेस्फुटं नन्वेषांवेदहेतूनांमोक्ष
कारणताकथं १२ कर्मणामितिचेदस्त्यनपायांतरतःश्रृणु
यथोक्तलक्षणांसिद्धिंयेनोपायेनविंदति १३ तच्छृणुत्वंनमाक
र्णप्रकारमवधारय १४ ॥ ४५ ॥

नीलकंठी टीका १२

कर्मप्रविभागफलमाह स्वेस्वेइति स्वेस्वेमन्वादिभिरुक्तेऽध्या
पनादौअसाधारणेशमदमादौसाधारणेचकर्मण्यभिरतो
निष्ठावान्संसिद्धिंज्ञानयोग्यतांलभतेनरः एतदेवविवरीतुं
प्रतिजानीते स्वेति सिद्धिंवक्ष्यमाणामवांतरसंन्यासलक्षणांनैष्क
र्म्यसिद्धिंयथायेनप्रकारेण ४५ ॥

आनंदटीका १९

त्रैयागमेववर्णानां परिचर्या स्वकर्मानुष्ठानस्य फल
माह स्वेस्वेकर्मणिशास्त्रचोदितेभिरतोनरोयः कश्चित्
तर्वर्णिकस्थानराश्रमिकः संसिद्धिंप्रोक्तप्रकारेणमुक्तिंलभते [illegible]
ननुब्राह्मणएवयतिमात्रएवेत्यर्थः [illegible] ४५
[illegible]

रामकंटीका १४

यथाप्रतिपादितविभागेनस्वेस्वेनिजेनिजेशास्त्रचोदितेकर्मणि
अभिरतः आभिमुख्येनस्वभावकर्मानुष्ठानमात्रेणशक्तोनरःपुरुषः
चातुर्वर्णिकः परमात्मसमर्पितलक्षणांसिद्धिंसम्यक्फलनिष्पत्तिं
लभतेधिगच्छति नकेवलंस्वभावकर्मानुष्ठानमात्रेणैवसिद्धिम
धिगच्छतिकिंतुयथायेनप्रकारेणविशिष्टेनस्वकर्मनिरतःसंसि
द्धिमेतांलभतेतदभिधेयमानंवचस्त्ववधारय ४५ ॥

+यदर्थमेषकर्मविभागःप्रस्तुतस्तदाह॥ लासिकी [illegible]टीका

वि॰ +स्वस्वाधिकारविहितेकर्मणिअभिरतः सक्तश्चातुर्वर्णिकःपुरु
षःसंसिद्धिंज्ञानाधिगमपूर्वंतदुत्कर्षंलभतेतत्प्राप्तिप्रकारमाह
स्वकर्मपरिनिष्ठितोयेनप्रकारेणसि
द्धिंतत्त्वज्ञानंलभतेतदभिधीयमानंशृणु ४५
(in the manuscript the last two lines are interlinear: मार्थेनस्वकर्मनिरतइति / स्वकर्मपरिनिष्ठितोयेनप्रकारेणसि… / …मानंशृणु)

पंचोलीटीका

स्वेस्वेइति नरःअधिकारी।
ब्राह्मणादिकर्मणांतारतम्येनमाह सिद्धिंविद
पुरुषःस्वेस्वेयथोक्तेकर्मणिनतरःसन्येनप्रकारेणसिद्धिं
नितचक्षुणांसिद्धिंस्वकर्मानुष्ठानात्देहेंद्रियाणांअशुद्धिलयसति
ज्ञाननिष्ठायोग्यतालक्षणांलभतेप्राप्नोति ४५

रणवीरसंस्कृतबोधिनी

स्वाध्यायफलमाथ
एवंवर्णविभागेनकर्माणिविभज्यस्वकर्मानुष्ठानस्येष्टफलमाथ
नंप्रतिपादयतिस्वेस्वेइति स्पष्टार्थश्लोकार्थं ननुकथंस्वस्वभा

१९३

वज कर्मानुष्ठानमात्रेणसिद्धिः सत्यां वन्मात्रेणेतस्यांकीदृशं। भवतः कर्मफलदानेस्वातंत्र्यमित्याशंक्याह स्वकर्मेतिसार्थेन यथायेनविशिष्टेनप्रकारेणेत्यर्थः ४५॥

मधुभाष्य

४५॥

भाषा अनुवाद

ब्राह्मण आदि वर्णों के इन सब कर्मों को ज्ञान का हेतुत्व क
हते है कि अपने अपने अधिकार के अनुसार विहित कर्म
मे निरत रहे निष्ठासे ऐसे मनुष्य हे सिद्ध कहे ज्ञानकी योग्य
ता लाभ करते है और कर्मोके द्वारा ज्ञान प्राप्ति की प्रकार इ
स श्लोक के आधेसे ले डेढ श्लोकसे कहते है कि अपने कर्म
मे सब तरह निष्ठायुक्त पुरुष जिस प्रकार से तत्वज्ञान लाभक
रते है सो प्रकार तुम श्रवण करो ४५ ॥

दोहा

सिद्धिप्राप्त होय स्वकर्मनिरत
निज निजकर्महि निरत नर
सिद्धिज्यों लहे मोसें समझें सोय ४५॥

194

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं स्वकर्म
णा तमभ्यर्च्य सिद्धिं विंदति मानवः ४६ ॥१८

शांकरभाष्य टीका १

यत इति यतो यस्मात् प्रवृत्तिरुत्पत्तिश्चेष्टा वा यस्मादंतर्यामिण ईश्वरात्
भूतानां प्राणिनां स्यात् येनेश्वरेण सर्वमिदं ततं जगद्व्याप्तं स्वकर्मणा
पूर्वोक्तेन प्रतिवर्णं तमीश्वरमभ्यर्च्य पूजयित्वा केवलं ज्ञाननिष्ठा
योग्यता लक्षणां सिद्धिं विंदति मानवो मनुष्यः ४६ ॥

आनंदगिरिकृत टीका २

तमेव प्रकारं स्फुटयति यत इति यतः पञ्चम्यर्थे यस्मादित्युक्तं व्याक
रोति यस्मादिति प्राणिनामुत्पत्तिर्यस्मादीश्वरात्तेषां चेष्टा च यस्मादंत
र्यामिणो येन च सर्वं व्याप्तं स्वदेव घटादिकार्यं सकारणातिरिक्तस्वरू
पाभावात्तं स्वकर्मणाभ्यर्च्य मानवः संसिद्धिं विंदतीति संबंधः न
हि ब्राह्मणादीनां यथोक्तधर्मनिष्ठया साक्षान्मोक्ष उपलभ्यते तस्य
तां नैकलभ्यत्वात् किंतु तन्निष्ठानां शुद्धबुद्धीनां कर्मसु फलमपश्य
तामीश्वरप्रसादासादित विवेकवैराग्यवतां सन्न्यासिनां ज्ञाननिष्ठायो
ग्यतावतो ज्ञाननिष्ठाया मुक्तिरित्यभिप्रेत्याह केवलमिति ४६ ॥

स्वामिकृत टीका ३ ॥

स्वकर्मेति स्वकर्मपरिनिष्ठितो यथा येन प्रकारेण तत्त्वज्ञानं लभते तं प्रकारं शृणु तमेवाह यत इति ॥

+ कर्मणा ज्ञानप्रकारमाह सार्धेन

+ यतोंतर्यामिणः श्री परमेश्वराद्भूतानां प्राणिनां प्रवृत्तिश्चेष्टा भवति ये
न कारणात्मना सर्वमिदं विश्वं ततं व्याप्तं तमीश्वरं स्वकर्मणाभ्यर्च्य पूज
यित्वा सिद्धिं लभते मनुष्यः
४६ ॥

पैशाचभाष्य टीका ४

यतो यस्मात्प्रवृत्तिः भूतानां पृथिव्यादीनां येन सर्वमिदं ततं व्या
प्तं स्वमात्मीयेन कर्मणा तमीश्वरमभ्यर्च्याराध्य सिद्धिं मोक्षं विंदते लभ
ते मानवः मनुष्यः ४६ ॥

रामानुजभाष्य टीका ५

यत इति यतो भूतानामुत्पत्त्यादिका प्रवृत्तिः येन च सर्वमिदं ततं स्वकर्म
णा तमिंद्राद्यंतरात्मतयावस्थितमभ्यर्च्य मत्प्रसादात्मप्राप्तिरूपां सिद्धिं।
विंदति मानवः मत्त एव सर्वं प्रवर्तते मया च सर्वमिदं ततमिति पूर्वमे
वोक्तं अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा मत्तः परतरं नान्यत् किं।

श्री· गी· टी· अ·

195

विदस्ति येनेजयमयाततमिदंसर्वंजगदव्यक्तमूर्तिना मयाव्यक्तेण
प्रकृतिःसूयते सचराचरं अहंसर्वस्यप्रभवो मत्तःसर्वंप्रवर्तते इत्यादेश्च ४६

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ४६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटी टीका ७

एतदेवाह यतइति यतो यस्मादंतर्यामिरूपात् भूतानां देहिनां चेष्टा भव
ति येनकारणात्मना इदं दृश्यमानं सर्वं ततं विस्तारितं तमीश्वरं स्वक
र्मणा वर्णाश्रमोचितेन कर्मणा अभ्यर्च्य आराध्य मानवः सिद्धिं विंद
ति लभते अस्मिन्नर्थे सर्ववेदाः स्मृतयो उपमस्ताः संति ४६ ॥

स्ता ह्यः

वनमाली टीका ८

यतः सदनंतगुणालयात्सर्वज्ञादंतर्यामिणो भूतानां स्थिरजंगमानां
प्रवृत्तिरुत्पत्तिश्चेष्टा च भवति येन सर्वनियामकेनेदं सर्वं जगत्ततं व्या
मे स्वकर्मणा वर्णाश्रमोचितेन निःकामेन भगवदर्पितेन तमभ्य
र्च्य संतोष्य सिद्धिं भगवदपरोक्षज्ञानरूपां मुक्तिरूपां च मानवो विंद
ति लभते ४६ ॥

उत्तमवैजयंतीकारः ९

तं प्रकारमाह यत इति यतः परमपुरुषात् भूतानां विज्ञानात्मकानां
ब्रह्मादिस्थावरांतानां प्रवृत्तिर्जन्मादिरूपा भवति येन चेदं सर्वं जगत्
ततं व्याप्तं तेन परमेश्वरमिदं यतराज्यरूपेण व्यवस्थितेन स्वकर्मणा स्ववर्णा
श्रमोचितेन कर्मणा अभ्यर्च्य सम्यक्पूजयन् अयास्कारितमिदं कर्म कृतमि
त्येतेन परमपुरुषस्य संतोषो भवेदेवं भगवति न्यस्तं सर्वं कर्म समर्प्य
मर्त्यः मानवो मनुष्यस्तत्प्रसादात् सिद्धिं ज्ञाननिष्ठां विंदति प्राप्नोति
ननु यदि ब्राह्मणादयो वर्णाश्रमवंतो निष्ठरूपं स्वधर्मं मन्यमानास्सं ती
ऽतिसावद्यरूपं परधर्ममाश्रयेयुस्तर्हि को वा दोष इति शंकायां परधर्मा
श्रयेदोषमाह ४६ ॥

मधुसूदनी टीका १०

यतो मायोपाधिकचैतन्यानंदघनात् सर्वज्ञात्सर्वशक्तेरीश्वरादुपा
दानाद्विभिन्नात्सर्वान्तर्यामिणः प्रवृत्तिरुत्पत्तिर्मायामयी स्वाप्नरथा
दीनामिव भूतानां भवनधर्मिणामाकाशादीनां येन चैकेन सद्रूपेण स्फु
रणरूपेण च सर्वमिदं दृश्यजातं [illegible]विकालेषु ततं व्याप्तमात्मन्येवात

भ्रांतिकल्पितस्याधिष्ठानानतिरेकात् तथाचश्रुतिः यतोवाइ
मानिभूतानिजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतित
द्विजिज्ञासस्वतद्ब्रह्मेतिश्रुत्यंतरं इतिश्रुतेः तोपंचमीयतोयेनेति
चैकवचनविवक्षितंत्राने देशब्रह्मणिनिब्जानादानेदादेवांलिमाति
भूतानिजायंतेइतिचतस्यनिर्णीयवाक्यमायाद्येन प्रकृतिविद्या।
मायिनंतमहेश्वरमित्यादिश्रुतेतरांश्चमायोपाधिलाभः यः सर्व
ज्ञः सर्वविदित्यादिश्रुतेतरान्सर्वज्ञत्वादिलाभः प्रपंचश्चोन्नयप्रवा
यमर्थोभगवताप्रकाशितः यतः प्रवृत्तिर्भूतानांयेनसर्वमिदंत
ते तमेतर्यामिणंभगवंतंस्वकर्मणाप्रतिवर्णाश्रमविहितेनाभ्य
र्च्यतोषयित्वातस्मादैकान्त्यज्ञाननिष्ठायोग्यतालक्षणांसि।
द्धिमंतःकरणशुद्धिंविंदतिमानवः देवादिलक्षणसनामात्रेण।
निभावः [illegible] ॥ ४६ ॥

सदानंदी टीका ११

मायोपाधिकचैतन्यादेकवचनरूपतः सर्वज्ञात्सर्वशक्तेः श्रीपरमे
श्वरतोयतः १ उपादानान्निमित्ताच्च सर्वांतर्यामिणः सतः मायाम।
यीसमस्तनिर्भूतानांजनिधर्मिणां २ खादीनांभौतिकानांचक
ल्पितानानास्वरूपात्मनो सतः स्फुरणरूपेणयेनचैकेनसर्वथा ३ टपय
जातमिदंसर्वंसदात्मसंगिना नानिरेकोत्याधिष्ठानात्कल्पित
स्मनागपि ४ पुनोवेभ्यादिवाक्योक्तोदर्शीनोर्थइत्युक्तं तेमत
र्यामिणं विसृज्य वर्णाश्रमकर्मणा ५ तोषयित्वा स्वविज्ञानोसति।
योग्यतालक्षणं तत्स्वादाद्धियः शुद्धिमिति हितांलभतेनरः ६ वर्णा
श्रमसमधिकृतस्यायोविशुद्धेधर्मैः कृतैर्विहितईशासमर्चना
त्वः तेनेश्वरंयमधिकारिजनः समर्चयामासोनीतिसिद्धिमनिर्गानम
हेत्वर्थे ७ ॥ ४६ ॥

नीलकंठी टीका १२

तमेवप्रकारमाह यतइति प्रवृत्तिः कायवाङ्मनोनिर्वर्त्याचेष्टा
यतोहेतोरंतर्यामिणः येनवागाम्भ्रयतइत्यादिश्रुतेः येनइदंसर्वं
व्याप्तंतेयाप्तंउपादानत्वात् स्वकर्मणातमभ्यर्च्यसिद्धिंमोक्षं
विंदतिलभतेमानवः मनुष्याधिकारिकत्वाच्छास्त्रस्य परमेश्वरे
निजकर्मणामर्पणमेवमाराधनमित्यर्थः ॥ ४६ ॥

+नतत्वकेवलस्यास्यकर्मणोमुक्तिसाधनत्वंकिंतुज्ञानसमुच्चितस्येतिदर्शयति ॥

श्री॰ गी॰टी॰ प्र॰

आनंदी टीका ९६

+स्वकर्मणास्वेनप्रतिवर्णं नियतेनकर्मणातंपरमेश्वरमेवाभ्य-र्च्य समन्तात्पूजार्थेणप्रकारेणकेवलज्ञानपूर्वमर्चयित्वासिद्धिं मुक्तिंविन्दतिलभतेमानवः ४६ ॥

रामकंठीटीका ४

यतोयस्मात्परमेश्वरात्प्रतिपादितात्स्वभावादेकस्मात्परमकारणा भूतानांचराचराणांप्रवृत्तिर्यथास्वंप्रविभक्तोव्यापारोयेनच तथाप्रविभक्तव्यापारंविश्वंसमस्तंजगदिदंतेनविस्तारितमिच्छा मात्रेणाव्यमवभासितंतमेवपरमेश्वरंपरस्मात्मानंनदिच्छा नियमितेनवस्वेनप्रतिवर्णंनिजेनकर्मणात्र्यासमंतादर्च यित्वापरितोष्यमानवःकर्मभिर्जन्माक्रियास्वयिकृतप्रा वर्णिकोमनुष्यःसिद्धिंसाध्यलक्षणंफलनिष्पत्तिंलभते किमुक्तंभवति यथोक्तपरमात्मस्वरूपानुस्मरणनिहृतिवि सवावहितबुद्धितयाचवर्णामपिवर्णानाममानित्वाभयत्वादि गुणाभिव्यंजिनीदेवसर्गजन्मनामसंकरेणस्वस्वकर्मानुति ष्ठतांपरसिद्धिप्राप्तिरित्येत्रोपपत्तिंपूर्वोक्तांस्मारयन्नाह ४६

लास्तिकी [illegible]टीका

तमीश्वरंस्वकर्मणाप्रतिवर्णाश्रमंविहितेनाभ्यर्च्यपरितोष्य मानवःसिद्धिंतत्वज्ञानंलभते तत्कमिति तमीश्वरंसामान्य तोदृष्टेनानुमापयति यतःप्रवृत्तिरिति यतःश्रीपरमेश्वरात् भूतानांप्राणिनांप्रवृत्तिःप्रसूतोभवति येनचेश्वरेणेदमिदं न्तावधार्यसर्वंसुईरूपंजगततव्यायं यतःस्वधर्मएवमनुष्या णामीश्वरप्रसादहेतुरतः ४६

पंचोली टी

[illegible]

कर्मसमुच्चयज्ञानप्राप्तिप्रकारमाह यतइति यतः यस्माद्भूतानां प्रवृत्तिः उत्पत्तिः येन विश्वं व्याप्तं तमीश्वरं स्वकर्मणा प्रतिवर्णं प्रोक्तेन प्राप्तपूजा सिद्धिं विन्दति प्राप्नोति मानवः अधिकारी केवलनिष्ठा योग्यता लक्षणं प्राप्नोति ४६

196

रणवीरसमिद्धोधिनी

तमेवप्रकारमाह यतइति यतोयस्मादीश्वरादंतर्यामिणःसका
शाद्भूतानांचराचराणांप्रवृत्तिर्यथास्वंप्रविभक्तोव्यापारोभवति
येनचेश्वरेणाप्रविभक्तव्यापारमिदंसर्वंविश्वंततंविस्तारितं तमे
वसर्वेश्वरं स्वकर्मणातदनुष्ठितेनस्वस्ववर्णोचितेनकर्मणाय
ज्ञादिनाभ्यर्च्यमानवः कर्माधिकारीसिद्धिंलभते यथाराजाज्ञा
योपालितायांसंतुष्टाद्राज्ञोभीष्टसिद्धिरेवंपरमेश्वरचोदितेकर्मणि
सम्यगनुष्ठितेवपरंतत्प्रसादेनमहत्पदप्राप्तिरितिभावः ४६॥

मधुभाष्य

४६॥

भाषा अनुवाद ॥

अब कर्म से ज्ञान प्राप्ति का प्रकार कहते हैं कि अन्तर्यामी रूप
जो परमेश्वर जिससे प्राणीमात्र चेष्टा करते हैं और कारण स्वरूप
जो ईश्वर जिस ईश्वर से यह समस्त जगत व्याप्त है उस ईश्वर को स
मस्तकर्मके द्वारा अभ्यर्च्य कहे पूजन करके मनुष्य सम्पूर्ण ज्ञान
की योग्यतास्वरूप सिद्धिको प्राप्त होते हैं ४६ ॥

दोहा

यासें प्रकृति जीवकी जिन रचयो सब कोय ताकों पूज्य स्वक
र्मसें सिद्धि लहैं नरसोय ४६ ॥

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठिता
त् स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषं ४७

शांकरभाष्यटीका १

यत एवमतः श्रेयानिति श्रेयान् प्रशस्यतरः स्वधर्मः विगुणो
पीत्यपि शब्दाद्रष्टव्यः परधर्मात् स्वनुष्ठितात् स्वभावनियतं स्व
भावेन नियतं यदुक्तं स्वभावजमिति तदेवोक्तं स्वभावनियतं
मिति यथा विषजातस्येव कृमेः विषं न दोषकरं तथा स्वभा
वनियतं कर्म कुर्वन्नाप्नोति किल्बिषं पापं स्वभावनियतं कर्म
कुर्वाणो विषजात इव कृमिः किल्बिषं नाप्नोतीत्युक्तं ४७ ॥

आनंदगिरिकृतटीका २

स्वधर्मानुष्ठानस्य बुद्धिशुद्ध्यादिद्वारा मोक्षावसायित्वात्तदनुष्ठा
नमावश्यकमित्याह यत इति ननु युद्धादिलक्षणं स्वधर्मं कुर्वन्न
पि हिंसाधीनं पापमाप्नोति तत्र कथं स्वधर्मः श्रेयानिति तत्राह
स्वभावेति स्वकीये वर्णाश्रमे निमित्तीकृत्य विहितं स्वभावजम
पि हिंसात्मकमपि विहितं कर्म कुर्वन्नित्याह यदुक्तमिति निग्रहात्मकमपि विहितं
मधर्मात्तदुक्तमित्याह यथेति इतश्च विहितं
कर्म कुर्वन् पापं नाप्नोतीत्यत्र दृष्टान्तमाह यथेति
कर्म दोषवदपि कर्तव्यं प्रकारान्तरासंभवादित्युक्तानुवादपूर्वकं
कथयति स्वभावेत्यादिना नहि कृमिर्विषजो विषनिमित्तं मरणं
प्रतिपद्यते तथा पापाधिकृतः पुरुषो दोषवदपि विहि
तं कर्म कुर्वन् पापं नाप्नोतीत्युक्तमित्यर्थः ४७ ॥

स्वामिकृतटीका ३

+स्वकर्मणेति विशेषणस्य फलमाह श्रेयानिति॥ न च
+विगुणोपि स्वधर्मः सम्यगनुष्ठितादपि परधर्मात् श्रेष्ठः
वैश्यवधादिरूपका शूद्रादेः स्वधर्मोऽपि हिंसात्मनादिपरधर्मेणोक्तकर्म
इति मन्तव्यं यतः स्वस्वभावेन पूर्वोक्तेन नियतं नियमेनोक्तं कर्म
कुर्वन् किल्बिषं नाप्नोति

४७ ॥

पिशाचभाष्य टीका ४

श्रेयान्स्वशास्त्रतो विगुणः गुणरहितः शोभनेन सम्यगनुष्ठितो प
रस्मात्परधर्मात्स्वधर्मो विगुणोपि श्रेयान्स्वभावनियतं कर्म
कुर्वन्नाप्नोति किल्बिषं पापं ४७ ॥

रामानुजभाष्य टीका ५

श्रेयानिति एवमात्मकर्तृत्वादियोगदायाथ नस्वरूपः स्वधर्मः
स्वेनोपादानेयोग्यो धर्मः प्रकृतिसंसृष्टेन हि पुरुषेणेंद्रियव्यापार
रूपः कर्मयोगात्मको धर्मः सुकरो भवति अतः कर्मयोगाख्यः स
धर्मो विगुणोपि परधर्मादिंद्रियनियमननिष्ठज्ञाननिष्ठरूपधर्मात्
ज्ञानयोगात्मकेन इंद्रियनियमनरूपतया सप्रमादाद्विस्वनुष्ठि
ताच्छ्रेयान् तदेवोपपादयति स्वभावमिति प्रकृतिसंसृष्टस्य पुरु
षस्येंद्रियव्यापाररूपतया स्वभावत एव नियतत्वात्कर्मणो क
र्म कुर्वन् किल्बिषं संसारं नाप्नोति अप्रमादत्वात्कर्मणः ज्ञानयोग
स्य सकलेंद्रियनियमनसाध्यतया सप्रमादत्वात् ज्ञाननिष्ठस्तु प्र
मादात् किल्बिषं प्रतिपद्यते अतः कर्मनिष्ठैव ज्यायसीति तृ
तीयोक्तं स्मारयति ४७ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं ४७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

अथ स्वधर्मं विवक्तुमाह श्रेयानिति सम्यगनुष्ठितादपि परध
र्मात्स्वकाशाद्विगुणो लौकिकागुणरहितोपि स्वधर्मः श्रेष्ठ
नश्रेयस्करः यथा हिंसाप्रधानत्वेन विगुणोपि क्षात्रधर्मः परधर्मा
न्ब्राह्मणधर्मात् उत्कृष्टादपि श्रेयान् यतः स्वभावेन हृषीके
न स्वधर्मेण नियतेन नियमेनोक्तं कर्म कुर्वन् किल्बिषं पातकं नाप्नो
ति ४७ ॥

वनमाली टीका ८

परधर्मात्सम्यगनुष्ठितादपि श्रेयान् प्रशस्यतरः स्वधर्मो विगुणो।
सम्यगननुष्ठितोपि अतस्त्वया स्वधर्मो युद्धादिरेवानुष्ठेयो न परध
र्मो भिक्षाटनादिरिति भावः ननु एवं बंधरूपः स्वधर्मो युद्धादिः कथं।

कार्यत्वादाह स्वभावनियतं शौर्यतेजइतिप्रागुक्तस्वभावजे

शूद्रादिकर्मकुर्वन्किल्बिषंपापंवधबंधादिनिमित्तंनाप्नोति ४७

जयंतैव जयंती टीका ९

श्रेयानिति स्वनुष्ठितान्सम्यगनुष्ठितादाचरितादपिपरधर्मा

त्सकाशात्स्वधर्मःस्वस्यधर्मोविगुणोपिलोकशास्त्रकोपिसेवनत्वात्रोको

पिवाश्रेयान्सुखकरोभवतिविहितत्वात्यस्माद्देवंतस्मात्स्वभाव

नियतस्वभावेनस्वीकृतात्किंविकारादिरूपेणनियतंनियमेनविहि

तंकर्मकुर्वन्सन्पुरुषःकिल्बिषंदोषंनाप्नोतियद्यपिहिंसानृतादिदो

षयुक्ताःयुद्धवाणिज्यपरूपाद्‌दोविद्यादिधर्माभिक्षाटनादि

दिरूपोब्राह्मणधर्मःनिषशस्त्रत्राद्यपितस्यत्वाद्यादिस्वभावविवि

हितत्वाभावेनदोषवत्वान्याज्यएवेतिभावस्तत्रीयेःध्याये विस्तरे।

णाव्याख्यातत्वादत्रोपरम्यते ४७ ॥

मधुसूदनी टीका ९

+यतःस्वधर्मएवमनुष्याणांभगवत्प्रसादहेतु रतः॥

स्वधर्मोविगुणोस।

+परधर्मात्सम्यगनुष्ठितादपिश्रेयान्प्रशस्यनरःस्वधर्मोशूद्रादिरेवानुष्ठेयो

न्यगनुष्ठितोपितस्मात्तत्क्षत्रियाणांतनान्वयात्स्वधर्मोपिशूद्रादिर्विधवधा

नपरधर्मोभिक्षाटनादिरित्यभिप्रायः नन्वस्वधर्मोपिशूद्रादिःकेशौर्य

दिरप्यवायहेतुत्वान्नानुष्ठेयइतितेत्राह स्वभावनियतंपूर्वोक्तैःशौर्य

तेजइत्यादिस्वभावजैःशूद्रादिकर्मकुर्वन्किल्बिषंपापंवधबंधादि

निमित्तंनप्राप्नोतितथाचप्रागव्याख्यातंस्वधर्मेसमेकृतेनसत्र

निमित्तंनप्राप्नोतितथाचप्रागव्याख्यातंयज्ञेहोमादिषुहिंसायाः

विहितत्वात्निष्टोमादिपशुहिंसायाश्वविहितत्वात्नत्याद्योक्तमधर्मत्वात् [illegible]

अपिप्रत्यवायहेतुत्वाभावात् नत्याद्योक्तमधर्मत्वात् [illegible]

[illegible] ४७ ॥

[illegible]

सदानंदी टीका ११

यतःस्वधर्मएवास्तिभगवतोपकारणेऽनेनवेषणःस्वोधर्मोसम्य

क्तेनानुष्ठितःपरधर्मादविहितात्सम्यकेनानुष्ठिता द

केनानुष्ठितः १ परधर्मात्दविहितात्सम्यकेनानुष्ठितात्श्रेयान

क्षत्रियाणांतनस्मात्स्वधर्मोभवतांपुना २ संग्रामादिरनुष्ठेयोनत्व

भिक्षादिरूपः नन्वहेस्वधर्मोपिवधहिंसादिपापहेतुत् ३ कथ

मयात्रानुष्ठेयइत्याशंकाहमापतिः स्वीकृतोधर्मत्यागत्वान्न

श्री·
गी-टी·
अ-

सस्वभावजं ४ ब्रह्मादिकर्मजकर्वन्नपापं हिंसादिदोषजं शास्त्रप्रा
मनयाप्नोतित्रैधी हिंसानपापदा ५ ज्योतिष्टोमाग्नीषोमीयपश्वादिहिंसा
पश्वशास्त्रतः ब्रह्मोगवेऽहिंसायापत्र्यमवाप्येनदेनजा ६ ४७ ॥

नीलकंठी टीका १२

स्वकर्मणोतिविशेषणस्यफलमाह श्रेयानिति स्वधर्मोविगुणः
किंचिदंगहीनोपिश्रेयान्प्रशस्यतरः किमपेक्षयाश्रेयान् परध
र्मात्स्वनुष्ठितात्सम्यग्विहितादपि उक्तंच स्वधर्मेनिधनंश्रेयः
परधर्मोभयावहइति स्वभावनियतंस्वीयंत्रिविधस्वभावजा
तंकर्मकुर्वन् किल्बिषंदोषंनाप्नोति विषकृमेर्विषमिवनदोष
करं तस्मात्तवभैक्ष्यंहिंसाप्रधानमपिनयुक्तं किंतुहिंसायुक्तोपिस्व
धर्मएवप्रशस्यतरः धर्मेत्ववविहितेःस्मिन्ननीषोमीयपशवाले
भेइवकृते तनिनकिल्बिषप्रसंगोस्तीत्यर्थः ४७ ॥

आनंदीटीका ६

अत्रोपपत्तिं सर्वोक्तामेवलक्षणपरीक्षार्थंस्मारयति स्वधर्मः
स्वजातिधर्मः विगुणोहिंसादिनाविरुद्धगुणः ४७

रामकंठीटीका १४

स्वधर्मेनिधनंश्रेयःपरधर्मोदयादपि यायस्यवर्णस्यशास्त्रवि
हितः स्वआत्मीयोधर्मः स्वाध्यायाद्याचारः सविगुणोपिस
म्यककर्मानुष्ठानात्सामर्थ्यादिनानुकल्पादिनानुष्ठितःस्व
विगतस्वगुणःसम्पूर्णस्वांगोपिश्रेयान्प्रशस्यतरः कस्मात्का
त्परधर्मात् हीनात्तराचारात्कीदृशात्स्वनुष्ठितात्सम्यक्सर्वांगसंपूर्णे
नयानुष्ठितादाचरितात् अतएवयतः स्वधर्मेआत्मीयाचारेयु
द्धादावनुष्ठीयमानेवमृत्युनिधनंविनाशोपिप्रशस्यं कस्मात्का
शात्परधर्मोदयात्क्षत्रियादेरध्ययनाध्यापनात्मकब्राह्मणादि
वर्णान्तराचारानुष्ठानादभ्युदयःस्वर्गादिलक्षणप्राप्तिंतस्मात्ता
दृशात् किमनेनोक्तंभवति इहद्वयेशास्त्रकर्मानुष्ठानेऽधिकृता
एकेरजःसंकीर्णसत्वप्रधानचित्ताः स्वर्गादिफलप्रवृत्तिविष
यधर्मानुष्ठायिनः अपरेतुविशुद्धसत्वप्रधानायेमोक्षापवर्गफ
लनिष्कामविषयधर्मानुष्ठायिनः तेषामुभयेषामपिदैवसर्गाभा

ऽत्स्वधर्मादिनुष्ठानाद्देवोभयत्ररूपतया सिद्धिरुपपन्ना न तु परधर्मा
नुष्ठानाद्यतः पूर्वेषां स्वधर्मस्थानां स्वर्गादिफलप्राप्तिलक्षणा
सिद्धिः श्रूयते परधर्मस्थानां तु प्रत्यवायः श्रूयते उत्तरेषां स्वध
र्मनिष्ठत्वे सम्यग्ज्ञानसंपत्तिः परधर्मनिष्ठत्वे तु ज्ञानकालभ्य
मेव संपद्यते यतः शास्त्रचोदितस्य प्रवृत्यप्रहतस्य स्वस्य कर्मण
स्त्यागः परकर्मणश्चोपादाने द्वेषं रागं च विना न संभवति स
न्नियौच कीदृशं च सम्यग्ज्ञाने नैर्मल्यमित्थं दैवसर्गयोगित्वादय
वर्णार्थिभिरपि सर्ववर्णैर्यथास्वमसंकरेणानुष्ठेयं स्वकर्म
कथंचन न त्याज्यं न हि कर्मत्यागमात्रसाध्यापवर्गप्राप्तिः सात्विकज्ञाना
देव सिध्यति ज्ञानं दैवसर्गीयव्यभिचारितयोक्तं तत्रामानित्वमद
म्भित्वमित्यादिना त्रयोदशभिः साकल्येन प्रतिपाद्य षोडशारंभेऽभयं
सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिरित्यादौ दैवगुणसामग्री कथ्यते
प्रथममेवानूदितम् तत्र सर्ववर्णसाधारणं दैवसर्गादिभेदस्य
तथात्वरूपत्वात् वर्णानां कर्मविभागस्य सर्गयोश्च गुणविभागस्य
प्रपंचेन ह्युपपद्यते यदि हि द्विजातय एव वर्णा दैवसर्गाः
शूद्रवर्णश्चासुर इति स्यात्तद्वर्णभेदेन सर्गभेद
मत्वेन वा कर्मप्रविभागायाभिधीयेत नचैतदुपपद्यते सर्गभेद
स्य सर्ववर्णसाधारण्ये सति गुणानां व्यभिचारदर्शनात् तथा च ब्रा
ह्मणादयोऽपि दंभदर्पाद्यासुरसर्गगुणयोगिनो दृश्यन्ते तस्माद्दै
वसर्गभाजां सर्ववर्णानां यथोक्तापवर्गफलसाधनभूतं ज्ञानं सा
धारणमेव कर्मत्वप्रविभक्तं तत्र ज्ञाननिष्ठतया ह्युपेयमानमप
वर्गहेतुः संपद्यते इति न तस्य कस्यांचिदवस्थायां त्याग उपपद्यते
इति प्रतिपादयितुमाह वर्णानां स्वकाले स्वभावप्रतिबद्धं साधा
ययजनदानादिकर्म कुर्वाणो ज्ञाननिष्ठतयानुतिष्ठन् किल्बिषं सं
सारबंधनलक्षणं पापं न लभते त्यजंस्तु कर्म द्वेषरागद्वेषान्न कि
ल्बिषं प्राप्नोत्येवेत्यसकृत्प्रतिपादितम् ४७ ॥

गी॰
टी॰
म॰

२००

लासिकी [illegible] टीका

परधर्मात्स्वकाशाद्विगुणात्प्रशस्तोपि स्वधर्मो वर्णाश्रमवि
भागेनात्मीयो धर्मः सम्यगनुष्ठितात्परस्य विजातीयस्य धर्मा
दाचाराच्छ्रेयान्प्रशस्यतरः न चैवं युद्धवधादिरुक्षात्सुखादेः स्वध
र्मात्स्वकाशाच्छ्रिलाटनादिः परधर्मः श्रेष्ठ इति मन्तव्यं यतः स्व
भावानुसारेण नियतेन शास्त्रेण वर्णाश्रमविभागतो नियतं वि
तं कर्म कुर्वन् किल्बिषं पापं युद्धवधादिनिमित्तं नाप्नोति

[illegible]

[illegible]

पंचोलीटीका

स्वकर्मणेति विशेषणस्य फलमाह श्रेयानिति स्वधर्मब्राह्मणा
दीनां पूर्वोक्ताः स्वकीयो धर्मः विगुणोपि निंदितोपि परधर्मात् वर्णां
तरधर्मात् स्वनुष्ठितात् श्रेयान् प्रशस्यतरः स्वभावनियतं स्वभावप्रभ
वैः गुणैः प्रविभक्तं स्वकीयं पापरूपमपि कर्म कुर्वन् किल्बिषं पापं न
प्राप्नोति यथा विषजातस्य कीटस्य विषं दोषकरं न भवति मरणरूप
मजीवनहेतुः ४७

रत्नवीरसमिद्बोधिनी

प्रशोपपत्तिं पूर्वोक्तां स्मारयति श्रेयानिति विगतागुणा अनायास
साध्यत्वबांधवसंगमादिलक्षणा यस्मात्तादृशोपि स्वधर्मः क्षत्रियस्य
युद्धादिः सम्यक्स्वेनानुष्ठितमाचरणं यस्य तस्मादनायासेनानुष्ठेया
परस्य ब्राह्मणादिवर्णस्य धर्माद्भिक्षाचर्यादेः सकाशात् श्रेयान् प्र
शस्यतरो भवति यतः स्वभावेन वर्णात्मकेन नियतं नियमेनोक्तं कर्म
स्ववर्णोचितं विगुणं वा कुर्वन्नसौ अधिकारी किल्बिषमयोग्यतिकारणं पा
पं नाप्नोति ४७॥

मधुभाष्य

४७॥

201

भाषा अनुवाद ॥

औरसर्व श्लोक मे कहा जो स्वकर्मणा तम अच्छी उसी स्वकर्म
विशेषण वचन काफल कहते है कि स्वनुष्ठित कहे अच्छीन
रहू से किये हुये पराये के धर्म की अपेक्षा से स्वधर्म कहे अ
पना धर्म विगुण अर्थात गुणहीन भी श्रेय कहे अति उत्तम है
इस देह से वध्यवध आदिसे युक्त भी क्षत्री का धर्म जो युद्ध तिससे
मिलादन स्वरूप परधर्म श्रेष्ट नही है और पूर्वोक्त स्वभावक्रम से नि
यत कहे नियम स्वरूप शास्त्रोक्त स्वधर्म का अनुष्ठान वर्ता हुआ को
ई भी पुरुष किल्बिष जो पाप तिस को नही प्राप्त होता है सो अर्जु
नतम किस विचार के बखेडे मे परे हो अपने कामको देखो इस
बिनासे अच्छ फल नहीहै ४७

दोहा

स्वधर्म विगुण भी श्रेष्ट है परधर्म उत्तम सोहि स्वकर्मस्व
भावक कर्तको पापस्पर्श नहि होहि ४७॥

202

सहजं कर्म कौंतेय सदोषमपि न त्यजेत् सर्वा
रंभा हि दोषेण धूमेनाग्निरिवावृताः ४८

शांकरभाष्य टीका १

परधर्मश्च भयावहश्चानात्मज्ञस्य न हि कश्चित् क्षणमपि कर्मकृत्तिष्ठत्यतः सहजमिति सहजं सह जन्मनैवोत्पन्नं किं सहजं तत् कर्म कौंतेय सदोषमपि त्रिगुणत्वान्न त्यजेत् सर्वारंभाश्चारम्भ इत्यारंभाः सर्वकर्माणीत्येतत् प्रकरणात् ये केचिदारंभाः स्वधर्माः परधर्माश्च ते सर्वे सदोषाः हि यस्मात् त्रिगुणात्मकत्वमय हेतुः त्रिगुणात्मकत्वाद्दोषेण धूमेन सहजेनाग्निरिवावृताः सहजस्य कर्मणः स्वधर्माख्यस्य परित्यागेन परधर्मानुष्ठानेपि दोषात् नैव मुच्यते भयावहश्च परधर्मः न च शक्यतेऽशेषतस्त्यक्तुमज्ञेन कर्मैवतो तस्मान्न त्यजेदित्यर्थः किमशेषतस्त्यक्तुमशक्यं कर्मेति न त्यजेत् किं वा सहजस्य कर्मणस्त्यागे दोषो भवतीति किं चातो यदि तावदशेषतस्त्यक्तुमशक्यमिति न त्याज्यं सहजं कर्मैवं तर्ह्यशेषतस्त्यागे गुण एव स्यादिति सिद्धं भवति सत्यमेवमशेषतस्त्याग एव नोपपद्यत इति चेत् किं नित्यप्रचलितात्मकः पुरुषो यथा सांख्यानां गुणाः किं वा क्रियैव कारकं यथा बौद्धानां पंचस्कंधाः क्षणप्रध्वंसिनः उभयथापि कर्मणोऽशेषतस्त्यागो न भवत्यथ तृतीयोऽपि पक्षो यदा करोति तदा सक्रियं वस्तु यदा न करोति तदा निःक्रियं वस्तु तदेव तत्रैवं सति शक्यं कर्माशेषतस्त्यक्तुं अयं त्वस्मिन् तृतीये पक्षे विशेषो न नित्यप्रचलितं वस्तु नापि क्रियैव कारकं किं तर्हि व्यवस्थिते द्रव्येऽविद्यमाना क्रियोत्पद्यते विद्यमाना च विनश्यति शुद्धं द्रव्यं शक्तिमदवतिष्ठत इति एवमाहुः काणादास्तदेव च कारकमित्यस्मिन् पक्षे को दोष इत्ययमेव तु दोषो यतस्त्वभागवतं मतमिदं कथं ज्ञायते यत आह भगवान्नासतो विद्यते भाव इत्यादि काणादानां ह्यसतो भावः सतश्चाभाव इतीदं मतमभागवतत्वेऽपि न्यायवच्चेत् को दोष इति चेदुच्यते दोष

श्री·
गी टी
सु·

२०३

वक्तिदे सर्वप्रमाणविरोधात् कथं यदि तावत् घटाकाशादिध्वं
प्रागुत्पत्तेरसत्त्वमेवासदुत्पन्नं चेत् स्थितं किञ्चित् काले पु
नरसत्त्वमेवासत्त्वमापद्यते तथा च सत्सदेव सञ्जायते अभावो
भावो भवति भावस्याभाव इति तत्राभावो जायमानः प्रागसत्त्वे श
शविषाणकल्पः समवाय्यसमवायिनिमित्ताख्यं कारणमपेक्ष्य
जायत इति नैवं भाव उत्पद्यते कारणेभ्यो पद्यत इति शक्यं वक्तुम
सतो शशविषाणादीनामदर्शनाद्भावात्मकास्तेन घटादय उत्प
द्यमानाः किंचिदभिव्यक्तिमात्रं कारणमपेक्ष्योत्पद्यन्त इति शक्यं
प्रतिपत्तुं किंच असतस्तु सद्भावे सतस्त्वासद्भावे न कश्चित्प्रमाणप्र
मेयव्यवहारेषु विश्वासः कस्यचित् स्यात् सत्सदेवासदसदेवेति
निश्चयाभावात् ननु किंचोत्पद्यत इति घटाकाशादेर्ध्वंस्य स्वकारण स
त्तासंबंधमात्रं प्रागुत्पत्तेस्तस्मात् पश्चात् स्वकारणव्यापारमपेक्ष्य स्व
कारणैः परमाणुभिः सत्तया च समवायलक्षणेन संबंधेन संब
ध्यते सम्बद्धे स्वकारणसमवेते सत् भवति तच्च वक्तव्यं कथम
सतः स्वकारणैः संबन्धो वा केनचित् नहि वन्ध्यापुत्रस्य स
त्तासम्बन्धो वा कारणैर्वा केनचित् प्रमाणतः कल्पयितुं शक्यते न
नन्वेवं वैशेषिकैरभावस्य संबन्धः कल्प्यते घटाकाशादीनां हि स्वा
णां स्वकारणेन समवायलक्षणसम्बन्धः सतामेवोच्यते इति न संब
न्धात् प्राक् सत्त्वानभ्युपगमाच्चहि वैशेषिकैः कुलालदण्डचक्रादि
व्यापारात् प्राक् घटादीनामस्तित्वमिष्यते नच मृदेव घटाद्याका
रप्रतिपत्तिमिष्यन्ति ततस्तु सत एव संबंधः परिशेष्याद्दिष्टो भवति
ननु सतोरपि समवायलक्षणः संबन्धो न विरुद्धः न वन्ध्यापुत्रा
दीनामदर्शनात् घटादेरेव प्रागभावस्य स्वकारणसम्बन्धो भवति
न वन्ध्यापुत्रादेरभावस्य नत्वभावेषि विशेषोऽभाव एव न त्वया प
कल्प्याभावो ह्ययोरभावः सर्वस्याभावः प्रागभावः प्रध्वंसाभाव इतरे
तराभावोऽत्यन्ताभाव इति लक्षणतो न केनचिद्विशेषो दर्शयितुं
शक्यः असति च विशेषे घटस्य प्रागभाव एव कुलालादिभिर्घ
टभावमापद्यते सम्बध्यते च भावेन कपालाख्येन कारणेन सर्व

व्यवहारयोग्यस्य भवति नेत वस्तुस्यैव प्रध्वंसाभावोऽभावत्वे।
समर्थीति प्रध्वंसाद्यभावानां न कश्चिद्व्यवहारयोग्यत्वे प्रागभा
वस्यैव घटादिकादिद्रव्याख्यसोत्पाद्यव्यवहारार्हत्वमित्येतदसम
ञ्जसमभाववता विशेषादसत्त्वप्रध्वंसाभावयोरिव नन्वेवास्माभिः
प्रागभावस्य भावापत्तिरुच्यते किं तर्हि भावस्यैव हि भावापत्तिर्य।
या घटस्य घटापत्तिः पटस्य पटापत्तिः यत्तदभावस्य भावापत्ति
वदेव प्रमाणविरुद्धं सोऽप्यस्यापि यः परिणामपक्षः सोऽप्यपूर्व
धर्मोत्पत्तिविनाशाङ्गीकरणाद्वैशेषिकपक्षाच्च विशिष्यतेऽभि
व्यक्तितिरोभावाङ्गीकरणाच्चाभिव्यक्तितिरोभावयोर्विद्यमाना।
विद्यमाननिरूपणे पूर्ववदेव प्रमाणविरोधः एतेन कारण।
स्यैव संस्थानमात्रमात्यादिनेतदप्युक्तं पारिशेष्यात् सदेकमे
व वस्तु विद्ययोत्पत्तिविनाशादिधर्मैरनेकधा विकल्प्यत इतीद
भागवते मतमुक्तं नासतो विद्यते भाव इत्यस्मिन् श्लोके स
र्वस्यस्याव्यभिचारात् व्यभिचाराच्चेतरेषामिति कथं तर्हि
आत्मनोऽविक्रियत्वेनाशेषतः कर्मणस्त्यागो नोपपद्यत इ
ति यदि वस्तुभूता गुणाः यदि वा अविद्याकल्पिता लहर्म्म
कर्म्म तदात्मस्यविद्याध्यारोपितमेवमविद्वान्न हि कश्चित् द
णमप्यशेषतस्त्यक्तुं शक्नोतीत्युक्तं विद्वांस्तु पुनर्विद्यया अ
विद्यायां निहतायां शक्नोत्येवाशेषतः कर्म्म परित्यक्तुं अविद्या
ऽध्यारोपितस्य शेषानुपपत्तेः न हि तैमिरिकदृष्ट्याऽध्यारोपित
स्य द्विचन्द्रादेस्तिमिरापगमे शेषोऽवतिष्ठत एवं च सतीदं वच
नमुपपन्नं सर्वकर्म्माणि मनसेत्यादि स्वे स्वे कर्म्मण्यभिरतः सं
सिद्धिं लभते नरः स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति मानव इति
च ४८ ।। आनंदगिरि टीका २

नहि दोषरहितमेव भिदाटनादि सर्वैरनुष्ठीयतामतो न पा।
न हि दोषरहितमेव भिक्षाटनादि सर्वैरनुष्ठीयतेऽतो न हि पापप्रा।
पत्तिरित्याशङ्क्याह यदेति उक्तमिमनुवर्तते न हि पापप्रा
सिद्धिरित्याशङ्क्याह यद्वेति उक्तं विधिमनुवर्तते सर्वेषां स्यादित्याशंक्य
विशेषकाम्यपरिहारेण कर्म्म निषिद्धमेव सर्वदा पि संबंधः
नानाभावावैवमित्याह अनात्मन इति सर्ववदा

प्रकारान्तरासंभृत्याने फलमाह श्रेयानिति सहजायत इति सह
जं स्वभावनियतं नियतं कर्म न हि हितत्वाच्छ्रियो दोषमपि हिंसात्मकत्वा
या सदोषमित्यत्र हेतुमाह त्रिगुणेति सत्वादिगुणत्रयारब्धतयाहिं
सादिदोषवदपि कर्म विहितमत्याज्यमित्यर्थः कर्मणां दोषवत्त्वं
प्रपंचयति सर्वेति आरम्भशब्दस्य कर्मसु प्रसिद्धत्वा स्वयं सर्वे कर्मा
र्थेते कर्मणामकृतेत्वे हेतुमाह प्रकरणादिति दोषेणेत्यादि व्या
वृत्यर्थः कश्चिदिति ते सर्वे दोषेणावृता इति संबंधः सर्वकर्मणां
दोषावृतत्वे दृष्टान्तं यस्मादित्यके हेतुमेवाभिनयति त्रिगुणा
त्मकत्वमिति स्वभावनियतस्य कर्मणो दोषवत्त्वान्त्यागद्वारा प
रधर्ममाचरिष्यमाणस्यापि नैव दोषाद्विमोक्षः संभवति न च परध
र्मानुष्ठाने शक्यते भयावहत्वाच्च नहि कर्मणोऽशेषतोऽत्य
ज्ञानमेवास्याशेषकर्मत्यागयोगादन्यः सहजं कर्म सदोषम
पि न त्याज्यमिति वाक्यार्थमाह सहजमेवेति सहजं कर्म सदोषमपि
न त्यजेदित्यत्र विचारमवतारयति किमिति नहि कश्चिदिति त्यागा
दिति शेषः दोषाविहितनित्यत्यागे प्रत्यवायः संदिग्धस्य समयोजन
स्य विचार्यः तोऽक्तसंदेहे प्रयोजनं पृच्छति किंचातत इति तत्राप्य
मनस्य फले दर्शयति यदीति अशक्यानुष्ठानस्य गुणत्वेन प्रसिद्ध
त्वात् प्रसिद्धं हि महोदधिमगस्त्यस्य चुलकीकरणं पिबतो गुणत्वेन
न्नेदाह पवं नहीति अशेषकर्मत्यागस्य गुणत्वस्यापि प्रागुक्तन्यायेन
तद्योगात्तस्याशक्यानुष्ठानत्वेति शंकते समग्रमिति चोद्यमेव विह
त्वा यो विभजते किमिति सत्वादिगुणवदात्मनो नित्यत्वप्रवत्ति।
तत्वेनाशेषतस्त्यक्तुं न कर्म त्यक्तुं शंका नापि तृप्तविज्ञानवेदनासं
स्कारसंततो दहनस्येवानिशं क्रियाणामिव क्रियाकारकमेदाभावात्
कारकस्यैवात्मनः क्रियावत्त्वमिति कर्मशेषतस्त्यक्तुं शक्यमभयथा
पि स्वभावसंगादित्याह उभयेति पदद्वयान्तरोधि नाशेषकर्मत्यागा
योगे वैशेषिकसिद्धान्तरयति अग्रेति कदाचिदात्मा सक्रियायोनिः क्रिय
स्य कदाचिदिति स्थिते फलितमाह तत्रेति उक्तमेव पदं पूर्वोक्तपद
द्वयादिशेषदर्शनेन विशदयति अप्येतेति आगमापायित्वे क्रि
यायामनहितो द्रव्यस्य कथं त्यागिनेत्याशंक्याह सुखमिति क्रियाश्रा

किमनेपि क्रियावत्त्वाभावे कथं कारकत्वं क्रियां कुर्वन् हि कारण
कारकमित्यभ्युपगमादित्याशंक्याह तदेवेति क्रियाशक्तिमदेव का
रकं न क्रियाधिकरणं परस्पराश्रयादित्यर्थः वैशेषिकपक्षे दोषाभा
वादस्मिन्सर्वैः स्वीकार्यत्वेनोपसंहरति इत्यसिद्धमिति भगवन्मतात्
सारित्वाभावादस्य पक्षस्याप्यसिद्धान्ततेति दूषयति प्रथममेवेति भगव
न्मतानुसारित्वमस्याप्रामाणिकमिति शंकते कथमिति भगवद्व
नमदाहरन् परमपक्षस्य तद्द्रव्यगुणत्वाभावमाह यत इति परेषा
मपि तन्मते द्रव्यगुणमेव किं न स्यादित्याशंक्याह कारणवादीनां ही
ति भगवन्मतानुगुणत्वाभावेपि मायावगुणत्वेन दोषराहित्येक
णादादीनां मतमुपादेयमेव न हि काणादमते विरोधाउपेक्षणीय
मिति शंकते प्रभागवतविपरीतत्वात्पक्षत्वमसिद्धमिति दूषयति उ
च्यत इति सर्वप्रमाणानुसारित्वमतस्य न तन्निरोधितत्वादित्यादि पति
कथमिति वैशेषिकमतस्य सर्वप्रमाणविरोधे प्रकटयत्वादौ त
न्मतमनुवदति यदीति असतो जन्म सतश्च नाश इति स्थितेत्कलि
तमाह तथा चेति उक्तमेव वाक्यं व्याकरोति प्रभाव इति सदेवासत्त्वमा
पद्यते इत्यत्र वाचष्टे भावश्चेति इति मतमिति शेषः तत्रैवाभ्युपगम
मान्तरमाह तत्रैवेतिप्रकृतेनमते सतमर्थः इत्यभ्युपगमस्त इति शेषः
परकीयमभ्युपगमं दूषयति नचेति एवमिति परपरिभाषानुसारे
पोऽयमर्थः अदर्शनादुत्पत्तेरपेक्षायाश्चेति शेषः कथन्तर्हि त्वन्मतेपि
घटादीनां कारणापेक्षाणामुत्पत्तिर्नहि भावानां कारणापेक्षा ननिवी
युक्तेति तत्राह भावेति घटादीनामसत्त्वेप्यापि कारणात्मना स
नामेवाभक्तनामरूपाणामभिव्यक्तिसामग्रीमपेक्षा इत्यागमिव्यक्ति
ंवा सर्भा त्व किंचिदनवद्यमित्यर्थः असत्कार्यवादे दोषान्तरमाह किंचे
ति परमते मानमेयव्यवहारे क्वचिदपि विश्वासो न कस्यचिदित्यत्र
हेतुमाह सत्त्वदेवेति नहि सत्त्वमेवेति निश्चितं तथैव पुनरसत्त्वप्राप्ते
रिदत्वाच्च वा सत्त्वमेवेति निश्चयः तथैव सत्त्वप्राप्तेरुपगमादतो
यस्मानेन सदसदा निर्णीते तत्रापीति विश्वासाभावात् मानवैफल्य
मित्यर्थः उत्पन्नासत्कार्यवादेन युक्तिमानित्याह किंचेति तदेवाहे
तत्सारस्फोरयति परमतमनुवदति उत्पन्नत इतीति परकीयं वचनमे

श्री॰
गी॰ टी॰
ग्र॰

105

व व्याचष्टे प्रागिति सम्बन्धं सद्दित्यनेन कारणसम्बन्धे सति कार्यस्य
सम्बन्धो भवतीत्यर्थः तदेव स्फुटयति कारणेति परमतमेवमनुभा
ष्य दूषयति नैवेति कार्यस्यासत्त्वेपि कारणे सम्भवति तस्यैव का
र्येण सम्बन्धः सिध्यतीत्याशङ्क्याह नहीति असत्त्वादेवासतः सम्बन्धा
भावे कारणस्य सत्त्वेपि तेनेन सम्बन्धोन्नमातुं शक्यते सदसतोः स
म्बन्धासम्भवादित्यर्थः कार्यस्यात्यन्तासत्त्वानभ्युपगमात् कारणस
म्बन्धः स्यादिति शङ्कते नन्विति सतामेव घटादीनां कारणेसं
बन्धे शक्तिता दूषयति न सम्बन्धादिति अनभ्युपगममेव विश
दयति नहीति तदेव कारणे कार्याकारमापद्य कार्यव्यवहारं नि
र्वहयतीत्यभ्युपगमाच्चास्ति सम्बन्धानुपपत्तिरित्याशङ्क्यापसिद्धा
न्तमेवमित्याह नैवेति कार्यस्य कारणसम्बन्धात् एवं तत्त्वाभा
वे परिशेषसिद्धमर्थं दर्शयति ततश्चेति तत्त्वाद्यनुपपत्तिरुक्तेति
शेषः सम्बन्धिनोः सदसतोरसंयोगेपि समवायः सदसतोः स
वेदिति तस्य नित्यत्वादन्यतरसम्बन्ध्यभावेपि स्थितेरावश्यकत्वा
दिति शङ्कते नन्विति सदसतोर्मिथः सम्बन्धस्यादृष्टत्वान्नेति नि
राचष्टे नैवमिति घटादिप्रागभावस्यात्यन्ताभावत्वाभावाद्वन्ध्या
पुत्रादिविलक्षणतया स्वकारणसम्बन्धः सिध्यतीत्याशङ्क्याह व
हादेरिति उभयत्राभावस्वभावाविशेषेपि कस्यचित् कारणसं
योनेतरस्येति विशेषे हेत्वभावाच्च प्रागभावस्य कारणसम्बन्धः स
भवतीत्यर्थः घटादिप्रागभावस्य सप्रतियोगिकत्वे वन्ध्यापुत्रा
देर्नैवमिति विशेषमाशङ्क्य दूषयति एकस्येति प्रागभावस्येव
प्रध्वंसाभावादेरपि सप्रतियोगिकत्वाविशेषे स्वकारणेन स
म्बन्धाविशेषः स्यादित्यर्थः प्रागभावप्रध्वंसाभावयोर्विशेषा।
भावे फलितमाह असतिचेति कपालपक्षे घटकारणीभूतस्त
दवयवविषयः सर्वोव्यवहारो घटस्याभिन्नो जन्मनाशादिव्यवहा
रः प्रध्वंसाभावस्य घटस्यैवाभावत्वे तस्यापि न घटत्वमापद्यते
नापि कारणेन सम्बध्यते नचोभयत्रापि व्यवहारयोग्यो भवतीत्यत
दृष्टके प्रागभावेनास्य विशेषाभावादित्याह नन्विति असमञ्जस
मित्येनेनेतिशङ्कः सम्बध्यते असमञ्जसान्तरमाह प्रध्वंसादीति प्र

मोऽस्याभावास्तेनाभावावादिपदार्थौ कश्चिदिति देशकालयोर्ग्र
हणे व्यवहारोजन्मादिरेव प्रागभावोनामस्मादिव्यवहारयोग्यो
भावत्वात् प्रध्वंसादिवदित्यर्थः प्रागभावस्य चेद्भावान्तरस्वरूपगमा
दनुमाने सिद्धसाधनमिति शंकते नत्विति अभावस्य भावाप।
त्यनभ्युपगमे भावस्यैव भावापत्तिरित्यनिष्टं स्यादिति दूषयति भा
वस्यैवेति नस्य नद्यपनेरयोग्यत्वे दृष्टान्तमाह यद्येति भावस्य।
भावापत्तिरनिष्टेति दार्ष्टान्तिके सम्भवति एतदपीति आरंभवा
दोक्तदोषं परिणामवादेऽपि संचारयति सांख्यस्येति धर्मिः परि
णामः प्रसक्तोऽपूर्वपरिणामस्योत्पत्तेः सतस्य सर्वपूर्वपरिणाम
स्य नाशात्सदसदेव सच्च सदेवेति व्युत्पत्त्यापि इत्येतस्यार्थः न
न्कार्यं कारणात्मना प्रागपि सदेवाव्यक्तं कारकव्यापाराद्यज्य
ते नेन व्यक्ताव्यक्तयोर्जन्मनाशव्यवहारान्नमनात् तद्विशेषसिद्धि
रित्याह अभिव्यक्तीति कारकव्यापारात् प्रागनभिव्यक्तिवदभिव
स्त्वाह अभिव्यक्तीति कारकव्यापारस्यैव पक्षान्तद्विषयप्रमाणवि
त्कैः सत्वमसत्वंवासत्वे कारकव्यापारवैयर्थ्यं नास्तिर्वर्मिवायोगे सएव
तोयः द्वितीये पक्षान्तरं वदन्नन्ताः सतः न निर्वर्मित्वायोगे सत्वे सएव दोषः
दोषः कारकव्यापाराहर्थवैयक्तिवदव्यक्तेरपि सत्वे नक्वापि वि
प्रसक्तेपि सतोऽसत्वांगीकारात् मानमेयव्यवहारे नक्वापि
षासः सत्त्वदेव असदसद्देवमतिनिहीरणादित्यर्थः सांख्यपक्ष
प्रतिक्षेपमार्गेण पक्षान्तरमपि प्रतिक्षिपति आह एतेनेति
कारणस्यैव कार्यरूपापत्तिरूपमिति तस्यैव नष्टरूपमार्गेण स्वरू
पापत्तिर्नाशश्चेनदपि न पूर्वरूपे स्थिते नष्टेच परस्य परनरूपाय
नेरनुपपत्तेर्नच प्राक्तिरूपे स्थितेन नष्टेनगामकं शक्यमित्यर्थः
आरंभवादे परिणामवादे च उक्तस्मादिव्यवहारानुपपत्तेः परिशे
धायाने दर्शयति पारिशेष्यादिति एकस्यानेकविषयविकल्पानुप
पत्तिमाशंक्याह अविषयेति अस्यापि मतस्य भगवन्मतान्तरोपि
त्वाभावादविशिष्टा ममापि नेत्याशंक्याह इतीदमिति उक्तमेव भग
वक्ष्यति विशदयति सत्यमयस्येति सदेकमेव वस्तु स्यादिति निशा।
षः इतरेषां विकारप्रमयाणां रज्जवादियौवदर्शव्यभिचारस्त्विति इति
या नेदंव सहस्नानेकधा विकल्पानरमाह व्यभिचारेति

श्री· गी· टी· अ·

९०६

मते श्लोके दर्शितमिति संबंधः आत्मनस्त्वविक्रियत्वे भगवतेष्टत्वेऽपि सर्वकर्मपरित्यागोपपत्तेः सहजस्यापि कर्मणस्त्यागः सिद्धिरिति शंकते कथमिति किं कार्यकारणात्मनो गुणानामकल्पितानां कल्पितत्वेन वा कर्मधर्मत्वेनेष्टेऽपि निःशेषकर्मत्यागो विशेषोऽविशेषो वा नाद्य इत्याह यदीत्यादिना अविद्यारोपितमेव गुणाश्रितकार्यकारणरोपहारा कर्मनिशेषः द्वितीयं प्रत्याह विद्यावतीति आरोपशेषवशाद्विशेषोऽपि नाशेषकर्मत्यागसिद्धिरित्याशंक्याह अविद्येति तामेवानुपपत्तिं दृष्टान्तेन स्पष्टयति नहीति विशेषाशेषकर्मत्यागे पांचभिकमपि वचोऽनुकूलमित्याह एवं चेति अविद्वषः सर्वकर्मत्यागायोगे च प्रकृताध्यायस्यमेव वाक्यमनुगुणमित्याह स्वे स्वे इति वाक्यान्तरमपि तेनैवार्थेन प्रकाशितमित्याह स्वकर्मणेति ४८ ॥

+यदि पुनः सांख्यदृष्ट्यास्वधर्मे हिंसालक्षणदोषं मत्वा परधर्मं श्रेष्ठं मन्यसे तर्हि सदोषत्वं परधर्मेऽपि तुल्यमित्याशयेनाह सहजमिति ॥

स्वामिकृतटीका ३

+सहजं स्वभावविहितं कर्म सदोषमपि न त्यजेत् हि यस्मात्सर्वेऽप्यारंभाः दृष्टादृष्टार्थानि सर्वाण्यपि कर्माणि दोषेण केनचिद्दोषेणावृतान्येव यथा सहजेन धूमेनाग्निरावृतस्तद्वत् अतो यथाग्नेर्धूमरूपं दोषमपाकृत्य प्रतापमेव तमःशीतादिनिवृत्तये सेव्यते न तथा कर्मणोऽपि दोषांशं विहाय गुणांश एव सत्वशुद्धये सेव्यतां इत्यर्थः

[illegible] ४८ ॥

पिशाचभाष्य टीका ४

वे°

न दोषाय न भवति विषज्ञानस्य कृमेः सहजं विषं न मरणाय भवति किंचारभ्यत इत्यारंभः सर्वारंभाः सर्वाणि हि यस्मात्त्रिगुणात्मद्वेषेणावृताः धूमदोषेणाग्निरिवावृताः तस्मात्सदोषमपि स्वधर्ममकार्यपरमधर्मानुष्ठानेऽपि तस्यानुष्ठीयमानानाम सदोषत्वाद्दोषं न मन्यामहे ४८ ॥

रामानुजभाष्य टीका ५

अतः सहजमिति अतः सहजत्वेन सुकरत्वात् प्रमादरहितत्वाच्च कर्म सदोषं सदुःखमपि न त्यजेत् ज्ञानयोग्योऽपि कर्मयोगमेव कुर्वीत सर्वारंभा ह्य

दोषेण धूमेनाग्निरिवावृताः इयांस्तु विशेषः कर्मयोगः
सुकरः अप्रमादश्च ज्ञानयोगस्तद्विपरीतश्च ४८ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं ४८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

तदेवाह सहजमिति कौन्तेय सहजं स्वभावविहितं कर्म सदोषमपि न त्यजेत् हि यस्मात्कारणात् सर्वारम्भाः सर्वकर्माणि दोषेणालौकिकेनावृताः आमाः सन्ति अत्र दृष्टान्तमाह धूमेनेति यथा प्रकाशके होमार्हे वाग्नौ धूमलक्षणो दोषोऽस्ति तथाप्यग्निरग्निमीलेत्यादिश्रुतिभिः स्तूयमानः सेव्यत एव तथैव ब्राह्मणादिधर्मेषु देम्भ निष्कृपत्वगोपीडनाधिकार्येस्तु सदोषाः सन्ति तथापि शास्त्रविहितत्वात्त एवानुष्ठेयाः नान्यधर्माः ४८

वनमाली टीका ८

यदि स्वधर्मे हिंसादिकं दोषं पश्यन् परधर्मं निर्दुष्टं मन्यसे न हि यस्य कस्यचिद्दोषस्य कर्ममात्रे सम्भवात्कोऽपि न हि दुष्ट इत्याह सहजमिति सहजं स्वभावजं धर्मं सदोषमपि विहितहिंसादियुक्तमपि युद्धादि न त्यजेत् किञ्चिन्न शुद्धं प्राग्भवान्योऽवासमाधिस्थः दाणामपि कर्माणि एकता स्यात्तेन शक्नोति न वा परधर्मोऽपि हि यतो दोषेणाविशेषेण नश्चयेन सर्वारम्भाः स्वधर्माः परधर्माश्च हि ... दिदोषेणावृताः धूमाः अग्नेरिव सत्त्वःक त्मकत्वेन रागद्वेष ... सामान्येन हिंसामोऽधिकारी सहजं कर्म युद्धादि त्रिगुणात्मकत्वेन सामान्येन हिंसादिविशेषणासदोषमपि न त्यजेत् सर्वकर्मत्यागासमर्थत्वात् ४८

उत्तममवैजयन्ती टीका ९

ज्ञाननिष्ठायाः सकाशात्कर्मनिष्ठायाः श्रेष्ठत्वं न तीया व्याख्यातोऽके ज्ञाननिष्ठायाः सकाशात्कर्मनिष्ठायाः श्रेष्ठत्वमेवास्मत्तोऽदोषत्वात् सारयत्सर्वेषां कर्मणां चान्यतामपि दोषयुक्तत्वमेव कर्त्तव्यादिसा स्यात् स्वधर्मस्य सकाशात्परधर्मेणानाश्रयेत् किं तु स्वधर्ममेव कुर्यादित्यनमाह स्वभावमात्रविहितं यत्कर्म तन्म सहजमिति हे कौन्तेय सहजं स्वभाव

श्री
गी टी
प्र
२०७

दोषमपि हिंसाद्यनेकदोषयुक्तमपि न त्यजेत्। किंतु विहितत्व
ऽद्धाज्ञकर्यादेव निर्दोषत्वं ज्ञात्वा परधर्मं समाचरेच्चेत् तर्हि इहा
र्चचस्तत्वं न प्राप्नोतीत्यर्थः कस्मादेवं हि यस्मात्सर्वारंभाः सर्वे
धारंभा ज्ञानारंभाः कर्मारंभाश्च यद्वा सर्वेषां वर्णानामाश्रमाणा
मारंभाः कर्माणि प्रकृतिगुणकार्यत्वात् त्रिगुणात्मकत्वाद्दोषेण
केनचिद्दुःखेनावृताः व्याप्ता एव भवंति नच दृष्टांतः धूमेन स
जेनाग्निरिव यथाग्नेर्धूमांशमपाकृत्य शीतादिनिवृत्तये तापः
सेव्यते तथा कर्मणां भगवदर्पणेन दोषं निर्धूयात्मदर्शनाय
सत्वजनकत्वांशः सेव्यः कर्मयोगः स्वकर्मप्रमादस्य ज्ञानयो
गस्त्वपरीतस्यान्नैव विशेषः इत्याशयः कौंतेय सन्न यथोक्तं
नीपनिषत्ताञ्च मरहितास्तत्वादिमपि कर्णोपनिरूपे कर्म
प्रविष्टिरादिभ्योऽप्यगोपयादिमेवं स्वीस्वभावजं ... कपटदो
षयुक्तमपि कर्म नात्यजेत् यथा तत्त्वज्ञस्यमपि स्वाभाविके हिंसा
दिदोषयुक्तमपि युद्धादिकं कर्म मात्यजेति सूचितं ४८ ॥

+ यस्मादेवं विहितहिंसादेर्न प्रत्यवायहेतुत्वं परधर्मश्च भयावहः सामान्यदोषेण च सर्वकर्माणि दुष्टानि तस्मादज्ञो वर्णाश्रमाभिमानी ॥

मधुसूदनी टीका ॥

+ हे कौंतेय सहजं स्वभावजं कर्म दोषमपि विहितहिंसायुक्तम
पि ज्योतिष्टोमयुद्धादि न त्यजेदतः कारणाद्धेः आत्मवानज्ञो वा
न त्वनात्मज्ञः कश्चित्क्षणमपि कर्माण्यकृत्वा स्थातुं शक्नोति
न च परधर्मानुष्ठानेऽपि दोषाभावश्च यतः सर्वारंभाः स्वधर्माः प
रधर्माश्च सर्वाण्यपि कर्माणि हि यस्मात् दोषेण त्रिगुणात्मकत्वे
न सामान्येनावृता व्याप्ताः सदोषा एव तथा च स्वधर्मत्यागेन परिणा
मतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवे
किन इति तस्मादनात्मज्ञः कर्माणि कुर्वन् स्वभावजं कर्म स्वविहि
सहजं कर्म युद्धादि त्रिगुणात्मकत्वेन बंधुवधादिनिमित्तत्वेन।
सामान्येन बंधुवधादिनिमित्तत्वेन विशेषेण च सदोषमपि न त्य
जेत् सर्वकर्मत्यागासमर्थत्वात् सर्वकर्मत्यागसमर्थस्तु शुद्धां
तःकरणस्त्यजेदेवमभिप्रायः (कः पुनः सर्वकर्मत्यागसमर्थः

योनित्यानित्यवस्तुविवेकजेनेहामुत्रार्थः भोगवैराग्येणशम
दमादिसंपन्नः कर्मजांसिद्धिमशुद्धिपरित्यज्य यदामुमुक्षुः शुद्ध
ब्रह्मात्मैक्यजिज्ञासायामः सर्वेष्टमोक्षहेतुब्रह्मात्मैक्यज्ञानसा
धनवेदान्तवाक्यश्रवणादिकंतत्सर्वंविक्षेपनिवृत्त्यर्थमारभते
सर्वकर्मसंन्यासेभ्यो निस्मृतिविहितंजपादेवतस्मादेवंविष्णो
नोदान्तउपरतस्तितिक्षुः समाहितोभूत्वात्मन्येवात्मानंपश्येदि
तिःश्रुतेः तस्मान्नैतत्स्वतः सिद्धिहानिर्मलोकसंग्रहंचपरित्यज्या
त्मानमन्विच्छेदिति सिद्धमेतेषु उपरतः स्वकसर्वकर्मा भूत्वात्मानंप
श्येदात्मदर्शनायवेदान्तवाक्यानि विचारयेदिति सिद्धः सर्वोऽर्थः एतादृ
शपरब्रह्मसंस्थोमृतत्वमेतीतिश्रुत्यायमिस्कंधत्रयविलक्षणेनैव
नश्रुतिपादितः परमहंसपरिव्राजकः परमहंसपरिव्राजकेन
हासैगुरूपसमवेदान्तवाक्यविचारसमर्थो यश्चादिश्यायानो
ब्रह्मजिज्ञासेत्यादिवन्तलेलक्षणामीमांसाभगवताबादरायणेनस
मारंभिकीदृशोसाविमारह ४८ ॥

सदानंदी टीका ९

यतोविहितहिंसादेः प्रमवायेनहेतुना भीतिदः परधर्मश्चस
र्वकर्मकलेकवत् १ तस्मादन्तोधिकारीयोवर्णाश्रमवतिः प्र
मान् स्वभावजंस्वजंचैवकर्मदोषान्वितमपि २ ज्योतिष्टोमा
दिकंयज्ञनयाग्रहादिकमेव श्रुतः कारणश्चेहेः प्रारब्धवान्नामो
यथावाजनः ३ नतुः कश्चित्क्षणमपि विनाकर्महतिष्ठति तस्य
स्वदेयतः कर्मसर्वंबोजत्मनामह ४ नवान्यधर्मोनश्चयीदो
स्वदेवतः कर्मसर्वंबाजन्मनामहः यस्मा
थान्यत्पत्न्याग्रही स्वधर्मः परधर्मश्चसर्वारंभपदेविना यस्मा
द्वेशरूपदोषेणसामान्येनावृताः किल विकारस्तापसंस्कारैर्गुणा
हतिविरोधनः ६ तुः एवमेवजगत्सर्वंकर्मजन्यंविवेकिनः
केवलंमुक्तवृद्दीनां स्वावभासतेजगत् ७ तस्माद्गुणात्मान
स्तत्त्वः कुर्वन्कर्माणिशास्त्रतः तिष्ठन्मार्गसमर्थश्चयतोसोसर्व
कर्मणां ८ कर्मण्यागतमर्थोत्रत्रश्चहानः करणः प्रमान् सर्व

श्री·
गी·टी·
ग्र·

२०८

देतविचारार्थं सर्वविक्षेपकं त्यजेत् ९ करोतु कर्माणि नवा
करोतु वा मुक्तेरुपादानं स्मरन् स्वधीः गृहे वने वा निवस
न्मोक्षितो मुक्तेरुपवाप्ति स्वयोहितरश्रिति १०॥ ४८॥

नीलकंठीटीका १२

किंच सहजं स्वाभाविकं त्वात्रं कर्म सदोषं हिंसामिश्रमपि न त्य
जेत् हि यस्मात् सर्वारंभाः सर्वाणि कर्माणि दोषेण हिंसादिना
आवृता एव यस्माच्च परधर्मो भयावहस्तस्मात् स्वकर्म न त्यजे
दित्यर्थः ४८ ॥

आनंदीटीका १३

एतदेव प्रतिपादयति सदोषमपि हिंसादिदूषितमपि
हेतव्यं तत्त्रियस्यावश्यकरणीयमित्यर्थः ४८ ॥ अत्र हेतु
माह यथाग्निरवश्यसेव्यो धूममात्रदोषान्न त्यज्यते तथा हि
सामात्रदोषादुष्टं न त्याज्यमित्यर्थः ४८ ॥

रामकंठीटीका १४

अतः सर्वात्मकोपपत्या परमेश्वरेच्छावशात्सहैव जातं वर्णात्मक
स्वभावजातं विगुणमपि कर्म न त्याज्यमेवात्र हेतुमाह यस्मा
त्सर्वारंभाः समस्तकर्माणि धूमेनाग्निरिवाव्यभिचारिणा दो
षेण मलेन हृताः ततश्च प्रवेधप्रहृतशास्त्रचोदितकर्मत्यागं
लक्षणोऽप्यारंभो दोषेणाज्ञानरूपेणावृत एव अज्ञानविवि
नतयोगात्मफलसाधनं स्यात् यावतातस्यासागएवाज्ञानं य
यात्वमन्तत्रैव कर्मज्ञानफलभाग्भवति तथा प्रतिपादयित
माह ४८ ॥

लासिकी[illegible]टीका

सदोषमपि सहजं कर्म विषक्रियान्यायेन कर्तुर्दोषकरं न भवतीत्याह ॥
सहजं जन्मनाम सहैव शास्त्रेण विहितं कर्म युद्धादि सदोष
मपि हिंसादिदोषयुक्तमपि न त्यजेत् नैव त्याज्यं न तु हिंसादि
दोषयुक्तान् स्वधर्मादपि युद्धादेः सकाशात् भिक्षादिवृत्तेर्वदोष

रहिता श्रेयसीत्याशंक्याह सर्वारंभा इति सर्वारंभा वर्णानामा
श्रमाणां च विभागेनोक्तानि सर्वाणि कर्माणि केनचिद्दोषेणाव्य
भिचारिणा वृता व्याप्ताः सहजेन धूमेनाग्निरिव

पंचोलीटीका

ननु स्वधर्मेऽपि हिंसालक्षणं दोषं मत्वा परधर्मे श्रेष्ठं मत्वा सेवते हि परध
र्मस्य धर्मे हिंसालक्षणे दोषं मत्वा परधर्मे श्रेष्ठं मत्वा सेवते हि परध
र्मेऽपि सदोषत्वमित्याशंक्याह सहजमिति हे कौंतेय सहजं कर्म
सदोषमपि न त्यजेत् हि यस्मात् सर्वाणि कर्माणि वर्णानां विगुणात्मकत्वात् दोषेणावृतानि
कर्माणि वर्णानामपि कर्माणि विगुणात्मकत्वात् दोषेणावृता
नि यथाग्निः सहजेन धूमेनावृतः ४८

गूढार्थदीपिनी

ननु न हिंस्यात्सर्वभूतानि अहिंसा परमो धर्म इत्यादिश्रौतस्मार्तव
चनानुरोधेन हिंसालक्षणदोषवतः स्वधर्मो युद्धादेस्त्याज्यः पर
धर्म एव कर्तव्य इत्याशंक्य तथापि केन विदंशेन सदोषत्वं त्व
मित्याशंक्य न ससाधनं सहजमिति सहैव जातं वर्णात्मकस्वभाव
विहितं विगुणमपि कर्म न त्यजेत् तत्र हेतुः हि यस्मात् सर्वारंभाः स
र्वाण्यपि स्वोचितानि परोचितानि वा कर्माणि दृष्टादृष्टार्थानि दोषेण
मलेन केनचिद्दावृता व्याप्ता एव तत्र दृष्टांतः धूमेनाग्निरिव यथा
व्यभिचारिणा धूमेनाग्निर्व्याप्तस्तद्वत् अतः सर्वस्य मलव्याप्तत्वेन स्व
वर्णविहितमेव सगुणं मंतव्यम् परमेश्वरेणानुष्ठितत्वादिति भावः
किंच यथाग्नेर्धूमात्मकं दोषमपाकृत्य प्रतापएव तमः शीतादिनिव
र्त्यसेव्यते तथा स्ववर्णोचितकर्मणोऽपि दोषांशं विहाय गुणांश एव
निष्ठाकार्येति दृष्टांततात्पर्यं ४८ ॥

मधुभाष्य

४८ ॥

भाषा अनुवाद ॥

परन्तु स्वधर्म मे जो सांख्यमत के अनुसार हिंसा को दोष रूप
जानि के औ अहिंसा हेतु से परधर्म श्रेष्ठ जो विचार करो तो
परधर्म के आचरण मे भी दोष है इस अभिप्राय पर कहते है
कि हे कौन्तेय अर्जुन मनुष्यो को सहज कहे स्वभावसिद्ध अथवा
स्वविहित जो स्वधर्म सो दोषयुक्त होने से भी त्याग करने यो
ग्य नहीं है क्योंकि समस्त आरम्भ अर्थात् दृष्ट अदृष्ट कर्म
मात्र सब दोषयुक्त है तो जैसे स्वाभाविक धूम से आवृत अग्नि
को दोषयुक्त रहते भी लोग धूम रूप दोष परित्याग करके केव
ल अन्धकार शीत निवारण के अर्थ सेवन करते है तैसे ही स्व
कर्म भी दोष अंश छोड़ के गुण अंश मात्र सत्बुद्धि के अर्थ
सेवन करने योग्य है सोई कहा कि हे अर्जुन सहज कहे स्वा
भाविक दोषयुक्त भी अपना कर्म छोड़ना न चाहिये क्योंकि
सब आरम्भ कहे कर्म सदोष है जैसे धूम दोष से अग्नियुक्त
को कौन छोड़ै है ४८ ॥

दोहा

सहजकर्मकों कौंतिसुत तजें न दोषहु सोंहिं समआरंभ
हैं दोषयुत अग्निधूम जिमि होहि ४८ ॥

210

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ४९

शांकरभाष्यटीका १

या च कर्मजा सिद्धिरुक्ता ज्ञाननिष्ठायोग्यतालक्षणा तस्याः
फलभूता नैष्कर्म्यसिद्धिर्ज्ञाननिष्ठालक्षणा वक्तव्येति श्लोक
आरभ्यते असक्तबुद्धिरसक्ता संगरहिता बुद्धिरन्तःकरणं यस्य
सोऽसक्तबुद्धिः सर्वत्र पुत्रदारादिष्वासक्तिनिमित्तेषु जितात्मा
जितो वशीकृत आत्मा अंतःकरणं यस्य स जितात्मा विगता स्पृहा
तृष्णा देहजीवितभोगेषु यस्मात् स विगतस्पृहो य एवंभूत आत्म
ज्ञः सो नैष्कर्म्यसिद्धिं गतानि कर्माणि यस्मान्निःक्रियब्रह्मात्मसंबो
धात् स निःकर्मा तस्य भावो नैष्कर्म्यं नैष्कर्म्यं च तत्सिद्धिश्चेति नैष्क
र्म्यसिद्धिः नैष्कर्म्यस्य वा सिद्धिः निःक्रियात्मस्वरूपावस्थानलक्ष
णस्य सिद्धिर्निष्पत्तिस्तां नैष्कर्म्यसिद्धिं परमां प्रकृष्टां कर्मजां सि
द्धिविलक्षणां सद्योमुक्त्यवस्थानरूपां संन्यासेन सम्यक्दर्शनेन
तत्पूर्वकेन वा सर्वकर्मसंन्यासेनाधिगच्छति प्राप्नोति ४९ ॥

आनंदगिरिकृतटीका २

विदुषः सर्वकर्मत्यागो नाविदुषस्तथेत्युक्ते इदानीमकर्मकमनू
द्योनन्तरश्लोकतात्पर्यमाह या च कर्मजेति चोऽवधारणार्थो
भिन्नक्रमो वक्तव्यश्चात्र संबध्यते तादृक्तामुपदिशन्नैष्कर्म्यसिद्धिं
वर्णदिशति असक्तेति पुत्रादिविषये चेतसः संगाभावेऽपि तस्या
स्वाधीनत्वमाशंक्याह जितात्मेति असक्तिमुक्ता स्पृहाभाववदन्न
पुनरुक्तिमाशंक्याह देहेति उक्तमनूद्य तत्फलं लभ्यत इत्य
एवमिति कर्मणां निर्गतो हेतुमाह निद्ध्येति सम्यग्ज्ञानार्थवे
न नैष्कर्म्यसिद्धिमाह व्याख्यापार्थान्तरमाह नैष्कर्म्यमेवेति प्रकर्षो
मेव प्रकटयति कर्मजेति संन्यासस्य श्रुतिस्मृत्योः सम्यग्दर्शनसाधन
नपसिद्धेरुक्तत्वादात्मनिमित्ताशंका पदान्तरमाह तत्पूर्वकेनेति ४९

श्री
गी टी
म

211

+ननु कथं कर्मणि क्रियमाणे दोषांशप्रहाणेन शुद्धांशप्रवसंपश्यतत्त्वपेन्नायामा
ह॥

स्वामिकृतटीका ३

+असक्तेति असक्ता सर्वत्र पुत्रादिषु बुद्धिर्यस्य जितात्मा निरहंकारः वि
गतास्पृहा फलविषया इच्छा यस्मात् एवंभूतः सन्न्यासः सात्त्विको
मत इत्येवं पूर्वोक्तेन कर्मासक्तिफलयोस्त्यागलक्षणेन संन्यासे
नैष्कर्म्यसिद्धिं सर्वकर्मनिवृत्तिलक्षणां सिद्धिं सत्त्वशुद्धिमधिग
च्छति यद्यपि संगफलयोस्त्यागेन कर्मानुष्ठानमपि नैष्कर्म्यमेव
कर्तृत्वाभिनिवेशाभावात् नतूक्तं नैव किंचित्करोमीति युक्तो म
न्येत तत्त्ववित् इत्यादौ तस्य तथापि नेनोक्तलक्षणेन सं।
न्यासेन परमां नैष्कर्म्यसिद्धिं सर्वकर्माणि मनसा संन्यस्यास्ते सुखं
वशी इत्येवंलक्षणां परमहंसाश्रमपर्यायां प्राप्नोति ४९ ॥

पिशाचभाष्य टीका ४

इदानीं श्रेष्ठमिति सकाशिष्यसाव बुद्धिर्यस्य नास्ति सो सक्तबुद्धिः स
र्वत्र कर्मसु तत्फलेषु पुत्रमित्रकलत्रादिषु चासक्तबुद्धिः जितानि
कर्माणि यस्मात् आत्मा यामरीसुदृकं यदेवमहंकाररहितं वेद इदं योहादि
ष्ववहृद्धिः युक्तः स्वभावपरमात्मस्वरूपलाभः स निष्कर्मा तस्य
भावो नैष्कर्म्यं तस्मात् निष्क्रियात्मस्वरूपावस्थानलक्षणां सिद्धिं
सिद्धिं निर्दिष्टेति परमां प्रकृष्टां पुत्रमित्रकलत्रादिवासनाभ्यः तथा च श्रु
तिः आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन् कस्य
कामाय शरीरमनुसंज्वरेत् आत्मलाभान्न परं विद्यत इति स्मृतेः
युक्तः सन् सिद्धिं संन्यासेनाधिगच्छति ४९ ॥

रामानुजभाष्य टीका ५

सर्वत्र फलादिष्वसक्तबुद्धिः जितात्मा जितमनाः परमपुरुषक।
र्तृत्वानुसंधानेनात्मकर्तृत्वे विगतस्पृहः एवं त्यागान् त्यागेन
निर्णीतेन संन्यासेन युक्तः कर्माणि कुर्वन्नपि परमां नैष्कर्म्यसि
द्धिमधिगच्छति निवृत्तसर्वकर्मा ध्याननिष्ठामधिगच्छति ज्ञानयोगस्या।
पि फलभूतामधिगच्छतीत्यर्थः वक्ष्यमाणध्यानयोगावाप्तिं सर्वे
द्रियकर्मोपरतरूपामधिगच्छति ४९ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ४९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

अथ स्वधर्माचरणोपि गुणदोषविवेकमाह असक्तबुद्धिरिति
असक्ता सर्वत्र गृहादिष्वसंगत्मात बुद्धिर्यस्य जितात्मा निरहं
कारं विगतस्पृहः कर्मफलानपेक्षः अतएवं पूर्वोक्तेन कर्मास
क्तिसाविकम्पागलक्षणेन संन्यासेन नैष्कर्म्यसिद्धिं सर्वकर्मनि
वृत्तिलक्षणां सत्वशुद्धिमधिगच्छति ४९ ॥

वनमाली टीका ८

असक्तचित्तः सम्यग्विदितभगवत्तत्वो मनसा तृणमपि
[illegible]नापि भगवच्चरणारविंदमकृत्वमशक्तः
सर्वकर्माणि विद्वेषकराणि मन्वानः शमदमादिसंपन्नः वि
नासक्ते षयाभवतीत्याशयेनाह असक्तेति अत्रदारादिष्वसक्तबु
द्धिः अहमेषामिमे मदीया इत्यभि ष्वपरलोकनैवमद्बुद्धि
वैकान्नावलोकनप्रवजातस्वाभाविकाभिरुचिः अमोसर्व
कर्मभागाच्चासस्यासपूर्वकनिरंतरहरिपदारविंदध्यानेनैवमो
त्तावासिर्भवतीत्याशयेनाह असक्तेति अत्रदारादिष्वसक्त
बुद्धिः अहमेषामिमे मदीया इत्यभिष्वंगराहित्ताबुद्धिर्यस्य
जितात्मा विषयेभ्यः प्रत्याहृतचित्तः विषयरागसतिकष्टप्रमा
हारत्वादह विगतस्पृहः देहजीवितभोगेष्वपि वाञ्छारहितः
प्राकृतविषयेषु दोषदर्शनेन परमानंदप्राप्तिरूपमोक्षेगणा
दर्शनेन च सर्वतो विरक्तः इत्यर्थः एताहशीनैष्कर्म्यसिद्धिं नैष्क
मीवदासन हि यपकापरीतज्ञानरूपांनैष्कर्म्यसिद्धिं समगव
स्थितस्वधर्मफलभूतां परमां संन्यासेनाधिगच्छति प्राप्नोति ४९

वैजयंती टीका ९

असक्तेति हि तेषु क्रियमाणेषु
ननु यदि सर्वेषां कर्मणां दोषावृतत्वं

भ॰ गी॰ टी॰ अ॰

212

दोषांशे त्यागभावात्कस्यापि ज्ञाननिष्ठा न भवेदित्यपि।
ज्ञायामाह असक्तबुद्धिरिति सर्वत्र कर्मफलादिष्वात्मेतरदेहपुत्रादि
ष्वप्यसक्तबुद्धिः असक्ता संगस्नेहादिरहिता बुद्धिरात्मनिस्थैर्याधी
र्यस्य सः यतो जितात्मा स्वस्वरूपानुभवानन्देन प्राकृतविषयेभ्यो वशी।
कृतमनाः अत एव विगतस्पृहः नानाविधैहिकामुष्मिकेषु प्राकृ
तभोगेषु स्वस्वकर्तृत्वादिषु वा वाञ्छारहितः एवंभूतो जनः संन्यासेन
परमहंसेषु भगवति सर्वेषां कर्मणां तत्फलानां चार्पणरूपेण त्यागेन यु
क्तः सन् कर्म कुर्वन्नपि परमां ज्ञानयोगस्यापि फलरूपां ध्याननि
ष्ठां नैष्कर्म्यसिद्धिं सर्वेंद्रियकर्मोपरतिलक्षणां ज्ञानयोगाभिरूपां सि
द्धिमधिगच्छति प्राप्नोति ४९ ॥

मधुसूदनी टीका ९

सर्वत्र पुत्रदारादिष्वासक्तिनिमित्तेष्वपि असक्तबुद्धिः इदं मे स्या
दित्यभिष्वंगरहिता बुद्धिर्यस्य सः यतो जितात्मा विषयेभ्यः प्रत्या
हृत्य वशीकृतान्तःकरणः विषयरागे सति कथं प्रत्याहरणं तत्राह
विगतस्पृहः देहजीवितभोगेष्वपि वाञ्छारहितः सर्वत्र दोषदोष
दर्शनेन नित्यबोधपरमानंदरूपमोक्षगुणदर्शनेन च सर्वतो विरक्त इ
त्यर्थः य एवं शुद्धान्तःकरणः स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदतीत्यभा
वविवचनप्रतिपादितां कर्मजां परमां सिद्धिं ज्ञानसाधनवेदांत
वाक्यविचाराधिकारलक्षणां ज्ञाननिष्ठायोग्यतां प्राप्तः संन्यासेन शि
खायज्ञोपवीतादिसहितसर्वकर्मत्यागेन हेतुनानन्तरं श्रवणेन विचा
रेणेत्यर्थः नैष्कर्म्यसिद्धिं निष्कर्मब्रह्म तद्विषये विचारपरिनिष्पन्ने
ज्ञाने नैष्कर्म्यं तद्रूपां सिद्धिं परमां कर्मजायाः परमसिद्धेः फलभू
तामधिगच्छति साधनपरिपाकेन प्राप्नोति अथवा संन्यासेनेति
इत्थंभूतलक्षणे तृतीया सर्वकर्मसंन्यासरूपां नैष्कर्म्यसिद्धिं ब्रह्मसा
क्षात्कारयोग्यतां नैर्गुण्यलक्षणां सिद्धिं परमां सर्वस्याः सिद्धेः सावि
कायाः फलभूतामधिगच्छतीत्यर्थः ४९ ॥

सदानंदी टीका ११

यो विवेकादिसाधनसंपन्नः सन्विशुद्धधीः सत्वाशुद्धिदयहारामव
त्वः संयतेंद्रियः १ शुद्धब्रह्मैकजिज्ञासां प्राप्तो वेदांतसच्छ्रवणा।
गादाकर्णवर्ति विविक्तेपतयासदा २ तद्दोषभूते संन्यासक्रमादिविहिते
वरेत् तकीदृशो हि जिज्ञासुरित्याह जगद्गुरुः ३ सर्वत्रवृत्रदारादौ।
ममेत्यासंगकारणो ग्रहमेषाममैनेत्येवमभिषंगाविवर्जिता ४ बुद्धिर्यस्य
ममेत्यासंगकारणो अहमेषामनेनेत्येवमभिषंगाविवर्जिता ४ बुद्धिर्यस्य
पतलेन स्ववशेस्थापितेमनः विषयेभ्योपि सर्वेभ्यः प्रत्याहृत्याविवे।
यतलेनस्ववशेस्थापितेमनः विषयेभ्योपि सर्वेभ्यः समाहत्य सर्वदृश्येषु
कतः ५ सन्निरोगकर्षचेतःप्रत्याहरणमाचरेत् तत्राह सर्वदृश्येषु
भोगजालेषु सर्वतः ६ दोषदृष्ट्या विरक्तःसंजातोयो विगतः स्पृहः
निस्त्रबोधपरानंदरूपेमोक्षे च तत्परः ७ सएवंभूतः सश्रेष्ठो विचारे
कपरायणः निष्कर्मब्रह्मतत्वज्ञानं नैष्कर्म्यं तत्स्वरूपिणी ८ सिद्धिम
यनसंपन्नासकृष्णफललक्षणा संन्यासेनैवतन्मूलविचारेणाधिग
च्छति ९ यद्वा संन्यासरूपातोसिद्धिर्नैष्कर्म्यलक्षणा अकृष्टापूर्वसा
विद्याः सिद्धेःफलस्वरूपिणी १० ब्रह्मात्मैक्यापरोक्षज्ञानाकारकैकधी
यतो प्राप्नोती मर्थ्य एवास्त्वेवंस्थ्यभावेनत्नोयथा ११ ४९ ॥

नीलकंठी टीका ४९

स्वकर्मणामीश्वरे समर्पणं कर्तव्यमित्युक्तानंतरश्लोकद्वयेन स्वकर्मणा
मावश्यकत्वमुक्तातेषां परमेश्वरे पणं नकिंफलेसादित्यत्राह असं
क्तेति संन्यासेन कार्यमित्येव यत्कर्मनियतं क्रियते संगत्यक्त्वाफ
लं चैव स समागः सात्विको मत इति पूर्वोक्तेनात्याविकमार्गेण असं।
क्तबुद्धिः पुत्रदारादिषु सक्तिपदेष्वासक्तिवर्जिता बुद्धिर्यस्य सोऽसं।
क्तबुद्धिः विरक्त इत्यर्थः अतएव जितात्मा शांतचित्तः विगतस्पृहः
विशेषेणगतास्पृहाल्लाघवसनादयोभूतानैष्कर्म्यसिद्धिंकात्स्न्येन
नस्वरूपतः कर्मत्यागलक्षणं पारिव्राज्यसिद्धिं परमां सर्वोत्कृष्टां।
सात्विकत्यागाप्रेक्षयातिश्रेष्ठां न हेयाकृष्टोलेकर्मेति श्लोके व्याख्या
तां शुधिगच्छति प्राप्नोति ४९ ॥

आनंदीटीका ४९

एवं हेतुमाह सिद्धिं विंदतीनियद्भक्तं तल्लक्षणं परीक्षयति

श्री॰
गी॰टी॰
अ॰

असक्तबुद्धिः रागद्वेषहीनः जितात्मा जितेन्द्रियः विगतस्पृहाफ
लाभिलाषो यस्स संन्यासेन समनन्तरमेव काम्यानां कर्मणां त्या
समित्यादिसिद्धान्तिनेन परमां नैष्कर्म्यसंप्राप्यं सिद्धिं ब्रह्मप्राप्ति
मधिगच्छति ४९ ॥

213

रामकंठीटीका ४

सर्वत्र सर्वस्मिन्विहिते वर्णस्वभावजे कर्मणि अनुष्ठीयमाने अपि वा
सक्तबुद्धिः सर्वत्र ख्यातसंगदोषरहितमतिस्तथा निषिद्धात्क
र्मणो जितात्मा निगृहीतान्तःकरणः तथा विगतस्पृहः सर्व
त्र सनातनस्य संपूर्णस्यात्ममयत्वदर्शित्वादनित्यात्स्वर्गादेर्वादे
विगता व्याहृतास्पृहा यस्य स तादृशः परमां प्रकृष्टां दोषरहितां
नैष्कर्म्यसिद्धिं समधिगच्छति सम्यग्लभते सर्वकर्मत्यागित्वफ
लं परमात्मसमापत्तिलक्षणां प्राप्नोति केन संन्यासेन आत्म
नस्वरूपेण फलाभिसंधित्यागात्मना अनन्तकर्मत्यागात्मना
[illegible] ४९ ॥

+ अथ सर्वगीतार्थसंग्रहं चिकीर्षया प्रस्तौति ॥

लासिकी टीका

+ जितः प्रत्यवमर्शेन वशीकृत आत्मा स्वस्वभावो येन स जिता
त्मा पुरुषः नैष्कर्म्यस्य ज्ञानकाष्ठाधिरोहेण सर्वकर्मोपरमस्य
सिद्धिं निष्पत्तिं परमां उत्कृष्टां संन्यासेन सर्वोत्कलत्वेनानु
ष्ठानेऽसति कर्मफलयोः संकल्पत्यागेनाधिगच्छति प्राप्नोति
किंविधः सः जितात्मा इति विशेषणद्वारा संन्यासमेव विवृणो
ति असक्तबुद्धिरिति सर्वत्र विहिते स्वाभाविके वा कर्मणि अस
क्ता अनिमग्ना बुद्धिरन्तःकरणं यस्य तथा विगता पापस्या क
लविषया स्पृहाभिलाषो यस्य सः [illegible]

पंचोलीटीका

स्वकर्मणा तमभ्यर्च्येति कर्मजायाः ज्ञाननिष्ठायोग्यतालक्षणासिद्धिरु
क्तास्य फलं ज्ञाननिष्ठामाह असक्तबुद्धिरिति हे कौंतेय सर्वत्र दारा
दिष्वात्मव्यतिरिक्तेषु प्रीतिरहितांतःकरणः जितात्मा जितेंद्रियः वि
गतस्पृहः एवंविध आत्मनः परमां कर्मजां सिद्धिं विलक्षणां जीवन्मु
क्तिलक्षणां नैष्कर्म्यस्य निःक्रियात्मस्वरूपावस्थानलक्षणस्य सिद्धिः
निष्पत्तिः तां संन्यासेन प्राप्नोति ४९

सणावीरसमिद्धोधिनी

तादृशामेवनैष्कृतिमाह असक्तेति सर्वत्रानुष्ठीयमाने विहितेवर्णा
श्रमोचिते कर्मणि प्रोक्तलक्षणसंगरहिता बुद्धिर्यस्य स तथा जितो नि
षिद्धात्कर्मणः सकाशान्निगृहीत आत्मान्तःकरणं येन स तथा विगता
स्पृहा स्वर्गादिफलाभिलाषो यस्य स तथाविधः कर्मयोगी संन्यासेन
काम्यकर्मपरिहारलक्षणेन फलकामनापरिहारवैशिष्ट्येन यथा
विहितानां सर्वकर्मणामनुष्ठानलक्षणेन चेति द्विविधेन परमां प्रकृ
ष्टां नैष्कर्म्यसिद्धिं नैष्कर्म्यस्य कर्मत्यागित्वस्य सिद्धिं महाम प्राप्तिलक्षणा
मपिगच्छति प्राप्नोति ४९॥

मधुभाष्य

४९

214

भाषा अनुवाद ॥

जो कहो कि दोष अंश छोडिके गुण मात्र ही ग्रहण कर्मके
कर्म किसप्रकार किये जाय सकै तो इस अपेक्षापर कहते है
कि जिन की बुद्धि असंङ्ग कहे आशक्ति रहित है और जिता
त्मा अर्थात् जो निरहंकारहै और जिनकी इछा कर्मके फल
से हट हो गई है ऐसे पुरुष सङ्ग जो आशक्ति औ फल इन दोनो
कोभी छोड कर इस अध्याय के नवम श्लोक मे कहे अनुसार
आशक्ति औ फल त्यागरूप सन्यासके द्वारा परम नैष्कर्म्यसिद्धिक
है सर्वकर्म निवृत्तिरूप जोसत्वशुद्धि सो पावतेहै ४९ ॥

दोहा

असक्तबुद्धि जोसर्वमे आत्मजित बिनकांक्ष ज्ञानसिद्धिको
श्रेष्ठको याहि संन्याससें वांक्ष ४९ ॥

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे स
मासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ५०॥

शांकरभाष्य टीका १

तथा चोक्तं सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नास्ते इति
यथोक्तेन स्वकर्मानुष्ठानेन ईश्वराभ्यर्चनस्वरूपेण जनितां प्रागुक्तलक्ष
णां सिद्धिं प्राप्तस्योत्पन्नात्मविवेकज्ञानस्य केवलात्मज्ञाननिष्ठारूपा
नैष्कर्म्यलक्षणा सिद्धिर्येन क्रमेण भवति तद्वक्तव्यमित्याह सिद्धिमि
ति सिद्धिं प्राप्तः स्वकर्मणेश्वरं समभ्यर्च्य तत्प्रसादजां कायेन्द्रियाणां
ज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं प्राप्त इति तदनुवाद उत्तरार्थः किं त
दुत्तरं यदर्थोऽनुवादस्तदाह यथा येन प्रकारेण ज्ञाननिष्ठारूपेण ब्र
ह्मपरमात्मानमाप्नोति तथा तं प्रकारं ज्ञाननिष्ठाप्राप्तिक्रमं मे मम वच
नान्निबोध त्वं निश्चयेनावधारयेत्येतत् किं विस्तरेण नेत्याह समासे
नैव संक्षेपेणैव हे कौन्तेय यथा ब्रह्म प्राप्नोति तथा निबोधेति अने
न प्रकारेण या प्रतिज्ञाता ब्रह्मप्राप्तिस्तामिदंतया दर्शयितुमाह नि
ष्ठा ज्ञानस्य या परेति निष्ठा पर्यवसानं परिसमाप्तिरित्येतत् कस्य ब्र
ह्मज्ञानस्य या परा परिसमाप्तिः कीदृशी सा यादृशमात्मज्ञानं की
दृक् तत् यादृशश्चात्मा कीदृशोऽसौ यादृशो भगवतोक्त उपनिषद्वा
क्यैश्च न्यायतश्च ननु विषयाकारं ज्ञानं न विषयो नाप्याकारवानात्मे
ष्यते क्वचित् नन्वादित्यवर्णं भारूपः स्वयंज्योतिरित्याकारवत्त्वमात्म
नः श्रूयते न तमोरूपत्वप्रतिषेधार्थत्वात्तेषां वाक्यानां द्रव्यगुणाद्या
कारप्रतिषेधे आत्मनस्तमोरूपत्वे प्राप्ते तत्प्रतिषेधनार्थान्यादित्यव
र्णमित्यादि वाक्यानि अरूपमिति च विशेषतो रूपप्रतिषेधादविष
यत्वाच्च न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनं अश
ब्दमस्पर्शमित्याद्यैस्तस्मादात्माकारं ज्ञानमित्यनुपपन्नं कथं तर्ह्या
त्मनो ज्ञानं सर्वं हि यद्विषयं ज्ञानं तत्तदाकारं भवति निराकारश्चा
त्मेत्युक्तं ज्ञानात्मनोरुभयोर्निराकारत्वे कथं तद्भावनानिष्ठेति ना
त्यन्तनिर्मलत्वस्वच्छत्वसूक्ष्मत्वोपपत्तेरात्मनोऽवद्वेष्यात्मसमत्वे मि

श्री
गी॰ टी॰
मं॰

216

त्वाद्युपपत्तेरात्मचैतन्याकाराभासत्वोपपत्तिः बुद्ध्याभासं मनस्त
दाभासानींद्रियाणि इंद्रियाभासश्च देहोऽतो लौकिकैर्देहमात्रएवात्म
दृष्टिः क्रियते देहचैतन्यवादिनश्च लोकायतिकाश्चैतन्यविशिष्टः का
यः पुरुष इत्याहुः तथान्ये इंद्रियचैतन्यवादिनोऽन्ये मनश्चैतन्यवादिनो
ऽन्ये बुद्धिचैतन्यवादिनस्ततोऽप्यन्तरमव्यक्तमव्याकृताख्यमविद्यावस्था
मात्मत्वेन प्रतिपन्नाः केचित् प्रकृतिचैतन्यवादिनः सर्वत्र हि बुद्ध्या
दिदेहान्ते आत्मचैतन्याभासतात्मभ्रांतिः कारणमिमतश्चात्मवि
षये ज्ञाने न विवादस्तेषु किंतर्हि नामरूपयनात्माध्यारोपेण निवृत्ति
रेव कर्तव्या नात्मचैतन्यविज्ञाने सर्वैरभ्युपगमात्वेन अविद्याध्यारोपितस
र्वपदार्थाकारैरेव विशिष्टतया गृह्यमाणत्वात् अतएव विज्ञानवादि
नो बौद्धाः विज्ञानव्यतिरेकेण वस्त्वेव नास्तीति प्रतिपन्नाः प्रमाणान्त
रनिरपेक्षतां च स्वसंविदितत्वाभ्युपगमेन तस्मादविद्याध्यारोपणनि
राकरणमात्रं ब्रह्मणि कर्तव्यं न तु ब्रह्मविज्ञाने यत्नोऽत्यन्तप्रसिद्ध
त्वादविद्याकल्पितनामरूपविशेषाकारपहृतबुद्धित्वादत्यन्तसिद्धं सु
विज्ञेयमासन्नतरमात्मतत्त्वमप्यप्रसिद्धं दुर्विज्ञेयमतिदूरं अप्राप्यमि
व प्रतिभाति अविवेकिनां बाह्याकारनिवृत्तबुद्धीनां तु लब्धगुर्वा
त्मप्रसादानां नातः परं सुखं सुप्रसिद्धं सुविज्ञेयमासन्नमस्ति तथा
चोक्तं प्रत्यक्षावगमं धर्म्यमित्यादि केचित्तु पंडितंमन्या निराकारत्वा
दात्मवस्तु नोपैति बुद्धिरतोऽदुःसाध्या सम्यक्ज्ञाननिष्ठेत्याहुः सत्य
मेवं गुरुसंप्रदायरहितानामश्रुतवेदान्तानामत्यन्तबहिर्विषयास
क्तबुद्धीनां सम्यक्प्रमाणेष्वकृतश्रमाणां न हि परीतानामत्र लौकि
कग्राह्यग्राहकद्वैतवस्तुनि सद्बुद्धिर्नितरां रूढः सम्यग्यथा आत्मचैत
न्यव्यतिरेकेण वस्त्वन्तरस्यानुपलब्धेः यथा चैतदेवमेव नान्यथेत्यवो
चाम उक्तं च भगवता यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेरिति
तस्माद्बाह्याकारभेदबुद्धिनिवृत्तिरेवात्मस्वरूपावलम्बने कारणं नह्यात्मा
नाम कस्यचित् कदाचिदप्रसिद्धः प्राप्यो हेय उपादेयो वा अप्रसिद्धे हि त
स्मिन्नात्मनि स्वार्थाः सर्वाः प्रवृत्तयः व्यर्थाः प्रसज्येरन् न च देहाद्यचे
तनार्थत्वं शक्यं कल्पयितुं न च सुखार्थं सुखं दुःखार्थं वा दुःखं

त्मावगतमवसानार्थत्वाच्च सर्वव्यवहारस्य तस्माद्यथा स्वदेहस्य प
रिच्छेदाय न प्रमाणान्तरापेक्षा ततोऽप्यात्मनोऽन्तरतममवात्तद्वग
तिं प्रति न प्रमाणान्तरापेक्षेत्यात्मज्ञाननिष्ठा विवेकिनो सुप्रसि
द्धेति सिद्धे येषामपि निराकारं ज्ञानमप्रसिद्धं तत्तेषामपि ज्ञानवस्तु
नैव ज्ञेयावगतिरिति ज्ञानमप्यन्ते प्रसिद्धं सुखादिवद्वेद्यमभ्युप
गन्तव्यं जिज्ञासानुपपत्तेश्चाप्रसिद्धं चेत् ज्ञाने ज्ञेयवज्जिज्ञास्येत
यथा ज्ञेयं घटादिलक्षणं ज्ञानेन ज्ञातुमाप्तुमिच्छति तथा ज्ञान
मपि ज्ञानान्तरेण ज्ञातुमाप्तुमिच्छेच्चेत् दृष्टि अतोऽत्यन्तप्रसि
द्धे ज्ञाने ज्ञानायत्नमेव प्रसिद्ध इति तस्मात् ज्ञाने यत्नो न कर्तव्यः
किं तत्रात्मबुद्धिनिवृत्तावेव तस्मात् ज्ञाननिष्ठा सुसम्पाद्या ५०॥

आनन्दगिरिकृतटीका २

संन्यासान्नैष्कर्म्यप्राप्तिरित्यत्र वाक्योपक्रमात्कृत्यमाह तथाचे
ति ज्ञानस्य प्राप्तियोग्यतावतो ज्ञातसम्यग्रियस्तत्फलप्राप्तौ
मुक्ताबुक्तायो वक्तव्यशेषोनातिमाशंक्याह सर्वोक्तेनेति क्रमादे
वक्तव्यं तदिनूच्यते सिद्धिं प्राप्त इत्युक्तमेव कस्मादनूद्यते तत्राह तद
नुवाद इति उत्तरमेव प्रश्नपूर्वकं स्फोरयति किं तदित्यादिना ।
ज्ञाननिष्ठाप्राप्तिक्रमस्य विलक्षणोक्तौ दुर्बोधत्वमाशंक्य परिहरति।
किमिति चतुर्थपादस्य पूर्वेणासङ्गतिमाशंक्याह यथेति निष्ठा
यः सापेक्षत्वात् प्रतिसंबन्धि निर्देष्टव्यमित्याह कस्येति यावल्ल
ज्ञानस्य परानिष्ठा सा प्रकृतस्य ज्ञानस्य निष्ठेत्याह बलेति तस्य
परा निष्ठा न प्रसिद्धेति कृत्वा साधनानुष्ठानाधीनतया साध्येति
मत्वाह इत्युक्तेति कीदृशीति प्रसिद्धमात्मज्ञानमनूद्य प्रबलज्ञान
निष्ठा सज्ज्ञानेत्याह यादृशमिति तत्रापि प्रसिद्धिरसिद्धेति शंक
नेकीदृशीति श्रुत्यैव विशेषो हीति न्यायेनोत्तरमाह यादृशा इ
ति तस्मिन्नपि विप्रतिपत्तेरप्रतिष्ठितमभिसंधाय एकेति कीदृश
शेति भगवद्वाक्यान्युपनिषद्वाक्यानि वाश्रित्य परिहरति यादृश
इति न जायते म्रियते वेत्यादीनि वाक्यानि कूटस्थमसंगम
[illegible]स्मायः ज्ञानस्य विषयाकारत्वादात्मनस्त्वविषयत्वादनाका
[illegible]व तदाकारकज्ञानायोगादात्मप्रसिद्धावपि नात्मज्ञानप्रसि

श्री
गी टी
भा
217

द्विरिति शंकते नन्विति आकारवत्त्वमात्मनः इति सिद्धमि
ति सिद्धान्ती शंकते नन्वादित्येति उक्तवाक्यानामन्यार्थत्वद
र्शनेन पूर्ववादी परिहरति नित्यादिना सेतुहवाक्ये प्रपंचप
ति द्वयेति इत्याकारवत्त्वमात्मनो नास्तीत्याह अरूपमिति
यद्यात्मनो विषयत्वाभावान्न हि विषयं ज्ञानेन संभवतीत्युक्ते तदु
पपादयति अविषयत्वाच्चेति आत्मनो विषयत्वे इति मुद्रा
हरति नेत्यादिना सदृशे समस्तदर्शने विषयत्वाय यथात्मनो रू
पं न तिष्ठतीत्यर्थः तदेव करणागोचरत्वेनोपपादयति नेति शब्दा
दिस्वरूपत्वादात्मा विषयो न भवतीत्याह अशब्दमिति आत्मनो वि
षयत्वाकारवत्त्वयोरभावे फलितमाह तस्मादिति ज्ञानस्यात्माका
रत्वाभावे सम्यग्ज्ञानमिति व्यपदेशासिद्धिरित्येकदेशी शंक
ते कथं तर्हीति काशानुपपत्तिरित्याशंक्याह सर्वं हीति आत्म
नोपि तर्हि विषयत्वेन ज्ञानस्य तदाकारत्वस्यादित्याशंक्याह निरा
कारत्वेति आत्मनो विषयराहित्ये चकारार्थः आत्मवत्तज्ज्ञान
स्यापि तर्हि निराकारत्वमभिव्यक्ततीत्यत आह ज्ञानेति तच्छब्देनात्म
ज्ञाने गृह्यते तस्य भावनापौनःपुन्येनानुसंधाने तस्य निष्ठा समा
प्तिरात्मनि साक्षात्कारस्तावच्चैवैतत् सर्वमात्मनो ज्ञानस्य वा नि
कारत्वे सिध्यतीत्यर्थः ज्ञानात्मनोः साम्योपन्यासेन सिद्धान्ती समा
धत्ते नेत्यादिना यथोक्तसाम्यानुसारादात्मचैतन्याभासव्याप्ता ज्ञा
न परिणामवती बुद्धिः साभासा बुद्धिं व्याप्य मनः साभासं मनो व्याप्ति
मानीन्द्रियाणि साभासेन्द्रियव्याप्तः स्थूलदेहस्तत्र लौकिकभ्रान
प्रमाणयति अत इति आत्मदृष्टेर्देहमात्रे दृष्टत्वात्तत्र चैतन्याभासव्या
प्तिमिन्द्रियद्वारा कल्पते इन्द्रियेषु चैतन्यदृष्टिदर्शनाच्चैतन्याभासो बुद्धि
त्वे मनोद्वारा सिध्यति मनसि चात्मदृष्टेश्चैतन्याभासवत्त्वे बुद्धि
द्वारा लभ्यते बुद्धौ चात्मदृष्टेर्ज्ञानद्वारा चैतन्याभाससिद्धिरित्यर्थः
देहे लौकिकमात्मत्वदर्शनमयथाभावाद्युपात्तमित्याशंक्याह
देहेति तथापि कथमिन्द्रियाणां व्यापकीनमात्मत्वमित्याशंक्या
ह मन इति तथापि मनसोप्यहात्मत्वं न तत्याज्यमित्याशंक्याह बुद्धी
प्रमत इति बुद्धेरात्मत्वमिति तथापि नेतिमिति सूचयति प्रत्ये

ति देहादौ बुद्ध्येतेषु समानत्वबुद्धिर्नास्त्येवेति नियमं वारयति नतो
पीति नच हिंसाभावेनार्थानिमिणि करणोपासकानामात्मधीरस्तीम
ष्टेः बुद्ध्यादौ देहान्ते लौकिकपरीक्षकाणामात्मनभ्रान्तो साधारण।
कारणमाह सर्वत्रेति आत्मज्ञानस्य लौकिकपरीक्षकप्रसिद्धत्वादेव
विधिविषयत्वमपि परेषां पराक्रमिमाह इयत्तइति ज्ञानस्य विधेयत्वा
भावे किं कर्तव्यं इत्यादिवाक्यैरित्याशंक्याह किंतर्हीति आत्मज्ञाना।
स्याविधेयत्वे प्रायुक्तमतः शास्त्रेति देहे विहरणेति अविद्येति देहेंद्रिय
मनोबुद्ध्यव्यक्तेरुपलभ्यमानैः सहोपलभ्यमाने चेतने नान्यथा तेषाम्
पलभ्यो जडत्वादिभ्यस्व विज्ञानवादिभ्यांति प्रमाणयति भूतपदेति सर्वं
तेषु ज्ञानमात्ममेव ज्ञायते तेन ज्ञानातिरिक्तं नास्त्येव वस्तु संमतं हि
त्वमदृष्टं वस्तु ज्ञानातिरिक्तं नास्तीति तेभ्यस्तेनोऽर्थः ज्ञानस्यापि
ज्ञेयत्वात् ज्ञानवत्त्वन्तरमेष्टव्यमित्याशंक्याह प्रमाणान्तरेति ज्ञानस
त्वेनैव ज्ञेयत्वोपगमनेनातिरिक्तप्रमाणनिरपेक्षतावधारणेनियत्वाच्चेति
तेषां भ्रान्तेनाविधेयत्वे फलितमाह तस्मादि
तेवयः भ्रान्तिविज्ञानस्य सिद्धत्वेनाविधेयत्वे कथम
ति यत्रात्मभावं नाववलम्बनं ज्ञानस्य चामन्तप्रसिद्धत्वं प्रतिमास्रु उ
त्मापगमया प्रथ्या लौकिकानामित्याह शब्देति यथा प्रतिमासइ
विज्ञेयत्वादिरूपमेव ब्रह्म किं नस्यानमाह वाक्येति गुरुप्रसादे गृभ्यूत
यतोऽपितत्त्वदेशाचार्यस्य करुणातिरेकान्तं बुध्यतामिति निरवग्रेश
व्यग्रहः आत्मप्रसादस्वयिगतपदशक्तिनाम्र्थवाक्यस्य श्रोतप्रमाणेमि
यानादात्मनोमनसोऽविषयत्वादेतस्य प्रयोगेकारणतया ततः श्रावणमि
ति विवेकः आत्मज्ञानस्यात्महारा प्रसिद्धत्वे वाक्योपक्रमे प्रमाणय
ति नवाचेति आत्मनो निराकारत्वात्सिन् बुद्धेः प्रवृत्तेः सम्यक्ता
नेतिष्ठा नसम्याघेति मतमन्यायपति केवितिति वहिर्ज्ञेनवाना मत
भिवाने वाचत्वनि सम्यग्ज्ञाननिष्ठा इः साध्येति विकल्पायप्रगी
कारेति सत्यमिति सर्वविशेषणरहितोऽन्तर्विशेषणे हेतुत्वेन योज
नीयं द्वितीयं द्रूषयति नविपरीतानामिति प्रवर्तनिष्ठानो हेतुविषये
सम्यग्वृद्धेः निश्चयेन इः समाधाने हेतुमाह आत्मेति नद्यतिरेकेण
वस्तुत्वरस्यासत्वे कथमित्याशंक्याह यथा चेति प्रहेतमेव वस्तु है
म ना विषयके नान्यथा नास्तिकमित्येतदेव यथा स्यात्तथोक्तं वेनोवं

श्री
गी टी
प्र

218

तत्र तत्राध्यायेष्विति योजना ज्ञाननिष्ठा नामाद्वैतदर्शिनो द्वैते ना
स्ति सद्बुद्धिरित्यत्र भगवतोपि सम्मतिमाह उक्तेति परमते
निराकृत्य प्रकृतमुपसंहरति आत्मनो निराकारत्वे ज्ञानस्य तद
लम्बनत्वं किं कारणमित्याशंक्याह तस्मादिति सत्यात्मा कथंचि
त् ज्ञानक्रियासाध्यश्चेत्तस्य हेयोपादेयान्यतरकोटिनिवेशात् ग्रा
मे स्वर्गादिवत् क्रियासाध्यत्वेनासिद्धत्वं नेत्याह नहीति आत्म
त्वादेव प्रसिद्धत्वेनाप्रमत्वादनात्मवत्तस्य हेयोपादेयत्वयोरयोगा
त् क्रियासाध्यत्वेत्यर्थः आत्मनश्चेदेते क्रियासिद्धत्वात्तदा सर्वप्रवृ
त्तीनामर्थो रयनिःश्रेयसार्थीनां आत्मार्थत्वायोगाद् दर्शिनो भावे
ऽर्थत्वमप्रामाणिकं स्यादित्याह अप्रसिद्धे हीति न प्रवृत्तीनां स्वा
र्थत्व देहादीनां अन्यतरस्यार्थित्वेन तादर्थ्यादित्याशंक्य तदादि
वदचेतनस्यार्थित्वायोगात्मैवमित्याह नचेति ननु प्रवृत्तीनां फ
लावसायितया सुखदुःखयोरन्यतरार्थत्वात्तत्स्वार्थत्वत्राह तत्र
चेति प्रवृत्तीनां सुखदुःखार्थत्वेपि तयोः स्वार्थत्वासिद्धेरर्थित्वेना
त्मासिद्धेरित्यर्थः किंच सर्वोपि व्यवहारो आत्मावगमपर्यवसानः सर्वोप्य
वहारः न चात्मनः प्रसिद्धेः यत्तादृग्व्यवहारस्य न तत्सार्थत्वेनात्मप्र
सिद्धिरेष्टव्येत्याह आत्मेति ननु आत्माप्रसिद्धोपि प्रमाणद्वारा प्रसिध्य
ति तत् प्रमाणादेवेति मायायातत्राह तस्मादिति मानमेयादिसर्वव्यव
हारस्यात्मावगमन्तत्वोपगमात् प्रागेव प्रमाणप्रवृत्तेरात्मप्रसिद्धेरेष्ट
व्यत्वादित्यर्थः आत्मावगतेरेव स्वाभाविकत्वे विवेकवतामारोपनि
वृत्त्या ज्ञाननिष्ठा सुप्रसिद्धेत्युपसंहरति इत्यात्मेति ननु निराकारत्वे
वात्मनि मीमहे बुद्धिमिति वदतात्मनो अनाकारमपरमस्तीत्यसिद्धत्वा
त्प्रागर्थावगतेरप्रसिद्धमेव ज्ञानेनेत्याह येषामिति ज्ञानादिवत् त्री
त्मानमवगम्य ज्ञाने नात्मेयं विषयावगम्या तदन्यमिनाविलतरेत
राश्रयादिति भावः इतश्च ज्ञाने प्रसिद्धमन्यथा तत्र जिज्ञासाप्रस
गाच्चेत् ज्ञाने जिज्ञासाप्रसिद्धा प्रसिद्धेश्च तद्योगादित्याह जिज्ञासेति
तदेव प्रपंचयति अप्रसिद्धं चेदिति दृष्टान्तमेव व्याचष्टे यथेति दृ
ष्टान्तिके विभजति तथेति इत्यादि निराचष्टे नचेति ज्ञानस्या
ज्ञानान्तरेण हेयत्वमनवस्थार्थः अनवस्थापत्तेरित्यर्थः ज्ञाने जि

त्मासान्नुपपत्तेः फलितमाह मत इति प्रसिद्धेऽपि ज्ञाने ज्ञातव्यांश
ति किमायातं तत्राह ज्ञातापीति ज्ञानस्य विना ज्ञातारमपर्यवसा
नादित्यर्थः ज्ञानस्य प्रसिद्धत्वे तत्र भावनापर्यायो विधिर्नास्तीत्याह
तस्मादिति कुत्र तर्हि प्रयत्नाख्या भावनेत्याशङ्क्याह किंत्विति
प्रविषये निराकारे चात्मनि ज्ञाननिष्ठायाः दुःसम्पाद्यस्वभा
वे फलितम् निगमयति तस्मादिति ५० ॥

स्वामिकृतटीका ३

एवंभूतस्य परमहंसस्य ज्ञाननिष्ठया ब्रह्मभावप्रकारमाह सिद्धिं
प्राप्त इति षड्भिः नैष्कर्म्यसिद्धिं प्राप्तः सन् यथा येन प्रकारेण ब्रह्माप्नो
ति तथा तेन प्रकारेण संक्षेपेणैव वचनान्निबोध [illegible] ॥

पिशाचभाष्यटीका ४

यथा सिद्धिं प्राप्तः ब्रह्म नैष्कर्म्यमाप्नोषि तथा निबोध श्रवणाद्भवेमम
ईश्वरस्य मम समासेनैव संक्षेपेणैव या स्थितिः ज्ञानस्य या परा
प्रकृष्टा तां निबोधेत्यर्थः ५० ॥

रामानुजभाष्यटीका ५

सिद्धिमिति सिद्धिं प्राप्तः प्राप्ययाणादहरहरनुष्ठीयमानकर्मयोगनिष्पा
द्यं ध्यानसिद्धिं प्राप्तो यथा येन प्रकारेण वर्तमानो ब्रह्म प्राप्नोति यथा
समासेन निबोध मत्तः एव ब्रह्म विशेषणं निष्ठा ज्ञानस्य या परेति ज्ञानस्य
ध्यानात्मकस्य या परा निष्ठापर्यवसानमित्यर्थः ५० ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ५० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

एवंभूतस्य परमहंसस्य ज्ञाननिष्ठया ब्रह्मभावप्रकारमाह सिद्धि
मिति षड्भिः नैष्कर्म्यसिद्धिं प्राप्तः यथा येन प्रकारेण ब्रह्म प्राप्नोति
तथा मे मत्तः निबोध संक्षेपेण जानीहि यावदामाणा ज्ञानस्य परा
सर्वोत्कृष्टा निष्ठा मर्यादा ५० ॥

वनमाली टीका ८

कसाधनसंपन्नस्य संन्यासिनो भगवज्ज्ञानोत्पत्तौ साधनक्रममाह
सिद्धिमिति नैष्कर्म्येश्वराराधनजन्यप्रसादजां सर्वकर्मत्यागपर्य

श्री
गी टी
अ॰

२१९

नोज्ञानोत्पत्तियोग्यतारूपां सिद्धिं प्राप्तो यथा येन प्रकारेण ब्रह्माप्नो
ति परं ब्रह्म साक्षात्करोति समासेन तथा मे वचनान्निबोध या ज्ञानस्य
परा निष्ठा पर्यवसानं तु तत्कष्टमत्यज्ञाने नास्तीत्यर्थः यद्वा सिद्धिं
भगवदपरोक्षं प्राप्तो यथा ब्रह्माप्नोति प्राकृतदेहादिविहाय स्थूल
लिंगदेहः सत्लोकविशेषस्थं विग्रहविशिष्टमनन्तं परमेश्वरमा
प्नोति तथा निबोधेत्यर्थः या ज्ञानस्य परा निष्ठा पराकाष्ठा तदधिको
ज्ञानस्याविषयो नास्ति ज्ञेयावधिरित्यर्थः ५० ॥

ऋसमवैजयंतीटीका ४

प्राप्तसिद्धेर्जनस्य पुनः किंफलं स्यादित्यपेक्षायामाह सिद्धिमिति
स्ववर्णोचितेन कर्मणा प्रयाणादहरहः परमपुरुषमाराध्य तत्।
प्रसादनामात्मध्यानपरां सर्वकर्मत्यागरूपां सिद्धिं प्राप्तो जनो यथा
येन प्रकारेण ब्रह्मात्मस्वरूपमाप्नोत्यनुभवति तथा तत्प्रकारं समा
सेन संक्षेपेण गदतो मे मत्तः सकाशान्निबोध त्वं जानीहि तद्देवब्र
ह्म विशिष्यते हे कौन्तेय यद्ध्यानं स्याज्ज्ञानस्य या परा परमात्म
विषया निष्ठा नाम शिवस्वमाणं परमप्राप्यरूपा स्मरणैकतानेयम
नेनार्जुन सैन्यं तद्ब्रह्माधिकारित्वसूचितं ५० ॥

+ प्राग्युक्तसाधनसंपन्नस्य सर्वकर्मसंन्यासिनो ब्रह्मज्ञानोत्पत्तौ साधनक्रममाह ॥

मधुसूदनी टीका ५०

+ स्वकर्मणेश्वरमाराध्य तत्प्रसादजां सर्वकर्मत्यागपर्यन्तां ज्ञानोत्पत्ति
योग्यतारूपां सिद्धिमन्तःकरणशुद्धिं प्राप्तो यथा ब्रह्माप्नोति येन प्र
कारेण शुद्धमात्मानं साक्षात्करोति तथा तं प्रकारं निबोध मे मद्वचना
दवधारयानुष्ठातुं किमिति विस्तरेणेत्याह समासेन संक्षेपेणैव
न तु विस्तरेण हे कौन्तेय तदवधारणे किं स्यादित्यत आह निष्ठा ज्ञा
नस्य या परा ज्ञानस्य विचारपरिनिष्पन्नस्य निष्ठा परिसमाप्तिः यदन
न्तरं साधनान्तरेण नष्टेऽवमास्ति पराप्रोष्टा सर्वसाधनानामामोद
नन्तरं ज्ञानस्य सिद्धिं ब्रह्मप्राप्तिरूपां ज्ञाननिष्ठां परं समृपेण निबो
धेत्यर्थः [illegible] ५० ॥

सदानन्दी टीका ॥

सर्वोक्तसाधनैः सर्वैः संपन्नस्य विवेकिनः समन्तोऽत्र ब्रह्मविज्ञान।
साधनक्रममुच्यते । स्वकर्मणेश्वरमाराध्य सिद्धिं तत्प्रसादजां

नशुद्धिंपरिप्राप्तोविज्ञानोत्पत्तियोग्यतां २ ब्रह्मयेनप्रकारेणप्र
स्मगात्तद्यथाविच्छुतं साक्षात्करोतितंप्रकृष्टमात्मानंपरमंब्रह्मैव ३ मम
वाक्यात्प्रकारंतेकर्त्तव्यमवधारय संक्षेपेणैवकौंतेयतत्तुविस्तरशः
पुनः ४ तस्यावधारणीयस्यानक्रमेणैवसमाहितः निष्ठात्वस
विचारेणज्ञानस्यज्ञानच्यातिनः ५ निष्ठापरिसमाप्तिर्याप्राप्यका
र्यंनकेंचन साक्षात्मोक्षैकहेतुत्वात्सर्वोमायायाःपरास्तता ६ तांवे
संक्षेपतःश्रुत्वात्तत्परोभवसर्वदा ७ ॥ ५० ॥

नीलकंठी टीका १२

स्वकर्मनिरतःसिद्धिंयथाविंदतीतितत्प्रतिज्ञातमुपपादितंइदा
नींनैष्कर्म्यसिद्धिंप्राप्तोपिपरिव्राड्वशीकारसंज्ञकवैराग्यवानय
यावद्ब्रह्मप्राप्नोतितथावक्ष्यंप्रतिजानीतेसिद्धिमितिसिद्धिंनैष्कर्म्य
सिद्धिंनिबोधतुश्रवणेनमद्वचनात्समासेनसंक्षेपेणैवहेकौंतेय
यायतस्मात्प्राप्यब्रह्मविधेयापेक्षस्त्रीलिंगत्वंज्ञानस्यपरानिष्ठायदपेक्षयाऽ
मच्छ्रेयोऽत्तरतरंनास्तीत्यर्थः ५० ॥

आनंदीटीका १३

एवंकर्मयुक्तिजांसिद्धिंसंदर्श्यसंयमयोगजामपिदर्शयति ॥
यथासिद्धिंयोगसिद्धिंप्राप्तः तद्ब्रह्मप्राप्नोति यावब्रह्मप्राप्तिरेव
ज्ञानस्यपरानिष्ठानिर्वाहस्थाने ततः परमपरस्यात्तयस्याभा
वान् तदेतत्संक्षेपेणमेमयोच्यमानंनिबोध ५० ॥

+ इत्थंयेनज्ञानेनसंहृतंक्रियमाणमेव
+ वाक्कर्मभवतितस्यक्रमेणपरंब्रह्मकर्षप्रति
पादयितुमुपक्रमते ॥

[illegible]रामकंठीटीका १४

+ उपायभूतस्यज्ञानस्यपरानिरुत्तरानिष्ठाप्राप्तभूमिः यतः प
+ रंतेयंनसंभवतीत्यर्थः तदुपायमपिकथ्यमानमवधारय प
वेविधोब्रह्मप्राप्नोति [illegible] ५०

लासिकी टीका

+ इत्यनानंतलाभक्रमंविव
क्षति ॥

+ सिद्धिंज्ञानस्यपरमुत्कर्षंयथायेनप्रकारेणप्राप्तोयोगी
ब्रह्मानिरुत्तरंतत्त्वमाप्नोतिआप्नोति तथातेनप्रकारेणाव

गी॰
टी॰
अ॰

२२०

च्यमाणं मे वचनान्निबोधावधारय किं तु समासेनैव सं
क्षेपेणैव पूर्वं विस्तारेणोक्तत्वात् कां सिद्धिमिति सिद्धेर्लक्षण
माह निष्ठेति या सिद्धिर्ज्ञानस्योद्भवलक्षणा स्या परा निष्ठा पर्य
न्तकाष्ठा ५०

पंचोलीटीका

नैष्कर्म्यलक्षणा केवलज्ञाननिष्ठा येन क्रमेण भवति तं क्रमम्मा
ह सिद्धिमिति कौन्तेय सिद्धिं प्राप्तः सन् यथा येन प्रकारेण ज्ञान
निष्ठारूपेण ब्रह्म परमात्मानं प्राप्नोति तथा तं ज्ञाननिष्ठाप्राप्ति
क्रमं मम वचनान्निबोध जानीहि या ब्रह्मप्राप्तिर्ब्रह्मज्ञाननिष्ठा
ष्ठापरिसमाप्तिः समासेन संक्षेपेण तां निबोध ५०

रसावीरसमिद्धोधिनी

अथ येन ज्ञानेन संस्कृतं क्रियमाणं सत्कृतफलदं भवति तस्य
क्रमेण परं प्रकर्षं प्रतिपादयितुमुपक्रमते सिद्धिमिति सिद्धिं
नैष्कर्म्यसिद्धिं प्राप्तः कर्मयोगी यथा येन प्रकारेण ब्रह्म पूर्णमेव
तत्त्वसायुज्यमाप्नोति तथा तेन प्रकारेण समासेनैव संक्षेपेणैव
मे मम वचनानि बोधावधारय तमेव प्रकारमाह निष्ठेति या ज्ञा
नस्य स्वधर्मविषयकस्य निश्चयस्य या परा निकृष्टा निष्ठा प्रा
न्तभूमिरिति ५०॥

मधुभाष्य

५०॥

भाषा अनुवाद टीका

पूर्वोक्त ऐसे परमहंस पुरुष को ज्ञान निष्ठा क्रमसे ब्रह्मभाव की
प्राप्ति का प्रकार इस श्लोक सेलेसाठिके श्लोक तक कहतेहैं कि हे
कौंतेय अर्जुनने नैष्कर्म्यसिद्धिकोपायकरके ज्ञानविषयक प्रकृष्ट नि
ष्ठा से जैसे पुरुष ब्रह्मकोप्राप्त होतेहैं सोप्रकार संक्षेप रूप हमसे
श्रवण करो अर्थात् ज्ञान कीजोश्रेष्ठ निष्ठा है सोसुनो ५०॥

दोहा

सिद्धिपायज्यों ब्रह्महि पावहि सुन मो सोहि ऊंतिसुन संदे
ऐसें नेष्ठाज्ञानहिकोहि ५०॥

221

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च । शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ ५१ ॥

शांकरभाष्यटीका १

सेयं ज्ञानस्य परा निष्ठोच्यते कथं कार्येति बुद्ध्या अध्यवसायात्मिक या मायारहितया युक्तः संपन्नो धृत्या धैर्येण आत्मानं कार्यकर णसंघातं नियम्य च नियमनं कृत्वा वशीकृत्य शब्दादीन् शब्दादि येषां ते शब्दादयस्तान् विषयांस्त्यक्त्वा सामर्थ्यात् शरीरस्थितिमा त्रोपयुक्तान् केवलान् मुक्त्वा ततोऽधिकान् सुखार्थान् त्यक्त्वेत्यर्थः शरीर स्थित्यर्थत्वेन प्राप्तेषु च रागद्वेषौ व्युदस्य च परित्यज्य ॥ ५१ ॥

आनंदगिरिकृत टीका २

ब्रह्मज्ञानस्य परां निष्ठां प्रतिष्ठापयितुमनन्तरश्लोकान्तरमवतार यति सेयमिति सेयं ब्रह्मज्ञानस्य परा निष्ठा समारोपिता ज्ञानरूपोच्यते इत्युक्ता सिद्धिं प्राप्तो यथा ब्रह्माप्नोति तथा निबोध मे इत्युक्तं नकथं केनोपायेनेति प्रश्नार्थः ॥ तस्मिन्नित्युपायं दर्शयति बुद्ध्येति अध्यवसायोऽत्रात्मनिश्चयः मायया सा कार्या तस्मादिति यदुक्तं विषयमात्रेण देह मात्रस्य भेदं सदाहरति संशयविपर्ययरहितत्वं शब्दादिसमस्तविषयमात्रेणा रहितत्वं शब्दादीनिति सामर्थ्यादिति विषयमात्रस्य स्थितिरपि दुःस्था स्यादित्याशंक्याह सामर्थ्यादिति देहस्थित्य र्थे देहस्थितिमनुपपन्ने ज्ञाननिष्ठासिद्धिप्रसंगादित्यर्थः देहस्थित स्थितिरपि ज्ञाननिष्ठाप्रतिबन्धके ब रागादिज्ञाननिष्ठाप्रतिबन्धके प्रयोजनाय प्राप्तेष्वर्थेषु विविक्तसेवी स्यादिति संबंधः ५१ ॥ दस्येति शरीरेति परित्यज्य

स्वामिकृत टीका ३

*नदेवाह बुद्ध्येति ॥

*उक्तेन प्रकारेण विशुद्धया सात्त्विक्या बुद्ध्या युक्तो धृत्या सात्वि क्या आत्मानं नियम्य निश्चलीकृत्य शब्दादीन्विषयांस्त्य क्त्वा तन्निमित्तौ च रागद्वेषौ व्युदस्य ब्रह्मभूयाय कल्पत इति तृतीयेनान्वयः ॥ ५१ ॥

पिशाचभाष्यटीका ४

बुद्ध्या अध्यवसायात्मिकया विशुद्धया सात्त्विक्या युक्तो धृत्या धैर्येण

श्री
गी टी
प्र
२२२

नयाचविशुद्धयाबुद्ध्यात्मानंकार्यकारणसंघातंनियम्यस्वाधीनंविधायश
ब्दादिविषयांस्त्यक्त्वारागद्वेषौव्युदस्यचप्रपनीय ५१ ॥

रामानुजभाष्य टीका ५

बुद्ध्येति ~~बिबिबेबी~~ बुद्ध्यमिति बुद्ध्याविशुद्धयायथावस्थितात्मतत्त्ववि
षययायुक्तः धृत्यात्मानंनियम्यचविषयविमुखीकरणेनयोगयोग
मनः कृत्वाशब्दादीन्विषयांस्त्यक्त्वाअसंनिहितान्कृत्वानत्रिमित्तो।
रागद्वेषौव्युदस्यच ५१ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ५१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

तामेवाह बुद्ध्येति एवंभूतःब्रह्मभूयायकल्पतइत्युत्तरेणा
न्वयः किंभूतः विशुद्धयाव्यवसायात्मिकयाबुद्ध्यायुक्तः
धृत्यासात्विक्यात्मानंबुद्धिंनियम्यनिश्चलांकृत्वाशब्दादीन्विषया
न्परित्यज्यदर्शनादीन्त्यक्त्वातद्विषयौरागद्वेषौव्युदस्यनिरस्य
प्रकोप्रदसमस्ता ५१ ॥

वनमाली टीका ८

ज्ञाननिष्ठाप्रकारोयमुच्यते बुद्ध्येतिविशुद्धयासंशयविपर्ययशून्य
यासात्विक्याधृत्या ~~सात्विक्याधृत्या~~ सात्विक्यात्मानंदेहेन्द्रियसंघातं
नियम्योन्मार्गप्रवृत्तेर्निवार्यस्वरूपप्रवणंतंचकृत्वाशब्दादीन्विषयां
स्त्यक्त्वाभोगेनवैराग्येनसामर्थ्यात्ज्ञाननिष्ठार्थेदेहस्थितिमात्र
प्रयोजनानन्यप्रयोजनानिनिषिद्धानिपित्यक्त्वादेहस्थितिमात्रेचरागद्वे
षौव्युदस्यपरित्यज्यचकारादन्यदपिविक्षेपकंपरित्यज्य विविक्तसे
वीत्यादिनाहुतेनब्रह्मभूयायकल्पतइत्यनेनान्वयः ५१ ॥

ऊसमवैजयंती टीका ९

कोऽसौप्रकारोयेनज्ञानेनब्रह्मप्राप्नोतीत्यपेक्षायांतंप्रकारमाहत्रि
भिः बुद्ध्येति विशुद्धयासात्विक्याबुद्ध्याआत्मयाथात्म्यविषयया
कयायुक्तः सम्पन्नः धृत्यासात्विक्याधारणयाआत्मकं मैविध
ययानसमापनसंयम्य ... आत्मानंमनःशब्दादीन्विषया

नियम्य योग्ययोग्यप्रकाशशब्दादीन् विषयांस्त्यक्त्वा तान् सन्निहिता
न् विधाय च पुनः रागद्वेषौ विषयहेतू रूपकौ व्युदस्य हस्तनः प
रित्यज्य च तयोर्ब्रह्मभूयाय कल्पत इति तृतीयेनान्वयः ५१ ॥

मधुसूदनी टीका १०

सेयं ज्ञाननिष्ठा सप्रकारोच्यते ॥ विशुद्धया सर्वसंशयविपर्ययशून्यया अहं ब्रह्मास्मीति वेदान्तवा
क्यजन्यया बुद्ध्या युक्तः सदानन्दान्वितः धृत्या धैर्येणात्मानं शरी
रेन्द्रियसंघातं नियम्य उन्मार्गप्रवृत्तेर्निवार्यात्मप्रवणं कृत्वा च शब्देन
योगशास्त्रोक्तसाधनान्तरं समुच्चीयते शब्दादीन् शब्दस्पर्शरूपर
सगन्धान् विषयान् भोगेनैव पदहेतून् सामर्थ्यान् ज्ञाननिष्ठाप्रतिबन्धकशरीरस्थि
स्थितिमात्रप्रयोजनानपेक्षान् निषिद्धानपि त्यक्त्वा शरीरस्थि
तिमात्रार्थेषु च तेषु रागद्वेषौ व्युदस्य परित्यज्य चकारात् अत्यन्तं
नवविक्षेपकं परित्यज्य विविक्तसेवी नाचरत्यादिसम्याहृतेन ब्रह्म
भूयाय कल्पत इत्यनेनैवान्वयः ५१ ॥

सदानन्दी टीका ११

सप्रकारोच्यते सेयं ज्ञाननिष्ठा महाफला ब्रह्मैवास्मीति वेदान्तवा
क्यनिष्ठया बुद्ध्या विशुद्धया सर्वसंदेहविपर्ययानिष्पन्नया इति विशुद्धया
शब्दादीन् विषयान्त्यक्त्वा संघातं निवार्य उन्मार्गतो ब्र
शक्यो धैर्येण धृत्या तासंघातं निवि नियम्य च २ निवार्य उन्मार्गतो ब्र
लवस्तु निमस्य चित्तेन ज्ञाननिष्ठाविरुद्धोऽप्रमकाशशब्दादीनिवारा
नेऽ शरीरस्थितिमात्रार्थे रागद्वेषौ विहाय च ज्ञानविक्षेपके सर्वे
संत्यज्येति चकारतः ४॥ ५१ ॥

नीलकंठी टीका १२

ब्रह्मभूयाय तस्मै प्रकारमाह त्रिभिः बुद्ध्येति बुद्ध्या वेदान्तश्रवणा
नन्तरमेव ब्रह्मप्राप्तिप्रकारमाह त्रिभिः ब्रह्मास्मीति परोक्षनिश्चयरूपया वि
मननपरिपाकोत्थया ब्रह्मवास्मीति परोक्षनिश्चयरूपया वि
शुद्धया सर्वभूतेषु मैत्र्यादिभावनया सम्यग्विशोधितया धृत्या
धैर्येण योगाभ्यासादिनिमित्तवैयग्र्यराहित्येन आत्मानं देहेन्द्रियसंघा
तं नियम्य इत्यासनो भूत्वा इत्यर्थः चकारात् प्राणांश्च नियम्य शब्दा
दीन् विषयांस्त्यक्त्वा नतरेन्द्रियाणि प्रत्याहृत्येत्यर्थः प्रत्याहृतकरणो

श्री॰
गी॰टी॰
प्र॰

223

पिंडं तमेनं सैव विषयान्स्मरति तमभिप्रायमाह रागद्वेषौ बुद्धस्य
चेति संकल्पात्मकेमथ्यैः सहि विषयेषु विकल्पतत्र रागं जनयती
ति शसिद्धे यथाचान्यपादाचापि सूत्रे दोषनिमित्त रूपादयो विषयाः
संकल्पकृतात् इति दोषोरागादिः चकारात् यमहमस्मीमेतमूपिभ्य
वेबुद्धस्येति चेय ततो ब्रह्मभूयाय ब्रह्मभावाय तत्प्रसंकल्पते यो
ग्यो भवतीति तृतीयेन संबंधः ५१ ॥

आनंदी टीका ६

योगसिद्धिप्रक्रियामेवाह विशुद्धया योगांगानुष्ठानादशुद्धि
क्षये ज्ञानदीप्तिराविवेकख्यातेरिति पातंजलि द्वितीयपादसू
त्रार्थानुगमेन योगांगानां बाह्यानां यमादीनां पंचानां आभ्यं
तराणां ध्यानादीनां त्रयाणां तेषामनुष्ठानादशुद्धिरूपस्याविद्या
दिपंचपर्वणो विपर्ययज्ञानस्य क्षयात् क्रमेण सम्यग्ज्ञाना
धिगमादावरणविगमप्रकाशमानया बुद्ध्या युक्तो योगी
र्पितत्र तत्र भूमौ चित्तबंधसंज्ञया धारणया आत्मानं चित्तं नि
यम्य निरुध्य च शब्दादीन्विषयांस्त्यक्त्वा स्थूलस्वरूपसूक्ष्मान्व
यार्थवत्त्वसंयमाद्भूतजय इति द्वितीयपादसूत्रार्थानुसारम्
पूर्वांपूर्वांजितां भूमिं संयमदार्ढ्येन त्यक्त्वा उत्तरामुत्तरां भूमि
मारूढः रागद्वेषौ रजःकार्यौ हरीकृत्य ५२ सत्त्वैकनिष्ठां प्राप्य

रामकंठटीका ७ ॥

सर्वं तावत्प्रकारमाह एवंविधभावो योगी ब्रह्मभूयाय ब्रह्मभावाय परमात्मसमाप
येकल्पते समर्थो भवतीति कीदृशः प्रथमं तावद्दैवसर्गयोगि
त्वात्सहजया विशुद्धया प्रलीनरजस्तमस्कत्वाद्विशुद्धसत्त्वैकम
य्या निर्मलया बुद्ध्या प्रज्ञया युक्तः सहि परमसिद्धिसाधन
तथमेधामात्रणीः सहजो गुणो योगिनस्तत एवतस्मिन्स्वा
भाव्याः शब्दीजलक्षणया सात्विकाहृष्टावष्टम्भलक्षणया धृ
त्या आत्मानमन्तःकरणं नियम्य वेगाद्यवस्थाप्य तत्र प्रा
ब्दादीन्विषयांश्शास्त्रनिषिद्धांस्त्यक्त्वा सर्वात्मना परि

शास्त्रविहितेषु च विषयेषु सात्त्विकेषु संगमूलौ रागद्वेषौ तदुपादानात्त्या
गेहेतु महाहंकारौ शोकदुःखफलाभिसंधाभावाद्दिव्यतिरस्कृत्ये
वंशर्वंसुखंपरिकरवंधंकृत्वा ५१ ॥ नी०

लासिकी ......टीका

+ अथ प्रतिज्ञातं ज्ञानकाष्ठाप्राप्तिक्रममाह त्रिभिः ॥
+ विशुद्धयादेहाद्यभिमानेनाकलंकितया बुद्ध्या आत्मबोधेन युक्त
संवद्धो योगी शब्दादीन्विषयांस्त्यक्त्वा विहाय तत्त्यागप्रकारमा
ह रागद्वेषौ व्युदस्येति रागद्वेषनिरसनेनेत्यर्थः नत्विंद्रिय
वृत्त्यपरमेण धृत्या धारणया दार्ढ्येनात्मानं स्वस्वभावे निय
म्य सत्यवमर्शेन वशीकृत्य युक्तानेवं विधः सन्ब्रह्मभूयाय
कल्पत इति तृतीयेनान्वयः ५१

पंचोलीटीका

५१

......बुद्धेति बुद्ध्या निश्चयात्मिकया मायायुक्तः संयतः ५१
तोस्वदर्शयति ......शब्दादीन्विषयांस्त्यक्त्वा
सात्त्विकेनात्मानं देहेंद्रियसंघातं वशीकृत्य सामर्थ्यात्
शरीरस्थितिमात्रात् रागद्वेषौ परिसमाप्य ब्रह्मभूयाय कल्पते समर्थो
भवति ५१

रमावीरसमिद्धोधिनी ॥

बुद्ध्येति विशुद्धया सात्त्विक्या बुद्ध्या युक्तः ए
तामेव ज्ञाननिष्ठामाह बुद्ध्येति विशुद्धया सात्त्विकया बुद्ध्या युक्तः प्रारभ्यमाणा
त्याधृत्या सात्त्विकेनैवात्मानमंतःकरणं नियम्य एव नित्य अप्रति
कार्यैकनिष्ठं विधाय शब्दादीन्विषयांस्त्यक्त्वा उपपन्नान्ग्रहणो रागद्वे
षादितल्लक्षणांस्त्यक्त्वा तद्धर्मोऽभूवेति यावत् प्रोक्तलक्षणौ रागद्वे
षौ च व्युदस्य ब्रह्मभूयाय कल्पत इति तृतीयेनान्वयः ५१ ॥

मधुभाष्य

५१ ॥

224

भाषा अनुवाद टीका

स्वरूप सा ॥ सोई कहतेहैं कि उक्त प्रकार क्रम से सर्वीक विशुद्धस्वरूप सा ॥ त्विक बुद्धियुक्त पुरुष सात्विकी धृतिसे आत्माकहे इस बुद्धिको नियम करके निश्चल करके शब्द आदि सर्व विषयत्यागकरनेके अनन्तर और विषयप्रयुक्त रागद्वेष को भी दूर करके ब्रह्मभावको प्राप्त होनेहै इससे ले तीन श्लोकका अर्थ एकसाथ होताहै ५१

दोहा

शुद्ध बुद्धिसें युक्त है जितमन को धृति सोंहि शब्दादि विष यत्यागकै रागद्वेष तज औदि ५१॥

225

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ५२

शांकरभाष्य टीका १

ततः विविक्तसेवी अरण्यनदीपुलिनगिरिगुहादीन् देशान् सेवि
तुं शीलमस्येति विविक्तसेवी लघ्वाशी लघ्वशनशीलो विविक्त
सेवालघ्वशनयोर्निद्रादिदोषनिवर्तकत्वेन चित्तप्रसादहेतुत्वात्
ग्रहणं यतवाक्कायमानसो वाक् च कायश्च मानसं च यतानि
नियतानि संयतानि यस्य ज्ञाननिष्ठस्य सज्ञाननिष्ठो यतिर्यतवाक्
कायमानसः स्यादेवमुपरतकरणः सन् ध्यानयोगपरो ध्यानमा
त्मस्वरूपचिन्तनं योग आत्मस्वरूपविषयएकाग्रीकरणं तौ ध्या
नयोगौ परत्वेन कर्तव्यौ यस्य स ध्यानयोगपरो नित्यं नित्यग्रहणं
मन्त्रजपाद्यन्यकर्तव्याभावदर्शनार्थं वैराग्यं विरागस्य भावो दृष्टादृष्टेषु वि
षयेषु वैतृष्ण्यं समुपाश्रितो नित्यमेवेत्यर्थः ५२॥

आनन्दगिरिकृत टीका २

तुहैवैशारद्ये यत्नेन कार्ये करणनियमनं देहस्थितिहेतवे रिक्तवि
षयत्यागः देहस्थित्यर्थेष्वपि तेषु रागद्वेषवर्जनमित्युपायभेदसि
द्धे सम्यग्ज्ञानान्तरङ्गाणि यत्नसाध्यानीत्याह तत इति चित्तैकाग्र्य
सारार्थं विविक्तसेवित्वं व्याकरोति अरण्येति निद्रादिदोषनिरासार्थं
लघ्वाशित्वं विवृणोति लघ्विति लघु परिमितं हितं मेध्यं वा
शित्वं शीलमस्येति तथोच्यते विशेषणयोस्तात्पर्यं विवृणोति
विविक्तेत्यादि निद्रालस्यप्रमादादयो हि विक्षेपका
विवर्जिताः वक्ष्यमाणध्यानयोगयोरुपायत्वेन विशेषणान्तरं
विभजते वाक्चेति वागादिसंयमस्यावश्यकत्वद्योतनार्थं स्यादित्य
क्तं संयतवागादिकरणग्रामस्यानायासेन कर्तव्यमुपदिशति एव
मिति मन्त्रजपादीत्यादिपदेन प्रदक्षिणप्रणामादयो ध्यानयोगपरत्वोक्तं विराग
वैधुकाररहिताः उभयोरेव ध्यानयोगयोरुपायत्वेनोक्तं नित्यमिति ५२॥
भावं विभजते दृष्टेति सम्यक्त्वमेव वनं कृतं

स्वामिकृत टीका ३

श्री-
गी० टी०
ग्र०
२२६

किंच विविक्तेति विविक्तसेवी शुद्धदेशावस्थायी लघ्वाशी मि
तभोजी एतैरुपायैर्यतवाक्कायमानसः संयतवाग्देहचित्तो
भूत्वा नित्यसर्वदा ध्यानेन योगो ब्रह्मस्पर्शस्तत्परः सध्यानाद्यविक्षे
दार्थं शनैः शनैः दृढं वैराग्यं सम्यगुपाश्रितो भूत्वा [illegible] ५२ ॥

पिशाचभाष्यटीका ४

विविक्तयोगविरोधिवस्तुवर्जिते स्थाने तत्सेवितुं शीलं यस्य
सः विविक्तसेवी लघु हितं मितं पथ्यमश्नातुं शीलं यस्य सः लघ्वा
शी ध्यानयोगपरो नित्यं ध्यानं चित्तस्यैकाग्रता योगस्तस्यात्मनिष्ठा
पनं ध्यानं च योगश्च ध्यानयोगौ परं निष्ठा यस्य स ध्यानयोगपरः नित्य
सर्वकाले वैराग्यं विगतो रागो यस्मात् सो विरागः तस्य भावो वैरा
ग्यं समुपाश्रितः रागद्वेषविमुक्त इत्यर्थः ५२ ॥

रामानुजभाष्यटीका ५

विविक्तसेवी सर्वैर्ध्यानविरोधिभिर्विविक्ते देशे वर्तमानो लघ्वामा
नो लघ्वाशी अत्यशनानशनरहितः यतवाक्कायमानसः ध्याना
भिमुखीकृतकायवाङ्मनोवृत्तिर्ध्यानयोगपरो नित्यमेवंभूतः सन्
आप्रयाणादहरहर्ध्यानयोगपरः वैराग्यमुपाश्रितः ५२ ॥

मुनिवरशर्मकृत टीका ६

स्पष्टार्थम् ५२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

किंच विविक्तेति विविक्तं विवेकहेतुभूतं एकान्तं [illegible] च तत्सेवने सत
या लघ्वाशीः सात्त्विकप्रतीनाच्चभोजी एतैरुपायैर्यतवाक्काय
मानसः संयतवाग्देहचित्तो भूत्वा ध्यानेन चित्तैकाग्र्येणात्मनि तस्मि
न योजीवब्रह्मयोगस्तत्परो भूत्वा वैराग्यं प्राप्तविषयविक्षेपराहित्यं
सम्यक् नैरन्तर्येणोपाश्रितः ५२ ॥

वनमाली टीका ८

विविक्तं जनसंमर्दरहितं पवित्रं च तत्सेवितुं शीलमस्य सः लघ्वा
शी लघु हितं परिमितं मेध्यं वा अशितुं शीलमस्य सः यतानि संयतानि
वाक्कायमानसानि येन सः ध्यानपरो नित्यं ध्यानं भगवदाकारसं
वित्तिप्रवाहस्तदभ्यासपरः वैराग्यं दृष्टादृष्टविषयेषु

क

हाविरोधिवित्तहत्तिंसम्यगाश्रितः ब्रह्मभूयायकल्पतइत्युत्तरेणान्वयः ५२

ज्ञानेश्वरी टीका ९

किंचपुनः सकीदृशो विविक्तसेवी विविक्ते निरिवले ध्यानविरोधि मिलित्वैर्वर्जितस्थाने सेवितं शीलंयस्य सतथा लघ्वाशीलघुमितमाहारंसेवितुंशीलंयस्य सतथा अशनादिनात्पानरहितः यतवाक्कायमानसः वाक्कायमानसानियेनस यतानियेनाभिमतविषयेषु स्वीकृतानिवाक्कायमानसानिचोदितव्यानि वैराग्य तथानित्यंसर्वकाले ध्यानयोगपरः सर्वेषामुक्तेदवितंनारतःवैराग्य सम्यगाश्रितः सन्प्रत्यस्वरूपेणतविषयभागरूपं... क्तः ... ५२ ॥

मधुसूदनी टीका १०

विविक्तेजनसंमर्दरहितेपवित्रेचयदरण्यगिरिगुहादिनत्सेवितं विविक्तेजनसंमर्दरहिते पवित्रेचयदरण्यगिरिगुहादिदेशे तत्सेवितुंशीलंयस्यसः चित्तैकाग्र्यसंपादनार्थं तद्विपकारिरहितस्सर्थः लघ्वाशीलंयस्य सः निद्रालस्यादिविनलयाशीलघुपरिमितंमेध्यं वाशितुंशीलंयस्य सः यतानिसंयतानि वाक्कायमानसानियेन सः विकाररहितस्सर्थः ध्यानयोगपरो नित्यंविशेषयमनियमासनादिसाधनसंपन्नस्सर्थः ध्यानंनिदिध्यासनं आत्माकारप्रत्ययेन निर्विकल्पकतया नस्यात्माकारप्रत्ययाहतिर्ध्यानेब्रह्मात्माकारस्मर्यतेन तत्त्वमस्यादिवाक्यजन्यप्रतीत्यर्थयाथार्थ्येन योगः नित्यमदेवत्वमहत्तयोरनुष्ठानपरोनतुमंत्रजपतीर्थयात्रादिपरः कदाचिदित्यर्थः वैराग्यंदृष्टादृष्टविषयेषु स्पृहाविरोधिचित्तवृत्तिविशेषं सम्यक्त्वेन नित्यंसमाश्रितः ५२ ॥

सदानंदी टीका ११

विविक्तेजनसंदोहशून्ये गिरिगुहादिके पवित्रेसेवितुंशीलंयस्य विविक्तसेवी लघ्वाशितुंतथा १ यतानियसवाक्कायमानसानियेन सः विलघ्वाशीति तथा १ यतानियसवाक्कायमानसानिस्वसेन आत्मप्रत्ययाहृतिः ... देपतयस्यासमर्थीभूतोयुक्तोयमादिभिः २ ब्रह्मात्मप्रत्ययाहृति ध्यानंयोगस्तथात्मेति एकाग्रीकरणंतहेतत्तयोरेवपरः सदा ३ न ... ज्ञानंमंत्रजपादेपरस्तथा सत्करावन दृष्टादृष्टेषुभोगेषुवैराग्यंनित्यं समाश्रितः ४ ॥ ५२ ॥

नीलकंठी टीका १२

...केनसाधनजातेनैवंभूतोभवतीत्यतआह विविक्तेति पत्रद्वयं ... यो नित्यंविविक्तसेवी ... मिताहारोयोऽज्य नित्यमिति सर्वत्रसंबध्यनीय

एकांतशीलो लघ्वाशी मितमाशनशीलश्च तथा नित्यं वैराग्यं रागाभा
वं समुपाश्रितश्च तथा नित्यं ध्यानयोगः षष्ठाध्यायोक्तस्तत्परश्च यो
नित्यं भवति स यतवाक्कायमानसो भवति यतकायः आसनदा
र्ढ्येन यतवाक् विषयेभ्य इंद्रियाणां प्रत्याहारेण यतमानसः सर्व
संकल्पत्यागेन एवं चतुर्भिः साधनैर्यतवाक्कायमानसस्तेनैव साधं
नित्यं विविक्तसेवादिशीलः सन् यतवाक्कायमानसो भूत्वा ब्रह्म
भूयाय कल्पत इत्युत्तरेणान्वयः ५२ ॥

आनंदीटीका ॥

विविक्तसेवी लघ्वाशी युक्ताहारविहारः य
मनियमानुष्ठायी यतवाक्कायमानसः दृढासनः प्राणाया
माभ्यासी प्रत्याहारी इंद्रियेभ्यस्तथा स्वयोगवान्योगपंचकः ध्यान
योगपरः योगांगत्रयेणाभ्यंतरेण ध्यानधारणासमाधिना नित्यं सं
मेतत्परः अतएव नित्यं वैराग्यं समुपाश्रितः नित्यमविनश्वरं
वैराग्यं दृष्टानुश्राविकविषयवैतृष्ण्यम् स्थान्युपनिमंत्रणे संगस्म
याकरणं पुनरनिष्टप्रसंगादिति योगशास्त्रे तृतीयपादे सूत्रा
र्थानुगमेन समुपाश्रितः अस्यार्थः चत्वारः खल्वमी योगिनः
प्रथमकल्पिकः मधुभूमिकः प्रज्ञाज्योतिः अतिक्रांतभाव
नीयश्च एतेषां लक्षणानि योगशास्त्रादधिगंतव्यानि विस्तरभ
यान्न लिखितानि तत्र मधुमतीं भूमिं साक्षात्कुर्वतो योगिनः
स्थानिनो देवास्तत्स्थानाधिकारिणः सत्त्वशुद्धिमनुपश्यंतः
स्थानैरुपनिमंत्रयंते रस्या रमा अप्सरसः रसायनमिदं जरा
मृत्युहरं रमणीयं यथाभिलाषदायिनो देवद्रुमाः धर्मद्रवा इयं गं
गा सिद्धा इमे महर्षयः दिव्यं श्रोत्रं चक्षुषी वज्रोपमः कायः त्वये ८
दं सर्वं स्वगुणैरुपार्जितं प्रतिपद्यतामिदमक्षयमजरामरं
स्थानमिति प्रार्थ्यंते तत्र योगी संगं न कुर्यात् जननमरणान्ध
कारेपि विपरिवर्तमानेन मया कथंचिदासादितः क्लेशतिमिरवि
नाशी योगप्रदीपः तस्य चैते तृष्णायोनयो विषयवायवः प्रतिपक्षाः

कथमनयैव विषयसंगत्या यावं चिंतोहम् पुनस्तस्यैवप्रदी
मस्य संसाराग्नेरात्मानमिंधनीकुर्यां स्वस्ति स्वभाग्यमेभ्यो विषये
भ्यः इति समाधिं भावयेत् संगमकृत्वा स्वयमपि न कुर्यात् एवम
हं देवानामपि प्रार्थनीयः इति स्यादयं स्वस्थितेन मम नयास्मत्पुना
शकेशाग्रहीनमात्मानं न भावयिष्यति तथा चास्य छिद्रान्वेषी
मत्तादोलब्धविवरः क्लेशपंचकमुन्मथयिष्यति ततस्तु पुनरति
ष्टप्रसंगः एवमसत्संगस्यापि कुर्वतः भावितोर्थो हृदयीभवति
भावनीयस्त्राभिमुखीभविष्यतीति सिद्धम् ५२

रामकंठीटीका ५४

विविक्तसेवी समाधिव्युत्थानहेतुचेतनाचेतनभावगतो देशो
विविक्तः तं सेवितुं शीलं यस्य स तथाविधः तथा लघ्वाशी
लघुमाणमनोहृत्तिसमावस्थाकारणभूतमात्रकालरहित
त्वादिगुणपरिमुष्टमल्पमशितुं शीलं यस्य स तथा यतानि ति
गृहीतामन्मायविषयात्मसाहृतानि वाक्कायमानसानि व
चनशरीरान्तःकरणानि येन स तथाविध इत्थंभूतश्च सततं
नित्यं ध्यानयोगपरः ध्यानेन परतत्वात्मकोपेयवस्तुचिंतनेन
यो योगः संबंधस्तन्निष्ठः एवंविधगुणसामग्र्या वैराग्यं दृष्टानु
श्रविकविषयवितृष्णत्वं समत्वगुणविषयं वितृष्णत्वं च समुपा
श्रितः सम्यगास्थितः ५२ ॥

लासिकीटीका

किंच नित्यं प्रतिदिनं ध्यानयोगपरो ध्यानयोगे षष्ठाध्याये प्रपंचिते
तत्परः ध्यानयोगस्योपलक्षणं शमाह विविक्तसेवीत्यादि विवि
क्तं स्वभावतः संस्कारतो वा शुद्धं विजनं वा देशं सेवितुं शीलम
स्य तथा लघ्वाशी मितभोजी तथा यतानि स्ववशीकृतानि परिमिता
नि वाक्कायमानसानि येन सः तथा ध्यानाविक्षेपार्थं वैराग्यं स

गी॰ टी॰ ग्रं॰

228

म्यगुपाश्रितः ॥ ५२

पंचोलीटीका

किंच विविक्तेति विविक्तसेवी लघ्वाशी मितभोजनः यतवाक्कायमानसः ध्यानयोगपरः ध्यानमात्मनः स्वरूपचिंतनं योगश्चात्मस्वरूपविषयैकाग्रीकरणं तयोः कर्तव्यतापरः नित्यमत्यन्तमंत्रजापरिग्रहं कुर्वन् परं वैराग्यमुपाश्रितो मुनिः ब्रह्मभूयाय कल्पते ५२

रणवीरसमिद्धोधिनी

विविक्तं निर्ज्जनत्वादिरहितं देशं सेवते इति विविक्तसेवी शुद्धोविजनविशुद्धदेशावस्थायी तथा लघ्वाशी यथोचितभोजी तथा यतानि कायवाङ्मनांसि येन तादृशो भूत्वा नित्यं ध्याने कथं मे स्वधर्मः स्वनुष्ठितो भवतीति तदुपायान्वेषणे मत्स्वरूपचिंतनलक्षणे वा योगे कर्मकौशलसमत्वभयलक्षणे च तत्परः तथा कदा मे भगवद्धामप्राप्तिनिमित्तं स्वधर्ममनुष्ठानमपि यादयः प्रतिबंधकाः तीव्रं दृढं वैराग्यं समुपाश्रितो भूत्वा ५२॥

मधुभाष्य

५२

भाषा अनुवाद टीका

विविक्त सेवी कहे पवित्रदेशवासी औरलघ्वाशीकहे परिमित
अहारकारी हो और इन उपायोंसे यत वाक काय मानस अर्थी
त् वचन देह और मनको वश करके सदा ध्यान उसकेजोयो
ग कहे अविद्या अज्ञान निवृत्तिरूप ब्रह्म साक्षात्कार तिसमे
तत्पर होय अपने ध्यानके अविच्छेदके लिये समाधिरूप सेवा
रवारदृढ़ वैराग्यका आश्रय लेकर ५२ ॥

दोहा

रहैं एकांत लघुभोजन वशकरमानस देह ध्यानयोग
तत्पर सदावैरागहि आश्रितपद ५२ ॥

229

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहं विमुच्य
निर्ममः शान्तो ब्रह्मभूयाय कल्पते ५३ ॥

शांकरभाष्य टीका १

किंच अहंकरणमहंकारो देहेंद्रियादिषु तं बलं सामर्थ्यं कामरा
गादियुक्तं नेतरच्छरीरादिसामर्थ्यं स्वाभाविकत्वेन त्यागस्याशक्य
त्वात् दर्पो नाम हर्षानंतरभावी धर्मातिक्रमहेतुः हृष्टः दृप्यति
दृप्तो धर्ममतिक्रामतीति स्मरणात् तं च काममिच्छां क्रोधं द्वेषं च
परिग्रहमिंद्रियमनोगतदोषपरित्यागे शरीरधारणप्रसंगेन धर्मा
नुष्ठाननिमित्तेन वा बाह्यः परिग्रहः प्राप्तस्तं च विमुच्य परित्यज्य
परमहंसपरिव्राजको भूत्वा देहजीवनमात्रेऽपि निर्गतममभावो
निर्ममोऽत एव शान्त उपरतः यः संहृतायासो यतिर्ज्ञाननिष्ठो ब्र
ह्मभूयाय ब्रह्मभवनाय कल्पते समर्थो भवति ५३ ॥

आनंदगिरि टीका २

ज्ञाननिष्ठस्य यतेर्विशेषणान्तरं समुच्चिनोति किंचेति अहंकरणमिति साम
र्थ्यमात्रे बलशब्दादुपलभ्यमाने किमिति विशेषवचनमित्याशंक्या
योगपरत्वे समुच्चितं कारणान्तरे विहीनमिति वैराग्यशब्देन ल
ह स्वाभाविकत्वेनेति उक्ते दर्पं मानमाह हृष्ट इति अहंकारा
द्यस्यापि कामत्यागस्य पुनर्वचने प्रकृष्टवैराग्यज्ञापनार्थं इंद्रियेति प
रिग्रहप्राप्त्यभावात्तत्त्यागोक्तिरयुक्तेत्याशंक्याह देहे
हित्यागे परिग्रहप्राप्त्यभावात्त्यागोक्तिरयुक्तेत्याशंक्याह कथमित्याशंक्याह
रिग्रहाभावे ममत्वविषयाभावान्निर्ममत्वं कथमित्याशंक्याह परिग्रहाभावेन प्राप्ता मनः करणोपरतिमव
ति अहंकारममकारयोरभावेन प्राप्तामनः ब्रह्म भवतीति फलित
वति ज्ञानपूर्वेति उक्तमनूद्य जीवन्नेवासौ ब्रह्म ब्रह्मणो भव
माह यः संहृतेति ज्ञाननिष्ठपदार्थं सर्वाहीऽदृष्ट्वः ५२
नमत्वं संध्यानपरिपाकपर्यंतं तातत्कारणं तदर्थमिति यावत्

स्वामिकृत टीका ३

अहंकारमिति विरक्तोऽहमित्याद्यहंकारं बलं दुराग्रहं दर्पं योगबलादु
त्पन्नं विषयेषु काममिति क्रोधं
त्यागित्वात् लवाभावाद्धर्मार्थं परिग्रहं च विमुच्य निर्ममः सन् शान्तः
परिग्रहं च विमुच्याविशेषेण मत्कावलाद्यपत्रेण निर्ममः

श्री
गी टी
म.

230

परमामुपशांतिं प्राप्तो ब्रह्मभूयाय ब्रह्माहमिति निश्चलेनावस्था
नाय कल्पते योग्यो भवति ५३ ॥

पिशाचभाष्यटीका ४

देहादिष्वात्मबुद्धिरहंकारः बलं कामरागसंयुक्तं नेतरदेहादिसाम
र्थ्यं तस्य स्वाभाविकत्वेन त्यक्तुमशक्यत्वात् ततः केवलशास्त्रोक्तता
पनादिबलशाद्धेनोच्यते दर्पो हर्षः कामो रागः क्रोधः द्वेषः परिग्र
हो ममेदमित्यर्थिनो वशीकरणं एतदहंकारादि विमुच्य निर्ममः
न शरीरस्थितिसाधनेष्वपि वस्तुषु ममत्वबुद्धिरहितः अतएव शांतः उ
परतांतःकरणः ब्रह्मभूयाय कल्पते इत्यन्वयः ५३ ॥

रामानुजभाष्यटीका

येयं तत्वध्यानविक्तविषयदोषावमर्शेण तत्र विरागं तां वर्द्धयन्नहं
कारं अनात्मन्यात्माभिमानं बलं तद्विवृद्धिहेतुभूतवासनाबलं तन्निमि
त्तं दर्पं कामं क्रोधं परिग्रहं विमुच्य निर्ममः सर्वेष्वनात्मीयेष्वात्मीय
बुद्धिरहितः शांतः आत्मानुभवैकसुखः एवंभूतो ध्यानयोगं कु
र्वन् ब्रह्मभूयाय कल्पते ब्रह्मभावाय कल्पते सर्वबंधविनिर्मुक्तो य
थावस्थितमात्मानमनुभवतीत्यर्थः ५३ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ५३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

अथ विविक्तेपकारणोन्मूलनप्रकारमाह अहंकारमिति अहमेतादृ
शो विरक्तोस्मीत्यहंकारं बलं दुराग्रहं दर्पं योगबलादुन्मार्गप्रवृत्तिल
क्षणं आरंभे कामं क्रोधं परिग्रहं च विमुच्य विशेषेण मुक्ता प्राप्ते
ष्वपि निर्ममो ममतारहितः शांतः परामुपशांतिं प्राप्तः एवंभूतो योगी ब्र
ह्मभूयाय ब्रह्माहमस्मीति निश्चलेनावस्थानाय कल्पते योग्यो भवति ५३

वनमाली टीका ८

अहंकारं महाकुलीनोहं विद्यादिना महत्वोस्मीत्यभिमानं ब
लं सदाग्रहेण शरीरं तस्य स्वाभाविकत्वेन त्यक्तुमशक्यत्वात् दर्पं हर्ष
जन्यं मदं धर्मातिक्रमहेतुं कामं विषयाभिलाषं वैराग्यमित्यतोऽपि
कामः मागमाशव नेकामिकपेतायिकार्यक्रोधं द्वेषं परिग्रहं

देहधारणार्थमस्य हेतुविपरीतोपनीते वा लोपकरणे विमुच्य त्यक्त्वा।
ममाशांतश्चित्तः विदेशपरहितः शुभानुक्रमेण ब्रह्मभूयाय ब्रह्म
साक्षात्काराय तत्त्वाय समर्थो वा कल्पते योग्यो भवति ५३ ॥

वैजयंती टीका ९

अहंकारमिति अहंकारं देहेंद्रियाद्यभिमानं तद्रूपं बलं तन्मात्रपो
षणावृद्धेनाशिवासनारूपं दर्पं बलस्य हेतुरूपं कामं विषयाभिला
षरूपं क्रोधमभिलषितविषयव्याघाते कामपरिणामरूपं परिग्र
हमहंकारादीनां कर्मरूपं धनधान्यादिसंग्रहं चैतद्वारा
दिपरिग्रहं संग्रहं वा एतानहंकारादीन् विमुच्य विशेषेण त्य
क्त्वा निर्ममः सर्वेष्वनात्मीयभावरहितो नतत्पव शांतः निरंतरसह
जस्वरूपभवैकरसत्वेन निरंगसिंधुरिव निश्चलः ईदृशो ध्यानयो
गानिष्ठो जनो ब्रह्मभूयाय ब्रह्मभावाय कल्पते सद्य इंसात्मस्वरूप
मन्नभवति ५३ ॥

मधुसूदनी टीका ९

अहंकारं महाकुलप्रसूतोऽहं महतां शिष्योऽस्मि विरक्तोऽस्मि नास्ति
द्वितीयो मत्सम इत्यभिमानं तद्बलमसदाग्रहं न तु शारीरं तस्य स्वा
भाविकत्वेन त्यक्तुमशक्यत्वात् दर्पं हर्षजं धर्ममतिक्रमका
रणं हृष्टो दृप्तो धर्ममतिक्रामतीति स्मृतेः कामं विषयाभि
लाषं वैराग्यं समुपाश्रितत्वमनेनोक्तं सापि कामत्यागस्तु नवै
शरीरधारणार्थमस्य हेतोरपि परिग्रहं शरीरधारणार्थमस्य हेतोर्वे
चनेयत्नापि क्वार्थकोऽयं हेतुः परिग्रहः शरीरोपनीतो पवीनादि
विपरीतोपनीते वा लोपकरणं विमुच्य स्वलाभिना भवन्तानतेस्व
कमपि दंडमेकं कमंडलुं कौपीनाच्छादनं वशात्साभ्यनुज्ञातोदेहजी
शरीरयात्रार्थमादाय परमहंसपरिव्राजको भूत्वा निर्ममो देहजी
वनमात्रेऽपि ममकाररहितः अतएवाहंकारममकाराभावादुप
गमहर्षविषादत्वात् शांतश्चित्तविक्षेपरहितो यतिः श्रोत्रसाधन
परिपाककमेणा ब्रह्मभूयाय ब्रह्मसाक्षात्काराय कल्पते समर्थो भ
वति ५३ ॥

तत्त्वानंदी टीका ११

एवमभिमानं च बल
महाकुलप्रसूतोऽहं विरक्तोऽस्मीति न मत्समः

श्री
गीटी
मू

231

मन्नास्तदाग्रहे १ न शारीरं यतस्तस्य स्वाभाविकतया जनैः त्यागः
कर्तुमशक्योस्ति दर्पोहंषेजतु मदिरं २ यस्मात्तिक्रमणोद्देवितंतु ऋंच
स्तैर्नोस्कृटे हृश्योदयातिदमः सत्रानिष्कामनियमेतः ३ कामं
भोगाभिलाषंवक्रोधंदेहंषपरिग्रहं वाह्योपकरणं सर्वं योहित्यज
कारणं ४ परित्यज्याखिलानेतान्देहधारणमात्रके ममत्वरहितः
शान्तश्चित्तविक्षेपवर्जितः ५ ज्ञानसाधनसामग्रीपरिपाकक्रमे
णैव ब्रह्मभावायपततिरहस्तमर्थोभवतिस्वयं ६ ग्रहंकारादि
द्वंद्वंच समग्रंवैराग्यवैभवात् तथा विवेकसामर्थ्यादेतान्नोविचा
रणात् ७ नैरंतर्येणसत्संगदाराभ्यासादिवैभवात् त्यक्त्वाशुकंभ
वेयस्मात्तस्माद्योविवेकवान् ८ भगवन्मद्भावमापन्नः सर्वसंगेव
सर्वदा श्रमसेइत्यलवलेसंवकुश्रीहरेद्यमामाचयः ९ ५३ ॥

नीलकंठी टीका १२

एवंयतवाक्कायमानसस्ययोगिनोयोगजाः सिद्धयउपतिष्ठंति
तास्तुकृतादर्शिनाः इत्यिदमेजोनिलखेसमस्थितेपंचात्मके
योगगुणेप्रवृत्ते नतस्यरोगोनजरानमृत्युः प्राप्तस्ययोगाग्निम
यंशरीरमिति तथा यंयंलोकंमनसासंविभातिविशुद्धसत्वः का
मयतेयांश्चकामान् तंतंलोकंजयतेतांश्चकामान्तस्मादात्मज्ञं
ह्यर्चयेद्भूतिकामइतिकामइतिच संविभातिसंकल्पयतिलोकं
लोचनीयमतीतानागतमर्थजातं कामान्काम्यमानान्विषयान्
जयतेउपलभतेइतिश्रुतिपदानामर्थः तथानाविरतोदुश्चरिता
न्नाशान्तोनासमाहितः नाशान्तमानसोवापिप्रज्ञानेनैनमाप्नुया
दिति प्रज्ञानेनशास्त्राचार्योपदेशजेनज्ञानेनदुश्चरितादिसेव
नाद्विरतः शान्तोजितचित्तः समाहितः निरुद्धचित्तहिरिपिमृथा
नमानसोयोगैश्वर्यासक्तचित्तः एनमात्मानंनप्राप्नुयादितिश्रु
त्यर्थः नदिदमाह गृहंकारमिति यदातुयोगीयतमानसोस्मि
नात्मात्रप्रतिबोभवतितदासैवासितावस्थितिविषयाभिलाषो
कारास्नच्यतेविषयविमुखान्स्थितेतितनतस्तमहंकारानिगद्ध
यान् नदर्शितहेयोगीवलेसनमसंकल्पावादिसामर्थ्यमात्मनः
नदर्पकोतिनमत्तल्लामोत्तीतिमत्यते नतस्यदम्भोयमतिका

मतीत्यापस्तंबवचनात् दिव्यान्कामानिच्छन्ति तच्चकेन वि
त्रिमितेन कामप्रवृत्तिवेधे सति क्रोधवान्भवति ततः परोक्तादना
यम्भ्यां से शिष्यादिपरिग्रहं संपादयति ततो न प्रप्नोति तस्मात्
वानर्थमूलभूतमहंकारमेव विमुच्य ततः इतरान्सर्वान्विमुंचति
अहंकारविमोकेपि निर्ममत्वेन तत्त्वदर्शितेषु विषयेषु ममताशून्य
वे सत्यहंकारः शैथिलीभूतो विषयवैमुख्यप्राप्यस्वकारणेऽ
स्मितायां विलीयते ततः शांतोऽस्मितायामपि प्रलयात्त्रिरीय
नातिवद्रुपरतो योगी ब्रह्मभूयाय कल्पते ५३ ॥

आनंदीटीका १३

स्पष्टार्थः ५३

रामकंठीटीका १४

तथा समेतान्दोषान्विमुच्य अहंकारं तावत् अनात्मनिश
रीरादावात्मप्रत्ययं सर्वदोषाधिराजं तथा बलं शाकाशाका
विवेकपरिहारेण कार्येषु बहूं तथा दर्पं स्वल्पस्यापि सिद्धि
लेशस्योपलब्धेस्मितोद्रेकं तथा कामं रागनिमित्तकमिष्ट
विषयेषु संकल्पम् तथा क्रोधं द्वेषनिमित्तकं चित्तेन्द्रियदो
मकं तथा परिग्रहं देहदारदारकद्रविणादिषु सर्वस्वबुध्या
स्वीकारं अतएव परिग्रहत्यागान्निर्ममः ममकारलक्षणं
णाहंधानिष्ठान्तः ततश्च निर्विकारपरमोपादेयस्वरूपमा
अपरायणत्वाच्छान्तः विगतसकलविकल्पक्षोभः इत्थं
भूतो ब्रह्मभूयाय कल्पते तदेवंविधः ५३ ॥

लासिकी ...टीका

तथा अहंकारमहं सर्वोत्कृष्ट इत्येवमभिमानं बलं दुराग्रहं दर्पं
मदं काममभिलाषं क्रोधं प्रसिद्धं परिग्रहं पुत्रदारादीनां स
मतया स्वीकारमित्येतत्सर्वमात्मविश्रान्तेः प्रतिबंधकं त्य
क्त्वा इत्येवं सर्वत्र ममताशून्यः तथा शान्तः एवं नित्यात्र

शीलनेन सर्वविकल्पोपशमरूपां शांतिं प्राप्तो ब्रह्मभूया
य देहपातानंतरं ब्रह्मभावाय कल्पते योग्यो भवति

पंचोलीटीका

किंच अहंकारमिति देहादिष्वहंकरणमहंकारस्तं कामसं
युक्तसामर्थ्यं बलं हर्षानंतरभावी धर्मातिक्रमहेतुः दर्पस्तं का
मं क्रोधं द्वेषं वा सवस्त्रपरिग्रहं विमुच्य परिसमंत्य परमहं
सपरिव्राजको भूत्वा देहे जीवनमात्रेपि निर्गतममभावो निर्म
मः शांतः उपरतः यः सोत्यानिष्ठो ब्रह्मभावाय कल्पते ५३

सारार्थवर्षिणी॥

तथाहंकारादीन्विमुच्य निर्ममः ममतारहितः अतएव शां
तः अन्तोस्य वसितेषुं सिस्वरूपे निश्चयेन्तिके इति को प्रात
र्मं का स्वरूपो तोनिश्चयोस्येति शांतः अथ भूतः कर्म
योगी ब्रह्मभूयाय ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपी
तिको प्रान्यरमेष्वरसायुज्याय कल्पते योग्यो भवति ५३॥

मधुभाष्य

५३॥

भाषा अनुवाद टीका

और अहंकार औ बल कहे निंद्य वस्तु की इच्छा औ दर्प कहे यो
गबल से अकास गमनरूप आदिमाया मे प्रहति और पारब्धवशा
ने अप्राप्य वस्तु मे जो काम क्रोध का रोकना और अदृष्टवशाते हठा
त् प्राप्तवस्तु मे भी ममता रहित होके शान्ति को प्राप्त पुरुष ब्रह्मके
साथ समझना अर्थात् अहं ब्रह्म ऐसा अचल रूप अवस्थान करनेके यो
ग्य है ५३ ॥

दोहा

अहंकार बल दर्प को क्रोध परिग्रह काम तजके निर्मम प्रशां
त हो ब्रह्म भक्ति हे यान ५३॥

233

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति समः सर्वेषु भूतेषु मद्भक्तिं लभते परां ५४

शांकरभाष्य टीका १

अनेन क्रमेण ब्रह्मभूतो ब्रह्मप्राप्तः प्रसन्नात्मा लब्धाध्यात्मप्रसादस्व त भावो न शोचति किंचिदर्थवैकल्यमात्मनो वा वैगुण्यमुद्दिश्य न शोचति न कांक्षति न ह्यप्राप्तविषयाकांक्षा ब्रह्मविद उपपद्यते अतो ब्रह्मभूतस्यायं स्वभावोऽनूद्यते न शोचति न कांक्षतीति न हृष्यतीति वा पाठः समः सर्वेषु आत्मौपम्येन सर्वेषु भूतेषु सुखं दुःखं वा सममेव पश्यतीत्यर्थो नात्मसमदर्शनमिह तस्य वक्ष्यमाणत्वात् भक्त्या मामभिजानातीति च एवंभूतो ज्ञाननिष्ठो मद्भक्तिं मयि परमेश्वरे भक्तिं भजनं परामुत्तमां ज्ञानलक्षणां चतुर्थीं लभते चतुर्विधा भजंते मामित्युक्तं ५४ ॥

आनंदगिरिकृत टीका २

अनेनेति बुद्ध्या विशुद्धयेत्यादिना प्रयत्नवतः श्लोकमवतारयति अनेनेति उक्तो निरतिशयश्रेयसः क्रमः ब्रह्मप्राप्तो जीवन्नेव निरस्ताशेषानर्थो निरतिशयानंदब्रह्मात्मत्वेन भवतीत्यर्थः अध्यात्मे प्रसन्नात्मा तस्मिन् प्रसादः सत्वशोधनेन जीवन्मुक्तेन सर्वानर्थनिवृत्त्या परमानंदाविर्भावः तस्य तात्पर्यमाह न हीति प्राप्तव्यपरिहार्याभावस्तथा न शोचतीत्यादौ तात्पर्यमाह न हीति प्राप्तव्यपरिहार्याभावस्तस्य निष्प्रयोजनार्थः स्वभावानुवादमुपपादयति ब्रह्मभूतस्येति तस्याशोकपरिहार्याभावे सविषयाभावाच्चापि परिहार्या परिहारप्रश्नः शोकपरिहार्यत्वे तदभावादित्यर्थः पाठांतरे नरमणीयं प्राप्य प्रमोदते तदभावादित्यर्थः समः सर्वेषु भूतेष्वात्मनः विवक्षितं समदर्शनं विशदयति आत्मेति नन्वाह नात्मेति समस्य निर्विशेषस्य दर्शनमत्राभिप्रेतं किं नेष्यते तत्राह नात्मेति उक्तविशेषणवतो जीवन्मुक्तस्य ज्ञाननिष्ठा प्रागुक्तक्रमेण प्राप्तास्य प्रतिष्ठिता भवतीत्याह एवंभूत इति श्रवणमननादिभिः ब्रह्मात्मस्वरूपे सवितर्कत्वा समाधिप्रकर्षाभ्यासे श्रवणादिभिः ब्रह्मात्मस्वरूपे फले ज्ञाने स्थितिरित्यर्थः आर्तादिभक्तित्रयापेक्षया ज्ञानलक्षणां भक्तिं चतुर्थीमित्युक्तो तत्र समस्यावाक्यमनुकूलयति चतुर्वि धाहेति ५४ ॥

श्री गी टी म

234

स्वामिकृत टीका ३

ब्रह्माहमिति निश्चलेनावस्थानस्य फलमाह ब्रह्मभूत इति ब्रह्मण्यवस्थितः प्रसन्नचित्तो नष्टं न शोचति न चाप्राप्तं कांक्षति देहाद्यभिमानाभावात् अत एव सर्वेष्वपि भूतेषु समः सन् रागद्वेषादिकृतविक्षेपाभावात् सर्वभूतेषु मद्भावनालक्षणां परां मद्भक्तिं लभते ५४ ॥

पिशाचभाष्यटीका ४

इदानीं ब्रह्मभूतस्य लक्षणमुच्यते ब्रह्मैव भूतो ब्रह्मभूतः प्रसन्नात्मा स्वच्छ आत्मा यस्य सः प्रसन्नात्मा रागद्वेषाभ्यामनाक्रुष्टमानहृदय इत्यर्थः न शोचति न कांक्षति समः सर्वेषु भूतेषु एक एव परमात्मात्मत्वेनावस्थित एष एव सम एवं भूतो मद्भक्तिं मीश्वरभक्तिं भजते तादृशं परामुत्कृष्टां लभत इत्यर्थः ५४ ॥

रामानुजभाष्यटीका ५ ॥

ब्रह्मभूत इति ब्रह्मभूतः आविर्भूतापरिच्छिन्नज्ञानैकाकारम ... दैकरसस्वभावात्मस्वरूपः इत्युक्तं मांप्रहोनिविष्टिमेपरामि त्यशेषेनोक्तं प्रसन्नात्मा क्लेशकर्मादिभिरकलुषस्वरूपो मद्व्यतिरिक्तं किंचन भूतविशेषं न शोचति न किंचन कांक्षति मद्व्यतिरिक्तेषु भूतेषु अनादरणीयतायां समो निखिलवस्तुजातं तृणवन्मन्यमानो मत्तो ... किं लभते परां मयि सर्वेश्वरे निखिलजगदुद्भवस्थितिप्रलयलीले निरस्तसमस्तहेयगन्धेऽनवधिकातिशयासंख्येयकल्याणगुणगणैकताने लावण्यामृतसागरे श्रीमति पुण्डरीकनयने स्वस्वामिनि अत्यर्थप्रियानुभवरूपां परां भक्तिं लभते ५४ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ५४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

तथाविधत्वस्य फलमाह ब्रह्मभूत इति ब्रह्मण्यवस्थितः प्रसन्नचित्तः सन् न शोचति न चाप्राप्तं कांक्षति देहाद्यभिमानाभावात् अत एव सर्वेषु समः न केवलं नारायणस्वरूपज्ञानः किं तु परां मद्भक्तिं लभते सर्वभूतेषु मद्भावनया भजते ५४ ॥

वनमाली टीका ८

अपरोक्षीकृते ब्रह्मणि च परमात्मनि भूतः स्थितः प्रसन्नः आत्मा परमात्मा विज्ञानं वा यस्य सः न ष्टं न शोचति निष्प्रापं न काङ्क्षति सर्वेषु भू तेषु समः सर्वेषां तथा मित्रोदासीनादिषु रागद्वेषशून्यः एतादृशो म द्भक्तिं सर्वोत्तमां परां लक्षणैकां विविक्तां नैष्कर्म्यं तां परां मन्त्रयाधि नीलभते ५४ ॥

कुलमणि वैजयन्ती टीका ९

ब्रह्मभूत न ब्रह्मभावादनेन तस्य किं फलं प्राप्नोतीति चेत्तत्राह ब्रह्मभूत इति ब्रह्मभूतः प्रकृतिसंबंधरहितत्वेनाविर्भूतज्ञानादिधर्मत्वा न्मन्वरूपकः अतएव प्रशान्तात्मा दर्शपापशेषारहिताद्भवत् क्लेश कर्मविपाकाशयविरहादतिनिर्मलस्वरूपः सर्वभूतेषु देवमनुष्या देवतिर्यगादिशरीरेषु भूतेषु लोकहिताद्यविनाशित्वेनात्मभावित्वात् यान्समदर्शी भूत्वा अकृत्स्नशोचति यथान्वं भीष्मद्रोणादीन् शोचसि तथैव तेन तस्य यानुकांक्षि तत्त्वविशेषान् प्रतिशोकं न करोति न कांक्षति अपार्थत्वाच्च कांक्षति हि यः शोचयः सपरीति दोषाज्ञानस्य यापरे तस्य कृपायत्किमपि स्वभावतो पालनमलत्वं विकारानर्थिका पि निरवधिकातिशयाचिन्मानन्दस्वरूपेस्वाभाविकानवधिकातिशयासंख्येयगुणशालिके जगज्जन्मादिकारणे वेदैकवेद्ये चिदचिदात्मकजगच्छरीरे भिन्नस्वरूपेमत्प्राणमेपरि वक्ता शेषपीतो दद्विरात्मकजगच्छरीरे भिन्नस्वरूपे मत्प्राणमे परीन्द्रकौशेषपीतो वंश्यैश्वर्याणि प्रियवत्सदेवात्मजेन दनेदनेसर्वैश्वर्येजगत्स्वामि निश्रेयसे तो भक्तिं निरतिशयमनवरूपानुभवरूपां लभते प्राप्नोति ५४

+ केनक्रमेण ब्रह्मसायुज्यकल्पनइति तदाह ॥

मधुसूदनी टीका १०

+ ब्रह्मभूतः अहं ब्रह्मास्मीति दृढनिश्चयवान् श्रवणमननाभ्यासा त् प्रसन्नात्मा शुद्धः चित्तः शमदमाद्यभ्यासात् अतएव न शोचति नष्टं न कांक्षति अप्राप्तं पवनिग्रहान्तरद्वयोरनारंभात् समः स र्वेषु भूतेषु आत्मौपम्येन सर्वत्र सुखं दुःखं च पश्यतीत्यर्थः एवंभूतो भक्तिं मत्परां लभते श्रवणमननाभ्यासात् परमात्मनि भक्तिमुपा सनां निदिध्यासनाख्यां श्रवणमनननिर्दिध्यासनाख्यात् लभते सम्यग्ज्ञाना कारवृत्तिं न तु स्मार्तकर्मपापारिपकनिर्दिध्यासनामनाभ्यासफलभूतां लभते परां श्रेष्ठाम् अव्यवधानेन मोक्षात्

श्री॰
गी॰टी॰
भ॰

235

कारफलो चतुर्विधा भजते मामित्युक्तो भक्तिचतुष्टयसोपा
ज्ञानलक्षणमिति वा [illegible] ५४ ॥

सदानंदी टीका ॥

येन क्रमेणात्मभावयोग्यो भवेन्मुनिः तदाह ब्रह्मभूत इत्यष्ट
भिः श्लोकैर्निश्चितः १ श्रवणादेः सदाभ्यासात्सत्त्वात्मा विशुद्ध
धीः समाध्यभ्यासतो नष्टमित्थं वस्तु न शोचति २ नाप्यमेकांत
निःस्पृहः सर्वभूतेषु यः समः आत्मौपम्येन सर्वत्र सुखदुःखं च पश्य
तीति ३ ज्ञाननिष्ठः क्रमादेवं मयि श्रेष्ठे परात्मनि उपासनो मदाका
रधीहृत्याद्विनिरूपिणी ४ श्रवणादेः सदाभ्यासफलभूता मत्परा
मा [illegible] ध्यानसंसिद्धा साक्षात्कारफलापरा ५ सद्भक्तिं लभते
धीरश्चतुर्थी ज्ञानलक्षणां ६ ५४ ॥

नीलकंठी टीका ॥

एवं शांतस्य केवलस्य योगिनो मुख्यामवस्थामाह ब्रह्मभूत
इति यो हि समीलयेद्वा निपतितो योगी मुख्या नेजडे देहस्मी
त्याचितश्चवं न ह्यालक्ष्य तिष्ठति ब्रह्मभूतस्तु प्रसन्नात्मा प्रसन्नचेताः
लब्धशरीरः प्रमत्तेनैव समाधिसेवकेन न समस्तदेकप्रवणो न शोच
तिनष्टं नाप्यप्राप्तं कांक्षति दारादिकं सर्वेषु भूतेषु च तुर्विधेषु स
मः ब्रह्मैवेदं सर्वमिति विद्यावैषम्यवर्जितः सन् परां मद्भक्तिं तुरी
यां विवर्जितां भावनां लभते पातंजलयोगी न मुख्याने परां
दृष्टिं लभते भेददर्शित्वात् प्रपंचभक्तः श्रीभागवते दर्शितः
सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः भूतानि भगवत्यात्मन्येष
भागवतोत्तम इति सोयं चतुर्थी भक्तो ज्ञानी त्वात्मैव मे मतमिति
भगवतापि दर्शितः ५४ ॥

आनंदी टीका ॥

ब्रह्मभावं प्राप्तस्य परीक्षामाह ब्रह्मभूतः ऐक्यविषया योगा
द्या ब्रह्मभावं प्राप्तः प्रसन्नात्मा मैत्रीकरुणामुदितोपेक्षाणां सु
खदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसाद इति
तत्रोक्तात्मबीजसमाधिकृतान्विमप्रसादादुत्तरकालं नि
समाधौ निर्विचारवैशारद्यादध्यात्मप्रसाद इति सूत्रार्थप्रसि

निर्वीजेः

निर्विचारेमेध्यादिभावनोत्तीर्णेसमाधौवैशारद्यादुद्रिक्तसत्वस्यावरणा
पमेमप्रकाशात्मनोरजस्तमोभ्यामनभिभवनीयात्स्वच्छस्थितिप्र
वाहात्प्रसन्नः स्फुटीभूतप्रज्ञालोकः आत्मान्तःकरणंयस्येदृशः
नशोचतिद्विःखिन्नेषुकरुणांनभावयति नहृष्यतिसुखितेषुमै
त्रींनभावयति सर्वेषुभूतेषुसमः पुण्यापुण्येषुप्राणिषुनि ध
पेक्षः परांमद्भक्तिं आर्त्तोजिज्ञासुरर्थार्थीज्ञानीचेतिलक्षणांचतु
र्थींकाष्ठांप्राप्तांज्ञानात्मिकांमत्स्वरूपाप्राप्तिंलभते ५४ ॥

रामकंठटीका ५४

एवमनेनक्रमेणब्रह्मभूतोब्रह्मैकपरायणत्वात्सर्वभावमापन्नोनिर्वि
शेषतयैवप्रसन्नात्माविगतदैन्यसंकल्पत्वात्प्रसन्नः स्वाभावि
कमृद्धियुक्तआत्मास्वभावोयस्यसतथाविधःसन्नशोचति निमा
विनश्वरत्वात्मयविश्वत्वात्कस्यचिदपिभावस्यसत्वेनाः परिग्रह
नष्टभावेनपरिदेवते नाप्यनेनैवमायेनकस्मिंश्चिदात्मेष्यति हर्ष
मनुभवति एतेहिसर्वेभावामायोपहतदृशांभावाभावभ्रांतिमुक्ता
नांतोहर्षशोकात्मकविकारहेतुतांनापद्यंते ततसर्वसाम्यदर्शिनो
योगिनइत्यर्थः तथाज्ञानस्यपरांनिष्ठांनिरतिशयांचतुर्थींकाष्ठां
परमात्माद्वैतमति
मत्स्वरूपायासालभतेप्राप्नोति किमुक्तंभवति परामद्भक्तिरिति तथाचैतां
पचिलक्षणायाज्ञानस्यपरानिष्ठासैवपरामद्भक्तिःदिदृक्षांसन्नमतविदः य
त्वंतिभक्तिमंतः मुक्तावक्रविधानाद्दादि
स्वयमुक्तः परांकाष्ठांमुक्तिरिमन्तनिश्चयइति तथाच ५५

+ एवंविधस्यमहिमानमाह॥

लासिकी ~~[illegible]~~टीका

+एवंविधः प्रसन्नात्माप्रसन्नोदेहाद्यभिमानकलंकशून्यआ
त्मास्वस्वभावयस्यसब्रह्मभूतेभावमापिब्रह्मत्वंप्राप्तएव विनष्ट
नशोचति योगिनाजीवदृशा
नशोचति प्रप्राप्तंचनकांक्षति नत्वेवंविधेनयोगिना समइति सर्वेषु
यामेवकिमितिब्रह्मत्वंनप्राप्तमित्याशंक्याह निर्दूपत्ता
ब्रह्मादिस्थावरान्तेषुभूतेष्वयमेवयोगीसमःप्राप्नोति सर्वात्मकोह
योगामः सएवपराणंपरांमद्भक्तिंममसर्वरूपस्यभक्तिं लभते नतामितयोगी ५८
मिति मद्वर्गाद्याभित्रूपामपरामनोलभते

गी॰
टी॰
अ

236

पैंचोलेटीका

ब्रह्माहमित्येवं नैश्चल्येनावस्थानं सफलमाह ब्रह्मभूतेति अने
न क्रमेण ब्रह्मभूतः ब्रह्मत्वं प्राप्तः प्रसन्नात्मा लब्धात्मप्रसादस्वभा
वः न शोचति किंचिद्वैकल्यं आत्मनो वैगुण्यं वा उद्दिश्य न शोचति
संतप्यते न च अप्राप्तविषयं न कांक्षति आत्मौपम्येन सर्वेषु भूतेषु
सुखं दुःखं वा सममेव पश्यति एवंभूतो ज्ञाननिष्ठः सन्मयि पर
मेश्वरे भक्तिं परां उत्तमां ज्ञानलक्षणां चतुर्थीं लभते ५४

रणवीरसमिद्धोयिनी

पुनरपि ब्रह्मसायुज्याय कल्पते योग्यो भवति प्राप्तेर्निमि
त्तं संगृह्णाह ब्रह्मभूत इत्यर्थेन यः प्रसन्नात्मा प्रसन्नो रागद्वेषा
दिकालुष्यरहित आत्मांतःकरणं यस्य तादृशः सन् न शोचति
नष्टं बान्धवादिकं नानुतपति तथैवाप्राप्तं नाकांक्षति स ब्रह्म
भूत एव ब्रह्मसायुज्यं प्राप्नोत्येवेति यत्तदोरध्याहारेण समन्वयः
भाविन्याः पितादृशावस्थाया भूतत्वया कथनं निःसंदेहप्रतीत्य
र्थं अथ प्राधान्येन परमसिद्धिसाधनतया प्राक्प्रतिपादिताया भ
वद्भक्तेरेव परस्परया कारणत्वं पुनरपि स्मारयंस्तावत्तल्लब्ध्यु
पायमेवाह सम इत्यादिना सर्वेषु भूतेषु समः समदर्शी पर
प्रकृष्टोपायभूतां मद्भक्तिं लभते ५४॥

मधुभाष्य

५४॥

भाषा अनुवाद टीका

अर्ह ब्रह्म ऐसी निश्चय रूप अवस्थिका फल कहते हैं कि ब्रह्मभू
न कहे ब्रह्मभाव को प्राप्त प्रसन्नचित अरु षट देह आदिमे अभि
मान के अभाव से नष्ट जो संसारी विषय तिनका शोच नही क
रते हैं और अप्राप्त विषय को भी आकांक्षा नही करते इसी सेराग
द्वेषादिकृत विक्षेप के अभाव से भूत मात्र मे समभावयुक्त होने
के अनन्तर सकल प्राणियो मे मद्भावरूप जो मेरी उत्तम भक्ति ति
सको प्राप्त होते हैं ५४ ॥

दोहा

ब्रह्मभय आनंदमन सोचन कांक्षन सोय सर्वभूतमें सम
रहैं मोरि भक्ति लभ होय ५४ ॥

237

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्व
तः ततो मां तत्वतो ज्ञात्वा विशते तदनंतरं ५५

शांकरभाष्य टीका १

ततोज्ञानलक्षणया भक्त्या मामभिजानाति यावानहमुपाधिकृ
तविस्तरभेदः यश्चाहं विध्वस्तसर्वोपाधिभेदोस्मि उत्तमपुरु
षश्चाकाशकल्पस्तं मामद्वैतं चैतन्यमात्रैकरसमजमजरममरमभ
यमनिधनं तत्वतोभिजानाति ततो मामेवं तत्वतो ज्ञात्वा विशते
तदनंतरं मामेव नात्र ज्ञानानंतप्रवेशक्रिये भिन्ने विवक्षिते ज्ञा
त्वा विशते तदनंतरमिति किं तर्हि फलान्तराभावात् ज्ञानमात्रमे
व क्षेत्रज्ञं चापि मां विद्धीत्युक्तत्वात् ननु विरुद्धमिदमुक्तं ज्ञानस्य
या परा निष्ठा तया मामभिजानातीति कथं विरुद्धमिति चेदुच्य
ते यदैव यस्मिन् विषये ज्ञानमुत्पद्यते ज्ञातुस्तदैव तं विषयम।
भिजानाति ज्ञातेति न ज्ञाननिष्ठां ज्ञानावृत्तिलक्षणामपेक्षत इति
ततश्च ज्ञानेन नाभिजानाति ज्ञानावृत्त्या तु ज्ञाननिष्ठयाभिजाना
तीति नैष दोषो ज्ञानस्य स्वात्मोत्पत्तिपरिपाकहेतुयुक्तस्य प्रतिप।
क्षविहीनस्य यदात्मानुभवनिश्चयावसानत्वं तस्य निष्ठाशब्दा।
भिलापात् शास्त्राचार्योपदेशेन ज्ञानोत्पत्तिपरिपाकहेतुं सह
कारिकारणं बुद्धिविशुद्ध्यमानित्वादिगुणं चापेक्ष्य जनितस्य
क्षेत्रज्ञपरमात्मैकत्वज्ञानस्य कर्त्रादिकारकभेदबुद्धिनिबन्धनसर्व
कर्मसंन्याससहितस्य स्वात्मानुभवनिश्चयरूपेण यदवस्थानं
सा परा ज्ञाननिष्ठेत्युच्यते सेयं ज्ञाननिष्ठा आर्तादिभक्तित्रयापेक्ष
या परा चतुर्थी भक्तिरित्युक्ता तया परया भक्त्या भगवन्तं तत्वतो
भिजानाति यदनन्तरमेवेश्वरक्षेत्रज्ञभेदबुद्धिरशेषतो निवर्तते
अतो ज्ञाननिष्ठालक्षणया भक्त्या मामभिजानातीति वचनं न।
विरुध्यते अत्र च सर्वं निवृत्तिविधायि शास्त्रं वेदान्तेतिहासपुरा
णस्मृतिलक्षणं प्रसिद्धमर्थवद्भवति विदित्वा व्युत्थायाथ भि
क्षाचर्यं चरंति तस्मात् न्यासमेषां तपसामतिरिक्तमाहुर्न्यासमप

वासुदेव यदिति संन्यासः कर्मणां न्यासो वेदादिषु च लोकसंग्र
हे च परित्यज्य त्यज धर्ममधर्मं चेत्यादि इह च दर्शितानि वाक्यानि
न च तेषां वाक्यानां आनर्थक्यं युक्तं वार्थवादत्वं स्वप्रकरणस्थत्वा
त् प्रत्यगात्माविक्रियस्वरूपनिष्ठत्वाच्च मोक्षस्य नहि पूर्वसमुद्र
जिगमिषोः प्रातिलोम्येन प्रत्यक् समुद्रजिगमिषुणा समानं
मार्गत्वं सम्भवति प्रत्यगात्मविषयप्रत्ययसन्तानकरणाभिनि
वेशश्च ज्ञाननिष्ठा सा च प्रत्यक् समुद्रगमनवत् कर्मणा सहभा
वित्वेन विरुध्यते पर्वतसर्षपयोरिवान्तरवान्विरोधः प्रमाण
विदां निश्चितस्तस्मात् सर्वकर्मसंन्यासेनैव ज्ञाननिष्ठा कार्येति
सिद्धं ५५ ॥

आनन्दगिरिटीका २

ननु समाधिसाध्येन परमभक्त्यात्मकेन ज्ञानेन किं प्राप्तव्यमवा
प्यते तत्राह तत इति भक्त्या समाधिजन्यया मां ब्रह्माभिन्नं
न प्रमुक्तया जानाति व्याप्नोतीत्यर्थः तदेव ज्ञानं भक्तिपदार्थीनं
विवृणोति यावानिति आकाशकल्पत्वमनवच्छिन्नत्वमसंग
त्वं च चैतन्यस्य विषयसाधितत्वं प्रतिनियतमति अद्वैतमिति येन
द्वयं बोधात्मत्वमात्मनो मन्यते तादृक् यश्चोक्तं चैतन्यमात्रेति आ
त्मनि तन्मात्रेऽपि धर्मान्तरमपेत्य धर्मधर्मित्वे प्रत्याह एकरसमि
ति सर्वविक्रियारहितत्वोक्त्या कौटस्थ्यमात्मनोऽवस्थापयति
अजरमिति उक्तविक्रियाभावे तदेव ज्ञानासंबंधं हेतुमाह अभ
यमिति तत्त्वज्ञानमनुपतनत्फलं विदेहकैवल्यं लभयति तत
इति तत्त्वज्ञानस्य तस्मादनन्तरप्रवेशक्रियायाश्च भिन्नत्वे प्राप्ते
प्रत्याह तद्वेति भिन्नत्वाभावे का गतिर्भेदोक्तेरित्याशंक्योपचा
रिकत्वमाह किंतदिति प्रवेश इति शेषः ब्रह्मप्राप्तिरेव फलान्त
रमित्याशंक्य ब्रह्मात्मनोर्भेदाभावान्न ज्ञानातिरिक्ता तत्प्राप्ति
रित्याह तेन तत्त्वेति ज्ञाननिष्ठया परया भक्त्या मामभिजानाती
त्युक्तमाक्षिपति नन्विति विरुद्धत्वं स्फोरयितुमेकति कथमिति
विरोधस्फुटीकरणं प्रतिज्ञानीते उच्यत इति न च ज्ञानस्योत्पत्ति

देव विषयाभिव्यक्तिरित्याह यदेति एवकारनिरस्यं दर्शयति
नत्वानेति इत्यावयोः सिद्धमिति शेषः ज्ञानस्योत्पत्तेरेव विषया
भिव्यक्तेरपि कथं प्रकृते विरोधीत्याशंक्याह तत्स्थेति विरुद्ध
मिति शेषः शंकितविरोधं निरस्यति नैष्कर्म्यदोषइति उक्तमेव हे
ते प्रपंचयति शास्त्रेति यो हि शास्त्रान्तरार्थाचार्योपदेशस्तेन
ज्ञानोत्पत्तिः आचार्यवान् पुरुषो वेदेति श्रुतेः तस्याश्च परिपा
कः संशयादिप्रतिबंधध्वंसस्तत्र हेतुभूततदुपदेशस्यैव स
हकारिकारणं यज्ञादिकमित्याह तदपेक्ष्य तस्मादेवोपदेशाज्ज
निते यदैकज्ञाने तस्य कारकभेदबुद्धिनिबंधनानि यानि सर्वा
णि कर्माणि तेषां संन्यासेन सहितस्य फलरूपेण स्वात्मन्येव
सर्वविकल्परहिते यदवस्थानं सा ज्ञानस्य परा निष्ठेति एव
क्रियते प्रामाणिकैरित्यर्थः यदि यथोक्ता परा ज्ञाननिष्ठा क
र्थे तर्हि सा चतुर्थी भक्तिरित्युक्तेति तत्राह सेयमिति यथो
क्तया भक्त्या भगवत्तत्त्वज्ञाने सिद्ध्यतीत्याह तयेति तत्त्वज्ञा
तस्य फलमाह यदनंतरमिति ज्ञाननिष्ठारूपया भगवद्भक्त्या।
नत्वज्ञानातिरेकात् तत्फलस्य वा ज्ञाननिष्ठत्वं तस्मात्त्वात् वेदोक्ते
श्रौपचारिकत्वात् प्रकृते वाक्यमविरुद्धमुपसंहरति यतइति श्रो
पदेशिकैकज्ञानस्य सर्वकर्मसंन्याससहितस्य स्वरूपावस्थाना
त्मकस्य परमपुरुषार्थोपयिकत्वमित्यस्मिन्नर्थे मानमाह युक्तचे
ति तदेव शास्त्रमुदाहरति विदित्वेत्यादिना दर्शितानि वाक्यानि स
र्वकर्माणि मनसेत्यादीनि न चैषां वाक्यानामविवक्षितार्थत्वमाशं
त्यार्थं प्रामाण्यमित्याशंक्याध्ययनविध्युपात्तत्वात् वेदवाक्यानामन्त
रत्वे तोषिवाक्ये तेषां नैवमित्याह नचेति तथापि सोऽर्थवादत्वमिति इतश्च सन्न्यासोऽपेक्षि
त स्वार्थे मानतेत्याशंक्याह न चार्थवादत्वमिति
न स्वार्थमानतेत्याशंक्याह संन्यासेऽपि कारणे न कर्मनिष्ठायामित्याह
५ तमोऽतोऽपि ज्ञाननिष्ठस्य संन्यासेऽपि कारणे दृष्टान्तमाह नहीति
प्रयोगिति ज्ञाननिष्ठस्य कर्मनिष्ठाविरुद्धेत्यत्र तस्याः सहभावित्वं विरु
ज्ञाननिष्ठास्वरूपानुवादपूर्वकं कर्मनिष्ठया तस्याः कथं ज्ञानकर्मणोर्विरोधधी
रमिति दार्ष्टान्तिकमाह प्रत्यगात्मेति कथं ज्ञानकर्मणोर्विरोधीत्याह
रित्याशंक्य कर्मणां ज्ञाननिवर्त्यत्वमुक्तमित्यस्ति सिद्धत्वादित्याह

पर्वतेति भेदवानभयोरेकधर्म्मिनिष्ठत्वेन सोपाधीभावस्तस्मादक
भेदवानित्यर्थः ज्ञानकर्मणोः समुच्चये फलितमुपसंहरति तस्मादिति
५५ ॥

स्वामिकृत टीका ३

ततश्च भक्त्या मामिति तया च परया भक्त्या तत्वतो मामभिजानाति
कथंभूतं मायावान्सर्वव्यापी यश्चास्मि सच्चिदानंदघनं तथाभूतं ततश्च
मामेवं तत्वतो ज्ञात्वा तदनंतरं तस्य ज्ञानस्योपरमे सति मां विशते परमा
नंदरूपो भवतीत्यर्थः [illegible]
[illegible] ॥

पिशाचभाष्यटीका ४

इदानीं ब्रह्मस्वरूपावगतेश्चास्य सत्वंकारणमाह भक्त्या भजनेन मां सर्वे
श्वरमभिजानाति सर्वगच्छति यावानहं यश्चाप्यहं ताभिः प्रपंचस्वरू
पेण यश्चास्मीति सर्वमम सत्लोपाधि स्वरूपेणोनि च तत्वतः परमार्थः
एवं ततो ज्ञात्वा तन्मां तदनंतरं विशते प्रविशति ब्रह्मैव सर्वं भवतिपथ
नेत्यर्थः चतुर्थ्याये उदाराः सर्व एवते ज्ञानीत्वात्मैव मे मतमित्यु
क्तवान् ५५ ॥

रामानुजभाष्यटीका ५

भक्त्येति स्वरूपतः स्वभावतश्च योहं गुणतो विभूतितो यावाँश्चाहं तं
मां एवंरूपया भक्त्या तत्वतो विजानाति मां तत्वतो ज्ञात्वा तदनंतरं तत्वतो भ
क्तितो मां विशते प्रविशति तत्वतः स्वरूपस्वभावगुणविभूतिदर्शना
नंतरकालभाविन्या नवधिकातिशयभक्त्या मां प्राप्नोतीत्यर्थः अत्र ततः
इति प्राप्तिहेतुतया निर्दिष्टा भक्तिरेव भक्त्या त्वनन्यया शक्य इत्यादिना
तत्वतः प्रवेशहेतुतयाभिधानात् [illegible]
[illegible] ५५ ॥

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थम् ५५ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

ततश्च भक्त्येति तया सर्वात्मकत्वभावनारूपया भक्त्या यश्चाहं यावान् वि
श्वव्यापी यश्च परमानंदस्वरूपः एवंभूतं मामभिनः स्थावरजंगमम

प्रवर्तमाने ज्ञाना नि तत्त्वश्चमो तत्त्वतश्चास्मि सविनस्वरूपत्वेन ज्ञात्वा तदन्ते
नंतरं तत्त्वज्ञानोपरमे मां विशते भगवदाकारो भवति ५५ ॥

वनमाली टीका ८

विश्वोद्देशिकर्ता
तया भक्त्या मामहं नेतगुणमाकाशवद्देशेगोदासीनमपि विश्वो
देसर्वंभूतसममपि स्वाश्रितवत्सलं तुष्टविग्रहं तत्परं मां यत्प्रसादलब्धज्ञा
नेन तत्त्वतो जानाति यावान् चरचरचेतनापदीयो नेतशक्तिमान् अस्मि
नेनतत्त्वतोज्ञानानि यावान् चरचरचेतनापदी यो नेतशक्तिमाला विद्यमानश्च
नेद्वचनस्वरूपस्तं मां तत्त्वतो जानाति नं त्वैदं जालिकमिवाविद्यमानश्च
दर्शकं यतारं कमायाविनं दैमरश्वजानाति यथा दैमायश्चचरचेतनापदी
यः सामर्थ्यमिथ्यायं प्रतारक इति जानेति स्पष्टा ज्ञानि वादयेत तथा न जाना
ति किंतु याद्दशमवाधितेमद्वि स सामर्थ्यं तादृशं स्वयोग्यतानुसारान्सम्य
ग्जानातीत्यर्थः ततो भक्तिपूर्वकमपरोक्षज्ञानानंतरं मां तत्त्वतः प्रसन्नं ज्ञात्वा
मां विशते मत्सामरूपं सायुज्यं प्राप्नोतीति तदनंतरं मत्प्रसादयुक्तापरोक्ष
ज्ञानाव्यवहितोत्तरक्षणमेव न तु किंचिद्विलंबेनेत्यर्थः यद्वा नन्वभ
क्तिपूर्वकमपरोक्षज्ञानानंतरं नवतः प्रारब्धकर्मक्षयपूर्वकं ज्ञानात्तदनंत
रं प्रारब्धकर्मक्षयसहितं भगवदपरोक्षाव्यवहितोत्तरक्षणे विशतेइत्यर्थः

५५ ॥

ऊसमवैजयंती टीका ९

तस्य किंफलं स्यादित्यपेक्षायामाह भक्त्येति स्वरूप
तस्य किं फलमपजनस्य किं फलं स्यादित्यपेक्षायामाह भक्त्यो लक्षणिकयापरा
तः स्वभावतश्चाहं यावान् स्मि ते सर्वं स्थं मां भक्त्योक्तरूपिकयापरा
यामहं मानत्वतः स्वरूपस्वभावगुणशक्तिविभूतीनां यथात्म्ये
नाभिजानात्यनुभवति ततो मत्स्वामिहे न भूतायामपरायाश्च यामि
चाविगणामन्दक्तिनोहेतोर्भक्त्यात्वनन्यया शक्य इत्युक्त्वा न मां यतः
प्रहनिभतानां येन सर्वमिदं ततं उत्तमः पुरुषस्त्वसः परमात्मेत्यु
दाहृत इत्यादिनोक्तलक्षणं पुरुषोत्तमं तत्त्वतः स्वरूपादियाथात्म्ये
नज्ञात्वाऽनुभूय तदनंतरं तत्साभकेरनंतरं पश्चान्मां विशते देवदत्तो
ग्रामं प्रविशतीत्यादिवन्मत्सायुज्यं प्राप्नोति नभमनस्वरूपं भवतीत्यर्थः
यद्वा तत इति ल्यब्लोपे कर्मणि पंचमी परया भक्त्या मां तत्त्वतो ज्ञात्वा
ततः मां भक्तिमादायैव मां विशते तो मोदोपि भक्तिरस्तीत्येवं लब्धो न
चापोहः श्राद्धयागानंतरापि हि दृष्टमिति श्राद्धयागादामोदाते न

ज्ञापि मोक्षे च भक्तिरनुवर्तत इत्युक्तो हृष्टमिति सूत्रार्थः भक्त्या विनश्या
विद्यानेभक्त्या सा दोषविवर्द्धनेसितयानष्टपिज्ञानोशितात्स्वादो यथा भवे
दितिवचनात् ५५ ॥

मधुसूदनी टीका ९

तया भक्त्या निदिध्यासनात्मिकया ज्ञाननिष्ठया मां परमात्मानमभिजा
नाति साक्षात्करोति यावान्विभुर्नित्य श्च परिपूर्णः सत्यज्ञानानन्दघनः
सदाविध्वस्तसर्वोपाधिरद्वैतैकरस एकस्तावन्तं चाभिजानाति ततो मामेवं त
त्वतो ज्ञात्वा ग्रहमस्य केवलानंदाद्वितीये ब्रह्मेति साक्षात्कृत्य विशते भुक्तानंत
त्कार्यनिवृत्तौ सर्वोपाधितया मद्रूप एव भवति तदनंतरं केवलत्वं प्रारब्धभोग
न्ते देहपातानंतरं न तु ज्ञानानंतरमेव ज्ञानप्रत्ययेनेव तल्लाभेन तदनंतरमित्य
स्यैव यथोपपातात् तस्मात्तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति
श्रुत्यर्थ एवात्र दर्शितो भगवता यद्यपि ज्ञानेनाज्ञाने निवर्तितमेव दीपेने
व तमस्तस्य तद्विरोधिस्वभावत्वात् तथापि तदुपादेयमहंकारदेहादि निरु
पादानमेव यावत्प्रारब्धकर्मभोगमनुवर्तते दृष्टत्वादेव न हि दृष्टे अनुप
पन्नं नाम नार्किकैरपि समवायिकारणनाशात् द्रव्यनाशमंगीकुर्वद्भि
र्निरुपादानस्य द्व्यणुकमात्रं तिष्ठतीत्यंगीकृतमिति परमाणुसमवेतद्व्यणुक
नाशे तु समवायिकारणनाशादेव द्रव्यनाशः समवायिनिरूपितकारणना
शात्समभूयोः सुगतमिति नाननुगमः येत्वसमवायिकारणनाशमेव स
र्वत्र कार्यद्रव्यनाशकमिच्छंति तेषामाश्रयनाशस्थले तृणाद्यमनुपादाने
कार्ये तिष्ठति एवं च तत्रैव क्षणस्थितिवत्संनिपाते बहुकालावस्थितिः केनवा
र्यते प्रारब्धकर्मणामुपनिबंधकत्वेनक्लृप्तत्वात् अतः कारणे हास्यवस्थि
तस्य चानुपपत्तिसिद्धेश्च एवं शिष्यसे व कार्यदृष्टमपि नश्यति वेयकेन तद
भावमपेक्षाच सर्वं सिद्धमेवाज्ञाननाशस्तत्कार्यमतः करणादिकं नाशय
तीति नष्टत्वेनापेक्षात्तदुक्तं तीर्थैरुपचरितेहेवानष्टस्य तिरुपिपदेश्य।
जनोदेहे ज्ञानसमकालमतः कैवल्यप्राप्तिरतशोक इति नजानामी
त्यादि प्रयत्नस्तस्यानिवृत्ताज्ञानस्याप्यज्ञाननाशजनितादृष्टनुपादाना
त् सार्वात्म्याश्रयादेवाज्ञानसंस्कारात्तत्वज्ञानसंस्कारनिवर्त्यादंतः कर
णस्थमवधेरिति विवरणकृतः अद्वैतसिद्धौ चरमसाक्षात्कारानं
तरमेव ब्रह्मन भवामि न जानामीत्यादि प्रयत्नो नास्ति व्यदिष्टं चेदे न
जानामीत्यादि प्रत्ययः स्यात्तदुपपादनाय चेयसंस्कारकल्पनेतिनानुप

पत्रे प्रज्ञानलेशपदेनाप्ययमेव संस्कारो विवक्षितः नहि स्वावय
वमज्ञानेयेन किं यत्र श्रुतिकियन्निष्ठतीति वाच्यं श्रुतिर्वचनीयत्वा
देकदेशाभ्युपगमेन तन्निहृमर्थं पुनस्संस्कारं संज्ञानमपोहितमेवतच्च
स्तिकाले दृष्टं दृष्टमिति तत्त्वज्ञाने संस्कारस्थापनात् साभ्युपेयानत।
स्व संस्कारस्थलात्र कोपि विशेषः तिष्ठतीत्येव कल्पनाश्रेयसी ईदृश
नीवन्मुक्तरूपेलयाचश्राभवतोक्तस्थपदेशेतिते ज्ञानेज्ञातिनलब्द
र्शिनः स्थितप्रज्ञलक्षणानि च व्याख्यातानि तस्मात्सा पूर्वं के विशतेनद्र
नेतरमिति नत्वयोनाम्नोः स्वहोतः कारणः सोतश्चकारणाशुद्धिपर्यं।
तेमहत्त्वे कर्मनन्मजेत् यस्त्वस्वहेतः कारणः सनैष्कर्म्यसिद्धिं संस्था
मैनाधिगच्छतीतिके संन्यासस्त्वबालाणानेवकर्तव्योनत्तत्रियवैश्यपा
भ्यामिति प्राप्तंके भगवता कर्मणैव हि संसिद्धिमास्थिता जनकाद
यस्मात् तत्स्वहेतः कारणोन तत्रियादिना किं कर्मणएत्रश्रेयानि।
किंवा सर्वकर्मसंन्यासः कर्तव्यः नाद्यः आरुरुक्षोर्मुनेर्योगं कर्म।
कारणमुच्यते योगारूढस्य तस्यैव शमः कारणमुच्यते इत्यादिना
योगमतः कारणशुद्धिमारूढस्य कर्मानुष्ठाननिषेधात् नद्वितीयः
स्वधर्मे निधनं श्रेयः परधर्मो भयावह इत्यादिना ब्राह्मणधर्मस्य स
वकर्मसंन्यासस्य तत्रियादिके प्रतिनिषेधात् नैवकर्मानुष्ठानक
मित्यागयोरयमनरमन्तरेणान्तरीयः प्रकारोस्तिनस्मादुभयोरपिप्र
निषिद्धवैराग्येनरागाभावेनचावश्यकर्तव्यप्रतिषेधाभिक्रमेकर्मस्या
गपवश्रेयान् बंधहेतुपरित्यागेनमोक्षसाधनपोषकत्वात् नतक
मीणपवश्येयानिविनिवृत्तेपरेऽन्तेवनमोक्षसाधनत्वानप्रानिवेषक
न्वादित्यभिप्रायमज्ञेनस्यालक्ष्याह भगवान् ५५ ॥

सदानंदी टीका ॥

निदिध्यासननु पिणाभ्यस्तात्मज्ञानानिष्ठया मामद्वितीयमात्मा
नेमत्यकत्साक्षात्करोतीति सः १ यावान्विभुत्वनित्यत्वपरिपूर्णत्वनोः
हवः सत्यज्ञानवपुः सर्वोपाधिशून्यः सदामलः २ यश्चैवेदैकरसः
स्वहस्तावत्तेमाचतत्त्वतः अभिजानातिसर्वज्ञत्वनोमास्यथाऽथतः
२ तात्त्वहमस्यांविदेकानदं यत्नेतितिसर्वद्विपा साक्षात्कृतनिरुत्यात्मा।
ज्ञानस्यसकलस्य च ४ सर्वोपाधिविनिर्मुक्तो महपः केवलोभवेत्

श्री·
गीटी·
अ·

२५१

प्रारब्धकर्मभोगेन देहपातादनंतरं ५ कैवल्याख्यं परं धाम मामेव
विशते मतिः यद्यपि ज्ञानसंप्राप्तिसमये भगवद्वपुः ६ ज्ञानी तथा
पि प्रारब्धकर्माभासेन न हद्वपुः नराकारतया भाति यथाहारेऽन्तदेह
वत् ७ प्रारब्धकर्मणि क्षीणे त्यक्त्वा मायामयं वपुः चिदानंदपरे स्वा
त्मनि मैव तद्रूप एव सन् ८ तिष्ठतीति हरेरेव नात्रयोमिह हन्यते य
द्यपि ब्रह्मबोधेनाज्ञानं सर्वं निवर्तते ९ दीपेनेव तमस्तस्य तद्धि तोयि
स्वभावतः तथापि तदुपादेयं देहादि ब्रह्मवेदिनः १० निरुपादान
मेवानुवर्तते निजकर्मणा दृष्टान्तश्चैव दृष्टेनाप्युपपन्नमनागपि ११
तार्किकैरपि हेतोश्च विनाशान्मवायिनः निरुपादानकं द्रव्यं तत्क्षण
मात्रं हि तिष्ठति १२ इत्येवं स्वीकृतं तद्वदस्माकमपि संभवेत् तत्रा
पि कल्पनादिर्न यायोग्यः क्षणः किल १३ शरीरादिस्थितेरेवमिथ्या
त्वेनाप्यदोषता येषां ज्ञानलेशोऽपि स्वीकृतस्तैरपि स्फुटं १४ देहादि
स्थितिसिद्ध्यर्थं निर्वाह्यं तत्कथं चन आभासमात्रदेहादावहंकारोऽपि
नादृशः १५ न हि तेन विना तत्र देहादिस्थितिसंभवः न वा तेनाध्य
प्यहंकाराभासेनात्मविदः क्षतिः १६ तदुक्तं ज्ञानकीनां यद्वदहं
ति सहचः वसिष्ठेनापि निर्वाणप्रकरणाख्यपंचिकास्थले १७ अहं
भावं विना देहस्थितिस्तज्ज्ञानयोगिह धायेयस्य निराधारान संस्थि
पद्यते १८ अहंभावपिशाचो यमसत्तानषिज्ञानिनां न प्रविश्य मा
पवान्नः कातिनैनैन स्थितः १९ अज्ञानमपि नास्य व्यवस्थितेंऽप
नेलभ्यते विचारेणादीपवत्ताज्ञ रूपं वमसोपमा २० किलसत्याम
विद्यायामज्ञतोदेति साम्यती बुद्धिर्मोहात्मिकाप्युक्तानिर्देहेतद्वपुर्या
पि २१ एवं स्थितेऽज्ञतः सर्गः कृतोः विपाकश्चाज्ञता ब्रह्मशांतेः
नं सर्वकाहंकाराद्यः स्थितेः २२ अहंभावस्य संशांतिरेषा सौक्ष्य
तावत्र अहंभावः परित्यक्तः पिशाचश्च वशाम्यति २३ चिमाग्निरद
होविज्ञानोयथादाहोऽपि निष्फलः तथाहंभावसर्गादि ज्ञाते निष्फल
तामियात् २४ एवं तनुविदो दृष्ट्वा नात्माहंकार एव च अतो निर्मा
मकः सत्क्वचाते सर्वविवर्तते २५ इत्येवं श्रीहरेर्भावो गम्यते वेदवाक्य
२६ ५५ ॥

प्रारब्धेति प्रारब्धेनात्मत्वेनरकारावालक्षणफला भकेः फलमाह भक्तेति मांउ

त्कविधया भक्त्या ज्ञानीत्युभिनः साकल्येन जानाति साकल्यमेवा
ह यावानिति किमहमणुपरिमाणो वा देहसंमितो वा नार्किका
णमिवाकाशवत्सकलमूर्त्तद्रव्यसंयोगित्वलक्षणविभुत्वाश्रयो
वा सप्रपंचाद्वैतवादिनामिव स्वगतभेदवान्वा ऽविवेकरसो वेति पारि।
माणतत्त्वतो मानतत्पदार्थं जानाति तथा पश्यास्मीति देहैर्द्वयशा।
णमनत्सामस्मतमः कियत्कालस्थायी वा क्षणिकविज्ञानरूपो वा भूमे।
वा कर्त्ता भोक्ता वा जडो वा जडाजडरूपो वा चिद्रूपो भोक्ता वा कर्त्ता भोक्तृ
त्ववर्जितस्तानेदचनो वेत्ति तत्त्वतः सर्वसंशयराहित्येन मामजरममरम
भयमशोकं जानाति तथा चक्रतिः भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसं
शयाः क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति श्रुतस्मद्दर्शीनेस
ति सर्वसंपर्ययोक्ते द्दर्शयति एवं तेव्रतेवापि मां विहि सर्वदेवेषु
भावेतस्यकेः सर्वदेवेषुकेमां विभ्रमसाच्छिदानेदचनेन तत्त्वतो ज्ञानात्सर्वो
पायिविनिर्मुक्तयाथात्म्येन ज्ञात्वा साक्षात्क्रमनतोन्यामोक्षलाभावे
गतो भवतीत्यर्थः वृत्तवेदवत्सैव भवतीतिष्कतेः यद्यानतरतिकारण
व्यत्वभावापत्तिः सर्वात्मरूपाश्रयनमत्का यएवं वेदाहं ब्रह्मास्मीतिस
रेदं सर्वं भवति सएतमेवपुरुषं ब्रह्मततमपश्यदित्यादिश्रुतिभ्यो
मत्कान्तेसावीत्याचगमात् ततसंततेतेमप्रकल्पकारकांदस्यो
क्रियांयोत्वमोदहष्वारनिष्कृतिभाष्यं एवंततेरकारणभावापतेर
नपदमेवतत्स्वरूपनकृष्णाभिधेयंतदितिवाप्तस्यमहतोभूतसत्ता
मभवतीतिष्कतेः एवं ब्रह्मविशतेदर्पणपायेऽप्रति बिंबो बिंबमिव
प्रविशति कार्योपाधीनोजीवाचाकारणोपाधीश्वरत्वमित्यदोषैवनि
कलंब्रह्मप्राप्तिरित्यावेदितेश्वपागेव यद्यामात्ताज्ञात्वानाहि शान्तरमेताव
नैवज्ञान प्रवेशयोः पौर्वापर्यमिति तदनंतरमितिपदेनमक्कुवेदनव
ह्मिसदेहपरामृश्यतसानानेतरमिति व्याख्येयं यतोज्ञानेपितत्त्वज्ञा
नेयावदेहपातंप्रारब्धकर्मणाम्रतिवंधाद्विदेहकैवल्यनप्राप्यामेवप्रम
गज्ञानसमकालमेवदेहपातापत्तिः स्यात् विदेहकस्य विसव्यते भूया
ष्वात्तेविश्वमायानिवृत्तिरितिष्कतेः किंनिहतायाश्च मायायाःपुन
नर्नि वृत्तिर्बृंदजीवनात्किंप्रारब्धवाधितेस्यात् यथानार्किंकाणांन
ह्वोपसमवायिकारणोपहादिकेदाणमात्रमवतिष्ठते एवमस्मा(क)।

श्री
गी टी
श्र॰

२४२

मपि प्रत्नादिकालायाः देहाद्युपादानभूताया अविद्याया विनाशेऽपि
किंचित्कालं देहादिप्रतिभानं तु उपपद्यते ईदृशमेव जीवन्मुक्तमपेक्ष्य
भगवतोक्तं उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इति स्थितप्र
ज्ञलक्षणं स्मृतिष्वपि तल्लक्षणोक्तिर्विधिस्यैव प्रवहते इति दिक् ५५

आनंदीटीका ११

भक्तिफलमाह योऽहं परमात्मरूपः सर्वज्ञः सर्वकर्ता सर्वेश्वरः
अशरीरः सशरीरो वास्मि तमीदृशं मां भक्त्या योगसिद्धया पर
मात्मज्ञानलक्षणया हि पुरुषः मामीश्वरं परमात्मानमभिजा
नाति ततोनंतरं तदनंतरकालं मां तत्त्वतः परमार्थतो ज्ञात्वा विशते
कैवल्यमाप्नोति ५५ ॥

✕ साक्षात्करोति प्रकृति
पुरुषकालेश्वरसं
ख्यानेन चानुरात्म्यप्र
तिपत्त्या वासुदेवः सर्वमि
ति प्रत्यभिजानाति ॥✕

रामकंठीटीका १४

एवंविधया निरंतरया ज्ञानरूपया भक्त्या मां परमात्मानमेकं तत्त्व
त्वमभिजानाति आत्मत्वेनाभिमुख्येन वेत्ति कस्माज्जानाति यो याव
नः परमार्थतो ह्यचित्प्रकाशात्मैकोऽहमनंतरूपः यश्चास्मि यो या
वामितोपरासंज्ञाभजनस्ताहक्स्वभावप्रत्यवमर्शरूपया स्वशक्त्या
नित्यमवियुक्तस्तिष्ठामि अतत्त्वविदो हि नैवंविधमात्मत्वेन मां त
त्त्वमभिजानंते किं तु नेत्यतिरिक्तं परं वेद्यं च मायावशाद्विपर्ययेण
न त्वा जानंति यथोक्तभक्तियुक्तस्त्वेवंविधं मां सत्येन रूपेण ज्ञात्वा
तेषामप्यभिज्ञाय ततः परं मध्येव विशते हमेव संपद्यते एवंविधी
हि मद्युपासोपासकोपासाविकल्पहानाद्ब्रह्मैव परं भूत्वा सिद्धो
भवतीत्यर्थः एषा च परा सिद्धिः काष्ठाक्रमप्राप्या ततस्त्वेवंविधो योगी
ज्ञानी निष्ठोऽपि योनियतशरीरसंबंधस्तावदतिक्रांतो भवति
तस्य प्रवृत्तिं प्रतिपादयितुमाह ५५ ॥

लासिकी टीका

यतः यावान्सर्वव्यापी अनंत इत्यर्थः यश्च सच्चिदानंदघनस्तत्त्वतः
परमार्थतोऽस्मि तादृशमेव मामीश्वरं भक्त्या सर्वात्मकत्वलक्ष
णेनोपासनेनाभिजानात्यात्मत्वेन प्रत्यभिजानाति ततः प्रत्य
भिज्ञानानंतरं मामीश्वरं तत्त्वतः सम्यग्ज्ञेः एवं शेषतयाज्ञात्वा
निपद्य जीवन्नेव मुक्तिमनुभूय तदनंतरं सम्यग्ज्ञेः एवंशे

तयाप्रतिपन्नं तत्त्वं मामीश्वरमभेदेन समाविशते अहमेवस
र्वात्मक ईश्वरः संपद्यते इत्यर्थः ५५ [illegible]
[illegible] ५५

पंचोलीटीका

ततश्च भक्त्येति ततो ज्ञानलक्षणया भक्त्याहं यावद्रूपाधिकृतनविस्ता
रभेदः यश्चाहं विधस्तस्य सर्वोपाधिभेदः उत्तमः पुरुषः आकाशकल्पः
तेनांशाद्वैतत्वेन न्यमाद्वैकरसं अजमभयमप्रतिबंधनं तत्वतोऽभिज्ञा
नाति तदनंतरं मां तत्त्वतो ज्ञात्वा मामेव विशते ५५

श्रीगीरसमिद्धोधिनी

तयाच भक्त्या मां परमेश्वरमभिजानाति कथंभूतं यावान् यद्विभूतिका
स्त्यर्थः तत्त्वतः परमार्थतो यश्चाहं सर्वात्मकोऽस्मि ततश्च मां तत्त्व
तः परमेश्वरस्यैवेयं विभूतिर्यदिदमुपलभ्यते सएव चास्य सर्ग
स्थितिप्रलयेषु स्वतंत्रः कर्ता निमित्तमात्रं स्वमादृशा स्तत्प्रेरितोवश
इत्येवं विज्ञाय तदनंतरं तद्वित्यनभिसंधाय फलं यज्ञतपःक्रियाः
दानक्रियाश्च विविधाः क्रियते मोक्षकांक्षिभिरिति प्रागुक्तदिशा तदि
ति परमेश्वरनाम्नो ब्रह्मणः तदनंतरं विधीयमानं यथावर्त्तोदितं यज्ञादिक
मांविशतेनुतिष्ठति ५५

मधुभाष्य

५५॥

243

भाषा अनुवाद टीका

तिसके अनंतर वही उत्तम भक्तिके द्वारा हमको यथार्थरू
पसे जानताहै और मै कैसाहूं इस अपेक्षापर कहते हैकि
जिसरूपहम सर्वव्यापी औरसचिदानंदस्वरूपहै जैसा हम
कोजानतेहै औरतिसके अनन्तर हम को ऐसे यथार्थरूप
से जानिके फेर उसज्ञान के उपर कहे शान्त होने वर हमा
रे ही मे प्रवेश करते अर्थात् परमानंदस्वरूप होते है ५४

दोहा

तत्वसें मो
मोकों जानहि भक्तिसें यावत हों तत्व जोहि
हि ज्ञानके प्रविशोहि फिर मोहि ५५॥

244

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययं ५६

शांकरभाष्य टीका १

स्वकर्मणा भगवतोऽभ्यर्चनभक्तियोगस्य सिद्धिप्राप्तिः फलं ज्ञा
ननिष्ठायोग्यता यन्निमित्ता ज्ञाननिष्ठा मोक्षफलावसाना स भगव
द्भक्तियोगोऽधुना स्तूयते शास्त्रार्थोपसंहारप्रकरणे शास्त्रार्थनि
श्चयदार्ढ्याय सर्वकर्माण्यपि प्रतिषिद्धान्यपि सदा कुर्वाणोऽनुतिष्ठ
न् मद्व्यपाश्रयोऽहं वासुदेव ईश्वरो व्यपाश्रयो यस्य स मद्व्यपाश्रयो मय्य
र्पितसर्वात्मभाव इत्यर्थः सोपि मत्प्रसादात् मम ईश्वरस्य प्रसादा
दवाप्नोति शाश्वतं नित्यं वैष्णवं पदमव्ययं ५६ ॥

आनंदगिरिकृतटीका २

तर्हि ज्ञाननिष्ठयैव मोक्षसंभवात् कर्मानुष्ठानसिद्धिरित्याशंक्या
ह स्वकर्मणेति तामेव सिद्धिप्राप्तिं विशिनष्टि ज्ञानेति ज्ञान
निष्ठायोग्यतायै स्वकर्मानुष्ठानं भगवदर्चनरूपं कर्तव्यमित्यर्थः
ज्ञाननिष्ठायोग्यतापि किमर्थेत्याशंक्य ज्ञाननिष्ठासिद्ध्यर्थेत्याह य
न्निमित्तेति ज्ञाननिष्ठापि कुत्रोपयुक्तेत्यत्राह मोक्षेति स्वकर्मणा
भगवदर्चनात्मनो भक्तियोगस्य परम्परया मोक्षफलस्य कार्यत्वे
न विधेयत्वे विध्यपेक्षितां स्तुतिमवतारयति सभगवदिति ज्ञा
ननिष्ठा कर्मनिष्ठेत्युभयं प्रतिज्ञाय तत्र तत्र विभागेन प्रतिपा।
दिते किमितीदानीं कर्मनिष्ठा पुनः स्तूयते कर्तव्यतयोच्यते त
त्राह शास्त्रार्थेति नच तत्रोक्तस्यैव कर्मानुष्ठानस्य प्रकरणवशा
दिहोपसंहारः सर्वशास्त्रार्थनिश्चयस्य दृढतां द्योतयतीत्यर्थः
यद्यपि कस्यचित् कर्मानुष्ठायिनो बुद्धिशुद्धिद्वारा कैवल्यसिध्य
ति तथापि पापबाहुल्यात् कर्मानुष्ठायिनोपि कस्यचिद्बुद्धिशुद्ध्यभा
वे कैवल्यासिद्धिरित्यत्राह सर्वकर्माणीति सर्वेषामनुगीयादीश्वर
पारायणस्तुतिपरत्वेन श्लोकं व्याचष्टे प्रतिषिद्धान्यपीति निष्यैतेमिति
कं वेदितव्योर्थः निषिद्धाचरणस्य प्रामाणिकत्वं व्यावर्तयति सर्वे

श्री॰ गी॰ टी॰

ति अनतिशयैश्वर्यं पदमाप्नोतीति सम्बन्धः पापकर्मकारिणो म
यथोक्तपदप्राप्तौ पापस्यापि मोक्षफलत्वमापन्नमित्याशङ्क्याह म
दपाश्रय इति तस्यैव तात्पर्यमाह मयीति तर्हि ज्ञानस्य मोक्षहे
तुत्वमपैतीत्याशङ्क्याह सोपीति ५६ ॥

245

+स्वकर्मभिः श्रीपरमेश्वराराधनात्युक्तं मोक्षप्र कारमुपसंहरति सर्वकर्माणीति +

स्वामिकृत टीका ३

सर्वकर्माणि नित्यानि नैमित्तिकानि स्वर्वोक्तानि च कर्माणि काम्यानि
क्रमेण मद्व्यपाश्रयः सन्कुर्वाणः अहमेव व्यपाश्रय आश्रयणीयः
न तु स्वर्गादिफलं यस्य सः मत्प्रसादात्शाश्वतमनादि अव्ययं नित्यं स
र्वोत्कृष्टं वैष्णवं पदमाप्नोति ५६ ॥

पिशाचभाष्य टीका ४

सर्वकर्माणि सर्वाणि कर्माणि प्रतिषिद्धान्यपि सदा कुर्वाणो मदा
त्माव्यपाश्रयो यस्य स मद्व्यपाश्रयः ईश्वरमेवाहं शरणं प्रपन्नः
स एव मम योगस्तेन निर्वाहकस्याभिनिवेशवानित्यर्थः मत्प्रसा
दवाप्नोति शाश्वतं पदमनादिव्ययमनन्तं विष्णोः प्राप्नोतीत्यर्थः ५६

+एवं वर्णाश्रमोचितनित्य नैमित्तिककर्माणां परित्यक्तफलादिकानां परमपुरुषाराध नरूपेणानुष्ठितानां विपाक उक्तः इदानीं काम्यानामपि कर्मणामुक्तेनैव प्रकारेण अनुष्ठीयमानानां स एव विपाक इत्याह ॥

रामानुजभाष्य टीका ५

+सर्वेति नैकेवलं नित्यनैमित्तिकानि कर्माण्यपि तु काम्यान्यपि स
र्वाणि मय्येवार्पितसमस्तकर्तृत्वादिकः कुर्वाणः मत्प्रसादान्माध्व
परमव्ययं अविकलं प्राप्नोति पद्यते इति पदं मां प्राप्नोतीत्यर्थः यस्मा
देवं तस्मात् ५६ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ५६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपादी टीका ७

अथ बुद्ध्या विशुद्धयेत्यादिना उक्तमोक्षप्रकारस्याति प्रयासस्साध्यत्वा
दुत्तमं प्रकारमाह सर्वकर्मेति सदा निरन्तरं मद्व्यपाश्रयः अह
मेवाश्रयः आश्रयणीयो न तु स्वर्गादिफलं यस्य सः सर्वकर्माणि नि
त्यनैमित्तिकादीनि कुर्वाणोपि मत्प्रसादात्तत्सर्वोत्कृष्टं च पदं
नाप्नोति श्रुतिरपि सकलसंहिताया अहमेव स्वयमिदं वदा
मि जुष्टं देवेभिरुत मानुषेभिः यं कामये तं तमुग्रं कृणोमि
मित्यत्र नामानन्दवितत्वमेव यामिति भाष्य अहमेव स्वयमि

ब्रह्मलोकेऽपि वसत्वं वदामि इदं ब्रह्मस्वयमेवास्मीति वदामीत्यर्थः देवे
भ्य इदं वैरिंचादिभिर्जुष्टं सेवितं उत मानुषेभिर्मनुष्यैः सेवितं य
मिदं वैरिंचादिभिर्जु ष्टं सेवितं उतापि मानुषेभिर्मनुष्यैः सेवितं य
थैतदेवं प्रकटयन्नाह ईदृशस्त्वात्मिकाहं यं यं कामये तं तमुग्रं
तं ब्रह्माणं तमृषिं तं सुमेधां चेत्यर्थः कामये यं पुरुषं रक्षितुमहं वांछामि तं तमेव ब्र
ह्मप्रेष्ठं करोमि सर्वेभ्योऽप्यधिकं तदहं करोमि रुद्रपदं वा प्रापयामि तमेव ब्र
ह्माणं स्रष्टारं करोमि तमेव ऋषिं मंत्रद्रष्टारं करोमि
मेधायोग्यं सुमेधसं तत्त्वज्ञानिनं करोमि ५६ ॥

वनमाली टीका ८

ननु शुद्धांतःकरणेन तत्क्रियादिना किं कर्माण्यनुष्ठेयानि किं वा सर्व
कर्मसंन्यासः कर्तव्यः नाद्यः शुद्धांतःकरणस्य कर्मानधिकारात् योगा
रूढस्य तस्यैव शमः कारणमुच्यते इत्यादिना योगारूढस्य कर्मनिषेधा
च्च न द्वितीयः स्वधर्मे निधनं श्रेयः परधर्मो भयावह इत्यादिना स्वाश्रम
धर्मस्य सर्वकर्मसंन्यासस्य च क्रियादिकं प्रतिनिषेधात् न च कर्मानुष्ठा
नकर्मत्यागयोरन्यतरमेतरेण तृतीयः प्रकारोऽस्ति तस्मादुभयोरपि
प्रतिषिद्धत्वेन तत्राभावेन वा वस्तुपकर्तव्यो प्रतिषेधानिक्रमे कर्मण्या
गाद्यवश्यं प्रोवं यद्धेतुपरित्यागेन मोक्षसाधनपोषकत्वादनंतकर्मणा
पेयानि विनि विहितपदेन तेन मोक्षसाधनत्वानुप्रतिवेधकत्वादित्यपि
मायमर्जनस्यालक्ष्याह सर्वेति यः पूर्वोक्तैः कर्मविशुद्धांतःकरणः सोव
भगवदेकशरणतापर्यंतत्वादंतःकरणशुद्धेः एतादृशश्चेद्ब्राह्मणः
सर्वकर्माणि संन्यस्य तन्नाम संसारविमोक्ष
संन्यासप्रतिबंधरहितः सर्वकर्माणि संन्यस्य एतादृशश्चेत्तत्क्रियादिः सं
तस्य भगवदेकशरणस्य भगवत्प्रसादादेव एतादृशश्चेत्तत्क्रियादिः सं
न्यासानधिकारी स करोतु नाम कर्माणि किं तद्व्यपाश्रयः मुह्वेवास्तदेवः
सर्वं परोक्षपाश्रयः शरणं यस्य मदेकशरणो मय्यर्पितसर्वात्मभावः
संन्यासानधिकारात्सर्वाण्यपि स्वधर्मरूपाणि लौकिकानि च सदा कर्वा
णो मत्प्रसादात्मम सर्वेश्वरस्यानुग्रहादवाप्नोति शाश्वतं नित्यं वैष्णवं
पदं मत्परिणामि मदेकशरणो निषिद्धकर्माणि न करोत्येव यादृक्कर्मणा
वैष्णवपदमवाप्नोति ज्ञानेनैव मोक्षभागेव न तत्र प्रत्यवे
यापि मत्प्रसादाप्रत्यवायाप्राप्तिरित्याह ज्ञानेनैव मोक्षभागेव न तत्प्रत्यवे
मीति भावः ५६ ॥

उत्तमवैजयंती सर्वः ९

एवं यदियोगमन्याय सवर्णाश्रमोचितानि मदाराधनलक्षणानि कर्माणि
कर्मणो तिनं हि सत्मत्प्रसादान्मत्पदमेव प्राप्नोतीत्याह सर्व कर्माणीति

श्री
गी टी
म

246

मद्व्यपाश्रयो मदनन्यः पुरुषः सर्वकर्माणि स्ववर्णाश्रमयोग्यानि नित्यनै
मित्तिकानि महायज्ञादीनि सर्वशास्त्रकाम्यानि विहितानामपि प्रामेनत्रपि
शास्त्रेनतानि निराकम्यनिन्यान्मीयेव संगरहिते सदा सर्वस्मिन्काले देशे
वस्थायां वा कुर्वाणः सन्मत्प्रसादान्मदनुग्रहात् शाश्वते नित्यमव्ययमप
रिणाममूत्यं पदं लोके वैकुंठाख्यं यहा पद्यते गम्यते इति व्युत्पत्त्या पदं
प्राप्यरूपं मामवाप्नोतीति ५६ ॥

मधुसूदनी टीका ९

यः पूर्वोक्तैः कर्मभिः शुद्धान्तःकरणः सोऽवश्यं भगवदेकशरणः भगव
देकशरणतापर्यन्तत्वात् श्रेतःकरणशुद्धेः एतादृशश्चेद्ब्राह्मणः सोव
श्यं भगवदेकशरणः भगवदेकशरणतापर्यन्तत्वात् श्रेतःकरणशुद्धेः
एतादृशश्चेद्ब्राह्मणः संन्यासपूर्वविधिपरिहितः सर्वकर्माणि संन्यस्तवा
मसंसारविमोक्षस्तु तस्य भगवदेकशरणस्य भगवत्प्रसादादेव एतादृश
श्चेन्नक्षत्रियादिः संन्यासानधिकारी सकरोतु नाम कर्माणि किन्तु मद्व्य
पाश्रयः अहं भगवान्वासुदेव एव व्यपाश्रयः शरणं यस्य सः मदेकश
रणो मय्यर्पितसर्वात्मभावः संन्यासानधिकारात् सर्वकर्माणि सर्वा
णि कर्माणि वर्णाश्रमधर्मरूपाणि लौकिकानि प्रतिषिद्धानि वा सद
कुर्वाणो मत्प्रसादान्ममेश्वरस्यानुग्रहात् अवाप्नोति हिरण्यगर्भव
न्महित्वानोऽसन्यापाश्चतं नित्यं पदं वैष्णवमव्ययमपरिणामि एता
दृशो भगवदेकशरणः करोत्वेव नत्प्रतिषिद्धकर्माणि यदि कुर्यात्तथापि
मत्प्रसादात्प्रत्यवायानुत्पत्त्या महित्वानेन मोक्षभाग्भवतीति भगवदे
कशरणतात्पर्यं सर्वकर्माणि सदा कुर्वाणोपीत्यनूद्यते [illegible]
[illegible]
[illegible] ५६ ॥

सदानंदी टीका ११

अन्तोधीशुद्धिपर्यन्तं सहजं कर्म न त्यजेत् शुद्धान्तःकरणो यस्तु नैष्क
र्म्यसोधिगच्छति संन्यासेनेति पूर्वोक्तसंन्यासो ब्राह्मणेनैव कर्तव्यो ना
न्यवर्णिनेत्युक्तं भगवता पुरा २ कर्मणा वर्हि संसिद्धिमास्थिता जनका
दयः चित्तशुद्धिमतस्तत्र किं कर्मकरणं वदे ३ [illegible] संन्यासर
हिताह जगन्नाथः पूर्वोक्तैः कर्मभिर्यस्तु शुद्धान्तःकरणः पुमान् ४
सोऽवश्यं भगवत्पादैकशरणो भवेत् श्रीमद्भगवतः पादसरोजे भ
क्तिकृतमा ५ चित्तशुद्धेः फलं श्रेष्ठं नतो ज्ञानादिसत्कृता इत्योक्ताल

श्रेत्स्मात्परवैराग्यसंभृतः ६ ससर्वकर्मसंन्यस्य भगवच्छरणव
जेत् तस्य संसारतो मोक्षः स्याद्भगवत्प्रसादतः ७ ईश्वरः स्वाविद्यादि
श्रेत्संन्यासे पि कृतो नरः स्वधर्मनिधने श्रेयः परधर्मो भयावहः ८
इति शास्त्रप्रामाण्यमेस्य संन्यासस्य च कर्मणां त्वविद्यादिप्रतिष्ठीमहि स्व
नैव निषेधतः ९ संन्यासानधिकारात्सर्वाणः स्तस्तदेव च सर्व
कर्माणि वर्णादिधर्मरूपाणि मत्परः १० भगवान्वासुदेवो हि केवल
एव व्यपाश्रयः शरणं यस्य नित्यसमेदेकशरणो महान् ११ मद्व्यपाश्रयः
नत्सर्वात्मभावो सौमदनुग्रहात् हिरण्यगर्भवत्समवाप्नोति ज्ञानजं नेत्र
नः १२ नित्यकूटस्थं सज्ज्योतिः पदं प्राप्नोति वैसर्वं १३ ॥ ५६ ॥

नीलकंठी टीका १२

तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूये
न्त इति श्रुतेः सर्वकर्मणां ज्ञानेन प्रायश्चित्तेनेव समूलविनाशश्रवणात् ज्ञानो
त्तरकालीनानां कर्मणां नाशाभावात् ज्ञानोत्तरमपि देहधारणे स्वाभा
विकानां कर्मणां वर्जनस्यासंभवाद्वचनप्रवृत्त्या नित्यमपि वधः स्यादित्या
शंक्याह सर्वकर्माणीति मद्व्यपाश्रयो हमेव प्रज्ञाने वयमः सत्यमात्मा
य एवं व्यपाश्रयो यस्य स मद्व्यपाश्रयो ज्ञानी सर्वकर्माणि विहितानि
निषिद्धानि वा सदा सकृत्कुर्वाणोपि मत्प्रसादात् मदनुग्रहात् शा
श्वतं नित्यमव्ययं परमं सर्वोत्कृष्टं पदं तौर्यं मोक्षमवाप्नोति तदुक्तं नैनं
कृताकृते तपत एतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमिति
रमपि क्रियमाणैः कर्मभिर्बध्यते तस्य ह न देवाश्च नाभूत्या ईशते
धुकृत्यादिभिः पापकृत्यामिति न ह वा एवंविदि किंचन रजः
स्यतेति विदित्वा न लिप्यते कर्मणा पापकेनेत्यादिश्रुतिभ्यश्च ज्ञा
निनः कर्मलेपश्रवणात् ॥ ५६ ॥

आनंदी टीका १३

तदेवं संयमयोगोद्दलितस्य सर्वसाधारणं त्वकर्मयोगस्य ज्ञाननेन स
म्यक् स्थितस्य सर्वतः परीत्यक्त्वा श्रेयः साधनत्वेनाप्रयुक्तमनि प्र
ज्ञानेनकर्मयोगमेव स्थितं नयति मद्व्यपाश्रयः ब्रह्मार्पणम
कारेणाहमेकव्यपाश्रयः तत्तत्कर्मफलप्रापणाधारेय
स्य ५६ ॥

रामकंठी टीका १८

सर्वाणियज्ञदानादीनिसदानित्यंकुर्वन्ननुतिष्ठन्नपिमद्व्यपा
श्रयः अहंसर्वकर्तृत्वेनप्रतिपन्नआश्रयोवलम्बनंयस्यतथा
भूतःसन्मत्प्रसादान्ममपरमात्मनःस्वाभाविकप्रसादादा
नुकूल्यान्मनभिप्रेतयतामापन्नात्मनोहेतोः शाश्वतंनित्य
मतएवाव्ययमक्षयंपदंपरंब्रह्मस्वरूपंस्थानंप्राप्नोत्यधिग
च्छति यस्मात्प्रत्यग्वैवस्वरूपेणात्मानमधिगच्छन्नियतदेहसं
बंधलक्षणंबंधात्यंतविनाशरूपांपरांसिद्धिंप्राप्नोतीत्यर्थः
एवंयथोक्तमुपदेशसर्वस्वंसम्यगवधार्यतंमय्येवंसमावे
त्यर्जुनायोपदेष्टुमाह ५६ ॥

लासिकी टीका

+एवमात्मबोधयुक्तस्यनिष्ठारोपायमुक्त्वा बोधरहितस्यापितमाह ॥

+मद्व्यपाश्रयेमामीश्वरमुक्तप्रकारेणपरमेणप्रेम्णाश्रितवान्
सर्वाणिविहितानिनित्यनैमित्तिककाम्यरूपाण्यप्रतिषिद्धा
निस्वाभाविकानिचकर्माणिकुर्वन्नपिममेश्वरस्यप्रसादाद
नुग्रहाच्छाश्वतंनित्यमव्ययमविनाशिपदंमोक्षाख्यंधाम
ज्ञानप्राप्तिद्वाराप्राप्नोति

पंवोलेटीका

सर्वकर्मभिःपरमेश्वराराधनोक्तंमोक्षप्रकारमनुपसंहरति।
ति सर्वकर्माणि सर्वकर्माण्यपिप्रतिषिद्धान्यपिसदाकुर्वाणः
अनुतिष्ठन्मद्व्यपाश्रयोमय्यर्पितसर्वात्मस्वभावःसोपिमत्प्रसा
दात्शाश्वतंवैष्णवंपदंप्राप्नोति ५७

रणवीरसमिद्धोधिनी

ततश्चमद्व्यपाश्रयः अहमेवव्यपाश्रयआश्रयणीयोवलंबनंयस्य
सतादृशः सर्वाण्यपिहिंसाप्रायाणितदितराणिचकर्माणिस्ववर्णाश्र
मोचितानिसदानुतिष्ठन्नपिमदनुग्रहाच्छाश्वतंनित्यमतएवाव्यय
मक्षयंपदंवैष्णवंपदमाप्नोति ५८ ॥

मधुभाष्य

सर्वकर्माणीत्यादिना परोक्तवचनं तद्द्वेषेणं प्रतिभी
मवचनवत् यस्त्यागः फलत्यागः कथमन्यथा
युद्धविधि यस्तु कर्मफलत्यागी स त्यागीत्यभिधी
यते इति चोक्तम् पूर्णादोषमहाविसोगीतामा।
श्रित्य लेशतः निरूपणं कृतं तेन प्रीयतां मे सदावि
भुः ५८॥

भाषा अनुवाद टीका

अपनेअधिकार अनुसार कर्मों के क्रमसे भगवनकी आराधना
हेतु से कहा जो भक्ति कामकारसोकहतेहै कि निम औ नैमिति
क सर्वकहेहुये सर्व कर्मका निरन्तर अनुष्ठानकारी और मन्द्य
पाश्रय करे जिस कैसेही आश्रयणीय हो और स्वर्ग आदि फल
आंयणीय नहीं है ऐसा उरुष मेरी अनुग्रह से सासत अर्थात्
अनादि औ अव्यय करे निम जो सर्व श्रेष्ठ ब्रह्मपद तिसको प्राप्त
होनेहै ५६ ॥

दोहा

सर्वकर्म निम कर्त भी मोरे आश्रयहोय मोरेहुपासें प्रा
पहि नित्य अव्यय पदहुकोय ५६॥

248

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ५७

शांकरभाष्य टीका १

यस्मादेवं तस्मात् चेतसा विवेकबुद्ध्या सर्वकर्माणि दृष्टादृष्टार्थानि
मयीश्वरे संन्यस्य यत् करोषि यदश्नासीत्युक्तन्यायेन मत्परोहं वा
सुदेवः परो यस्य तव स त्वं मत्परः सन् मय्यर्पितसर्वात्मभावः बु
द्धियोगमपि समाहितबुद्धित्वं बुद्धियोगस्तं बुद्धियोगमुपाश्रित्य उपा
श्रयोनन्यशरणत्वं मच्चित्तः मय्येव चित्तं यस्य स मच्चित्तः सततं
सर्वदा भव ५७ ॥

आनंदगिरिकृत टीका २

प्रसादोऽनुग्रहः सम्यक् ज्ञानोदयः पदे पदनीये उपनिषन्मात्रपर्य
गम्यमव्ययमपक्षयरहितं परमेश्वरप्रसादस्यैव माहात्म्यं यतः सि
द्धं तस्मात्तत्प्रसादार्थं भवता प्रयतितव्यमित्याह यस्मादिति भग
वत्प्रसादात्प्रसादादिति सम्यक्ज्ञानादेव मुक्तिर्न कर्ममात्रादिति ज्ञानेवि
वेकबुद्धिं आश्रयशब्दार्थमाह सततेति किमतो भवति तदाह मच्चित्त
इति ५७ ॥

स्वामिकृत टीका ३

यस्मादेवं तस्माच्चेतसेति सर्वाणि कर्माणि चेतसा मयि संन्यस्य मत्परः
अहमेव परः प्राप्यः पुरुषार्थो यस्य स मत्परः व्यवसायात्मिकया बुद्ध्या
योगमुपाश्रित्य सततं कर्मानुष्ठानकालेपि ब्रह्मार्पणं ब्रह्म हविरित्यादि
न्यायेन मय्येव चित्तं यस्य तथाभूतो भव [illegible]

पिशाचभाष्य टीका ४

सर्वलोकाध्यक्षस्य सकलकर्मफलभोक्ता वासुदेवो मे शरणमित्यनेन
सर्वकर्माणि ममेश्वरस्याराधनमिति मयि संन्यस्य समर्प्य मत्परः अहं
वासुदेवः प्रधानं यस्यासौ मत्परः बुद्धियोगमुपाश्रित्य उक्तया बुद्ध्या
योगमाश्रित्य [illegible] प्राप्य मयीश्वरे चित्तं यस्य स।
मच्चित्तः सततं सर्वकालं भव जायस्व ५७ ॥

रामानुजभाष्य टीका ५

चेतसेति चेतसात्मनामदायतेनानन्तस्यबुध्यातत्कर्माणिमयि
सर्वाणिसंन्यस्यध्यात्मचेतसेति सर्वकर्माणिसकर्तृकानिसाराध्या
निमयिसंन्यस्यमत्परः अहमेवफलतयाप्राप्यस्यत्वसेदधातःकर्मा
णिकुर्वन्मामेवबुद्धियोगमपाश्रित्यसततंमयिभक्तचित्तोभव ५७ ॥

अभिनवगुप्तकृता टीका ६

स्पष्टार्थम् ५७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाती टीका ७ ॥

यस्मादेवंतस्मात्त्वमपितथाभवेत्यर्थः चेतसेति चेतसासहसर्वकर्माणि
मयिसंन्यस्यमत्परोमत्परः अहमेवपरःपरमोयस्यतथाविधःसततं
भवतत्त्वंचव्यवसायात्मिकबुद्धियोगमुपाश्रित्यमच्चित्तमदाकारंचित्तंय
स्यतथाविधोभवेत्यनेनविशानेनतदनन्तरमिमेवपर्यायेणोक्तमित्यर्थः ५७ ॥

वनमाली टीका ८

यस्मान्मदेकशरणानां मामेवोत्तहेतुनैकर्म्यलब्ध्वा नैकर्म्यसंन्यासो वा
तस्मात्त्वमपिमदेकशरणोभवेत्याशयेनाहचेतसेतिचेतसाविवेकवत्या
यासर्वाणिदृष्टादृष्टार्थानिवासर्वकर्माणिमय्यीश्वरेसंन्यस्यन्कर्तृत्वाह
रीत्यासमर्प्यमत्परः अहंवासुदेवःपरमप्रियःसर्वोत्तमःप्राप्योयस्यसः
मत्परःसर्वोत्तमत्वंबुद्धियोगंप्रागुक्तलाभालाभसमत्वरूपबुद्धियोगंचो
पाश्रित्य अनन्यशरणतयास्वीकृत्यमच्चित्तः मय्येवसर्वेश्वरेचित्तंयस्यसः
पुत्रदारादिनश्चिन्तेयाचसततंतैलधारावदविच्छिन्नप्रवाहतयामच्चित्तः
सततंभवेत्यर्थः ५७ ॥

ऊसमवैजयंती टीका ९

यस्मादेवंतस्मात्त्वमपीदृशोभवेत्याह चेतसेति चेतसाहंप्रकृष्टेनसा
धीनत्वकारितमेवेदंसर्वंकरोमिनतुस्वाधीनेनेत्येवंरूपमदधीनत्व
निश्चयात्मकेनमदनन्येनमदीयत्वेचानुसंधायस्वकर्तृत्वाभिमानादि
रहितेनचित्तेनसर्वकर्माणिसर्वाणिस्वोचितानिनित्यनैमित्तिकयज्ञ
प्रदानादीनिकर्माणिमयिपरमपुरुषेस्वस्वामिनिसमर्प्यापिवामत्समु
त्सनमदेकप्रयोजनार्थःसन्बुद्धियोगंउदेशनिश्चयात्मकायायोगःसंयो
गोयस्यतंमामेवपाश्रित्याश्रित्यसततंतेकर्मानुष्ठानसमयेपिमच्चित्तोम
यिचित्तयस्यसर्वदेशकालभवेत्यपिसर्वाणिकर्माणिसंन्यस्यसाध्यात्मचेतसा

+ यस्मान्मदेकशरणतामात्रं मोक्षसाधनं न कर्मानुष्ठानं वा कर्मसंन्यासो वा तस्मात्त्वं यत्नम्

यत्करोषीत्यादिनार्पयेति चोक्तत्वात् ५७ ॥

मधुसूदनी टीका ९

+ चेतसा विवेकबुद्ध्या सर्वकर्माणि दृष्टादृष्टार्थानि मयीश्वरे संन्यस्य क
रोषि यदश्नासीत्युक्तन्यायेन समर्प्य मत्परः अहं भगवान्वासुदेव एव परः
प्रियतमो यस्य स मत्परः सन् बुद्धियोगं पूर्वोक्तं समत्वबुद्धिलक्षणं यो
गं वथहेतोरपि कर्मणो मोक्षहेतुत्वसंपादकमुपाश्रित्य सततं मच्छर
णतया स्वीकृत्य मच्चित्तः मयि भगवति वासुदेव एव चित्तं यस्य स तथा राज ५७
निकामित्यादौ वा स मच्चित्तः सततं भव

सदानंदी टीका ११

यस्मान्मदेकशरणभावो मोक्षसाधनं न कर्मकरणं नापि कर्मसं
न्यास एव वा १ तस्माद्विवेकबुद्ध्या त्वं दृष्टादृष्टार्थकान्यपि सर्वक
र्माणि मय्येव वासुदेवे समर्प्य च यत्करोषि यदश्नासीत्युक्तन्यायेन म
त्परः भगवान्वासुदेवो हि यस्य प्रियतमः परः २ समत्वपरस्त्वपू
र्वोक्तं समत्वबुद्धिलक्षणं योगं ह्युपाश्रित्य तथा स्वीकृत्य सर्व
दा ४ वासुदेवे भगवति यस्य चित्तं मयीश्वरे नान्यत्र राजनिष्ठा।
दीसमच्चित्तः सदा भव ५ हेतेवक्रमनाविलंबस्य पदं हासप्रकाशो
ज्वलकारुण्यादिगुणगणविशेषमशरणशरण्यान्वितेच्छायया प्रज्ञाना
कंजनापत्रमशमने सन्तानकेरणितं ब्रह्मानंदप्रवर्षिणोन्मत्तमहेके
स्मारवामेचेत्प्रये ६ ॥ ५७ ॥

नीलकंठी टीका १२

एवं वर्णाश्रमादिधर्मपुरस्कारेण मत्साधना सफला च बलविधा निरू
पिता अथास्याः प्राप्तये पुनः साधनत्वेन भक्तिमेव विधत्ते चेतसेति चे
तसा विवेकबुद्ध्या सर्वाणि कर्माणि नित्यनैमित्तिकानि मयि भगवति
वासुदेवे संन्यस्य यत्करोषि यदश्नासीत्युक्तरीत्या समर्प्य मत्परः अह
मेव परः प्राप्यो यस्य स तत्र मत्प्रार्थी दीनस्वार्थयमानः बुद्धियोगं
हर्षादिकं सिद्ध्यसिद्ध्योः समत्वलक्षणं व्यवहेतोरपि कर्मणो मोक्षहेतुत्व
संपादकमुपाश्रित्य मच्चित्तः मदेकशरणः सततं सर्वदा भव ५७

श्री॰ गी॰ टी॰ अ॰

250

आनंदीटीका १३

तदेवं सर्वानुग्रहसाधारणेन गीतार्थोपदेशः सर्वस्वमद्देश
लक्षणपरीक्षाभिरवधार्य स्थिरीकृतम् इतः परं प्रकरणा
र्थमुपसंजिहीर्षुरर्जुनमेव प्रस्तुतकार्यसाधनार्थं नियो
जयति सर्वाणि कर्माणि क्रियमाणान्येव चेतसा फलत्य
स्पृहेण मयि संन्यस्येति त्यक्त्वा बुद्धिर्ज्ञानेन तत्पूर्वकं योगं कर्म
करणयुक्तिं समाश्रित्य सततं सर्वास्ववस्थासु मच्चित्तो मदेक
शरणो भव ५७ ॥

रामकंठी टीका १४

सततं नित्यमेव सर्वास्ववस्थासु मच्चित्तो मय्येकस्मिंस्त्वेप
रवलाणि चित्तमन्तःकरणं यस्य स तथाविधो भव परमार्थ
तो मद्व्यतिरिक्तपदार्थान्तरसंभवस्यैव ततो व्यवहारभूमौ यद
पीदं तयाप्रतिपद्यसे तत्सर्वं प्रतिपादितोपपत्त्या परप्रका
शचित्स्वरूपतया भावयेत्यर्थः किं कृत्वा मच्चित्तो भव सर्वा
णि स्वकर्माणि क्रियमाणान्येव चेतसा मनसैव तत्फलाभि
स्पृहेण मयि यथोक्तस्वरूपे परमात्मनि संन्यस्य तत्कृताभि
मानत्यागेन निक्षिप्य कथं चेतसा पश्यन्नित्याह बुद्धियोगं
समाश्रित्य बुद्धिर्यथा प्रतिपादितं ज्ञानं तत्र योगः सततम
भ्यासं समाधिस्तं समाश्रित्यालंब्य तन्निष्ठो भूत्वा मच्चित्तो भ
वेति वाक्यार्थः ततश्च ॥ ५७ ॥

+एवमर्जुनाय श्रीगीतापूर्णस्वरूपवर्णनाय
नाधिकारानुसारेण तां नियोज
यति॥

लासिकी टीका

+सर्वाणि विहितानि शरीरित्वाव्यभिचारीणि च कर्माणि वि
वेकयुक्तेन मनसा मयीश्वरे उक्तप्रकारेण समर्प्य मत्परो मदे
न॰ कशरणः संबुद्धियोगं कर्मणि क्रियमाणेऽप्यात्मबोधसमा
धानरूपमाश्रित्य स्वीकृत्य मच्चित्तो मय्येवार्पणमनिर्वर्तितयस्य
तादृशः सततं सर्वास्ववस्थासु व्यावहारिकीष्वपि भव

[illegible]

पंचोलीटीका

चेतसेति यस्मादेवं तस्मात् चेतसा विवेकबुद्ध्या सर्वकर्माणि दृष्टा
दृष्टार्थानि मयि ईश्वरे संन्यस्य मत्परः मच्छरणः सन् बुद्धियोगं मयि
समाहितबुद्धित्वं समाश्रित्य मच्चित्तः सततं सर्वदा भव ५७

रणावीरसमिद्धोधिनी

एवं यथोक्तमुपदेशसर्वस्वं सम्यगवधार्य त्वमप्येवं स्वधर्ममनुति
ष्ठेत्यर्जुनायोपदेष्टुमाह चेतसेति सर्वकर्माणि विहितानि चेत
सांतःकरणेन मय्येव परमेश्वरे संन्यस्य समर्प्य फलमनभिसं
धाय मत्प्रीणनार्थमेवानुष्ठाय मत्परः अहमेव परः पालयिता
याऽऽक्षेप्ता रयिता च यस्य स त्वं बुद्धियोगं प्रशस्तबुद्धिसंबंधं समाश्रित्य
सततं सर्वास्ववस्थासु मच्चित्तो भव ५७

मधुभाष्य

५७॥

251

भाषा अनुवाद टीका

जिसहेतु नित्यआदिकर्म्मके अनुष्ठान से ब्रह्मप्राप्ति होतीहै इससे
सर्वकर्म्मबुद्धिकेद्वारा हमको समर्पण करिकेमत्पर कहेमैंही हौंप
रमप्रार्थनीय साध्यपरम पुरुषार्थ सर्वस्वरूप जिसके अथवा व्यव
सायात्मिकाबुद्धि केद्वारा कर्म्मयोगकोआश्रयकरके सततकहे क
र्म्म अनुष्ठान काल मेभी सततचित्तरूपब्रह्मार्पणं ब्रह्महविः ब्रह्मा
ग्नौब्रह्मणाहुतं इस ४ अध्यायके २४ श्लोकसेकहे ज्ञानके द्वारा
मेरेमेचित्तसमर्पित होताहै सो अर्जुन तुम बुद्धियोग सेतद्रूपसम
चित्त होउ ५७ ॥

दोहा

चितसेंसर्वादिकर्मकों करोसमर्पण मोहुं बुद्धियोगके आ
श्रितमोमे चित नित होहु ५७॥

252

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि अ
थ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि ५८

शांकरभाष्यटीका १

मच्चित्तः सर्वदुर्गाणि सर्वाणि दुस्तराणि संसारहेतुजातानि मत्प्र
सादात्तरिष्यसि अतिक्रमिष्यसि अथ चेत् यदि त्वं मदुक्तमहंकारात्
पंडितोऽहमिति न श्रोष्यसि न ग्रहीष्यसि ततस्त्वं विनंक्ष्यसि विनाशंग
मिष्यसि ५८ ॥

आनंदगिरिकृतटीका २

भीत्यापि प्रवर्तितव्यइति मत्वातो विपर्यये दोषमाह अथ चेदिति ५८

स्वामिकृतटीका ३

+ अतो यत्नं विष्यति न ...ण॥ +

मच्चित्त इति मच्चित्तः सन् मत्प्रसादात्सर्वाण्यपि दुर्गाणि दुस्तराणि सं
सारिकाणि दुःखानि तरिष्यसि विपक्षे दोषमाह अथ चेद्यदि त्व
त्वमहंकारात् ज्ञातृत्वाभिमानात् मदुक्तमेतन्न श्रोष्यसि तर्हि विनंक्ष्य
सि पुरुषार्थाद् भ्रंश्यसि [illegible] ॥

पिशाचभाष्यटीका ४

सर्वदुर्गाणि सर्वाणि दुःखानि मम प्रसादात् मत्प्रसादात्तरिष्यसि ५८

रामानुजभाष्यटीका ५

मच्चित्त इति एवं मच्चित्तः सर्वकर्माणि सांसारिकाणि दुर्गाणि मत्प्र
सादादेव तरिष्यसि अथ त्वमहंकारादहमेव कृत्याकृत्यविषयं सर्वंजा
नामीति मदुक्तं न श्रोष्यसि चेत् विनंक्ष्यसि नष्टो भविष्यसि नहि कश्चि
न्मद्व्यतिरिक्तः कृत्स्नस्य प्राणिजातस्य कृत्याकृत्ययोर्ज्ञाता प्रशासि
ता वास्ति ५८ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ५८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

अतो यत्नं विष्यति न कदाचन मच्चित्त इति प्रागुक्तरीत्या मच्चित्तस्त्वं मत्प्र
सादात्सर्वदुर्गाणि आधिदैविकादीनि सर्वदुःखानि तरिष्यसि अथवि

श्री
गी० टी०
आ०

253

पक्षे दोषमाह अथ चेदिति अथ चेत् यदि त्वमहंकारात् ज्ञातृत्वाभिमा
नात् मदुक्तमेतन्न श्रोष्यसि तर्हि विनंक्ष्यसि पुरुषार्थान्भ्रश्यसे अथ
मेघोनिवाशो से अत्र भगवतो हाहेते अकुक्कलदलनापदं वेदोक्के
देतन्निवेदयमनन्ते यमजनेषु देशु यन्नेषात्ते लोजलिंयसादिति ५८

वनमाली टीका ८

भगवदेकनिष्ठचित्तस्य फलमाह मच्चित्त इति मच्चित्तो न त्वहितस्मयकथ
मेवपितं सर्वदुर्गाणि दुस्तराणि कामक्रोधादीनि संसारदुःखसाधना
नि केवलमत्प्रसादात् स्वव्यापारं विनैव तरिष्यसि अनायासेनैवातिक्रमि
ष्यसि स्वव्यापारस्य स्वधर्मानुष्ठानादेर्मत्प्रसादप्रवीणत्वेन संसार
दुःखमोचकत्वं मत्प्रसादपर्वेति भावः अथ चेत्त्वमहंकारेण विद्या
नमम कृत्याहं पंडितोऽहमिति गर्वोन्नत्श्रोष्यसि मद्वचनार्थे न करिष्यसि त
तो विनंक्ष्यसि पुरुषार्थाद्भ्रष्टो भविष्यसि मात्वान्संसारदुःखमोचक
मत्प्रसादार्थस्वोचितकर्मानुष्ठानं कुर्विति भावः ५८ ॥

ॐ श्रीमद्वैजयन्तीस्थः ९

यद्यहं त्वच्चित्तो भविष्यामि तर्हि मम किं फलं भविष्यति नो चेद्वा किं
भविष्यतीत्यपेक्षायामाह मच्चित्त इति यदि त्वं मच्चित्तः उक्तप्रकारेण
कर्माणि कुर्वन्ननन्यमना भविष्यसि तर्हि मत्प्रसादान्मदनुग्रहादेव सर्वदु
र्गाणि सर्वाणि कामक्रोधादिदुर्गाणि जन्ममृत्यादि वक्ष्यति ग्राम्या
त्मिकादिनापत्रयाणि देहापत्यकलत्रादिष्वात्मीयाभिमानरूपा
णि च मर्दितस्वदेवार्चनादिसंसारदुःखानि दुर्गाणि प्राणेन पंथीनेना
पि दुःखेन गन्तुं शक्यानि तरिष्यसि भक्तप्रियोऽहं स्वात्मानमपि दत्त्वा
भक्तचित्तस्य तेनानायमेष्यामि मत्त्वदेवैनेव माप्राप्स्यसीत्याशयः
विपक्षे दोषमाह अथ चेदिति अथ त्वं चेत् यदि अहंकारात् त्वं सकार्या
कार्यविषयकज्ञानाभिमानात् न श्रोष्यसि मदुक्तं कृत्वा तन्न करिष्य
सि तर्हि विनंक्ष्यसि मत्प्रसादाभावात्कामादिभिर्बाधितो भूत्वा संसारं प्राप्स्य
सि मद्भक्तः कोऽपि संसारादुद्धर्तो नास्ति नो मदुक्तमेवागीकृत्य ...
पः ५८ ॥

ततः किं स्यादित्यत आह

मधुसूदनी टीका ९

मच्चित्तः सर्वदुर्गाणि दुस्तराणि कामक्रोधादीनि संसारदुःखसाधनानि
मत्प्रसादात् मद्व्यापारमन्तरेणैव तरिष्यसि अनायासेनैवाति

क्रमिष्यसि अथचेत्यदित्वमदुक्तेविश्वासमकृत्वाहंकारात्त्वो।
त्तितोहमितिगर्वान्नश्रोष्यसिमद्वचनार्थंनकरिष्यसि ततोविने।
ङ्क्ष्यसिपुरुषार्थाद्भ्रष्टोभविष्यसिकामकारेणसंन्यासाद्यावरन् ५८

सदानंदी टीका ११

मच्चित्तःसन्सर्वाणिदुःखानिसमुद्रवत् संसारदुःखदायीनि।
कामक्रोधादिकान्यपि १ मत्प्रसादात्त्वमेवैनेवसर्वव्यापारंविनापि
च अतिक्रमिष्यसिप्रयत्नबलेनैनमवैनच २ यदित्वंमदुक्तेर्वा
निःसंदिग्धोपिमोहतः अविश्वासादहंकारात्मंइतोसौनिगर्वि
तः ३ नश्रोष्यसिवचोममः कृत्वापिनकरिष्यसि विनंक्ष्यसि।
तः ३ नश्रोष्यसिवचोमम: कृत्वापिनकरिष्यसि विनंक्ष्यसि
नष्टासम्यक्पुरुषार्थात्परिच्युतः ४ कामकारेणयत्नकिंचि
त्कुर्वन्नाप्नोतिशोभने अज्ञानार्कस्तनापिनेमवमरीयावत
न्मर्थी(?)कृतेरसात्स्वारितापितेंद्रियगणांभोगांश्चकामाज्ञ
ले वयथीकोयमहाप्रतप्तस्विकतादग्यागमाध्यौग्निकेदीनवा
शरणागतेयदुपत्तेमामामपेतस्वभोः ६ ५८ ॥

नील कंठी टीका १२

मच्चित्तइति
एतस्यभक्तियोगस्यकरणेगुणमकरणेदोषंचाह मच्चित्तइति
दुर्गाणिदुःखानिआध्यात्मिकाधिलौकिकादीनिसंकटानि अहंकारा
त्स्वपांडित्याभिमानात्नश्रोष्यसिमहाक्यंनहिविनंक्ष्यसिपु
रुषार्थभ्रष्टोभविष्यसि ५८ ॥

आनंदीटीका १३

मच्चित्तोमदेकाश्रितःममपरमेश्वरस्यानुग्रहात्सर्वाणिदुः
खानिप्रत्यमाध्यात्मिकादीनानितरिष्यसि परमार्थंतत्त्व
तोनिश्चयमाध्यायोत्मिदिनानितरिष्यसि
हर्षशोकमोहादीनिसंसारबंधकारणानितीर्त्वामत्स्वरू
प्यमापयसे अथचेद्यदित्वंरजस्तमसोहद्वेकेणसत्वाभि
भवान्मदुपदेशमनादृत्यअहंकारेनमोदत्तसिममैतेबंधवः
एषांवधेन ममत्वेनमारणादिदृष्यरत्रवाविनष्टेवगानि

श्री· गी·टी· ग्रं·

254

दितियुद्धमागपवश्रेयानित्येतन्मिथ्यात्वानंनत्यजसि ततोवि
नंक्ष्यसि स्वधर्मकीर्तिंचहित्वापापमवाप्स्यसि इतिसमुदितम
भयलोकविभ्रंशंप्राप्स्यसीत्यर्थः ५८ ॥

रामकंठी टीका १२

मत्प्रसादात्मदनुग्रहान्मूलकारणभूतान्मच्चित्तोमदेकालम्ब
नमानसः सर्वदुर्गाणिसर्वकृच्छ्राणिहर्षशोकमोहमूलानि
बंधकारणानितरिष्यसिलंघयिष्यसि अथचेत्वमयुपदिष्टंस्वय
यहंकारेणात्माभिमानावच्छिन्नशरीराद्यात्मप्रत्ययेनमोह्यसि
नहिनंक्ष्यसि पारमार्थिकस्वरूपाप्रतिपत्तेर्विनाशमभावमेव
प्राप्स्यसि नचैतत्स्वाधीनंतवेत्याह ५८ ॥

+यतःपरमसततंमच्चित्तत्वस्यायंप्रभावइत्याह ॥

लासिकी [illegible] टीका

+मच्चित्तोमयीश्वरात्मनिचित्तंयस्यसएवंविधःसन् सर्वा
णिदुर्गाणिदेहाद्यात्मप्रत्ययादीनिआध्यात्मिकादिदुःखा
निचममेश्वरस्यप्रसादात्स्वस्वरूपप्रकाशनरूपादनुग्रहा
त्तरिष्यसि प्रयत्नंविनैवानायासेनातिक्रमिष्यसि व्यतिरे
केदोषमाह अथचेद्यदित्वमहंकाराद्देहाद्यात्मप्रत्य
याभिनिवेशान्नश्रोष्यसि श्रुत्वानानुष्ठास्यसि तर्हिविन
ङ्क्ष्यसि प्राप्नादपिबुद्धियोगाद्भ्रष्टोसि आत्मबोधपिविलि
तिपरांयास्यसीत्यर्थः [illegible]

पंचोलीटीका

ततोयद्वक्ष्यतितद्वक्त्र मच्चित्तइति मच्चित्तःसर्वदुर्गाणिसं
सारदेहमन्वानिमत्प्रसादात्तरिष्यसि अथचेत्न परित्वमदकमहं
कारामंदिरंमनःसन् नश्रोष्यसितततस्त्वंविनाशंगमिष्यसि ५८

ततश्च मच्चित्तस्त्वं सर्वाणि दुर्गाणि दुस्तराणि कृच्छ्राणि मदनुग्र
हात्तरिष्यसि अथेति पक्षांतरे अथैवमस्मदुपदिष्टं त्वं चेदहंकारा
त् कोऽयं मम महाकुलोत्पन्नस्य पार्थस्य ज्ञानस्योपदेष्टेत्यभिमा
नात् शास्त्राख्यानलक्षणात्स्वजातेर्वर्तमानदेशकालयोः श्रो
चितस्य कोपस्य परित्यागात्क्वोतिमार्गी दुःखबाहेतोर्मदुक्तं न श्रो
ष्यसि श्रवणस्यानुष्ठानसाधनत्वात्स्वधर्मं युद्धं मा नु वास्यसि
तर्हि नंक्ष्यसि ऐहिकामुष्मिकोभयार्थाभ्यामालोकेऽस्तीति संभावना
भावाद्धि नाशमभावमेव प्राप्स्यसीत्यर्थः ५८॥

मधुभाष्य

५८॥

भाषाअनुवाद टीका

और मच्चित होने से जो होगा सो सुनो तात्पर्य यह कि मच्च-
चित होके मेरी कृपासे तावत्तदुर्गो अर्थात् दुस्तर सांसारिक दुःखस-
मूह से तरिजावेगा औरइसके विपरीत आचरणमें दोष कहते हैं
कि और जो इस प्रकार कहने परभी तुम अपने अहंकार अर्थात्
हम बड़े ज्ञानी इस अभिमानसे हमारे कहने पर कान न करोगे तो पु-
रुषको उचित औ हित करनेवाला जो धर्म तिससे भ्रष्ट होउगे अर्था-
त् विनष्ट हो जावेगे औ दुर्गतिभी भोगना पड़ेगा ५८ ।।

दोहा

मोचित् होय समझ करन को मोरि कृपा तरैंगो हि अरु जो तें
हंकारसें सुनहि न नाश हुंगो हि ५८।।

255

यदहंकारमाश्रित्य न योत्स्य इति मन्यसे मि
थ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ५९

शांकरभाष्य टीका १

इदं च त्वया न मन्तव्यं स्वतंत्रोऽहं किमित्यर्थं परोक्तं करिष्यामीति
यदि चेत्त्वमहंकारमाश्रित्य न योत्स्य इति न युद्धं करिष्यामीति
मन्यसे चिंतयसि निश्चयं करोषि मिथ्यैव व्यवसायो निश्चयस्ते
तव यस्मात्प्रकृतिः क्षत्रस्वभावस्त्वां नियोक्ष्यति ५९ ॥

आनंदगिरिकृत टीका २

स्वातन्त्र्ये सति भीतेरवकाशो नास्तीत्याशंक्याह इदं चेति इत्यस्य
त्वया युद्धान्न वैमुख्यं कर्तुं न चितमित्याह मिथ्येति ५९ ॥

कामं विनंक्ष्यामि न तु बंधुभिः स्वामिकृत टीका ३ युद्धं करिष्यामीति चेत्तत्राह

यदिति मदुक्तमनादृत्य केवलमहंकारमवलंब्य युद्धं न करिष्यामीति व्य
मन्यसे व्यवससि एष ते व्यवसायो मिथ्यैवास्वतन्त्रत्वात्
तव तदेवाह प्रकृतिस्त्वां रजोगुणरूपेण परिणता सती नियोक्ष्यति
युद्धे प्रवर्तयिष्यत्येव [illegible] ५९ ॥

पिशाचभाष्य टीका ४

यद्यत्त्वमहंकारमाश्रित्य मद्वचनमविज्ञाय अहमेव सर्वशास्त्रवि
दिति मत्वा न योत्स्य इति मन्यसे मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नि
योक्ष्यति नैवैष निश्चयो मिथ्या वितथीभूतः यतः प्रकृतिः स्वभावः
त्वां नियोक्ष्यति ५९ ॥

रामानुजभाष्य टीका ५

यदिति यद्यहंकारमात्महिताहितज्ञाने स्वातंत्र्याभिमानमाश्रि
त्य मम नियमनमनादृत्य न योत्स्य इति मन्यसे एष ते स्वातंत्र्यव्यवसायो मिथ्या
भविष्यति यतः प्रकृतिस्त्वां युद्धे नियोक्ष्यति त्वां तत्राज्ञमयोद्धृत्वा
मज्ञमदाज्ञया प्रकृतिर्नियोक्ष्यति तदुपपादयति ५९ ॥

अभिनवगुप्तकृत टीका ६ ॥ ॥

स्पष्टार्थम् ५९ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

कामेवि नेत्स्यामि नत्वेवंभूभिः सहयोत्स्य इति चेदित्याह यदि
ति यद्यदि मदुक्तमनादृत्य केवलमहंकारमवलंब्य युद्धं न करि
ष्यामीति मन्यसे तर्हि एष व्यवसायस्ते नो योगो मिथ्या निरर्थ ए
व यतः प्रकृतिस्त्वां नियोक्ष्यति प्रवर्त्तयिष्यत्येव तस्मा [illegible]
मदधीनत्वादिति भावः ५९ ॥

वनमाली टीका ८

तस्याधिकारे कर्मण्डसञ्जमित्याह यदीति युद्धेऽहंकार्ये यामिको हंयु
हात्मकमेनं करिष्यामीति मिथ्याज्ञानमाश्रित्य न योत्स्ये युद्धं न क
रिष्यामीति मन्यसे मिथ्या वृथा निष्फलत्वादस्थिरत्वाच्च व्यवसायो
निश्चयस्ते न च यतः प्रकृतिः त्वज्ज्ञानारंभको रजोगुणस्त्वभा
वस्त्वां नियोक्ष्यति प्रेरयिष्यति युद्धे यद्वा प्रकृतिः भगवदिच्छा प्र
सृतिवासनेव न त्वेज्ञानेन कर्मणा इति वचनात् प्रथमस्य सर्व
स्यासत्त्वेन तत्त्वेन सते चेतनया प्रेरकत्वासंभवात् ५९ ॥

उत्तमवैजयंतीमर्थः ९

ननु यद्यहंकारो विनाशहेतुर्भवति तर्हि किमु सर्वजीवानां कल्या
णरूपा भवति तथापीदृशादहंकारादीदृशी गुरुगोत्रादिमारणा
रंभिकां नवइ किं न स्पृशामि वेत्स मकारान्तत्रीति वेतत्राह यदहं
कारमिति यद्यदि युद्धेऽहंकारं यद्यपि तद्वियोगो युद्धं प्रवपरमेयमीऽ
स्ति तथापीदृशो गुरुगोत्रादिवधरूपक स्तु नरकप्रापक एवेत्य
वेत्स्वानेतरेषां स्वहिताहितविषयकज्ञानाभिमानरूपकमाश्रित्य
स्वीकृत्याहं नयोत्स्य इति त्वं मन्यसे स्वस्वाभाविकधर्मे तेन रूपेण धर्ममेव
[illegible] तेन रूपपरधर्मांगीकारेण [illegible] सितर्हि ते त्वं व यदृशो व्यव
सायो निश्चयो मिथ्या निष्फलो भविष्यति उत एवं यतः प्रकृतिर्म
म्माया दैवी जगन्मोहिनी त्वत्कर्मानुसारिणा मदाज्ञया त्वां प्रकृति
जन्यज्ञो गुणाश्च मम मानसं स्यातं [illegible] भिमानेन नियोक्ष्यति मे सम
नमस्तेषु गुरुगोत्रादिवधात्मके युद्धे प्रवर्त्तयिष्यत्येवातो मदुक्तं न तेव
कार्यं न करोषीत्यभिप्रायः ५९ ॥

^ तयोः

मधुसूदनी टीका १०

अहंकारं धार्मिकोहं क्रूरं कर्म न करिष्यामीति मिथ्याभिमानमा
श्रित्य न योत्स्ये युद्धं न करिष्यामीति मन्यसे यत् मिथ्या निष्फल ए
ष व्यवसायो निश्चयस्ते तव यस्मात्प्रकृतिः क्षत्रजात्यारंभको र
जोगुणस्वभावस्त्वां नियोक्ष्यति प्रेरयिष्यति युद्धे [illegible]
५९॥

सदानंदी टीका ११

धार्मिकोहं न च क्रूरं कर्म हिंसादिलक्षणं करिष्यामीति मिथ्याभि
मानमाश्रित्य केवलं १ अहं नैव करिष्यामीत्येवं त्वं यदि मन्यसे ए
ष ते निश्चयो मिथ्या निष्फलः सर्वतो यतः २ रजोगुणस्वभावस्त्वां क्ष
त्रियत्वनिबंधनः अस्मिन्त धार्मिके क्रूरे प्रेरयिष्यति संगरे ३ अतो
मिथ्याग्रहं मुक्त्वा मद्वचः शरणं कुरु ४ ॥ ५९ ॥

नीलकंठी टीका १२

स्वतंत्रोहं त्वदुक्तं न करिष्यामीत्याशंक्याह यदिति यत् यदि अहं
कारं गर्वमाश्रित्य न योत्स्ये युद्धं न करिष्ये इति मन्यसे एष ते तव व्य
वसायो निश्चयो मिथ्या यतः प्रकृतिः क्षात्रस्वभावः त्वां नियो
क्ष्यति प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यतीति चोक्तं ५९

[illegible]री टीका १३

न त्वा रजस्तमसोरुद्रेकात्युद्धाकरणनिश्चयोपि न पर्यवस्यती
त्याह अहंकारम् यद्यप्येते न पश्यन्ति कथं न ज्ञेयमस्माभिरि
त्येवंरूपं मिथ्याभिमानमाश्रित्य न योत्स्य इति यन्मन्य
से हे धान्वेदसे अयं व्यवसायो निश्चयस्तव मिथ्यैव व्यर्थ एव
यतः प्रकृतिः क्षत्रियजात्यारंभको रजोगुणस्वभावस्त्वां नियो
क्ष्यति निग्रहे वयं प्रेरयतीत्यर्थः ५९ ॥

रामकंठी टीका १४

एवंविधमवस्तुविषयमहंकारं कर्तृत्वाभिमानमाश्रित्य धर्म्य

श्री॰
गी॰ टी॰
म्र॰

257

मवष्टभ्यकरणीयंयुद्धंनकरिष्यामीतियन्मन्यसेत्वध्यसे प
षएवंविधस्तेव्यवसायोवुद्धिर्निश्चयोमिथ्यानिष्फलएव
यतःप्रकृतिःस्वभावःपरमेश्वरेच्छानियमितयुद्धादिकंते
कर्त्तानियोक्ष्यतेवर्णस्वभावेकर्मणिप्रवर्त्तयिष्यते एतदे
वस्फुटयितुमाह ५९ ॥

+नन्वात्मबोधाविधंसायत्वश्चितएव
कालमतिवाहयेयतिष्ठन्तंबंधुवधा
दिकारणंयुद्धंकरणमि
त्याशंक्याह ॥

लास्तिकी [illegible] टीका

+अहंकारंमयियुध्यमानेमतियुद्धंघटेतेत्येवंकर्त्तृत्वाभि
मानमवलंव्ययुद्धंनकरिष्यामीतियत्त्वंमन्यसेव्यवसायि
एषतेव्यवसायोनिश्चयोमिथ्येवनिष्फलएवप्रकृत्यधी
नत्वात्तवतदेवाह यतःप्रकृतिरुक्तलक्षणारजोगुणेनप्रा
वृत्तिस्वभावानियोक्ष्यति [illegible]
५९

पंचोलीटीका

वंधुभिःसहयुद्धंनकरिष्यामियतःपंडितोहंवृद्धकेकिमर्थंक
रोमीतिवेमन्यारह यदहंकारमिति यद्यहंत्वमहंकारमाश्रित्य
नयोत्स्ये युद्धंनकरिष्यामीतिमन्यसेनर्हितेनवएषव्यवसायोनि
श्चयोमिथ्यायतःप्रकृतिःतत्रस्वभावस्त्वांनियोक्ष्यतिप्रेरयति ५९

रसावीरसमिद्धोधिनी

नचैतत्स्वाधीनंतवेत्याह यदहंकारमिति मदुक्तमनादृत्यकेव
लमहंकारमाश्रित्यावलंव्यनयोत्स्ये युद्धमेवमयानुष्ठेयंयुद्धंनानु
ष्ठास्यामीतियत्त्वंमन्यसे एषतेव्यवसायोनिश्चयोविपरीतोमिथ्ये
वनिष्फलएवस्वविषयाक्रांतेरसंभवादस्वतंत्र्यात्तवेतिभावः अ
तएवप्राग्उक्तव्यवसायात्मिकावुद्धिःसमाधौनविधीयते प्रकृ
प्रकृतिःसत्वप्रसर्जनरजोगुणरूपेणपरिणतः क्षत्रियप्रकृति
स्वरूपेणप्रतिनियतस्त्वांक्षत्रियजातिकमस्वतंत्रंनियोक्ष्यतिपरवशं
वर्त्तयिष्यत्येव यद्वाप्रकृतिःपरमेश्वरसंबंधतोऽस्याभिचरिताः

तिर्वद्यमाणलक्षणानस्यैवेच्छानियमेनोभयलक्षणाप्रवृत्ति स्वां स्वधर्मे प्रवर्तयिष्यन्त्येवेत्यर्थः ५९ ॥

मधुभाष्य

५९ ॥

257

भाषा अनुवाद टीका

और जो कहा कि अब जो हम धर्म से भ्रष्ट होय परंतु तो भी भाई और बन्धुवों के साथ युद्ध न करैंगे तिस पर कहते हैं कि मेरी कही सब बातो को अनादर पूर्वक अहंकार के भरोसे जो कहा कि मै युद्ध न करूंगा ऐसी जो तुम मन मे निश्चय करते हो तो तुमारा यह निश्चय करना स्वाधीनता के अभाव है तुमसे अर्थात् तुम स्वाधीन नही हौ मिथ्या कहे [illegible] है सोई कहते हैं कि जो तुमारी प्रकृति कहे क्षत्री को रजोगुण की अधिकाई सो तुमको अवश्य ही युद्ध मे प्रवृत्त करेगी शत्रुवो को तुम मारोगे और लडोगे और इस पीटने से केवल जगत मे उपयश छोड और कुछ हाथ लागता नही है यह जानो ५९ ॥

दोहा

जो अहंकार हि युक्त होय करौं न युद्ध यह मान मिथ्या यह
तव निश्चय जोइ हि प्रकृति तोहि जान ५९ ॥

258

स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोपि तत्
६०॥

शांकरभाष्य टीका १

यस्मात्तु स्वभावजेन शौर्यादिना कौंतेय यथोक्तेन निबद्धो निश्चयेन बद्धः स्वेनात्मीयेन कर्मणा कर्तुं नेच्छसि यत् कर्म मोहादविवेकतः करिष्यस्यवशोपि परवश एव तत्कर्मयस्मात् ६०॥

आनंदगिरिकृत टीका २

यस्माद्वेति स्वभावजेन कर्मणा निबद्धस्त्वमिति सम्बन्धः इतोपि त्वया युद्धं कर्तव्यमेवेत्याह यस्मादिति ६० ॥

स्वामिकृत टीका ३

किंच स्वभावेति ॥
स्वभावः क्षत्रियत्वहेतुः पूर्वसंस्कारस्तस्माज्जातेन स्वकीयेन कर्मणा शौर्यादिना पूर्वोक्तेन निबद्धो यंत्रितः त्वं मोहाद्युद्धकर्मैतल्लक्षणं कर्तुं नेच्छसि अवशोपि तत्कर्म करिष्यस्येव [illegible] ६० ॥

पिशाचभाष्य टीका ४

स्वभावजेन स्वभावसिद्धेन निबद्धः नियोगतो बद्धस्त्वं स्वेनात्मीयेन कर्मणा क्रियां कर्तुं निवर्तयितुं स्वभावसिद्धेकर्मे ६० ॥

रामानुजभाष्य टीका ५

स्वभावजेन इति स्वभावजेहि क्षत्रियस्य कर्मशौर्यस्वभावेन शौर्याख्येन कर्मणा निबद्धः परैः अवशः परैः [illegible] धर्षणमसहमानः त्वमेव तत्र युद्धे करिष्यसि यदिदानीं मोहादज्ञानात् कर्तुं नेच्छसि सर्वं हि भूतजातं सर्वेश्वरेण मया पूर्वकर्मानुगुण्येन प्रकृत्यनुवर्तने नियमितं तेन कृष्णेन ६०

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ६० ॥

श्री· गी· टी· म·

259

ब

परमार्थप्रपा टीका ८

किंच भावजेनेति स्वभावः क्षत्रियत्वज्ञापकः शूर्वकर्मसंस्कार
स्तस्माज्जातेन [illegible] स्वकीयेन कर्मणा शौर्यादिना पूर्वोक्ते
न निवद्धो नियंत्रितः सन् यदि मोहादग्रहलत्वेन कर्म कर्त्तुं नेच्छसि तत्
याप्यवशः सन् कर्म करिष्यस्येव नद्धके यावत्संस्कारपरंप
रा परिणामे प्रायो मनः प्राणिनो कलत्यप्रकृतिं निरस्य सहजो
कर्त्तास्यथा स्यान्वरः दीर्घं धोलभ्रनादिकस्य सहजं यत्नात्क्रम्सत्ता
रयन् सौरभ्यं विनैनातिकः स्वरभिंताकरैः स्वत्वस्यैवेति ६० ॥

वनमाली टीका ८

स्वभावेति विहणोतिस्वेति स्वभावजेन शूर्वोक्तेन क्षत्रियस्वभावजेना
शौर्यादिना स्वेनात्मीयेनानेन कर्मणा निवद्धो वशीकृतः सन् त्वं यद्युद्ध
वधादिनिमित्तं मोहात् स्वतंत्रोहं यथेच्छामि तथा संपादयि
ष्यामीति भ्रमात् कर्त्तुं नेच्छसि शृणि [illegible] पि स्वाभाविककर्मप्र
वर्तितः परमेश्वरपरतंत्रश्च करिष्यस्येव यद्देश्वरेच्छायापि भावि
यमनेन स्वभावादिकं निमित्ते दर्शितं [illegible] विहणोतिस्वेति स्वभाव
संस्कारस्त्वज्ञमेन कर्मणोत्यर्थः ६० ॥

ऊसमवैजयंतीमधेः ९

उक्तमर्थमुपपादयन्नाह स्वभावजेनेति हे कौंतेय मोहादज्ञाना
युद्धाख्यं कर्म मदुक्तमपि कर्तुं नेच्छसि तदिच्छामपि न करोषि त्वं
अवशः सन् प्रतिपाद्योः वयास्योत्वं करिष्यस्येव उत्त एव मिथ्यैष व्यवसायः
यो हे नगाभिन विशेषणमाह स्वभावेन स्वभावजेन मन्वायोर्मार्तः क्षत्रि
योः रजोगुणस्तत्र स्वं वयो जवशि विहित कर्म कारणं प्रवर्तकः संस्कार
स्वपावेनानि वीर्ये ः पं स्वभावः स्वस्य क्षत्रियस्य भावः शूर्वकर्मसंस्कारणक
जनः उग्रवादिरूपस्तस्माज्जातमिति स्वभावजं शौर्यादिलक्षणं प्रा
मितेन स्वेन स्वकीयेन कर्मणा यस्मात्त्वं निवद्धो मर्कटस्वववद्धो
न स्मान्न करिष्यसे वेत्यर्थः कौंतेयस्य नेनयथा कुंती स्वस्वभावे
वर्तते तथा त्वमपि वर्तिष्वेति सूचितं ६० ॥

प्रकृतिं विहरणोति —

मधुसूदनी टीका ९

स्वभावजेनेत्यत्र [illegible] स्वभावजेन [illegible] शौर्यादिना स्वेनानागंतुकेन

कर्मणा निबद्धो वशीकृतस्त्वं हे कौंतेय यद्युद्धं वधादिनिमित्ते युद्धे मोहात् स्वतंत्रोहं यथेच्छामि तथा संपादयिष्यामीति भ्रमात् कर्तुं नेच्छसि तत् अवशोपि युद्धनिच्छन्नपि स्वाभाविककर्मपरतंत्रः पूर्वमेव परतंत्रस्त्वं करिष्यस्येव

६० ॥

स्वहानंदी टीका ११

प्रकृतिं विहाणोतोयः सर्वतोपि बलीयसी यस्मात्क्षौर्यादिना स्वेन यथोक्तेनात्मकर्मणा १ वशीकृतस्त्वं कौंतेय त्वं चिंयवे कर्देतना युद्धं बंधु हिंसादिनिमित्तमविवेकतः २ स्वतंत्रोहं यथेच्छामि करिष्यामि तथैव च भ्रमाने च्छसि कर्तुमनिच्छन्नपि कृतमेतत् ३ स्वभावपरतंत्रः सन्नीश्वराधीन एव च करिष्यस्येव तस्मात्त्वमाकार्षीराग्रहं वृथा ४ मत्काराहं कुलपद्मविदे मत्किंगुरस्तु त्वं समाप्य कर्म जर्वेष्व नो नैति पराभवं श्रीमत्केदयोमेति नसंशयोत्र ६०

नीलकंठी टीका १२

प्रकृतिस्त्वां नियोक्ष्यतीत्येतदेव व्याचष्टे स्वभावजेनेति स्वभावजेन स्वीकेन शौर्यादिनावशोपि परवशः सन् करिष्यसि ६०

श्रानंदी टीका १३

एतदेवस्फुटमाह अवशोपि सन् मदुपदेश विषयानादरे ग्रयतन्नपीत्युपालंभः ६० ॥

रामकंठी टीका १४

व्याख्यानमेवैतत् किंबहुनोक्तेन ममपदेशसर्वस्वं सिद्धांततनया मतिनिपयस्वेनार्थः ६० ॥

लासिकी [illegible]टीका मणि प्रवर्तयिष्यति यावत् स्वभावनियतं पवेत्याह ॥

केवलं यज्ञतत्रक

हे कौन्तेय स्वभावात्प्रकृतेराविर्भूतेन स्वकीयेन शौर्यादिलक्षणेन कर्मणा प्रकृत्या निबद्धो नियंत्रितस्त्वं यत्कर्म युद्धादिलक्षणं प्रकृतिमोहादविवेकात्कर्तुं नेच्छसि अवशोप्यस्वतंत्रःसं त्वं तत्कर्म करिष्यस्येव प्रकृत्यधीनत्वात् किंबहुनोक्तेन

६०

पंचोलीटीका

तत्रहेतुमाह स्वभावजेनेति हे कौन्तेय स्वभावजेन शौर्या दिना यथोक्तेन स्वेनात्मीयेन कर्मणा निबद्धः अतिशयेन बद्धः मोहादविवेकतः यत्कर्म कर्तुं नेच्छसि तत्कर्म अवशोऽपि परवशोऽपि सन् करिष्यसि ६०॥

श्रीधरस्वामिसुबोधिनी॥

एतदेव स्फुटयति स्वभावजेनेति स्वभावो जन्मान्तरीयकर्मसंस्कारो येन तत्र जातेनौचित्येन वः यद्वा स्वभावः प्राग्व्याख्यातलक्षणः क्षत्रियोचितः सोऽत्र परमेश्वरः प्रधानः यद्वा स्वभावोऽध्यात्ममुच्यते इत्यत्र व्याख्यातलक्षणोऽध्यात्मशब्दवाच्यः परमेश्वरसंबंधी दुष्टनिग्रहसज्जनपालनलक्षणः सोऽत्र बहुजीवाभिप्रायः स्वभावस्तस्माज्जातेनोचितेन कर्मणा दुष्टनिग्रहादिलक्षणेन यो बद्धस्त्वमित्यर्थः शेषं तत्र प्रथमश्लोकाभिप्रायः दुष्टनिग्रहादीनां वतमेवध्यतावतारोऽहं भवादृशान्तत्सादितवानव्यभिचारितामूढ दिश्यात तस्य हन्तो श्चेत्यव यपंभा विनिष्टहे स्वयमेवं प्रहतो भून त्यस्माज्जातेन स्वेन स्वजात्युचितेन कर्मणा युद्धादिलक्षणेन कर्तुंनेनिबद्धो नियंत्रितोऽपि संस्त्वं मोहाद्यद्यत्कर्म युद्धलक्षणं कर्तुं नेच्छसि तदवशोऽपि तत्कर्म त्वं करिष्यस्येवानुष्ठास्यस्येवेत्यर्थः ६०॥

मधुभाष्य

६०॥

भाषा अनुवाद टीका

और हे कौंतेय कुंतीनंदन अर्जुन स्वभावकहे जो पूर्व कर्मका संस्कार जिस से रजोगुण विशिष्ट क्षत्री के जाता को प्राप्त होय शूरता आदि गुण कर्मों से निबद्ध कहे वशीभूत तू मोह के मारे जो इस समय मे युद्ध कर्म करने की इच्छा नहीं करते हो परन्तु सके बाद अवश होय यही कर्म अवश्य ही करोगे इस मे कुछ सन्देह न मानो ६० ॥

दोहा

स्वभावज से निज कर्म सें कुंतिसुत बंधाय करत न इच्छा मोह सें अवशय करेगा भाय ६० ॥

261

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रा
मयन्सर्वभूतानि यंत्रारूढानि मायया ६१

शांकरभाष्यटीका १

ईश्वरः ईशनशीलो नारायणः सर्वभूतानां सर्वप्राणिनां हृद्देशे
हृदयदेशेऽर्जुन शुक्लान्तरात्मस्वभावो विशुद्धान्तःकरण इति
अहश्च कृष्णमहरर्जुनं चेति दर्शनात् तिष्ठति स्थितिं लभते स।
कथं तिष्ठतीत्याह भ्रामयन् भ्रमणं कारयन् सर्वभूतानि यंत्रा
रूढानीव यंत्राण्यारूढान्यधिष्ठितानीवेति इवशब्दोऽत्र द्रष्टव्यो य
था दारुकृत पुरुषादीनि यंत्रारूढानि मायया छद्मना भ्रामयन्
तिष्ठतीति सम्बन्धः ६१ ॥

आनंदगिरिकृतटीका २

अर्जुनशब्दस्योक्तार्थत्वे श्रुतिमुदाहरति अहश्चेति अहश्च कृ
ष्णमहरर्जुनं च विवर्तेते रजसी वेद्याभिः इत्यत्र किंचिदहस्ताव
त् कृष्णमकं कलुषितमिव लक्ष्यते किंचित् पुनरहरर्जुनमति
स्वच्छं शुद्धभावमुपलभ्यते एवमर्जुनशब्दस्य शुक्लशब्दपर्याय
तया प्रयोगदर्शनादुक्तार्थत्वमुचितमित्यर्थः यंत्रारूढानीवेति
कथमुच्यते तत्राह इवशब्द इति तदेव प्रपंचयति यथेति दारुम
यानि यंत्राणि यथा लौकिको मायावी मायया भ्रामयन्वर्तते
तथेश्वरोऽपि सर्वाणि भूतानि भ्रामयन्नेव हृदये तिष्ठतीत्यर्थः ६१

स्वामिकृतटीका ३

+ ईश्वर इति द्वाभ्यां सर्वभूतानां हृदयमध्ये ईश्वरोऽन्तर्यामी तिष्ठति
किं कुर्वन् सर्वाणि भूतानि मायया निजशक्त्या भ्रामयन् तत्तत्क
र्मसु प्रवर्तयन् यथा दारुयंत्रमारूढानि कृत्रिमाणि भूतानि सू
त्रधारो लोके भ्रामयति तद्वदित्यर्थः यद्वा यंत्राणि शरीराण्यारू
ढानि भूतानि देहाभिमानिनो जीवान् भ्रामयन्नित्यर्थः तथाच
[illegible] एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूता
न्तरात्मा सर्वाध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च

+ तदेव श्लोकद्वयेन सांख्यादिम
तेन प्रकृतिपारतन्त्र्यं स्वभाव
पारतन्त्र्यं कर्मपारतन्त्र्यं चोक्तं
इदानीं स्वमतमाह ॥

श्री- गी टी- अ-

262

ति ॥ योन्तर्यामित्वलक्षणं च यथात्मनि तिष्ठन्नात्मानमन्तरो यमय-
ति यमात्मा न वेद यस्यात्मा शरीरमेष त आत्मान्तर्याम्यमृत इत्या-
दि ६१ ॥

पिशाचभाष्यटीका ४

ईश्वरो वासुदेवः सर्वभूतानां सर्वप्राणिनां हृद्देशे हृदये पुंडरीके अ-
र्जुनेन शुक्लेन निर्मलमनःकरणेन प्रसिद्धो ऽपि नस्य वेद्यादर्जुनः हे अर्जुन
तिष्ठति सन्निधापयते यथा काष्ठिकशैलादारुचक्रयोगात् रूपाणि भ्रामय-
न्तिष्ठतीति प्रकृष्टः संबंधः ६१ ॥

रामानुजभाष्यटीका ५

ईश्वर इति ईश्वरः सर्वनियमनशीलो वासुदेवो सर्वभूतानां हृद्दे-
शे सकलप्रवृत्तिनिवृत्तिमूलज्ञानोदयप्रदेशे तिष्ठति कथं कु-
र्वंस्तिष्ठति यन्त्रारूढानि सर्वभूतानि स्वकीयया गुणमय्या मायया आ-
मयत्वेनैव निर्मितं देहेन्द्रियावस्थं प्रकृत्याख्यं यन्त्रारूढानि स-
र्वभूतानि सत्त्वादिगुणमय्या मायया गुणानुगुणं प्रवर्तयंस्तिष्ठतीत्य-
र्थः पूर्वमप्युक्तं सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपो-
हनं चेति मत्तः सर्वं प्रवर्तते इति च श्रुतिश्च य आत्मनि तिष्ठन्नित्यादिका
६१ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ६१ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

तदेवं सांख्यमीमांसकादिमतेन प्रकृतिपारतंत्र्यं स्वभावपारतंत्र्यं
निरूप्य शुद्धानादरेण निषिद्धः इदानीमपाकृतेनः प्रकृतेः स्वय-
म चराचरमिति स्वमतमाह दिशप्रसाङ्गप्रवर्तितं विचार ईश्वर इति
भो अर्जुन सर्वभूतानां हृद्देशे ईश्वरो नर्यामी अस्ति तिष्ठति किं कुर्वन्
सर्वभूतानि सर्वजीवान् यंत्राणि शरीराणि आरूढानि अधिष्ठिता-
नि मायया स्वशक्त्या भ्रामयन् सन्निधिमात्रेण व्यापारयन्नन्तस्वयमि-
त्यर्थः कृतिरधिकाएव प्रवर्तारात् के यो वै सर्वमेव स्मरः प्रजापति-
यो दशकलाय मेव सर्पो यमेवो विद्वन् शिलसार्वितमेव पंचदशाकं

लाग्रात्मैवास्यषोडशीकलासवित्तेनैवाप्पूर्यतेःपत्तीयतेनतदेत
न्नभ्यंयदयमात्माप्रधिर्वित्तंतस्मात्सर्वज्यानिंजीयतआत्मनाचेज्जी
वतिप्रधिनागादित्याहुरिति भाष्यं यइति पूर्वोक्तः संवत्सरः कालरू
पः सोपिषोडशकलः प्रजापतिः अयमपि तन्निदिध्यासनात्तद्रूपप्
वस्त्वीकृपवंवित् पुरुषः सोपिषोडशकलः प्रजापतिः तस्यवित्तंप
वंपंचदशत्वमतेंद्रियप्राणात्मकेलिंगदेहेनापवंपंचदशकलाः तथा
नष्करणावच्छिन्नआत्मैवास्यषोडशीकलासप्राणकेनवित्तेनपूर्यते
पत्तीयतेच प्रवृत्तिमार्गेणपूर्यते निवृत्तिमार्गेणपत्तीयतेउपरमे
प्राप्नोतितदाषोडशीकलाविशिष्टोभवति तच्चतदेतन्नभ्यंनाभौभ
वंनाभ्यमित्यर्थः छांदसः प्रयोगोनभ्यमिति यद्वा मध्यमदेशोप
स्थितस्य■रथस्यविवर्तितेतेननभ्यमिहरथ्याकाशेवस्थितनेभ्यं
नात्किं यदयमात्माअत्रसनाभावप्येकमर्थंतमितिस्फुटेः प्रथम
यः यथाकुलालचक्रस्यमध्यच्छिद्रेस्थितः कीलकश्चक्रचलने
पिनचलति तद्वदनभ्यो तथा वित्तमाहिरूपितेलिंगदेहे प्रधिः प
रिधिः चक्रपरिधिवत्तद्वाह्यपरिधिस्थानीये तस्माद्विनाशेपिसर्व
ज्यानिंसर्वस्वहानिंजीयतेप्राप्नोतितथापिआत्मनाचेन्नोपयते।
नदाजीवतिजीवन्मुक्तोभवति अथप्रधिनाशरीरेणचेत्तंपद्य
तेनतदा■गात्रगमनगमनंकरोति १९ ॥

वनमालीटीका

स्वभावाधीनत्वमन्यत्परेशाधीनत्वेदर्शयति ईश्वरइति ईश्वरईशा।
नशीलोनारायणः सर्वांतर्यामीयः पृथिव्यांतिष्ठन्पृथिव्याअंतरो
यंपृथिवीनवेदयस्यपृथिवीशरीरंयःपृथिवीमंतरो■यमयति य
आत्मनितिष्ठन्नात्मनोंतरोयमात्मानवेदयस्यात्माशरीरंयआत्मा
नमंतरोयमयत्येषतआत्मांतर्याम्यमृतइतिश्रुतेःसिद्धः सर्वभू
तानांसर्वप्राणिनांहृद्देशेंतःकरणेतिष्ठतिसर्वव्यापकोपिसन्स्वरू।
विशेषेणतत्रनियामकतयाभिव्यज्यते तमहीपार्थिपतिविशे
मउत्नस्कोपालापाकिंकुर्वन् भ्रामयति ■तत्रचालयनसर्वभूता
निप्राणिनः यंत्रारूढानिमायायाःस्वरूपमहत्तेनेक

श्री.गी.
टी.
म.

263

या यथा दारुयंत्रारूढानि कृत्रिमाणि भूतानि सूत्रधारो भ्राम
यति तद्वदित्यर्थः अहमात्मा गुडाकेश सर्वभूताशयस्थितः सर्वस्य
चाहं हृदि संनिविष्टः मत्तः प्रवर्तनं नान्यस्मादित्यादिना स्वस्य सर्वभूतांतःस्थ
त्वस्य सर्वभूतनियामकत्वस्य सर्वात्मत्वस्य चात्र कृष्णेनार्जुनेन
विदितत्वाद्योगोऽस्मिन्नेतयोस्त्वमिति भावः ६१ ॥

उत्तमवैजयंती टीका ९

एवमर्जुनेनोपलक्षितस्य सर्वजीवनिकायस्य प्रकृतिगुणस्वभा
वकर्मादिभिश्चेतनवस्तुभिः कर्म कारयित्वा तेषामभावमुक्त्वेदानी
तस्येश्वर[illegible]पारतंत्र्यं दर्शयन्नीश्वरप्रपत्तिमेव तत्प्रसादादेव संसार
निवृत्तिरित्याह द्वाभ्यां ईश्वर इति हे अर्जुन ईश्वरो निखिलचिद
चिद्वस्तुनियमनशीलः परब्रह्मभूतः पुरुषोत्तमो देवकीनंदन
स्त्वत्सारथिः सर्वभूतानां सर्वेषां ब्रह्मादिस्थावरान्तानां भूतानां चे
तनाचेतनरूपाणां समस्तानां हृद्देशे निखिलभूतप्रवृत्तिनिवृ
त्तिमूलज्ञानोदयस्थले हृदये तिष्ठति इति किं कुर्वन्सन्माययात्म
शक्त्या सत्त्वादिगुणमय्या प्रकृत्या यंत्रारूढानि तत्तत्कर्मानुगुणं स्वे
नैव निर्मितं शरीरं तिर्यगादिरूपं यंत्रमिन्द्रियाश्रितानि आरोहणं
कृतवंति भूतानि चराचररूपाणि भ्रामयन्सन् यथा सूत्रधारो दा
रुयंत्रारूढानि कृत्रिमाणि भूतानि भ्रामयन् स्वयं स्वातंत्र्येण स्वा
नैतिष्ठति तद्वत् एवं श्रुतिरप्याह य आत्मनि तिष्ठन्नात्मनोऽन्तरो य
मयतीत्यादिका पुनः सर्वस्य चाहं हृदि संनिविष्टः मत्तः सर्वं
प्रवर्तत इत्यादि गर्जुनेन तेन परमेश्वरः परोक्षरूपेण नचान्तःस्थितो वा ।
तानि तानि भ्रामयति स एवाहमत्परोक्षरूपेणारथ एवास्थितो वा ।
स्थानारूढानां शरीरेण भ्रामयामीत्यन्वयः स्वस्य शरीरेणापि श्रमणवानिति सू
चितं ६१ ॥

स्वभावाधीनत्वात्प्रकृत्यास्य
राधीनत्वं विहृणोति ॥

मधुसूदनी टीका ९

ईश्वर ईशनशीलो नारायणः सर्वांतर्यामी यः पृथिव्यां तिष्ठन्पृथि
व्या अंतरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमंतरो यमय
ति यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा अंतर्बहिश्च तत्सर्वं व्याप्य ना
रायणः स्थित इत्यादिश्रुतिस्मृतिभिः सर्वभूतानां सर्वेषां प्राणिनां

शेंऽतः करणे तिष्ठति सर्वव्यापकोपि तत्राभिव्यज्यते स महीपा
लिपतिरिवा मत्र मसको सत्तायो हे अर्जुन हे शुक्लस्वहृदंतःकर
णापतादेशमीश्वरेत्वज्ञानंयथापोसीति योमते किंकुर्वन्तिष्ठति
भ्रामयन्नर्तनत्तनश्चालयन् सर्वभूतानि परतंत्राणि माययारूढ।
मनायंत्रारूढानीव सूत्रसंचारादियंत्रमारूढानि दारुनिर्मित
श्रुतधारीनर्ति परतंत्राणि यथा मायावी भ्रामयति तद्वदि [illegible] विधि
त्वर्थशेषः [illegible] ६१ ॥

सदानंदी टीका ॥

स्वभावाधीनताम्नेश्वराधीनत्वमश्नुते हरिरीशानशीलोयो
नारायणपदाभिधः १ सर्वांतर्यामितायस्यप्रसिद्धावेदया
कृतो निष्कम्पधियो यस्य साक्षाद्येनवेदसा २ यस्यहा
र्द्धेशरीरेयस्मात्मंतर्यामयत्यजः यच्च किंचिज्जगत्सर्वं दृश्यो
नेश्रूयतेपिवा ३ अंतर्बहिश्चतत्सर्वं व्याप्यनारायणःस्थितः इ
त्यादिश्रुतिवाक्यानिसंतिश्रीपरमेश्वरे ४ सर्वव्यापकोपी
शः सर्वेषांप्राणिनां विभुः अंतःकरणदेशेतुनिर्मले तिष्ठती।
त्यसौ ५ सर्वभौमो यथा रामो महाराजोऽर्जुनमः उनराको
मत्तायांवैतिष्ठतीति नचैव च ६ व्यापकोपि परेशानस्तत्रापि
व्यज्यते विभुः स्वहृदंतःकरणत्वान्वमीदेशंपरमेश्वरं ७ ज्ञानेयो
यथज्ञातिसं हृष्टस्तद्यनेजेन शहृतः किंकुर्वस्तिष्ठतीयानरयथा
हस्वयंविभुः ८ भ्रामयंश्चालयन्सर्वभूतानीशइतस्ततः
दारुनिर्मितपुत्रयादीन्यवशानियथानरः माययारूढयंत्राणि
हन्सर्वभूतानि सर्वतः सयंत्रायिष्टितानीव भ्रामयंस्तिष्ठन्
ईश्वरः ९ यंत्रारूढानिमायावी भ्रामयंस्तिष्ठतीनरः यद्वामा
याम येयंत्रंशरीरं स्थितयंजनं ११ तत्रारूढाभिमानेनप्राणिजा
नेहितिष्ठति ततस्त भगवानीशो माययाभ्रामयज्जगत् १२
तिष्ठतीतिस्वतंत्रः सर्विलीयोतिसपद्भ्यः नतुकेसर्वविधाना
पारेगैरपियोगिभिः १३ देहादिपंजरंयंत्रंतदारोहाभिमानिता

विहितप्रतिषिद्धेष्वहं निर्ममतां भवेत् १४ अविद्याकामक
र्मादिसामग्री सकला जडा जीवोप्यज्ञानया भ्रान्त्या परतंत्रो ज
डात्मगः १५ न किंचित्कर्तुमस्त्यस्य सामर्थ्यं च स्वतंत्रतः
अतः श्रीभगवानेवानंतशक्तिर्महेश्वरः १६ समस्तं स्ववशी
कृत्वा लोके लोकेश्वरैः सह मायया भ्रामयन्स्वामी तिष्ठति
प्राणिनां हृदि १७ समस्तानुपपत्तीनां परिहाराय सर्वथा मा
ययेति स्वयं श्लोके श्रीमद्भगवतेरितं १८ हृद्गतममलाभं स
र्वलाभाद्धितलाभं विश्वशिनयनाभं शमममेचोज्ज्वलाभं स्फूर्ति
विषयरसाभं पद्मनाभं सकलमुनिमनोभूतनोमि स्फुरत्साभं १९
समस्तलोककर्तारं गोमोरसवदेहिनो मर्त्यविश्वनियंतारं स्वं
दं हृदि गम्ये २० ६१ ॥

नीलकंठी टीका ६१

कोसौ परो यद्वशोहमस्मीत्यत आह ईश्वर इति ईश्वर ईशनशी
लोन्तर्यामी पृथिव्यादीनामस्माकं च सर्वभूतानां सर्वप्राणिनां
हृद्देशेर्जुन हि गुहायां सर्वप्राणिप्रवर्तकस्तिष्ठति कीदृशः सर्व
भूतानि भ्रामयन् ऊर्ध्वाधोमार्गेषु संचारयन् काष्ठपुत्तिका इ
व स्त्रयंत्रारूढानि यंत्रमिव यंत्रं तु कर्मणादि साधने
सर्वप्राणाद्यात्मकं लिंगं तदारूढानि मायया स्वशक्त्या भ्रामय
न्निति संबंधः हे अर्जुन त्वं विश्वहीनतः कारण ईश्वरोसीति
भावः अथाहंकारः सर्वकर्तृयः कर्म करोति यश्चेश्वरपरवशो
हं करोमीति व्याकरोति नयोरत्नेनैवलक्षणप्रदर्शनार्थो मे
ध्वाभाष्ये उदाहृतः गृहस्थहमस्मि महराजेनेच विवर्तते रजसीवेषा
मिति भावत्वाजार्थं गृहस्थकुलमहराजेनेचेष्टाग्निमाहृतस्य
प्रतिपदितिवालस्योनप्राग्निमाहृतेनेशाखे विनिष्क्रान्ताप्रथमेय
मर्क यस्मिन् दिवसे सोमः स्यतेयागार्थेन्त देवजन्मसाफल्य
दिने श्राद्धमहः शाहवाचो श्रमतदिन मदिनमेवनिष्फलता
न तथा च स्मृतिः दशाभिर्जन्मभिर्वेदाध्यायनेशानजन्मभिः स
हस्रैर्जन्मभिः सोमं यागानुपानमर्हतीति सोमयागस्य दौर्लभ्य

दर्शयति तदयमर्थः शास्त्रः कालवचनोपि सोप्येकर्मणि वर्तते
यथा दर्शितोणि मासशब्दो नचैवं सति स्फुटः यागः स्फटिकस्प्रविष्टवा
कृते प्रकाशमिव भवति तथा हृत्कोणे स्वच्छे तदेव विद्रुषा कृते
प्रकाशरूपमिव भवति तेप तेउभे प्रतिविहत्कृते प्रहतीरजसो
प्रकृतिरूपत्वान् रजोगुणकार्यं प्रतिवेधाभिर्विधाभिः कर्मोणाव
वद्देपासना रूपावाय रमेष्ठौ सर्वकर्माणि रूपावाग्रहंकारोमी
मभिमानरूपावा विद्या विज्ञानाविनाभिर्विवर्तते वैपरीत्येनव
नैते लोपासनेकर्मेष्ठे तेपरमात्मतत्त्वप्रकाशकेवेध विक्षेदहेतः
मूढकृते कर्मफलेस्वरूपावरकेवेधहेतवि मर्थः तदेवं भगवान्
पार्थप्रजीवेति सेवाध यन् पत्तसा स्वच्छो तं करणावधानतेन
सुश्लोकैर्धर्मोपिकारं दर्शयति ६१ ॥

आनंदी टीका ६२

एवं प्रकृतिपरवशतामुपदिश्येश्वराधीनतामप्याह एषो
मिश्रकरणेऽहृद्देशलक्षणपरीताभिर्वक्रशो निरूपितः ई
श्वरः परमात्मा प्राणिनां कर्मविपाकं विदित्वा कर्मफलप्रा
पणसमर्थः मायया दैवी ह्येषा गुणमयीति लक्षितया तम
सत्वरयाहंकारिकाप्रकृत्यापारमेश्वर्यासत्त्वप्रकाशावरणश
क्त्यासर्वाणि भूतानि प्राणिजातानि यंत्रारूढानि रजसा तमसा
चैव समाविष्टो भ्रमतीह भावैरनिष्टैः संयुक्ताः संसारप्रतिप
द्येते इत्यादि याज्ञवल्क्यादिस्मरणान्नानायोनिषु परिभ्राम
कं संसारचक्रसारूढानि भ्रमयन् स्वस्वकर्मफलभोगार्थं
जन्ममरणे पुनः पुनरनुभावयन् सर्वेषांभूतानां प्राणिनां
हृद्देशे चैतन्यादिकरणोद्देशेवसति तिष्ठति नियमनार्थमित्यातत्त्व
त्कर्मविपाकं कालस्वरूपेण कलयन् गणयन्स्तिष्ठति इत्यवशप
मतान्कोरवसैन्यान्स्व यामारयि(?)तीत्यर्थः ६१ ॥

एष प्रबंधतः पुनः पुनः प्रतिपादित ईश्वरः परमात्मा सर्वभू
तानां समस्तप्राणिनां हृदि हृद्ये सर्वसंविदधिकरणभूते
देशे वसति नियंता तिष्ठति किं कुर्वन् किंचित्तेषां सर्वभूतानां
ज्ञानात्मकं क्रियात्मकं वा परिस्पन्दितं न तत्सर्वं स एवैकः पर
मार्थः कुर्वन्नपि मायाशक्त्यावभासितपरस्परविभिन्नरूप
नानारूपाणि तानि सर्वभूतानि प्रत्येकमहं करोमीति मिथ्या
भिमाननिवेशनेन भ्रामयन् व्यामोहयन् यंत्रारूढानि यंत्रसू
त्रसंचारादियुक्तिसंपाद्यचेतनवस्तुचेतनक्रियाभिव्यंजक
काष्ठादिसन्निवेशविशेषमारूढानि यथा केनापि युक्ति
मता विशिष्टसन्निवेशविरचिते यंत्रेऽधिरूढे स्वचेतनैः पुभाव
स्वचेतनक्रियाविशेषः क्रियते तथा परमेश्वरेण शरीरयंत्र
मारोप्याकर्तृभूतान्यपि भूतानि कर्त्रभिमानावेशभांजि क्रि
यंते इत्यर्थः एतद्यंत्रारूढावेतिच्छादसनपुंसकवत्त्वं वचन
विवक्षया याप्यप्रयंति ते च शरीरत्रयात्वेन व्यवस्थिते तद्व
स्तुनि न कश्चिद्विशेषः ६१ ॥

+ अधुनोपदेशसर्वस्वसूत्रमिदमाह॥

लासिकी [illegible] टीका

+ ईश्वरोन्तर्यामी सर्वेषां चतुर्दशविधानां प्राणिनां हृद्देशे स
र्वसंविदधिकरणे देहैकदेशे तिष्ठति अप्रच्युतज्ञानबल
वीर्य एव स्थितिविभाति किं कुर्वंस्तिष्ठति यंत्रारूढानि दे
हमेव यंत्रं चक्रमारूढानि भ्रामाणि सर्वाणि भूतानि जीवा
न्मायया निजशक्त्या भ्रामयं स्तादात्म्याध्यासेन मोहयन्

पंचोलीटीका

तदेवं श्लोकद्वयेन सांख्योक्तिमतेन प्रकृतिपारतंत्र्यं च उक्त्वेदानींस्वा
तेस्वमतमाह ईश्वरमिति ईश्वरोनेनरश्वरः ईशनशीलः सर्वभूतानांसर्व
प्राणिनांहृद्देशेविशुद्धांतःकरणेतिष्ठतिकिंकुर्वन्सर्वभूतानि
माययाभ्रामयन् यंत्रारूढानिदवयष्यारादि निर्मितपुरुषादीनि
भ्रामयतिकश्चित्तथासर्वभूतानिभ्रामयन्हृदितिष्ठति ६१

स्वामीरमसिद्धोधिनी

उक्तमेवार्थंद्रढयति ईश्वरइति ईश्वरोंतर्यामी परमात्मा सर्वभूतानां
समस्तप्राणिनां हृद्देशे हृदयमध्ये तिष्ठति किंकुर्वन् मायया स्व
मायया भ्रामका सर्वाणिभूतानिकर्तुमस्वतंत्रत्वाज्जडानि भ्रामयन्
चेतनतासंपादनेन तत्र तत्र कर्मणि प्रवर्तयन् कथमित्याह य
यथासूत्रधारोयंत्रारूढानि यन्त्रसूत्रसंचारादियुक्तिसंपाद्याचेतनवः
चेतनक्रियाभिव्यंजकं काष्ठादिसन्निवेशमात्रारूढानिदारुनिर्माणि
भूतानिभ्रामयति तद्वदित्यर्थः ६१॥

मधुभाष्य

६१॥

216

भाषा अनुवाद टीका

इससे पिछले दोनो श्लोकमे सांख्य आदि मतानुसारी मत वर्योकी प्रकृतिपारतंत्र्य कहै स्वभावाधीनता कही गई अव दो श्लोकसे निजकहै अपना मत कहते है कि हे अर्जुन सकल भूतोंके हृदयमे नियामक रूपसे अंतर्यामी ईश्वर स्थित रहते हैं तो किस प्रकार से ठिके है इस शंकों तापर कहते है कि भूतमात्र को माया जो अपनी शक्ति तिसके जोर से भ्रमण कराते उपस्थित समस्त कर्मोमे प्रवृत्त करावते भये सवमे ठिके है जैसे कठपुतली को सूत्रधार बाजीगर लोगोके सामनेंग मने नचावै है अथवा यंत्र कहै शरीर आरूढ कहै जीवको भ्रमण करावत स्थिति करतेंहै इस पर श्वेताश्वतर उपनिषद के मंत्र का प्रमाण देते है कि एक स्वयं प्रकाश जो परमात्मा सो भूतोमे निगूढ भावसे स्थित और सर्वव्यापी सव का अंतर्यामी और कर्मोका नियंता और भूतोंका आधार रूप और द्रष्टा देखनेवाला और भूतमात्रको चेतन कारी अद्वितीय और गुणातीत है और अंतर्यामी जो बुद्धिमे स्थित करके बुद्धिका नियम करै है और बुद्धि जिसको लखा विहै और जिसको बुद्धि नही जानती और केवल स्वरूप है ६१ ।। हमारे आत्मा और अंतर्यामी तथा

दोहा

ईश्वर हि सभ जीव के स्थित अर्जुन हृद देश माया सें सभ
जीव कों भ्रमावे यंत्र निवेश ८९

267

तमेव शरणं गच्छ सर्वभावेन भारत तत्प्र।
सादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतं ६२

शांकरभाष्यटीका १

तमेवेश्वरं शरणमाश्रयं संसारार्तिहरणार्थं गच्छ आश्रय सर्व
भावेन सर्वात्मना हे भारत ततस्तत्प्रसादादीश्वरानुग्रहात् परां प्र
कृष्टां शांतिं उपरतिं स्थानं च मम विष्णोः परमं पदमवाप्स्यसि
शाश्वतं नित्यं ६२ ॥

आनंदगिरिकृतटीका २

ईश्वरः सर्वाणि भूतानि प्रेरयति चेत् शास्त्रे कैवल्यार्थी सापि पुरुष
कारस्यानर्थकामित्याशंक्याह तमेवेति सर्वात्मना मनोवृत्त्या वाचा
कर्मणा चेत्यर्थः ईश्वरस्यानुग्राहात् तत्त्वज्ञानोत्पत्तिपर्यंतादि।
विशेषः सकार्याविद्यानिवृत्तिस्थानं ६२ ॥

स्वामिकृतटीका ३

यस्मादेवं सर्वे जीवाः परमेश्वरपरतंत्रास्तस्मात् मोमितितत्सादहंकारं
परित्यज्य सर्वभावेन सर्वात्मना तमीश्वरमेव शरणं गच्छ ततस्तस्यैव
प्रसादात् परमामुपशांतिं स्थानं च पारमेश्वरं नित्यं प्राप्स्यसि [illegible]
[illegible] ६२ ॥

पिशाचभाष्यटीका ४

तमेव शरणं सकलदुःखनिवारणमाश्रयं गच्छ भजस्व सर्वभावेन
सर्वं सकलैश्वर्यं मम चास्ति स्वामी स्वयं मम पोषकः स्वयमेवा
चार्यश्चेत्येवमादिभिस्तत्प्रसादात्तस्य शरणागतवत्सलस्यानुग्रहा
त्परां प्रकृष्टां शांतिमुपरतिं मायिकसस्थानं वैष्णवं प्राप्स्यसि गमि
ष्यसि शाश्वतं नित्यं ६२ ॥

रामानुजभाष्यटीका ५

[illegible] मायानिहत्तिहेतुमाह ॥

तमेवेति यस्मादेवं तस्मात्तमेव सर्वस्य प्रशासितारमाश्रितवात्स
ल्यं नात्र वन्नारण्येव स्थितमित्यवगतिं च यथा स्थितामेमां सर्वभावेन स
र्वात्मना मायाप्रेरितेनाज्ञेनैव नयायुद्धा
दौ कर्मसु शरणं गच्छानुवर्तस्व तत्प्रसादादेव भविष्यसि ततोऽमद्ंक्त प्रकारेण
हि करणमवर्जनीयं तथा सति नष्टो भविष्यसि

श्री
गी टी
प्र

268

ब्रह्मादिके ऊर्ध्वीमर्थः पदं ऊर्ध्वगाणो मत्प्रसादात्संशांतिं सर्वक
र्मबंधोपशमनं शाश्वतं च स्थानं प्राप्स्यसि यदभिधीयते श्रुतिशते
स्तद्विष्णोः परमं पदं सदा पश्यंति सूरयः ते ह नाकं महिमानः सचं
ते यत्र पूर्वे साध्याः संति देवा इत्यादिभिः ६२ ॥

अभिनवयमकनटीका ६

स्पष्टार्थम् ६२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

एवमन्वयव्यतिरेकाभ्यां प्रकृते स्वदेहरूपसंस्काराणां वा ईश्व
राधीनत्वात्सर्वेश्वर एव शरणमिति मंडकमवसरे माह तमेवेति
तस्मात्तमेव मामीश्वरं सर्वांतर्यामिणं सर्वभावेन सर्वात्मना शरणं
व्रज जन तत्प्रसादात्परां प्रकृष्टां शांतिं निवृत्तिं शाश्वतं नित्यं स्था
नं च प्राप्स्यसि नंदके स्थले वक्षः परिपीरी ज्ञरनसमहं दंडं दिवालं
यं तेन दिव्यं देवपतिः परात्मा तत्पूजनीयकरणाश्च विलेशि
याणिक वातमेव शरणं व्रज जीवनार्थमिति ६२ ॥

वनमाली टीका ८

तमेवेश्वरं सर्वनियामकं शरणमाश्रय भवसमुद्रोत्तरणा
र्थं गच्छ सर्वभावेन मनसा वाचा कर्मणा साधनांतरमनाहृ
त्येश्वरशरणमेवाश्रयेत्यर्थः तत्प्रसादात्तस्येश्वरस्यानुग्रहात्प
रां शांतिं त्रैदेहिकनिवृत्तिम् विघ्नानिवृत्तिं च ततः शाश्वतं
स्थानं नाशादिरहितं स्थानं वैकुंठाख्यलोकं नित्यमेकांतविशुद्धाप्रि
म्भतशरणं नंदस्वरूपः प्राप्स्यसि ६२ ॥

ऊसमवैजयंती टीका ९

संसारनिवृत्त्युपायमाह तमेवेति हे भारत सर्वभावेन देहेंद्रि
यमनोव्यापारेण तमेवेश्वरं सर्वभूतस्थं सर्वनियंतारं शरण
मनन्यवर्तिनं गच्छ तेषां तद्विशरणमवतनदाज्ञापालनरूपं श्रे
वित ब्रह्मादिकं कर्म कर्तृनौ वै मन्मायाकृतान्त्यानेतन्नष्टो भवि
ष्यसीत्यर्थः तच्छरणागमे व ममत्विं फलं भविष्यतीति
तेनाह तदिति तत्प्रसादात् तस्येश्वरस्यानुग्रहात्परां सर्वोत्कृ

शांतिं निखिलकर्मबंधोपशमनलक्षणां प्राप्स्यसि ध्रुवमश्रुता।
स्यंते निमेकं संस्थानं महाविभूतिविष्णुपदादिशब्दाभिधेयं वैकुं
ठं प्राप्स्यति तद्विष्णोः परमं पदमित्यादिश्रुतेः परं ब्रह्म परं धाम त
द्धाम परमं ममेत्यादिस्मृतेः तत्प्रसादेन तस्मात्तु कर्मणीकृत्य सर्व
धर्मभूतेभ्यः सहृदयत्वादिरूपं कर्म कुर्वित्यभिप्रायः भारतेत्यनेनोक्त
सुकुलमसूतत्वान्नवमस्तवनोगीकारयवोचितो न त्वंतेगीकार इति
सविति ६२॥

++ ईश्वरः सर्वभूतानि परतंत्राणि प्रे-
रयति चेत्तस्मै विधिनिषेधशास्त्र
स्य सर्वपुरुषप्रकारस्य
चानर्थक्यमित्यत्राह॥

मधुसूदनी टीका १०

++ तमेव ईश्वरं शरणमाश्रयं संसारसमुद्रोत्तरणार्थं गच्छ आश्रय सर्वभा
वेन सर्वात्मना मनसा वाचा कर्मणा च हे भारत तत्प्रसादात्तस्यैव
परमेश्वरस्यानुग्रहात्तत्त्वज्ञानोत्पत्तिपर्यंतात् परां शांतिं सकार्याविद्या
निवृत्तिस्थानं प्रकृतीयतत्प्रकाशपरमानंदरूपेणावस्थानं शाश्व
तं नित्यं प्राप्स्यसि [illegible] ६२॥

सदानंदी टीका ११

ईश्वरः सर्वभूतानि परतंत्राणि मायया प्रेरयत्येव चेत्तत्र समानमानवी।
कोक्रतेः स्मृतेः १ विद्यादिप्रतिपादिमाः पौरुषस्य तथैव च उस
आह तमेव शरणं गच्छ सर्वथा २ संसारजलधेः पारोत्तरणार्थ्य
तमाश्रय मनसा कर्मणा वाचा सर्वभावेन भारत ३ तदीश्वरस्य श्री
विष्णोः कल्याणगुणवारिधेः अनुग्रहात्सर्वतत्त्वज्ञानोत्पत्तेः प
रां ४ सकार्याज्ञानबाधात्मशांतिं स्थानं परं पदं स्वप्रकाशपरानंद
मनर्वचनीयं वरं ५ निष्कूटस्थमद्वैतं निर्मलं प्राप्स्यसि ध्रु
वं विद्यादिशास्त्रस्य पौरुषस्य च सर्वथा ६ इदमेवाहि सार्थक्यं यदी
शं शरणं व्रजेत् न तु तेनान्यत् किंचित्प्राप्नोतीह फलं नरः ७ ईश्व
रानुग्रहादेव सर्वं सर्वस्य जायते ईश्वरानुग्रहेनस्याघातितवमसा।
ह्यभिः ८ यथा प्रसन्नो भगवान्प्रपद्येदेवं कदाचन सर्ववेदप्रमा
णैश्च प्रमाणो भारते तथा ९ सर्वं विहाय कर्तव्यमिदमेव सुनिश्चितं वा
सुदेवैकशरणः सर्वं प्राप्नोति शोभने १० अतस्तमेव शरणं गच्छेमा
हरमापतिः ११ ईशावेनहरिं भजस्व निगमप्रोक्तेन मार्गेण भोः

श्री- गी टी- प्र-

२६९

स्येतस्य समाश्रयस्व स मनो भक्त्याभयेनादरात् स एवेश्वरो हृदमाश्रयस्व तु हरेः प्रेमाणा युक्तत्वेन च स्वात्मानं प्रकटीकरोतीति भजतामेवं सर्वे हरेः ॥ १२ ॥ ६२ ॥

नीलकंठी टीका १२

तमेव ईश्वरं सर्वभावेन सर्वात्मना शरणमाश्रयं गच्छ आश्रयस्व तत्प्रसादात् तदनुग्रहात् परां शान्तिं उपरतिं समाधिमिति यावत् तथा च सूत्रे समाधिसिद्धिरीश्वरप्रणिधानादिति स्थानं च परं विष्णोः पदं मोक्षं शाश्वतं नित्यं प्राप्स्यसि ६२ ॥

आनंदी टीका १३

तमेवोक्तलक्षणमीदितं च तं रंशान्तकं परमेश्वरं सर्वेषां मनोवाक्कायानां भावेन सात्विकेन स्वकर्मानुष्ठानेन शरणं गच्छ समहचनशामार्पणेन संसारबंधमोक्षार्थमाश्रय तस्य परमेश्वरस्यानुग्रहात् परां शान्तिं शोकमोहादिभिः कृतस्य चित्तविक्षेपस्याभावं स्थितप्रज्ञत्वं प्राप्स्यसि स्थितप्रज्ञत्वफलं च शाश्वतं स्थानं परमस्य स्वरूपं प्राप्स्यसि ६२ ॥

रामकंठी टीका १४

यत एवं तत्त्वत एव सर्वकर्ता परमेश्वरस्तदा सर्वथा निरस्तमिथ्याभिमानस्तमेवैकं शरणं गच्छात्मत्वेन प्रतिपद्यस्व मिथ्याभिमानजेभ्यो हर्षशोकादिबंधनेभ्यो विमुक्तः मत्प्रसादात् समेवैकस्येश्वरस्य प्रसादादनुग्रहादभिव्यक्तात् स्वाभाविकात्मैमल्यात् परां सिद्धिं निरस्तरागतानं निष्ठां तत्फलं च परं स्थानं निरुक्तं धाम तत्स्वरूपं प्राप्स्यसि अधिगमिष्यसि ६२

+ अथ तात्पर्याथामाह तितीवीरूपाय माह ॥

लासिकी टीका

+ हे भारत तमेव हृद्देशे स्थितमीश्वरं सर्वभावेन सर्वात्मना शरणं गच्छ अपाः स तु तस्येश्वरस्य प्रसादात्स्वरूपप्रकाशनरूपादनुग्रहात् परां शान्तिं सर्वविकल्पोपरमं प्राप्स्यसि जीवदशायां देहपाते च शाश्वतं स्थानं मोक्षाख्यं च प्राप्स्यसि

६२

पंचोलीटीका

यस्मात्सर्वेजीवापरमेश्वरपरतंत्राः तस्मात्त्वमितिहेभारत त्वमेव मीश्वरंशरणमाश्रयंसंसारार्तिहरणार्थंगच्छ्याश्रयसर्वभावेन। सर्वात्मनातत्प्रसादादीश्वराणुग्रहात्परामुत्कृष्टांशांतिं उपरतिंचस्थानंममविष्णोःपरमंपदंशाश्वतंनित्यंप्राप्स्यसि ६२

रणवीरसमिद्धोधिनी॥

यस्मादेवं सर्वेषांपरमेश्वरपारतंत्र्यंतस्मात्तमेवेति स्पष्टार्थोयं श्लोकः ६२॥

मधुभाष्य

६२॥

भाषा अनुवादटीका

जब कि ईश्वरही सर्वभूतमात्रकाप्रेरकहै और उसीकीप्रेर।
णासे सकल कर्म्म प्राणी करते हैतो फेरि अपना उद्धव्यकरना
कृष्णा है इस अभिप्रायसेकहतेहैं कि जिसहेतुसेजीवमात्र परमेश्व
रके वशीभूत है इससेहेभारत अर्जुन तुम अहंकारकोपरित्या
गकरके सम्यक प्रकार से उसी ईश्वरकी शरणगृहण करो तद
नन्तर तिनकी कृपासे परा कहै उत्तम शान्ति औ परमेश्वर सम्ब
धी नित्यजो स्थान सो पावोगे यह भगवान अर्जुन सेकहा ६२

दोहा

ताकी शरणी हि जाहु तुं सर्वभावभारभारत ताकीकृपा
परमशांतिको स्थानप्रापहि शाश्वत ६२॥

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया वि
मृश्यैतदशेषेण यथेच्छसि तथा कुरु ६३

शांकरभाष्य टीका १

इत्येतत्ते तुभ्यं ज्ञानमाख्यातं कथितं गुह्यात् गोप्यात् गुह्यतरम्
अतिशयेन गुह्यं रहस्यमित्यर्थः मया सर्वज्ञेनेश्वरेण विमृश्य वि
मर्शनमालोचनं कृत्वैतद्यथोक्तं शास्त्रमशेषेण समस्तं यथोक्तं
चार्थजातं यथेच्छसि तथा कुरु ६३ ॥

आनंदगिरिकृत टीका २

शास्त्रमुपसंहर्तुमिच्छन्नाह इतीति ज्ञानमिति ज्ञाने करणव्यु
त्पत्त्या गीताशास्त्रं यथेच्छसि तथा कुरु ज्ञानं कर्मोपदिष्टं
तदनुतिष्ठेत्यर्थः ६३ ॥

स्वामिकृत टीका ३

सर्वगीतार्थमुपसंहरन्नाह इतीति
अनेन प्रकारेण ते तुभ्यं सर्वज्ञेन परमकारुणिकेन श्रीपरमेश्व
रेण मया ज्ञानमाख्यातं उपदिष्टं कथंभूतं गुह्याद्गोप्याद्रहस्यमन्त्र
योगादिज्ञानादपि गुह्यतरमेतन्मयोपदिष्टं गीताशास्त्रमशेषतो वि
मृश्य पर्यालोच्य पश्चाद्यथेच्छसि तथा कुरु एतस्मिन्पर्यालोचिते स
ति तव मोहो निवर्तिष्यत इति भावः
६३ ॥

पिशाचभाष्य टीका ४

इति इत्येतत्तव ज्ञानं ब्रह्मसंबोधलक्षणमाख्यातं कथितं गुह्यतरं
रहस्यतरं विमृश्य विचार्य एतदशेषेण साकल्येन यथेच्छसि त
था कुरु ६३ ॥

रामानुजभाष्य टीका ५

इति ते ज्ञानमिति इत्थं वेतेनमुमुक्षुभिः अधिगन्तव्यं ज्ञानं सर्वस्मात्
गुह्यात् गुह्यतरं कर्मयोगविषयं ज्ञानयोगविषयं भक्तियोगविष
यं च सर्वमाख्यातं एतदशेषेण विमृश्य स्वाधिकारानुरूपं यथेच्छ

श्री॰
गी॰ टी॰
प्र॰

272

सितयाऽऽकृतकर्मयोगे भक्तियोगे वा यथेच्छमातिष्ठेत्यर्थः ६३

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं ६३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

अथ सर्वगीतार्थमुपसंहरन्नाह इतीति इत्येवं प्रकारेणानेन
धेमया करुणातीवेन ज्ञानमात्मानात्मविवेकरूपं गुह्याद्गोप्याते
किंभूते गुह्यान्मंत्रादिरहस्यादपि गुह्यतरं गोप्यतमं एतदशेषेणाशे
षेण वापरवाक्यानुसंधानपूर्वकं विमृश्य विचार्य यथेच्छसि मोक्षमा
र्गमर्थं वा कर्म यथायं कुरु ६३ ॥

वनमाली टीका ८

सर्वगीतार्थमुपसंहरन्नाह इतीति इत्यनेन प्रकारेणानेन मया मति
प्रियाय ज्ञानं भगवदेकसाधनत्वादिविषयकं मोक्षसाधनं गुह्याद्गु
ह्यतरं परमरहस्यादपि संन्यासात्कर्मयोगाद्रहस्यतरं भगवदे
कशरणत्वज्ञानस्य संन्यासादिफलत्वात् आख्यातं सम्यक् कथि
तं मया सर्वज्ञेन परमात्मना एतद्विमृश्य पर्यालोच्य यतनमयोप
दिष्टगीताशास्त्रमशेषेण समस्तं सर्वमेकवाक्यतया ज्ञात्वा स्वा
धिकारानुरूपेण यथेच्छसि तथा कुरु तेन वेतद्विमृश्यैव कामका
लेनमर्थः अथवेतरके शुद्धान्तःकरणस्य मम त्वं भगवदर्पणबु
द्ध्या निष्कामकर्मानुष्ठानेन ततः शुद्धचित्तस्य विविदिषोत्पत्तौ गुरुमु
पसृत्य ज्ञानसाधनवेदान्तवाक्यविचारपरायणस्य कर्मसंन्यासल
क्षणो भगवदेकशरणतया विविक्तसेवादिज्ञानसाधनाभ्यासात्क्षे
त्रमननिदिध्यासनैर्भगवत्परो ज्ञानलाभप्रसादो मोक्षः तत्र
यादेस्तु संन्यासानधिकारेण मम त्वादेः करणशुद्ध्यनंतरं अपि भ
गवदर्चनापालनीयलोकसंग्रहार्थं वा यथा कथंचित्कर्माणि कुर्वतो
पि भगवदेकशरणतया सर्वजन्मकृतसंन्यासादिपरिपाकाद्भगव
दनुग्रहमात्रेणैव वा भगवत्परोक्षोऽपरोक्षाग्रिमजन्मनि प्राप्तज्ञानमा
लाभेन संन्यासादिपूर्वकं ज्ञानोत्पत्त्या वा मोक्षो भगवदेकशरणतोत्पत्तिर्भ
सर्वधामभ्यस्तानेनांग विचारेण मत्कीर्तिरिति विचार्यैव नानाविधमोक्षहावका
यकिति ६३ ॥

ऊसमैवजयंती टीका ८

सकलगेयार्थमुपसंहरन्नाह इतीति इतिसर्वैकप्रकारकेज्ञाने।
त्तार्थेनेकर्मभक्तिज्ञानात्मनेनेतिनिरूते गीताशास्त्रगुह्यात्स्ववेला
तमेतद्यद्रहस्यशास्त्रदपिगुह्यतरमतिगोप्यं मयासर्ववेषेणाबला
र्थिनानेनयमात्यात्तेप्रोक्तं पत्तगीताशास्त्रमशेषेणासामग्रेण
विमृश्यशास्त्रोक्तंसर्वाणि विवेचयकृतिगभेवेत्तत्कर्मभक्तिवाज्ञाने
वाविचार्याथवायोग्यंसियथाप्रवेशमभेवेत्तथाकुरु समस्तवचनात् प्रकेऊ
रु अथवा स्वस्वात्र ज्ञानाभि[illegible]मानादिना दनेऊविमर्षः ६२

+सर्वगीतार्थमुपसंहरन्नाह॥ मधुसूदनी टीका ९

+ इतिचनेनप्रकारेणतेनमममेतन प्रियायज्ञानमात्ममात्रविषयेमो।
दसाधनेगुह्यात्गुह्यतरंपरमरहस्यादपिसंन्यासांतात्कर्मयोगादहं
सतत्वेनफलभूतत्वात् ध्यानात्संमनानात् कथितंमयासर्वज्ञेन
परमात्मनत्वतो विमृश्यपर्यालोच्यपतन्मयोपदिष्टंगीताशास्त्रम।
दोषेणासामस्त्येनसर्वैकवाक्यतयाचालास्वाधिकारानुरूपेणाय
थेच्छसितथाकुरुतत्वेनतद्विमृश्येवकामकारेणायर्किचिदस
पेः अत्रचैतावदुक्तं शुद्धांतःकरणस्यममदोमौदसाधनचा
तोस्मात्तियोगपलाप्रतिवेधकपापक्षयार्थफलाभिसंधिपरित्यागेन
भगवदर्पणबुध्यावर्णाश्रमधर्मानुष्ठाने ततःशुद्धांतःकरणस्य
विविदिषोत्पत्तौगुरुमुपसृत्यज्ञानसाधनवेदांतवाक्यविचारायवा
ऽणाम्स्य सर्वकर्मसंन्यासः ततोभगवदेकशरणतया विविक्तदेशसे
वादिना नसाधनाभ्यासाच्छ्रवणमनननिदिध्यासनैरात्मसाक्षात्का
रो मम्यामोक्षः इति तद्धियादेकसंन्यासानधिकारीणांममदोरतः
करणशुद्ध्यनंतरमपिभगवदाज्ञापालनाय लोकसंग्रहायचयथा
कंचित्कर्माणिउक्तैनापिभगवदेकशरणतया पूर्वजन्मकृतसं
म्यासादिपरिपाकाद्धाहिरण्यगर्भस्यायेनतदनेपदेशाद्धाभगवदव
ग्रहमात्रेणोद्धवतत्वज्ञानोत्पत्तिमजन्मनिवृत्ताह्यणजन्मलाभेन
तेस्मासादिपूर्वकज्ञानोत्पत्यावामोक्ष इतिपर्वविचारेणैवनास्तिमो
क्षावकाशइतिभावः

इदानीं सर्वगीतार्थमादेरप्युपसंहरन् इत्थनेन प्रकारेण तु मंत्रे मास
हायच १ ज्ञानमात्मैकविषयं मोक्षसाधनमान्तरं यदेवात्मैनसंगोप्याद्
विशेषतेरमहत् कर्मसंन्यासपर्यंतां कर्मयोगाद्यो विनान् रहस्यतर
मस्तीदं न फलत्वाद्यत्नतः ३ सर्वतेनेश्वरेण मनमेनारामहेतुना श्रा
तमेनान्मया साक्षात् कथितं परमेष्ठिना ४ एतन्मयोपदिष्टं गीता
शास्त्रमशेषतः पर्यालोच्य धियाभ्यासात् कालेन विवेकतः ५ ए
कवाक्यतया ज्ञात्वा स्वाधिकारानुरूपतः श्रेयोमार्गं विनिश्चित्य यथेच्छ
सि तथा कुरु ६ एतदुक्तं भवत्यत्र गीताशास्त्रार्थसंग्रहे नरस्यात्महि
तस्यैव मनोमोक्षसाधने ७ कर्मयोगो यथाशास्त्रं फलासंगविव
र्जितः ईश्वरार्पणधिया सम्यक्कृतः सत्वविशुद्धिकृत् ८ ज्ञानमस्त
यते प्राप्यामायस्य कर्मणः कषायकर्मभिः पक्वे मनो ज्ञाने प्रवर्तते
ते ९ इति स्मृत्यनेनैव क्रमेणैव मनेनैव निवाकृतः निष्कामः कर्मयो
गो मोक्षस्य साधनं मतं १० ततः शुद्धधियः सम्यग्वैराग्यादियुतस्य
च सम्यग्विविदिषोस्तावद्वाचार्यमुपसत्य च ११ ज्ञानसाधनवेदां
तगीर्विचाराय शास्त्रतः समस्तकर्मसंन्यासो ब्राह्मणस्य विधीयते
१२ ततः कुलैकशरणं तत्पार्श्वं त्वं साधनैः शमादिभिर्नित्यो
श्रवणादिपरस्य च १३ ब्रह्मात्मैकावबोधस्य साक्षात्कारस्य सत्वतेः
शाड्भावेन मोक्षो हि सिद्ध इत्येव निर्णयः १४ तदिपादेस्त्वसंमास्या
नधिकारिनयातस्या समतोस्त्रितसः शुद्धो ज्ञानतायां तदनंतरं १५ ई
शाज्ञापालनार्थं च लोकसंग्रहसिद्धये यथाकर्त्तुं चितं कर्माणि कु
र्वते पिविपश्चितः १६ कुलैकशरणत्वेन पूर्वजन्मकृतादपि सेवा
ज्ञादेः परब्रह्मज्ञानं कृष्णप्रसादतः १७ जायते तेन सिद्धः स्यान्मो
क्षस्त्विति निर्णयः एवं विचारितेशास्त्रे पीठापर्यायरोधतः १८ नो
क्तिमोहाव काशोणुमात्रमपिसारार्थं हृदैः सकलं निगमसारं मोक्ष
दानैकहेतुमतिमिरविदारं सद्गतिहेतुः कुरुते हठमतिसविमार्ग
वलविघातिनां सविमलविषयाणां विधानं मोहमिलनसम्यक्दारं १९ ६३॥

नीलकंठी टीका १८

सर्वगीतार्थमुपसंहरति इतीति इति एवंप्रकारेणैव ते मया स
र्वज्ञेन परमकारुणिकेन ज्ञानमाख्यातं गुह्याद्गुह्यतरं रसायनव
त् पापहरं श्रुतिशिरसामपि रहस्यं एतदशेषेणाशास्त्रार्थज्ञानेन विमृश्य।
पर्यालोच्य यथेच्छसि तथा कुरु ६३ ॥

आनंदी टीका १८

एवं निरवशेषेण सर्वज्ञान सर्वस्वमुपदिश्य तटस्थीभूय सो
त्साहयति
हार्दैन समर्पणाय कौशलमिव प्रस्तुनकार्यसिद्धये प्रोत्साहयति
इतीनेन इति चेतसा सर्वकर्माणीत्यादि समनन्तरोक्तप्र
कारेण मया तव गोपनीयादपि परमगोपनीयकस्यापि नप्र
काशितं ममैश्वरस्य भूभारभूताः क्षत्रियाः एतेवधं प्रसंहरणी
याः इति भविष्यदर्थावबोधनमाख्यातं सर्वथा प्रकटीकृतं
एतज्ज्ञानविनोदस्य ज्ञानमशेषेण पूर्वापरार्थानुसंधानेन वि
मृश्य यथेच्छसि तथा कुरु अस्मद्वचनमात्रेण कर्षीमुपाल
म्भः ६३

रामकंठीटीका १८ ॥ इति निरवशेषमनन्तरज्ञानसर्वस्वमुपसंहरन्नाह ॥

स्पष्टार्थः श्लोकः ६३ ॥

लासिकी टीका

+सर्वगीतार्थमुपसंहरन्नाह ॥

+इत्युक्तेन प्रकारेण मया सर्वज्ञेन परमकारुणिकेन श्रीपर
मेश्वरेण तेऽनन्यभक्ताय ज्ञानं गभीकृतबुद्धियोगादिकम
हितलक्षणमाख्यानमुपदिष्टं कथंभूतं गुह्याद्रहस्यात्संत्र
निरोधयोगादिज्ञानादपि गुह्यतमं नातः परतरं किंचिद्रहस्यं
वक्तव्यमस्तीति एतन्मयोपदिष्टं शास्त्रमशेषतः सामस्त्येन
न त्वेकदेशेन विमृश्य पर्यालोच्य स्वाधिकारानुसारेण यथे
च्छसि तथा तेनैव प्रकारेण कुरु अनुतिष्ठ

गी.
टी.अ.

२७४

सर्वगीतार्थमुपसंहरति इति हे इत्यनेन मया सर्वज्ञेन तेन मे
भ्यमिति एतद्गुह्याद्गुह्यतरं रहस्यं ज्ञानमाख्यातं उक्तमेतत्
यथोक्तं शास्त्रमशेषेण समस्तं यथोक्तं वार्थजातं विमृश्य
विमर्शनमालोचनं कृत्वा यथा यथेच्छसि तथा कुरु ६३

रत्नवीर समिद्धोधिनी

सर्वधर्मार्थमुपसंहरन्नाह इतीति एषोऽपि व्यक्तार्थः एवं
यथेच्छसि तथा कुरु इत्युपेक्षाभासः स्वातंत्र्यदानमिवाभास
मानोक्तिमत्यपेक्षातो विंत्यात् विमृश्यैतदशेषेणेत्यनेन निः
शेषमुक्तार्थविमर्षणस्य प्रागेव विधानानुपपत्तेश्च किंब
ष्येनोक्तं भवति तदुपदिष्टार्थविमर्षणानात्म . . . कृत्येन
वर्तनमधोगत्यादकन्यान्निषिद्धमेव मयाविमृश्येति तस्मि
न्नवसरे सदोषस्य निहतेः संभवात् स्वधर्ममेवाचरसीति स्वाच्छ
न्द्यं तवनिरमालमेवानुमिष्टमिति ६३ ॥

मधुभाष्य

६३॥

भाषा अनुवाद टीका

अब समस्त भगवद्गीता का अर्थ कहे तात्पर्य कहते हैं कि इस प्र
कार से मैने दया करके तुमको ज्ञान उपदेश दिया और सो
ज्ञान कैसा है इस अपेक्षा से कहते हैं कि गुह्य कहे गोपन क
रने योग्य तथा मंत्रयोग आदि से भी जो ज्ञान गुह्यतर अति र
हस्य है सोई मैने कहा इससे तुम गीताशास्त्र को अच्छी तर
ह आलोचन करके फेर तुमारी जैसी इच्छा होय तैसा करो
भावार्थ यह कि इस गीता के अर्थ को विचार करने से अवश्य
ही तुमारा मोह विहत हो जायगा यह भगवान ने कहा ६३

दोहा

कह्यो ज्ञान यह तोहि को अतिपावन मति मेंहु याहि वि
चार अशेषसें जो चाहत करसेहु ६३॥

सर्वगुह्यतमंभूयः शृणुमेपरमंवचः इष्टो
सिमेदृढमितिततोवक्ष्यामितेहितं ६४ ॥

शांकरभाष्यटीका १

भूयोपिमयोच्यमानं शृणुसर्वगुह्यतमं सर्वगुह्येभ्योऽत्य
न्तगुह्यतमं रहस्यं उक्तमप्यसकृद्भूयः पुनःशृणुमेमम परमं
प्रकृष्टं वचोवाक्यं नभयात् नाप्यर्थकारणाद्वावक्ष्यामि किंतर्हि
इष्टःप्रियोसिमे मम दृढमव्यभिचारेणेति कृत्वा ततस्तेन कार
णेन वक्ष्यामि कथयिष्यामितेतवहितं परंज्ञानप्राप्तिसाधनं ६४

आनंदगिरिकृतटीका २

गीताशास्त्रस्यापौर्वापर्येण विमर्शनद्वारा नासर्व्यार्थप्रतिपत्त
मत्समर्थश्चेत्याह भूयोपीति किमर्थं मिदंकृतं पुनःपुनरभि
धीयते इत्याशंक्याह नभयादिति ६४ ॥

स्वामिकृतटीका ३

अतिगंभीरंगीताशास्त्रार्थमशेष तःपर्यालोचयितुमशक्नुवंतःकृपयास्वयमेवतस्यसारं संगृह्यकथयति सर्वगुह्यतममिति॥

त्रिभिः सर्वेभ्योगुह्येभ्योगुह्यतमंमेवचस्तत्रतत्रोक्तमपिभूयःपु
नरपिवक्ष्यमाणंशृणुपुनःपुनःकथनेहेतुमाह इष्टइतिमेम
मत्वमिष्टः प्रियोसिइतिमत्वाततएवहेतोस्तेहितंवक्ष्यामियद्वावे
ममेष्टोसिमयावक्ष्यमाणोवचस्त्वं सर्वप्रमाणोपेतमितिनिश्चय
मतस्तेवक्ष्यामीत्यर्थः दृढमतिरितिकेचित्पठंति [illegible]

पिशाचभाष्यटीका ४

सर्वगुह्यतमंसर्वरहस्यतमंभूयःपुनरपिशृणुमेपरमंवचस्तत
स्मात्स्मात्हितेकुशलम् ६४ ॥

रामानुजभाष्यटीका ५

सर्वगुह्यतममिति सर्वेष्वेतेषुगुह्येषुभक्तियोगस्यश्रेष्ठत्वात्गु
ह्यतममिति सर्वमेवोक्तं इदंतुतेगुह्यतमंप्रवक्ष्याम्यनसूयवेइत्या
दिनाभक्तिसर्वमेवोक्तं इदंतुतेगुह्यतमंप्रवक्ष्याम्यनसूयवेइत्या
भूयोपितद्विषयंपरमंमेवचः शृणुइष्टोसिमेदृढमितिततो
स्तेहितंवक्ष्यामि ६४ ॥

श्री·
गी· टी·
मु·

276

अभिनवगुप्तकृत टीका ६

ब्राह्मणादीनां कर्मप्रविभागनिरूपणस्य स्वभावो वश्य मतित्रा
मतीति तत्रिगुणस्वभावस्य भवतो निष्कृतोपि प्रकृतिः स्वभावाख्या
नियोक्त्री तामव्यभिचारेण भजते केवलेन यानिष्कृतस्य गुणपाप
संबंधः अनेन मदभिहितविज्ञानप्रमाणपुरःसरीकारेण कर्म
णप्रवृत्तिः तथा सति वर्योनिवृत्तस्यात्मस्वार्थस्य परिकार्यं वच
नतात्पर्यमहावाक्यार्थस्य अर्वाचरवाक्यानां स्वलार्थः संदेहेण
ज्ञानस्य प्रायुक्तस्य निःशेषवाग्जालपरिहारेण निश्चितमाह तद्यावि
सुहृद्येमादि सर्वमेतद्व्याख्यातमिति न पुनरायस्यते पूर्वपक्षः
परमात्मावश्यं शरणं वेत्याह: तत्रापि एतत्रैकं अर्थं वैदुरीष्ठ
न्म मयि विस्पष्टेन कर्माण्यस्थाति भाजि भवति नहि निशितै
तरतरवरकोटिविदारितसमदकरिकरटगलितमुक्ताफलानि
करपरिकरप्रकाशितप्रतापमहसि सिंहकिशोरके गृहमपिति
ष्ठति चपलमनसो विद्रवणमात्रवत्सशालिनो हरिणपोतकाः
स्वैरं स्वव्यापारपरिशीलनापटुभावमवलंबन्ते इति तमेव शरणं
गच्छेत्युपक्रम मत्प्रसादादिति निर्वाहवाक्यमभिदधद्भगवान्स्व
मात्मानमीश्वरं वासुदेवं चैकतया योजयतीति तद्देवदेज्ञानमुक्तं
शत्यादेशोनादपि शृष्टापरमाद्वैतप्रकाशनात् एतच्चाशेषेणापि
स्वयोनितात्पर्यमत्र विचार्यमर्थः तत्रतात्पर्यपर्यावसरमस्माभिः
स्वगीतार्थसंग्रहे एवं प्रकाशितम् यद्यपि तथापि स्फुटमशेषविमर्शी
नं प्रदर्शयितुं उपादेयतमं भवेदः नास्मिन्विरूप्यमाणोस्य यमाणेवा
मतिस्त्यानि [illegible]
[illegible] ॥

परमार्थप्रपा टीका ७

अशेषोक्तप्रकारेणोपायैकतेमशास्त्रमर्थं त्वतिपरमकारुणि
कः परमात्मा सन्देवेण सर्वगीतार्थसारं वक्तुमुपक्रमते सर्वगु
ह्यतममिति त्रिभिः सर्वमार्गे हेयोपि परमग्रह्यतममवद्यमाण
मेवचः श्रृणु नतनमे गोदासीनस्य परमात्मनस्तत्त्वमपि कथ्यमेता

वान्ममतावद्वेव यस्मादाह इष्टइति यतस्त्वं दृढमतिरिष्टस्तेक
स्य इति मे इष्टोसीष्टः समतोसिततस्तेन कारणेन ते हितमुप
कारकं वक्ष्यामि ६४ ॥

वनमाली टीका ८

इति गंभीरस्य गीताशास्त्रस्याशेषतः पर्यालोचनक्लेशनिवृ
त्तये कृपयास्वयमेव तस्य सारं संक्षिप्य कथयितुं प्रतिजानी
ते सर्वेति सर्वेभ्यो गुह्यात्कर्मयोगादितो गुह्यतमम मतिरहस्य प
मेकस्मैचित्कथनीयं परमं सर्वतः प्रकृष्टं मे मम वचो वाक्यं
भूयः तत्र तत्रोक्तमपि स्वपरत्र्वहार्थं पुनर्वक्ष्यमाणं शृणु त
ल्लाभश्रद्धो भव कस्माद्यत्नेनाब्रवीमि किं विशिष्टः प्रियोसि मम दृ
ढमतिशयेनेति यतस्तेनैवेष्टोन वक्ष्याम्यदृष्टोपि सन्नहं।
तेन तव हितं परमं श्रेयः दृढमतिरिति पाठे यतस्त्वं दृढकर्णोसि
तिपाठे यतस्त्वं दृढमतिरतो वक्ष्यामीत्यर्थः ६४ ॥

ऊरुमवैजयंती टीका ९

सर्वेभ्यः कर्मज्ञानादिसाधनेभ्यो भक्तेः साधनसाध्यरूपत्वाच्छ्रे
ष्ठत्वं कथयितुं प्रतिजानीते सर्वगुह्यतममिति भूयः इदं तु ते गुह्यतम
प्रवक्ष्याम्यनसूयवे इत्यादिना पूर्वं यद्गुह्यतमं मया प्रोक्तं तदेव भूयः
पुनरपि मे मम सर्वगुह्यतमं सर्वेभ्यो गुह्येभ्यो रहस्यमेवादिष्टमथ्यैः
निशायितं गुह्याद्गोप्यमिति सर्वगुह्यतमं तत्र तद्गुह्यतमम् कृ
मत्र तु सर्वगुह्यतममितीयान्विशेषः परमं राजविद्या राजगुह्य
पवित्रमन्मना भवेत्यादिना पूर्वं यदुक्तं तस्मात्प्रकृष्टं वचः स
र्वगीताशास्त्रसाररूपं वचनं शृणु सावधानतया श्रवणोत्कर्णै
त्र शास्त्रसारमेतत्तु सर्वगीतासारमिति विशेषः ततः कथनस्य
पि इष्टेपि वत् किं प्रयोजनमित्याशंकायां तत्र स्वहेतुकं प्रयो
जनमाह इष्टइति यतस्त्वं मे ममेष्टः परमप्रियोसि ततोपि दृढम
तिरीहाकोनिश्चयबुद्धिः न स्विप्रमाणमिममापन्नत्वाद्यकोक
मक्रोधणामिंद्रियाणामित्याद्यविद्यासाभावस्य मयि त्वयैवोक्त
वान् ततो हेतोस्तेन तव हितं योगिनो महोदयविधिकरं वचो वक्ष्या

+ प्रतिगंभीरस्य गीताशास्त्रस्याशेषतः पर्यालोचनेन क्लेशनिवृत्तये कृपया स्वयमेव तस्य सारं संक्षिप्य कथयति ॥

श्री॰
गी॰ टी॰
प्र॰

277

मित्र यात्पि तदेवानशेषं नात्मदिनाशयः ६४ ॥

मधुसूदनी टीका ९

+ सर्वं हि गुह्यात्कर्मयोगात् गुह्यतरं ज्ञानमाख्यातमधुना तु कर्मयोगात्तत्फलभूतज्ञानाच्च सर्वस्मादतिगुह्यं रहस्यं गुह्यतममपरमं सर्वतः प्रकृष्टं मे मम वचो वाक्यं भूयः तत्र तत्रोक्तमपि त्वदनुग्रहार्थं पुनर्वक्ष्यमाणं शृणु न लाभपूजाख्यात्यर्थं त्वां ब्रवीमि किंतु इष्टः प्रियोऽसि मे ममातिदृढमतिशयेन रतियतस्तेनैव हेतुना वक्ष्यामि कथयिष्याम्यहं इष्टोऽसि त्वं हि ते तव हितं परमश्रेयः [illegible] ६४ ॥

सदानंदी टीका ११

प्रतिगंभीरभावस्य गीताशास्त्रस्य सर्वतः पूर्वापरपरामर्शोद्भूतक्लेशनिवृत्तये १ कृपया स्वयमेवेशः संक्षिप्य तस्य कथ्यते। मात्मसिद्धांतं भगवान् कारुणानिधिः २ कर्मयोगात्पराद्गुह्याज्ज्ञानं गुह्यतरं स्मृतं इदानीं कर्मयोगाच्च तत्फलाच्च बोधतः ३ सर्वस्मादपि संयोगाद्रहस्यमतिदुर्लभं प्रकृष्टं सर्वतो वाक्यं ममात्र सेव्यरस्य च ४ उक्तं तत्र कृपया तत्र तत्रापीति कायया वक्ष्यमाणं शृणुष्व मे॥ किमर्थं तेन ब्रवीम्यहं ५ न लाभपूजाख्यात्यादिसिद्धये किं तु मे दृढः प्रियोऽस्यतिशयेनेति यस्मात्तेनैव हेतुना ६ कथयिष्याम्यहं इष्टोऽपि श्रेयस्ते परमं हितं ७ भक्तिहेतोः प्रेमवतामतिदुर्लभमानवं सिद्धांतरत्नं परं रत्नं श्रावितं तेन लब्धं हि कोऽस्य तेन तो विना श्रेयसे परतिकं श्रुतं ८ ६४ ॥

नीलकंठी टीका १२

एवं यथेष्टकरणमभ्यनुज्ञायापि अतिवात्सल्यात् श्लोकद्वयेनैव कृत्स्नशास्त्रार्थमुपदेष्टुं तद्ग्रहणे प्रकाण्डमस्यैतत्पादयित्वमाह सर्वेति सर्वेभ्यो गुह्येभ्यः अतिशयेन गुह्यं सर्वगुह्यतमं मे भूयः पुनरसकृदुक्तमपि मे मम वचनं शृणु परमं परमार्थविषयत्वात् न लाभात् नापि भयादिवा ब्रवीमि किं तु हि मे मम दृढोऽसि परमामोसीति हेतोः इष्टोऽतिशयितं तेन ते तव हितं यत्तत्ततो वक्ष्यामि न च दृष्टत्वात् विद्यायाश्च हितत्वात् तद्वचनं श्रामेत्य वशं वक्ष्यामीति भावः ६४

आनंदी टीका १३

एवमुपालंभेन सत्त्वमभिमुखीकृत्य निराकाराहंरूपपरमेश्वरस्या
मात्मनोक्तं सर्वमपि स्वसाकारमीश्वरस्य सद्भावस्थिरं निर्दिशन् प्रे
मातिशयेन हृदये सन्निवेशयितुं पुनरपि सिद्धान्तयति भूयः पु
नरपि मे प्रस्तुतं मदीयं परमेश्वरस्य वचः सर्वगुह्यतमं परम
मुपादेयार्थप्रतिपादनादत्युत्कृष्टं शृणु अवधारय इतस्त्वं मे इष्टः
प्रियः स खलु अहमिति मदुपदेशकरणे निश्चितबुद्धिस्ततो हितं व
क्ष्यामि ६४ ॥

रामकंठी टीका ६४

केवलं नार्जुनं प्रति भगवत एवं संभावना नातः परं रहस्यं वक्तव्य
मस्तीत्येतावतार्थमेतत् अर्जुनः साक्षात्परस्वरूपदर्शित्वेनानुगृ
हीतः कथमेवंविधोक्तिविषयः स्यात् तथा सर्वोपदिष्टानामुपदि
ष्टपरमरहस्यज्ञानविषये श्रद्धाविशेषोऽर्जुनार्थं भगवतैतदादि
ष्टम् तथा चानुगृहीतात्यन्तिप्रसादे स्वतत्परमेश्वरः पुनः पुनः
प्रतिपादितमर्थमुपसंहारसमये सिद्धान्ततया हृदि निवेशयन्स
विशेषमंशं सार्ध्वं पुनरप्याह इदं मे परमं निरुत्तरोपादेयार्थप्रति
पादकत्वात्प्रकृष्टं वचो वचनमत एव सर्वगुह्यतमं सर्वेषां गुह्यानां
रहस्यभूतानामर्थानां मुनेरेतरातिशयसंभवादिदं निरतिशयार्थ
प्रतिपादकं गुह्यतमं सर्वगुह्यानां निष्ठारूपं श्रुत्वावधारय यतस्त्व
त्वं मे प्रियो दृढमतिश्च स्थिरबुद्धिरतो हेतोस्ते हितमनुत्तरमनु
कूलं वस्तु वक्ष्यामि कथयिष्यामि प्रियायार्थिने स्थिरचित्ताय शि
ष्याय रहस्यपरमपि वक्तव्यमित्यनेनोपदिष्टं तत्त्वं वक्ष्ये प्रतिज्ञातमर्थ
माह ६४ ॥

लासिकी टीका

+ अतिगंभीरं गीताशास्त्रमशेषतः पर्यालोचयितुमशक्तवंतः
+ कृपया तस्य सारं संगृह्य कथयितुं प्रतिजानीते ॥

सर्वेभ्यो गुह्येभ्यो गुह्यतमं मे परममुत्कृष्टं मे वचः तत्र तत्रोक्तमपि
भूयः पुनरपि वक्ष्यमाणं शृणु पुनः पुनः कथने हेतुमाह इष्ट
मत्यंतं मे मम इष्टः प्रियोऽसीति मत्वा तत एव हेतोस्ते हितं वक्ष्यामि
यद्वा त्वं मम प्रेष्ठोऽसि मया वक्ष्यमाणं दृढप्रमाणोपेतमिति निश्चि
त्य ततस्ते वक्ष्यामीत्यर्थः ६४ ॥

गी.
टी.
अ
२२८

पंचोलीटीका

अतिगंभीरं गीताशास्त्रमशेषतः पर्यालोचयितुमशक्नुवतः कृपया स्वयमेव तस्य सारं संगृह्य कथयति सर्वगुह्यतममिति सर्वगुह्यतमं सर्वगुह्येभ्योऽत्यंतरहस्यभूतं भूयः असकृत् उक्तमपि शृणु मे मम परमं प्रकृष्टं वचो वाक्यं न भयात् नाप्यर्थकारणाद् वक्ष्यामि किं तर्हि मे मम दृढमत्यर्थमिष्टोऽसि प्रियोऽसि इति हेतुना तेन कारणेन ते तव हितं परं ज्ञानप्राप्तिसाधनं वक्ष्यामि ६४

रसावीर समिद्धोधिनी॥

अथातिगंभीरार्थं रतिनाथशास्त्रमशेषतो विमर्ष्टुमशक्नुवतः कृपया पूर्वोक्तमतिशयेन साधनं संक्षिप्य न्यूनत्वाद्द सर्वगुह्यतममिति त्रिभिः भूतानामर्थीनाममनोरतत्त्वातिशयसंभवादिदं निरतिशयार्थप्रतिपादकत्वात्सर्वगुह्यतमं सर्वेभ्योऽपि रहस्येभ्यो रहस्यतमं परमं प्राप्तिसाध्यप्रवर्तकं परसिद्धिसंपत्ति हेतुत्वेन प्रकृष्टं वा मे मम वाचं वचनं प्राग्बहुशो निगदितमपि भूयोऽपि कथ्यमानं शृणु श्रुत्यावधारय दृढमतिः स्थिरबुद्धिर्यतस्त्वं मम मे इष्टः परमप्रेमास्पदमसि ततो हेतुना तस्ते हितं वक्ष्यामीत्यन्वयः ६४॥

मधुभाष्य

६४॥

भाषा अनुवाद टीका

अतिगूढ़ अर्थसे युक्त जो गीताशास्त्र तिसकी सम्यक आलो
चनाकरने को असमर्थ जो अर्जुन तिनसे अनुग्रह करके भग
वान आप ही गीता का सारसंग्रह करि इस श्लोकसेले तीन
श्लोकके द्वारा कहतेहै कि उस सब गोपनीयसे भी अतिगुह्यत
म जो हमारे वचन यद्यपि प्रसंग प्रसंग परकहे भी गये हैपर
तो भी फेर कहताहूं सोतुमसुनो औरबार बार कहने मे हेतु
कहतेहै कितुम हमारे दृढ़करके अत्यन्त प्रियहो इसीसे हमारी
प्रीति औ हितके अर्थ फेरभी कहूंगा अथवा मेरी वाक्य कोतु
म ने दृढ़ प्रमाण करके जाना इससे तुम हमैं अति प्रिय
हो इससेफेरिहमारे हितकेजोवचनहैसोकहूंगा ६४ ॥

दोहा

सर्वगुह्य अति फिर सुनहुं मोरे वचन हितोय दृढमति
मोरा मित्रहै तातें तोहि कहों सोय ६४

279

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मा
मेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ९५॥

शांकरभाष्य टीका १

तद्धि सर्वगुह्यतमं हिततमं किं तदित्याह मन्मना भव मच्चित्तो भ
व मद्भक्तो भव मद्भजनो भव मद्याजी मयि यजनशीलो भव मां
नमस्कुरु नमस्कारं मयि ममैव कुरु तत्रैवं वर्तमानो वासुदेव ए
व सर्वसर्वसमर्पित साध्यसाधनप्रयोजनो मामेवैष्यसि आगमिष्य
सि सत्यं ते तव प्रतिजाने सत्यां प्रतिज्ञां करोम्येतस्मिन्वस्तुनीत्य
र्थः यतः प्रियोऽसि मे एवं भगवतः सत्यप्रतिज्ञत्वं बुद्ध्वा भगवद्भक्तेरव
श्यंभावि मोक्षफलमवधार्य भगवच्छरणैकपरायणो भवेदिति वा
क्यार्थः ९५॥

आनंदगिरि टीका २

हितमिति साधारणनिर्देशे कथं परमित्यादि विशेषणमित्याशं
क्याह तद्धीति तदेव प्रश्नद्वारा विवृणोति किं तदित्यादिना उक्तरी
त्या वर्तमानस्य तव फलमाह तत्रेत्यादिना वासुदे
वे भगवति अर्पितसर्वभावो मामेव आगमिष्यसीति संबन्धः सत्य
प्रतिज्ञाकरणे हेतुमाह यत इति इदानीं वाक्यार्थं श्रेयोऽर्थिनो ऽनुष्ठा
नोपयोगित्वेन संगच्छते एवमिति ९५॥

स्वामिकृत टीका ३

मन्मन इति मन्मना भव मच्चित्तो भव मद्भक्तो भव मद्याजी मद्यजनशीलो भव
मामेव नमस्कुरु एवं वर्तमानस्त्वं मत्प्रसादाल्लब्धज्ञानेन मामेवैष्यसि
अत्र संशयं माकार्षीः त्वं हि मे प्रियोऽसि अतः सत्यं यथा भवत्येवं तुभ्यमहं
प्रतिजाने प्रतिज्ञां करोमि ९५

पिशाचभाष्य टीका ४

मन्मना मद्गतमनाः मद्याजी मद्यजनकः मामीश्वरं सकलगुरुं नमस्कु
रु सत्यं ते प्रतिजाने उपदिष्टा
नुष्ठानस्य फलमाह मामेव वासुदेवाख्यं परमेश्वरमेष्यसि

रामानुजभाष्य टीका ५

सि ९५॥

मन्मना इति वेदान्तेषु वेदाहमेतं पुरुषं महान्तं आदित्यवर्णं तमसः परस्ता
त् तमेवं विद्वानमृत इह भवति नान्यः पन्था विद्यतेऽयनाय इत्यादिषु

श्री. गी. टी. ग्र

२८०

तु विहितेन वेदनोपासनध्यानादिशब्दवाच्यदर्शनसमानाकारस्मृ
तिसंतानसमर्थोऽपि येन तस्मिन्नपि मनो यस्येति इह मन्मना भवेति विधी
यते मद्भक्तः अत्यर्थं मत्प्रियः अत्यर्थमतिप्रियत्वेन तद्दर्शनेऽतिशयप्रियो
स्मृतिसंततिजनकस्नेहयुक्त इत्यर्थः मद्याजी तत्रापि मद्भक्तः इमनुष्ठानेतयज
नेऽत्यर्थं प्रियः मदाराधनपरो भव आराधनं हि परिपूर्णशेषवृ
तिः मां नमस्कुरु नमो नमः मम प्रतिमात्रं प्रत्येकीभाव मत्यर्थं प्रियत्वं
विवर्यः एवं वर्तमानो मामेवैष्यसि प्राप्स्यसि एतत्सत्यं ते प्रतिजाने तव प्र
तिज्ञां करोमि नोपच्छेदमात्रं यतस्त्वं प्रियोऽसि मे प्रियो हि ज्ञानिनोऽत्यर्थ
महं स च मम प्रिय इति एवं श्रुतिवाक्यसमत्य तिमात्रप्रीतिर्वर्तते मम मा
यि तस्मिन्नतिमात्रप्रीतिर्भवति न हि योगमसहमानो हं तं मोक्षापयामि
अतः सत्यमेव प्रतिजाने मामेवैष्यसीति ६५ ॥

अभिनवगुप्तकृतटीका ६ ॥ गुह्यतमं यदत्र निश्चितं तत्तद्दर्शय
मिदानीं दर्शयित्वाह मन्मना भवेत्यादिना शास्त्रे ब्रह्मार्पणमेव सर्वथा प्राधान्यमिति निश्चितं ब्रह्मार्पणक
कारिणः शास्त्रमिदमर्थ

परमार्थप्रपा[illegible] टीका ७ वदितुकामः ६५

तत्किमित्याह मन्मना इति यदा नष्टैर्भवसि तदा मन्मनाः अहमेव
मनसि यस्यासौ मन्मनाः न विषयान्तरे चित्तमभिनिविष्टमस्य तमेव मां कु
विभ्यर्थः वासुदेवे भक्तो भव नमस्कारभक्तियुक्तो भव कर्मणि क्रि
यमाणे मद्याजी मद्यजनशीलो भव न तु कर्माङ्गदेवतास्वन्तर्यामित्वेना
स्थितं मामेव नमस्कुरु अनेनोपायेन मामेवैष्यसि प्राप्स्यसीति न प्रो
चनामात्रं किं तु सत्यं यथा स्यात्तथा प्रतिजाने प्रतिज्ञां करोमि यतस्त्वं म
ह्यमत्यन्तप्रियोऽसि परमप्रेमास्पदमसि तदुक्तं टिप्पणिकायां ब्रह्माका
रमनस्त्वं भवति सहसा तन्मदाकारमेतत्कार्यं सच्चेदसाध्यं सकल
करणैः कर्म मत्प्रदेहिनो चेन्निस्तारं तमप्रणमतं च मयापि शिते
न्नतज्ञानं तत्केनानन्तसर्वधर्मान् व्रज शरणं [illegible] पार्थ मामेकमेव
६५ ॥

वनमाली टीका ८

तदेवाहमदिति मपि सदनेन गुणेन निरन्तरावच्छिन्नेन मनो यस्य स मन्मना।
नानाविधेषु विषयेषु वा निशीमास्वाविकमनो हनी स्थेव जविमर्थः
न तु केसादिरपि तथा तत्राह मद्भक्तः श्रवणादिसहस्त्रेषु वा निशमणा
मद्याजी यक्तः मद्विषयेणानुरागेण सदा मां नमस्कुर्वित विधीयते न

द्विषयोनुरागएवकिंतस्मादित्यतआह मद्याजीमांयष्टुंपूज्य।
यितुंशीलंयस्यसतथा मद्भजनपरोभवस्तोत्रोपकरणभावेनमा
नमस्कुरु कायेनवाचामनसाचप्रह्वीभव इदंचार्चनवंदनेचा
मेषामपिभागवतधर्माणामुपलक्षणंउक्तंचश्रीभागवते श्रव
णंकीर्तनंविष्णोःस्मरणंपादसेवनं अर्चनंवंदनंदास्यंसख्यमात्म।
निवेदनमिति एवंसद्भागवतधर्मानुष्ठानेनमत्परायणोम
त्यामन्मनाःसन्मत्प्रसादाद्विहताशेषविघ्नादिदोषः अविभू
तस्वरूपेणानंदस्वरूपः सन्मामनंतगुणंवैकुंठनाथंवासुदेवमेव
प्राप्स्यसि त्वमत्रसंशयंमाकृथाः सत्येनतवप्रतिजानेसत्यामे
वप्रतिज्ञांकरोम्यस्मिन्नर्थेयतः प्रियोसिमेप्रियस्यप्रतारणानुचि
तमितिभावः अनेनयत्सर्वंमत्कृतंयतः प्रवृत्तिर्भूतानांयेनसर्वं।
मिदंततं स्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानवइत्याद्युक्ते
मत्कर्तृत्वेनेश्वरत्वप्रकटनात् ६५ ॥

ऊसमवैजयंतीटीका ९

तदेववचःप्राह मन्मनाभवेतिमदुक्तोममभक्तोदेवान्तरभावना
हितेनसर्वंसर्वथावच्छिन्नेनमदेकनिष्ठत्वविधेयानीदृश
केषुमध्येचिदचिदात्मकजगदभिन्नाभिन्नत्वेलीलावानमसे
वकस्त्वंभवकीदृशःसहस्रपेक्षायाविशेषणाच्येणलक्षणमा
हमन्मनाइतिमयिवेदांतैकवेद्येजगदभिन्ननिमित्तोपादानका।
रणेनन्तगुणशक्तिकेमहाविभूतिपत्नोजगज्जन्मादिलीलेज
गदुपकृतिमतिहितमजचतुर्भजरूपेमेघश्यामतडिद्वर्णपीतांबरेदि
व्यालंकारालंकृतेगोपीकटाक्षार्चितेनंदनेदनेवसुदेवसूनौव
सत्येसर्वेश्वरेकलेमनोःस्वेंद्रतेलयायावच्छिन्नफवास्मि
न्तारथ्योसर्वेश्वरेकलेमनोयस्यसममन्मनाभव पुनःकीदृ।
लक्षणंध्यानसंतानरूपंकेयस्यसमन्निरतिशयप्रियत्वेनमद
शः मद्याजीमांयष्टुमर्चितुंशीलंयस्यसनिरतिशयप्रियत्वेनम
दायनपरोभवमांनमस्कुरु नमोनमस्तेनमस्तेनवाप्य
सामयवंतरुपाकालस्यात नमस्करणंनमस्कारमनेनवा
ह्रीभावेकुरु मन्मनाइत्यनेनान्तःकरणसंचारःसेवकुर्वितिस्वचिंत
करणानां नमस्कुर्वित्यनेनदेहस्यचशरीरंमपीवपरकारणोपायेपवयनर्दै
एवंमद्भक्तस्त्वंभविष्यसिचनहिमामेवपवकारेणापार्थ

श्री-
गी-टी-
श्री-

रइतिवदन्योगोव्यवच्छिद्यतेतेनमामेवनीतोसतंस्वरूपामलत्वादि
गुणाकेवलभजमिदिहालालितपदांडजाधानताद्भुवंचरीकेक्र
प्रा. लमेवैष्यसिप्राप्स्यसितत्रममरूपांतरेतद्दृश्यशीघ्राणामेतद्दृष्टमात्र
मेतथ्यामिएणवान्स्मिहवापहादिरूपेवमेतत्सतेतेप्रियमित्र
स्यतवारेवशतज्ञानेप्रतिज्ञाकरोमियतस्त्वमेममप्रियो
सिप्रियस्याग्रेमिथ्याभाषणमनुचितं यस्यमय्यतिप्रीतिर्भवा
तितद्धियोगेसोढुमहंनशक्नोमीतिमयाप्युवमेवोक्तंप्रियोहि
ज्ञानिनोत्यर्थमहंसचममप्रियइत्यादिनाशस्वेमहाधिविषयसि
द्धिमामेवप्राप्स्यसीत्यर्थः यद्वामामेवैष्यसीतितेनवाग्रसमस्य
पंकरोमिसत्येनपथ्यतथ्ययोरितिनानार्थवर्गात् ननुमानुषा
णामपथ्यकरणादपिमेसंशयनाशोनास्तीतिचेत्तत्राहप्रतिजा
नेप्रतिज्ञांकरवाहंपथ्येकुर्वेयतस्त्वमेप्रियोसिनामुषासत्यममेवंवद
६५ तिप्रियंनपतारयंति पतेतेद्रिमवाल्कीयेनस्थितिवीशकलीभवेत्
मुषेतोयतिथिःकुर्मेनमेमोचैववचोभवेदित्युपोगणवर्णिभारतेम
यैवोक्तत्वात्रामोद्धिर्नाभिभाषतइतिवाल्मीकीयश्रीरामवचनाच्च
६५॥

मधुसूदनी टीका

तदेवाह— मय्येवभगवतिवासुदेवेमनोयस्यसमन्मनाःभवमदामीचिंतयेद्वे
षेणकंसशिशुपालादिरपितन्याःतत्राह मद्भक्तःप्रेमाणमय्यनु
रक्तःमद्विषेणनरागेणसत्तामद्विषयमनःकुर्वितिविधीयते
तद्विषयोनरागएवकेनस्यादितनत्राह मद्याजीमामेवष्ट्रजपित
शीलंयस्यसस्तदाममरजापरोभवरजोपकरणाभावेतमांनमस्कु
रुकायेनवाचामनसावप्रकीभावेनारायपदद्देवार्चनेवेदनंवा
मेषामपिभगवत्धर्माणामपलक्षणं तथाचोक्तंश्रीभागवते श्र
वणंकीर्तनंविष्णोःस्मरणंपादसेवनं अर्चनंवंदनंदास्यंसख्यमा
त्मनिवेदनं इतिचेत्पुंसार्पिताविष्णौभक्तिश्चेन्नवलक्षणाक्रियतेभ
गवत्यद्धातन्मन्येधीतमुत्तममिति एतच्चभक्तिरसायनेव्याख्यातं
विस्तरेणएवंमदर्थभगवत्धर्मानुष्ठानेनमयावज्ञानगोचरमात्मनुना
सन्मामभगवंतंवासुदेवमेवएष्यसिप्राप्स्यसिवेदांतवाक्यजनिते
नमदोषेनतच्चात्रसंशयंमाकार्षीः सत्यंयथार्थंतेतुभ्यंप्रतिजाने

सत्यामेव प्रतिज्ञां करोमि अस्मि न त्वर्थे यतः प्रियोसि मे प्रियस्य प्रतारणानौ
चितेवेति भावः सर्वमेतेषारम्भकर्मणांते सर्विमामेष्यसीतिवाक्य त्ववा
दापेन तथाविधासत्ता प्रयोजने प्रथमं व्याख्यानमेव श्रेयः अनेनय
त्र्वेमत्कं यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं स्वकर्मणा तमभ्य
र्च्य सिद्धिं विंदति मानवः इतित्र व्याख्याने मत्कृते नेश्वरत्वे प्रकटना
त [illegible] ६५ ॥

सदानंदी टीका ११

तदेवाह कृपासिंधुः स्वभक्तायार्जुनायच वासुदेवे भगवति मयि
यस्य मनः स च १ सदा मां चिंतयेत्पार्थ मद्भक्तो भव सर्वदा प्रेमणा
मय्यनुरक्तः सन्मद्विषयेमनः कुरु २ मामेव श्रीपतिं यष्टुं शीलेय
स्य तथा भव मद्योवा मन्नरागेण मत्पूजानत्परो भव ३ सर्वोपकार
णाभावे मामेव त्वं नमस्कुरु कायेन मनसा वाचा प्रकोभावेन नमो भ
ज ४ एवं च भगवद्धर्मावष्टम्भेन मयीश्वरे अनुरागो द्ववेनेव भवेद्भ
गवतो नमः ५ एवं भागवतो भूत्वा भगवंतं समाहरिं प्राप्स्यसि
त्वमत्र संशयं कुरुष्व माकार्षीमेंदुच
तिर्मीश्यवो येनात्मानमहंय ६ त्वमत्र संशयं कृत्वा मा काषीर्मे दुच
स्यतः सत्यामेव प्रतिज्ञां ते हृस्मि त्वर्थे करोम्यहं ७ यतः प्रियोसि मे
तस्माच्च प्रियस्य प्रतारणा उचिता नो ति विधा समनुकोर्थ सदा कुरु।
८ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं स्वकर्मणा तमभ्यर्च्य सिद्धिं
विंदति मानवः ९ इत्युक्तोक्तस्य चकृतत्रिपापस्य वस्तुतः मत्कृते
नाव कथ्यते कृतं भगवता स्वयं १० स एव भगवान् कृष्णो वासुदेवाभि
यो विभुः ब्रह्मैवायं यस्तत्याज्ञे यः शरणं प्रतिनिश्चिते ११ नातस्पर
तेरकिंचिद्युपस्थापन मिष्यते समस्तेभ्यर्चदेवे भ्रष्टराणादिवास्त्र
ते १२ ६५ ॥

नीलकंठी टीका १२

अहेद्य गुह्यात्मानं दैकमृतः
तदेव गुह्यतमं हितमाह मन्मनाइति मन्मना भव एतेन ब्रह्मात्माभेदो
पासनं सर्वशास्त्रसारं मनोयस्य स मन्मनाः भव एतेन ब्रह्मात्माभेदो
पिसाधनानु रागीयइति उत्तरस्याद्धिकार्थीउक्तः कथमेवं विधाज्ञान।
निशालभ्यतेः तत्राह मद्भक्तो भव एतेन भगवदुपासनात्मको मध्य
मघट्टकार्थी उक्तः कथमल्पज्ञापस्य भक्तिरुदेष्यतीमनत्राह मद्या

श्री॰
गी॰ टी॰
अ॰

982

जीभगवदर्थकर्मकरणशीलोभव एतेनकर्मयोगस्याध्यायषट्का
र्थोविहितः नचयस्यभगवत्याप्तिस्तस्यसंभवतिदारिद्र्यात्स्याध्यायमावा
हात्तस्यभगवदङ्कितैर्लेपादुलिप्ताकाराचेतोवृत्तिर्दुर्लभतरेत्याशंक्याह
मांनमस्कुरु प्राकृतमहेश्वत्येतिमादौभगवतेनसर्वोपचारसमर्पणेन
नमस्कारादिनासम्यगाराधयेत्यर्थः तथाचाश्वलायनो नमस्कारस्से
वयन्तत्स्वमदाहरति योनमसास्त्वध्वरइत्ययज्ञोवैनमइतिहिब्राह्म
णंभवतीतिच एवमत्रसोपानत्रयारूढस्यफलमाह मामिति
मामेवतत्पदार्थंसर्वजगत्कारणंसर्वेश्वरंसर्वशक्तिमखंडैकरसंत्व
मेष्यसिप्राप्स्यसिविवरप्रतिबिंबघटाकाशइवमहाकाशं अस्मित्व
र्थेशपथंकरोतितेतवभूतः सत्येप्रवाधितार्थंमृतंप्रतिजानेप्रतिज्ञां
करोमिमामेवैष्यसीति प्रियोसिमे यतस्त्वंमममप्रियोसिअतःप्र
तारणानर्हस्त्वयिसत्यमेवाहंब्रवीमीत्यर्थः ६५ ॥

धानेरी टीका ॥

पदार्थोत्रवक्तृशोभाव्याख्यानरूपः गर्भार्थस्तुज्ञानकर्मसमुच्चया
नुष्ठानोपदेशोपसंहारोयमिति मेप्रियोसि अतस्तेसत्यंप्र
तिजाने अग्रिमश्लोकोच्यमानांप्रतिज्ञांसत्यांयथार्थमेवक
रोमि ६५

रामकंठी टीका ॥४

मामेवैष्यसीत्यनेनदंनवमेवितत्त्वव्याख्यातं किंतेनावत्स्मात्र
ज्ञानसर्वस्वमितिप्रतिपादयितुंभगवान्प्रतिज्ञावधात्तियतः
स्वभावतएवप्रियोसिमे ततःसत्यममस्थानवप्रतिज्ञानेप्र
तिज्ञांकरोमि यथानेनभक्तिलक्षणेनपरेणसमाधिनामा
यथोक्तस्वरूपमेष्यसिप्राप्स्यसिमदेकभावमिति किंच ६५

प्रतिज्ञानम
र्थमाह × लासिकी [illegible]मीटीका

× एवंविधोममेश्वरस्यभक्तउपासकोभवकीदृशोमन्मनाम
यिप्रतीविमनोमननात्मकमंतःकरणंयस्यसः तथामद्या
जीमदर्पणार्थमेवोत्तोपन्यायजनशीलः यजनमत्रसर्वस्य
कायिकस्यकर्मणउपलक्षणं तथामामीश्वरंमानमन्यास्य
देसमहिष्ठरूपेनमस्कुरुनमस्कारोत्रवाचिकस्यकर्मणउपल

ताणं एवं मनोवाक्कायव्यापारैर्मदेकनिष्ठैर्युक्तस्त्वं मामेवै-
ष्यसि मेष्यस्युपैष्यसि अत्र च संशयं माकार्षीः त्वं हि मे प्रियोऽसि प्रि-
यस्य प्रतारणं नोचितेति भावः अतः सत्यं यथा भवत्येवं त्वाम्प्र-
तिजाने प्रतिज्ञां करोमि ६५

पैंवोलीटीका

किं तर्हि तत्राह मन्मना इति हे अर्जुन त्वं मन्मना मच्चित्तः मद्भक्तः म-
द्याजी मद्यजनशीलो भव मां नमस्कुरु एवं प्रवर्तमानो मामेवैष्यसि
अस्मिन्नर्थे ते तव प्रतिजाने सत्यं प्रतिज्ञां करोमि यतस्त्वं मे मम प्रियो-
सि ६५

भगवीरसमिद्धेपिनी

वक्तं प्रतिज्ञातमेवाह मन्मना इति पादत्रयं च नवमे व्याख्यातं य-
तः स्वभावत एव प्रेमातिशयास्पदमसि ततः सत्यमेतदव्यभिचा-
रीति तेन तव प्रतिज्ञां करोमि इति सर्वसारसंग्रहणं त्वयो न रुक्त्या
दोषः ६५॥

मधुभाष्य

६५॥

283

भाषा अनुवाद टीका

अब समस्त हितों से बढ के हित क्या है इस शंकापर कहनेको
अंगीकार कियेहुये गीताशास्त्र सारको कहते हैं कि मन्मना कहे
मत्चित्त होउ और मद्भक्त कहे आश्रित होउ औ मद्याजी
कहे मेरेही पूजनकारी होउ और हमीको नमस्कार करो इस
प्रकार वर्तमान रहनेपर मेरी अनुग्रह से आत्मतत्वज्ञानके द्वा
रा जो हमको प्राप्तहोवेगो इस मेकछुसंशय नकरो क्योंकितुम
हमारे प्रियपात्र हो इसपर तुमको सत्य अभय कहे प्रतीति
जिसमेहोयइस से हमतुमको प्रतिज्ञा करके कहते है ६५

दोहा

मोमे मन मम भक्त हो पूजहु वंदहु मोहि मोहपावें तो
हि सत करों प्रतिज्ञा प्रिय है तोहि ६५॥

284

सर्वधर्म्मान्परित्यज्य मामेकं शरणं व्रज अहं
त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ६६

शांकरभाष्यटीका १

स्या१ कर्म्मयोगनिष्ठायाः परमरहस्यमीश्वरशरणतामुपसंहृत्याथेदानीं क
र्म्मयोगस्यागनिष्ठाफलं सम्यग्दर्शनं सर्ववेदान्तविहितं वक्तव्यमि
त्याह सर्वधर्म्मान् सर्वे च ते धर्म्माश्च सर्वधर्म्माः तान् धर्म्मशब्देनात्रा
धर्म्मोऽपि गृह्यते नैष्कर्म्यस्य विवक्षितत्वात् नाविरतो दुश्चरितादि
त्यत इति त्यज धर्म्ममधर्म्मं चेत्यादिश्रुतिस्मृतिभ्यः सर्वधर्म्मान् परि
त्यज्य सन्न्यस्य सर्वकर्म्माणीत्येतन्मामेकं सर्वात्मानं सर्वभूतस्थमी
श्वरं अच्युतं गर्भजन्ममरणविवर्जितमहमेवेत्येवमेकं शरणं व्रज न
मत्तोऽन्यदस्तीत्यवधारयेत्यर्थः अहं त्वामेवं निश्चितबुद्धिं सर्वपापे
भ्यः सर्वधर्म्माधर्म्मबन्धनरूपेभ्यो मोक्षयिष्यामि स्वात्मभावप्रकाशी
करणेन उक्तं च नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता इत्यतो मा
शुचः शोकं माकार्षीरित्यर्थः ६६ ॥

आनन्दगिरिकृतटीका २

वृत्तमनूद्यानन्तरश्लोकतात्पर्यमाह कर्म्मयोगेति धर्म्मविशेष
णाद् धर्म्मानित्यादौ वारयति धर्म्मेति ज्ञाननिष्ठेन सन्न्यस्तेन धर्म्माध
र्म्मयोस्त्याज्यत्वे श्रुतिस्मृती उदाहरति नाविरत इति मामेकमित्या
देस्तात्पर्यमाह न मत्तोऽन्यदिति अर्जुनस्य क्षत्रियत्वादुक्तसन्न्यासद्वा
रा ज्ञाननिष्ठायामनधिकारेऽपि शरणागत्यधिकारिभ्यस्तत्सोप
दिष्टत्वादविरोधमभिप्रेत्याह अहं त्वेति उक्तेऽर्थे दाशमिकं वाक्य
मनुकूलयति उक्तं चेति ईश्वरस्य त्वदीयबन्धननिरसनद्वारा तत्पा
लयितृत्वान्न ते शोकावकाशोऽस्तीत्याह अत इति ६६ ॥

स्वामिकृतटीका ३

ततोपि गुह्यतमत्वमाह

सर्वधर्मानिति मद्भक्त्यैव सर्वं भविष्यतीति दृढविश्वासेन विधिकैंकर्यं त्यक्त्वा मदेकश
रणो भव एवं वर्त्तमानः कर्म्मत्यागनिमित्तं पापं स्यादिति मा शुचः शोकं
माकार्षीः यतस्त्वां मदेकशरणं सर्वपापेभ्योऽहं मोचयिष्यामि ६६ ॥

श्री·
गी·
टी·ग्र

२८५

पिशाचभाष्यटीका ४

सर्वेति स्मृतिस्मृत्याचारसिद्धान्परित्यज्य मो नारायणाख्यं मामाश्रयेत्। व्रज त्वं अहं एव सर्वशक्तिर्वासुदेवस्त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः मा शोकं कार्षीः ६६ ॥

रामानुजभाष्यटीका ५

सर्वेति कर्मयोगज्ञानयोगभक्तियोगरूपान् सर्वान्धर्मान् परमनिःश्रेयससाधनभूतान् मदाराधनत्वेनातिमात्रप्रीत्या यथाधिकारं कुर्वाण एव उक्तरीत्या फलसंगकर्तृत्वादिपरित्यागेन परित्यज्य मामेकं शरणं व्रज कर्तारमाराध्यं प्राप्यमुपायं चानुसंधत्स्व एष एव धर्माणां शास्त्रीयस्य परित्यागः इति निश्चयं स्मरण मेतत्त्यागे भरतसत्तम त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः इत्यारभ्य यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते इत्यादौ सुदृढमुपपादितः अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि एवं वर्तमानं त्वां मत्प्राप्तिविरोधिभ्योऽनादिकालसंचितानन्ताकृत्यकरणकृत्याकरणरूपेभ्यः सर्वेभ्यः पापेभ्यो मोक्षयिष्यामि मा शुच शोकं मा कृथाः अथवा सर्वपापविनिर्मुक्तिः पूर्वकभक्तियोगारंभस्यात्यर्थं भगवत्प्रियत्वरूपनिरवधिकत्वात् संयोगः सततं कालकृतैः निर्घोरस्वरूपतया प्राप्तं न भक्तियोगारंभानर्हतानालो च्यतोर्जुनस्य शोकमपनुदन् श्रीभगवानुवाच सर्वधर्मान्परित्यज्येति भक्तियोगारंभविरोध्यनादिकालसंचितनानाविधानेवपापानुगुणानन्तप्रायश्चित्तरूपान् कृच्छ्रचान्द्रायणकूष्माण्डवैश्वानरव्रतपतिपवित्रेष्टित्रिवृदग्निष्टोमादिकान् नानाविधाननन्तया परिमितकालवर्तिनाऽऽसननुष्ठानानन् सर्वधर्मान् परित्यज्य भक्तियोगारंभसिद्धये मामेकं परमकारुणिकं शरणालोचितनिविशेषाशेषलोकशरणं माश्रितवात्सल्यजलधिं शरणं प्रपद्यस्व अहं त्वा पापेभ्यो पयोदि न स्वरूपभक्त्यारंभविरोधिभ्यः सर्वेभ्यः पापेभ्यो मोक्षयिष्यामि मा शुचः
६६ ॥

अभिनवगुप्तटीका ६

[illegible] ग्राह्यं च सर्वथ
मीत्युपरिमज्येति यदिदं गुह्यकरणेशास्त्रेणोक्तं वक्ष्ये वत्थादित्यस्य सर्व
स्याहं कर्तव्यात्म धर्मान्परित्यज्य तथा वाचादिरूपेण क्रियानिषेधम
नधर्मी भविष्यतीति मनसा विहाय मामेवैकं सर्वकर्तारं परमेश्वरं
त्वत्तंत्रं शरणं सर्वस्वभावाधिष्ठायकतया व्रज अत एवाहं सर्वेत्तः
सर्वेभ्यः पापेभ्यस्त्वां मोक्षयिष्यामीति मा शुचः किं कर्तव्यतामो
हेमागाः ६६ ॥

परमार्थप्रपा [illegible] टीका

अतोपि गुह्यतममाह सर्वधर्मानिति मद्भक्तो वृत्सर्वं भविष्यती
ति दृढविश्वासेन विधिकैंकर्यं त्यक्त्वा मामेकमद्वितीयं शरणं व्रज
मदेकशरणो भव एवं वर्तमानस्य कर्मत्यागाभवे पापं भविष्यती
त्याह मा शुच इति शोकं मा कार्षीः यतो हे त्वां मदेकशरणं सर्व
पापेभ्यो मोचयिष्यामि यथा ह्यनेकशरणस्य चानेकसंबन्धाद्देवा
भीष्टसिद्धिरित्यर्थः अनेन स्वसामर्थ्यातिशयो दर्शितः एतद्यो
स्माभिः एवमहमेव स्वयमिदं वदामीति स्फूर्तिरपि दर्शिता यद्वा
एवं लोके सेव्यमेव कर्तृभावेन मन्तव्या भवेत्स्याद्योमन्या यकाश्चवा
रोचमोः योकृत्वा तु सर्वधर्मान्परित्यज्य अवीरो वमत्कामानतो मामे
कमविद्वेकरसशरणं व्रज मज्ञानात्सकलविकाराद्धेयेन मदाका
रतो भज एवं ज्ञानेन तिष्ठ हमात्मैव ध्ययमहमस्मीति भेदभावनो द्वे
भ्यः पापेभ्यो दुःखहेतुभ्यः मोचयिष्यामि तदुक्तं नावलवि विपिने
वैयो वक्त्वभावेगतत्वस्फूर्तिभिरभिहितो नोज्ञानस्य सर्वस्य संसः प्र
भवति हि चिकित्सा रोगिणां प्राणभाजि प्रसभमितनवादेस्मिन्
भेषजं वापीमवेति तथा तदुक्तं स्वयाविल [illegible] विकारश्रेष्ठ स्वता
नाशिनो स्वतिः वर्तमानः स्फुरन्महिम्नैवस्याहेपि किं करं निन
या मा शुचः अनेन शोकः कास्तीत्यर्थः तदुक्तं सांतेकांतमपा
गौतेयडुपनैः शोत्या समक्रीडिते निर्याते वाहिं तरंगगालिभिलत्या
शुभिः सात्विकैः प्राणप्राणगतीमनागुपरते स्वानरपूर्णोस्मनः
स्फुरणागानमनाहतं तत्र्यतिभवं नवं नवं चाहंगात् एतदर्थं यस्मिन्स
वोतीमतानिद्रात्मैवाभहिजानंतरं तिस्फूर्तिः सर्वसमाधार्शिना

श्री॰
गी॰ टी॰
९८

वनमाली टीका

ग्रपन्नानामीश्वरः सर्वभूतानां हृद्देशे तिष्ठति तमेव सर्वभावेन शरणंग
च्छेति यदुक्तं तदिदानीं सर्वधर्मानिति वर्णधर्मा आश्रमधर्माः
सामान्यधर्माश्च ये वर्णाद्युद्देशेन स्वेयोर्थे नो विहितास्तान्स
र्वान्धर्मान्परित्यज्य विद्यमानानविद्यमानान्वा नादृत्य मामीश्वरं सर्व
धर्माणामधिष्ठातारं सर्वफलदातारं च शरणं व्रज धर्माः सन्तु न सन्तु
वा किं तैरस्माकमपि वैरस्तु तैः भगवदनुग्रहादेव तस्य निरपेक्षादहं
कृतार्थी भविष्यामीति निश्चयेन परमानन्दघनमूर्तिमनन्तगुणस
वनिधानमेकं वासुदेवं मामनन्तं भजस्व इदमेव परं तत्त्वं नातोऽधिक
मस्तीति विचारपूर्वकेण प्रेमप्रकर्षेणानन्यविषयया मनोवृत्त्या तै
लधारावदविच्छिन्नोपासनेन चिन्तयेत्यर्थः अत्र मामेकं शरणं व्रजे
त्यनेनैव शरणापत्त्यतिरिक्तधर्मपरित्यागे लब्धे सर्वधर्मान्परित्यज्येति
निषेधानुवादस्तत्काम्यकामितानां लाभायपत्तायते ये सास्त्रिपूर्वं कृ
त्वोद्देश्यमित्यवचने निरागिवेति वृथादितिवत् तथा च मामेव सर्वध
र्मिकार्यकारित्वान्मदेकशरणस्य नास्ति धर्मापेक्षेत्यर्थः न च सर्वध
र्माधर्ममारोपविधीयते संन्यासशास्त्रेण निषेधशास्त्रेण वलवत्त्वा
ततश्चेदमपि संन्यासशास्त्रं भगवदेकशरणानस्य विधिनस्मितवा
त् तस्मात्सर्वधर्मान्परित्यज्येत्यनुवाद एव सर्वशास्त्राणां परमं रहस्य
मीश्वरशरणानेवेति तच्चैव शास्त्रपरिसमाप्तिर्भगवता कृतानां विना
संन्यासस्यापि स्वफलापर्यवसायित्वादतः संन्यासादिधर्मश्रवणाद
रेणा भगवदेकशरणतामात्रेनान्यं भगवतः न ममोत्तरेतहद्ध
संन्यासादिधर्मश्रवणादेराणादि प्रहतप्रवाहानादिसंसरणहेतुविधा
यानि हत्वा निरानंदाविर्भावरूपमोक्षः कथं स्यात् नहि स्वधर्मान्नुष्ठानं
विना चित्तशुद्धिर्लाभो विना भगवदर्पणेनैतदि विनाच मोक्षः संभवतीत्यत्रा
ह अहमिति अहं मदेकशरणलक्षणं परमधर्मप्रसादितः त्वाम
देकशरणापन्नं पापेभ्यः कृतकिंचित्प्रमाणेकरिष्यामः सुवासनेभ्यो मो
चयिष्यामि तद्विद्यामि यत्र पापदेहसंस्कृतिः हेतुः कर्ममात्रमुच्यते न
यथापयपलाशमापोनसंश्लिष्यन्ते एवं विदि पापं कर्म न श्लिष्यते।

यैर्येषी कान् लमनैः प्रोतेत्र्वहदयेनेवैहिवास्य सर्वपापानां प्रहयेनेर
निष्कृतीकर्मचपापपदेनोक्तं तथाच मदेकशरणस्य सर्वकृतस्यप्रा
रब्धस्य च सर्वकर्मणो मत्प्रसादान्नाशः क्रियमाणकरिष्यमाणयोः क
र्मणोरश्लेषो निर्लेपः मामुद्दीनादिकालप्रवृत्तप्रवाहानादिकर्मरू
पाविद्यानोहं कर्तृत्वाभिमानिविद्यामीति शोकमाकृथाः यावद्भगव
निस्वाभाविको न रागो नास्ति तावच्छरणं स्वमध्यमीप्रमादेशानुष्ठे
याज्ञानेत्वनुरागे धर्मान्तं मदेकशरणे नैतलयारावदवक्ति।
ना मादेशेणम नोहानि मेघेव स्वपाद्यानवन्वस्व धर्मानुष्ठानफलस्यम
यन्तरायाणाम त्वन्त्व्यानादेशेनान्येन वाधर्मानुनादसमदेकशर
णप्रवृत्तिन्यमिति भावः यद्वात्से वाहं मामेवा सौमुप्रवाह मि
तिविधिर्भगवच्छरणत्वमितितन्नाशयोः शरणत्वं संभवे पिनत्वीये
शरणपदमत्रह राजाहमेवेतिवदन्यमादिहराज्ञोत्रहपवनत्वरत्त
णीयः ६६ ॥

ज्ञानवैजयंती [illegible] १८

ननु दृशात्वन्मक्तोऽपि भवितुमर्हं कथं शक्यानियतः कर्म मिश्रायाः।
नन्वीदृशात्वन्मक्तोऽपि भवितुमर्हं कथंशक्यानियतः कर्मिश्रायाः।
स्वकर्मेम न देवतायगणपरिशुद्धिनाभावात्फलकर्त्वादित्यागकरण
स्वकर्मेमनदेवताद्यगपरिशुद्धिनाभावात् मिश्रायाश्राप्रभावः
ह्यासाध्यत्वकर्मसिद्धान्तकरणशुद्ध्याभावेन तानमिश्रापायाप्रभावः
स्वपररूपादिनाभावे विश्वर्हगातु मतिरेवकथमपपद्यते इत्येवविध
वाकुलेनालमत्वम्केस्वगानेकविविधत्वधर्मोचितकर्मादेसाधने
स्मत्पदिष्टस्यापि मम शोकनिहन्ति नेभवेत् तस्मात्त्रिमर्यायश्रेयः
स्यात्त्रिक्षितेषु हितन्मेशिष्यस्तेहेतायिमांत्वंप्रपद्यामि सकृत्प्रपन्नस्य
नश्चोत्तरस्वरूपममोघापमेद्धहीतिचेन्नाह सर्वधर्मानिति सर्वधर्मो
त्सर्वान्तमन्यानि विरोधिरूपान् यद्येवंभूतावेदोक्तास्ववर्णाश्रमोवि
तकर्मत्तान भक्तादयोऽपि स्वस्वार्हतानप्रिज्ञानिजल विहितान्पित्र
मानगुवादिवचनाचरणादिरूपानप्यविलान्धर्मान्पद्वा
सर्वान्प्रतिस्वभावरूपानकालस्वभावरूपोऽत्रतत्त्वप्राकृतत्वभावान्
परित्यज्यस्वरूपतस्त्याज्यामामस्यक्त्वा वाच्याहमर्थास्वरूपमवनादि
न्यस्याभाविककल्याणगुणशामवाद्वयादिप्राकृतस्वरूपान्मे
गत्वविग्रहेकैराघाघमरानिकरंदितपारपीतमहाविभूतिपति
परब्रह्मपुरुषोत्तमनारायणादिशाहाभियेयमवैस्वरंवास्व

श्री॰
गी॰ टी॰
अ॰
287

देवपुत्रं त्वमाराध्यमेकेन तन्मनसः सेवतस्मै रवित्रिनयनारिंजीवात्मा
नेशरणं व्रज मम परमाराध्यं परमशरण्यं परमोपायोपेयं श्रीकृष्णमे
वोपायमत्प्रपन्नो भवतन्न सर्वैनिसामान्यपदेनधर्ममात्राणां
त्यागः प्राप्तस्तत्रानिविरोधिधर्माणामेवत्यागस्यावचनतः कर्माणां
मिनिकृततोलभ्यते वेत्तमामेकमहमित्तमाभगवद्धर्मा [illegible] हितस्य
र्माणामेवत्यागस्याच्युत्तेस्मादतो न दोषः न तु तत्त्यागिनिमात्रमिहैव
धृतिहिंसानां सर्वधर्माणांत्यागे मम महत्पापं भविष्यतीति चेत्तत्रा।
ह अहं मद्धर्मधर्मीभित्रसर्वज्ञः सर्वसर्वेश्वरसर्वाद्देशानात्मानं मत्त्वं
मच्छरणागतं सर्वपापेभ्यो मत्प्राप्तिविरोधिभ्यो वेदविहितस्वधर्मा
चितधर्मत्यागजनेभ्यो पहासर्वपापेभ्यो मद्भक्तिविरोधिभ्यः पुण्य।
पापमिश्रितरूपसंचितक्रियमाणकर्मभ्यः पुण्यसंसारप्रापकेभ्यो
नपापाभिधानेचरतएवमोक्षयिष्यामि मोचयिष्यामि माशु
चस्त्वमेतत्हिषये शोकेमाकार्षीः अयंभावः अनुकूलस्यसंकल्पः प
तिकूलस्यवर्जनं रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथात्मनिक्षे
पकार्पण्ये षड्विधा शरणागतिः इत्यस्यार्थः अनुकूलस्यसंकल्पः श्री
कृष्णेन सर्वात्मनेति निश्चितत्वाद्दिष्यावरोतस्य प्राणिमात्रस्यानु
कूलाचरणाध्यवसायः चराचराणि भूतानि सर्वाणि भगवद्वपुः
अतस्तदानुकूल्यंमेकर्तव्यमिति निश्चयइतिवचनात् प्रतिकूलस्यव
र्जनं सर्वात्मविपरीतहिंसामात्सर्यादित्यागः स च यो उपाध्यायेस्व
रासंसेपद्विनिर्णये उक्तः विश्वासोनाम वात्सल्यादिगुणसागरः स
र्वेशरणः प्रपन्नानस्मान्रक्षिष्यत्येवेति निश्चयः इति
इतियासदृढामतिः स विश्वासो भवेच्छक्र सर्वदुष्कृतनाशनः इति
वचनात् गोप्तृत्ववरणं नाम सर्वज्ञः सर्वशक्तो समर्थः सर्वशरण्यः
कारुण्यवात्सल्यादिगुणसागरोपि प्रार्थनां विना न गोपायति
स्मपरमकारुण्यविवर्जितेन प्रार्थितो न गोपायतीति प्रार्थनाम् एवेत्या
गात् शास्त्रैकसमधिगम्यते इति निश्चित्य अनया सर्वमोहमये।
श्रीमत्वया विषयकेन इति निश्चित्यबुद्धेः सदैवप्रार्थनाप्राव
र्थिनात्नगोपायेदिति याप्रार्थना सा वरणं विशेषइतियावत् अथा
नवरणं नाम आर्थनाप्रार्थनामतिः गोपायिता भव गोप्ता
हरमसारमार्गे मनमामहरजनाद्गुरोरस्मादिके आत्मानिवेदप्रश्न

यं

सर्वशरण्यः

अप्रयत्नवश्यमायवश्यासाधारणप्रसादहेतुः अपतिरेवेतिनिश्च।
येनतेनत्वमाणास्यात्मनोऽहंममतवफलकस्वाम्यादीनांभारस्यश्री
भगवत्पणात्मात्मनीयभरणंशाख्यमितिपदेनोच्यते इतिवचनात
आत्माराज्यंधनंमित्रंकलत्रंबान्धवानिच एतद्भगवतेसर्वमितिन
श्चोऽस्मिनित्सदेत्सपरिचराध्योनेराज्यवाहुचराममस्यधर्मेवन्मिहा
हसीतिवाल्मीकीयेभरतवचनात् यदन्तरनभवेकर्म्मस्यनत्वंरवल
शाश्वतमितिभारतवचनात् कार्पण्यंचउपायानामसिद्धानहिपरी
तानामुपायानांस्वतःप्राप्ताचकर्त्रेत्वाध्यमितिवेशरूपवर्गहानिः
उपायानिवासिद्धौतोमर्पयाविविधास्तथा इतियावर्गहानिस्तदेवं
केंभ्रणमुच्यतइतिवचनादिसेवेषडंगतूपिकयामन्यपत्यासर्वदे
षविनाशकारिणाभक्तोमन्यपत्रोभविष्यसिचेत्तयाप्रक्षं किं।
प्राप्यमोर्त्तेशापस्यसिमेशापमाकुरु ॥ ६६ ॥

+अधुनातुईश्वरःसर्वभूतानांहृद्देशेर्जुन तिष्ठतितमेवसर्वभावे केवित्सामान्यधर्मीः

नशरणंग च्छेतियद्क्तं नाहिहृणाति॥

मधुसूदनी टीका १-

+केचिद्धर्माधर्माः केचिदाश्रमधर्माइत्येवंसर्वानपिधर्मान्परित्यज्य
विद्यमानानविद्यमानान्वाशरणत्वेनानादृत्यमामीश्वरमेकंद्वितीय
यंसर्वधर्माणामधिष्ठानंफलदातारंचशरणंव्रजधर्माः सन्तुन
सन्तुवाकिंतैरन्यसापेक्षैः भगवदनुग्रहादेवत्वनन्यनिरपेक्षादहंकृ
तार्थोभविष्यामीतिनिश्चयेनपरमानन्दघनमूर्तिमनंतं श्रीवासु
देवमेवभगवंतमनवरतंभावनयाभजस्वइदमेवपरमंतत्वंनातो
धिकमस्तीतिविचारपूर्वकेणप्रेमप्रकर्षेणसर्वानात्मवृत्तीनाश्रय
यामनोहम्यातैलधारावदविच्छिन्नयासततंचिन्तयेत्यर्थः अत्र
मामेकंशरणंव्रजेत्यनेनैवप्रकारेणसर्वधर्मशरणतापरित्या
गेलब्धेसर्वधर्मान्परित्यज्येतिनिषेधानुवादस्तत्रकार्यकामिना
लाभायधनाय [illegible] मिमन्त्रनगिगिरेनिवृ
त्यादिनिवत् तथाचममेवसर्वधर्मकार्यकारित्वान्मदेकशरणस्य
नाविधर्मापेक्षेत्यर्थः एतेनेदमपास्तंसर्वधर्मान्परित्यज्येत्यनेना
धर्माणांपरित्यागोलभ्यते अतोधर्मपरंकर्ममात्रपरमिति नतत्व
[illegible] तथानादरेणभगव
[illegible]

श्री॰
गी॰टी॰
४८

२८८

देकशरणतामात्रेत्रसर्वादिरहस्यवानर्थस्यमिदंतुणसाधारणे।
नविधीयतेतत्रसर्वधर्मान्परित्यज्येतितेषांस्वधर्माणांस्वरूपेणत्यागेसंभवेनत।
त्रिवारणार्थंश्रधर्मेवानर्थफलेकस्याप्यादराभावात्तस्यारित्यागवच
नमनर्थकमेवशास्त्रोक्तत्यागमत्वाच्च तस्माद्वर्णाश्रमधर्माणामभ्यु
दयहेतुत्वप्रसिद्धेर्मोक्षहेतुत्वमपिस्यादितिशंकानिराकरणार्थ
मेवैतदुच्यतेइतिभाष्यं नचसर्वधर्माधर्मपरित्यागोत्रविधीयते।
संन्याससशास्त्रेणप्रतिषेधशास्त्रेणचलब्धत्वादेवनचेदमपिसंन्या
सशास्त्रंभगवदेकशरणतापाविधिपरत्वात् तस्मात्सर्वधर्मा।
न्परित्यज्येत्यनुवादएवसर्वेषांतथाशरणंपरमरहस्यमीश्वरशरण
तैवेतितत्रैवशास्त्रपरिसमाप्तिर्भगवताकृतातामस्मरणेसंन्यास।
स्यापिसफलपर्यवसायित्वात् अर्जुनेनचतत्त्वविसंन्यासानधिका
रिणश्चतिसंन्यासोपदेशायोगात् अर्जुनव्याजेनान्यसंन्यासोपदेशेनव
द्यमितेहितत्वांमोक्षयिष्यामिसर्वपापेभ्यस्त्वंमाशुचइतिचोपक्र
मोपसंहारौतस्मात्तान्स्मान्नमासधर्मेष्वप्यनादरेणभगवदेकश
रणतामात्रेणसर्वभावेनः यस्मात्त्वमदेकशरणः सर्वधर्मानाद
रेण अतोहंसर्वधर्मकार्यकारितात्वांसर्वपापेभ्योबन्धवयादितिमि
नेभ्यः संसारहेतुभ्योमोक्षयिष्यामिप्रायश्चित्तेविनेवधर्मेणपापं
श्रपनदिनीतिश्रुतेर्धर्मस्थानीयत्वाच्चममश्रुतेमाशुचः श्रेष्ठ्य
तस्यममवेधवयादितिमितप्रयवाणात् कथंनिस्तारःस्यादितिशो
कंमाकार्षीः भाष्यकारैर्निरस्तानिदुर्मतानीहविस्तरात् ग्रंथव्या।
ख्यानमात्रार्थीनतदर्थमस्यते तेसेवाहेममेवासोसपवाहमिति
त्रिधा भगवच्छरणत्वेस्यात्साधनाभ्यासपाकतः विशेषोवर्णितो।
स्माभिः सर्वाभक्तिरसायने ग्रंथविस्तरभीरुत्वादिह्यावमिहक
थ्यते तत्राद्यंमृदुपूपाभ्यासमपिभेदापगमेनाप्यनवाहनुमामको।
नस्व सामुद्रोहितरंगः क्वचनसमुद्रोनतारंगः द्वितीयमध्यय
थाहनमदिष्पातोमिवलानद्मसकिमत्रुते हृदयायदि नि
चवासुदेवः परमप्रमानरपरमेश्वरःसएकः इतिमतिरचलाभ

वचनेनेहदृश्यगतेव्रजतानिहाय हराद्दिति इत्येतत्प्रतियमवचने श्रे
वरीषप्रकाद्योपीप्रभृतयश्चासांभूमिकायामद्राहृतेवाः श्रसित्
हितोनाशास्त्रेनिष्ठात्रयेसाध्यसाधनभावापन्नेविवक्षितमत्रकेचवेद्
या नत्रकर्मनिष्ठासर्वकर्मसंन्यासपर्यंतोपसंहृता स्वकर्मणातमभ्य
र्च्यसिद्धिंविंदतिमानवः इत्यत्रसंन्यासपूर्वकश्रवणादिपरिपाकसहि
ता ज्ञाननिष्ठोपसंहृता ततोमांतत्त्वतोज्ञात्वाविशतेतदनंतरमित्यत्रभ
गवद्भक्तिनिष्ठा उभयसाधनभूताभयफलभूताचभवतीत्येतदुपसं
हृता सर्वधर्मान्परित्यज्यमामेकंशरणंव्रजेत्यत्र भाष्यकृतस्तुसर्वधा
मान्परित्यज्येतिसर्वधर्मसंन्यासानुवादेनमामेकंशरणंव्रजेतिज्ञाननि
ष्ठोपसंहृतेत्याहुः भगवदभिप्रायवर्णनेकेवयंवराकाः वचोपहीना
ष्ठोपरमश्रुतस्यागमगिरा रहस्यंतस्मुख्योमननिनिपुणाः कोविन
नेनोश्रुहृदेवेतदालोच्यदिहकृतवानस्मिकयमप्यहेतुः स्वेहातोनदपि
कृतकार्यैवमहतो [illegible]

६६ ॥ मदानंदी टीका ॥

सर्वोक्तभक्तियोगस्यपारंभस्यविरोधिनः पापात्प्रतिबंधायेनेक
स्व० जन्मार्जितामलाः १ ता[illegible]तिमेत्क्लेशमः स्याद्भक्तियोगेधिकारिता प्रा
नेपायश्चित्तपापानामन्यारंभविरोधिनां २ तस्यापश्चित्तरूपेस्तयमेतोना
विधेरपि प्रल्पकालकृतेसर्वपापानांडलत्वतः ३ इत्येवमात्मनो
भक्तियोगारंभेप्ययोग्यतां श्राते[illegible]शोचतोजिह्नैः शोकेचापनुदन्
तिः ४ प्राहानुग्रहवान्सत्यवादीरथिः पार्थसारथिः सर्वधर्मान्परि
शोकप्रायश्चित्तात्मिकान्वहून् ५ कृष्णवादायणोक्ष्यादीन्स्तनपादान
चृणिणः नानाविधान्त्यपायधर्मान्स्वल्पकालानुयायिनो ६ तुत्त्वदा
नतृणांश्चपरित्यज्यैवसर्वशः निर्विघ्नभक्तियोगस्यसम्यगारंभसिद्ध
ये ७ मामेकमीश्वरंसर्वासाधारणगुणाश्रय शरणागतवत्सले ८ तवास्मीतियियाश्रयात्र्यपयस्वसुखासदं
शरणंकेदहेकृष्णमांरक्षाणास्वमेवकं ९ अनन्यशरणात्वामेवमेव
शरणंगच्छ इत्येवमतुसंधायसर्वकृत्यविहायमां प्राश्रयस्वतनोइह
शरणंभव इत्येवमतुसंधाय

श्री
गी॰ टी॰
प्र॰
२८९

त्वां पापेभ्यो मं स्वशोकितेः मत्वा रे भव विरोधिभ्यो मोक्षयिष्यामि माशु
चः ॥ ११ सकलमपि विहाय भ्रांतिजालेश्च मा फलव्रज हरिशरणं शीघ्र
म्विधास्यामि हेतं भजनमपि हरेः श्रीकृष्णचंद्र सर्वात्मप्रभुमिह स्व
नतस्थे मम मुक्तेस्तु सिद्धेन ॥ १२ यदा श्लोकद्वयस्याहं नामार्थं भगवा
न्हरिः ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति १३ तमेव शरणं गच्छे
त्येवं गुरितस्य च धर्माः केचन वर्णानां केचिदाश्रमवासिनां केचि
त्सामान्यधर्माश्च वेदस्मृतिनिगिरीरिताः विद्यमानांश्च तान्धर्मान्समस्ता
न्फलानपि १५ अविद्यमानान्वा शास्त्रविहितानपि सर्वशः सुतारे
स्मिन्हि ये सर्वेशरणेनेन समताः १६ आसेव्यास्त्वमनादृत्य सामीप्य
रमेकं विभुं आनंदं सर्वधर्माणामधिष्ठातारमव्ययं १७ धर्माणां फल
दातारं स्वदोशरणं व्रज धर्माः सेवन न वा सेवन्तु किमेतैः परैर्वकैः
१८ भगवद्दासदेवस्यानुग्रहादेव सेव्यया कृतार्थोहं भविष्यामीत्य
वेनिश्चित्य चेतसा १९ वासुदेवमनंतं श्रीपरमानंदविग्रहं करुणा
मागरं स्वकल्याणगुणाश्रयं २० कृतज्ञं दीनबंधुं मां भगवंतमन
नरां भक्तिभावेन यामां भजस्व सततं हरिं २१ इदमेव परं तत्वं नान्यदि
कमिति त्वं विचारय सर्वकेणैव प्रमाणिकानां सेव्यया २२ चिंतय त्वं मनो
हृत्वा सम्यक्ज्ञानानां चिंतया नैव धारयेद्विच्छिन्नं तं दयया मेतं च हृदया २३
मदेकशरणस्यास्य नास्ति धर्मापेक्षणं तद्वेषाम स्वपरं मां विद २४ यदीशशरणं त्वस्यास्यापि सन्निहितेनके शुद्धवर्गा
नाशास्त स्वस्मानि हिंसाकृता २५ भगवच्छरणत्वेनाविनाशसर्वस
कर्मणः संन्यासस्य फलेनालिप्तस्त्वं पर्यवसायिता २६ मदेकशर
णां यस्मान्न धर्मान्नश्रुपेद्यनान् मच्चिंतनपरो निष्ठत्वं नमानसः
२७ अतोहं सर्वधर्माणां कार्यकारित्वमीश्वरः मम सामर्थ्यहेतुभाः स
र्वपापेभ्य एवच २८ वधहिंसादिजनेभ्यो मोक्षयिष्यामि माशुचः म
मद्गुहे श्वनस्यास्य कृत्वा वाथ च्युतिनः २९ निस्तारो वा कथं मे स्या
न्माकांक्षीनि निशोचने प्रायश्चित्ते विने वाहं धर्मस्थानीय ईश्वरः ३० पा
पापतममनस्कां वै मोक्षयिष्यामि भास्करः मदेहो नाच कर्तव्यो मानसो
लो वचसा तः ३१ निगमविहितधर्मैस्तद्विहानधर्मैजनिरस्ति

भवमल्लोस्त्वभोगानपेक्षाभवस्तिभयसिंयोपोतमन्तेशरणंप
हीपदमकरेदंविन्नमित्याश्रयत्व ३२ सर्वधर्मान्परित्यज्यमाश्र
कोसमतं समतलकर्मसंन्यासान्नवादैनैवस्तकिंभिः ३३ मामेकंश
रणंवेतित्ताननिःशेषसंहृता श्रीमद्भगवतेप्येवंसमतंसाधुसमते
३४ भ्रुवापमाशयोभातिश्रीमद्भाष्यकृतासता गीतासस्तवेदपश्चे
मंरहस्यकहणानिधिः ३५ श्रोकवांश्रीरमानाथोवोयसोकर्यसिद्धये
उक्तमष्टादशाध्यायेतूपसंहृतवानृते ३६ सर्वधर्मान्परित्यज्यमसर्वको
केरमापतिः प्रशोच्यानित्युपक्रम्यमाशुचश्चेतिसंहृतिः उपक्रमोप
संस्थावेकस्मिन्नर्थेइरितो ज्ञाननिर्वहणप्रकोनामयोगमविदाम
ना ३७ नचाधिकारसिद्ध्यर्थंकर्मनिष्ठेतिनापरा तयाधिकारसिद्धये
भमवद्भक्तिरुत्तमा ३८ श्रेमेरगतयाशोकान्तीयज्ञानसाधनेय
स्पदेवेपराभक्तिर्यथादेवेतथागुरौ ३९ तस्यैतेकथिताह्यर्थाःप्र
काशन्तेमहात्मनः इतिश्रुतेःकाजिज्ञासोर्भक्तिःसान्साधनंपरं ४०
प्रधानात्त्रगुणात्माप्यभिन्नमेतेहरिःस्वयं उपसंहृतवाञ्ज्ञाननि
शोमेवससाधनो ४१ नचापिप्रथमेपादेसर्वधर्मपदेनच धर्माधर्मे
हयेप्रोक्तेत्याज्यतेनात्रसंमते ४२ तेनोपसंहृतः कर्मसंन्यासोज्ञान
साधने चित्तशुद्धिंविनानासौसानकर्मविनाभवेत् ४३ तेनोपसंहृता ४४
कर्मनिष्ठापिसफलापरा पादेद्वितीयेभगवन्नवधीरूपसंहृता
भगवद्भक्तिसहितापूरुषार्थैकजन्मभूः उत्तरार्धेनसर्वाधारनिष्ठा।
पाःफलमीरितं ४५ अविद्यायाःसकार्यायानिवृत्तिश्चेतनोहरिः प्र
निष्कामजगादेमेश्लोकेगहनतमंपरं ४६ इमंवेगूढनामर्थमविद्
त्वामयामया कत्वाचित्तामनेस्वीयदर्पणोद्धाटनेकृते ४७ केचि
यमत्रसाधुत्वमित्यत्तेवहुनाश्रुता नतत्त्वज्ञानेकसंपीणाश्रीमद्भाष्यकृ
तोश्वरः श्रुतमदाद्विजनःस्वल्पःसर्वेषोनयनेनकिं श्रुयेनेतव्यावस्था
वेसाकूरत्रोपसंहृतो ४९ साध्यसाधनभावेनगीतायासेविवक्षिते
निष्ठाद्वयंभगवताध्यायेस्मिन्नुपसंहृते ५० नत्रसंन्यासपर्यायाकर्मनि
शोपसंहृता स्वकर्मणातमभ्यर्च्यसिद्धिंविन्दतिमानवः ५१ इमत्र

श्री
गी॰टी॰
प्र॰

२१०

सफलासोगाश्रीमद्भगवतास्वये
निरंतरा ५२ सफलाव सहोपायैर्ज्ञानविशेषसेदना ततोमा सेमासद्विवेदांतश्रवणादि
तत्वतोज्ञानाविशातेवेतिविस्तरा ५३ भगवद्भक्तिनिष्ठानमेफ
महादयोरपि सेवांतेवासदैवेनसमागेवोपतेहता ५४ सर्वेधर्मी
मरितज्ञेयवेवायतपावनी यस्यदेवीपराभक्तिरितिश्रुत्याहरौवि
भोः ५५ पराभक्तिः परंब्रह्मज्ञानेनब्रह्मतयेरिता सर्वोपायेनभग
वान्शरणोभक्तवत्सलः ५६ शरणंप्रपन्नानामर्थं सर्ववेदविदांस
तो शरणागतिनेहरौमोचदेनसौनमवोनरे भवत्येवफलंतस्मादा
ताप्नोहरीश्वरः इत्यस्यामपि निर्णीतव्यवस्थायामनागपि ५८
विरोधोनास्तिभगवद्भाष्यकारानुयायिनां निर्विवादाहरेर्भक्तिर्मो
नमोक्षप्रदायिनी ५९ सर्वोपरिविराजते सिद्धमित्येवमंगलं ६०
क्षचनिगमशीर्षवाक्यैर्वेदवाणीकृष्णचरणमितद्धिमोदशः
कर्मवश्यः हरिपदशरणायेदुर्लभंनास्तितेषांकिमपिजगतिहा
नेपमाप्यविचार्य ६१ विषयविषयभावंभावितंयत्रविश्वंसकल
निगमवाणीभावगम्यंत्यामोहदिसकलजनानामीश्वितारंनिवि
शेषरूपतिमभिवंदेसर्वविज्ञानसारम् ६२ ६६ ॥

नीलकंठी टीका १२

एवंतमननयजनभजननमननक्रमेणसाध्येनिष्ठाउक्ता यापूर्वा
ध्यानेनात्मनिपश्यंतीत्यनेनश्लोकेनदर्शिता इदानींग्रंथेवम
जानंतः श्रुत्वान्येभ्यउपासतेतेपितानितरंत्येवमृत्युं निपुणयणा
रतिकेवलोपास्तिनिष्ठयोगात्योक्तानामाह सर्वेतिसर्वधावणोना
माश्रमाणां देहेंद्रियबुद्धीनांचधर्मानप्रतिहेयादीनसहृत्वाइस्वा
त्मकामाभेकेसर्वेश्वरेसर्वशक्तिमेवापिनिरूपाधिवाउर्वेहेकरसमा
नेदर्शनेपरमात्मानेपरात्मस्रणात्माहिंतस्यविषादीनलेशादीन्
शरणमाश्रयः परायणंगच्छ्यस्मात्हि मदेकशरणोभवेमर्थः श्रुत
श्रुतेभ्वकैवल्यनितवजलमाविपीवेनिवतहेतन्वकाग्रपराधः
सर्वधर्मपरित्यागेनमांशरणंव्रजेत्यर्थः यद्योक्तं श्रुतान्मदर्शनेनैव

परात्मानमुपास्महे इति एतस्य भगवद्वाक्यरूपीकरणस्य फ
लमाह अहं त्वेति अहं परमात्मा सर्वान्तर्यामी नारायणः सक
लपापविनिर्मुक्तः सम्यग्ज्ञानेन त्वामात्मत्वेन सर्वपापेभ्यः सेवित
क्रियमाणेभ्यो योगाद्यवधानादिभ्यः मोक्षयिष्यामि मा शुचः शोकं मा
कार्षीः तथा हि तत्त्वज्ञानफलं पापास्पर्शः शोकतरणं च सर्व
श्रुतिस्मृतिप्रसिद्धेत्यादित्यान्तर्वर्तिनं नारायणं प्रकृत्य श्रू
यते स एष सर्वेभ्यः पाप्मभ्यः उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो
य एवं वेद तरति शोकमात्मवित् तत्र को मोहः कः शोक एकत्वम
नुपश्यत इति उदितः ऊर्ध्वमितो गतः पापानुत्क्रम्य गतो मिथ्या
पश्यतीति श्रुतिपदार्थः वर्णाश्रमधर्मस्य सर्वस्य केवलात्यये नोक्ते
नयोगेन देहादीनां धर्मोऽस्मत्कानिर्विकल्पमात्मानं साक्षात्कुर्व
तो न कर्मलेप इत्यर्थः ६६ ॥

आनंदी टीका १२

यदि त्वामेवाह।

सर्वधर्मान् उत्सीदन्ते जातिधर्माः कुलधर्माश्चेति येन त्वया मिथ्ये
वाध्यवसिता धर्मास्तान् सर्वान् परित्यज्य तत्फलशंकां सर्वं न स्यात्का
मामेकं शरणं व्रज मदुक्तमेवानुतिष्ठ रागद्वेषाभ्यां विनाप्यहन्तः स्व
जातिविहितमावश्यकं कर्म युद्धं कुर्वाणः शोकमोहवशात्ताप
निरस्य मद्वचनानुरूपप्रवृत्तिर्भवेत्यर्थः अहं त्वा सर्वपापेभ्य उत्सन्न
कुलधर्माणां नरके नियतं वास इति संभावितान्नरकावासाद्दृष्टपा
पफलान्मोक्षयिष्यामि तथा यदा जयेम यदि वा नो जयेयुरिति श
ङ्कितात्पापफलाद्दृष्टाच्च मोक्षयिष्यामि मा शुचः शोकाक्रान्तो
माभवेः सर्वप्रकरणार्थोपसंहारोऽयम् तथा हि स्त्रीषु दुष्टासु
वार्ष्णेय जायते वर्णसंकर इत्येवमादयः शोका मम यथार्थं पूर्वेणावी
रूपतो भावाभिः सहोत्तमभावनादपाकरोत् विजयस्य पाण्डवा
नां स्फुटमेव समाहितः ६६ ॥

इतिप्रतिपादितज्ञानसहभावोपदिष्टस्वकर्मानुष्ठानरूपा
न्सर्वान्विशेषान्धर्मानाचारान्परित्यज्य परिहृत्य मामेवासहे
त्वतिपादितस्वरूपमेकमद्वितीयंपरमात्मलक्षणंपरंतत्व
शरणमाश्रयंपरांगतिंव्रजगच्छमत्समापन्नोभवेत्यर्थः य
द्वानुष्ठेयत्वेनोपदिष्टानांसर्वधर्माणांसंगादिदोषरहितत्वे
नैति फलानभिसंधानमेवपरित्यागः नत्वयथोक्तस्वभाव
परमात्मसमापत्तिमात्रैकफलालम्बनमनस्तयाभवतीति
सर्वधर्मानजर्वत्रपिमदेकशरणमानसोभवेत्युक्तम् त
थाचानन्यशरणतयाहंमाश्रितः संत्वां सर्वपापेभ्यः संप्र
तिपापवद्याशृंखलेभ्यो ज्ञातिगुरुवधादिभ्यो निःशेषेभ्यः
पापेभ्योमोचयिष्यामि व्यतिरेचयिष्यामि अतोयथोक्तज्ञान
शिथिलमतित्वान्माशोकंकार्षीः इदमत्रतात्पर्यम् एकस्मि
न्परमार्थसतिमत्स्वरूपेपरस्मिंस्तत्वेयदा पर्यवस्य एवस्वदेशाजि
ज्ञात्वादिनाप्रतिपादितक्रमेणनिविडवधानेनलीनचित्तत्वात्म
देकभावमापन्नोभविष्यसि तदासर्वास्वक्रियास्वज्ञानेनैवचनै
शुचपुण्यपापविकल्पोपप्लवः स्वयंविगलिष्यन्तीति निःशेष
परंरहस्यमुपदिश्यतत्रानुपदेश्यपुरुषपरिहारद्वारेणसंप्रद
नउपदेशलक्षणंप्रतिपादयितुमाह ६६ ॥

लासिकी [illegible] टीका

किंच सर्वान्वर्णाश्रमविभागेनोक्तान्धर्मानाचारान्परित्यज्य स
र्वदापत्तेधर्मोऽयमेवेत्येवंशरणत्वेनविहाय मामेकमीश्वरंशर
णंव्रज मत्पार्थंभक्तियुक्तोपास्स्व यथाहिजिजीविषोः पुरु
षस्यमृष्टान्सर्वान्भोगान्विहायान्नेन सर्वथाभाव्यमित्यन्नस्यो
जीवनहेतोरन्नस्यावश्यकतागम्यते नान्येषांमृष्टभोगानां

नन्वत्र यदृच्छोपनतानां स्वेष्टभोगानां परिहारोऽत्र विवक्षितः एव
मत्र मुमुक्षोर्भगवदुपासनमवश्यानुष्ठेयतयोपदिष्टं ननु सर्व
धर्मत्यागो विवक्षितः एवं वर्तमानस्य मे कदाचित्कर्मत्यागनि
मित्तपापं स्यादिति माशुचः शोकं माकार्षीः यतस्त्वां मदेकश [illegible]
रणं सर्वपापेभ्योऽहमीश्वरो मोचयिष्यामि ६६
[illegible]

पंचोलीटीका

एवं ततोऽपि गुह्यतममेकं कर्मयोगनिष्ठाफलं सम्यग्दर्शनं सर्ववेदान्तसं
ग्रहं विहितं सर्वकर्मसंन्यासहितमुपदिशति सर्वधर्मानिति सर्वध
र्मान् धर्मांश्च सर्वकर्माणि नित्यनैमित्तिककाम्यनिषिद्धानि परित्यज्य
ऽन्यमस्य मामेकं सर्वान्तरं सर्वभूतस्थमात्मत्वेन शरणं व्रज न मत्तो
यत्किंचिदस्तीत्यवधारय अहं त्वामेवं निश्चितबुद्धिः सर्वपापेभ्यः सर्व
धर्माधर्मबन्धरूपेभ्यः स्वात्मभावप्रकाशीकरणेन मोक्षयिष्यामि मा
शुचः शोकं माकार्षीः ६६

रणवीर समिद्धोधिनी॥

ततोऽपि गुह्यतममाह सर्वधर्मानिति सर्वधर्मान्कृच्छ्राचरणादी
न्परित्यज्य मामेकं परमेश्वरं शरणं व्रज अहं च त्वां सर्वपापेभ्यो
गुरुपुत्रपितृमित्रवधजेभ्यो मोक्षयिष्यामि अतस्त्वं माशुचः क
थं मे पापविशुद्धिः स्यादित्येवं शोकं माकार्षीरित्यर्थः यद्वा सर्वान्ध
र्मान्धर्मप्राप्यान्स्वर्गादिभोगान्परित्यज्यानभिसन्धाय मामेकं शर
णं व्रज मयि कर्मफलानि समर्प्य स्वधर्ममनुतिष्ठ एवं चेत्तेन पाप
संबन्धः इति एतेन च संन्यासत्यागौ संगृहीतौ बोध्यौ ६६॥

मधुभाष्य

५॥

292

भाषा अनुवाद टीका

सर्व कह्यो गुह्यतम बातसे भी जोगुह्यकहै गोपनीय सोकहते
है कि हमारी भक्तिही सेसकल सिद्धि होतीहै इसप्रकार दृढवि
श्वास करिके विधि कहै प्रारब्ध औवेद शास्त्र के विधान काभरोसा
छोडि एक हमारी ही शरण लेअर्थात मेरे कहेपरविश्वास करोतो
ऐसे हमारी शरणागत रूपमें वर्तमान तुमोरकर्मयोगसे जोफेरि
औरपापहोयगे ऐसा शोचकरना क्योंकि एक मेरे शरण मेंप्राप्त
तुमको मैयावत पापसे उद्धार औमुक्तकरूंगा इसनसे शोकहर
करो औ अपना काम देखो ६६ ॥

दोहा

सर्वधर्म को त्यागके मोरीशरणहुं होहु मेंतोहि सब
हि पापसें नमोच छुडावों सोहु ९९ ॥

293

इदंतेनातपस्कायनाभक्तायकदाचन नचा
शुश्रूषवेवाच्यंनचमांयोभ्यसूयति ६७ ॥

शांकरभाष्यटीका १

अस्मिन् हि गीताशास्त्रे परं निश्रेयससाधनं निश्चितं किंज्ञानं
किंकर्म्मवा आहोस्विदुभयमिति कुतः संदेहः यज्ज्ञात्वामृत
मश्नुते ततोमांतत्वतोज्ञात्वा विशते तदनंतरमित्यादीनि वाक्या
नि केवलात् ज्ञानात् निश्रेयसप्राप्तिं दर्शयंति कर्म्मण्येवाधि।
कारस्ते कुरुकर्म्मैवतस्मात्वमित्यादीनि कर्म्मणां अवश्यकर्तव्यतां द
र्शयंति एवंज्ञानकर्म्मणोः कर्तव्यतोपदेशात् समुच्चितयोरपि
निश्रेयसहेतुत्वं स्यादिति भवेत् संशयः किंपुनरत्र मीमांसाफ
लं ननु एतदेव एषां मध्यतमस्य परमनिश्रेयससाधनत्वावधारणं।
अतोविस्तीर्णतरं मीमांस्यमेतत् आत्मज्ञानस्य तु केवलस्य निःश्रे
यसहेतुत्वं भेदप्रत्ययनिवर्तकत्वेन कैवल्यफलावसानत्वात्
क्रियाकारकफलभेदबुद्धिरविद्ययात्मनि नित्यप्रवृत्ता ममक।
र्माहं कर्ताऽमुष्मै फलायेदं कर्म करिष्यामीतीयमविद्या अना
दिकालप्रवृत्ता अस्याश्चविद्याया निवर्तकमयमहमस्मि केव।
लोऽकर्ताक्रियोऽफलोन मत्तोऽन्योस्ति कश्चिदित्येवं रूपमात्म
विषयं ज्ञानमुत्पद्यमानं कर्मप्रवृत्तिहेतुभूताया भेदबुद्धेर्निवर्त
कत्वात् तुशब्दः पक्षद्वयव्यावृत्त्यर्थः नकेवलेभ्यः कर्मभ्यः न
च ज्ञानकर्मभ्यां समुच्चिताभ्यां निःश्रेयसप्राप्तिरिति पक्षद्वयं
निवर्तयति अकार्यत्वाच्च निःश्रेयसस्य कर्मसाधनत्वानुपपत्ति
र्नहिनित्यं वस्तु कर्मणा ज्ञानेन वा क्रियते केवलज्ञानमपि
अनर्थकं तर्हि न अविद्यानिवर्तकत्वे सति दृष्टकैवल्यफला
वसानत्वाद्विद्यातमोनिवर्तकस्य ज्ञानस्य दृष्टं कैवल्यफला
वसानत्वं रज्ज्वादिविषये सर्पाद्यज्ञानतमोनिवर्तकप्रदी
पप्रकाशफलवत् विनिवृत्तसर्पादिविकल्परज्जुकेव

स्यावसाने हि प्रकाशफले ज्ञाने तथा दृष्टार्थायां च च्छिदिक्रि
यायामग्निमथ्यादीनां यथाऽऽरब्धतक्षादिकारकाणां द्वैधीभावाग्निदर्श
नादिफलादन्यफले कर्मान्तरे वा व्यापारानुपपत्तिर्यथा तथा
ज्ञाननिष्ठा क्रियायां स्वदृष्टार्थायां व्यापृतस्य ज्ञानादिकारका
णां कैवल्यफलादन्यफले कर्मान्तरे वा प्रवृत्तिरनुपपन्नेति
न ज्ञाननिष्ठा कर्मसहितोपपद्यते ज्ञाननिष्ठा भुजिक्रियाग्नि
होत्रादिक्रियावत् स्यादिति चेत् न कैवल्यफले ज्ञाने क्रियाफला
र्थित्वानुपपत्तेः कैवल्यफले हि ज्ञाने प्राप्ते सर्वतः संप्लुतोदके
फले कूपतडागादिक्रियाफलार्थित्वाभाववत् फलान्तरे तत्सा
धनभूतायां वा क्रियायामर्थित्वानुपपत्ते नहि राज्यप्राप्तिफले
कर्मणि व्यापृतस्य क्षेत्रमात्रप्राप्तिफले व्यापारोपपत्तिस्तद्वि
षयं वार्थित्वं तस्मान्न कर्मणोऽस्ति निःश्रेयससाधनत्वं न च ज्ञा
नकर्मणोः समुच्चितयोरपि ज्ञानस्य कैवल्यफलस्य कर्मसाह
य्यापेक्षा अविद्यानिवर्तकत्वेन च विरोधात् नहि तमस्तमसो निवर्तक
मतः केवलमेव ज्ञानं निःश्रेयससाधनमिति न नित्याकरणे
प्रत्यवायप्राप्तेः कैवल्यस्य च नित्यत्वात् यत्तावत् केवलज्ञानात्
कैवल्यप्राप्तिरित्येतदसत् यतो नित्यानां कर्मणां श्रुत्युक्ताना
मकरणे प्रत्यवायो नरकादिप्राप्तिलक्षणः स्यात् नन्वेवं तर्हि
कर्मभ्यो मोक्षो नास्ति इत्यनिर्मोक्षप्रसंग एव नैष दोषो नित्य
त्वान्मोक्षस्य नित्यानां कर्मणामनुष्ठानात् प्रत्यवायस्याप्राप्तिः
प्रतिषिद्धस्य चाकरणादनिष्टशरीरानुपपत्तिः काम्यानां च व
र्जनादिष्टशरीरानुपपत्तिः वर्तमानशरीरारम्भकस्य च कर्मणः
फलोपभोगक्षये पतितेऽस्मिन् शरीरे देहान्तरोत्पत्तौ च कार
णाभावादात्मनः रागादीनां चाकरणात् स्वरूपावस्थानमेव
कैवल्यमित्ययत्नसिद्धं कैवल्यमिति अतिक्रान्तानेकजन्मान्तर
कृतस्य स्वर्गनरकादिप्राप्तिफलस्यानारब्धकार्यस्योपभोगानुपप
त्तेः क्षयाभाव इति चेन्न नित्यकर्मानुष्ठानायासदुःखोपभोगस्य
तत्फलोपभोगत्वोपपत्तेः प्रायश्चित्तवद्वा पूर्वोपात्तदुरितक्षयार्थ
त्वे नित्यकर्मणां आरब्धानां च उपभोगेनैव कर्मणां क्षीणत्वाद

पूर्वेषां च कर्मणामनारब्धोऽपन्नमिदं कैवल्यमिति न तमेव
विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति विद्यायाश्चान्यः
पन्था मोक्षाय न विद्यत इति श्रुतेश्चर्मवदाकाशं वेष्टनासंभववद
विदुषो मोक्षासंभवश्रुतेः ज्ञानात् कैवल्यमाप्नोति इति च पुराण
स्मृतेरनारब्धफलानां पुण्यानां कर्मणां नाशानुपपत्तेश्च यथा
पूर्वोपात्तानां दुरितानामनारब्धफलानां सम्भवस्तथा पुण्यानाम
प्यनारब्धफलानां सम्भवस्तथा पुराणस्मृतेरनारब्धफलानां स्या
त् सम्भवस्तेषां च देहान्तरमकृत्वा क्षयानुपपत्तौ मोक्षानुपपत्तिः
धर्माधर्महेतूनां च रागद्वेषमोहानामप्युत्पन्नात्मज्ञानादुच्छे।
दानुपपत्तेः धर्माधर्मोच्छेदानुपपत्तिः नित्यानां च कर्मणां पुण्य
लोकफलश्रुतेर्वर्णाश्रमाश्च स्वकर्मनिष्ठाः पुण्यलोका भव
ति इत्यादि स्मृतेश्च कर्मक्षयानुपपत्तिः येनाहुर्नित्यानि कर्माणि
दुःखरूपत्वात् पूर्वकृतदुरितकर्मणां फलमेव न तेषां स्वरूप
व्यतिरेकेणान्यत् फलमस्याश्रुतत्वात् जीवनादिनिमित्ते विधा
नादिति नाप्रवृत्तानां च फलदानासम्भवात् दुःखफलविशेषानु
पपत्तिः कर्मणां स्यात्
ने यत्तूक्ते पूर्वजन्मकृतदुरितानां कर्मणां फले नित्यकर्मानुष्ठा
नायासदुःखं भुज्यत इति न तदसत्त्वहि मरणकाले फलदानायाने
ऊरीभूतस्य कर्मणः फलमप्रारब्धे जन्मन्युपभुज्यत इत्युपपत्तिः
ग्रन्थाः स्वर्गफलोपभोगायाग्निहोत्रादिकर्मारब्धे जन्मनि नरक।
फलोपभोगानुपपत्तिर्न स्यात्तस्य दुरितदुःखविशेषकफलस्यानुप
पत्तेश्च अनेकेषु हि दुरितेषु सम्भवत्स्वपि च दुःखसाधनफलेषु
नित्यकर्मानुष्ठानायासदुःखमात्रफलेषु कल्प्यमानेषु देहरोगा
दिबाधानिमित्तं दुःखं न हि शक्यते कल्पयितुं नित्यकर्मानुष्ठाना
यासदुःखमेव पूर्वोपात्तदुरितफले न शिरसा पाषाणवहनादिदुः
खमिति अथ हन्तेदमुच्यते नित्यकर्मानुष्ठानायासदुःखे पूर्वकृ
तदुरितकर्मफलमिति कथमप्रसूतफलस्य हि पूर्वकृतदुरितस्य
क्षयो नोपपद्यत इति प्रकृते नाप्रसूतफलस्य कर्मणः फले नि
त्यकर्मानुष्ठानायासदुःखमाह भवान्न प्रसूतफलस्येत्यपि सर्व

गी॰
टी॰
श॰

295

मेव पूर्वकृते दुरिते तत्प्रसक्तफलमेवेति मन्यते भवांस्ततो
नित्यकर्मानुष्ठानायासदुःखमेव फलमिति विशेषणमनु
क्तं नित्यकर्मविधानवैयर्थ्यप्रसंगो वोपभोगेनैव प्रसक्तफल
स्य दुरितकर्मणः क्षयोपपत्तेः किंच कृतस्य दुःखस्यैव
फले नित्यकर्मानुष्ठानायासादेव तत्र दृश्यते व्यायामादिवत
दृश्यमेवेति कल्पनानुपपत्तेः जीवनादिनिमित्तेन च विधानान्नि
त्यानां कर्मणां प्रायश्चित्तवत् पूर्वकृतदुरितफलत्वानुपपत्तेः य
स्मिन् पापकर्मनिमित्ते यद्विहितं प्रायश्चित्तं तत्र तस्य पापस्य
तत्फलमस्य तस्यैव पापस्य निमित्तस्य प्रायश्चित्तदुःखं फलं जी
वनादिनिमित्तमपि नित्यकर्मानुष्ठानायासदुःखं जीवनादिनि
मित्तस्यैव तत्फलं प्रसज्येत नित्यप्रायश्चित्तयोर्नैमित्तिकत्वाविशे
षात् किंचानित्यस्य काम्यस्य चाग्निहोत्रादेरनुष्ठानायासदुः
खस्य तत्फलत्वान्नित्यानुष्ठानायासदुःखमेव पूर्वकृतदुरितस्य फ
ले तत्र काम्यानुष्ठानायासदुःखमिति विशेषो नास्तीति तदपि
पूर्वकृतदुरितफले प्रसज्येत तथाच सति नित्यानां फलाश्रव
णात्तद्विधानानर्थक्यानुपपत्तेश्च नित्यानुष्ठानायासदुःखं पूर्वकृत
दुरितफलमित्यर्थापत्तिकल्पना चानुपपन्ना एवं विधानान्यथा
नुपपत्तेरनुष्ठानायासदुःखव्यतिरिक्तफलत्वानुमानाच्च नित्या
नोविरोधाच्च विरुद्धं चेदमुच्यते नित्यकर्मणानुष्ठीयमानेनास्य
मस्य कर्मणः फलं भुज्यत इत्यभ्युपगम्यमाने सर्वोपभोगो नि
न्यस्य कर्मणः फलमिति नित्यस्य कर्मणः फलाभाव इति विरु
इत्युच्यते किंच काम्याग्निहोत्रादावनुष्ठीयमाने नित्यमप्यग्नि
होत्रादितन्त्रेणैवानुष्ठितं भवतीति तदायासदुःखमेव काम्या
ग्निहोत्रादिफलमपक्षीणं स्यात् ननु त्वादस्य काम्याग्निहोत्रादिफ
लमप्येव स्यादिति तदनुष्ठानायासदुःखमपि भिन्नं प्रसज्येत
नच दैतोक्ति दृष्टविरोधात् नहि काम्यानुष्ठानायासदुःखात् केव
लनित्यानुष्ठानायासदुःखं भिद्यते किंचासदविहितमप्रतिषि
द्धं च कर्म तत्कालफलं तत्र शास्त्रचोदितं प्रतिषिद्धं वानन्त
कालफलं भवेद्यदि भवेत् तदा स्वर्गादिवृष्ट्यादिफलशासने

वोधमोन स्यात् अग्निहोत्रादीनामेव कर्मस्वरूपाविशेषेऽनु
ष्ठानायासदुःखमात्रेणोपलयः काम्यानांच स्वर्गादिमहाफ
लत्वमेवेति कर्तव्यताप्याधिक्यो नस्ति तत्फलकामित्वमात्रे
णेति न शक्यं कल्पयितुं तस्मात् नित्यानां कर्मणामदृष्टफ।
लाभावः कदाचिदप्युपपद्यते अतश्चाविद्यापूर्वकस्य कर्मणो
विद्यैव शुभस्याशुभस्य वा तद्यकारणं अशेषतोन नित्यकर्म।
ब्रह्मातमविद्याकामवीजं हि सर्वमेव कर्म तथाचोपपादितं अ
विद्वद्विषया सर्वकर्मसन्न्यासपूर्विका ज्ञाननिष्ठा उभौ तौ न वि
जानीतो वेदाविनाशिनं नित्यं ज्ञानयोगेन सांख्यानां कर्मयो
गेन योगिनामज्ञानां कर्मसङ्गिनो नत्वविद गुणागुणेषु वर्तते
इति मत्वा न सज्जते सर्वकर्माणि मनसा सन्न्यस्यास्तेनैव कि
ञ्चित्करोमीति अज्ञोऽसमेतत्तत्त्वविदर्थादज्ञः करोमीत्यहंकृतोः
कर्मकारणमारुरु योगस्यस्य शमप्रकारणमुदाहृतम्।
तोज्ञानी त्वात्मैव मे मतमज्ञाः कर्मिणो गतागतं कामकामा
लभंते अतस्याच्छिन्नसंयन्तोमा नित्ययुक्ता यथोक्तमात्मानमाका
शाकल्यमल्पमुपासते ददामि बुद्धियोगं तं येन मामुपयान्ति
ते मुर्धान्न कर्मिणः तोउपयान्ति इति भगवत्कर्मकारिणाये
अकृतमात्रपि कर्मिणः तास्ते उत्तरहीनफलत्यागावसानं।
साधनात्र निर्दिष्टपादवरोपासकास्त्वद्वेष्टा सर्वभूतानामित्यथा
पपरिसमाप्तसाधनाः देवाध्यायाद्युपत्रयोक्तज्ञानसाध
नानांचाधिष्ठानादिपंचहेतुकसर्वकर्मसन्न्यासिनामैकत्वा
कर्तृत्व ज्ञानवतोपरस्या ज्ञाननिष्ठायां वर्तमानानां भगवत्तत्ववि
ज्ञामनिष्ठादिकर्मफलत्रयं परमहंसपरिव्राजकानामेवलभ्य
भगवत्स्वरूपात्मैकत्वशरणानां न भवति भवत्येवमेषामज्ञा
नां कर्मिणां सन्न्यासिनामित्येषगीताशास्त्रोक्तस्य कर्तव्याकर्तव्या
र्थस्य विभागः अविद्यापूर्वकत्वे सर्वस्य कर्मणो सिद्धमिति चेत्तव
यद्यपि शास्त्रागतं नित्यं कर्म तथाप्यवि
द्वद्यादिलक्षणवत्

श्री· गी·टी· अ·

296

यावत्तएव भवति यथा प्रतिषेधशास्त्रं वागतमपवित्रमलदृष्टादिल
क्षणं कर्मानर्थकारणं अविद्याकामादिदोषतो भवति अन्यथा।
प्रवृत्त्यनुपपत्तेस्तथा नित्यनैमित्तिककाम्याद्यपीति व्यतिरिक्तात्म
मज्ञाने प्रवृत्तिर्नित्यादिकर्मस्वनुपपन्नेति चेन्न चलनात्मकस्यक
र्मणः नात्मकर्तृकस्याहं करोमीति प्रवृत्तिदर्शनात् देहादिसंघा
ते अहंप्रत्ययो गौणो न मिथ्या इति चेन्न तत्कार्येष्वपि गौणत्वो
पपत्तेरात्मीये देहादिसंघाते अहंप्रत्ययो गौणो यथात्मीयपुत्रे
आत्मा वै पुत्रनामासीति लोके चापि मम प्राण एवायं गौरिति
तद्वन्नैवं मिथ्याप्रत्ययो मिथ्याप्रत्ययस्तु स्थाणुपुरुषयोरगृ
ह्यमाणविशेषयोर्न गौणप्रत्ययस्य मुख्यकार्यार्थत्वं अधिकर
णस्तुत्यर्थत्वाल्लोपमाशब्देन यथा सिंहो देवदत्तोऽग्निर्माणव
क इति सिंह इवाग्निरिव क्रौर्यपैङ्गल्यादिसामान्यवत्त्वात् दे
वदत्तमाणवकाधिकरणकस्तुत्यर्थमेव न च सिंहकार्यमग्नि
कार्यं वा गौणशब्दप्रत्ययनिमित्तं किंचित् साध्यते मिथ्याप्र
त्ययकार्यं त्वनर्थमेव भवति गौणप्रत्ययस्य विषयञ्च जानाति
नैवं सिंहो देवदत्तः साक्षादयमग्निर्माणवक इति तथा गौणेन दे
हादिसंघातेनात्मना कृतं कर्म न मुख्येनाहंप्रत्ययविषयेणा
त्मना कृतं स्यान्न हि गौणसिंहाग्निभ्यां कृतं कर्म मुख्यसिंहा
ग्निभ्यां कृतं स्तं च क्रौर्येण पैङ्गल्येन वा मुख्यसिंहाग्न्योः का
र्यं किंचित् क्रियते स्तुत्यर्थेनोपक्षीणत्वात् स्तूयमानौ च जानी
तो नाहं सिंहो नाहमग्निरिति न सिंहस्य कर्म ममाग्नेश्चेति त
था न संघातजं कर्म मम मुख्यस्यात्मन इति प्रत्ययोत्कृतः सा
त्र पुनरहं कर्ता मम कर्मेति यत्राहंकारात्मीयैः सतीच्छाप्रयत्नैः
कर्मेहत्वभिरात्मा करोतीति न तेषां मिथ्याप्रत्ययपूर्वकत्वात् मि
थ्याप्रत्ययनिमित्तेष्टानिष्टक्रियाफलजनितसंस्कारपूर्वका हि
स्तेनोक्ताप्रपन्नाद्दोषाद्यथास्मिन् जन्मनि देहादिसंघाताभिमा
नरागद्वेषादिकृतौ धर्माधर्मौ तत्फलानुभवश्च तत्तोऽन्यौ

तेः शीतेतरेपि जन्मनोऽस्यतादिरविद्याकृतः संसारोनीतोनागत
श्चानमेयः ततश्च सर्वकर्मसन्न्यासात् ज्ञाननिष्ठायां श्चान्ति
कः संसारोपरमइति सिद्धं अविद्यात्मकत्वाच्च देहाभिमान
स्य तन्निवृत्तौ देहाद्यनुपपत्तेः संसारानुपपत्तिः देहादिसंघाते
आत्माभिमानोऽविद्यात्मकः नहि लोके गवादिभ्योऽन्योऽहमन्य।
श्चामे गवादयइति जानन् तेष्वहमिति प्रत्ययं मन्यते कश्चिद
ज्ञानेस्तु मन्यते स्थाणौ पुरुषविज्ञानवत् अविवेकतोदेहादिसं
घाते कुर्यादहमिति प्रत्ययं नहि विवेकतोजानन् यत्त्वात्मावै
पुत्रनामासीति पुत्रेऽहंप्रत्ययः स तु जन्यजनकसम्बन्धनिमित्तोगौ
णो गौणेन चात्मना भोजनादिवत् परमार्थकार्यं नशक्यतेक
र्त्तुं गौणसिंहाग्निभ्यां मुख्यसिंहाग्निकार्यवत् अदृष्टविषय।
चोदनाप्रामाण्यादात्मकर्त्तव्यं गौणैर्देहेन्द्रियात्मभिः क्रियतइति
चेन्न अविद्याकृतात्मकत्वात् तेषां गौणात्मानोदेहेन्द्रियादयः
किं तर्हि मिथ्याप्रत्ययेनैवानात्मनः सतात्मत्वमापाद्यन्ते
तद्भावे भावात्तदभावे चाभावादविवेकिनां ह्यज्ञानकालेबाला
नां दृश्यते स्थूलोऽहं गौरोऽहमिति देहादिसंघातेऽहंप्रत्ययोभवति
नतु विवेकिनां अन्योऽहं देहादिसंघातादिति जानतां तत्का
ले देहादिसंघातेऽहंप्रत्ययोभवति तस्मात् मिथ्याप्रत्ययाभावे
ऽभावात् तत्कृत एव न गौणः पृथग्गृह्यमाणविशेषसामान्य
योर्हि सिंहदेवदत्तयोरग्निमाणवकयोर्वा गौणः प्रत्ययः शब्दप्रयो
गोवास्यान्नागृह्यमाणसामान्यविशेषयोः यथा शुक्तिरजतयोर्यत्तू
क्तं श्रुतिप्रामाण्यादिति तन्न तत्प्रामाण्यस्यादृष्टविषयत्वात् प्रत्यक्षादि
प्रमाणानुपलब्धे हि विषये अग्निहोत्रादिसाध्यसाधनसम्बन्धे श्रु
तेः प्रामाण्यं न प्रत्यक्षादिविषये अदृष्टदर्शनार्थविषयत्वात् प्रामा
ण्यस्य तस्माच्च दृष्टमिथ्याज्ञाननिमित्तस्याहंप्रत्ययस्य देहादिसं
घाते गौणत्वं कल्पयितुं शक्यं नहि श्रुतिशतमपि शीतोऽग्निरप्रकाशो
वेति ब्रुवत्प्रामाण्यमुपैति यदि ब्रूयात् शीतोऽग्निरप्रकाशो वेति त

याप्यर्थान्तरेऽवक्रान्ते विवक्षिते कल्पे प्रामाण्यमप्यानुपपत्तेः न त
प्रमाणान्तरविरुद्धे स्ववचनविरुद्धे वा कर्मणो मिथ्याप्रमयवत्
कर्तृकत्वात् कर्तृरभावे श्रुतेरप्रामाण्यमिति चेत् न ब्रह्मविद्याया
मप्येवंत्वोपपत्तेः कर्मविधिश्रुतिवत् ब्रह्मविद्याविधिश्रुतेरप्रामा
ण्यप्रसंग इति चेन्न बाधकस्याप्यनुपपत्तेर्यथा ब्रह्मविद्याविधि
श्रुत्यात्मस्वगते देहादिसंघातेऽहंमप्रत्ययो बाध्यते तथात्मसेवा
स्मावतिनं कदाचित् केनचित् कथंचिदपि बाध्यते शक्यफला
व्यतिरेकावगतेर्यथाग्निरुष्णः प्रकाशश्चेति न च कर्मविधिश्रु
तेरप्रामाण्यं पूर्वपूर्वप्रवृत्तिनिरोधेनोत्तरोत्तरापूर्वापूर्वप्रवृत्ति
जननस्य प्रत्यगात्माभिमुख्यप्रवृत्त्युत्पादनार्थत्वात् मिथ्यात्वेऽप्यु
पायस्योपेयसत्यतया सत्यत्वमेव स्यादर्थवादानां विधिशे
षाणां लोकेऽपि बालोन्मत्तादीनां पयआदिपाययितव्ये [illegible]
नापि वचनं प्रकारान्तरस्थानीयं साक्षादेव प्रामाण्यसिद्धेः प्रा
गात्मज्ञानात् देहाभिमानप्रमात्वादिप्रामाण्यवत् सन्तमसते स्व
यमव्याप्रियमाणोऽप्यात्मा सन्निधिमात्रेण करोति न देवच साक्षा
कर्तृत्वमात्मनो यथा राजा युध्यमानेषु योधेषु युध्यत इति प्र
सिद्धं स्वयमयुध्यमानोऽपि सन्निधानादेव जितः पराजित
श्चेति तथा सेनापतिर्वा नैव करोति क्रियाफलसम्बन्धश्च रा
जसेनापतेश्च दृष्टः यथा च ऋत्विक्कर्म यजमानस्य तथा दे
हादीनां कर्म आत्मकृतं स्यात् तत्फलस्यात्मगामित्वात् यथा
वा भ्रामकस्य लोहभ्रामयितृत्वादध्यारोपितस्यैव [illegible] साक्षा
मेव कर्तृत्वे तथा चात्मन इति तदसदकुर्वतः कारकत्वप्रसंगा
न् कारकमनेकप्रकारमिति चेन्न राजप्रभृतीनां साक्षात्स्वापि
कर्तृत्वस्य दर्शनात् राजा तावत् स्वव्यापारेणापि युध्यते योधानां
योधयितृत्वेन धनदानेन च साक्षादेव कर्तृत्वे तथा जयपराज
यफलोपभोगेन तथा यजमानस्यापि धनत्यागेन दक्षिणादाने
नच साक्षादेव कर्तृत्वे तस्मादध्यारोपितस्य कर्तृत्वोपचारः यः सर्वो

ग्गाद्यवगम्यते यदि स्वयमसत् कर्तृत्वं स्वव्यापारलक्षणं नो
पलभ्यते राजयजमानप्रभृतीनां तदा सन्निधिमात्रेणापि क
र्तृत्वं स्वतो परिकल्प्यते यथा भ्रामणेन तथा राजयजमाना
दीनां स्वव्यापारेणोपलभ्यते तस्मात् सन्निधिमात्रेणापि क
र्तृत्वं गौणमेव तथा च सति तत्फलसंबंधोऽपि गौणएव सा
त्वे गौणेन स्वतो कार्यं निवर्तते तस्मादसदेवैतद्दूयते देहादीनां
व्यापारेणाध्यासतः आत्मा कर्ता भोक्ता च स्यादिति भ्रांतिनिमित्त
न्न सर्वमुपपद्यते यथा स्वप्ने मायायां चैवं न च देहाद्यात्मभा
वभ्रान्तिसत्तानविच्छेदेषु सुषुप्तिसमाध्यादिषु कर्तृत्वभोक्तृत्वा
द्यनर्थो उपलभ्यते तस्मात् भ्रान्तिप्रत्ययनिमित्त एवायं संसारभ्र
मः न परमार्थ इति सम्यग्दर्शनादत्यन्तमेवोपरम इति सिद्धं सर्व
गीताशास्त्रार्थमुपसंहृत्यास्मिन्नध्याये विशेषतश्चान्त इह शा
स्त्रार्थदार्ढ्याय संक्षेपत उपसंहारं कृत्वाथेदानीं शास्त्रस
म्प्रदायविधिमाह इदं शास्त्रं ते तव हिताय मयोक्तं संसारवि
च्छित्तये अतपस्काय तपोरहिताय न वाच्यमिति व्यवहितेन
संबध्यते तपस्विनेऽप्यभक्ताय गुरुदेवभक्तिरहिताय कदाचन क
स्यांचिदप्यवस्थायां न वाच्यं भक्तस्तपस्व्यपि सन् शुश्रूषुर्यो
भवति तस्मा अपि न वाच्यं न च यो मां वासुदेवं प्राकृतमनुष्य
मत्वा अभ्यसूयति आत्मप्रशंसादिदोषाध्यारोपणेन ममेश्वरत्व
मज्ञानन्न सहते सोऽप्ययोग्यस्तस्मा अपि न वाच्यं भगवत्यनसू
यायुक्ताय तपस्विने भक्ताय शुश्रूषवे तस्मा एव च वाच्यं शा
स्त्रमिति सामर्थ्याद्गम्यते तत्र मेधाविने तपस्विने वा अनयो
विकल्पदर्शनात् शुश्रूषाभियुक्ताय तपस्विने भक्ताय मेधावि
ने वा वाच्यं शुश्रूषाभक्तिवियुक्ताय न तपस्विने नापि मेधाविने वा
च्यं भगवत्यसूयायुक्ताय समस्तगुणवतेऽपि न वाच्यं गुरुशुश्रूषा
भक्तिमते च वाच्यमित्येष शास्त्रसम्प्रदायविधिः ॥ ६७ ॥
आनंदगिरिकृतटीका २ ॥

श्री॰
गीटी॰
ग्र॰

पूर्वापरालोचनातो गीताशास्त्रे आख्यायोपदेशस्य तत्तात्पर्यार्थे
निर्द्धारितमपि विचारद्वारा निर्द्धारयितुं विचारमवतारयति अ
स्मिन्निति किंशब्दार्थमेव द्वेधा विभजते ज्ञानमिति निमित्ताभावे
सेशयप्राभाववान्न निरस्यतामिति मत्वा पृच्छति कुत इति तत्त
द्वाक्यविहितकर्मानेकवाक्यदर्शने तन्निमित्तमित्याह यत्ज्ञात्वेति क
र्माणामवश्यकर्तव्यत्वोपलम्भान्मोक्षेपि निःश्रेयससाधनीभूतमा
हकर्मणापेवेति तथापि समुच्चयसाधके नास्तीत्याशंक्याह एव
मिति सम्यो सामग्र्या कार्यमवश्यंभावीत्युपसंहरति इति मेवे
दिति संदिग्धे सफलेच विचार्यमिति स्थिते सति फले संदिग्ध
मपि न विचार्यमिति उक्त्वा पृच्छति किंतदिति प्रश्नेके ज्ञान
कर्मणोः समुच्चितयोर्वा मुक्तिप्रति परमसाधनत्वमवधारणमे
व विचारफलमिति परिहरति नन्विति सन्देहप्रयोजनयोर्विचा
रप्रयोजकयोर्भावात् विचारद्वारा परमभक्तिसाधने निर्द्धारणी
यमिति निगमयति शृणु इति एवं विचारमवतार्य सिद्धान्ते संग्र
ह्णाति आत्मेति संग्रहवाक्यं विवृण्वन् आत्मानात्मज्ञानापोह्याम
विद्यां दर्शयति क्रियेति ग्राह्ययोरस्या अनादित्वमाह आत्मनी
ति तामेवाविद्यामनाद्यविद्योस्यामनर्थात्मिको प्रपंचयति ममे
ति अनाद्यविद्याकार्यत्वात् प्रवाहरूपेणानादित्वमस्याविव
विधिनष्टि अनादीति तत्र कारणाविद्यानिवर्तकत्वमात्मज्ञानस्यो
पपद्यते कुत्सा इति नवेदमपर्वे ज्ञाने निवर्तयत्यविरोधेनोप
नेनान्न चावमपत्रमलयात्मकस्यार्थक्रियाकारित्वाभावान्नाह
उपपद्यमानमिति कथं तस्य कारणाविद्यानिवर्तकत्वमित्यार्श
का कार्याविद्यानिवर्तकत्वं दर्शयन्नाह कर्मेति आत्मज्ञानस्येत्या
दिसंग्रहवाक्ये तच्छब्दयोग्यविशेषाभावादानर्थक्यमाशंक्याह त
शाह इति एतद्यावर्तकत्वमेवास्य स्फुटयति नेत्यादिना इत्थ
कर्मासाध्यता सकेतिमाह प्रकार्यत्वाच्चेति एवंविधामहिमेति
प्रकृतेः नित्यत्वेनमोक्षस्याकार्यत्वाच्च तत्र हेतुपेतेनोपपादयति

५८

नहीति ज्ञाने नापि मोक्षो न क्रियते येन हि केवलमपि ज्ञाने मुमु।
नपगुक्तमिति ऊने ऽस्मात् तत्र हेत्वर्थो निराशंकते केवलेति ज्ञाना।
नर्थिकं दूषयतीत्येति तदेव प्रपंचयति अविद्येति यदुक्तमविद्या।
निवर्तकज्ञानस्य कैवल्यफलावसायित्वं दृष्टमिति तत्र दृष्टान्तमा
ह रज्ज्वादीति उक्ते विषये तमोनिवर्तकप्रकाशस्य कस्मिंश्चित् फले
पर्यवसाने यथाहुर्विनिहन्तीति प्रदीपप्रकाशस्य सर्पभ्रमनिवृ।
त्तिद्वारा रज्जुमात्रे पर्यवसानवदात्मज्ञानस्यापि तदविद्यानिवृत्त्या
त्मकैवल्यावसानमिति दार्ष्टान्तिकमाह तथेति ज्ञानादीनां ज्ञान
निष्ठाहेतुत्वे कर्मान्तरे प्रवृत्तिसंभवात् कर्मसहितैव सा कैवल
वसायिनीति चेत्तत्राह दृष्टार्थायामिति कर्मसाहित्यं ज्ञाननिष्ठा
या दृष्टान्तेन साधयन्नाशंकते भुजीति भुजिक्रियायां लौकि।
कवैदिक्याग्निहोत्रादिक्रियायाः सहानुष्ठानवदग्निहो
त्रादिक्रियाया ज्ञाननिष्ठायाश्च साहित्यमित्यर्थः भुजिफले तृ
स्याद्ये ग्रामेऽपि स्वर्गादौ तद्धेतौ वाग्निहोत्रादावर्थित्वदृष्टेश्चके
तत्र साहित्यं न तथा मुक्तिफलज्ञाननिष्ठालाभे स्वर्गादौ तद्धेतौ
वा कर्मण्यर्थित्वेन ज्ञाननिष्ठाकर्मणोर्न साहित्यमिति परि
हरति नैम्यादिना संग्रहवाक्यं विवृणोति केवलेति ज्ञाने फलव
ति लब्धे फलान्तरे तद्धेतौ च नार्थित्वमत्र दृष्टान्तमाह सर्वत इति
सर्वत्र संप्लुते ग्राममुदकमिति समुद्रोक्तिस्तत्फले ज्ञाना।
दि तस्मिन् ग्रामे तडागादिनिर्माणक्रियायां तदर्थीत्वं च ज्ञाना
दे कस्यचिदर्थित्वं तथा प्रकृतेऽपीत्यर्थः निरतिशयफले ज्ञाने
लब्धे सातिशयफले कर्मणि नार्थित्वमित्येतद्दृष्टान्तेन स्फुटयति
नहीति कर्मणः सातिशयफलत्वमनुपजीव्यफलितमाह त
स्मात्रेति ज्ञानकर्मणोः साहित्यसंभवमपि पूर्वोक्तं निगमयति न
वेति नहि प्रकाशतमसोरिव मिथो विरुद्धयोस्तयोः साक्षादेक
स्मिन् फले साहित्यमित्यर्थः तत्र ज्ञानमेव मोक्षसाधनं यदास
हायत्वेन कर्मापेक्षते करणस्योपकरणापेक्षत्वात्तदाह नापी
ति ज्ञानस्य यतो यत्नापेक्षमपि नोभयं फले तदपेक्षे मोक्ष

श्री. गी. टी. प्र.

299

त्विनान्तरीयकत्वेन मुक्तेरन्यसाधनत्वादित्यर्थः यदुक्तमिति कर्तव्यत्वे
न ज्ञाने कर्मापेक्षमिति तत्राह अविद्येति ज्ञानस्याज्ञाननिवर्तकत्वा
त्तत्र कर्मणोविरुद्धतया सहकारित्वायोगात्र फलतदपेक्षेत्यर्थः क
र्मणोपि ज्ञानवदज्ञाननिवर्तकत्वे कथं विरुद्धतेत्याशंक्याह नहीति
केवलस्य समुच्चितस्य वा कर्मणो मोक्षे साक्षादनन्वय फलितमाह
अतइति केवलज्ञाने मुक्तिसाधनमित्यर्थः नन्विषेर्य[illegible]वंशंकेते नेमा
दिना निषिद्धमनुष्य नत्रत्यमाह यतावदिति नित्याकरणे प्रत्यवाया
मेरिति हेतुं प्रपंचयति यतइति ज्ञानवतोपि नित्यानुष्ठानस्यावश्य
कत्वाच्च केवलज्ञानस्य कैवल्यहेतुत्वेत्यर्थः कैवल्यस्यैव नित्यादि
त्यस्य यावत्वं दर्शयति नन्विति यदि नित्यनैमित्तिककर्माणि श्रोतान्य
करणे प्रत्यवायकारीण्येवस्मान्तेषामेवं तर्हि तेभ्यः समुच्चितेभ्योस
मुच्चितेभ्यश्च मोक्षो नस्यात्कृतत्वात् केवलज्ञानस्य वा नहेतुत्वादनित्यत्व
ना मुक्तिर्न सिध्येदित्यर्थः कैवल्यस्यैवमादि आकुर्वन्न निर्मोक्षप्रसं
गश्चमादिशति नैषदोषइति मुक्तेर्नित्यत्वेनायत्नसिद्धेर्न तदभावशं
केत्यके प्रपंचयति नित्यानामिति काम्यकर्मवशादिहशरीरापत्तिं
शंकितोक्तं काम्यानां चेति आरंभकर्मवशात्तर्हि देहान्तरं तत्राह व
र्तमानेति तर्हि देहान्तरं शेषकर्मणां स्यादित्याशंक्य कर्माशयस्यै
कभविकत्वान्नेत्याह पतितेस्मिन्निति रागादिना कर्मान्तरं ततो दे
हान्तरश्च भविष्यतीत्याशंक्याह रागादीनां चेति आत्मनः स्वरूपावस्था
नमिति सम्यक् अनीतासोव्यजन्मभेदेष्वर्जितस्य कर्मणोनानाफल
स्यानारब्धस्य भोगेनाक्षयात् ततो देहान्तरारंभादेकभविकत्वस्याप्रमा
णिकत्वान्न मुक्तेरयत्नसिद्धतेति चोदयति अतिक्रान्तेति लोककर्मनि
मित्ते देहान्तरं शंकितत्वमित्याह नेति नित्यनैमित्तिककर्माणि श्रोता
त्यवश्यमनुष्ठेयानि तदनुष्ठानेन महानायासस्ततो दुःखोपभोगा
त्तस्याकानारब्धकर्मफलभोगतोपगमाच्च ततो देहान्तरमित्याह निय
नि नित्यादिना दुरितनिवृत्तेनाविरोधाच्च सुकृतनिवृत्तिस्ततो देहान्तर
मित्याशंक्य सुकृतस्य नित्यादेरन्यत्वेनारब्धत्वेच मायविरुद्धस्य तस्यासि
दन्यानतो देहान्तरायोगान्नित्यादेरनन्यत्वे च न तस्य फलान्तरमिति स

ता यथा प्रायश्चित्तमुपात्तदुरितनिवर्हणार्थं न फलान्तरायेदन्तत्येवं द
सर्वमपि नित्यादिकर्म्मोपात्तपापनिराकरणार्थं तस्मिन्नेव पर्यवस्यन्न
देहान्तरारम्भकमिति यद्वान्तरमाह प्रायश्चित्तवदिति तथापि प्रारब्ध
वशादेव देहान्तरे शक्तेनेनार्जितनामारम्भकाणामपि तेषां यावदपि
कारम्भायेन सम्भवादित्याशंक्याह प्रारब्धानां चेति एवार्जितकर्म्मा
णामेव क्षीणत्वेपि कालचिरस्सर्वकर्म्माणि देहान्तरमारभेरन्नित्या
शंक्याह अप्रक्षीणत्वेति विनाज्ञाने कर्म्मणैव मुक्तिरिति पक्षं श्रु
मवष्टम्भेन निराचष्टे नेत्यादिना विद्यतेऽयनायेति श्रुतेरिति समर्थः
पवकारार्थं विवृणोत्येत्यादिभागे व्याकरोति अयमर्थ इति यदा चर्म्मव
दाकाशं वेष्टयिष्यन्ति मानवाः तदा देवमविज्ञाय दुःखस्यान्तो भवि
ष्यतीति श्रुतिमर्थतोनुवदति चर्म्मवदिति श्रौतार्थे स्मृतिं संवादय
ति ज्ञानादिति किंच नदीयमायस्यानुयाप्यमानहीनत्वेनाभासतया
पुण्यकर्म्मणामनारब्धफलानां तथाभावे देहान्तरारम्भसम्भवान्न
ज्ञानं विना मुक्तिरित्याह अनारब्धेति तथाविधानां कर्म्मणां नास्ति
सम्भावनेत्याशंक्याह यद्येति अनारब्धफलक्षयकाम्याभावेपि क
ये मोक्षानुपपत्तिरिति तत्राह तेषां चेति एतस्य कर्म्मणस्तथानुपपमा
मोक्षानुपपत्तिरिति तत्राह यस्मिन्निति कर्म्मणा पितृलोक इति श्रुति
माश्रित्य कर्म्माचये हेत्वन्तरमाह नित्यानामिति स्मृत्यापि यथोक्तार्थं
समर्थयते वर्णा इति प्रेत्य कर्म्मफलमनुभूय ततः शेषेण विशिष्ट
जात्यादिभाजो जन्म प्रतिपद्यन्त इत्येतदादिपदार्थः यत्र नित्यानु
ष्ठानायासङ्कः स्वभोगस्य तत्फलभोगार्थमिति तदिदानीमनुवदति
येनेति नित्यानुष्ठीयमानानामपापामपर्यन्तानीति विशेषः तथापि
नित्यानां काम्यानामिव स्वरूपातिरिक्तं फलमाशंक्य विप्रुड्देशेन
दृष्टश्रवणमेवेत्याह तत्त्विति विप्रुड्देशे फलश्रुतौ तत्कामनाया
निमित्तस्याभावान्न नित्यानि विधीयेरन्नित्याशंक्याह जीवनेति न
नित्यानां विध्यसिद्धिरिति शेषः श्रुतभाषिते दृश्यति नेत्यादिना त
देव विहितावश्यमनस्य तन्नर्थमाह यदुक्तमिति प्रशस्तानामित्या
दिहेत प्रपञ्चयति तद्धीति कर्म्मान्तरारब्धेपि देहे दुरितफले नित्या
नष्टानायामङ्कः स्व भज्ञानां कानुपपत्तिरित्याशंक्याह अयथेति

श्री
गी॰टी॰
ध

300

यदुक्ते दुःखफलविशेषानुपपत्तिश्च स्यादिति तदुपपादयति त
स्येति संभावितानि तावदनन्तानि संचितानि दुरितानि च नानादुः
खफलानि यदि तानि निष्कामानुष्ठानायासरूपे दुःखे तन्मात्रफला
नि कल्प्येरन् तदा तेषामेवं कल्प्यमानेषु बहुतरनिष्कामानुष्ठानायासमा
मादयतो यो दुरितकृतो दुःखविशेषो न तत्फले दुरितफलानां दुःख
नां वक्तव्याद्यो विनियोकर्म यथा विशेषे ते दुरितकृते दुःखविशेषफ
लकमित्यत्रकमिमर्थः किंच निष्कामानुष्ठानायासदुःखमात्रफलानि
चेद्दुरितानि कल्प्येरंस्तदा हठदृष्टिरागादिबाधस्य रोगादिबाधाया
श्च दुरितनिमित्तत्वानुपपत्तेः सुकृतफलत्वस्य चासम्भवादनुपपा
त्तिरेवोदीरितबाधायाः स्यादित्याह देहेति इतश्च निष्कामानुष्ठानायास
दुःखमेव दुरितफलमित्यत्रक्रममित्याह निरयेति दुःखमिति तच्छा
काले कल्पयितुमिति पूर्वेण सम्बन्धः यदि तदेव तत्फले न तर्हि
शिरसा पाषाणवहनादिदुःखं दुरितकृतं नैव तत्कारणं सुकृते दुः
खस्यातत्कार्यत्वादनस्तदाकस्मिकं स्यादित्यर्थः निष्कामानुष्ठानायासदुः
खमनुपात्तदुरितफलमित्येतत्प्रकृततया चाशंक्य वक्रमित्याह अप्रकृ
तेचेति तदेव प्रपंचयितुं पृच्छति कथमिति तत्रादौ प्रकृतमाह प्र
प्रसूतेति तथापि कथमस्माकमप्रकृततादित्वं तत्राह तेचेति प्रसू
तफलत्वमप्रसूतफलत्वमिति प्राचीनदुरितगतविशेषावगमादवि
शेषेण सर्वस्यैव तस्य प्रसूतफलत्वान्निष्कामानुष्ठानायासदुःखफलत्व
मभावात्प्रकृतत्वादितेति शंकते अथेति पूर्वोपात्तदुरितस्यापि विशेषणा
रब्धफलत्वे विशेषणानर्थक्यमिति परिहरति ननु इति दुरितमात्रस्य
रब्धफलत्वेनानारब्धफलस्य तस्याकफलविशेषवत्त्वानुपपत्तेरित्यर्थः
पूर्वोपात्तदुरितमात्रारब्धफले चेद्दोषो नैव तत्त्वयसम्भवात्त्विहार्थे
नित्ये कर्मन विधानवत्त्वमिति दोषान्तरमाह निरयेति इतश्च निष्कामान
ष्ठानायासदुःखं नोपात्तदुरितफलमित्याह किंचेति तदेव स्फोरयति
कृतस्येति यथा व्यायामसमागमनादिकृते दुःखे नामस्य दुरितस्योद्भवे न
तत्फलत्वसम्भवात्तथा निष्कामापि कृत्स्नकर्मणानुष्ठितस्यायासस्यापि तत्प
फलान्यभावपगमादनुष्ठानायासदुःखमेव चेत् फले तर्हि तस्मादेव
तदृष्टो नातस्य तद्दुरितफलत्वे कल्प्ये निष्फलत्वसम्भवादित्यर्थः दुः

त्वफलत्वे नित्यानामननुष्ठानमेव श्रेयः स्यादित्याशंक्याह जीवनादि
ति नित्यानां दुरितफलत्वानुपपत्तेः हेत्वन्तरमाह प्रायश्चित्तवदिति
दृष्टान्तं प्रपंचयति यस्मिन्निति तथा जीवनादिनिमित्ते विहितानां
नित्यानां दुरितफलत्वासिद्धिरिति शेषः सत्यं प्रायश्चित्ते न निमित्त
स्य पापस्य फलं किंतु तदनुष्ठानायासदुःखं तस्य पापस्य फलमि
ति शंकते यद्येति प्रायश्चित्तानुष्ठानायासदुःखस्य निमित्तभूतपा
पफलत्वे जीवनादिनिमित्तनित्यानुष्ठानायासदुःखमपि जीवनादे
रेव फले स्यान्नोपात्तदुरितस्येति परिहरति जीवनादीति प्रायश्चि
त्तजदुःखस्य तन्निमित्तपापफलत्ववज्जीवनादिनिमित्तनित्यादिकर्म
कृतमपि दुःखं जीवनादिफलमित्यत्र हेतुमाह नित्येति इतश्च
नित्यानुष्ठानायासदुःखमेवोपात्तदुरितफलमित्याशंक्य वक्ष्यमा
णं किंचेति काम्यानुष्ठानायासदुःखमपि दुरितफलमित्युपगमा
त् प्रसंगस्येष्टत्वमाशंक्याह तथाचेति विहितानि तावन्नित्यानि न
च तेषु फलश्रुतेः नच विना फलं विधिः तेन दुरितनिवर्हणार्थानीति
त्यानीत्यर्थः यथा तेषु च सा श्रुता काम्यानुष्ठानादपि दुरितनिवृत्ति
सम्भवादित्यर्थः किंच नित्यानुष्ठानायासदुःखस्यातिरिक्तफलाति
विहितत्वात् काम्यवदित्यनुमानात्तेषां दुरितनिवर्हणार्थत्वमित्याह प
वमिति काम्यादिकर्म दृष्टान्तयितुमेवमित्युक्तं सोक्तिर्व्याख्यानाद्व
नित्यानुष्ठानात् दुरितफलभोगो क्रियत इत्युक्तेमाह विरोधाच्चेति तदेव
प्रपंचयति विरुद्धस्येति इदंशब्दार्थमेव विशदयति नित्येति प्रत्य
स्य कर्मणो दुरितस्येति यावत् तथैवेति यदन्तरं यद्भवति ततस्य
कार्यमिति नियमादित्यर्थः इतश्च नित्यानुष्ठाने दुरितफलभोगेन
सिध्यतीत्याह किंचेति काम्यानुष्ठानस्य नित्यानुष्ठानस्य च योगपद्या
नित्यानुष्ठानायासदुःखेन दुरितफलभोगवत् काम्यफलस्यापि भु
क्तत्वसम्भवादिति हेतुमाह तत्वत्वादिति नित्यकाम्यानुष्ठानयोर्यौ
गपद्येऽपि नित्यानुष्ठानायासदुःखादन्यदेव काम्यानुष्ठानफलं श्रुता
त्वादिति शंकते यद्येति काम्यानुष्ठानफले नित्यानुष्ठानायासदुः
त्वाद्भिन्नमेव नहि काम्यानुष्ठानायासदुःखे नित्यानुष्ठानायासदुःख

श्री·
गी·टी·
प्र·

301

ञ्च मिश्रो मिश्रं स्यादित्याह तदनुष्ठाने तु प्रयोगस्येष्टत्वमाशंक्य निरा
चष्टे तचेति दृष्टविरोधमेव स्पष्टयति नहीति आत्मस्तानवदग्निहो
त्रादीनां मोक्षे साक्षादुपयोगाभावेऽपि कारणमस्तीत्याह किंचान्य
दिति तदेव कारणं विशुद्धेति अविहितमिति यत्कर्म मर्दनभोजनादि
तत् शास्त्रे विहितं निषिद्धं वा तदनन्तरफलं तथाप्यभवाभिप्रायः शास्त्री
यं कर्मतु नानन्तरफलमानन्तर्यस्याचोदितत्वात् तेनाग्निहोत्रे दृष्टफलेना
दृष्टफलकर्मसहकारि भवति नापि स्वयमेव दृष्टफले मोक्षे कर्म
प्रवृत्तिः तर्हि सुविदिता न विदित शास्त्रीयस्याग्निहोत्रादेरपि फ
लानन्तर्यं स्वर्गादीनामनन्तरमनुपलब्धेर्विरुध्येत ननु लोकेऽपि तथा
विधफलाप्तिः तथा प्रवृत्तिरग्निहोत्रादिषु तस्मादित्याह तदेति किंच
नित्यानामग्निहोत्रादीनां नादृष्टफले तेषामेव काम्यानां नादृष्टफ
ले न च हेतु विनाश्य विभागो भागीत्याह अग्निहोत्रादीनामिति फ
लकामित्वमात्रेणेति न स्यादिति एवमस्त्वयः यानि नित्यान्यग्नि
होत्रादीनि यानि च काम्यानि तेषामप्येषामेव कर्मस्वरूपविशे
षाभावेऽपि नित्यानां तेषां अनुष्ठानायासदुःखमात्रेण तयोन फ
लानन्तरमस्ति तेषामेव काम्यानामंगोपाधिकाभावेऽपि फलकामित्व
मधिकारिणि पत्तीन्येतावन्मात्रेण स्वर्गादिमहाफलत्वमित्ययं विभा
गेन प्रमाणाभावान्निरस्यति उक्तविभागायोगे फलितमाह तस्मान्निति
काम्यत्रित्यानामपि पितृलोकादिदृष्टफलत्वे तुल्ये नित्यमर्थवा
योगादर्थानां विधेवाप्रमाणत्वे तस्मादुक्तमेवेति शुभाशुभात्मके
कर्म सर्वमविद्यापूर्वकं च दर्शयन् तस्माद् तस्य तत्कारणं विद्याया
उपपन्नेन तत्र सर्वं कर्माविद्यापूर्वकमिति सिद्धमित्याशंक्याह अवि
द्येति तत्र हिंसादिदृष्टान्तेनो उक्तिं दर्शयति तदेवेति इत्यस्माविद्वद्वि
षये कर्मेत्याह अविद्वदिति अधिकारिभेदेन निष्ठाद्वयमित्यत्र वाक्यो
पक्रममेव कल्पयता आत्मनि कर्तृत्वे कर्मत्वमारोपयन् नजाना
त्यात्मानमिति वदता कर्माज्ञानमूलमिति दर्शितमित्याह उभावि
ति आत्मानं याथात्म्येन जानन् कर्तृत्वादिरहितो भवतीति उक्तवा
कर्मसंन्यासे ज्ञानवतोऽधिकारित्वं सूचितमित्याह वेदेति निष्ठा।

यमधिकारिभेदेन बोद्धव्यमित्यत्रैव वाक्यान्तरमाह ज्ञानेति न बु
द्धिभेदं जनयेदित्यत्र चाविद्यामूलत्वं कर्मणः सूचयता कर्मनि
ष्ठाविद्वद्विषयान्मोदितेत्याह अज्ञानामिति यदुक्तं विद्वद्विषया
सन्न्यासपूर्विका ज्ञाननिष्ठेति तत्र तत्त्ववित्तु महाबाहो गुणकर्म।
विभागयोरित्यादि वाक्यमुदाहरति तत्त्वविदिति तत्रैव वाक्यान्तरे
पठति सर्वेति विदुषो ज्ञाननिष्ठेत्यत्रैव पांचमिके वाक्यान्तरमाह नै
वेति नैष्कर्म्यसिद्ध्यर्थं कथयति प्रवर्त्त इति मन्यत इति सम्बन्धः
अस्तस्य चित्तशुद्ध्यर्थं कर्म शुद्धचित्तस्य कर्मसन्न्यासो ज्ञानप्राप्तौ हेतु
रित्यत्र वाक्यान्तरमाह आरुरुक्षोरिति यथोक्ते विभागे साप्तमिके वा
क्यमनुगुणमित्याह उदारा इति एवं त्रयीधर्ममित्यादि नावमिके वा
क्यमविद्वद्विषये कर्म्मेत्यत्र प्रमाणयति अज्ञा इति विदुषः सन्न्यास
पूर्विका ज्ञाननिष्ठेत्यत्रैव नावमिके वाक्यान्तरमाह अनन्या इति
मामित्येतद्व्याचष्टे यथोक्तमिति तेषां सततयुक्तानामित्यादि दा
शमिके वाक्ये तत्रैव प्रमाणयति ददामीति विद्यावतामेव भग
वत्प्राप्तिनिर्देशादितरेषां तदप्राप्तिः सूचितेत्यर्थसिद्धमर्थमाह
अर्थादिति तत्र भगवत्कर्मकारिणा युक्ततमत्वात् कर्मिणोऽपि
भगवन्तं यान्तीत्याशंक्याह भगवदिति ये मत्कर्मकृदित्यादिना
येन भगवत्कर्मकारिणस्ते यद्यपि युक्ततमाः तथापि कर्मिणा
सक्ताः सन्तो न भगवन्तं सहसा गन्तुमर्हन्तीत्यर्थः तेषामज्ञत्वे ग
मकं दर्शयति उत्तरेणेति चित्तसमाधानमारभ्य फलत्यागप
र्यन्ते पादक्रमेणानन्तरं हीनसाधनोपादानादभ्यासासमर्थ
स्य भगवत्कर्मकारित्वाभिधानाद्भगवत्कर्मकारिणामज्ञत्वे वि
ज्ञानमित्यर्थः येत्वक्षरमनिर्देश्यमित्यादिवाक्यावष्टम्भेन विद्वद्वि
षयत्वं सन्न्यासपूर्वकज्ञाननिष्ठाया निर्धारयति अनिर्देश्यमिति उ
क्तसाधनास्ते सन्न्यासपूर्वकज्ञाननिष्ठायामपि क्रियेरन्निति शेषः
किंच त्रयोदशे यान्यमानित्वादीनि चतुर्दशे च प्रकाशश्च प्रकृतिस्व
रूपादीनि पंचदशे च यान्यसङ्गतादीनि उक्तानि तैः सर्वैः साध
नैः सहिताभ[illegible]वन्तानिर्देश्यपात्तरोपासकानामपि ते ज्ञाननिष्ठा

श्री
गी टी
प्र

302

यामेवाधिक्रियेत्यभिप्रायेणाह तेत्वेति निष्ठाद्वयमधिकारिभेदेन प्रति
ष्ठाप्य ज्ञाननिष्ठानामनिष्टमिष्टं मिश्रमिति त्रिविधं कर्मफलं न
भवति किंतु मुक्तिरेव कर्मनिष्ठानां तु त्रिविधं कर्मफलं न मुक्ति
रिति शास्त्रार्थविभागमभिप्रेत्य तमुपसंहरति अधिष्ठानादीति य
दुक्तमविद्याकामबीजं सर्वं कर्मेति तत्र शास्त्रावगतस्य कर्मणो
विद्यापूर्वकत्वानुपपत्तेरित्याशङ्कते अविद्येति दृष्टान्तेन समाध
त्ते नेति तत्राभिमतां प्रतिज्ञां विभजते यद्यपीति उक्तं दृष्टान्तेना
चष्टे यथेति अविद्यादिमतो वत्सहत्यादि कर्मवत्तत्र हेतुमाह अ
न्यथेति दार्ष्टान्तिके गच्छतीति तथेति तावप्यविद्यादिमतो भव
तीत्यविद्यादिपूर्वकत्वं तेषामेषितव्यमित्यर्थः पारलौकिक
मस्ते देहाद्यतिरिक्तात्मज्ञानं विना प्रवृत्त्ययोगात्तु तेषामविद्या
पूर्वकतेति शङ्कते व्यतिरिक्तेति तथापि व्यतिरिक्तात्मज्ञा
ने पारमार्थिकात्मज्ञानाभावान्मिथ्याज्ञानादेव निमित्तादिक
र्मसु प्रवृत्तेरविद्यापूर्वकत्वं तेषामप्रतिहतमिति परिहरति
नेत्यादिना कर्मणां चलनात्मकत्वान्नात्मकर्तृत्वं तस्य निष्क्रि
यत्वात् देहादिसंघातस्य तु सक्रियत्वात्तत्कर्तृके कर्मण्यके
तथापि संघातेऽहंममाभिमानद्वाराऽहं करोमीत्यात्मनो मिथ्या
धीपूर्विका कर्मणि प्रवृत्तिरिष्टा तेनाविद्यापूर्वकत्वं तस्य
प्रकमित्यर्थः यद्युक्ते देहादिसंघातेऽहमभिमानस्य मिथ्या
ज्ञानत्वं तदावियतिदेहादीति अहंधियो गौणत्वे नापूर्वक
कर्मस्वपि गौणत्वापत्तेरात्मनो नर्थाभावात्त्रिहमर्थ्ये हे
त्वन्वेषणे नष्टादिति हृष्यतिनेति यतदेव प्रपंचयत्यादौ
बोध्यं उपपादयति आत्मीयेति तत्र मुख्यत्वमेव दृष्टान्तमाह यथेति
दर्शितं कलत्रात्मीये पुत्रेऽहं प्रत्ययो गौणस्तथा संघातेऽप्यात्मीयेऽहं प्रम
यस्त्वया प्रकृतमर्थः भेदयोः पूर्वकत्वं गौणधियो लोके प्रसिद्धमित्याह लो
के प्रसिद्धमित्याह लोके चेति लोकवेदानुरोधेनात्मीये संघातेऽहंधीरपि
गौणी स्यादिति दार्ष्टान्तिकमाह नहीति मिथ्याधियोऽपि भेदधीपूर्वकत्व
समवादात्मीयसंघातेऽहंधियो मिथ्यात्वमेव किंतु स्यादित्याशङ्क्याह नैव

मिति भेदधीश्चैकत्वाभावे कथं मिथ्याधीरितदेतीत्याशंक्याह मिथ्येति
गुणयिष्वानारोप्ययोर्विवेकाग्रहात्तद्रूपमतिर्मिथ्याधीः देहादावहंधियो गौण
नेति चोद्यं विहन्ति तत्कार्यमिथ्याधीत्यादि परिहारं विहणोति नेत्यादि हे
तुभागं विभजते यथेति सिंहो देवदत्त इति वाक्ये देवदत्तः सिंह इवेत्यु
पमया देवदत्ते क्रौर्याद्यधिकरणे लोके प्रवृत्ते अग्निर्माणवक इत्यपि
वाक्ये माणवकोऽग्निरिवेत्युपमया माणवकस्य पैङ्गल्याधिकरणत्व
मेव न तथा मनुष्योऽहमिति वाक्यस्याधिकरणस्यात्मनो भातीत्य
र्थः देवदत्तमाणवकयोरधिकरणत्वे कथं मिथ्याशंक्याह क्रौर्येति किंच
गौणाशङ्कते तत्रस्यैव निमित्तीकृत्य सिंहकार्यं न किंचिद्देवदत्ते सा
ध्यते नापि माणवके किंचिदग्निकार्यं मिथ्याधीकार्यं तु तथैवात्मानु
भवत्वेन देहादावहंधीर्गौणीत्याह नचेति इतोऽपि देहादौ नाहं
धीः गौणीत्याह गौणेति यो देवदत्तो माणवको वा गौणधियो वि
षयस्ते परो नैव सिंहो नायमग्निरिति जानाति नैवमविद्वानात्मनः सं
घातस्य च सत्यपि भेदे संघातस्यानात्मत्वे अभेदमतेन संघातेऽहंशब्द
प्रत्ययो गौणविपर्ययः संघाते तयोर्गौणत्वे दोषान्तरं समुच्चिनोति
तथेति तथा सत्यात्मनि कर्तृत्वादि प्रतिभासासिद्धिरिति शेषः गौणेन
कृते न मुख्येन कृतमित्युदाहरणेन स्फुटयति नहीति यद्यपि देवदत्तो
माणवकाभ्यां कृते कार्यं मुख्याभ्यां सिंहाग्निभ्यां न क्रियते तथापि दे
वदत्तगतक्रौर्येण मुख्यसिंहस्य माणवकनिष्ठपैङ्गल्येन मुख्याग्नेरिव
च संघातगतेनापि जडत्वेनात्मनो मुख्यस्य किंचित् कार्यं कृतं भविष्य
तीत्याशंक्याह नचेति देहादावहंधियो गौणत्वायोगे हेत्वन्तरमाहस्तत्
यमानाविति देवदत्तमाणवकयोः सिंहाग्निभ्यां भेदधीश्चैके तथा
पारब्धाभावधीवदात्मनोऽपि मुख्यस्य संघाताद्भेदधीद्वारा तदीयध्याप्य
र्वाहि समानात्मनि दृष्टं स्यादित्यर्थः आवयोः दर्शयति न तु तत्रेति संघा
तेऽहंधियो मिथ्याधीत्वमपि न तत्कृतमात्मनि कर्तृत्वं किंचात्मा य
ज्ञानेच्छाप्रयत्नैरस्य कर्तृत्वं वास्तवमिति मन्यन्ते वदन्ति यच्चेति चा
नादिकृतमपि कर्तृत्वं मिथ्याधीकृतमेव ज्ञाने मिथ्याधीकार्यत्वादिति
हश्यति ननेष्टमिति तदेव प्रपंचयति मिथ्येति मिथ्याज्ञाने निमित्त
कृता किंचिद्दिष्टे किंचिदनिष्टमित्यारोप्य तदारभन्ते नास्मिन्प्रेप्सा

श्री॰
गी॰टी॰
ग्र॰

303

जिहासाभ्यां क्रियो निर्वर्त्यतयेष्टमनिष्टंचफलं भुक्त्वा तेन संस्कारेण
तत्पूर्विकाः स्मृत्यादयः स्वाकृति क्रियो प्रवर्त्तन्तीति शुक्रं कर्तृत्वस्य च
मिथ्यात्वमित्यर्थः अतीतानागतजन्मनोरिव वर्त्तमानेपि जन्मनि कर्तृ
त्वादिसंसारस्य वस्तुत्वमाशंक्याह यथेति विमतो कालोऽविद्याकृत सं
सारवैतो कालत्वाद्वर्तमानकालवदित्यर्थः संसारस्याविद्याकृतत्वे फलि
तमाह ततश्चेति तस्याविद्यकत्वेन विद्यापोह्यत्वे हेत्वन्तरमाह अविद्येति
कृतोस्याविद्याकृतत्वं धर्माधर्मकृतत्वसंभवादित्याशंक्याह देहादी
ति आत्मनो धर्मादिकर्तृत्वस्याविद्यकत्वात्त्वविद्यां विना कर्मिणां दे
हाभिमानः संभवस्तस्य आत्मनः संघातेहमभिमानस्याविद्यया विद्य
मानेनेत्यर्थः आत्मनोदेहाद्यभिमानस्याविद्यकत्वमन्वयव्यतिरेकाभ्यां
साधयन् व्यतिरेकं दर्शयति नहीति अन्वयं दर्शयन् व्यतिरेकमन्वय
ति अज्ञानवतीति पुत्रे पितुरहंधीः स्वात्मीये देहादावहंधीर्गौणात्मक
मन्ववदर्शयतीति तत्र दृष्टान्तक्रमेण गौणात्मविषयत्वमक्रममङ्गीका
रोति सवितति नहि देहादावपि तथैव स्वकीये स्यादहंधीर्गौणी स्याच्छंका
ह गौणेनेति नहि स्वकीयेन पुत्रादिना गौणात्मना पितृभोजनादिकार्यं
क्रियते तथा देहादेरपि गौणात्मत्वे तेन कर्तृत्वादिकार्यमात्मनो नवा
स्तवं सिद्धमित्यर्थः गौणात्मना मुख्यात्मनो नास्ति वास्तवं कार्यमित्य
त्र दृष्टान्तमाह गौणेनेति नहि गौणेन सिंहेन देवदत्तेन मुख्यसिंहका
र्यं क्रियते नापि गौणाग्निना माणवकेन मुख्याग्निकार्यं दाहपाका
दि तथा देहादिना गौणात्मना मुख्यात्मनो न वास्तवं कार्यं कर्तृत्वादिक
तं शक्यमित्यर्थः स्वर्गकामादिवाक्यप्रामाण्यात् आत्मनो देहाद्व्यतिरेकज्ञा
नस्य च केवलस्याकर्तृत्वात्तत्कर्तव्यं कर्म गौणेनैव देहादिनात्मभिः सम्पा
य तेन हि स एव श्रौतानतिरेकत्वाते देहादावात्मत्वमात्मनो मुख्यत्वं गौण
मिति बोधयति अहेष्टेति न देहादीनामात्मत्वं गौणं तदीयात्मत्वस्य विध
त्वमिति परिहरति नाविद्येति नैरव विहृणनजंग्ये स्फुटयति गौणा
इति कथं नहि देहादिविषयात्मत्वप्रत्ययो माशंक्याविद्याकृतत्वादि देहे
विभजते किं तदीति देहादीनामात्मनामेव सतामात्मत्वं मिथ्याप्रत्ययकृ
तमित्वाज्ञानव्यतिरेकमुदाहरति
तमिति नरावइति उक्ते न्याये शास्त्रीयं

स्कारस्यास्मदनुभवं प्रमाणयति अविवेकिनामिति व्यतिरेकेऽपि दर्शि
ते शास्त्राभिज्ञानामनुभवमनुकूलयति नविति अन्वयव्यतिरेकाभ्या
मनुभावात्तस्मादित्यर्थः सिद्धमर्थमुपसंहरति तस्मादिति तत्कृत एव दे
हादावहंप्रत्यय इति शेषः किंच व्यवहारभूमौ भेदग्रहस्य गौणत्व
व्यापकत्वात्तस्य प्रकृतेऽभावान्न देहादावहंशब्दप्रत्ययौ गौणावित्या
ह इष्यत इति अदृष्टविषयचोदनाप्रामाण्यन्तु कर्तुरात्मनो व्यतिरे
कावधारणात्तस्य देहादावहंममाभिमानस्य गौणत्वेत्वकमनुवद
ति यद्विति श्रुतिप्रमाणस्याज्ञातार्थविषयत्वात् मानान्तरसिद्धे व्यति
रिक्तात्मनि चोदनाप्रामाण्याभावान्न तदवष्टम्भेन देहादावात्माभि
मानस्य गौणतेत्यत आह नत्वेति श्रुतिप्रमाणस्यादृष्टविषयत्वे
स्पष्टयति प्रत्यक्षादीनि अज्ञातार्थज्ञापकं प्रमाणमिति स्थिते तत्रा
ते श्रुतिप्रामाण्यमित्याह अदृष्टेति अज्ञातसाध्यसाधनसम्बन्धो।
यिनः शास्त्रस्यातिरिक्तात्मगोचरत्वेऽपि फलितमाह तस्मादिति अन्व
यव्यतिरेकाभ्यां दृष्टो मिथ्याज्ञाननिमित्तो देहादिष्वात्माहंप्रत्ययस्त
स्येति यावत् अन्यविषयपरत्वाच्चोदनानां नातिरिक्तात्मविषयत्वेऽसकमि
राणीनां हि विषयत्वाङ्गीकारेऽपि न तन्निर्वोढुं शक्यमध्यक्षविरोधादित्या
ह नहीति अपौरुषेयाः श्रुतेरसम्भावितदोषायाः मानान्तरविरोधे
पि प्रामाण्यमप्रमाणायोग्यमित्यभिप्रेत्याह यदीति स्वार्थबोधपरमाः श्रु
तेरविरोधापेक्षत्वाद्विहितार्थवादिवे तत्परिहाराय विवक्षितमर्थान्त
रमविरुद्धं तस्मात्स्वीकर्तव्यो विरोधे तत्प्रामाण्यानुपपत्तिरित्याह तथा
पीति अविरोधमर्थवादे श्रुतस्यार्थकल्पना न श्रुतेरिति वा व्यवस्थामाह न
किति अविद्यावत्कर्तृत्वे कर्मेति तदुपयोगमाह इत्यन्नायां विद्यायामवि
पायामविद्याभावे तदधीनकर्तृत्वाभावादनेन कर्तारमनुष्ठानामि
हो कर्मकाण्डप्रामाण्यमित्यस्य पानविधिविरोधः स्यादिति शङ्कते तेनक
मान इति कर्मकाण्डश्रुतेर्विसंवादित्वात् एवं व्यावहारिकप्रामाण्यस्य
लाविकप्रामाण्याभावेऽपि समत्वाद्ब्रह्मकाण्डश्रुतेस्तात्त्विकप्रामाण्य।
स ब्रह्मविद्याजनकत्वेनोपपन्नत्वात् अध्ययनविधिविरोध इति परिहर
ति नबलेति कर्मकाण्डश्रुतेर्लौकिकप्रामाण्याभावे ब्रह्मकाण्डश्रु
नेरपि तदसिद्धिरविद्यादिति शङ्कते लौकिकं प्रामाण्यमिति इष्ट
पावायकाभावेन प्रमाणतान्तरे तत्कृते

श्री
गीटी
प्र

३०४

यति न बाधकेति ब्रह्मविद्याया बाधकत्वोपपत्तिं दृष्टान्तेन साधयति
यथेति देहादिसंघातवदित्यपरार्थः लौकिकावगतेरिवाम्नायगतेर
पि फलाव्यतिरेकमुदाहरणेन स्फोरयति यथेति फलमज्ञानविहितः
कर्मविधिश्रुतिवदित्यत्र दृष्टान्ते विघटयति नचेति अनादिकालप्र
वृत्तस्वाभाविकप्रवृत्तिमतां प्राणिनां प्रतिबंधेन योगाच्च लौकिकप्रवृत्तिव
त्तीर्जनयति कर्मकाण्डश्रुतिस्तज्जननेन च वितथ हिंसाद्याप्रगाला
भिसाध्यप्रवृत्तिमत्त्वाद्यति तथा च कर्मविधिश्रुतीनां पारंपर्येण
फ१ प्रमाणान्तरानर्पितार्थत्वाभावान्निश्चप्रामाण्यमस्ति हि इत्यर्थः नन्वेवमपि श्रुतेर्मि
थ्यात्वादाभासवदप्रामाण्यमिति चेत्तत्राह मिथ्यात्वेपीति स्वरूपेण
सत्त्वेपि समोपेयद्वारा प्रामाण्यमिमत्र दृष्टान्तमाह यथेति मन्त्रार्थ
वादेतिहासपुराणानां श्रुतेरर्थे प्रामाण्याभावेपि शेषविध्यन्तरोपेन प्रा
माणवत् प्रकृतेपि श्रुतेः स्वरूपेण समन्वयाविषयत्वेन यासमन्व
र्थता याः प्रामाण्यमविरुद्धमित्यर्थः वाक्यस्य शेषविध्यन्तरोपेन प्रामा
णं नालौकिकमित्याह लोकेपीति कर्मकाण्डश्रुतीनामक्रूरीमापर
सारथ्यप्रामाण्यपि साक्षात्प्रामाण्यस्वपोदितमित्याशंकाह प्रकारान्त
रेति प्राप्तस्तानोदयात् रागावस्था प्रकारान्तरं नच स्थितानां कर्मका
ण्डश्रुतीनामज्ञातसमन्वये बाधकत्वेन साक्षादेव प्रामाण्यमिष्टमित्यर्थः
ज्ञानात् पूर्वं कर्मश्रुतीनां व्यवहारिकप्रामाण्ये दृष्टान्तमाह प्रागि
ति प्रतीतिकरत्वस्याविपाकत्वेपि श्रुतिप्रामाण्यमप्रत्यूहमित्यं
मे शक्तिकर्तृत्वस्य प्रकारान्तरेण पारमार्थिकत्वमस्त्याशयति यत्विति
स्वव्यापाराभावे सन्निधिमात्रेण उत्तमस्वकर्तृत्वमित्याशंका दृष्टान्त
माह यथेति स्वयमप्रयमानत्वे कथं तत्फलत्ववत्त्वमित्याशंका प्रसिद्धि
वशादित्याह जित इति कायिकव्यापाराभावेपि कर्तृत्वस्य स्वाध्येवेद
ष्टान्तमाह सेनापतिभिर्जितस्यापि फलत्वे राजवद्विशिष्टमित्याह
क्रियेति प्रयकर्मणा प्रयस्य सन्निहितस्य स्वाध्ये कर्तृत्वे वैदिकम
दाहरणमाह यथा चेति कथमस्वविज्ञो कर्म यजमानस्येत्याशंक्याह
नफलस्येति स्वव्यापाराहते सन्निधेरेवास्य व्यापारस्तेनो मुख्यकर्तृत्वे
दृष्टान्तमाह यथावेति किंपाजवैत कारणाकारकमितिप्रयोगी कारवि
णेयाचैनदिति इष्यत इति नरमादिति कारकविशेषविषयत्वेनाङ्गी
कारणपतिनिशकत्वे कारकमिति स्वव्यापारमन्तरेण न किंचिद्।

पि कारकमिति परिहरति न राजेति दर्शनमेव विशदयति रा
जेति यथा राजा युद्धे योद्धृभिरत्वेन धनदानेन च स्वाम्ये कर्तृत्वेन तथा
फलभोगोऽपि स्वाम्यमेव तस्य कर्तृत्वमित्याह तथेति यदुक्तमृत्विक्कृतक
र्म यजमानस्येति तत्राह यजमानस्यापीति स्वव्यापारादेव स्वाम्येक
र्तृत्वमिति स्थिते फलितमाह तस्मादिति तदेव प्रपंचयति यदीति त
र्हि सन्निधानादेव स्वाम्ये कर्तृत्वे राजादीनामपगतमिति वेत्याह तथा
पीति राजादीनां स्वव्यापारगतं स्वीकृत सिद्धमित्याह तस्मादिति रा
जप्रभृतीनां सन्निधेरेव कर्तृत्वस्य गौणत्वे जयादिफलवत्त्वस्यापि सि
द्धे गौणत्वमित्याह तथा चेति न च स्वीकृतं देहत्वेन स्मारयति नेति स्व
स्वव्यापारेण तस्य स्वाम्यकर्तृत्वाभावे फलितमुपसंहरति तस्मादिति
कथं तर्हि त्वयात्मनि कर्तृत्वादि स्वीकृतं न हि बुद्धेस्तदिष्टं कर्तृत्वं स्वा
भाविकत्वादिति मायायामाह भ्रान्त्येति कर्तृत्वाद्यात्मनि भ्रान्तमित्येतदुदा
हरणेन स्फोरयति यथेति मिथ्याज्ञानकृतमात्मनि कर्तृत्वादीत्य
त्र व्यतिरेकं दर्शयति न चेति उक्तव्यतिरेके फलं कथयति तस्मादिति
संसारभ्रमस्याविद्याकृतत्वे सिद्धे परमप्रकृतमुपसंहरति इति सम्य
गिति शास्त्रतात्पर्यं विचारद्वारा निर्धार्यानन्तरश्लोकमवतारय
ति सर्वमिति प्रकृते ह्यष्टादशाध्याये गीताशास्त्रार्थं सर्वं प्रतिप
त्तिमोक्षपर्यायमुपसंहृत्यान्ते च सर्वधर्मान् परित्यज्येत्यादौ विषय
तत्त्वस्य संक्षेपेणोपसंहारं कृत्वा संप्रदायविधिवचनस्यावसरे स
तीदानीमिति योजना किमिति विस्तरेणोपसंहृतः शास्त्रार्थः संक्षि
प्योपसंह्रियते तत्राह शास्त्रार्थेति संक्षेपविस्ताराभ्यामुक्तेऽर्थे सर्वे।
षां इष्टस्तथा बुद्धिमधिरोढुं तोऽर्थः हितायेत्येतदेव व्याचष्टे से
सीदतीति कदाचनेति सर्वैः संबध्यते प्रतिबन्धसामर्थ्यसिद्धमर्थक
पादयति भगवतीति गुर्वादिसिद्धेऽर्थे स्वल्पान्तरमनुसृत्य मेधाविता।
मन्तर्भावयति तेनेति विकल्पदर्शनादिप्र मेधाविनमपि प्र
विशानीत्यर्थः विकल्पयते कथमधिकारिप्रतिपत्तिरिति तत्राह
शुश्रूषवेति तामेवाह शुश्रूषाय भगवत्प्रयुक्तायाहिताय तपस्विने वाच्यमि
नि संबन्धः तत्प्रयुक्ताय शुश्रूषाभक्तियुक्ताय भगवति ऋतमस्ति
नायमर्थः तपस्वित्वमेधाविवेचनाधिकारिविशेषणानि।

श्री
गीटी
श्र

305

ति शंकां शांतयति अशुश्रूषवेति भगवद्विषयासूयारहिते नापि सर्वे
ऽसूयति भगवतीति कस्मै तर्हि वाच्यमेतदित्याशंकायां स्वीकृतसर्व
गुणसम्पन्नायेत्याह अशुश्रूषवे ति चकारेण विशेषणोपलक्षणा
र्थं सम्भवयुक्तो मेधाविने तपस्विने वा नान्यापेक्षते सर्वेषां महाद्य
काभावाद्येक्षितमेवेति भावः ६७ ॥

स्वामिकृतटीका ३

एवं गीतार्थतत्वमुपदिश्य तत्संप्रदायप्रवर्तने नियममाह इद
मिति इदं गीतार्थतत्वं ते त्वया अतपस्काय स्वधर्मानुष्ठानहीनाय न वाच्य
न च तपस्विनेऽप्यभक्ताय गुरावीश्वरे च भक्तिशून्याय कदाचिदपि न वाच्यं न चाशु
श्रूषवे परिचर्यामकुर्वते भक्तायापि न वाच्यं मां परमेश्वरं यो ऽभ्य
सूयति मनुष्यदृष्ट्या दोषारोपेण निन्दति तस्मै च न वाच्यमपि तु एतैर्दोषै
र्विरहितेभ्यो भक्तेभ्यो [illegible] ॥

पिशाचभाष्यटीका ४ ॥

इदं शास्त्रं त्वया हितावहमपि तस्मै संसारविच्छित्तये न विद्यते तपः स्वधर्मरहि
तत्वाणं यस्य तावदतपस्कस्मै न विद्यते मयि भक्तिर्भजनं तस्मै वाय स्या
भक्ताय तस्मै कदाचन कदाचिदपि न चाशुश्रूषवे यो गुरोः शुश्रू
षां न च मामीश्वरं सर्वप्राणिहृदि यो ऽभ्यसूयति देहिरिदं शास्त्रं त्वया अ
तपस्कायाशिष्याय न वाच्यं तथा ईश्वरेऽभक्ताय न वाच्यं मां यो द्वेष्टि
तस्मै न वाच्यं ६७ ॥

रामानुजभाष्यटीका ५

इदमिति इदं ते परमं गुह्यं शास्त्रं मयाख्यातं ते नेषतपस्काया नतप्त
से त्वया न वाच्यं त्वयि मयि वा अभक्ताय कदाचन न वाच्यं तमत
पसे चाभक्ताय न वाच्यमित्यर्थः न चाशुश्रूषवे भक्तायाप्यशुश्रूषवे न
वाच्यं न च मां योऽभ्यसूयति मत्स्वरूपे मदैश्वर्ये निर्गुणे च कथिते ऽ
यो दोषमाविष्करोति न तस्मै वाच्यं असमानविभक्तिनिर्देशनया
स्येतपसि हरिणीयतावतापरत्वाय ६७ ॥

अभिनवगुप्तकृतटीका ६

इदं ते इत्यादिनास्य ज्ञानस्य गोप्यमानत्वं सिद्धिं सर्वजनाविषयत्वात् तपस
तावत् प्रायश्चैवो विशीर्णकल्मषः परिपाकोन्मुखवताभवतीति पूर्वं तपस्तप
सः श्रद्धा जायते सैवात्र भक्तिः श्रद्धाप्युपजाता कदाचिन्न प्ररोहति सौदामिनी
वत्क्षणदृष्टनष्टत्वात् ततस्तत्प्ररोहे श्रोतुमिच्छा भवति इयदपि च कस्यचि
दनीष्यदेव स्वतुनिष्पन्नं संपादितां न भवति सेय्याऽपि वा कस्यचित्फलार्थतया
फलमेव प्रधानीकृत्य भगवन्तं च स्वात्मानं तदुपकरणपात्रीकरणेनाभ्यकृत
त्य भवेत् यदुक्तं श्रुतस्य स्वकर्मार्थत्वात् कर्मणोऽपि फलार्थत्वादिति एवमुभय
थापि भगवत्यसूयैवेत्यताह इदमर्थः ६७ ॥

परमार्थप्रपाटीका

एवं गीतार्थतत्त्वमुपदिश्य तत्संप्रदायप्रवर्तननियममाह इदमिति
इदं गीतानां तत्त्वं ते त्वयाऽतपस्काय स्वधर्मानुष्ठानहीनाय न वाच्यं न
चाभक्ताय परमेश्वरभक्तिशून्याय न चाशुश्रूषवे परिचर्यामकुर्वते न
च यो मां परमेश्वरमभ्यसूयति मनुष्यदृष्ट्या दोषारोपेण निंदति त
स्मै च न वाच्यं [illegible] विद्या ह वै ब्राह्मणमाजगाम गोपा
य मा शेवधिष्टेऽहमस्मि असूयकायानृजवेऽयताय न मा ब्रूया वी
र्यवती तथा स्यामिति श्रुतेः विद्यास्तेयप्रतिषेधश्चात्म विद्यापन्न हकेवा
लितत्त्वविद्निष्ठायां [illegible] भि[illegible]न सम तज्जगाम [illegible] किं मा इति मा
तेऽगोपाय वर्तमानाय [illegible] यो निचन[illegible] हि नीयोक्ता [illegible]
नित्यं मां [illegible] यतो हे तेशेवधिर्निधिः [illegible] किं लक्षणाय [illegible]
[illegible] यथा नि[illegible] क्रियतः [illegible] अयताय नियम[illegible]
ह असूयकायानृजवे [illegible] असत्यवक्त्रे [illegible] वीर्यवती हि
[illegible] विद्यानन्द्यप्रलापे [illegible] सतोऽन्यथा ६७ ॥
वीर्यवती स्या [illegible]

वनमालीटीका ८

इदानीं कथयति इदमि
समासतः शास्त्रार्थोपदेशः शास्त्रसंप्रदायमिदानीं [illegible] नातप
ति इदं गीताख्यं सर्वशास्त्रार्थरहस्यं तेन [illegible] योक्तं नात
पस्काय [illegible] वाच्यं कदाचन [illegible] भक्तिरहिताय नेदं कदा
चित्त्वया [illegible] भक्ताय [illegible] वेच भक्तिरहिताय नेदं कदाचन न
[illegible] तपस्विने भक्ताय शुश्रूषवे परिचर्यामकुर्वते नेदं कदाचन न
च यो मामभ्यसूयति मामीश्वरं वासुदेवं मनुष्यमसर्वज्ञत्वादिगुणकम
[illegible] आत्मप्रशंसादिदोषाध्यारोपणेनेश्वरत्वमसहमा
नोऽभ्यसूयति [illegible] तपस्विने भक्ताय शुश्रूषवे
[illegible] हिंसचन तपस्विने भक्ताय शुश्रूष
[illegible] कारः तपस्विने भक्ताय [illegible] भविष्यतो
पि न वाच्यं कदाचनेत्यनुकर्षार्थश्चकारः एकैकविशेषणाभावे
[illegible] वाच्यमित्यर्थः [illegible] तपस्विने [illegible]
गवतो [illegible] भगवदनुरक्तिरहिताय न
विकल्पदर्शनात् [illegible] ६७ ॥
[illegible] मेधाविने वाच्यम्
[illegible]

ॐ [illegible] टीका ९ ॥

श्री॰ गी॰ टी॰ अ॰

306

पवेनउपदिष्टेगीताशास्त्रेनतनयाधिकारिभ्योदेयंनत्वनधिकारिभ्यइ
तिसूचयन्ननधिकारिस्वरूपमाह इदमितियत्परमंगुह्यंमयाख्यातंतत
दिदंगीताशास्त्रंतेत्वया अतपस्कायदेवद्विजगुरुप्राज्ञपूजनंशौच
मार्जवक्षमादिनोक्तंयच्छारीरादितपस्तद्रहितायगुरुशुश्रूषायनवाच्यंनव
क्तव्यंतत्राप्यभक्तायशास्त्रोपदेष्टरिगुरावपितायेमयिसर्वेश्वरेगुरौ
चात्मेमभक्तिवर्जितायनकदाचनकदापिनवाच्यंचतपस्विनेभक्तायाप्यशुश्रू
षवेश्रोतुमिच्छवेजनायनवाच्यंयःशुश्रूषोतमेसर्वेश्वरंमामभ्य
सूयतिमयिनिरस्ताभाविकानेककल्याणगुणात्मकगुणान्त्वाकरेमायि
कगुणानहंकारादिकंनमारोपयतिचावधारणेतस्मैनकदापिनवेदं
नैववाच्यंचतन्नभिन्नैकादैः अतपस्कायनवाच्यमितिनयदिसभक्तो
नाहितस्मैवाच्यमेव अशुश्रूषवेनवाच्यमितिनयदिसोऽनसूयस्तर्हि
शुश्रूषवेकदाचिदपिवाच्यमपिमाभ्यसूयतितस्मैनकदापिनेव
वाच्यमितिसूचितम् भिन्नयाविभक्त्यावा अतपस्कायाभक्तायाशु
स्मातस्मैशुश्रूषवेनतद्वाच्यंचेतनावेतनयोर्विलक्षणस्वभावविक्रमितामि
त्यन्तस्वरूपमनमवैकल्पितवेदंनवाच्यमितिनकिंतुवाच्यमेव अव
हेतिनिरुक्तेः अमैंवासुदेवस्य.....भक्तस्तस्मैनवाच्यमितिनवाच्यमे
वश्रवासुदेवंगुणादिकंवाश्रोतुमिच्छतीत्यशुश्रूषुस्तस्मैनवाच्य
मितिनवाच्यमेवश्रकारोवासुदेवःस्यात् अतताणामकारोस्मीति
स्मृतेःयस्त्वनपस्कादीन्नभ्रौनूचवनमामभ्यसूयतितस्मैनैववाच्यमि

+समाप्तःशास्त्रार्थःशास्त्र संप्रदायविधिंप्रयुनाकथयति॥

त्यर्थः ६७ ॥

मधुसूदनीटीका ६७

+इदंगीताख्यंसर्वशास्त्रार्थरहस्यंतेतवमेसारविच्छिन्नयेमयोक्तंता
नपस्काय नपोरहितायश्रसंयतेंद्रियायनवाच्यंकदाचननपस्वि
नेभक्तायापिअशुश्रूषवेशुश्रूषापरिचर्यागुरुर्वनेचनवाच्यंकद
चनचशाद्वःवाच्यंकदाचनेनेतिपदद्वयाकर्षणार्थः नचमांयोभ्य
सूयतिमांभगवंतंवासुदेवमनुष्यमसर्वज्ञत्वादिगुणकंमत्वाप्रभ
तस्मैत्रीकृष्णोनभगवानस्मिन्मेवनपस्विनेभक्तायशुश्रूषवेपितवाच्यं
करात्वनेमत्उकर्षणार्थोश्चकारः नपस्विनेभक्तायशुश्रूषवेश्रीह

स्तानुरक्तायचवाच्यमित्यर्थः एकैकविशेषणाभावेप्ययोग्यतापति
पादनार्थाश्चत्वारोनकाराः मेधाविनेतपस्विनेवेत्यन्यत्रविकल्पदर्शी
नात् शुश्रूषायुरुभक्तिभगवदनुरक्तियुक्तायतपस्विनेतदभक्ताय
मेधाविनेवाच्यं मेधातपसोःप्रातिकल्पेपिभगवदनुरक्तिगुरुभक्ति
शुश्रूषाणांनियमएवेतिभाष्यकृतः
६७ ॥

सदानंदी टीका ॥

समासः सर्वशास्त्रार्थः शास्त्रमेवाधुनाहरिः संप्रदायविधिंप्राहस्व
वक्तोभगवानिति १ इदंसमस्तशास्त्रार्थरहस्यंब्रह्मसंमितं गीता
ख्यंनतवसंप्राप्तंयदिष्टंच्चयेमया २ सर्वंतेनेरितंसम्यग्ज्ञानसाध
नमुत्तमं नासंयतेक्रियायोक्तंतपःसूत्रायकर्हिचित् ३ वाच्यय
स्मात्तपोहीनेनिष्फलंस्यादुदीरितं तपस्विनेपिनोवाच्यंभक्तिही
नायकेशव ४ सतुरोभक्तिहीनायनवाच्यंकर्हिचित्तथा कस्मा
विद्विष्टवस्त्वायांभक्तायापितपस्विने ५ नचाशुश्रूषवेवाच्यंपरि
चर्यामकुर्वते योमांश्रीवासुदेवंहिभगवंतमधोक्षजं ६ स्वम
शंसादिदोषाध्यारोपणेनसमसेशानो ग्रज्ञानवव्रतदेहिमंदभाग्य
तेयाधमः ७ शुश्रूषवेपिभक्तायगुणवपितपस्विने नतस्मैज्ञान
वाच्यंश्रीकृष्णलोकधारस्तहितवे ८ सर्वधर्मान्परित्यज्य नातऊर्ध्वंला
हणंमहत् श्रुतयोज्ञाततयदुक्तंकृष्णस्यापकरोम्यहं ९ यतोवद
तसिद्धांतरहस्यंसन्निसंमतं श्रीकृष्णाख्यंपरंधामसदानंदघनंपरं १०
श्रुतेयस्यहृषीकेशकृष्णेभगवतीश्वरे श्रुवक्ताश्चितसोन्यतः सेभा।
घ्यापिकदाचन ११ कृष्णकमलपत्राक्षंनाचेत्पिष्पालियेनराजीव
क्त्वास्वनेनेयानसंभाष्याःकदाचन किंपुनर्ब्रह्मविद्यायांजनस्य
भगवद्भिः नतेभ्योवाच्यमत्यर्थमस्तिनिरयेप्रतिरितीरिते १२ नपस्वि
नेचभक्तायगुरुशुश्रूषवेमते श्रीकृष्णेवानुरक्तायवाच्यशास्त्रमिदं
परं विशेषणानांसर्वेषांमाहात्म्येप्रतीतिसिद्धये चत्वारोत्रनकाराःश्री
हरिणासंप्रयोजिताः १४ विशेषणानांसर्वेषामेकस्यापिह्यभावेन
योग्यतापतिपद्यते ग्रन्थोविचार्यगीताख्यशास्त्रसंप्राप्यमसत्तवे १५ ६७
१२

श्री-
गी० टी०
अ०

307

नीलकंठी टीका १८

एवंश्लोकद्वयेनज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिनामितिसां
ख्ययोगौहिगीताख्यायेदर्शितावुपसंहृत्यविद्यासंप्रदायविधिमा
ह इदमिति अतपस्कायतपआलोचनंतद्रहितायअयत्नशीला
येत्यर्थः अभक्तायश्रद्धाहीनाय अशुश्रूषवेगुरुसेवामकुर्वतेमां
परमात्मानंयोभ्यसूयतिमदीयगुणासहिष्णुतयामयिदोषारोप
परोभवतितस्मै नञः प्रत्येकंसंबन्धादेतेषांविशेषणानामस
नमाभावेपिकदाचनमहत्यपिसंकटेइदंनवाच्यंनोपदेष्टव्यंअ
त्रविद्याहवैब्राह्मणमाजगामगोपायमाशेवधिष्टेहमस्मि अस
यकायानृजवेऽयतायनमाब्रूयावीर्यवतीतथास्यां यस्यदे
वेपराभक्तिर्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाःप्रकाशं
तेमहात्मनः इतिश्रवणादसूयारहितायआर्जवोपेतायाभ्या।
सशीलायगुरुपरमेश्वराराधनपरायचयनदद्दसंपदेयेनाम
स्मै इत्यर्थः ६७ ॥

आनंदी टीका १८

एवंप्रतिज्ञायाशोकमपाकृत्य इदंविवस्वतेयोगंप्रोक्तवानहमव
ययमित्यादि सएवायंमयातेऽद्ययोगःप्रोक्तःपुरातनः इत्युक्तस्य
योगस्याव्ययत्वप्रतिपत्तेः संप्रदायस्यपुरस्तादविच्छेदायपरेषामु
पदेशानामादिशन् तथात्रनिरन्तराभ्यासेनपरनिष्ठामयेस्था
णुरयंभारवहः किलाभूदधीत्यवेदंनविजानातियोऽर्थम् योऽर्थ
ज्ञइत्सकलंभद्रमश्नुतेनाकमेतिज्ञानविधूतपाप्मेतिश्रुतेः अ
धीतार्थस्यविचारः सात्वाचनस्यार्थस्यस्वयमनुष्ठानेशिष्य
निश्चितस्यचानेनपरैरप्यनुष्ठापनमितिविधिरित्यर्थानुगमाश्रा
नुपदेशेनापरेषणानुग्रहीयति इदमुक्तंगीताशास्त्रार्थंसर्वस्ववास
देवः सर्वमितिममवचनरशीलत्वेनैकान्त्यत्वानंनियतकर्मसमुच्चि
नेच्छयः साधनमिमिवंरूपम् अतपस्कायप्रोक्तकर्मनिष्ठामन
नुतिष्ठतेगुरुषायनेत्वयाकदाचननवाच्यम् एवमभक्तायआन्तें

जितास्वरित्यादिप्रकारकभक्तिहीनायज्ञानिनेचकदाचिन्नवाच्यम्
नचाप्यशुश्रूषवेपरिचर्याहीनायनवाच्यम् यश्चमामभ्यसूय
ति यादवेषुलब्धजन्मनानेनकेनापिसामान्यजीवेनस्वाभिप्राये
णनिजप्रतिष्ठापरप्रतारणाद्यर्थमिदमुक्तमित्येवमासुरीप्रकृ
तिस्थितः योमांद्वेष्टि तस्मैअप्यह्ययानायकदाचिन्नवाच्यम् अत्र
पौनःपुण्येननिषेधाहम्भावेप्यर्थावतिरेकादिदमुपदिष्टम् तप
स्विनेभक्तायशुश्रूषवेमयिश्रद्धावतेसात्विकायदेवप्रकृतयेवश्यं
वाच्यमिति ६७ ॥

+ निःशेषं परं रहस्यमुपदिश्यानन्तरमुपदेशप्र
वृत्तप्रतिहारद्वारेण संग्रहतउपदेशप्र
लक्षणं प्रतिपादयितुमाह॥

रामकंठीटीका १४

+
+ यदिचेतद्यथोपदिष्टंसर्वमवधारितंभवतास्तुगृहीतंचकृतंयदिति
त्यानुशीलनात्संप्रत्यवश्यप्रवचनयोग्यतांप्रतिपत्स्यसेतदिदंवक्त
तवातपस्कायत्रिप्रकारतयाव्याख्यातेनतपसारहितायनवक्तव्यं तप
स्विनेप्यभक्तायप्रतिपादितचतुरवस्थभक्तिलक्षणयोगशून्याय
नचाशुश्रूषवेश्रवणेच्छारहिताय शुश्रूषवेपिमदभ्यसूयापरायन
वक्तव्यं सन्निहितेनतेनतुच्छेनहेतुनाशुश्रूषवे यथोक्तस्वरूपायम
कृतपुनःपुनःपरमेश्वरायमदनुग्रहाभावाच्छ्रद्धालक्षणप्रकृष्टगुण
विनाकृताः सन्तोभ्यसूयंति नास्त्येवैवंलक्षणः कश्चिदेकः परमेश्व
रः इतितत्सद्भाववादिभिः सहविवदमानागर्हामेवारभंते तदिद
मत्रसंक्षेपतउपदेशलक्षणमुक्तं योयथाप्रतिपादितस्वरूपाभ्यां
परमेश्वरानुग्रहैकनिमित्ताभ्यांदैवसर्गाव्यभिचारिणीभ्यांभक्तिश्र
द्धाभ्यांयुक्तः सएवचतुर्ष्वपिवर्णेषुवेतज्ज्ञानविषयः यतोभगवता
वर्णानांकर्माण्येवप्रविभक्तत्वेनप्रतिपादितानि ज्ञानेतुसाधार
णेन यतस्तेषांस्वकर्मविभागंप्रतिपाद्याह यतःप्रवृत्तिर्भूतानां
येनविश्वमिदंततम् स्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानव
इत्यनेनस्वकर्मानुष्ठाननिरतानांसर्ववर्णानांपरसिद्धिप्राप्तिः सा
धारणत्वेननिर्दिष्टा नचस्वकर्मणायथोक्तज्ञानमन्यानांपरसि
द्धिप्राप्तिहेतुत्वमस्तीतिज्ञानस्यसर्ववर्णसाधारण्यंस्फुटमेवभग

श्री· गी·टी· ग्र·

वत्तादिष्टम् एवंविधश्चोपदेश्यः पुरुषः यथावदधीतावगतानुष्ठि
तार्थगीताशास्त्ररूपम् ६७ ॥

308

लासिकी [illegible]टीका ॥

+एवं गीतार्थमुपदिश्य तत्संप्रदायप्रवर्तने नियममाह ॥

+इदं श्रीगीतातत्त्वं ते त्वयातपस्काय शारीरादित्रिविधतपोहीनाय
स्वधर्मानुष्ठानहीनाय वा कदाचिदपि न वाच्यं तपस्विनेऽप्यभक्ता
य गुरौ श्रीपरमेश्वरे च भक्तिहीनाय च न वाच्यं तपस्विने भक्तायाप्य
शुश्रूषवे परिचर्यामकुर्वते श्रोतुमनिच्छते वा न वाच्यं तथा मां श्रीपर
मेश्वरं योऽभ्यसूयति मनुष्यदृष्ट्या दोषारोपेण निन्दति तस्मै च न वाच्यं
[illegible] ॥ ६७

पंवोलीटीका

एवं सर्वं गीताशास्त्रार्थमस्मिन्नध्याये उपसंहृत्य विशेषतश्चान्ते इह
शास्त्रदार्ढ्याय संक्षेपतः उपसंहारं कृत्वाथेदानीं शास्त्रसंप्रदाय
विधिमाह इदं ते इति इदं शास्त्रं ते तव संसारविच्छित्तये मयो
क्तं न अतपस्काय तपोरहिताय न वाच्यं तपस्विनेऽपि अभक्ताय गुरौ
देवे च भक्तिरहिताय कदाचन कस्यांचिदवस्थायां न वाच्यं तपस्वी
अपि सन् यः शुश्रूषुर्न भवति तस्मै अपि न वाच्यं यो मां वासुदेवं मनुष्य
शङ्कया मत्वा अभ्यसूयति आत्मप्रशंसादिदोषाध्यारोपेण न मम ई
श्वरत्वं जानन् न सहते तस्मै अपि न वाच्यं न तपस्विने भक्तिं न शुश्रू
षाश्च न तत्त्रयापन्नत्वेन शुश्रूषुभक्ताय वाच्यमिति मम अर्थः ६७

रसवीरसमिद्धोधिनी

एवं गीतार्थमुपदिश्य तत्संप्रदायप्रवर्तनायानुपदेश्यपदिक्षाहाके
नासंप्रदानत उपदेश्यलक्षणं प्रतिपादयितुमाह इदमिति यदिष्य
ते तदिदं गीतातत्त्वमतपस्काय ... त्वयोपदिष्टमवधारितं स्वगृहीतं च कृतं परं प्रत्यपि प्रवक्तुमिष्य
तपस्विनेऽप्यभक्ताय प्रतिपादितानां ... त्रिविधतपोहीनाय न वाच्यं
आदि च तत्त्वस्य गुरौ ईश्वरविषयम·

क्तिरहितायापिनवाच्यम्. तथाशुश्रूषवेपरिचर्यामकुर्वतेप्रव
णोभक्तिरहितायचनवाच्यं योपिमामीश्वरमभ्यसूयतिनास्यैवंल
क्षणः कश्चिदेकः परमेश्वरइत्येवंमनुष्यदृष्ट्यादोषारोपेणगतो
करोति तस्मैचनवाच्यं एतेनचोक्तलक्षणस्वधर्माचरणादूपत
योनिष्ठाभक्तिश्रद्धायुक्तं उपासन्नमुक्तिकउपदेशपात्रमिति प्र
तिपादितम्. ६७॥

मधुभाष्य

६७॥

भाषा अनुवाद टीका

इस प्रकारसे श्रीभगवत गीताका तत्व अर्थ उपदेश करकेअ
वगीताकी संप्रदायरूप प्रवर्त्तन करनेमे अर्थात् दूसरे कोउप
देश देनेमे नियम कहतेहै किहे अर्जुन इस गीतार्थकेतत्व
को तप अतपस्क कहे स्वधर्म अनुष्ठान रहितमनुष्य सेनक
हना औरनकभी अभक्त कहे ईश्वर गुरु तथा ब्राह्मणकी भक्ति
विहीन को कहना और अशुश्रूष अर्थात् ब्राह्मण गुरुतथा ईश्व
र की शुश्रूषा सेवा जो नही करता अथवा गीता श्रवण करने
की जिसको अनिच्छा होय ऐसे मनुष्योंकोभीकभीनकहियेऔ
रजो परमेश्वर स्वरूप हमारे मे मनुष्यबुद्धि लायकर दोष आरो
पकरता ऊषा निन्दा करै उसको भीनकहना यह क्रमसे हमअ
नुपकार वाचनेहै ६७ ॥

दोहा

नाकथना
नातपही नहिकोयहनाहि अभक्तहिकोहि
हिअसेवीको जो मोहि निंदततोहे ६७॥

309

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति भक्तिं म
यि परां कृत्वा मामेवैष्यत्यसंशयः ६८ ॥

शांकरभाष्यटीका १

सम्प्रदायस्य कर्तुः फलमिदानीमाह य इमं यथोक्तं परमं निः
श्रेयसार्थं केशवार्जुनयोः संवादरूपं ग्रन्थं गुह्यं गोप्यतमं
मद्भक्तेषु मयि भक्तिमत्स्वभिधास्यति वक्ष्यति ग्रन्थतोऽर्थतश्च स्था
पयिष्यतीत्यर्थः यथा त्वयि मया भक्तेः पुनर्ग्रहणात् भक्तिमात्रे
ण केवलेन शास्त्रसम्प्रदाने पात्रं भवतीति गम्यते कथमभिधा
स्यतीत्युच्यते भक्तिं मयि परां कृत्वा भगवतः परमगुरोः अच्युतस्य
शुश्रूषा मया क्रियत इत्येवं कृत्वेत्यर्थः तस्येदं फलं मामेवैष्यति
मुच्यत एवात्र संशयो न कर्तव्यः ६८ ॥

आनंदगिरिकृतटीका २

संप्रदायः नाभक्तायेति भक्तेरधिकारिविशेषणत्वोक्तेर्मद्भक्ते
ष्विति पुनर्भक्तिग्रहणमनर्थकमित्याशंक्याह भक्तेरिति शुश्रूषा
दिसहकारिराहित्यं केवलशब्दार्थो यद्यपि मात्रशब्देन सूचितमे
तत्तथापीतरेणास्फुटीकृतमिति विरोधः प्रश्नपूर्वकमभिधानप्र
कारमभिनयति कथमित्यादिना भगवति भक्तिकरणप्रकारं प्र
कटयति भगवत इति यच्छुश्रूषायै वितिं स्मरयति तस्येति मामेवे
ष्यतीत्येतमन्वयं गृहीत्वा व्याचष्टे मुच्यत एवेति ६८ ॥

स्वामिकृतटीका ३ ॥

गीताशास्त्रोपदेष्टुः फलमाह य इति मद्भक्तेषु मद्भक्तेभ्यो यो वक्ष्यति स मयि परां भक्तिं करोति
ततो निःसंशयः सन्मामेव प्राप्नोति ६८ ॥

पिशाचभाष्यटीका ४

य इदमावयोः संवादरूपं परममत्युत्कृष्टं श्रेयःसाधनत्वात् गोप्यं मद्भक्ते
षु मयि परमेश्वरे भक्तिमत्स्वभिधास्यति मयि परमेश्वरे परां भक्तिं
विधाय तस्येदं फलमुच्यते मामेवैष्यत्यसंशयः ६८ ॥

रामानुजभाष्यटीका ५ ॥

य इदमिति इदं परं गुह्यं मद्भक्तेष्वभिधास्यति व्याख्यास्यति
परमो भक्तिं कृत्वा मामेवैष्यति न तत्र संशयः ६८ ॥

अभिनवगुप्तकृतटीका ६ ॥

भक्तिमिति एतदेव मयि भक्तिकरणं यद्भक्तेष्वेतन्निरूपणं अभिधास्यति

श्री गी टी अ-

आभिमुख्येन शास्त्रोक्तप्रक्रियया धास्यति वितरिष्यति

ति सम्प्रदायनामेतीति विधिरेवैष नार्थवादः एवमन्यत्र १८ ॥

परमार्थप्रपा टीका ७ ॥

एतैर्दोषैर्विरहितेभ्यो भक्तेभ्यो गीताशास्त्रोपदेष्टुः फलमाह य इति
यथाचार्यैरिदं परमं गुह्यं गोप्यं गीतार्थतत्त्वं मद्भक्तेषु शुश्रूषुषु अ
मेषु सत्सु अभिधास्यति वदति साभिप्रायं निरूपयिष्यति सम
यि जगदीश्वरे परामव्यभिचारिणीं भक्तिं कृत्वा असंशयः सन्
मामेव प्राप्नोति आत्मा विदतिगादानः किमस्य फलं वाच्यमि
त्यर्थः स्मृतिरपि स्कन्दे आविर्भवन्महिमा येन मेषां विश्वजीव
नामेषां निर्मोचि महिम्नोऽतिः पिरभिर्दिनमागाङ्कृत पापादना
गायाश्रदर्शीति अत्रगवगाभाष्यं पश्यामाचार्याणां माद्येनेमहि
आविर्भूतं तदिति जानातीति श्रुत्या महेनेदं परमात्मनः इ
माद्येनेमहिमहत्त्वे आविर्भूदाविर्भूतेजात इत्याह महीति महिम
येषु परिणामी येन ज्योतिषां विश्वजीवं सर्वं जगत्तमसोऽन्तात्वि
रमोचि विनिर्मोचितं अथायकस्य मस्याभिसेभ्यपवापिनमिमाहतेः उ
र्विनिरवधिकफलोदहिणाया पंथामार्गः श्रद्दर्शीहः मोता
त्यर्थः अत एव सावधिकफलादहिणामश्रिमसुमाह उच्चादिवि
ति ६८ ॥

वनमालीटीका ८ ॥

एवं सम्प्रदायविधिमुक्त्वा तदनुष्ठानः फलमाह य इति य इमामाव
योः संवादरूपं ग्रन्थं परमं निरतिशयपुरुषार्थसाधनं गुह्यं रहस्यार्थ
मान सर्वत्रप्रकाशयितुमनर्हं मद्भक्तेषु अभिधास्यति व्याख्यास्यति
रके श्रु अभिधास्यति अभितो ग्रन्थतोऽर्थतश्च धास्यति अभितोऽस्यापयि
क्ति भक्तेः श्रवणादिरूपायाः विशेषणं परां कृतस्य भगवत
क्ति मोक्षणापात्रतामुपचितो भवति कथमभिधास्यति तत्राह ॥

किंमयिपरांभक्तिंकृत्वाहेशः परमगुरोः शुश्रूषैवेयंमयाक्रियतइत्येवंकृत्वा
निःसंशयोमामेष्यति समांसर्वेश्वरंवासुदेवमेवैष्यतिमामेवैष्यत्ये
ववायोऽपि ६८ ॥

जन्मैवेजयंतीटीका ९

यत्त्विदंशास्त्र[illegible]धिकारिभ्योवदिष्यतिसमामेवप्राप्स्यतीत्याह
यइदमिति योमद्भक्तोजनइदंगीताशास्त्रंपरमंसर्वशास्त्रोत्कृष्टं।
गुह्यमतिगोप्यं[illegible]मद्भक्तेष्वभिष्वपलतांगेनपक्षादिद्वयागांमम।
पस्कमभक्तेष्व[illegible]मूर्धन्येषूपकेषुभिधास्यतिकथयिष्यतिसपुरुषो
मयिसर्वेश्वरेयत्नात्परमात्मस्वरूपयाज्याज्यान्नभवलतांगप्रेम
रूपोभक्तिंकृत्वामद्भक्तिप्राप्यमामेवपरब्रह्मस्वरूपंसर्वेश्वरमेवनत
त्रसंशयः यद्वेदंकार्यंज्ञ
ब्रह्मकृष्णदीनमुख्यमेशास्त्रयानततसंशयः यद्वेदंकार्यंज्ञ
यिकारिनेतदुपदेशकर्तुः प्रथमेमन्त्रयाभक्तेर्लाभस्ततोमत्प्र
दलाभइत्यर्थः ६८ ॥

मधुसूदनीटीका ९

एवंसंप्रदायस्यविधिमुक्त्वातत्कर्तुःफल
माह—यः संप्रदायस्यप्रवर्तकः इमंआवयोः संवादरूपंग्रंथंपरमंनिर।
तिशयश्रेयःसाधनेगुह्यंरहस्यार्थत्वात् सर्वत्रप्रकाशयितुम
नर्हमद्भक्तेषुमांभगवंतंवासुदेवंप्रत्यनुरक्तेष्वभिधास्यति अभिते
ग्रंथतोऽर्थतश्चयाख्यातिस्थापयिष्यतिभक्तेः शुश्रूषणात्सर्वेभ्योवि
शेषणात्रयरहितस्यापिभगवद्भक्तिमात्रेणपात्रतास्तुविनाभवतिक
थमभिधास्यतितत्राहभक्तिंमयिपरांकृत्वाभगवतःपरमगुरोः।
शुश्रूषैवेयंमयाक्रियतइत्येवंकृत्वा निःसंशयोभिधास्यति स
मामेवैष्यतिमांभगवंतंवासुदेवमेष्यतिएवंग्रंथविधानेनप
वसंसारादत्रसंशयोनकर्तव्यः श्रुत्वामयिपरांभक्तिंकृत्वा।
श्रुतंसंशयोनिःसंशयः सन्मामेष्यत्येवेतिवामामेवैष्यतिनान्य
मितियथाश्रुतमेववायोज्यं [illegible] ॥

सदानंदीटीका ११

संप्रदायविधिप्रोक्तत्कर्तुःफलमुच्यते यआवयोरिमंग्रंथंसंवा
दात्मकमद्भुतं १ रहस्यार्थत्वात्गुह्यंपुरुषार्थैकसाधनेतु वक्ष्यमा
णेनसर्वत्रमद्भक्तेष्वभिधास्यति २ सोऽस्मीमद्वासुदेवाख्यभगवे
तेजगद्गुरौ हर्षितात्मात्ररक्तेषुयोमिलोग्रंथतोऽर्थतः ३ स्थापयि

श्री॰
गी॰ टी॰
श्र॰

ष्यति मद्भक्तः संप्रदायप्रवर्तकः भगवद्दासदेवस्य मम सज्जातो
गुरोः ४ शुश्रूषैव मया यावीयं क्रियते मनसा गिरा इत्येवं निश्चया
कारो भक्तिं कृत्वा मयीश्वरे ५ यो भिधास्यति सोत्यंतं निश्चयं मामे
वविह्वलं भगवंतं जगन्नाथं वासुदेवं मयो व्रजेत् ६ एष्यत्येवात्र
संसारान्मुच्यते नात्र संशयः भगवद्भक्तिमात्रेण पात्रता याति
मानवः इति सूचयितुं भक्तेः तपासादेः पृथक्कृते ७६८ ॥

नीलकंठी टीका १२

एवं संप्रदायविधिमुक्त्वा संप्रदायकर्तुः फलमाह य इदमिति इ
दं परमं गुह्यं यो भक्तिहीनो मानवः जायते मन मद्भक्तेष्वभिधा
स्यति सोपि तत्पवश्रणान्मयि परमेश्वरे चिदेकरसे परां भक्तिं
श्रद्धेतलक्षणां उपासनां कृत्वा नवादंशप्राप्यनामसंशयश्च
मामेवैष्यति मद्भक्तिप्राप्यनीत्यर्थः शुश्रूषेत्यस्य योग्यता
स्ति स्मर्यते हि ध्रुवजामिलादीनां भक्तिगंधहीनानामपि
नामग्रहेन भगवन्नामस्तुतिर्दत्ता किमुत्त्वक्तव्यो वा चापत
वत्साः स्वरहस्यं प्रतिपादयति तत्स्य भक्तिलाभादिकमेण ।
कृतकृत्यत्वमभविष्यतीति ६८ ॥

आनंदी टीका १३

एतदेवाह य इदं परमं गुह्यं गीताशास्त्रार्थतत्त्वम् मद्भक्तेष्विति
लक्षणान् नप[illegible]दि सकलवक्षणेषु ज्ञाननिष्ठा मयेभिधास्य
ति अध्ययनार्थाविवोधादिद्वारेणोपदेक्ष्यति स मयि भक्तिं
परां कृत्वा उत्कृष्टसमर्थानुगमेन स्वस्य परेषां च निष्ठां प्राप्य
निःसन्देहं मामेवैष्यति मयि परमार्थस्वरूपे समापद्यते ६८ ॥

रामकंठी टीका १४

यः कश्चिदिदं यथोक्तं परमं गुह्यं सर्ववेदानोपनिषद्रूतं मद्भक्तेषा
नीच्यवस्थावर्गेष्वभिधास्यति उपदेक्ष्यति सोन्ते मामेष्यति व्रजे
वपरं संपन्नस्तु नइत्यर्थः किं कृत्वाभिधास्यति मयि परमेश्वरे परां

स्वा॰

यथोक्तज्ञाननिष्ठात्मिकां भक्तिं स्वपर्यं कृत्वा निष्पाद्य किमुक्तं भव
ति स्वयं परभक्तः द्युगाधिरोहपर्यन्तं ज्ञाने सिद्ध आत्मीकृत्य यः पर
से भक्ताय प्रयच्छति स मामवश्यं फलमाप्नोतीत्येवं विधा ज्ञानिनः

६८ ।

लासिकी [illegible]टीका

एतैर्दोषैर्विरहितेभ्यो भक्तेभ्यो गीताशास्त्रोपदेष्टुः फलमाह ॥

यः कश्चिन्मयीश्वरे परामनवच्छिन्नतयात्युत्कृष्टां भक्तिमुपासनां
कृत्वा स्वयमात्मसात्कृत्येदमावयोः संवादरूपं परमरहस्यं मम
भक्तेषु परमप्रेमयुक्तेष्वभिधास्यत्युपदेक्ष्यति ततो संशयः देहाद्य
भिमानरहितः सन्मामेवेश्वरं प्राप्स्यति [illegible] ६८

पंबोलीटीका

संप्रदायस्य कर्तुः फलमाह य इदमिति यः मद्भक्तेषु भक्तेभ्यः इमं
परमं गुह्यमभिधास्यति वक्ष्यति स मयि परां भक्तिं करोति ततो निः
संशयः सन् मामेव प्राप्नोतीत्यर्थः ६८

रणवीर संस्कृतबोधिनी

य इदमिति इदं य
एवं प्रकारेण गीताशास्त्रोपदेष्टुः फलमाह
पावद्पीतावगतानुष्ठितार्थं गीताशास्त्ररूपं परमं गुह्यं रहस्यं
मद्भक्तेष्वात्मीयवस्त्वावर्तिष्वभिधास्यति उपदेक्ष्यति स मयि परां
प्रकृष्टां भक्तिं कृत्वा मामेवैष्यति मत्सायुज्यमाप्स्यतीति निःसंश
यमेवैतदित्यर्थः ६०॥

मधुभाष्य

६८॥

313

भाषा अनुवाद टीका

सर्व कहे हुये सब दोषोंसे वर्जित भक्तजनोंको गीतार्थके उपदेश करनेवाले पुरुषका फल कहते है कि जो यह परम गुह्य गीतार्थ का उपदेश मेरे भक्तको करेगा सो मनुष्य मेरी पर कहे उत्तम भक्ति कारी होयगा और तदनंतर सो मनुष्य सर्व संशय से रहित होय परमको प्राप्त होयगा यह जानो ६८ ॥

दोहा

याहि परम दुर्गम जो मो भक्तन मे कहि गोहि मो मे परम हि
भक्ति कर मोहि पावहि सो हि ६८ ॥

313

नचतस्मान्मनुष्येषुकश्चिन्मेप्रियकृत्तमः भ
वितानचमेतस्मादन्यः प्रियतरोभुवि ६९ ॥

शांकरभाष्यटीका १

किंच नच तस्मात्त्वाद्सम्प्रदायकृतोमनुष्येषु मनुष्याणां मध्ये
कश्चिन्मे मम प्रियकृत्तमोऽतिशयेन प्रियकृत्तमोनास्त्येव मध्ये
वर्त्तमानेषु नचभविता भविष्यत्यपि काले तस्मात् द्वितीयोऽन्यः
प्रियकृत्तरोभुवि लोकेऽस्मिन् भविता ६९ ॥

आनंदगिरिकृतटीका २

ननु सर्वेषां मुक्तिसाधनानां ध्यानस्य श्रेष्ठत्वात्तद्विहाय भगवतो
नास्ति विद्यासम्प्रदाने प्रवृत्तिरिति तत्राह किंचेति इतश्च विद्या
सम्प्रदाने प्रवृत्तव्यं यथोक्तविशेषणावता कर्तव्यमित्यर्थः वर्त
मानेषुमध्ये त्वत्तोऽन्योनास्त्येव प्रियकृत्तमोनाप्यतीतेषु तादृक्क
श्चिदासीदितिशेषः तस्माद्विद्यासम्प्रदायकर्तुः सकाशादन्यः ध्या
नतिष्ठस्य श्रेष्ठत्वेऽपि स्वसम्प्रदायप्रवक्तुः श्रेष्ठतमत्वात्तद्विना वि
द्यासम्प्रदाने प्रवृत्तिरितिभावः ६९ ॥

स्वामिकृतटीका ३

किंच नचेति तस्मान्मद्भक्तेभ्योगीताशास्त्रव्याख्यातुः सकाशादन्यो
मनुष्येषुमध्येकश्चिदपिमम प्रियकृत्तमः प्रसन्नेपरितोषकर्ता ना
स्तिनचकालान्तरेभविताभविष्यतीति ममापितस्मादन्यः प्रियतरो
भुवि नाभविता वा नास्ति नचकालान्तरेभविष्यतीत्यर्थः ६९ ॥

पैशाचभाष्यटीका ४

नचतस्मात्त्वात्संप्रदायकृतः मनुष्येषु मनुष्यमध्येकश्चिन्मेप्रिय
कृत्तमः अतिशयेनप्रियकृदन्योनास्ति एकत्वेनसंवेद्यः नचभवि
तातस्मादन्यः प्रियतरोनास्तिभविष्यति ६९ ॥

रामानुजभाष्यटीका ५

नचेति सर्वेषुमनुष्येषु इतः पूर्वं तस्मादन्योमनुष्योमेनकश्चित्

श्री
गी॰टी॰
अ॰

प्रियकृत्तमोऽन्यतरस्तत्र चन भविता अयोग्यपात्रेभ्यः प्रथमस्या
पादाने योग्यपात्रेभ्यः कथनादपि तत्त्वकथनस्यातिश्रुतमत्वात् ६९ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ६९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥:

परमार्थप्रपाटी टीका ७

अथैतमेवाभिप्रायमाह न चेति तस्मान्मद्भक्तेष्वस्मा
न्मतं भक्तेभ्यो य एवं कृष्णान्सकाशादन्यः कश्चिदपि मे प्रियकृ
त्तमो न चास्ति न वर्तते कालान्तरेऽपि नाटकप्रियकरो भविता भवि
ता अत्र … न न कृत सकृत सामग्रीमत्वाह व्यतिरेकेणैतात्व
त्तान भविष्यतीति तस्माद्दुर्लभ भवमत्वं तथा सर्वभजनाद्यत्तं द
भजनं मम परमप्रीतये भवतीत्यर्थः ६९ ॥

वनमाली टीका ८ ॥

तस्मान्मद्भक्तेषु शास्त्रसंप्रदायकर्तुः सकाशादन्यो मनुष्येषु मध्ये
कश्चिदपि मम प्रियकृत्तमः अतिशयेन प्रियकृत् महिषयी
अतिशयवान्नास्ति वर्तमाने कालेनापि आगामी चाह कश्चित्
…भविता भविष्यति ममापि तस्मादन्यः प्रियतरः अतिशय
विषयः कश्चिदप्यासीत् अधुना च भविता लोके नास्ति न वा … भवि
तेत्याह तस्माद्योज्यं ६९ ॥

उत्तम वैजयन्ती टीका ९

एतदुपदेष्टा मम अतिप्रियो भवतीत्याह न चेति तस्मात् गीताशा
स्त्रोपदेष्टुः सकाशात् मनुष्येषु मध्ये कश्चिन्मे … देवं तद्
प्रियकृत्तमः परितोषकर्ता न भविता च कालान्तरे …
तस्मादन्यः कश्चित् प्रियतमो … भविष्यति … भवति न
भविष्यति ६९ ॥

मधुसूदनी टीका १० ॥

किं च तस्मान्मद्भक्तेषु शास्त्रसंप्रदायकर्तुः सकाशादन्यो मनुष्येषु मध्ये
कश्चिदपि मम प्रियकृत्तमः अतिशयेन प्रियकृत्तम विषयमी

मतिशयवान्नास्ति वर्तमानेकालेनापि आगामीन्यादृकश्चिन्न
चकालांतरेभविता ममापितस्मादन्यःप्रियतरःप्रीत्यतिशयवि
षयःकश्चिदासीन्नाधुनाचभुविलोकेस्मिन्नास्तिनचकालांतरेभ
वितेत्याहमामेवोऽ ६९ ॥

सदानंदी टीका ॥ ॥

तस्मान्मच्छास्त्रसंप्रदायप्रवर्तकात् पुरुषादपरःकश्चिन्नृ
षुमध्येममेप्रीतिकृत्१ नचैवातिशयेनास्तिप्रियकृत्तमोऽप्यतीतक
ाले नापिकश्चिन्ममागामीनादृशःपुरुषोत्तमः २ नचकालां
तरेकश्चिन्नविष्यतितरोत्तमः तस्मात्कश्चिन्ममाप्यमोनासीत्प्रि
यतरोऽभवि ३ वर्तमानेधुनानास्तिनचाग्रेभविष्यति ४ ६९

नीलकंठी टीका ६९ ॥

ननुश्रवणश्रद्धयाकृतेसर्वैर्व्याख्यातमितिनवैवोक्केकथममभक्तस्यापि
प्रतच्छास्त्राभिधानतोभक्त्यादिलाभःस्याभवेदित्याशंक्याह नचे
ति तस्मान्नृप्रतच्छास्त्रप्रवर्तकान्मनुष्येषु मेममप्रियकृ
त्तमः नचकश्चिदस्ति इयमेवममहतीवाचिकीभक्तिरलौक
नास्तोपानारोहक्रमेणमेममप्रियतरोभविताभविष्यति श्र
तिच्छ यापिसंस्पृष्टोदहमेवहिपावकइति नचभविपतस्मात
त्वत्तमार्थसाधनमस्तीतिभावः प्रत्यक्षार्थःस्पष्टः ६९ ॥

आनंदी टीका ६९

पठंस्तोति नचतस्माद्यःस्वयंगीतार्थनत्वाभ्यासेनपरोनिष्ठां
दि॰ प्रतिस्तौति नचतस्माद्यःस्वयंगीतार्थज्ञानाभ्यासेनपरांनिष्ठां
प्राप्तःपरान्पिमज्ञानाध्यापनादिक्रमेणयथावज्ज्ञानोपदे
शेनोपकरोति तस्मात्पुरुषधौरेयात्सर्वमनुष्येषुमध्येकश्चिद
न्योतिशयेनप्रियकारीनास्ति मद्भक्तजनाहिममात्मभूताःतेषां
यःप्रियंकरोति तेनसर्वथाममैवप्रियंकृतमित्यर्थः अस्यफल
माह तस्मात्ममात्मभूतभक्तजनोपकारकादन्यः भुविमेप्रिय
तरोनचभविता प्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियःइत्युक्ति
हीतितम ६९ ॥

श्री॰
गी॰टी॰
ग्र॰
६८

315

रामकंठी टीका १४

तस्मात्परमगुह्यज्ञानोपदेशेन मदनुगृहीतभक्तजननिरुपमोप
कारकारिणः पुरुषात्तमात्सर्वमनुष्येषु मध्ये न कश्चिदन्यः प्रि
यकृत्तमः इष्टवस्तुसंपादनेनातिशयो भविता भविष्यति एतदे
व हि मम प्रियं यद्भक्तजनानुग्रहः तमेव यः पुष्णाति तेन मे सा
तिशयप्रियं कृतं स्यात् किंच न च तस्मात्तथाविधादन्यः कश्चि
न्मे प्रियतरः इष्टतरो भविता नास्त्येवाहं प्रियकारीत्यर्थः [illegible]
[illegible]
[illegible] ६९ ॥

लासिकी [illegible]टीका

किंच तस्मादेवंविधाज्ञरोत्तमात्सकाशात्कश्चिदपि मनुष्येषु मध्ये
प्रियकृत्तमो मे तत्परितोषकर्ता नास्ति न च कालांतरे भविता
भविष्यति ममापि तस्मादन्यः प्रियतरो भूना भुवि तावन्नास्ति
न च कालान्तरे भविष्यतीत्यर्थः [illegible]
[illegible] ६९

पंचोलीटीका

किंच न च तस्मादिति तस्मान्मद्भक्तेभ्यो गीताशास्त्रस्य
व्याख्यातुः सकाशादन्यः मनुष्येषु मध्ये कश्चिदपि मे मम प्रियकृत्त
मः अतिशयेन प्रियो मोपि कर्ता नास्ति न च कालांतरे भविष्यतीत्यर्थः ६९

रणावीरसमिद्धायिनी॥

तस्य माहात्म्यं सोति तस्माद्गीताशास्त्रोपदेष्टुः सकाशान्मनुष्ये
षु मध्ये न कश्चिदन्यः प्रियकृत्तमः इष्टवस्तुसंपादनेनातिशयो
सि न च कालांतरे भविता भविष्यति एतदेव हि मम प्रियं यद्भ
क्तजनानुग्रहस्तमेव यः पुष्णाति तेन मे प्रियं सातिशयं कृतं स्या
दिति भावः किंच भूमौ तस्मात्सकाशादन्यः कश्चिन्मे मम प्रियतर

श्च्युतोऽनवाग्निकालांतरेचभविता तस्यैवाहं सातिशायप्रियक रीत्यर्थः ८९॥

मधुभाष्य

८९॥

भाषा अनुवाद टीका

जिससे हे अर्जुन उपदेश करने औ संप्रदाय चलानेवाले मनुष्यो के मध्यमे मेरा भक्त गीता का उपदेशकारी जोहै उसके समानओ रकोई भी नहीमेरा अत्यन्त परितोष करनेवालाहै औरनहोगा और पृथिवीमेउससे अधिकप्रिय हमारे और कोई नहीहै नहोगा ६९

दोहा

ताते अति प्रिय नरन मे नाहिन मोदकोय होहिन मोकों और कोय भुवमें अति प्रिय सोय ६९

316

अध्येष्यतेचयइमंधर्म्यंसंवादमावयोः ज्ञान
यज्ञेनतेनाहमिष्टःस्यामितिमेमतिः ७० ॥

शांकरभाष्यटीका १

योऽपि अध्येष्यतेच पठिष्यति य इमं धर्म्यं धर्मादनपेतं संवादरूपं
ग्रंथमावयोः तेनेदं कृतं स्यात् ज्ञानयज्ञेन विधिजपोपांशुमानसानां
यज्ञानां ज्ञानयज्ञो मानसत्वाद्विशिष्टतम इत्यतस्तेन ज्ञानयज्ञेन गी
ताशास्त्रस्याध्ययने स्तूयते फलविधिरेव वा देवतादिविषयज्ञानय
ज्ञफलतुल्यमस्य फलम्भवतीति तेनाध्ययनेनाहमिष्टः पूजितः स्या
म्भवेयमिति मे मम मतिर्निश्चयः ७० ॥

आनंदगिरिकृतटीका २

सम्प्रदायप्रवक्तुः सर्वाधिकं फलं सवक्ता विस्तरेणोक्तम् सविद्याधि
दैवतमिति न्यायेनोक्ता सम्प्रत्यध्येतुर्विवक्षितं फलमाह योपीति य
थोक्तस्य शास्त्रस्य योऽध्येता तेनेदं कृतं स्यादिति सम्बन्धः तदेवाह
अध्येष्यत इति तेनेदं कृतमित्येतदेवं शाहार्थं विशदयति ज्ञानेति ते
नाहमिष्टः स्यामिति सम्बन्धः चतुर्विधानां यज्ञानां मध्ये ज्ञानयज्ञ
स्य श्रेयान् द्रव्यमयात् यज्ञात् ज्ञानयज्ञ इति विशिष्टत्वाभिधानात्तेना
हमिष्टः स्यामित्यध्ययनस्य स्तुतिरभिमतेत्याह विधीति पक्षान्तरमा
ह फलेति फलविधिमेवं प्रकटयति देवतादीति यद्धि ज्ञानयज्ञस्य फ
लं कैवल्यं तत्तुल्यमस्याध्येतुः सम्पद्यते तच्च देवतायात्म्यविषय
ध्यानात् कथमध्ययनादेव सर्वात्मकं फलं लभ्यते तस्मात्तत्सर्वमसम्भवदि
ति स्तुतिरित्याह तेनेति तेनाध्येत्रा ज्ञानयज्ञतुल्येनाध्ययनेन भगवा
निष्टस्तथाच ततस्तादृक्फलमविरुद्धमित्यर्थः ७० ॥

स्वामिकृततीका ३ ॥

पठतः फलमाह अध्येष्यत इति आवयोः श्रीकृष्णार्जुनयोः इमं धर्म्यं ध
र्मादनपेतं संवादं योऽध्येष्यते जपरूपेण पठिष्यति तेन तस्य सर्वय
ज्ञेभ्यः श्रेष्ठेन ज्ञानयज्ञेनाहमिष्टः स्यां भवेयमिति मम मेयं मतिरिति
यद्यप्यसौ गीतार्थमबुध्यमान एव केवलं जपति तथापि मम तच्छृण्वतः स्व

श्री॰
गी॰टी॰
अ॰
317

ति एवमेवतो मामेवासौ प्रकाशयतीति बुद्धिर्भवति तथा लोके यदुक्त्या कदाचित् कस्यचिद्रामगच्छतीति तदा सो मामुपमाकर्णयति इति मत्वा तमाश्रमागच्छतीति तथाहमपि तत्समस्तवित्तिरभवेयं अत एवचाज्ञामिलवत्तत्र वेधप्रस्तावात् कथं चित्रा मोचारण मात्रेणाप्यसत्त्वोस्मि तथैव तस्यापि प्रसन्नो भवेयमित्यर्थः ७० ॥

पिशाचभाष्यटीका ४ ॥

अध्येष्यते पठिष्यति य इममावयोः संवादं धर्म्यं धर्मादनपेतं तेन पाठकेन ज्ञानयज्ञेन द्रव्यजपोपांशुयज्ञेभ्यः फले सहस्रगुणेभ्यः श्रेष्ठमिष्टः पूजितः स्यां भवेयमिति मे मतिर्निश्चयः ७० ॥

रामानुजभाष्यटीका ५ ॥

अध्येष्यते इति य इममावयोर्धर्म्यं संवादमध्येष्यते तेन ज्ञानेन यज्ञेनाहमिति मे मतिः अस्मिन् योज्ञानयज्ञोभिधीयते तेनाहमेतदध्ययनमात्रेणेष्टः स्यामित्यर्थः ७० ॥

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थम् ७० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा[illegible]टीका ७ ॥

एवं गीताशास्त्रस्य पठनफलमाह अध्येष्यते चेति आवयोः कृष्णार्जुनयोरिमं धर्म्यं धर्मादनपेतं संवादं यो अध्येष्यते जपरूपेण संपठिष्यति तस्य जपयज्ञफलेन भविनष्टे परे ब्रह्मणि अंशसाहृत्येभ्यः श्रेष्ठेन ज्ञानयज्ञेन संनर्पितो भवेयमिति मे मतिः मम संमतं यद्यपि सो गीतार्थ श्रुतो मालामंत्रोस्ति तत्र वेदोपनिषद्भादीनि ऋषिर्वेदव्यासः देवता श्रीकृष्णः तत्र मंत्रशब्दार्थ स्वमंनारंचायने सोमंत्र इति श्रुमस्या जपमात्रेण न मंत्रेण सादेवनाधीयनेन विनष्टहिदारा प्रहृष्यीनः सन् स्वयं दर्शयामीत्यर्थः ७० ॥

वनमालीटीका ८

अध्यापकस्य फलमनुक्त्वाध्येतुः फलमाह आवयोः संवादमिमं ग्रंथेध

ध्ये^ (margin)
ध^ (margin)
ज्ञानयज्ञेनाहमिष्टः स्यां (margin)
७२ (margin)

र्म्यं यमीदनेयेतम् अध्येष्यते जपयज्ञेनाप विष्यतिज्ञानयज्ञेन
चतुर्थाध्यायोक्तेन द्रव्ययज्ञादिभ्यः श्रेष्ठेनाहं सर्वेश्वरस्तेनाध्येत्रा इ
ष्टः पूजितः स्यामिति मे मतिर्निश्चयः यद्यप्यसौ गीतार्थमबुध्यमान एव
जपति तथापि तच्छृण्वतो मम मामेवासौ प्रकाशयतीति मतिर्भव
ति अतो जपमात्रादपि ज्ञानयज्ञफलं मोक्षं लभते सत्वशुद्धिज्ञानजन्म
ति अतो जपमात्रादपि ज्ञानयज्ञफलं मोक्षं लभते सत्वशुद्धिज्ञानजन्म
त्वसादद्वारा अर्थानुसंधानपूर्वकं पठतस्तु साक्षादेव मोक्ष इति कि
मु वाच्यम् ७० ॥

उत्तमनैवेजयंती टीका ९

किं फलं भवतीत्यपेक्षायामाह अध्येष्य
पत इच्छास्वाध्यायनकर्तुः किं फलं भवतीत्यपेक्षायामाह अध्येष्य
ते इति यः पुरुषः आवयोः कृष्णार्जुनरूपनारायणावतारयोरिमं गी
तात्मकं रूपं धर्म्यं धर्मयुक्तं संवादं प्रश्नोत्तररूपमध्येष्यते चकाराद
ध्यापयिष्यति तेन पुरुषेण कर्त्रा ज्ञानयज्ञेनास्मिन्नेवात्मप्रकारके
णाहं सर्वेश्वर एतदध्ययनमात्रेणैव विशेषभक्तिनिष्ठाभवेयमिति मे
मतिर्निश्चयात्मिका बुद्धिर्विवेकर्तृ रहं हि सर्वप्राप्येभ वामीत्याशयः ७०

मधुसूदनी टीका १०

++अध्यापकस्य फलमुक्त्वाध्येतुः फलमाह ॥ मधुसूदनी टीका १०

+आवयोः संवादमिमं ग्रंथं धर्म्यं यमीदनपेते यो ध्येष्यते जपरूपे
णापठिष्यति ज्ञानयज्ञेन ज्ञानात्मकेन यज्ञेन चतुर्थाध्यायोक्तेभ्यः
द्रव्ययज्ञादिभ्यः श्रेष्ठेनाहं सर्वेश्वरः तेनाध्येत्रा इष्टः पूजितः स्यामिति
मे मतिर्मम निश्चयः यद्यप्यसौ गीतार्थमबुध्यमान एव जपति तथा
पि तच्छृण्वतो मम मामेवासौ प्रकाशयतीति बुद्धिर्भवति अतो जपा
मात्रादपि ज्ञानयज्ञफलं मोक्षं लभते सत्वशुद्धिज्ञानोत्पत्तिद्वारा अ
र्थानुसंधानपूर्वकं पठतस्तु साक्षादेव मोक्षयति किं वक्तव्यमिति
फलविधिरेवायं नार्थवादः श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परं
तपेति हि प्रागुक्तं [illegible]

सदानंदी टीका ११

यदावयोरिमं ग्रंथं संवा
फलमध्यापकस्योक्त्वा फलमध्येतुरुच्यते यदावयोरिमं ग्रंथं संवा
दात्मकमादरात् । धर्म्यमीदनपेते च पठिष्यति जपात्मना ज्ञानात्म

श्री
गी० टी०
अ०

318

केनयज्ञेनतर्पयाम्यायेयिमितेनवै १ इत्याद्ययज्ञादिश्रेष्ठेनसर्वयज्ञेश्वरोप्यहं
तेनाध्येत्रा निश्चयेन श्रद्धितः स्यामितीरितः २ ममास्ति निश्चयस्तेन नहि
नक्तमोस्तिमत्प्रियः यद्यप्यसौजपमेवाउच्चमानोयमाशये ४ नच्छ
एव नस्तथापीतिमवमेवं मतिर्मम प्रकाशयति मामेवाध्येतायमितिधी
यतेः ५ ज्ञानयज्ञफलेतस्याजपमात्रादपीरिते चितशुद्ध्यात्मविज्ञा
नसाम्राज्याप्तमदारधीः ६ प्राप्नोति भगवद्गीताशास्त्राध्येतानसंश
यः पठतोर्थानसेथानसर्वकेश्रुतस्यतु ७ साक्षात्देवभवेन्मो
क्ष इति किंवाच्यमिममे साक्षात्फलविधेर्देवोदेशोनास्त्यर्थवादता ८
श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप इत्येवपूर्वमेवोक्तमतोनिस
र्ममस्तुभिः ९ अमादरेणगीताख्यशास्त्रमध्येयमित्यतो १०॥७०॥

नीलकंठी टीका १२

अध्यापकस्यफलमुक्त्वाऽध्येतुः फलमाह अध्येष्यतेचेतिज्ञान
यज्ञेननिर्विकल्पसमाधिना इष्टः पूजितः स्यामिति मे मतिः ज्ञान
फलप्रापकत्वेकरस्तद्देतस्य शास्त्रस्याध्ययनमपीत्यर्थः इतिम
ममसर्वेश्वरस्यमतिः तेनाश्रुत्वातिमात्रमेतदिति न मन्तव्यं किंतुभू
ताथवादएवायमितिभावः ७० ॥

आनंदी टीका १३

अस्यशास्त्रस्यपदपदार्थविवेकादिद्वाराज्ञाननिष्ठानावदास्ता
मेतदक्षरपाठोपिमहाफलइत्युपदिशति धर्म्यंवर्णाश्रमध
र्मरक्षणोक्तिनम् ७० ॥

^एवंनिष्पन्नस्ययोगिनोज्ञानस्योपदेशफलमु
क्त्वाः पाठफलंप्रदर्शयि
तुमाह

रामकंठी टीका १४

यश्चदेवसर्गभाक्कुंतिभ्रद्धांसंस्कृतचिन्तापिअध्यमकस्मि — काश्रद्दधानस्याहरु
न्नात्मंयन्नज्ञानप्रावीण्यसमापन्नेर्ध्येष्यतेवश्लभावनाप
ननेयममावयोस्तवचममचसंवादंसंकथनंधर्म्यंज्ञानलक्ष
(तात) णस्मात्स्वधर्मादनपेतंपठिष्यति तेनाहंयथोक्तज्ञानात्मकेनप्रक
ष्टेनयागेनेष्टः सन्तर्पितः स्यामितिममतिर्निश्चितात्मतिपत्तिः
७० ॥

लासिकी [illegible]टीका

गीतार्थमनुध्यमानस्य पठत एव फलमाह ॥

आवयोः संवादमिमं धर्म्यं धर्मादनपेतं योऽध्येष्यते पठिष्यति तेन
पुरुषेण ज्ञानयज्ञेनोक्तलक्षणेन सर्वयज्ञेभ्यः श्रेष्ठेनेष्टः पूजितः
स्यां भवेयमिति मे मतिर्निश्चयः [illegible]
[illegible] ७०

पंचोलीटीका

पाठतः फलमाह अध्येष्यत इति च यः आवयोः कृष्णार्जुनयोः इ
मं धर्म्यं धर्मादनपेतं संवादमध्येष्यते जपरूपेण पठिष्यति तेन श्रेष्ठा
सर्वज्ञानेभ्यः तेन ज्ञानयज्ञेन श्रेष्ठेनाहमिष्टः स्यां भवेयमिति मे मतिः य
था यस्मै गीतार्थमनवबुध्यमानस्य केवलं जपति तथापि मामनुस्मृ
त्य तेनापि मामेवासौ प्रकाशयतीति बुद्धिर्भवति यथा लोके यदृच्छा
यापि यदा कश्चित्कस्यचिन्नाम गृह्णाति तदासौ मामेवाह्वयती
ति मत्वा तस्य समीपमागच्छति तथाहमपि तस्य सन्निहितो भवेयमनप
वेष्टा ज्ञानमिति हि जनेषु प्रसृता न तत्कथं चिन्नामोच्चारणमात्रेण प्रस।
न्नोऽस्मि तथैव तस्यापि प्रसन्नो भवेयमितिभावः ७० ॥

रणवीर समिद्बोधिनी

एवं योगारूढस्य ज्ञानोपदेशफलमुक्त्वा स्वाध्यायनस्य रूढ्योः
पाठफलमाह अध्येष्यते चेति यः कश्चिदावयोस्तव च मम च सं
प्राप्तक्रमकारं धर्म्यं संवादं वर्णाश्रमविभागेन व्यवस्थापितधर्मा
दनपेतं संकथनं गीतासन्दर्भरूपमध्येष्यते पठिष्यति तेनाप्यहं
परमेश्वरः सर्वयज्ञेभ्यः सकाशात् श्रेष्ठेन ज्ञानयज्ञेन श्रेयान्द्रव्यम
याद्यज्ञाज्ज्ञानयज्ञः परंतपेति च तत्र प्रतिपादितलक्षणेन संभाव
वितृभाव्यनुष्ठानविषयाकेन करणभूतेनेष्टः संपूजितो भवेयमि
ति मे मतिर्निश्चिता प्रतिपत्तिरित्यर्थः ७० ॥

भाषा अनुवाद टीका

अवगीतापाठकरनेकाफलकहतेहै किजोमनुष्यहमाराश्रोतुमारा
यहधर्मयुक्त संवादनियमसेपाठकरेगा सोउसने समस्त यज्ञोसेश्रे
ष्ट ज्ञानयज्ञ से हमारा पूजन किया यहमेरी निश्चित बुद्धिहै भावार्थ
यह किजो अर्थनजानिकेभीजपकेसमानगीतापढै तोउसके श्रोताहे
म उसपर प्रसन्न होतेहै ज्ञान अज्ञान किसी तरह हमको स्मरण करे
हम उसके निकट जायंगे जैसे अजामिल श्रोव्याध आदिकोंके
निकट हम गये ७० ॥

दोहा

अध्ययन करगो पाहि जो धर्मसंवादहमार ज्ञानयज्ञ सें ते
हि हों पूज्यो यह मतिसार ७०॥

320

श्रद्धावाननसूयश्च शृणुयादपि यो नरः सोऽ
पि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ७१

शांकरभाष्य टीका १

अथ श्रोतुरिदं फलं श्रद्धावान् श्रद्दधानो नसूयश्चासूया वर्जितः
सन् इमं ग्रंथं शृणुयादपि यो नरोऽपिशब्दात् किमर्थज्ञानवान्
सोऽपि पापान्मुक्तः शुभान् लोकान् प्राप्नुयात् पुण्यकर्मणाम
ग्निहोत्रादिकर्मवतां ७१ ॥

आनंदगिरिकृतटीका २

अध्ययनकर्तुरध्येतुश्च फलमुक्त्वा श्रोतुरिदानीं फलं कथयति श्रद्धेति ७१

स्वामिकृतटीका ३

अन्यस्य जपतो यो नरः कश्चिच्छृणोति तस्यापि फलमाह श्रद्धावानि
ति यो नरः श्रद्धायुक्तः केवलं शृणुयादपि श्रद्धावानपि कश्चिन्
किमर्थमयं वेदं जपति अथवहे जपतीति वा दोषदृष्टिं करोति तन्न्याह अस
र्थीमाह अनसूयश्चासूयारहितो यः शृणुयात्सोऽपि सर्वैः पापैर्वि
मुक्तः सन् अश्वमेधादिपुण्यकृतां लोकान्प्राप्नुयात् ७१ ॥

पैशाचभाष्य टीका ४

श्रद्धाकर्मणां श्रद्धा विद्यते यस्यासौ श्रद्धावान् अनसूयः असूयार
हितः श्रद्धेन तरश्शृणुयादपि किंपुनरर्थस्य प्रतिपत्तौ सोऽपि श्रोता
मुक्तः निर्गतः अस्माच्छरीरात्स्वर्गस्थः शुभान्पुण्याल्लोकान्प्रा
प्नुयात्पुण्यकर्मणां तेषां लोकानिति संबंधः ७१ ॥

रामानुजभाष्य टीका ५ ॥

श्रद्धावानिति श्रद्धावाननसूयश्च यो नरः शृणुयादपि भक्तिविरो
धिपापेभ्यो मुक्तः पुण्यकर्मणां मदुक्तानां लोकान्समूहान्प्राप्नुयात् ७१

अभिनवगुप्तकृतटीका ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्पष्टार्थम् ७१ ॥

श्री· गी· टी· अ·

321

परमार्थप्रपा टीका ७

अथश्रवणफलमाह श्रद्धावानिति योनरः श्रद्धायुक्तः सन्केवलं श्रणुयादपिकश्चित्किमर्थमयमध्येजपत्यवदेवेतिदोषदृष्टा श्रणोतितत्रिहार्थमाह अनसूयश्चेति असूयारहितः श्रणुयात् सोपिसर्वैःपापैर्मुक्तः सन्अश्वमेधादिपुण्यकृतांलोकान्प्राप्नुयात् ७१

वनमाली टीका ८

इदानींश्रोतुःफलमाह श्रद्धेतियोनरोनस्पोश्चैःपठतःसकाशात्श्रद्धावान्किमर्थमयमध्येजपमश्चैवजपतीतिदोषदृष्ट्यासूययारहितोनसूयश्च केवलंश्रणुयादेममपिशब्दात्किमुतार्थज्ञानवान्सोपिकेवलाक्षरमात्रश्रोतापिमुक्तःपापैःशुभान्प्रशस्तालोकान्पुण्यकर्मणामश्वमेधादिकृतांप्राप्नुयात् ७१ ॥

अत्मवैजयन्ती टीका ९

पतनश्रोतुःकिंफलंस्यादित्यपेक्षायामाह श्रद्धावानितियोनीमनुष्यःकेवलमेतच्छास्त्रश्रवणेश्रद्धावानेतच्छ्रवणेनैवाहंसंसारान्मोक्षंभविष्यामिनान्येनेतिविश्वाससहितःकाश्रद्धाविशिष्टोयस्तथा अनसूयःकिमर्थमध्येत्रशुष्कमन्यथावावदतीतिदोषदृष्ट्यारहितःचकाराद्द्वेषेर्ष्यादिरहितःश्रणुयाच्छ्रवणंकुर्यात्सोपिश्रवणकर्तापिसर्वैःपापैर्मुक्तःसन्पुण्यकर्मणामश्वमेधादियज्ञकर्मणांशुभान्मंगलरूपान्लोकान्स्वर्गादिकान्प्राप्नुयात् चशब्देनयःश्रवणमात्रेणानेमलोकेयानिनहिताथतदुक्तमाचरतिसयातीतिकिमुवक्तव्यमितिसूचितम् ७१ ॥

+प्रवक्तुरथेनश्रफलमुक्त्वाश्रोतुरिदानींकथयति॥

मधुसूदनी टीका १० ॥

+योनरःकश्चिदपिश्रमस्वेध्येजपतःकारुणिकस्यसकाशाच्छ्रद्धावान्श्रद्धायुक्तःनत्वाकिमर्थमयमध्येजपत्यवदंवाजपतीतिदोषदृष्ट्यासूयारहितोःनसूयश्चकेवलंश्रणुयादिमंग्रंथमपिशब्दात्किमुतार्थज्ञानवान्सोपिकेवलाक्षरमात्रश्रोतापि

ज्ञः पापैः शुभान् प्रशस्तान् लोकान् पुण्यकर्मणामश्वमेधादि
कृतोऽप्राप्नुयात् ज्ञानवतस्तु किंवाच्यमितिभावः

७१ ॥

सदानंदीटीका ११

फलेप्रवक्तारं येनश्रोकाश्रोतः फलेहरिः इदानींकथयन्नवक्ता
करुणारससागरः १ यः कश्चनमनुष्योपिजपतीमस्यकस
चित् उच्चैर्दर्यानि यः शृणुः सकाशात्कुहयात्वितः २ उच्चैर्जपम
वदेवा किमर्थमिति दोषहरक् प्रसूयात हि हीनः सन्केवलेप्र
णुयादिमं ३ योत्यमज्ञापिशास्त्राम किमतनार्थाववोधवान् केवला
क्षरमात्रस्यश्रोतापिस्यक्त किल्विषः ४ लोकास्वशस्तानामो
तिसोश्वमेधादियाजिनो किंवाच्यो भगवद्भक्तोनाशास्त्रार्थविदे
ष्ठफलम् ५ ॥ ७१ ॥

नीलकंठी टीका १२

प्रवक्तारं येनस्यफलमन्यश्रोतुरपिफलमाह प्रह्लावा
निति शृणुयादपिश्रवणाख्यापि किमुवक्तव्यमादरे
णाश्रिग्रहणायः कुर्यात्सउक्तेफलेशानुयादिति स्पष्टार्थः श्लोकः
तथाचोक्तं श्रीभागवते वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुना
ति हि वक्तारं प्रच्छकंश्रोतॄंस्तत्पादसलिलं यथेति ७१ ॥

आनंदी टीका १३

येत्वध्ययनेप्यनधिकारिणः स्त्रीशूद्रादयः तेषामप्युपकारक
मिदमित्याह अथैषवाकार्थः अस्मिन्जन्मनि प्राप्तश्रवणमात्रात्
पुण्यकर्मणां लोकान्प्राप्यजन्मान्तरे तेनदध्ययनार्थाववोध
ज्ञानाधिकारमाप्नोत्यतः स्यादिति ७१ ॥

रामकंठी टीका १४

समर्थस्यापि श्रद्धधानस्य श्रवणफलमाह ।
इदानीमध्ययनासमर्थ

श्री
गी. टी.
अ.

322

योप्येतच्छ्रवणमात्रं श्रद्धाभक्त्यादिगुणयुक्तोस्य शास्त्रस्य श्रु
यात्सोपि यज्ञदानादिपुण्यकर्मकृतां संबंधिनो लोकान्भोगभु
वनानि प्राप्नुयादित्यस्यात्मज्ञानार्थस्य शास्त्रोपदेशाध्ययनश्र
वणभेदेन परस्परं स्थूलविभागेन श्रद्धादिगुणविशिष्टम
नुष्यमात्रसामान्येन द्विविधं फलमादिशता भगवता सर्वेषाम
ध्यात्मगुणविशिष्टानां ज्ञानाधिकारवत्तामुपदेशादिष्वधिका
रोनुज्ञातः [illegible] ७१ ॥

+अध्ययनासमर्थस्य श्रद्धयाश्रवणतः फलमाह ॥

लासिकी [illegible] टीका

+अश्रद्धं जपत्यश्रद्धं जपत्येवमसूयारहितो यो नरः सोपि पापेभ्यो
मुक्तोश्वमेधादियाजिनां पुण्यकर्मणां शुभान्स्वर्गादीन्भूता
ल्लोकान्भुवनानि प्राप्नुयात् [illegible] ७१

पंचोलीटीका

अथास्य पठनेऽयोग्यः कश्चिच्छृणोति तस्यापि फलमाह श्रद्धा
वानिति यो नरः श्रद्धावानपनः अनसूयः असूयारहितः शृ
णुयात् सोपि मुक्तः सन् पुण्यकर्मणां शुभांल्लोकान्प्राप्नु
यात् अपिशब्दात् अर्थज्ञानवान् शुभांल्लोकान्प्राप्नोत्यत्र किं
वक्तव्यं ७१ ॥

रणवीर समिद्बोधिनी ॥

अधुनाध्येतृसमर्थाक्षवतः केवलं श्रोतुरपि श्रवणफलमाह
श्रद्धावानिति यश्च नरः श्रद्धादिगुणयुक्तोऽन्यस्मादपि इममाव
योः संवादं शृणुयात् सोपि सर्वैः पापैर्विमुक्तः सन् अश्वमेधादि
पुण्यकर्मकारिणां संबंधिनः शुभांल्लोकान्प्राप्नुयात् इत्यर्थः ७१

मधुभाष

७२॥

भाषा अनुवाद टीका

अबगीताश्रवणकरनेकाफलकहतेहैं किजोकोई जनश्रद्धाकरकेविश्वा
स युक्त होय केवलगीतापाठ श्रवणकरै और अनसूय कहे यहमनु
ष्य कौंखिलायकेपढताहै अथवा अश्रुहनिकले तोइस टीकैयेसेहो
ष नहोवे येसेमनुष्य नावतसकल पापसेमुक्तहोय अश्वमेधयज्ञ आ
दि कर्मकरनेवाले जोलोक पावतेहै यभीउसीलोककोप्राप्तहोय और
जोअर्थयुक्तप्रति प्रीति पूर्वक श्रवण करैंतोवेजीवनमुक्तहै औरअंत
को साक्षात्ब्रह्मस्वरूप होयंगे इसमे कछु सन्देह नंहीहै ७१ ॥

दोहा

श्रद्धावंत अनिंदक सुणहिं मानवजोय सोभीमुक्तहोय
पावहि लोकपुन्यात्मक कोय ७१॥

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा कच्चि
दज्ञानसंमोहः प्रनष्टस्ते धनंजय ७२ ॥

शांकरभाष्यटीका १

शिष्यस्य शास्त्रार्थग्रहणविवेकबुभुत्सया पृच्छति तद्ग्रहणे ज्ञा
ते प्रनष्टोहमित्युपायान्तरेणापि इति प्रश्नाभिप्रायो यत्नान्तर
मास्थाय शिष्यः कृतार्थः कर्तव्य इत्याचार्यधर्मः प्रदर्शितो भव
ति कच्चित् किमेतत् मयोक्तं श्रुतं श्रवणेनावधारितं पार्थ किं
त्वया एकाग्रेण चेतसा एकचित्तेन किम्वा प्रमादितः कच्चिदज्ञान
सम्मोहः अज्ञाननिमित्तः सम्मोहो विचित्तभावोऽविवेकता स्वाभावि
कः किं प्रनष्टो यदर्थोयं शास्त्रश्रवणायासस्तव मम चोपदेष्टृता
यासः प्रवृत्तिस्तम्य धनंजय ७२ ॥

आनंदगिरिकृतटीका २

आचार्येण शिष्याय यावदज्ञानसंशयविपर्यासनिवृत्त्यावदनेकधोप
देष्टव्यमिति दर्शयितुं भगवानर्जुनं प्रति पृष्टवानित्याह शिष्य
स्येति प्रश्नाभिप्रायं प्रकटयति तद्ग्रहण इति शिष्यस्तेनुक्ते स्तं
स्येति प्रश्नाभिप्रायं प्रकटयति तद्ग्रहण इति शिष्येणोक्ते तं
हीते नेष्टतर्हित्ति प्रश्नोदासीन्यमाचार्यस्योचितं तस्य मन्दबुद्धि
त्वादित्याशंक्याह यत्नान्तरमिति कच्चिदिति कोमलप्रश्ने तमेव
व्याचष्टे किमेतदिति द्वितीयं किंपदं पूर्वस्य व्याख्यानतया स
म्बध्यते कच्चिदिति द्वितीयं प्रश्नं विभजते किं प्रनष्ट इति मो
हनाशस्य प्रसंगं दर्शयति यदर्थ इति ७२ ॥

स्वामिकृतटीका ३ ॥

कच्चिदिति प्र
सम्यग्बोधानन्यत्नो पुनरुपदेक्ष्यामीत्याशयेनाह कच्चिदिति प्र
स्पष्टमर्थः
स्यार्थस्य अज्ञानसंमोहः तदज्ञानकृतो विपर्ययः स्पष्टमन्यत् ७२ ॥

पिशाचभाष्यटीका ४

कच्चिदिति प्रश्नस्य पूर्वोक्तं श्रुतमिति संबन्धः अज्ञानमनिश्चयस्त

दि॰

त्रिमितसंशयस्तत्संमोहः स कच्चिन्नाशः प्रवष्टो भगवता ७२ ॥

रामानुजभाष्यटीका ५

कच्चिदिति मयाकथितमेतत्त्वया वहितेन चेतसा कच्चिच्छ्रुतं तव
ज्ञानसंमोहः प्रणष्टः कच्चित्त्येनमृढेन योत्स्यामीत्युक्तवान् ७२ ॥

अभिनवगुप्तकृतटीका ६

इदं ते इत्यादिना सज्ज्ञानसंगोप्यमानत्वसिद्धिं सर्वजनाविषयत्वात्
तपसा तावत्सा यत्रैषा विशीर्णाकुशलपरिपाकोन्मुखत्वं नाम भवतीति स
र्वेन तपस्तपसः प्रसज्जायते सैवाग्रभक्तिः प्रसादस्वरूपजाता कदाचित्
प्रीह इति सौदामिनीवत्ताहृश्यैनात् ततस्तस्याहृश्यान्नमिच्छा भव
ति इयदपि च कस्यचिदनीश्वरोवस्तुनिष्ठसौख्यादित्वानुभवति से
स्येऽपि वा कस्यचित्फलार्थितया फलमेव प्रधानीकृत्य भगवतेनेवस्ता
न्मानेन तदुपकरणीकरोति न मंक्रमभवेत् यदुक्तं प्रसृष्टस्य कर्मा
णापि फलार्थित्वादिति एवमुभयथापि भगवत्स्वेवानादरः इत्य
थैः भक्तिमिति पन्नदेवमपि भक्तिकरणीयत्नकेषु तद्विरूपणं अभि
यास्यति श्रोभिमतेन शास्त्रोक्तप्रक्रियया यास्यतीति विनिरीक्ष्यति समा
न्मयना मेनं तिविधिरेवपनार्थवादः एवमन्यत्र ७२ ॥

परमार्थप्रपा[illegible] टीका ७

सम्यक्बोधानुमतोऽप्युनरुपदेष्टा मीमांसयेनाह कच्चिदिति अज्ञा
नसंमोहस्तेऽप्रणष्टः कच्चिदिति अस्मार्थविपर्ययः स प्रष्टमसन् ७२

वनमालीटीका ८ ॥

शिष्यस्य ज्ञानोत्पत्तिपर्यन्तं गुरुणा प्रयासः कार्य इति गुरोर्धर्मं शिक्ष
यितुं सर्वज्ञस्यापि पुनरुपदेशापेक्षा नास्तीति विज्ञापयन्पृच्छति कच्चिदिति
प्रश्नेऽप्येतन्मयोक्तं गीताशास्त्रं त्वयैकाग्रेणाव्यासंगरहितेन चेतसा हे पार्थ
त्वया किं श्रुतं श्रवणेनावधारितं कच्चित् किं अज्ञानेकर्मस्वपि विपर्यय
ज्ञानायत्तसंमोहो विपर्ययस्तदेतत्कोवाप्रनष्टः एवनरुमतिविशेषि
तेन प्रनष्टः स्मो नो चेत्पुनरुपदेशं करिष्यामीति भावः ७२ ॥

ऊसमवैजयंती टीका ९

एवमस्य गीताशास्त्रस्य देनेनानयत्स्कार्यस्मादिश्रद्धावानिरूपते
नवाचनादिमाहात्म्यमुक्त्वाथेदानीमेतच्छास्त्रार्थज्ञानादिन
वमोहनिवृत्तिर्नेप्राप्तौ हि पुनरुपदेक्ष्यामीत्यभिप्रायेणाह क
च्चिदिति हे पार्थ कच्चिदितमूयंमयोक्तं एकाग्रेणावहितेन चेत
सा त्वया मया कथितमेतच्छ्रवणं श्रुतं सम्यक् ज्ञातं हे धनंजय एते
न च कच्चिदज्ञानसंमोहः ज्ञानेनात्मानात्मयाथात्म्यस्वरूपाज्ञा
नेन संमोहः सम्यग्विपर्ययः पापमेवाश्रयेदेयं भोमार्के भेदस्म
पीहलोके न योन्यस्येत्यादिरूपकः प्रनष्टो भवति न वा नो चेत्पुन
रप्यहमुपदेक्ष्यामीत्यर्थः पार्थ त्वमेवं न सम्यग्वादिमान् कृष्णः प्र
योस्यतो मतुक्तेष्वानेतेनैवत्वमेव वदेदिति सूचितम् धनंजयेत्य
नेन यदि तव परत्र न विजये पि प्रयासो नास्ति न हि स्वाज्ञानं जेत
न मोहविजये कश्चमायासो भवेदिति सूचितम् ७२ ॥

+ शिष्यस्याज्ञानोत्पत्तिपर्यन्तं गुरुणा का
+ रुणिकेन प्रयासः कार्य इति गुरोर्द्ध
र्मं शिक्षयितुं सर्वज्ञोपि पुनरुपदे
शापेक्षा नास्तीति ज्ञापनायाह
कच्चिदिति ॥

मधुसूदनी टीका ९० ॥

कच्चिदिति श्रव्यं एतन्मयोक्तं गीताशास्त्रमेकाग्रेणाव्यासंगरहि
तेन चेतसा हे पार्थ त्वया किं श्रुतं श्रुत्वावधारितं कच्चिदज्ञान
संमोहः अज्ञाननिमित्तः संमोहो विपर्ययः अज्ञाननाशात्
प्रनष्टः प्रकर्षेण पुनरनुत्पत्तिविरोधित्वेन नष्टस्तेन च हे धनंजय
हि स्यात् पुनरुपदेशं करिष्यामीत्यभिप्रायः
॥ ७२ ॥

सदानंदी टीका ॥

विज्ञानोत्पत्तिपर्यन्तं शिष्यस्यानुगतस्य च सम्यक्प्रयासः क
र्तव्यो गुरुणा करुणात्मना १ इति शिक्षयितुं सम्यग्गुरोर्धर्मं कृ
पानिधिः सर्वज्ञोपि स्वयं शिष्यं पृच्छति स्वानुगं धनंजयं २ एतन्म
योक्तं गीताख्यशास्त्रं हे पार्थ चेतसा व्यासंगान्तरशून्येन किं त्वया
श्रुतमर्थतः ३ श्रवणादितमेतत्किं मोहोऽज्ञाननिमित्तकः प्र
ज्ञाननाशतो नष्टः प्रकर्षेण वा किं न वा ४ यदर्थोऽयं मयायासः
स किं नष्टो धनंजय ५ य नवापि श्रवणायासः
उपदेष्टा यातनया

दिष्टाउपदेशेनैकाग्र्यामिष्टनर्हितं ९ ७२ ॥

नीलकंठी टीका १२

सर्वान्तर्यामी सर्वज्ञोऽपि भगवाँल्लोकशिक्षार्थं शिष्यस्य ज्ञानं
जातं न वेति पृच्छति श्रमयाश्रुतः श्रुतः स्वयमेव उपदेशं कृ
वि॰ तवता भगानिदाय इवमया येशतन्न कृतो उपदेशेन कृता
र्थः कर्तव्य इत्याशयेनाह कच्चिदिति कच्चिदिति काममप्रवद
ने हे पार्थ एतत्त्वयैकाग्रेण चेतसा श्रोत्रं वा शङ्कितोऽपि तस्या
वोऽयमिति मम कामोऽस्ति ततस्त्वां पृच्छामि किमिदं त्वया श्रुत
मिति श्रुतवतोऽपि तवाज्ञानकृतः संमोहो विपर्ययः अनात्म
न्यात्मधीरूपः स्वधर्मे परधर्मधीरूप इति सद्विविधोऽपि नष्टः
कच्चित् मच्छ्रमसाफल्यमित्युक्त्वा महत्पृच्छामीत्यर्थः ७२

आनंदी टीका १३

तदेवमियता शास्त्रेण ज्ञानकर्मसमुच्चयानुष्ठानेकनिमित्ता
निःश्रेयसैकनिष्ठेति भगवानन्यदुपदिष्टवान् तस्य सम्यगव
बोधजिज्ञासयार्जुनमिष्टप्रश्नेन पृच्छति हे पार्थ एतत् स्वस्य
त्वेन स्वेहप्रकाशनं त्वयैकाग्रेण सावधानेन चेतसा एतन्मया के
रणप्रतिपादितं ज्ञानकर्मसमुच्चयानुष्ठानरूपमुपदेशसर्वस्व
मिदं कच्चिच्छ्रुतं किं परमार्थतोऽवधारितम् कच्चिदितीष्टप्रश्ने
अज्ञानसंमोहः अज्ञानाद्धेतोर्देहिनोऽसत्त्वाप्रतिपत्तेः संजातः
संमोहः प्रमथ्यमाध्यायोक्तिकर्मण्यक्रियाणां सहजस्याव
धार्यत्वज्ञानं कच्चिन्नष्टः प्रकर्षेण पुनरनुत्पत्त्याऽत्यन्ताभावं प्रा
प्तः हे धनंजय येनाहं पुनरुपदेक्ष्यामीत्यर्थः ७२ ॥

रामकंठी टीका १४

+ अपि नामैतद्यथोक्तमेकाग्रेण तत्त्वविषयेण मनसा त्वया ९
श्रुतं श्रुतिमात्रेण परिगृहीतं ततश्च तत्त्वभावनावशात्स
ज्ञानविषयस्य तव कच्चिन्मिथ्याज्ञानसंमोहोऽज्ञानात्तत्त्वाप्रतिप

+ एवं परंब्रह्मसमावेशलक्षणपरमसमाधिनिष्ठमात्मानं कृत्वा भगवता यदुक्तं तव
गोत्थानोत्तरमेश्वरेण यन्तत्स्वसन्दर्भेण परमरहस्यभूतं ज्ञानं यथा प्रतिपादितं तस्य सम्य
ग्बोधाबोधजिज्ञासयार्जुनमाह ॥

मेर्थः संमोहः सहजवशान्नुष्टेयकर्मविचिकित्सालक्षणं वैचिग्रं
सविनष्टः अर्थं समापन्नो न वेत्स्यतामिति शेषः
७२ ॥

लासिकी टीका

सम्यक्प्रतिपादितस्य ज्ञानस्य बोधाबोधजिज्ञासया अर्जुनमाह ॥
हे पार्थ त्वयैकाग्रेणानन्यविषयेण चेतसा एतन्मदुक्तं कच्चिद
पि नाम श्रुतमवधारितं तथाऽज्ञानात्तत्त्वाप्रतिपत्तेर्यः संमोहः दे
हाद्यात्मप्रत्ययोऽपि नाम प्रकर्षेण नष्टः ७२

पंचोली टीका

शिष्यस्य प्रागार्थं ग्रहणाविवेकं बुद्ध्वा तस्याचार्यधर्मं परिपालय
न् पृच्छति कच्चिदिति हे पार्थ कच्चिदिति प्रश्नार्थः निपातः एतन्म
याोक्तमेकाग्रेण चित्तेन त्वया श्रुतं श्रवणेनावधारितं किं वा प्रमादि
तं कच्चित् अज्ञाननिमित्तः संमोहः अविवेकिता स्वभाविकी प्रनष्टः
यदर्थोऽयं शास्त्रश्रवणायासस्तव मम च उपदेष्टृत्वायासः प्रहृत्वस्ते न
ष्टो धनंजय ७२

श्रीवीरमित्रोदयिनी ॥
अथार्जुनस्य यथोपदिष्टार्थसम्यग्बोधाबोधजिज्ञासया पुनरपि
तं प्रत्याह कच्चिदिति एतदेव प्रश्नद्वयं स्पष्टार्थोऽयं श्लोकः ७२

मधुभाष्य

७२॥

भाषा अनुवाद टीका

जोसम्यक प्रकार बोधनभया होतोहमफेरभीतुमको उपदेश करेंगे
इसआशयसेपूछतेहै किहे पार्थ अर्जुन कहोतोमैंनेजोकहासो
सबएकाग्र चितहोयतुमने सुना और हे धनंजयसंमोहकहे तत्व
ज्ञान के विषयमेअज्ञानजनिततुमारी विपरीत बुद्धि नष्टभई किन
ही अर्थात मेरेवचनोसे अज्ञान दूर भया किनही यहभगवानने
पूछा ७२ ॥

दोहा

कछुक याहि पार्थसुन्यो चितएकाग्रहि होय कछु अज्ञा
नसंमोहतव नष्टधनंजय सोय ७२॥

327

अर्जुन उवाच नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्म
याच्युत स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ७३

शांकरभाष्यटीका १

अर्जुन उवाच नष्टो मोहोऽज्ञानजः समस्तसंसारानर्थहेतुः
सागर इव दुस्तरः स्मृतिश्चात्मतत्त्वविषया लब्धा यस्या लाभात् स
र्वग्रंथीनां विप्रमोक्षः त्वत्प्रसादात्तव प्रसादान्मया त्वत्प्रसादमाश्रि
तेनाच्युत अनेन मोहनाशप्रश्नप्रतिवचनेन सर्वशास्त्रार्थज्ञानफल
मेतावदेवेति निश्चितं दर्शितं भवतीति यतो ज्ञानात्सम्मोहनाशश्चा
त्मस्मृतिः लाभश्चेति तथा च श्रुतावनात्मवित् शोचामीति उपन्यस्या
त्मज्ञाने सर्वग्रंथिविप्रमोक्षो भिद्यते हृदयग्रंथिस्तत्र को मोहः कः
शोक एकत्वमनुपश्यत इति च मंत्रवर्णाः अथेदानीं त्वच्छासने स्थितो
ऽस्मि गतसंदेहो मुक्तसंशयः करिष्ये वचनं तवाहं त्वत्प्रसादात्कृता
र्थोन मे कर्तव्यमस्तीत्यभिप्रायः ७३ ॥

आनंदगिरी टीका १

प्रेमोपदिष्टात्मज्ञानस्य अज्ञानसंदेहविपर्यासरहितस्यैतस्य भगव
दनुग्रहप्राप्तिकथनेन भगवंतं परितोषयिष्यन्नर्जुनो विज्ञापितवा
नित्याह अर्जुन इति अज्ञानोत्थस्याविवेकस्य नष्टत्वमेव संपद्यति
समस्त इति स्वयंज्योतिषि प्रतीचि ब्रह्मण्यविद्याभ्रमं विज्ञानयति
नाविदिते प्रकाशयतीति मत्वाह स्मृतिश्चेति स्मृतिलाभे किंस्यादि
ति चेत्तदाह यस्या इति मोहनाशे स्मृतिप्रतिलम्भे वाऽसाधारणका
रणमाह त्वत्प्रसादादिति प्रकृतेन प्रश्नप्रतिवचनेन लब्धमर्थं कथ
यति अनेनेति यदुक्तं स्मृतिप्रतिलम्भादशेषतो हृदयग्रंथीनां विप्रमो
क्षः स्यादिति तत्र प्रमाणमाह तथा चेति ज्ञानादज्ञानतत्कार्यनिवृ
त्तौ श्रुत्यन्तरमपि संवादयति भिद्यत इति भगवदनुग्रहादज्ञानकृ
तमोहहानानन्तरमात्मज्ञाने प्रतिलब्धे त्वदाज्ञायां स्थितोऽहमितरथा
अथेति तव वचनं करिष्येऽहमित्यत्र तात्पर्यमाह अ।
हं व्याकरोति ॥ ॥
७३
हमिति

श्री
गी टी
अ.

328

नष्टो मोहः कृतार्थः

स्वामिकृतटीका ३

अर्जुन उवाच नष्ट इति
आत्मविषयो मोहो नष्टः यतो यमहमस्मीति स्मृतिस्तत्त्वानुसंधानरूपा स
त्वत्प्रसादान्मया लब्धा अतः स्थितोऽस्मि युद्धायोत्थितोऽस्मि गतो धर्मवि
षयः संदेहो यस्य सोऽहं तवाज्ञां करोमि [illegible] ७३

पिशाचभाष्यटीका ४

अर्जुन उवाच नष्टो मोहः नष्टसंशयः सर्वमासीत् गुरुबन्धुमित्रादयः हंत
व्याः अहो स्वित्त्वहं हनिष्यामि इति स्मृतिः स्मृतिस्समज्ञानेन सा च यथा मानवसम्प्रा
दत्त्वत्प्रसादमाश्रित्य अनेन मया च्युतस्वरूपात्कथमपि न च्यवत इत्युक्तस्थि
तोऽयतोऽस्मि करिष्ये वचनमाज्ञां ७३ ॥

रामानुजभाष्यटीका ५ ॥

अर्जुन उवाच नष्ट इति विपरीतज्ञानं त्वत्प्रसादान्मम न हि नष्टं स्मृतिर्य
थावस्थिततत्त्वज्ञानं त्वत्प्रसादादेव तच्च लब्धं अनात्मनि प्रकृता
त्माभिमानरूपो मोहः परमपुरुषशरीरतया तदात्मकस्यात्म
वस्तुनः अतदात्माभिमानरूपनित्यनैमित्तिकरूपस्य कर्मणः
परमपुरुषाराधनरूपतया तत्प्राप्त्युपायभूतस्य बंधकत्वबुद्धिरूपश्च
सर्वो विनष्टः आत्मनः प्रकृतिविलक्षणत्वतत्स्वभावरहिततज्ज्ञानैक
स्वभावस्वरूपभगवज्ज्ञानेन निखिलजगदुत्पत्तिस्थितिप्रलयलीलाशे
षदोषप्रत्यनीककल्याणैकस्वरूपस्वाभाविकानवधिकातिशयज्ञानबलै
श्वर्यवीर्यशक्तितेजः प्रभृतिसमस्तकल्याणगुणगणमहार्णवपरब्रह्मश
ब्दाभिधेयपरमपुरुषयाथात्म्यविज्ञानेन चैवंरूपपरात्मतयाथात्म्यवि
ज्ञानतदभ्यासपूर्वकाहरहरुपचीयमानपरमपुरुषप्रीत्यैकफलनित्य
नैमित्तिककर्मनिषिद्धपरिहारशमदमाद्यात्मगुणनिवर्त्यभक्तिरूपता
पन्नपरमपुरुषोपासनैकलभ्यो वेदान्तवेद्यः परमपुरुषो वासुदेवस्त्व
मिति ज्ञानं च लब्धं ततश्च बंधुस्नेहेन कारुण्येन प्रवृद्धेन विपरीतज्ञानमूलात्
सर्वस्मादवसादाद्विमुक्तो गतसंदेहः स्वस्थः स्थितोऽस्मि इदानीमेव युद्धा
दिकर्तव्यताविषयं तव वचनं करिष्ये यथोक्तं युद्धादिकं करिष्ये इत्यर्थः
॥ ७३ ॥

अभिनवगुप्तकृतटीका ६

नष्टो मोह इत्यादिना गुरुप्रवृत्तिस्तावदर्जुनस्यात्मज्ञानसम्यक्त्व लाभि ते ज्ञानमिति सूचयन्मा विनो न गीतार्थस्यावकाशं ददाति ७३

परमार्थप्रपा टीका ७

कृतार्थं सन्नर्जुन उवाच नष्ट इति आत्मविषयो मोहो नष्टः यतः अय
महमस्मीति स्वरूपानुसंधानरूपा स्मृतिः त्वत्प्रसादान्मया लब्धा अतः
स्थितोस्मि युद्धायोद्यतोस्मि गतः स्वधर्मविषयसंदेहो यस्य सोहं तवाज्ञां
करोमि ७३ ॥

वनमाली टीका ८

नष्टो मोहो विपर्ययो नष्टस्तमोपाकस्मृतिर्लब्धा मया यस्मात्त्वत्प्रसादात्
त्मज्ञाने लब्धे अतस्तज्ज्ञानेन मोहो नष्ट इत्यर्थः भगवत्प्रसादादेवत
त्त्वज्ञानाद्वा मिरुपदेशश्रवणात्सत्संजयादीनामपि सर्वान्तरादृशाप्र
सादाभावात्तेनादृशाज्ञानमिति भावः गतसंदेहो निहतसर्वसंशयः स्थि
तोस्मि युद्धादिकर्तव्यतारूपवक्ष्यमाणं यावज्जीवं करिष्ये वचनेन तव भ
गवतः परमगुरोः पालयिष्यामि ७३ ॥

ॐ स्वमैवैजयन्ती टीका ९ ॥

एवं भगवता दृष्टोऽर्जुनः शास्त्रानुभवश्रामात्मस्थितिमाह नष्टो मो
ह इति हेऽच्युत त्वत्प्रसादात्त्वदनुग्रहान्मम मोहो देहात्मस्वरूपस्य
विपरीतज्ञानरूपो नष्टो नाशमाप्तोऽत एवं मया स्मृतिर्यथावस्थितिव
स्तुविषया लब्धा प्राप्ता नत एव गतसंदेहः छिन्नसंशयः सन् स्थितोऽधुना
शौर्यादिलक्षणस्वधर्ममनुतेउदकरणे प्रवृत्तोस्मि इदानीं तव वचनं करि।
ष्ये एतदुक्तं भवति चेतनाचेतनयोर्मध्ये भूतचतुष्टयमेवात्मेति लोका
यतिकाः प्राहुरिति तस्य चैतन्यादावसिद्धाभिन्नेन तु दृष्टत्वाद्देह एवात्मे
ति चार्वाका इति देहेस्तने चेतन्यादर्शनाद्देहातिरिक्तत्वपरिमाणक
श्रोतन इति दिगंबराः तस्य मध्यप्रमाणागोचरत्वात्तस्यापीन्द्रियैर्विनारूपा
दिविषयज्ञानासिद्धेरिन्द्रियाण्येवात्मानत्वमिति तदनुयायिन इति सूत्र
मौतेषां देहवलयदर्शनात्प्राणवाहेरूपमहान्तं स एवाहंमण्णामिगंध
जिज्ञासमाश्रित्यप्रमाणमिज्ञाबाधानरूपाधनुभवसायोगपद्यापनेस्त
मौ तेषां देहवलयदर्शनात्प्रभिज्ञाबाधानरूपाद्यनुभवसा ... किं नच त्वरादिनियामकं।
जिज्ञाणिमाद्विश्रमभिन्नेन क्रियाणामात्मनेनत्व
तभगाद्यमाद्विरे

श्री-
गी-टी-
श्र

329

शारीरशुपं मनएवात्मेतिकेचिदितिचशब्दमैमनसोलयेऽपिविद्यमान
त्वात्प्राणएवात्मेत्यपरे तत्राणिकविज्ञानस्यानित्यत्वेऽपिसंतानाभावात् क्ष
णिकविज्ञानमेवचेतनात्मेतियोगाचार्याइतिनित्यचैतन्यविरूपा
ज्ञानादिकरणाद्विविशेषः आत्मेतिनैयायिकाइतिस्वरूपतएकमे
वब्रह्माभेदाप्रयभूतंतन्निमानाद्युपाधिनाजीवभावस्वाभेनतजीवस्व
रूपेणभिन्नइतिशुद्धबुद्धनिर्विशेषब्रह्मैवाज्ञानस्य कल्पितोपाधि
नाजीवत्वेश्वराभेनद्वस्वरूपतोजीवात्माभिन्नईश्वरइतिविश्वएवजी
वश्चिदाभासएवजीवोऽद्वयवच्छिन्नएवजीवोऽन्तःकरणेनतदन्नएवजी
वः अविद्योपाधिकएकएवजीवः अकर्ताभोक्ताज्ञाताकर्तृत्वादि
धर्मोविदेहेनत्वात्मनः नश्येयुरोपिमायोपहितोमायिकैश्वर्यवान् जी
वेश्वरमायातदात्मकंजगच्चसर्वंस्वजानेमिथ्यैवेकनिर्विशेषब
ह्मैवसत्यमित्येवमाद्यज्ञानसंभूतोविपरीतज्ञानलक्षणोयोमेमो
हः सर्वंमभूत्त्वदुपदेशलब्धज्ञानादिनष्टः ज्ञानस्वरूपोज्ञानाश्र
यश्चेतनाचेतनजगदभिन्नात्माभिन्नस्वरूपोऽनेनगुणशक्तिकः परमेश्वरः
त्वामहमस्मिअपदःस्थितोस्मितेमाकदाचिदपितस्यव्यसीतिसंदेहश
तेस्मानर्हितेवचनेकरिष्यामीतिस्वसारथिंभगवन्तमर्जुनोगांडी
वधन्वानदाद्यतेनत्वाशुद्धायोदनिष्ठदिति ७३ ॥
+एवंच्छेदःकृतार्थोत्वेनगुरुपदेशानपेक्षनामाहात्मनः॥
मधुसूदनी टीका १ ॥
+नष्टउच्छिन्नः मोहअज्ञानकृतोविपर्ययः तत्राशोकमोहसहतिर्लीयान
त्वप्रसादान्मयाप्रसादात्वदुपदेशादात्मज्ञानेनलब्धंसर्वसंशयानाशंतनन
याप्राप्तं अतः सर्वप्रतिबंधमुक्तोनात्मज्ञानेनमोहोनष्टःमयाक्षः देहब
मोहतृतिश्रुतःसर्वमेवभगवत्वार स्थितोस्मिगतसंदेहोनिहतसर्वसं
देहः स्थितोस्मि अहंकर्मैवानादिरूपेतत्त्वाससनेयावज्जीवंकरिष्येवच
नेनवभगवतः परमगुरोराज्ञांपालयिष्यामीतिप्रयासमाफल्यकथने

तंभगवंतमर्जुनःपरितोषयामास अनेनगीताशास्त्राध्यायिनो
भगवत्प्रसादात्स्वरूपमोक्षफलपर्यंतंज्ञानंभवतीतिशास्त्रफलमु।
पसंहृतंतद्धास्यविजहाविनिवर्त्त [illegible]
[illegible] ७३ ॥

सदानंदी टीका ॥

एवंश्रुतः कृतार्थत्वादुपदेशात्तपोबलात् आत्मनोमन्यमानःसउवा
चेदंसवार्जुनः १ मोहोज्ञाननिमित्तोयःसउक्तोविपर्ययः आत्म
नोनेकविषयासक्तिस्वतदेवगृहात् २ लब्धामयाच्युतश्रीमत्पा
दांभोजाश्रयेणवै यल्लाभात्सर्वग्रंथीनांविप्रमोक्षःस्वयंभवेत् ३ श्रु
तेनसर्वशास्त्रार्थविज्ञानफलमुत्तमं एतावदेवहरिणादर्शितंत्वा
ज्ञेनेनच ४ यदज्ञानजसंमोहनाशआत्मावबोधनात् निहतसंश
योस्म्युक्तंनवादिस्वकर्मणि ५ त्वत्कृपासनेस्थितस्त्वास्मियावज्जीव।
महंतवभगवद्वासुदेवस्यसद्गुरोर्वचनंसदा ६ करिष्येश्रीमदाज्ञाव
पालयिष्यामिसर्वदा पार्थःप्राप्तस्वसाफल्यकथनेनैवमाधवम् ७
संतोषयामासशिष्यवृत्तिंप्रदर्शयन् अनेनगीताशास्त्रस्याध्ये
तुर्भगवतोहरेःप्रसादान्मोक्षपर्यंतंज्ञानंस्यादितीरिते अनेनशा
स्त्रफलेसम्यग्ज्ञानंचोपसंहृतं ८ तत्वज्ञानेसमुत्पन्नेनष्टेज्ञाने
सकार्यके स्वरूपेवस्थितिंलब्ध्वाकृतकृत्योभवेद्बुधः ९ ततःपरं
नतस्यास्तिकृत्यंशास्त्रेनचलौकिके कृत्यहेतोरविद्यायाविनष्टत्वात्तु।
तथापितु ११ श्रीहरेःश्रीगुरोर्वेदमौलेश्चानुपालनं स्वभावादेवतत्प्रा
प्नोभवतीत्यपिसूचिते १२ यावदायुर्यथावेद्यावेदांतोगुरुरीश्वरः
भावाद्वैतेसदाकुर्यान्क्रियाद्वैतेनकर्हिचित् १३ अद्वैतंत्रिषुलोके
षुनाद्वैतंगुरुणासह इत्यादिवाक्यसिद्धोर्थोदर्शितोर्जुनेनवै १४ ७३

नीलकंठी टीका ७३

एवंश्रुतःस्वस्यकृतकृत्यतांज्ञापयन्नर्जुनउवाच नष्टोमोहइति।
मोहःसर्वोपिविपर्ययोपिनष्टः स्मृतिरयमहमस्मिपरंब्रह्मेत्यात्मा
त्वसंस्थानरूपात्मतत्वविषयालब्धा यस्यालाभेनसर्वहृदयग्रंथी
नांयावान्यश्चास्मितत्वतःइत्याद्युदाहृतानांविजडैकात्म्यप्रभवानांमो
नोभवति तथाचश्रूयते स्मृतिलंभेसर्वग्रंथीनांविप्रमोक्षइति त्वत्प्र

श्री॰ भी॰ टी॰ अ॰

330

सादान्मयाच्युत स्मृतिर्लब्धेति संबंधः स्थितोस्मि त्वच्छासने इति
शेषः गतसंदेहो नष्टसंदेह इत्यनेनात्मानात्मयाथीरूपो मोहो न
ष्ट इति दर्शितं करिष्ये वचनं तवेत्यनेन स्वधर्मेषु सुहृदेवाधर्मधीरूपो
पि मोहो नष्ट इति दर्शितम् ७३ ॥

आनंदी टीका १२

अथ प्रसन्नतरमर्जुन उवाच हे अच्युत मोहः अनात्मन्यात्मबुद्धिः
प्रथमाध्यायोक्तकश्मलहेतुः नष्टः त्वत्प्रसादात्परमार्थो दी पदेश
लक्षणात्त्वदनुग्रहात् स्मृतिर्लब्धा श्लोकपरमात्मस्वरूपानु
सन्धानं प्राप्तं अतएव गतसन्देहः स्थितोस्मि युद्धशास्त्रे अ
मयि युद्धमधर्मं मन्यमानो निरुत्साहो भवं स स प्रायोगन र
मर्थः तव परमेश्वरस्य वचनमनुलंघनीयस्वकर्मणो युद्ध
स्यानुष्ठानात्मकं निःश्रेयसप्राप्तिफलकं विधिं संपादयिष्या
मि ७३ ॥

+ अत्र प्रसन्नतरमर्जुन उवाच ॥

रामकंठी टीका १४

+ हे भगवन्नच्युत परब्रह्मस्वरूप स्वात्मैकनिष्ठेति विज्ञातैश्वर्यं
भगवन्तमच्युतेनाभिधानेनामन्त्र्याह त्वत्प्रसादात्परस्वरूपप्र
दर्शनलक्षणान्मम मोहो विनष्टः अनात्मन्यात्मप्रत्ययादि
रूपमज्ञानं प्रध्वस्तं यतः स्मृतिर्लब्धा सम्यगात्मानुस्मरणं प्राप्त
मतश्च गतसन्देहो निवृत्तसंशयः स्थितोस्मि युद्धशास्त्रे धर्ममध
धर्मत्वेन युद्धं प्रतिपद्यमानो निवृत्तोत्साहस्मासं स संशयो
विगलितः तत त्वद्वचनं यथोक्तज्ञाननिष्ठतया स्वकर्मानुष्ठा
नोपदेशात्मकं परब्रह्मसमापत्तिफलं वाक्यं कविष्य क्रियया
संपादयिष्यामीति [illegible]

७३

+ अत्र प्रसन्नतरमर्जुन उवाच ॥ लासिकी [illegible] टीका

+ हे अच्युत तवानुग्रहान्मोहो देहाद्यात्मप्रत्ययो नष्टः ध्वस्तः
स्मृतिरनुभूतस्यापि केनचिद्दैवमायेन विस्मृति पथमुपनीत

स्यात्मनोनुसंधानरूपा लब्धा अधुनागतसन्देहो नष्टदेहाहम्भा
वः स्थितोस्मि आत्मनि विश्रान्तोस्मि तववचने यथोक्तस्वात्मज्ञा
ननिष्ठतया युद्धलक्षणस्वधर्मानुष्ठानोपदेशात्मकं करिष्ये [illegible]
[illegible]
[illegible] ७३

पंचोली टीका

कृतकृत्यमर्जुन उवाच नष्टेति हे अच्युत मोहः अज्ञानजः समस्त
संसारानर्थहेतुः सागरस्वरूपस्त्वत्प्रसादान्नष्टः स्मृतिश्च आत्मनि
लब्धा यस्याः प्रसादात्सर्वग्रन्थीनो विप्रमोक्षः त्वत्प्रसादान्मयात्मा
मास्थितेन दासेन अनेन मोहनाशं अप्रपतिवचनेन सर्वशास्त्रार्थस्ता
नफलं एतावदेवेति निश्चितेन भवति परज्ञानसे मोहनाशः आत्मस्व
तिशतिलाभः ७३

रसावीरसमिद्धोधिनी॥

प्र३ प्रत्युत्तरमर्जुन उवाच नष्ट इति हे अच्युत परब्रह्मस्वरूप प्रतिज्ञा
नसर्वहितनिष्ठेति विज्ञाते स्वधर्मं भगवंतमवविनाभिधानेन सम्बो
ध्याद मयाहृदयग्रहमोहं धर्मे धर्ममेव प्रतिपत्तिरूपः कथमहंत्व
वन्यूक्तनिश्चय इत्येवं भीष्मादिबन्धुहत्याभिमानरूपश्च नष्टः स्मृतिः कोहं
किमर्थं च देहमास्थितः इत्येवमनुसन्धानलक्षणा लब्धा आगतः सन्देहः
वतहं धुहिंसने धर्म्यमधर्म्यं वेति निश्चयाभावो यस्य तथाविधः सन्
नववचनमाज्ञां करिष्ये संपादयिष्यामीत्यर्थः ७३॥

मधुभाष

भाषा अनुवाद टीका

तबतो भगवानकी वाणीसे परमकृतार्थ होय अर्जुन कहतेहै कि हे अच्युत
श्रीकृष्ण आपकी कृपासे अबमेरा आत्मज्ञानके विषय मे मोह नष्ट होगया
और स्मृति जो ज्ञान सो पाया और आत्मस्वरूपके अनुसंधान मे स्थिति भई अर्था
त् आत्मस्वरूपका ज्ञान प्रकाश भया और धर्मके विषय मे संदेह मेरे चित्तसे
चली गई ऐसा जो मैहूं सो अब आपकी आज्ञा प्रतिपालन करूंगा और यु
द्ध करनेके लिये तयार खडाहूं जो आज्ञा होय सो करूं यह अर्जुनने कहा ॥ ७३ ॥

दोहा

नष्ट मोह स्मृति लब्ध भइ तव कृपा अच्युत मोहि संदेह रहि
त हो स्थित भयो तो तव वचन करौं हि ॥ ७३ ॥

332

संजयउवाच इत्यहंवासुदेवस्यपार्थस्यचमहा। त्मनः संवादमिममश्रौषमद्भुतंरोमहर्षणं ७४

शांकरभाष्यटीका १

परिसमाप्तः सकलाम्नायशास्त्रार्थोऽथेदानीं कथासम्बन्धप्रदर्श नार्थं संजयउवाच इत्येवमहं वासुदेवस्य पार्थस्य च महात्मनः सं वादमिमं यथोक्तमश्रौषं श्रुतवानस्मि अद्भुतमत्यन्तविस्मयकरं रोम हर्षणं रोमांचकरं ७४ ॥

आनंदगिरिटीका २

शास्त्रार्थे समाप्ते समनन्तरमवस्थायां संजयवचनं उक्तोपक्रममिति त दाह परिसमाप्त इति वासुदेवस्य सर्वज्ञस्य सर्वेश्वरस्य कृतार्थस्य पार्थ स्य शिष्यात्मनस्यार्जुनस्य महात्मनोऽत्युद्बुद्धेः सर्वाधिकारिणस्स म्यक्त्वस्य सम्यग्वादे संवादं गुरुशिष्यभावेन प्रश्नप्रतिवचनाभिधान मिममनुक्रान्तमद्भुतं विस्मयकरं रोमाणि हर्षयन्ति पुलकाभवन्त्यनेने ति रोमहर्षणमाह्लादकरं यथोक्तं श्रुतवानस्मीत्याह इत्यहमिति ७४

स्वामिकृत टीका ३

+तदेवंधृतराष्ट्रंप्रतिश्रीकृष्णार्जुनसंवादं कथयित्वाप्रस्तुतांकथांअनुसंदधानः संजयउवाच इतीति ॥

+रोमहर्षणंरोमांचकरंसंवादं अश्रौषं श्रुतवानहं स्पष्टमन्यत् ७४ ॥

पिशाचभाष्यटीका ४

संजयउवाच व्यासोभगवान्कृष्णद्वैपायनइमंयथोक्तंपरंप्रकृष्टंप रमात्मविषयत्वाद्योगसम्पन्नत्वाद्योगेश्वराद्योगिनः तेषामीश्वरात्सा क्षात्स्वयमहंकथयतःस्वयंस्वमुखेन ७४ ॥

+धृतराष्ट्रायधृतपुत्राः पांडवाश्चयुद्धेइति कविष्यंतीति ॥

रामानुजभाष्य टीका ५ ॥

+संजयउवाच इतीति इत्येवंवासुदेवस्यवसुदेवसूनोः पार्थस्यचतत् पितृष्वसुः पुत्रस्यचमहात्मनोमहाबुद्धेः तत्पदद्वन्द्वमाश्रितस्यइमंरोमह र्षणमद्भुतंसंवादमहंयथोक्तंअश्रौषंश्रुतवानहं ७४ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थः ७४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा[illegible] टीका ७

तदेवंधृतराष्ट्रंप्रतिश्रीकृष्णार्जुनसंवादंकथयित्वाप्रस्तुतांकथामनु

श्री॰
गी॰टी॰
श्र॰

संदधानः संजयः प्राह इत्यहमिति अद्भुतमद्भुतं विस्मयकरं अतएव रोमहर्षणं रोमांचकरं संवादमश्रौषं श्रुतवानहं स्पष्टमन्यत् ७४ ॥

वनमाली टीका ८

अद्भुतं चेतसो विस्मयकरं लोके असंभाव्यमानत्वात् लोमहर्षणं शरीरे रोमांचाख्यविकारकरम् ७४ ॥

333

ऊरुमवैजयंती टीका ९ ॥

एवं शास्त्रं परिसमाप्याथ कथासंबंधमनुसंदधानः संजयोऽत्यन्ताद्भुतं वाचे त्याह इतीति इत्येवमुक्तप्रकारेण महात्मनो महानपरिमितः आत्मा स्वरूपगुणगणादिर्यस्य तस्य वासुदेवस्य वसुदेवपुत्रस्य च पुनर्महात्मनो महाबुद्धेः पार्थस्य तन्मित्रत्वतः पुत्रस्य तच्चरणाश्रितस्य इमं संजयव्यासकृपया अन्यत्र दर्शितत्वादद्भुतमिति निर्दिष्टं अद्भुतं चेतसो विस्मितकेवचनविशेषमश्रौषं यथोक्तमहं श्रुतवान् ७४ ॥

+समाप्तः शास्त्रार्थः कथासंबंधमिदानीमनुसंदधानः॥

मधुसूदनी टीका १०

+अद्भुतं चेतसो विस्मयाख्यविकारकरं लोके असंभाव्यमानत्वात् रोमहर्षणं शरीरस्य रोमांचाख्यविकारकरं तेनातिपरमाश्चर्यत्वं विस्मयस्य दर्शितं स्पष्टमन्यत् [illegible] ७४ ॥

सदानंदी टीका ११

शास्त्रार्थो यस्मान्मोऽथ कथासंबंधमनुसंदधानः इदानीं संजयः प्राह अत्यन्ताद्भुतं वेत्यादि १ इति शब्दः समाप्तौ स्याच्छास्त्रार्थस्येति तस्य च रोमांचनकरं विस्मापकतयाद्भुतं २ लोके संभाव्यमानत्वात् स्पष्टमन्यत् व्याख्यातः ३ ७४

नीलकंठी टीका १२

समाप्तः शास्त्रार्थः इदानीं कथाप्रबंधमेवानुवर्तयन् संजय उवाच इत्यादीनि अद्भुतं चेतसो विस्मयकरं रोमहर्षणं रोमांचोद्रेकजनकं शेषं स्पष्टम् ७४ ॥

आनंदी टीका १३

एवं श्रीकृष्णार्जुनसंवाद द्वारा परमात्मज्ञानमुपसंहरन्स्तत

कथाप्रसंगमनुसंधानः संजयउवाच स्पष्टम् ७४ ॥

रामकंठी टीका

७४॥ धृतराष्ट्रपरिपृष्टसैन्यसन्निवेशकथनप्रसंगे कृष्णार्जुनसंवादद्वारेण परमरहस्यज्ञानमर्थप्रकरणमिदं येन वप्रक्रांतं तत्परिसमाप्तं सउपसंहरति स एव संजयउवाच॥

स्पष्टार्थः श्लोकः ७४

लासिकी [illegible] टीका

तदेवं धृतराष्ट्रंप्रति श्रीकृष्णार्जुनसंवादं कथयित्वा प्रस्तुतां कथामनुसंदधानः संजय॥

उवाच — रोमहर्षणं रोमांचकरं संवादमश्रौषं श्रुतवानहं स्पष्टमन्य

त [illegible]

[illegible] ७४

पंचोली टीका

शास्त्रार्थपरिसमाप्तेः कथाप्रसंगमदर्शनार्थं धृतराष्ट्रंप्रति संजयउवाच इत्यहमिति अहं वासुदेवस्य च अस्य पार्थस्य महात्मनः इदं यथोक्तं संवादं अद्भुतं अत्यंतविस्मयकरं रोमहर्षणं अश्रौषं श्रुतवानस्मि ७४

रणवीरसमिद्बोधिनी

अथैवं धृतराष्ट्रंप्रति श्रीकृष्णार्जुनसंवादरूपं परमरहस्यमुप कम्य परिसमाप्तं तदुपसंहरति संजयउवाचेति व्यक्तार्थो यं श्लोकः ७४॥

मधुभाष्य

७४॥

334

भाषा अनुवाद टीका

सोई श्रीकृष्ण अर्जुन का संवाद राजा धृतराष्ट्र से संजय कहते हैं कि महात्मा वासुदेव श्री अर्जुन का यह अद्भुत संवाद रोवां खड़े करनेवाला मैंने जो सुना सो आपको कह सुनाई है ७४ ॥

दोहा

ऐसें मे श्रीकृष्णका अरु पार्थ महात्म को हि संवाद सुभगत
हि अद्भुत हर्ष महोय मोहि ७५

335

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहंपरं योगंयो
गेश्वरात्कृष्णात्साक्षात्कथयतःस्वयम् ७५

शांकरभाष्य टीका १

तंचेमं श्रीकृष्णः व्यासप्रसादात्ततोदिव्यचक्षुर्लाभात् श्रुतवान् ज्ञान
वानेतं संवादं गुह्यमहं परं योगं योगार्थत्वात् ग्रन्थोपि योगस्तं सम्बा
दमिमं योगेश्वरात् कृष्णात् साक्षात्कथयतःस्वयं नपरम्परया ७५ ॥

आनंदगिरिकृत टीका २

प्रकृष्टे संवादे कथमश्रौषीरिति चेत्तत्राह तंचेति एतत्पदं संवादपर
त्वात्तल्लिंगत्वेन नेतव्यमित्याह एतमिति परमपुरुषार्थौपयिकत्वात्
परत्वेपरं गुह्यमतिशयेन गुह्यं रहस्यमिति वा योगोक्तानं कस्मिंश्चनद
र्थत्वादयं सम्वादोयोग उक्तः अथवा चित्तवृत्तिनिरोधस्य योगस्याङ्ग
त्वादयं सम्वादयोगः इत्याह संवादमिति योगानामीश्वरो योगेश्वर
स्तदनुग्रहहेतुत्वाद्योगानतत्फलयोः ततः साक्षादव्यवधानेन श्रुतवा
न् न परम्परयेत्याह योगेश्वरादिति स्वयं स्वेन परमेश्वरेणातिरस्कृ
तज्ञानैश्वर्यरूपेणाकथयतो वाचकत्वादित्यर्थः ७५ ॥

स्वामिकृत टीका ३

आत्मनस्तत्त्वश्रवणे सम्भावनामाह व्यासइति भगवता व्यासेन दिव्यंच
क्षुः श्रोत्रादिमह्यंदत्तं अतो व्यासस्य प्रसादादेतदहं श्रुतवानस्मि किंत
दित्यपेक्षायामाह परंयोगमिति यत्स्वमाविष्करोति योगेश्वरादिति
श्रीकृष्णात्स्वयमेव साक्षात्कथयतः श्रुतवानिति ७५ ॥

पिशाचभाष्य टीका ४

॥ ॥ ॥ ॥ ॥ ॥ ॥
स्पष्टार्थं ७५ ॥

रामानुजभाष्य टीका ५

व्यासेति व्यासप्रसादात्व्यासानुग्रहेण दिव्यचक्षुःश्रोत्रलाभात् प
रंयोगंयोगेश्वरात्ज्ञानबलैश्वर्यवीर्यशक्तितेजसांनिधेर्भगवतःकृ
ष्णात्स्वयमेवकथयतःसाक्षाच्छ्रुतवानहं ७५ ॥

अभिनवगुप्तकृत टीका ६

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
स्पष्टार्थम् ७५ ॥

श्री
गीती
श्र०

336

परमार्थप्रपा टीका ७

अथात्मन ईदृशश्रवणे संभावनामाह व्यासेति मत्स्येव व्यासप्रसादेन भग
वता व्यासेन मह्यं लौकिकशक्तिमनुष्यः श्रवणादिके दत्ते तेनाहं श्रु
तवानस्मि किं तदित्याह परं योगं परमं गुह्यं योगेश्वराच्छ्रीकृष्णात्स्व
यं स्वरूपं स्वयमेव साक्षात् अर्जुनं प्रति कथयतः श्रुतवान् तदुक्तं
महाभारते भीष्मपर्वणि संजयो धृतराष्ट्रं प्रति नमस्तस्मै भगवते व्यासाय पारा
शर्याय धीमते यस्य प्रसादाद्दिव्यं मे प्राप्तं विज्ञानमुत्तमम् दृष्टिश्चातीन्द्रिया
राजन् दूराच्छ्रवणमेव हि परचित्तस्य विज्ञानमतीतानागतस्य च व्युत्थानोत्प
त्तिविज्ञानमाकाशे च गतिं सदा शस्त्रैरसङ्गो युद्धेषु वरदानान्महात्मनः श्र
मत्तेयं मया हृष्टं दृष्टं योगबलेन च शृणु तन्मे पृथिवीपाल मा च शोके मनः
कृथाः ७५ ॥

वनमाली टीका ८

एवं यथा तेनापि तच्छ्रवणं तस्य योग्यमाह व्यासेति श्रीवेदव्यासमहर्षिदिव्यचक्षुःश्रो
त्रादिरूपो व्यासप्रसादेन तत्परं गुह्यं योगं योगाख्यमभिचारिहेतुं संवादं योगे
श्वरात्कृष्णात्स्वयमेव परमेश्वरेण कथयतो न तु मन्वादिद्वारा साक्षादे
वाहं श्रुतवानस्मि न परंपरयेति स्वभाग्यमभिनन्दति ७५ ॥

ज्ञानमवैजयन्ती टीका ९

ननु वासुदेवार्जुनयोः संवादो गुह्यतमः स त्वया कथं श्रुत इत्यपेक्षायां देशा
दिभिर्व्यवहितस्यापि गुह्यतमस्यापि तत्संवादस्य श्रवणे स्वयोग्यत्वमाह
व्यासेति व्यासप्रसादात् व्यासेन ग्रहानदृष्टादि दिव्यचक्षुः श्रोत्रादिलाभरूपा
देतं गुह्यमतिरहस्यं परं सर्वोत्कृष्टं योगं कर्मयोगं ज्ञानयोगं भक्तियोगं च
एतत्कर्मयोगं गुह्यं ज्ञानयोगं परं ब्रह्मज्ञानाभ्यासपरिपाके भक्तियोगं परत्वेन
वसंवादनियोगेश्वरात् ज्ञानैश्वर्यतेजोबलवीर्यशक्त्यादीनां निधेः यद्वा
कर्मज्ञानभक्तियोगानामीश्वरान्नियन्तुः साक्षात्स्वयमेव न तु नारदादि
परंपरया कथयतो श्रुतवानस्मि स्वयं रूपात् कस्मात् व्यासविदानेदं स्वरूपादं प्रति लो
जातो शास्त्रविदो भीष्मादीनामेतच्छ्रवणं महाकुलप्रसूतानामनन्तलोम
मतयतत्रूपयेव नास्मिन् पिकारोऽपिकारो लिप्यन्तिलोमजस्य
तोयमोऽस्मीति सूचितम् ७५ ॥

व्यवहितस्यापि भगवदर्जुनसंवादस्य श्रवणे स्वयोग्यतामात्मन आह— मधुसूदनी टीका १०

व्यासदत्तदिव्यचक्षुःश्रोत्रादिलाभरूपात् व्यासप्रसादात् इमं परं गुह्यं योगं।

योगाव्यभिचारिहेतुंसंवादंयोगेश्वरात्कृष्णात्स्वयंस्वनपारम्पर्येणानुपा
कथ्यमानः साक्षाद्देवाहंश्रुतवानस्मि नपारंपर्येणेति स्वभाग्यमभिनंदति एवमे
मितिसंलिंगपाठोभाष्यकारैर्व्याख्यातः एतदितिनपुंसकलिंगपाठस्त्वेव
योगशास्त्रसामानाधिकरण्येन व्याख्यानमिदमिति तद्व्याख्यातारः ७५ ॥

सदानंदी टीका ११

हरेरीशस्थितस्यापि संवादस्य तयोर्द्वयोः श्रवणेयोग्यतामाहस्वात्मनः संजयो
भृता १ चक्षुः श्रोत्रादिकरणं दिव्यं व्यासेनवेधसा प्रदत्तं संजयायादौ युद्धारं
भेयतस्ततः २ व्यासप्रसादतो गुह्यं संवादं योगसाधनं स्वयंसेनेश्रवणेनैव
रूपेणामेतनेजसा ३ साक्षात्कथयतो हंवैश्रुतवानस्मिनान्यतः इतिह
र्षितमेप्यातः स्वभाग्यमभिनंदते ४ संजयोवेमहोभाग्यमदीयपरमेश्व
रात् योगेश्वराद्भगवतः श्रीकृष्णाच्छ्रुतवानहम् ५ ७५ ॥

नीलकंठी टीका १२

कथमयं त्वयाहृस्थयोरपि वासुदेवार्जुनयोः संवादः श्रुतइत्यतआह व्या
सप्रसादादिति भगवता व्यासेन दिव्यं चक्षुः श्रोत्रादिकंमह्यं दत्तं येनाहंव्य
वहितेविप्रकृष्टेवा सर्वं करतलामलकवद्विजानामि एतोव्यासप्रसादादे
तद्गुह्यं परं गुह्यं योगंअहंश्रुतवान् योगंचपश्यमेयोगमैश्वरमिति श्रुति
त्वा सर्वैकप्रदर्शितेवेश्वरूपं तमपि दृष्टवानिति शेषः स्वयंकथयतइत्युक्ते
गुरुमहतो भूतस्यानिःश्वसितमेतद्यदृग्वेद इति श्रुतेः स्वनिःश्वसितं वेदं
शिष्याचार्यपरंपरया कथयत इत्यायाति तदर्थं साक्षात्कथयत इतिस्व
स्यादौ वचनात्प्रतीयते इदानीमर्जुनंप्रतिसाक्षात्कथयतः श्रुतवानहमि
त्यर्थः तेनभगवदनुग्रहपात्रतया ब्रह्मणा समत्वेनस्वस्य योग्यतेने एवमेतद्यो।
गमित्यभेदेनान्वयेन गुह्यपदापेक्षया एतद्योगमिति नपुंसकलिंगयो।
रपिसामानाधिकरण्ये शंकाच यत्किंचिदस्मत्पितृ उपदेशं तमिमादाविवस्व
विप्रकृतलिंगसंस्कारप्राबल्यादुत्तरत्रभिन्नलिंगविशेष्यलाभेपि सर्वसंस्का
शेननिवर्तितइति सामानाधिकरण्येपि विलिंगयोरपि वक्तुं शक्यमिति ज्ञेयं ७५

आनंदी टीका १३

योगंय
श्रुतवानस्य परमार्थरहस्यस्य श्रवणेधिकारप्राप्तिमाह
अद्भुतस्यास्य परमार्थरहस्यस्य श्रवणेधिकारप्राप्तिमाह योगंय
थावस्थितिपादितत्तानन्निष्ठतया स्वकर्मानुष्ठानलक्षणं विमनिरो

श्री॰ गी॰ टी॰ अ॰

३३७

द्यो

यल्लक्षणं चार्जुनं प्रति कथयतः साक्षा[illegible]गेश्वराद्योगस्यास्य हि वि
धस्येश्वरात्प्रवर्तकात्कृष्णादेतं [illegible]ह्यमहं स्वयमात्मनैव श्रुतवानस्मी
त्यन्वयः ७५ ॥

रामकंठी टीका ४९

इत्थमाश्चर्यभूतपरमरहस्यश्रवणे कृतस्त्वाकारणमाह एतदसंतरह
स्यं भगवतो यदुकुलावतीर्णात्कृष्णाभिधानात्परमेश्वरात्स्वयं तादृ
न योगिना योगिनः सहजसिद्धनिरतिशयसमाधेः स्वयमात्मनैव
साक्षादव्यवधानेन योगं यथाप्रतिपादितज्ञाननिष्ठतया स्वकर्मानु
ष्ठानलक्षणं निरतिशयं समाधिमर्जुनायोपदिशतोऽहमस्मि एवं
कृतोऽहं नो व्यासप्रसादाद्भगवत्कृष्णद्वैपायनानुग्रहात् तेन हित
स्येताहृशं ह्योगश्रवणं परमेश्वररूपदर्शनादियोग्यताधानाय
दिव्यं ज्ञानमयं चक्षुर्वितीर्णमित्यत्र तदित्यादिपदानां सामानाधिक
मविवक्षया नपुंसकत्वं वाक्यस्य विशेषाभिधानपर्यवसितत्वाद्यो
गशब्दः पुंस्त्वेवार्थकः योगं कर्मयोगाख्यं समाधिं कथयतो भगव
तः एतत्करणं गुह्यतरमहं श्रुतवानित्याख्येयम् अन्तयवाह
७५ ॥

लासिकी [illegible] टीका

व्यवहितस्यापि भगवदर्जुनसंवादस्य श्रवणयोग्यतामात्मन आह ॥

व्यासमहर्षेर्दिव्यचक्षुः श्रोत्रादिदानरूपात्प्रसादादेतत्परमर
हस्यमहं श्रुतवानस्मि किं तदित्यपेक्षायामाह परं निरतिशयं यो
गं कर्मानुष्ठानेऽप्यात्मसमाधानरूपं कस्माच्छ्रुतवानित्याह यदु
कुलावतीर्णात्कृष्णात्परमेश्वरात्कृष्णाभिधानाद्योगेश्वराद्योगदा
शकात् स्वयमेवात्मनैव साक्षादव्यवधानेन कथयतोऽर्जुनायोप
दिशतः केचित्साक्षादेवाहं श्रुतवानस्मि न परम्परयेति व्याचक्षते
इमामिति पुंलिंगपाठमप्याहुः [illegible] ७५

पंचोली टीका

ग्रात्मनः तत् श्रवणे संभावनमाह व्यासेति अहं परमं गुह्यं यो
गं योगार्थत्वात् योगं संवादं योगेश्वरात् कृष्णात् साक्षात् कथ
यतः न परंपरातः व्यासप्रसादात् तत् दिव्यचक्षुर्लाभात् श्रुतवान्
अस्मि ७५

रत्नवीरसमिद्बोधिनी

ननु ईदृशपरमरहस्य श्रवणे कः तवाधिकारः इत्यत आह व्यास
प्रसादादिति व्यासस्य कृष्णद्वैपायनस्य प्रसादो मदबोधनार्थमा
दृशापरमात्मव्यवहारावलोकनसमर्थदिव्यचक्षुर्वितरणरूप
स्तस्माद्धेतोरेतदुक्तलक्षणं परमं गुह्यं रहस्यं योगिनां यथा प्रतिपा
दितलक्षणोभयविधयोगानुष्ठानासीष्वापादयीषितः श्रीकृष्णा
त्साक्षादहं श्रुतवानस्मि कथंभूतात् कृष्णात् स्वयमात्मनैव सा
क्षाद्व्यवधानेनार्जुनं प्रतियोगं स्वधर्मानुष्ठानलक्षणं कथयतः
प्रतिपादयत इत्यर्थः ७५॥

मधुभाष

७५॥

338

भाषा अनुवाद टीका

अब संजय यह वृत्तान्त अपने श्रवण करने का समाचार कहते हैं कि भगवान व्यासदेव ने हमको दिव्य चक्षु श्रोत्र दिया है कि उनकी कृपा से परम योगरूप जो परम गुह्य अर्जुन के प्रति साक्षात् योगमाया के ईश्वर श्रीकृष्ण ने आप कहा सो मैंने श्रवण किया और आपसे कहा ७५ ॥

दोहा

व्यास प्रसाद सें श्रवण हों परम गुह्य यह योग योगेश्वर श्रीकृष्ण
ने जो आप कह्यो यह लोग ७५ ॥

339

राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतं केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ७६

शांकरभाष्य टीका १

हे राजन् धृतराष्ट्र संस्मृत्य संस्मृत्य संवादमिममद्भुतं केशवार्जुनयोः
पुण्यं श्रवणादपि पापहरं श्रुत्वा हृष्यामि च मुहुर्मुहुः प्रतिक्षणं ७६

आनन्दगिरिकृत टीका २

यथोक्ते संवादे भगवतः श्रुत्वा किमपेक्षसे नेत्याह राजन्निति पु
ण्यत्वं साधयति श्रवणादपीति ७६ ॥

स्वामिकृत टीका ३

किंच राजन्निति हृष्यामि रोमांचितो भवामि हर्षं प्राप्नोमीति वा स्पष्ट
मन्यत् किंच तत्रेति विस्मयं निर्दिशति स्पष्टमन्यत् ७६ ॥

पिशाचभाष्य टीका ४

संस्मृत्य पुण्यं पापहरं हृष्यामि च तत्र मोदामि च मुहुर्मुहुः भूयो भूयः ७६

रामानुजभाष्य टीका ५

राजन्निति केशवार्जुनयोरिमं पुण्यमद्भुतं संवादं साक्षाच्छ्रुतं स्मृत्वा मु
हुर्मुहुर्हृष्यामि ७६ ॥

अभिनवगुप्तकृत टीका ६

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्पष्टार्थम् ७६ ॥ ॥ ॥ ॥

परमार्थप्रपा[illegible] टीका ७

अस्य व्यासप्रसादसामर्थ्यमेवानुवदति राजन्निति राजन् धृतराष्ट्र मम
मद्भुतं केशवार्जुनयोः संवादं संस्मृत्य सकृच्छ्रवणमपि स्मरणात्पुण्यं
श्रुत्वा पुनर्यथावत्संस्मृत्य ममचित्ते निष्ठत्वो योगगीतार्थसंग्रहत्वेन हृष्यामि
मि संरोमांचितो भवामि एतावतैवं कृतार्थोस्मीति हर्षं प्राप्नोमि ७६ ॥ कृत

वनमाली टीका ८

श्रवणं पुण्यं श्रुतमात्रं सर्वपापहरं केशवार्जुनयोरिमं संवादमद्भुतं तं केव
ले श्रुतवानस्मि किंतु संस्मृत्य संस्मृत्य मे हि स किं मुहुर्मुहुर्वारं
वारं हृष्यामि हर्षं प्राप्नोमि [illegible] रोमांचितो भवामीति वा ७६ ॥

ऊरुसमवेजयंती टीका ९

संवादस्मरणस्यातिशयमाह राजन्निति हे राजन् धृतराष्ट्र के
शवार्जुनयोः पुण्यं भगवत्स्वरूपावेदकत्वेनातिपवित्रं यद्वा श्रोतृवर्गविघा।
पर्यन्ताखिलदोषनाशकत्वेनाध्यात्मादिजन्ममरणादिसांसारिकदुः
खविनाशकत्वेन संचितक्रियमाणकर्मबाधकत्वेन च जीवस्य शुद्धिकरं शु
द्धिप्रकृतिसंबंधमोचकत्वेन मोक्षप्रापकत्वेनात्मसुखरूपमिमं सं
वादं समकृवादकथनं संस्मृत्य संस्मृत्य सादाश्चर्यं तस्य तस्य स्मरणाच्च पुन
र्मुहुर्मुहुर्वारंवारं प्रतिक्षणं हृष्यामि रोमांचितोऽस्मि ७६ ॥

मधुसूदनी टीका १०

पुण्यं श्रवणेनापि सर्वपापहरं केशवार्जुनयोरिमं संवादमद्भुतं के
वलं श्रुतवानस्मि किं तु संस्मृत्य संस्मृत्य संभ्रमे द्विरुक्तिः मुहुर्मुहुः
वारंवारं हृष्यामि च हर्षेण रोमांचितो प्रतिक्षणं रोमांचितो भवामीति वा
॥

सदानंदी टीका ११

पुण्यं श्रवणमात्रेण सर्वपापहरं शुभं कश्यप प्रजापतिः प्रोक्तः शिवः श्री
शंकरः स्मृतः १ तयोरपि पिता वपिः स्वामी चात्मनि केशवः तदुक्तं ह
रिवंशे श्रीशंभुना केशवेति कः इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनां आ
वां तवांगसंभूतौ तस्मात् केशवनामवान् २ शुद्धसंपत्समाश्रयः
सहितयापि कृतोऽर्जुनः संवादो यत्र ययोः सोऽत्र तमिमं परमाद्भुतं ४ न
केवलमहं समवक्षनवानस्मि विस्मयात् किं तु संस्मृत्य संस्मृत्य द्वि
रुक्तिः संभ्रमे ५ वारंवारं परं हर्षितः भवामो मिश्रतिक्षणं रोमांचि
तो भवामीह मामोहं विस्मयावशं ६ ॥ ७६ ॥

नीलकंठी टीका १२

केशवार्जुनसंवादश्रवणाजे विश्वरूपाद्युपयोगदर्शनजे चाह्लादं क्रमे
ण श्लोकद्वयेनाह राजन्निति हे राजन् हे धृतराष्ट्र पुण्यं पुण्यकरं पा
पहरं च तथा तत् संस्मृत्य संस्मृत्येति संभ्रमे द्विरुक्तिः शेषं स्पष्टार्थं
॥ ७६ आनंदीटीका १३

स्पष्टार्थ श्लोकः ॥

स्पष्टार्थम् ७६ ॥

लासिवी[illegible]टीका

किंच हे राजन् धृतराष्ट्र केशवार्जुनयोः पुण्यं पापहरमिमम् अत्यद्भुतं
संवादं संस्मृत्य संस्मृत्य वारंवारं हृष्यामि रोमाञ्चितो भवामि
हर्षं प्राप्नोमीति वा [illegible] ७६

पंवोलीटीका

किंच राजन्निति हे राजन् धृतराष्ट्र केशवार्जुनयोरिमम् अद्भुतं वि
स्मयकारि पुण्यं श्रवणेनापि पापहरं संवादं संस्मृत्य संस्मृत्य मुहु
र्मुहुर्वारंवारं हृष्यामि रोमाञ्चितो भवामि हर्षं प्राप्नोमि च ७६

रणवीरसमिद्धोधिनी

ऋतपवराजन्निति हे राजन् धृतराष्ट्र केशवार्जुनयोरिमं पुण्य
मद्भुतं संवादमतिप्रायेण वारंवारं सम्यक्स्मृत्वा हृष्यामि ह
र्षं प्राप्नोमि रोमाञ्चितो भवामीत्यर्थः ७६ ॥
[illegible]

मधुभाष्य

७६ ॥

341

भाषा अनुवादटीका

सोहे महाराज धृतराष्ट्र यह परम पवित्र केशव श्री अर्जुन का अद्भु
त संवाद स्मरण करके मैं वारंवार हर्षित होता हूं अथवा वारंवार
मेरे रोम खड़े होतेहैं ७६ ॥

दोहा

सिमर सिमर के हे राजन अर्जुन यह संवाद अद्भुत केशव
पार्थको पुनपुन होहिं अह्लाद ७८॥

342

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः विस्म
यो मे महान् राजन् हृष्यामि च पुनः पुनः ७७ ॥

शांकरभाष्य टीका १

तच्च संस्मृत्य रूपमत्यद्भुतं हरेर्विश्वरूपं विस्मयो मे महान् हे राजन्
हृष्यामि च पुनः पुनः ७७ ॥

आनंदगिरि टीका २

यत्तु विश्वरूपाख्यं रूपं भगवानर्जुनाय भगवान् दर्शितवान् ध्या
नार्थं तदिदानीं स्तौति तच्चेति ७७ ॥

स्वामिकृत टीका ३

पुनस्तत्पुत्राणां राज्यादिशंकां परिमार्जयन्नाशयेनाह यत्रेति यत्र येषां प
क्षे योगमायेश्वरः श्रीकृष्णो वर्तते ७७ ॥

पिशाचभाष्य टीका ४

तच्च रूपं विग्रहमत्यद्भुतं हरेर्नारायणस्य विस्मयः जातः हृष्ले ७७ ॥

रामानुजभाष्य टीका ५

तदिति अर्जुनाय प्रकाशितमैश्वरं हरेरत्यद्भुतं रूपं मया साक्षात्कृतं तत्स
स्मृत्य हृष्यतो मे महान् विस्मयो जायते पुनः पुनश्च हृष्यामि किं बहुनो
क्तेन ७७ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ७७ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा[illegible] टीका ७

किंच तच्चेति तच्च अत्यद्भुतं हरेः स्वरूपं विश्वरूपं भगवद्वाक्यैः श्रुतं त
च्च दृष्टं तथा विषयमपि ययममत्तरतः संस्मृत्य पुनर्यथातथ्यं संस्मरणमे
व महान् विस्मयो भवति अहो कथमर्जुनस्य भाग्यं यद्दैवैरपि दुर्लभम
साकारपरमात्मनः सम[illegible]रूपेण साक्षात्कृतवान् तथा सकलागमा
गोचरोऽपि परमात्माहं ययापारमार्थिकस्वरूपं दर्शितवानिति ।
मविस्मयत्वेनाद्भुतमस्याविर्भावेन रोमहर्षपुलकितः सात्त्विकीयकशाली
पुनः पुनर्भवामीत्यर्थः ७७ ॥

वनमाली टीका ८

तच्चविश्वरूपं हे राजन् स्मरतः महान् विस्मयो न एव च हृष्यामि सहसमन ७७

श्री
गीटी
४

343

कसमेवैजयंती टीका ९

भगवतो विश्वरूपं स्मृत्वाह तच्चेति हरे रर्जुनशोकमोहहर्त्तुरीति ही
स्तथा भगवतः सर्वैश्वर्यस्य जगदभिन्ननिमित्तोपादानकारणस्य चि
दचिदात्मकजगदभिन्नस्वरूपस्य केशवशेषाशेषसुरवंदितचरण
कमलस्य देवकीपुत्रस्य पार्थसारथेः च पुनस्तत् यत्पार्थायोपदर्शि
तं रूपं सर्वविश्वमयमैश्वरमत्यद्भुतमलौकिकं तेनासाधारणं संस्मृ
त्य संस्मृत्य पुनः पुनः प्रतिक्षणं संस्मृत्य संस्मृत्याह हे महाराज मे हृदयस्य मम वि
स्मयो हो किमेतदाश्चर्यमिति विकितचित्ते जायते च पुनः हे पुनः पुनर्वी
रे वारं हृष्यामि निरतिशयानंदेन पुलकितोऽहं भवामि ॥ ७७ ॥

+यदि विश्वरूपाख्यं सगुणं रूपमर्जुनाय यथार्थं भग
वान्दर्शयामास तदिदानीम नुस्मरन्नाह ॥

मधुसूदनी टीका १०

+तदिति विश्वरूपं हे राजन्मम महान्विस्मयः अत एव हृष्यामि चाहं
स्पष्टमन्यत् [illegible]

सदानंदी टीका ११

यत्सर्वं विश्वरूपाख्यं सगुणं रूपमद्भुतं अर्जुनाय हरिः साक्षाद्दर्शयामा
स सर्ववित् १ आश्चर्यमेतद्याच्चः स विदानी ध्येयमेश्वरं तच्चेति वि
श्वरूपं भो राजन् संस्मृत्य चेतसा २ स्मारं स्मारं महान्नास्ति विस्मयो मे
पुनः पुनः अत एव महाभाग्य फलेहर्षगतोस्म्यहं ३ ७७ ॥

नीलकंठी टीका १२ ॥

तच्चेति रूपं विश्वरूपं पत्रदर्शनेऽपि बलाणामीश मिति देशतो विश्वरूपं
वक्राणि तेन समाणाविशतीति कालतो भवहिते भीष्मादिनां पंचकर त
लामलकवद्दृष्टवान् तच्च जगतो मिथ्यात्वमनेरणा नसंभवतीतिप्रति
पादितं वेदांतकतके अनीतानागते वस्तवीदतेकरबिल्ववत् यो
गी संकल्पमात्रेण मिनिशास्त्रे श्रुतिस्मिः १ मायापास वेदाः सर्वे सर्व
भयरिणामाः संस्मेन रूपेण यतः सत् अतीतानागते वस्तयोगी तदीक्षि
तोकथं ३ संकल्पमात्रभाते वस्तु नीतादि यदीक्षते तत्स्यायोगिज्ञानमप्रमा ४
योगिसंकल्पमात्रेणानखान्यतिरिक्षते नहस्ती दर्शनाभे
देशसंकल्पमात्रेण सर्वीयतितद्देष्यता ५ आरंभे परिणामेवादेशका
लायतिक्रमः नेवदृष्टः क्वचित्सोपि समायादिष्वदृष्टः ६ अगापद्रूप

नेऽजं भो नानादेशस्थयोगिभिः जलसर्पवत्वासनाभिक्लेनासौ कल्पि
तः स्फुटे ७ योगिभिर्दिव्यमाणत्वाद्रहः सर्वत्र सर्वदा सत्त्वेवासीति
चेत्कार्यं कथमीदृग्विधं भवेत् ८ याहन्तेहीष्यते कार्यं ग्रुणपञ्चिवदे
शतां चेत्कल्पनो विना स्पष्टादृष्टान्तस्तत्र नास्ति वः ९ तस्मात्त्राणाभि
रारब्धमिति वक्त्रापि गावत्वत् प्रकृतेः परिणामो वा जगत्किं विद्यजा
लवत् १० सम्यग्दृष्टशामिंद्रजाले विष्णुपराकृदृष्टो अधिष्ठानाद्देतस्य
हृदृष्टोनास्त्येव तद्वयमिति ११ स्पष्टार्थो मूलश्लोकः ७७ ॥

आनंदी टीका १३

स्पष्टार्थम् ७७ ॥

रामकंठी टीका १४

निगदव्याख्यातो श्लोको [illegible]
[illegible]
[illegible] ७७ ॥

लासिकी [illegible] टीका

किंच तच्चेति विश्वरूपं निर्दिशति स्पष्टमन्यत [illegible]
[illegible]
[illegible] ॥

पंचोली टीका

किंच तच्चसंस्मृत्य संस्मृत्य रूपमिति च पुनः हे राजन् हरेर्नीरा
यणस्य विश्वरूपमद्भुतं देवानामपि विस्मयकरं स्मृत्वा स्मृत्वा
मे मम विस्मयो वर्तते वर्धते पुनः हृष्यामि हर्षं विस्मयं चाप्राप्नो
मि ॥

रणवीर समिद्योतिनी

किंच तच्चेति निगदव्याख्यातमेतत् ७७ ॥

मधुमाघ

७७॥

344

भाषा अनुवाद टीका ॥

औ तत् शब्द से भगवान के विश्वरूप का निर्देश करते अर्थात् कह
ते हैं कि हे महाराज हरि श्रीकृष्ण के उस अद्भुत विश्वरूप का स्मर
ण कर कर के हमको अत्यन्त विस्मय होती है अर्थात् आश्चर्य हो
ता है और बारंबार रोमांच होता है ७७ ॥

दोहा

सिमर सिमर के तेहि कों रूप अद्भुत हरि को हि महाराज मोहि
विस्मय पुनपुन हर्ष हि होहि ७७॥

345

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः तत्र श्री
र्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ७८ इति श्री
महाभारते शतसाहस्र्यां संहितायां वैयासि
क्यां भीष्मपर्वणि श्रीभगवद्गीतासूपनिषत्सु ब्रह्म
विद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मो
क्षसंन्यासयोगो नामाष्टादशोऽध्यायः १८ ॥ ॥

शांकरभाष्यटीका १

किं बहुना यत्र यस्मिन् पक्षे योगेश्वरः सर्वयोगानामीश्वरस्तत्प्रभ
वत्वात् सर्वयोगबीजस्य कृष्णो यत्र पार्थो यस्मिन् पक्षे धनुर्धरो गा
ण्डीवधन्वा तत्र श्रीस्तस्मिन् पाण्डवानां पक्षे विजयस्तत्रैव भूतिः श्रि
यो विशेषविस्तरो भूतिर्ध्रुवाऽव्यभिचारिणी नीतिर्नय इत्येवं मतिर्मम
ति ७८ इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजका
चार्यस्य श्रीमच्छंकरभगवतः कृतौ गीताभाष्येऽष्टादशोऽध्यायः १८ ॥

श्रीधरस्वामिकृत टीका २

द्वयोरपि कृष्णार्जुनयोः नरनारायणयोः संवादस्य प्रामाण्यार्थं परमक
घं दर्शयति किं बहुनेति कथं सर्वेषां योगानामीश्वरो भगवानिति तदाह
तत्प्रभवत्वादिति सर्वयोगो ज्ञानं कर्मैव तस्य बीजं शास्त्रीयं ज्ञानं वैरा
ग्यादि तद्धि भगवदधीनं तदनुग्रहविहीनस्य तदयोगादतो योगतत्फल
योर्भगवदनुग्रहायत्तत्वाद्भगवतो योगेश्वरत्वमित्यर्थः श्रीर्लक्ष्मीर्विजयः
परमुत्कर्षः राज्ञोऽप्यनारुह्य स्वपुत्रेषु विजयाशां शिथिलीकृत्य पाण्डवे
षु जयप्राप्तिमैकान्तिकीमुपसंहरति इत्येवमिति उपायोपेयभावेन निष्ठा
द्वयस्य प्रतिष्ठापितत्वात् कर्मनिष्ठापरंपरया ज्ञाननिष्ठाहेतुः ज्ञाननिष्ठा
तु साक्षादेव मोक्षहेतुरिति शास्त्रार्थमुपसंहरतीति तत्र कं काण्डत्रया
त्मके शास्त्रे पदवाक्यार्थगोचरे आदिमध्यान्तषट्केषु व्याख्यागोचरी
कृते संक्षेपविस्तराभ्यां योऽलक्षणैरुपपादितः सोऽर्थोऽन्तिमेन संक्षि
प्य लक्षणो न विवक्षितः गीताशास्त्रमहार्णवोऽस्य मम्रतं वैकुण्ठक।

श्री. गी टी प्र.

एवोक्तं श्रीकण्ठापरनामवक्त्राविष्कृते निष्ठास्वयोतितेन निष्ठायत्रम
ति प्रसादजननी साक्षात् कृते ऊर्वनी मोक्षे पर्यवसास्यति इति दिङ्
सेवय्यमेतद्बुधाः प्राचामाचार्यपादानां पदवीमवगाह्यता गीताभा
ष्ये कृता टीका टीकेयं पुरुषोत्तमे ७८॥ इति श्रीमत्परमहंसपरिव्रा
जकाचार्यशुद्धानन्दपूज्यपादशिष्यभगवदानन्दगिरिविरचिते श्री
गीताभाष्यविवेचनेऽष्टादशोऽध्यायः १८ ॥

स्वामिकृतटीका २ ॥

यत्र च पार्थो योगेश्वरश्च हरिः तत्रैव श्रीः राज्यलक्ष्मीः तत्रैव च विजयः तत्रै
व च विभूतिः उत्तरोत्तराभिवृद्धिश्च नीतिर्नयोपि तत्रैव ध्रुवा निश्चितेति स
र्वत्र संबध्यते इति मे मतिर्निश्चयः अत इदानीमपि सपुत्रस्त्वं श्रीकृ
ष्णं शरणमुपेत्य पाण्डवानुसारेण सर्वस्वं तेभ्यो निवेदय पुत्रप्राणरक्षणं कुर्वि
त्यर्थः ७८ भगवद्भक्तियुक्तस्य तत्प्रसादात्मबोधतः सुखं बन्धविमुक्तिः २०
स्यादिति गीतार्थसंग्रहः तथाहि पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्य
या भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुनेत्यादौ भगवद्भक्तेर्मोक्षं प्रति
साधकत्वश्रवणात् तदेकान्तभक्तिरेव तत्प्रसादोत्थज्ञानावान्तरव्या
पारा मोक्षहेतुरिति स्फुटं प्रतीयते ज्ञानस्य च भक्त्यवान्तरव्यापार
त्वमेवोक्तं तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं
तं येन मामुपयान्ति ते मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते इत्यादि
नच ज्ञानमेव भक्तिरित्युक्तं समः सर्वेषु भूतेषु मद्भक्तिं लभते परां भक्त्या
मामभिजानाति यावान्यश्चास्मि तत्त्वतः इत्यादौ भेदेन निर्देशात् नचैवं सति
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय इत्यादिश्रुतिविरो
धः शोकनीयः भक्त्यवान्तरव्यापारत्वाज्ज्ञानस्य नहि काष्ठैः पचतीत्युक्ते
ज्वालानामसाधनत्वमुक्तं भवति यस्य देवे परा भक्तिर्यथा देवे तथा गु
रौ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः देहान्ते देवः परं ब्रह्म ता
रकं व्याचष्टे यमेवैष वृणुते तेन लभ्य इत्यादिश्रुतिस्मृतिपुराणवचना
न्येवं सति समञ्जसानि भवन्ति तस्माद्भक्तिरेव मोक्षहेतुरिति सिद्धं तेनैव
दनयाममानन्दगीताविहृतिः कृता सपदपरमानन्दतया
परमानन्दपादाब्जरजः श्रीधरभिक्षुणा श्रीधरस्वामियतिना कृता गी
तासुबोधिनी स्वप्रागल्भ्यबलाद्धितोऽपि भगवद्गीतासु तदेतद्गीतं तन्नवेय

हृष्येति किं गुरुकृपापीयूषदृष्टिं विना श्रुतस्वांजलिना निरस्य ज
लधेरादित्सुरेव नमग्नो नावर्तेषु न किं निमज्जति जनः सत्कर्णधा
रेविना ॥७८॥ इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैया
सिक्यां भीष्मपर्वणि श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्या
यां योगशास्त्रे श्रीकृष्णार्जुनसंवादे योगशास्त्रे निर्णये संन्यासादि
तत्त्वनिर्णयपर्यायो इति श्रीभगवद्गीताटीकायांसुबोधिन्यां श्रीधरस्वा
मिकृतौ मोक्षयोगो नामाष्टादशोऽध्यायः १८ ॥ रामः

पिशाचभाष्यटीका ४

किं बहुना यत्र मम यस्मिन्पक्षे योगेश्वरः कृष्णः स्थितः यत्र पार्थः
धनुर्धरः उद्यतगाण्डीवः तत्र तस्मिन्पक्षे श्रीर्दैवता विजयार्थ
विजयः शत्रूणां पराभूतिः नीतिर्नयः प्रज्ञा जयसाधिका इ
ति ध्रुवं मतिर्निश्चयः इति करणं गीताशास्त्रपरिसमाप्त्यर्थं ७८
इति श्रीपिशाचभाष्ये अष्टादशोऽध्यायः १८ ॥ ॥

रामानुजभाष्यटीका ५

स्वर्तः ^

यत्रेति यत्र योगेश्वरः कृत्स्नस्य उच्चावचरूपेणावस्थितस्य चेत
नाचेतनस्य वस्तुनो ये ये स्वभावयोगास्तेषां योगानामीश्वरः स्वसंक
ल्पायत्तस्वेतरसमस्तवस्तुस्वरूपस्थितिप्रवृत्तिभेदः कृष्णो वसुदेव
सूनुर्यत्र च पार्थो धनुर्धरः तत्पितृष्वसुः पुत्रः तत्पदद्वंद्वैकाश्रयः
तत्र श्रीर्विजयो भूतिर्नीतिश्च ध्रुवा निश्चला इति मतिर्ममेति ईश्व
रैकनिरताबुद्धिः सर्वोपादेयतो निषेध्य कर्मपरिणामस्य शास्त्रस्य
राप्युच्यते ७८ ॥ इति श्रीभगवद्गीतारामानुजविरचितभव ना^
द्गीताभाष्ये अष्टादशोऽध्यायः १८ ॥ ॥ रामः

अभिनवगुप्तकृतटीका ६

संजयवचनेन संवादस्वरूपसहरत्वेन दर्शयन्स गाढप्रवेयक्रमेणानिरे
तरचिंतासंतानोपकृतनैरंतर्यादेव चमत्कारपरिस्फुटनिर्विकल्प
नुभवरूपतामापाद्यमाने स्मरणमात्रमेव परब्रह्मप्रदायकमित्यु
च्यते एवं भगवदर्जुनसंवादमात्रस्मरणादेव तत्त्वावाप्त्या श्रीविज
यविभवतय इति निश्चितम ७८ संग्रहोऽयमस्याज्ञानविमोहमयपरम

श्री-
गी टी
प्र-

347

र्थीमत्वादिभिन्नोऽपि येनाप्यहमात्मविबोधहेतवे यान्विलसविकल्पा
निगमय यत्किंचित्स्वरसोचितं दिव्यनिजव्यापारमात्रस्थितेर्हेलातः
कृतेनानेन समस्तकलंसंपद्यतेशंकरे इति श्रीभगवद्गीतार्थसंग्रहे
ष्टादशोऽध्यायः १८ ॥ श्रीमान्कात्यायनोऽभूद्वररुचिसदृशः
प्रस्फुरद्बोधरश्मिः शैलेन्द्रनोयः स्थिरमतिरभवत्सौशिका
लोनिविद्वान् विप्रः श्रीभूतिराजस्तदनु समभवत्तस्य सूनुर्म
हात्मा येनामी सर्वलोकास्तमसि निपतिताः प्रोद्धृता भानुनेव
तच्चरणकमलमधुपो भगवद्गीतार्थसंग्रहं व्यदधात् अभिन
वगुप्तः सद्द्विजलोटककृतवेदनावशातः अतत्रदमयप्या
र्थवायथार्थमपि सर्वथानेव विद्धामस्तयनीयेहकृत्यमिदं
बोधवार्थीह परिपूर्णोऽयं श्रीभगवद्गीतार्थसंग्रहः ह्यौति
श्रीनयनचरणचिंतनलब्धप्रसिद्धेरभिनवगुप्तस्य शिवे
ऽभिनवरूपाशक्तिस्तद्गुमोयामहेश्वरोदेवः तदुभययामा
मलरूपमभिनवगुप्तं शिवे वंदे ॥ ॥ ॥ ॥

...[illegible]... टीका ८

नदेवं विश्वरूपदर्शनेऽर्जुनो गांधीभीष्मवजयद्रथांश्च कर्णेनत्था
न्यानपियोधवीरान् मयाहतांस्त्वंजहीत्यादिभगवद्वाक्या
नितः प्रमीचवौष्टनराष्ट्रस्य पुत्राः सर्वएव ते चूर्णितेरुत्त
मांगे स्मायजैनस्वाकानिवधायन्मयोवाक्षुनामेवत्रने
नेरनवपुत्राणांजीवनसंदेहः किंपुनराज्यप्राप्तिरिति मन
साविचार्यपांडुपुत्रेभ्यः सर्वसंदेवाश्रीकृष्णं शरणंगताश्च
णारन्त्वणांकार्यमित्याशयेनाहयद्येति यत्रयेषांपदे
योगेश्वरेश्वरः कृष्णोवर्तते तदुक्तं दिव्यगीकास्त्र कथं
रोनमनोभूमेर्निर्वृतिः फलमाप्यते कृष्णनाम्नासमा
म्नातःसर्वाम्नायार्थईरूपाइति यत्रचनरूपपानसाधि
नसकलधनुर्धारिषुः पार्थोयत्र धर्मेणांडीवधन्वापरमेश्व
रस्यविभूतिर्वर्ततेतत्रैवश्रीः राज्यलक्ष्मीस्तत्रैवविजयल
त्रैवभूतिकतनेनरेश्वर्यंतत्रैवध्रुवाप्रबलानीतिर्नयमार्गो

नतुमायिनां नवश्रयाणां लाक्षागृहगरदानस्यानन्तरं जायावस्त्रहरणा
दिकूटकारिणामिति मे मतिर्निश्चयः ततः कर्मभिरंतस्याद्विपवैरिणः
तराष्ट्रं प्रति संजयवचनं तव पुत्रा दुरात्मानः प्रतमाश्च वमसुनालु
धार्तराष्ट्रं तम् युधिष्ठिरानन्तरानुशोचितुमर्हसीति तथाद्याचरणेऽपि केऽपि द्रौप
दीहरणेऽभजनो युधिराजा जपरूपः शिवप्रसादयतप्रसादयाचे जय
मर्जुनात् इति राजाब्रवीद्देवेनेति देवस्त्वमब्रवीत् कृतेऽजेनं महाबाहुं दे
वैरपि कुरुसत्तम यमाद्वरजितो देवेशो वचनाग्निदायकः प्रयाने शास्त्रवि
दुर्घतेन हास्येन गोपितमिति ॥ अथ संजय सत्यं तन्राद्दुरस्य च हार्दं याप
नं घते ॥ पोतात्ता वेश्मदाहार निविषमविषाद्वियशापाहृत्वा ने दुहैरू
तान्स्भार्यायाश्च वतिपरिभवात्संजगोपस्वभक्तान् हतः स्त्रुतस्य भ्रला
सत्रुधिनिजजनैः किं करिष्यसुपेक्षारंभेवेनावकानाग्निगणाहतस्यि
योजीविते ख्यातुरां या उपनिषदुपदेशानी द्रावाणीर्द्द दिवसतोपिज
यानयः सपत्नान् स्वचरणाशरणस्पर्पदुस्तुतैः सच किमनयमभवत्रि
हतमेतान् कालेविलप्रलयहेतरश्चिंतामशाक्तिः शमेषु नेनतनयो
युधिष्ठिरात्पुमर्षः पार्थस्य वानिहतमारणा कर्तराजेषु यो पयेशोभव
निसंजय नाजीवेन रणो मरणमस्ति वेच्छरणमागानेः किं भवेतनो
पियदि जीवनं किमनतदृशुनो किं श्रेष्ठा अथापि यदि जीवानेवरम
नोम्हनिर्भयज्ञामि इदमन्तसिचिंतयन् कुरुपिनायन्त्सोमभूतं अथा
ध्यायनामर्थं ॥ अथापारेर्थस्य समाप्तिकदशाभिरभिप्रायमुक्तः क्रमेणा
संसारसागरस्वदेशि विषमानिष्टतिज्ञानकर्तृक्रियादिः ब्रलाप्रमिरू
पायः पुनरपि गदितो द्वादशे सैर्गहार्थस्त्वेनोद निष्टत्वसमरकृतेनम
कसंदेहजातः ॥ जगति समवतीर्णा मज्जसाक्षादपर्णासर्द्दसिद्धपदक
मोऊवेनावस्वप्रस्मारणभुवि निरहनानामप्यभूदुर्बलान्तोपडुपतिवि
सुखानारोरवः कौरवाणां गणस्थिरमिशारोचैर्यानाराज्ञानमोदेसदव
राजपभीमद्रोणकर्णाश्चहत्वा फलितविजयलक्ष्मीर्याद्देवशोपदेशा
दधिगतपरमार्थः पार्थ आसीत्कृतार्थः ऊरुद्वंद्वं कुरुदत्तं कुरुदवेश
ईहितं सदसद्गति समरे कुरुदेवज्ञमर्जुनेन १ अनाहता परावाणीमे
वगीतेनिभावय निर्जितेनात्मनवसन्तोषवणोविषयीकरु पनावानेव

पार्थ

प्रागल्भ्याद्गुरुमवाप्य... [illegible] ... ॥ प्रायः
प्रायः सकलनिगमानां मध्ये गतः सुधीप्रियैर्येस्तु भगवद्गुरु[illegible]

श्री॰
गी॰ टी॰
प्र॰

गीतार्थः पार्थप्रतिनिवेदितः चतुर्दशप्रकोष्ठकैः श्रीकृष्णेन परा
त्मनः २ श्रेसमारूढ्य केसारैः सेमागार्थि विलेचय हृत्सोने सप्रशंसेय
परमार्थप्रपोदिता ३ ह्रदः संदर्भगर्भप्रभुगहनगिराम् ग्रज्ञः सा सी
मामीमांसामांस लोनस्कारणपरिणामस्वांगनीनोगतिः कासाके
पीरथीरान्नदपिरचयितं भाष्यमयोगभाजोंप्राग्र्यवशात् विरेसा
शनेरानुभवरसिकास्केत्र सहृज्जनाः स्वविश्रांतिं यांति प्रसभमपरेले
हविहृतौ गभीराभिप्रायान् स्यागमवचनेसंधृनवनोकवीनो स्वग्रेष्ठे
भवति बहु विस्तारजभये कृतस्तत्र पाये तु रसिगमनाहृष्टणामनः स
विस्तारः स्ताद्यः शमयति हि यः संशयभरं विदित्वा वेदार्थं दशा
वदनवाणीपरिणतेशतम् स्तोकव्याख्या परमरणीमेषामकरवं नतो
गीताभाष्यं निखिलनिगमार्थं कनिलयं विपश्चित्सार्थः स्वर्थीनहृषीकरु
णापांगशरणः ॥ वेदव्यासमतं कृत्स्नं वेदव्यासः सएव हि भेदव्या
सेजहासेष वेदविमासम्ये वैकेशोदोदंक्रदर्शनीर्थनिकटेपार्था भि
धानेभवंतं जयोतिषिकान्वये समभवच्छ्रीजानराजाभिधः तस्सूनु
र्निगमागमार्थनिपुणः सर्वाभिधानः कविः कृष्णप्रेरणयानदर्पा
णायियागीतार्थभाष्यं व्यधात् ७८ इतिश्रीमद्देवज्ञपंडितसूरिविर
चितायां भगवद्गीताटीकायां परमार्थप्रपायां सकलगीतार्थसंग्रहे
मोक्षसंन्यासयोगो नामाष्टादशोऽध्यायः १८ ॥ ॥

इतिगीताटीका ८

एवं च सति तत्र विजयसंभावनां स्पष्टमाह यत्रेति यत्र योगेश्वरः
योगेश्वरः सर्वयोगसिद्धीनामीश्वरः सर्वज्ञः सर्वशक्तिर्भगवान् कृष्णो
भक्तदुःखकर्षणो नारायणो विष्णुर्दयादिकमनिष्ठति यत्र पार्थो
धनुर्धरो गांडीवधन्वार्जुनस्तिष्ठति नरनारायणौ तिष्ठतो यत्र तत्रैव
श्रीर्यदेशी राज्यलक्ष्मीः विजयः शत्रुपराजयनिमित्तकउत्क
र्षः भूतिः सर्वतो राज्यलक्ष्म्यादिवृद्धिः ध्रुवा वश्यंभाविनी निर्णयः
तैर्लक्ष्मीविजयभूतिभिः पांडवैः सहमेयं... विचार्यात्मनो भगवदवतारही
वेदेशी हयकं यांक निशावाभिमीमांनकीतिहृर्येगीदिः परिभा

विनेमनसितिमानेदेदेहेसमेहेषाभिः परिकंपयंतनमस्तुरंक्षाने
दयितेस्तरान्स्वाश्रीचिंनयंतेगिरेमसननराविष्याणांघेतेमद् १
विजयरथमरत्नघोरथ्यांगंदयानः परिभवतिहिभीक्षेपार्थसेना
स्ववाणां विगलितकटिवासाप्रवनयस्पादयानैर्भुवमतिष्टनपादैना
वृताञ्जैनेन २ भगवतीत्रिकेजसश्रीगोपालस्फेरणवः क्रियास्वैः
भवेवावामंभुराशेखशोयनं ३ भुक्त्वाशर्पमाकमष्टिविपदमशाम
[illegible]पट्टीनवंभुहिजातेः दत्वाभूतीः पराःस्वाष्टनकरइतिमादेहि
मायामयोक्तेः हौपयाः शाकलेशात्रिभुवनमगघयज्ञनोडःस
साघःस्थितोनःकामिलान्सोक्तिविवरणानोमहद्गिःप्रीयतांसः ४
श्रीगोविंदविहारभूषितभवोवेदावनात्यागिदृशिक्रोषानात्रिगेषु
रेमनिभरत्नानानयायेदिनाःश्रीसेनाहमचोवसेतिवनमालीन
तत्कुलेमत्रुपः श्रीगीताशयचंद्रिका परिसमाप्ताविघ्नतस्तान्।
हाना ५ ॥७८॥ इति श्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयो
गशास्त्रे श्रीकृष्णार्जुनसंवादे गीतार्थनिगूढार्थचंद्रिकायां वनमा
लीविरचितायां मोक्षसंन्यासयोगोनामाष्टादशोध्यायः १८ ॥
टीका १

ॐ तत्सद्वैजयंती

त्वनुयत्वयोक्तेतत्सर्वं [illegible] मयाकृतेपरंत्रमन्वत्रसविजयोभविष्य
तिनवेनिव्यमदेत्याशंक्य सगुत्रविजयाशांपरित्यजेत्याह यत्रे
ति यत्र [illegible] घुहादीकमंगीयोगेश्वरोनिखिलाखिलनाचेतनानोव
स्तुतोयस्यमायालेयोगशाहवाव्याख्यातेषामीश्वरोनियंताब्रह्मादिस्या
वरोनाखिलमायाणिस्वरूपस्थितिमहत्तिकोःनेतगुणशक्तिकःश्रीकृ
सोयदुकुलोद्भवोवसुदेवपुत्रःसारथ्यादिपर्यंतसर्वमित्रसाहाय्यकारि
तयावर्ततेयत्रचयत्रहेतोःस्तितोःविंदलोदण्डमानविंशविंशगांडी
वकोदंडपाणिःहस्मानस्यःकेशिकेसाध्यमि[illegible]मित्रोनरावतारःपा
र्थःकृष्णस्यप्रियःसखाःपुत्रःपिताकिनोपितवीर्यानारायणसहायः
कृष्णसारथिःकृष्णोवर्ततेनत्रैवोभयत्रसाधिष्ठितेयमेपुत्रपदेश्रीरा
जालक्ष्मीर्ध्रुवास्थिराभवेत् नत्रैवविजयःशत्रुपराभवहेतुकःपरमो
त्कर्षोधृवस्तत्रैवचभूतिरुत्तरोत्तरैश्वर्यविवृद्धिर्ध्रुवानैवनीतिर्नी
यश्चहेतिधृवेतिममव्यासकृपापात्रस्यमतिर्निश्चयासिकाउहिभैव

श्री-
गीटी-
श्र-

मीतिशे ७८ कर्मभूमिसमुद्भूता कलहृद्वसमाश्रिता श्रद्धांकुरभा
वबीजा मत्स्यनिश्चयमूलिका १ कर्मशाखाविनिर्विस्तारा समाधानैकप
ल्लवा यम्पत्तिमत्तामिसविकल्लिकामालिकाचिता २ प्रेमानंदात्मिका
भक्तिकुसुमास्तवसौरभा पूतिसौरभसंपृक्ता भक्तभ्रमरसंकुला ३
श्रवणाराधनागायननिष्ठासमाश्रिता नवधायविहंगावभेदाभेदाम
तप्रदा ४ भगवज्ञावसंभावितमिश्रकिसहश्रुफलालना गीताकल्पल
तानस्याः स्पर्शडक्षेविनिर्मिता ५ कल्पभावरताउहिसृष्टैकयाशि
तामया मालावैवेजयेऽस्याख्याकल्पकेऽसमर्पिता ६ यारशिशक्ति
येकेदसर्वशास्त्रार्थसंमतो ज्ञानभक्तिरतालोवैयासंतिभगवन्मदं
७ सकलभुवनवीजसर्वशास्त्रार्थवीजं नुतममरैशेः कुवलयद
विदेहकोटिकंदर्पगोरं त्वगतितजनानां सिंधु चौमिकृत्स्नस्ववेश्र८
णास्वयोनिजगयोनिगोपीकांतेरमापतिं परमव्योमनिलयंपार्थसूतंस
माश्रये ९ विविरसशगुलाप्स्लोकसंख्यावमाना विजयसपकुंभूषी
नयुवैजयंती श्रगानवस्त्र शाकेकांतिकेसरीवेदेस्वरग्रहस्मभवादे
र्णीनामनिटीका १० वैशंपायनेगीतासुगीताकर्त्तव्याकिमन्यैः शा
स्त्रविस्तरैः याचैषपद्मनाभस्य मुखपद्माद्विनिःसृता सर्वशास्त्र
मयीगीता सर्वदेवमयो हरिः सर्वतीर्थमयीगंगा सर्ववेदमयो मनुः
गंगागीताचगायत्रीगोविंदेवहृदिस्थिते चतुर्गकारसंयुक्ते पुनर्जन्म
नविद्यते षट्शतानिसविंशानिश्लोकानांप्राहकेशवः अर्जुनःसप्त
पंचाशत्सप्तषष्टिस्तुसंजयः एकश्लोकमेकंगीतायामानमुच्य
ते भारतामृतसर्वस्वगीतायामथितस्यच सारमुद्धृत्यकृष्णेनअर्जुन
स्यमुखेहुतं मंगलंराधिकाकांतनामतंध्यानमेवच मंगलेनियमाने
दनामैवेतद्वोमस्तु १ इतिश्रीमत्परमहंसपरिव्राजकाचार्य
दमनातिप्रबलकंदीरवानिशयसकुमारनारदनियमानंदसेनति
श्रवरप्रबलप्रतापपार्थसवसरिमाभितकमलदासस्यान्तेवासि
नागिरिधारिदासेनविरचितायांश्रीमद्भगवद्गीतार्थकुसुमवैज
यंत्यांसंन्यासमोक्षयोगोनामाष्टादशोऽध्यायः १८ ॥

+ एवंसतिसर्वधर्मविजयादिसंभावनांपरित्यजन्
त्याह॥ + सर्वत्रयस्मिन्नपितिष्ठिरपदेयोगेश्वरः सर्वयोगसिद्धीनामीश्वरः स
मधुसूदनी टीका १०

विज्ञः सर्वशक्तिर्भगवान् श्रीकृष्णः भक्तदुःखकर्षणात्कृष्ण इति
नारायणः यत्र पार्थो धनुर्धरः यत्र गाण्डीवधन्वा धनुर्धरः शिष्यस्त्वर्जुन
नरः तत्र नरनारायणाधिष्ठिते तस्मिन् युधिष्ठिरपक्षे श्रीराज्यल
क्ष्मीः विजयः शत्रुपराजयनिमित्त उत्कर्षः भूतिरुत्तरोत्तरं रा।
ज्यलक्ष्म्यादिवृद्धिः ध्रुवा अव्यभिचारिणी इति सर्वत्र संबध्यते नीतिर्न।
यः एवं मम मतिर्निश्चयः तस्मादधुनापि पुत्रविजयाशां त्यक्त्वा श्रीभग
वत्सहितैः पाण्डवैः सह संधिरेव विधीय
तामित्यभिप्रायः ७८ वंशीविभूषितकरान्नवनीरदाभात्पीता
म्बरादरुणबिम्बफलाधरोष्ठात् पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात् कृ
ष्णात्परं किमपि तत्त्वमहं न जाने कोऽन्यथात्मकेशान्त गीताख्येयेन
निर्मिते श्रीगोविन्दमुखा
निर्मिते शास्त्रिमध्यातषट्के श्रुतसे भगवते नमः श्रीगोविन्दमुखा
रविन्दमधुना मिष्टं महाभारते गीताख्यं परमं रहस्यमृषिणा व्या
सेन विख्यापितं व्याख्यातं भगवत्पादैः प्रतिपदं श्रीशंकराख्यैः
पुनर्विस्पष्टं मधुसूदनेन मुनिना स्वज्ञानशुद्ध्यै कृतम् इह योगि
विमोहयन्मनः परमानन्दघनः सनातनः गुणदोषभेदेषु यवन
स्त्रणाचलोऽयं दयितैव यज्जनः श्रीरामविश्वेश्वरमाधवानां प्रसाद
मासाद्य मया गुरूणां व्याख्यानमेतद्विहितं सुबोधं समर्पितं तच्च
रणाम्बुजेषु ७८ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवि
श्वेश्वरसरस्वतीश्रीपादशिष्यश्रीमधुसूदनसरस्वतीविरचिता
यां श्रीभगवद्गीतागूढार्थदीपिकायां मोक्षयोगो नामाष्टादशोऽध्यायः १८

सप्तश्लोकी टीका ॥

एवं च मति पुत्रैस्तु जयस्याशां वलीयसी त्यजैव सर्वथा राजन्भ
गवेतं हरिं स्मर १ यस्मिन्यो धिष्ठिरे पक्षे योगमायेश्वरो हरिः समस्त
योगसिद्धीनां योगसाध्यस्य योगिनो २ ईश्वरो भगवान्कृष्णः स
र्ववित् सर्वशक्तिमान् भक्तदुःखहरः श्रीशो विभुर्नारायणो व्ययः
३ शिष्यस्तस्मीयदुत्पाणटर्ह्रैवा पाण्डुनंदनात् यत्र गाण्डीवधन्वाच त्रि
हस्तेवीर्यर्जनो नरः ४ तस्मिन्यो धिष्ठिरे पक्षे नरनारायणाश्रिते श्री
राज्यलक्ष्मीर्विजयः शत्रुहानिर्निमित्तकः ५ समुत्कर्षस्तथा भूतिः

श्री॰
गी॰टी॰
१८

350

श्रीविशेषोतिविस्तरः राज्यलक्ष्मीविहृदिस्थस्यक्षणभाविनीश्र
वा ६ श्रवेसम्यचयोत्तेयः सर्वैर्वाविशेषतः नीतिर्नियोयथाशा
स्त्रमेवमेनिश्चयोन्वय ७ तस्माद्वैसर्वथाराजन्वृथा७वजयाशिवे
नकृष्णाश्रीभगवत्कृष्णा नरहीनेश्वपाण्डवैः ८ लक्ष्म्यादिभागिभिः
साकंसेवितैवविधीयते इत्यभिप्रायएवासौसंजयस्यावगम्यते ९
यतोधर्मस्ततःकृष्णोयतःकृष्णस्ततोजयः इत्युक्तिरीमाधर्मोया
संयचयस्मादुलीयसी १० तस्यप्रवृत्तयस्तस्मादास्वर्ग्यास्तपराजयः
महामोहोस्त्वाम्संप्रत्ताशितव्याससंपदा ११ साधर्मम्लिकायस्मा
कृष्णपत्रावलंबिनी श्रीमतीकृष्णविरुत्वावल्लीननतायमा १२
रःफलभःस्वयं १३ इत्येवंरूपकस्योपसंहारोमुनिनाकृतः यतः
सर्वेस्वसंपन्नेकृष्णपादानुरागिणां १४ नेवास्तिदुर्लभंकिंचिन
तकद्वैतकभागिनो सिद्धमित्येवमाशीर्योरहस्यंसर्वमंगले १५ १८

इतिश्रीमहाभारतेशतसहस्र्यांसंहितायांवैयासिक्यांभीष्मपर्व
णि ॥श्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णा
र्जुनसंवादेमोक्षसंन्यासयोगोनामअष्टादशोध्यायः १८ ॥

स्वाभाविकानवधिकातिशयेशितोजस्तेजोबलायवलयैर्यगुणौ
कवार्धिः वेदान्तवाक्यपरिशीलनतत्त्वनिष्ठैर्योगीश्वरैरपदे
वतनोमुकुंदः १ शुद्धोबुद्धोविमुक्तःकृतिनिधिरवरोगीतमद्वेषमा
नवर्यभूमिर्यस्माज्जातेसमस्तंजगदिदमरम्नात्याप्यसर्वेस्थितोयः
यस्यांशांशावतारैःस्वरनरवनजैरस्तिनेसर्वमेतत्भूमानेमनुं
देहादिगतमसमलंकृष्णमेवप्रपद्ये २ प्रसन्नगंभीरमनीवविस्त
नेतिनिर्गुणवेदान्तैर्विविनिर्मितं सथारसंशासुमगायगोचरं।
स्तुवोयमिष्टंकिलयेनतेभ्रथे ३ यदुपतिमपिरामंसर्वविश्राम
धामाभयपदमकामंवामदेवादिधामं सकलसुरललामश्यामा
मारामभूतिंभवजलधिविरामंनौमिकृष्णंसुरामं ४ कृशाङ्गी
नोखहरिमावसरोजाद्विगलितकचाम्नाकैरुद्धिर्विषयविषयके
निपतितानत्यापिश्रीकौतमअरागणालक्ष्मीविरचितंकटाक्षैः

त्र्याख्येहाव स्तनवतो किन्तु स्वलभे इदं गीताशास्त्रं परमगुह्यं षा
ष्ठैकनिलये त्रिकाण्डे वेदार्थं सकलमिह संगृह्य कथितं स्वयं श्री
कृष्णेन स्फूर्तिविशदतत्त्वेन विभ्रमाज्ञ पाद्यानाज्ज्ञानाच्छ्रुतमपि
फलमेव स्वपियो ६ कृतिभिरपि कृतं यत्नप्रशंसं तिलोकं किम्
भिन्नमतिनेहाहं स्वहन्तल्याष्यपि ममभवतकण्ठविनिकृष्टपादे
त्वरागहृदि निमनस्ति निधायतं ७ ॥ ॥ ॥

नीलकंठी टीका १२

यस्मादेवं नेतव्यो भगवांस्तदनुग्रहीतोर्ज्जुनश्च तपिहिरपदेति स्ति
प्रतस्त्वयाजयाशावकार्येत्याह यत्रेति यत्रपदे अत्रेति सर्वा
त्रसंवध्यते श्रीर्दिव्यसभादिशोभा विजयः प्रसिद्धः भूतिरैश्वर्यं
सर्वनियंत्रत्वं नीतिर्नयश्च एतत्सर्वं तत्रैवास्मिन्पक्षे ध्रुवमिति
मममतिः प्रतः पाण्डवैः सह संधिरेव कर्तव्य इति भावः ७८
इति श्रीमत्पदवाक्यप्रमाणज्ञमर्यादाधुरंधरचतुर्धरवंशावतं
तंसश्रीगोविंदसूरिसूनोः श्रीनीलकंठस्य कृतौ भा
रतभावदीपे भीष्मपर्वणि गीतार्थप्रकाशे अष्टादशोऽध्यायः १८
॥ ॥ ॥
॥

पतु सज्जनो मे

351

अथ स्वपरजयपराजयाभिप्रायेण धृतराष्ट्रो यदपृच्छत्तन्निश्च
यमाह । कृष्णस्साक्षान्नारायणो यत्र योगेश्वरः योगस्य
कार्यकरणयोरभेदन्यायात् योगसाध्यानामन्तर्धानस्मृ
तिः कान्तिरित्यादीनां याज्ञवल्क्यादिप्रोक्तानां सिद्धीनां वक्षेशा
वैश्वरूप्यदर्शने पुष्कलं तद्दृष्टापूर्वीणामीश्वरः संपादकः अत
एव योगानां पाण्डवानां जयार्थं युक्तीनां संपादकः तथैव ते
ष्वपरप्रयुक्तानामपद्रवयुक्तीनां निग्राहकश्च यत्रास्ति तथा
पार्थः पृथिव्यां मुनिसादेनेन्द्राज्जातः नरावतारोर्जुनः धनु
धरः यत्नुर्निर्वीतकवचादिवधेषु प्रतिहतं विजयसाधनं गाण्डीवा
ख्यं चापं धारयन्नाप्युपनास्य प्रयोक्तास्ति तत्रैवं नरनारायणपरि
पालिते युधिष्ठिरपक्षे श्रीः सर्वार्थसम्पत्तिः विजयः सकलवि
पक्षक्षपणरूपोत्कर्षातिशयः भूतिरनवच्छिन्नापुत्रपौत्रादिस
न्ता तथाध्रुवाचिरस्थायिनी नीतिः अर्थतो राजनीतिसम्भवा
कीर्तिश्चास्मात् मम मतं दीकृतं कृष्णार्जुनप्रभावस्यैवं ममेति
निश्चय इति सिद्धम् ७८ ॥ इति श्री आनंदी भगवद्गीताटीका
समाप्तम् ॥

+ स्वपरयेनाभिप्रायेण कुरुपांडवसैन्ययोर्जयपराजय
जिज्ञासारूपेण धृतराष्ट्रः पृष्टवांस्तन्निश्चयमाह

रामकंठी टीका ४९ ॥

+ यत्रपदेन वैश्वरूप्यदर्शनादिना प्रकटितानन्यसाधारणयोगैश्वर्य
महिमा भगवान् हरिस्तिष्ठति यत्र चाप्रतिमनिजपराक्रमपरितो
षितपशुपतिः पार्थः पृथासूनुः कार्मुकभृत्तिष्ठति तत्र पक्षे श्रीर्ल
क्ष्मीर्विजयः सकलविपक्षक्षपणात्सर्वातिशायित्वं भूतिर्भावः समा
वास्थिरेति मम मतं दृष्टकृष्णार्जुनप्रभावातिशयस्येममबुद्धिरितो
म् अथाप्यात्मनगेन्द्रवः कविवरस्यायं प्रयोगेनैव निर्दिष्टः फलि
तं विभर्ति सुजनो यस्मिन्नराभ्युद्गमम् श्रद्धाभक्तिसखीसमर्पितन
वाकल्पक्रियाज्ञासिनी सर्वैश्वर्यसमागमाभ्युदयदामासाद्य संविह

श्री॰ गी॰ टी॰ ग्र॰

प्रम् शास्त्रार्थाभिनवप्रकर्षसरसामेषां कवीन्द्रस्य वा गिरस्तद्ध्येयः परि
चर्व्यतां सहृदयैस्तस्मात्त्वरामादरात् दिव्यामोदरसान्स्वभूरिकुसु
मस्फीतानवोद्यानभूर्भृङ्गो नैव यतस्ततो नयति वा नैषा पुनस्तादृ
शान् दधति वह्वः श्लाघ्येकर्मण्येव रूपमहो नवं कश्चिदपि पुनस्त
न्निर्वाहः कथं प्रतिपद्यते नियतिनियतं तेजोभाजः स्फुरन्ति सह
स्रशस्तिमिरविदलं धाम्नः सर्गे विधानमलं रविः भावे क्वापि वि
जृम्भते निजगुणौचित्येन जित्वा जगद्दुर्वारः स्वमनोविशेषविडंबा
वीनव्यपेक्षान्तरः यन्मूषे विविधौषधीरसगुणस्वादैकहेवाकिनो
धावंस्सेव हि पंकजे मधुलिहालं मान्यपुष्पस्पृहाः आमोदो मलय
द्रुमस्य पवनैर्विस्तार्यते दक्षिणैः राज्ञायाप्यलयोयमन्यविषयं माय
माद्यन्ति मदोद्धराः स्फीतोपि स्वगुणः स्वयं गुणवतावक्के कथं शक्य
ते तेनावर्जयितं जयन्त सज्जनाः केचिन्नाभ्युद्गमाः योनारायण
रत्नभक्त्युतनिधिः श्रीकन्यकुब्जे द्विजस्तद्देशे स्वगुणप्रकर्षरवि
तो मन्त्राकरणात्क्षोभवत् तस्यैषा महृशान्तजेनेन रचिता रामेणवि
हृजनश्लाघ्यत्वात्सफलक्रमेण भगवद्गीतापदार्थप्रथा येसत
पीनद्रुतारानिकरमणिशिखादीपकादिप्रकाशसंततोप्यनन्तमौ
त्स्यात्कचनविनिगतनार्यांतिनाशांनिशायाम् नेमकुकारप्रगल्भ
स्वगुणविलसितेनाशुविघातयतान सर्वान्समप्यकुपदार्थांजयति
दिनपतेर्ज्योतिनिमृर्ग्लितंतन ७८ इतिश्रीराजानकरामविरचि
नेवाकार्थान्वयमात्रे सर्वतोभद्रनाम्नि भगवद्गीताविवरणेष्टाद
शोध्यायः १८ ॥

येनाभिप्रायेणकृष्णपाण्डवौ सैन्ययोर्जयपराजयजिज्ञासाहृपेणधृतराष्ट्र एवं तत्र निश्चयमाह ॥

श्वरोः

+ यत्र पत्ने योगेश्वरः श्रीकृष्णो वर्तते ... टीका
धरः तत्र पत्ने श्रीराज्यलक्ष्मीस्तत्रैव विजयः यत्र च पार्थो गाण्डीवधनु
वकर्णे तत्रैव विभूतिरुत्तरोत्तरामिवृद्धिर्नीतिर्नयोपि तत्रैव ध्रु
वानिश्चिते ति सर्वत्र संबध्यते इति मम मतम्पत्र दृष्टकृष्णार्जुनप्रभा
वातिप्रायस्य मतिनिश्चिय इत्यर्थः गीताशास्त्रं समस्तं योगेश्वरसमर्थौ

वगाहितं संक्षिप्य तदर्थयः प्राहतं नौमि मिमाथवं शास्त्राम्बु
स्तत्त्वा विहृतकवितकवित्सा दात्कृतेः काप्यनुमानतोत्र हि
प्रामाणिकीत्या श्रियतांबुधाः सदाटीकानवेषा स्वकपोलक
ल्पिता नास्मिन्कार्ये कोश लोमीलनाय व्यासवर्यवालोभनोवा
प्रहृतः किंतु श्रीमन्माधवेनैव सोहमस्मात्न्यः प्रेरितोतः स्फि
तेन तस्मादुद्धृत्याहृतोकाप्यवीद्यपूर्वां सोकीदोष हृष्टिनै
कार्या प्रेक्षावद्भिस्तत्समाधेयमेतत्पर्यालोच्यकापि वेहिस्तं
स्यात् १८ इति श्रीमहाभारते शतसहस्त्र्यां संहितायां वैयासक्यां
भीष्मपर्वणि श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशा
स्त्रे श्रीकृष्णार्जुनसंवादे टीकायां मोक्षयोगोनामाष्टादशोध्या
यः १८

+लक्ष्मी राम इति द्विजोत्र भिव
तन्काश्मीरभूमंडले मे रोमी
नुलपान्नदेहजननो राजानगो
पालकात् श्री शाके द्वि ३ लाङ्क्षि
भूपरिमिते माते स्थिताबाब्धि
ने शुक्लायां प्रतिपद्यजां त्रिनिर
तो गीता सुटीकां व्यधात् +

पंचोलीटीका

प्यां

कस्तत्राणं राज्याभिषेकादिशंकोपरि ... शयेनाह यत्रेति किं
वहुना यत्र येषां पक्षे योगेश्वरः सर्वयोगिनामीश्वरः सर्वयोगबीज
भूतः कृष्णो राजते यस्मिन्पक्षे धनुर्धरो गांडीवधनुर्धरोर्जुनो वा
र्ततेतत्र पांडवानां पक्षे विजयः तत्र श्रीर्विभूतिः राज्यलक्ष्मीर्नीतिर्वा
जयः भूतिस्त्रियो विशेषः उक्तोनराहृद्धिः ध्रुवाव्यभिचारिणी
नीतिः इति मे मतिः १८ इति पंचोलटीकायामष्टादशोध्यायः १८

... मसिद्धांधिनी

...... पूर्वेणाभिप्रायेणमामकाः पां
डवाश्चैव किमकुर्वतेति धृतराष्ट्रः पृष्टवांस्तेतस्याभिप्रायं व्यर्थमेव
मेव निरूपयन्नाह यत्रेति यत्रपक्षे योगिनामीश्वरः श्रीकृष्णो वर्तते
यत्र च पक्षे धनुर्धरो गांडिवधनुर्धारी पार्थो प्रतिमपराक्रमपरितोषि
तः पशुपतिस्तिष्ठति तत्र श्रीर्लक्ष्मी विजयः सकलविपक्षपराज
यो भूतिस्त्रियो ... नीतिर्नयो पितत्रैव
सर्वाति प्रायित्वं भूतिरुक्तोनराभिहृद्धिविभूतिश्च नीतिर्नयोपि तत्रै

353

वद्भवास्यितातिप्रत्यक्ष्हस्टक्तस्वार्थेनप्रभावातिशयस्यममेतिदर्शितम्
निश्चय इतिमद्वंपप्रेयप्रवरेममइमिति ७८ इतिश्रीभगवद्गीतासु
पनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेमोक्षसंन्यासयोगोनामाष्टादशोध्यायः ॥१८॥ शुभमस्तु श्लो
अ०१ श्लो०१४३५

मधुभाष्य

७८ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीम
द्भगवद्गीताभाष्ये अष्टादशोध्यायः ॥१८॥ श्रीकृष्णार्प
णमस्तु संवत् ॥१८२५॥ चैत्रवदि १४॥

भाषा अनुवाद टीका

इससे हे महाराज अब तुम अपने पुत्रोंके राज्यलाभकी शंका भी परित्याग करो। इस आशय पर कहते हैं कि जिसके पक्षमें योगेश्वर श्रीकृष्ण वर्तमान हैं और जहां गांडीव धनुर्धारी अर्जुन तयार है तहांई श्री कहे राज्यलक्ष्मी औ विजय तथा भूति कहे उत्तर उत्तर अभिवृद्धि कहे बढ़ती औ नीति जो न्याय सो सब निश्चय से है ऐसी मेरी मति है इससे अब तुम पुत्रोंको साथ ले श्रीकृष्णकी शरण जायके श्री पांडवोंको अपना सर्वस्व देकर प्रसन्न करावते हुये अपने पुत्रोंकी प्राण रक्षामात्र करो यह संजयने धृतराष्ट्रको कहा ७८ इति श्रीजगन्नाथप्रसादशुक्लविरचितमनभावनीभाषाटीकायां अष्टादशोध्यायः १८ ॥

श्रुतिपावनि है अघपावन

दोहा

जहां योगेश्वर कृष्ण है धनुर्धर पार्थ जहांहि तहां जीत विभूति नीति स्थिर यह मति मोरी आहि ७८ इति शुभम्

सं १९४५ भाद्र शु० ५ ॥